To ANIMATE, *v. a.* जीव् in caus. (जीवयति -यितुं), प्राण् in caus. (-प्राणयति -यितुं), आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, परिविश्वस् in caus.; उत्था in caus. (उत्थापयति -यितुं), उद्युज् in caus. (-योजयति -यितुं), प्रोत्सह् in caus. (-साहयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं).

ANIMATE, ANIMATED, *part. a.* (Inspirited) आश्वासितः -ता -तं, उद्युक्तः -क्ता -क्तं, उत्तेजितः -ता -तं.—(Living) चेतनः -ना -नं, प्राणी -णिनी -णि (न्).—(Vivacious) प्रफुल्लवदनः -ना -नं, हृष्टहृदयः -या -यं, रसिकः -का -कं, सारवान् -वती -वत् (त्).

ANIMATION, *s.* (The act of enlivening) आश्वासनं, उत्तेजनं.—(The state of being enlivened, vivacity) प्रफुल्लता, हृष्टता.

ANIMATOR, *s.* आश्वासकः, जीवदः, प्राणदः, प्रोत्साहकः.

ANIMOSITY, *s.* वैरं, द्वेषः, विरोधः, मात्सर्य्यं.

ANISE, *s.* छत्रा, साल्लेयः, शीतशिवः, मधुरिका, मिश्री, मिश्रेया.

ANKER, *s.* रसानां परिमाणविशेषः.

ANKLE, *s.* गुल्फः -ल्फं, घुटिका or घटिका, घुटिः *f.*, चरणग्रन्थिः *f.*

ANKLED, *a.* गुल्फयुक्तः -क्ता -क्तं, गुल्फसम्बन्धी -न्धिनी -न्धि (न्).

ANKLET, *s.* नूपुरः, पादाङ्गदं, मञ्जीरं, पादकटकः.

ANNALIST, *s.* क्रमानुसारेण चरित्रवक्तः, चरित्रलेखकः, पुरावृत्तरचकः, आख्यानरचकः, वृत्तान्तलेखकः, आख्यानसङ्ग्राहकः.

To ANNALIZE, *v. a.* चरित्राणि or पुरावृत्तकथा रच् (c. 10. रचयति -यितुं).

ANNALS, *s.* क्रमानुसारेण सङ्गृहीत इतिहासः, पुरावृत्तं, पुरावृत्तकथा, चरित्राख्यानं, वृत्तान्तविवरणं.

ANNATES, *s.* प्रथमफलं, नवशस्यं.—(Sacrifice of first-fruits) आग्रायणं.

To ANNEAL, *v. n.* रङ्गस्थिरीकरणनिमित्तं काचं तप् (c. 1. तपति तप्तुं or caus. तापयति -यितुं).

ANNEALING, *s.* यत् काचस्य तपनं रङ्गस्थिरीकरणाय क्रियते.

To ANNEX, *v. a.* अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं), आबन्ध्; संयुज् in caus. (-योजयति -यितुं), उपाधा (c. 3. -दधाति -धत्ते -धातुं), आधा; उपस्था in caus. (-स्थापयति -यितुं).

ANNEXED, *p. p.* संयोजितः -ता -तं, उपाहितः -ता -तं, अनुबद्धः -द्धा -द्धं.

ANNEXATION, *s.* अनुबन्धनं, उपस्थापनं, संयोगः, संयोजनं, उपधानं.

ANNEXMENT, *s.* (The act of annexing). *See the last.*—(The thing annexed) अनुबन्धः, उपाहितं, संयुक्तभागः.

To ANNIHILATE, *v. a.* नश् in caus. (नाशयति -यितुं), विनश्; प्रली in caus. (-लापयति or -लाययति -यितुं), उद्धृ (c. 1. -हरति -ते -हर्त्तुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), लोपं कृ.

ANNIHILATED, *p. p.* उच्छिन्नः -न्ना -न्नं, विनाशितः -ता -तं.

ANNIHILATION, *s.* नाशः, क्षयः, प्रलयः, विनाशः, अभावः, समुच्छेदः, लोपः, निर्भावः, प्रलीनता.

ANNIVERSARY, *s.* दिवसः केनापि सविशेषेण कारणेन वत्सरे वत्सरे प्रसिद्धः, प्रतिवार्षिक उत्सवः, वत्सरे वत्सरे सेवितो महोत्सवः.

ANNIVERSARY, *a.* सांवत्सरिकः-की-कं, सांवत्सरः-री-रं, प्रतिवार्षिकः-का-कं.

To ANNOTATE, *v. n.* टीकां or भाष्यं लिख् (c. 6. लिखति लेखितुं) or रच् (c. 10. रचयति -यितुं).

ANNOTATION, *s.* टीका, भाष्यं, टिप्पनी *f.*

ANNOTATOR, *s.* टीकालेखकः, भाष्यकरः, भाष्यकृत्.

To ANNOUNCE, *v. a.* आख्या (c. 2. -ख्याति -ते -ख्यातुं), समाख्या; ख्या in caus. (ख्यापयति -यितुं), आख्या in caus.; विधुष् (c. 1. -धोषति -धोषितुं or c. 10. धोषयति), विद् in caus. (वेदयति -यितुं), निविद्, आविद्, समाविद्, विनिविद्, सन्निविद्; विज्ञा in caus. (-ज्ञापयति -यितुं).

ANNOUNCED, *p. p.* प्रकाशितः -ता -तं, निवेदितः -ता -तं, आवेदितः -ता -तं, अवघुष्टः -ष्टा -ष्टं, आख्यातः -ता -तं, परिकीर्त्तितः -ता -तं.

ANNOUNCEMENT, *s.* ख्यापनं, विज्ञापनं, विज्ञप्तिः *f.*, निवेदनं, विघोषणं.—(News) सन्देशः, समाचारः, संवादः.

ANNOUNCER, *s.* आख्यायकः, विज्ञापकः, विघोषकः, सन्देशहरः.

To ANNOY, *v. a.* पीड् (c. 10. पीडयति -यितुं), अभिपीड्, उपपीड्, प्रपीड्, प्रतिपीड्, सम्पीड्; तप् in caus. (तापयति -यितुं), सन्तप्, परितप्; क्लिश् (c. 9. क्लिश्नाति क्लेष्टुं), अर्द् in caus. (अर्दयति -यितुं), समर्द्, बाध् (c. 1. बाधते, बाधितुं).

ANNOYANCE, *s.* व्यथा, क्लेशः, विडम्बना, दुःखं, पीडा, बाधा.—(The act of annoying) पीडनं.—(A source of annoyance) कण्टकः, -कं.

ANNOYED, *p.p.* क्लिष्टः -ष्टा -ष्टं, परिक्लिष्टः -ष्टा -ष्टं, सव्यथः -था -थं, व्यथितः -ता -तं.

ANNOYER, *s.* क्लेशकः, दुःखकरः, व्यथाकरः.

ANNOYING, *a.* क्लेशी -शिनी -शि (न्), क्लेशकः -का -कं, दुःखकरः -री -रं.

ANNUAL, *a.* वार्षिकः -की -कं, आब्दिकः -की -कं, सांवत्सरः -री -रं, वर्षैकः -का -कं, समीनः -ना -नं.—(Lasting only for a year) एकवर्षजीवी -विनी -वि (न्); 'an annual plant,' ओषधिः *f.*

ANNUALLY, *adv.* प्रतिवर्षं, प्रतिवत्सरं, वत्सरे वत्सरे, वत्सरक्रमेण.

ANNUITY, *s.* वार्षिकं or सांवत्सरिकं वेतनं or वर्त्तनं, यन् निरूपितमूल्यं वत्सरे वत्सरे कस्मैचिद् दीयते.

To ANNUL, *v. a.* लोपं कृ, निरर्थकं -कां -कं कृ, विनश् in caus. (-नाशयति -यितुं).

ANNULAR, *a.* मण्डलाकारः -रा -रं, वलयाकारः -रा -रं, वलयाकृतिः -तिः -ति, अङ्गुरीयाकारः -रा -रं.

ANNULET, *s.* क्षुद्रवलयः, क्षुद्राङ्गुरीयः, -यं.

ANNULMENT, *s,* लोपः, नाशः, विनाशः.

To ANNUMERATE, *v. a.* संख्यां संख्यया संयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं).

ANNUMERATION, *s.* संख्या संख्यया संयोजनं.

ANNUNCIATION, *s.* प्रत्यादेशः, घोषणं, -णा, ख्यापनं, विज्ञापनं.

ANODYNE, *a.* शूलघ्नः-घ्नी-घ्नं, वेदनाशान्तिकः-की-कं, पीडाशमकः-का-कं.

ANODYNE, *s.* शूलघ्नं, वेदनाशान्तिकं.

To ANOINT, *v. a.* लिप् (c. 6. लिम्पति -ते लेप्तुं), अनुलिप्, आलिप्, समालिप्, उपलिप्, विलिप्; अञ्ज् (c. 7. अनक्ति अंक्तुं) or caus. (अञ्जयति -यितुं), समालभ् (c. 1. -लभते -लब्धुं).—(To consecrate by unction) अभिषिच् (c. 6. -सिञ्चति -सेक्तुं).

ANOINTED, *p. p.* लिप्तः -प्ता -प्तं, अभिषिक्तः -क्ता -क्तं, दिग्धः -ग्धा -ग्धं, अनुलिप्तः -प्ता -प्तं, अभ्यक्तः -क्ता -क्तं, कृताभिषेकः -का -कं.

ANOINTER, *s.* अभिषेचकः, लेपकः, अञ्जनकर्त्ता *m.* (र्त्तृ).

Digitized by Google

ANOINTING, *s.* अभिषेकः, -चनं, विलेपनं, समालम्भः, अभ्यञ्जनं, अञ्जनं.

ANOMALOUS, *a.* विधिविरुद्धः -द्धा -द्धं, विधिहीनः -ना -नं, विधिघ्नः -घ्नी -घ्नं, नियमविरुद्धः -द्धा -द्धं, अविधिः -धिः -धि.

ANOMALOUSLY, *adv.* अविधानतस् *ind.*, अविधिवत् *ind.*, अनियमतस् *ind.*

ANOMALY, *s.* अविधिः *m.*, अविधानं, विधिविरुद्धता, अनियमः.

ANON, *adv.* (Quickly, soon) शीघ्रं, सपदि, झटिति.—(Now and then) कदापि, कदाचित्.

ANONYMOUS, *a.* अनामकः -का -कं, नामहीनः -ना -नं, सञ्ज्ञारहितः -ता -तं.

ANONYMOUSLY, *adv.* नामव्यतिरेकेण, संज्ञाव्यतिरेकेण, संज्ञां विना.

ANOTHER, *a.* अन्यः -न्या -न्यत्, इतरः -रा -रं, परः -रा -रं, अपरः -रा -रं, परकीयः -या -यं, अन्यदीयः -या -यं. Another is often expressed by अन्तर in composition; as, 'another place,' स्थानान्तरं; 'along with another king,' राजान्तरेण सह. 'In another place,' अन्यत्र; 'in another manner,' अन्यथा; 'at another time,' अन्यदा; 'one after another,' अनुपूर्व्येशस् *ind.*, प्रत्येकं एकैकशस्; 'a defect in another,' परच्छिद्रं; 'another's wife,' परदारः; 'another man's goods,' परद्रव्यं, परस्वं; 'another's right,' परस्वत्वं; 'another day,' अन्यस्मिन् दिवसे, अन्येद्युः (स्).

To ANSWER, *v. n.* (To speak in reply) प्रतिवच् (c. 2. -वक्ति -वक्तुं), प्रतिभाष् (c. 1. -भाषते -भाषितुं), प्रतिवद् (c. 1. -वदति -ते -वदितुं), प्रतिब्रू (c. 2. -ब्रवीति -वक्तुं), व्याहृ (c. 1. -हरति -ते -हर्तुं), प्रतिभण् (c. 1. -भणति -भणितुं), प्रतिजल्प् (c. 1. -जल्पति -जल्पितुं).—(To correspond, to suit) युज् in pass. (युज्यते), अनुरूपः -पा -पं or तुल्यरूपः -पा -पं or सदृशः -शी -शं अस्.—(To succeed) सम्पद् (c. 4. -पद्यते -पत्तुं), संसिध् (c. 4. -सिध्यति -सेद्धुं).—(To be accountable for) प्रतिभूः or प्रतिनिधिः अस्, लग्नकं दा (c. 3. ददाति दातुं).

ANSWER, *s*, प्रतिवचनं, प्रतिकाक्यं, प्रतिवाक् *f.* (च्), उत्तरं, प्रत्युत्तरं, प्रत्युक्तिः *f.*, प्रतिवाणिः *f.*—(Refutation of a charge) वाक्यखण्डनं, वाक्याघातः.

ANSWERABLE, *a.* प्रतिवाक्यः -क्या -क्यं.—(Responsible) परानुयोगाधीनः -ना -नं, पराह्वानाधीनः -ना -नं, अभियोक्तव्यः -व्या -व्यं, येन प्रत्युत्तरं दातव्यं सः, यो लग्नकं दातुम् अर्हति.—(Corresponding to) योग्यः -ग्या -ग्यं, अनुरूपः -पा -पं, अनुसारी -रिणी -रि (न्).

ANSWERED, *p. p.* प्रत्युक्तः -क्ता -क्तं, प्रतिभाषितः -ता -तं, प्रतिभणितः -ता -तं.

ANT, *s.* पिपीलिका, पुत्रिका.

ANT-BEAR, *s.* पिपीलिकाखादको जन्तुविशेषः.

ANT-HILL, *s.* वल्मीकः, -कं, कृमिशैलः, कूलकः, भूश्रवाः *m.* (स्), वल्मीकूटं, वामलूरः, स्यमीकः, मृत्तिकाकूटं.

ANTAGONIST, *s.* विरोधी *m.* (न्), विपक्षः, वैरी *m.* (न्), शत्रुः *m.*, अभियोक्ता *m.* (क्तृ), पर्य्येवस्थाता *m.* (तृ), प्रतिबन्धकः.

ANTAGONISTIC, *a.* विरोधी -धिनी -धि (न्), विपक्षः -क्षा -क्षं, विपरीतः -ता -तं.

ANTALGIC, *a.* वेदनाशमकः -का -कं, शूलघ्नः -घ्नी -घ्नं, शोकापनुदः -दा -दं.

ANTARCTIC, *adj.* दक्षिणकेन्द्रीयः -या -यं.—(The south pole) दक्षिणकेन्द्रं, कुमेरुः *m.*

ANTECEDENT, *a.* पूर्व्वगतः -ता -तं, अग्रगतः -ता -तं, अग्रगामी -मिनी -मि (न्).

ANTECEDENTLY, *adv.* पूर्व्वं, अग्रे, पूर्व्वतस्, अग्रतस्.

ANTEDILUVIAN, *a.* प्राग् भूतसम्प्लवाद् विद्यमानः -ना -नं, प्राग् जलाप्लावनाद् वर्त्तमानः -ना -नं.

ANTELOPE, *s.* मृगः, हरिणः, रेणेयः, कुरङ्गः. -ङ्गकः, -ङ्गमः.

ANTEMERIDIAN, *a.* पूर्व्वाह्णेतनः -नी -नं.

ANTEMUNDANE, *a.* प्राग् जगत्सृष्टेर् वर्त्तमानः -ना -नं.

ANTEPAST, *s.* पूर्व्वभुक्तिः *f.*, पूर्व्वभोजनं, पूर्व्वज्ञानं, अग्रग्रहणं.

ANTEPENULTIMATE, *s.* उपधायाः पूर्व्वं विद्यते यद् अक्षरं, पूर्व्वोपान्तः.

ANTERIOR, *a.* प्राक्तनः -नी -नं, पूर्व्वः -र्व्वी -र्व्वं, अग्रः -ग्रा -ग्रं.

ANTHEM, *s.* ईश्वरस्तवात्मकं गीतं, ईश्वरस्तुतिरूपकं गानं.

ANTHONY'S FIRE, *s.* उद्दैः, रोगविशेषः.

ANTHROPOPHAGI, *s.* नृजग्धाः *m. pl.*, आममांसाशिनः *m. pl.*, क्रव्याशिनः *m. pl.*, अश्रपाः *m. pl.*, राक्षसाः *m. pl.*

ANTIBILIOUS, *a.* पित्तघ्नः -घ्नी -घ्नं.

ANTIC, *a.* (Buffoon-like) भण्डोपमः -मा -मं.—(Odd, unnatural) अपरूपः -पा -पं, विरूपः -पा -पं, असङ्कृतः -ता -तं, अयोग्यः -ग्या -ग्यं.

ANTIC, *s.* (A buffoon) भण्डः, भाण्डकरः.—(An odd gesture) असङ्कृतप्रकारेण हस्तादिविक्षेपः, विरूपो भ्रूविक्षेपः.

ANTI-CHAMBER, *s.* उपशाला.

To ANTICIPATE, *v. a.* (Before the time) पूर्व्वतस् ग्रह् (c. 9. गृह्णाति ग्रहीतुं), प्रवेष्ट् (c. 1. -ईष्टे -ईष्टितुं).—(To foretaste) पूर्व्वास्वादनं कृ, अग्रतस् अनुभू (c. 1. -भवति -भवितुं), पूर्व्वं ज्ञा (c. 9. जानाति ज्ञातुं) or भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं), उद्दृश् (c. 1. उत्पश्यति उद्द्रष्टुं), प्रदृश्.

ANTICIPATED, *p. p.* पूर्व्वभुक्तः -क्ता -क्तं, पूर्व्वतस् अनुभूतः -ता -तं, प्रदृष्टः -ष्टा -ष्टं, प्रवेष्टितः -ता -तं, सन्दृष्टः -ष्टा -ष्टं, चित्तकलितः -ता -तं, पुरस्कृतः -ता -तं.

ANTICIPATION, *s.* पूर्व्वभुक्तिः *f.*, पूर्व्वभोजनं, पूर्व्वज्ञानं, प्रवेष्टणं.

ANTIDOTAL, *a.* विषनाशी -शिनी -शि (न्), विषघाती -तिनी -ति (न्), विषघ्नः -घ्नी -घ्नं, गरघ्नः -घ्नी -घ्नं.

ANTIDOTE, *s.* विषनाशनं, प्रतिविषं.—(Dealer in) विषवैद्यः, जाङ्गुलिकः.

ANTIFEBRILE, *a.* ज्वरघ्नः -घ्नी -घ्नं, ज्वरनाशकः -का -कं, ज्वरान्तकः -का -कं.

ANTIMONY, *s.* स्रोतोञ्जनं, सौवीरं, कापोताञ्जनं, यामुनं.—(Made of antimony) स्रोतोञ्जनमयः -यी -यं.

ANTIPATHY, *s.* सहजो विरोधः, द्वन्द्वभावः, विरक्तिः *f.*, वैरिता, शत्रुता, विमतिः *f.*, अनिच्छा.

ANTIPHLEGMATIC, *a.* कफनाशनः -नी -नं, कफघ्नः -घ्नी -घ्नं, श्लेष्मघ्नः -घ्नी -घ्नं.

ANTIPHONY, *s.* प्रतिगानं, परस्परगीतिः *f.*, प्रतिध्वनिः *f.*

ANTIPODES, *s.* भूमण्डलस्य विपरीतभागे वर्त्तिनः; अन्यतरस्मिन् भूगोलभागे वर्त्तिनः परस्पराम् अभिमुखपादतला जनाः.

ANTIQUARIAN, *a.* प्राक्कालीनः -ना -नं, पूर्व्वकालीनः -ना -नं, प्राक्तनः -नी -नं.

ANTIQUARY, ANTIQUARIAN. *s.* प्राक्कालीनविषयेषु पण्डितः, पुरातनद्रव्यानुसन्धायी *m.* (न्).

ANTIQUE, *a.* (Ancient) पुराणः -णा or -णी -णं, पुरातनः -नी -नं, प्राक्तनः -नी -नं, पूर्व्वकालीनः -ना -नं, चिरन्तनः -नी -नं.—(Old-fashioned) अप्रचलः -ला -लं, अपरूपः -पा -पं.

ANTIQUE, *s.* प्राचीनद्रव्यं, प्राक्कालीनविषयः.

ANTIQUITY, *s.* (Old-times) प्राक्कालं, पूर्व्वकालं, गतकालं.—(The ancients) प्राचीनपुरुषाः *m. pl.*—(Ancientness) पुरातनत्वं, प्राचीनत्वं.

ANTISEPTIC, *a.* पूतिघ्नः -घ्नी -घ्नं, पूतिनिवारकः -का -कं, पूतिनाशकः -का -कं.

ANTISTES, *s.* प्रधानपुरोहितः, धर्म्माध्यक्षः.

ANTITHESIS, *s.* अर्थान्तरन्यासः, अर्थवैपरीत्यं, विकल्पः, प्रतिपक्षता, विरोधः.

ANTITYPE, *s.* प्रतिमूर्त्तौ प्रदर्शिता मूर्त्तिः *f.*, मूलमूर्त्तिः *f.*, वस्तु *n.*, आदर्शः.

ANTLER, *s.* मृगशृङ्गं, मृगशृङ्गशाखा, मृगविषाणं.

ANTLERED, *a.* शृङ्गी -ङ्गिनी -ङ्गि (न्), विषाणी -णिनी -णि (न्).

ANUS, गुदं, पायुः *m.*, मैत्रः, अपानं.

ANVIL, *s.* सूनी *f.*, शूर्म्मिः *m.*, स्थूणा, लोहप्रतिमा.

ANXIETY, *s.* चिन्ता, चित्तोद्वेगः, औत्सुक्यं, मनोदुःखं, मनस्तापः, चित्तवेदना, आधिः *m.*, व्यग्रता, उद्वेगः -जनं, उत्तापः, चिन्ताभारः, मानसी व्यथा.

Digitized by Google

ANXIOUS, *a.* (Solicitous) उद्विग्नः -ग्ना -ग्नं, उद्विग्नमनाः -नाः -नः (स्), चिन्तापरः -रा -रं, व्यग्रः -ग्रा -ग्रं, उन्नसः -सा -सं, उत्सुकः -का -कं, विधुरः -रा -रं, समन्युः -न्युः -न्यु.—(Eagerly endeavouring) सयत्नः -त्ना -त्नं.—(Desirous of) ईप्सुः -प्सुः -प्सु, इच्छुः -च्छुः -च्छु; 'anxious to see,' दर्शनेप्सुः; 'anxious to do,' कर्तुकामः -मा -मं.—(To be anxious) उत्सुकाय् (nom. उत्सुकायते).

ANXIOUSLY, *adv.* सौत्सुक्येन, उद्वेगेन, मनोदुःखेन, चिन्तया, सोद्वेगं, सयत्नं.

ANY, *a.* कश्चित् *m.* काचित् *f.* किञ्चित् *n.*, को ऽपि *m.* कापि *f.* किमपि *n.*, कश्चन *m.* काचन *f.* किञ्चन *n.*; 'any thing,' किञ्चित्, किमपि; 'any where,' क्वचित्, क्वापि, कुत्रचित्, कुत्रापि; 'any longer,' पुनर्; 'any how,' कथञ्चन, कथञ्चित्, यथातथा; 'at any time,' कदाचित्, कर्हिचित्; 'any further,' दूरतरं; 'any one soever,' यः कश्चित्.

AORTA, *s.* हृत्पिण्डवामकोष्ठनिर्गता रक्तप्रवाहका वृहन्नाडी.

APACE, *adv.* सत्वरं, शीघ्रं, क्षिप्रं, सहसा, द्रुतं, सवेगं.

APART, *adv.* Often expressed by the prep. वि; पृथक्, विरलं, प्रविरलं, प्रगतः -ता -तं, उज्जृम्भः -म्भा -म्भं; 'having the knees apart,' प्रगतजानुः -नुः -नु.—(Privately) एकान्ते, एकान्ततस् *ind.*, निभृतं, रहसि, विविक्तं, विजने.—(At a distance) दूरे, कियद्दूरे.—(Aside, to one's self) स्वगतं, विजने, जनान्तिकं.

APARTMENT, *s.* शाला, कोष्ठः, आवासः, आगारं, गृहं.—(The inner apartments) अन्तःपुरं, अन्तर्गृहं.

APATHETIC, *a.* वीतरागः -गा -गं, निःसङ्गः -ङ्गा -ङ्गं, निःस्पृहः -हा -हं, निरीहः -हा -हं, निरपेक्षः -क्षा -क्षं.

APATHY, *s.* विरागः, वैराग्यं, निरीहता, जाड्यं, मान्द्यं.

APE, *s.* वानरः, अपुच्छः कपिः *m.*, प्लवङ्गः.—(Imitator) अनुकारी *m.* (न्).

To APE, *v. a.* वानरवत् or कपिवत् अनुकृ (c. 8. -करोति -कर्तुं).

APEPSY, *s.* अजीर्णं, आमयावित्वं, तीक्ष्णाग्निः *m.*

APERIENT, *a.* रेचकः -की -कं.—(An aperient medicine) रेचकः.

APERTURE, *s.* छिद्रं, रन्ध्रं, द्वारं, पथः.—(Act of opening) व्यादानं.

APETALOUS, *a.* दलहीनः -ना -नं, पुष्पपत्ररहितः -ता -तं, निष्पत्रः -त्रा -त्रं.

APEX, *s.* शिखा, शिखरं, अग्रं, चूडा, शिरः *n.* (स्).

APHORISM, *s.* सूत्रं, वचनं, तत्त्वं, उपदेशवाक्यं, आदेशः.

APHRODISIAC, *a.* (Exciting passion) वाजीकरः -रा -रं, कामाग्निदीपनः -ना -नं.

APIARY, *s.* करण्डः, छत्रकः, मधुमक्षिकारक्षणस्थानं, मधुकरस्थानं.

APIECE, *adv.* प्रत्येकं, एकैकशस् *ind.*, एकशस् *ind.*, एकतस् *ind.*, एकैकं, पृथक् पृथक्, विभागशस् *ind.*

APISH, *a.* कापेयः -यी -यं, कपिस्वभावः -वा -वं, वानरोपमः -मा -मं.—(Imitative) अनुकारशीलः -ला -लं.

APISHNESS, *s.* कापेयं, वानरता, अनुकारशीलता.

APITPAT, *adv.* पटपटा *ind.*

APOCALYPSE, *s.* प्रकाशितं भविष्यद्वाक्यं, प्रकाशनं, विवृतिः *f.*, स्पष्टीकरणं.

APOCRYPHA, *s.* धर्मग्रन्थानां मध्ये गणितः सन्दिग्धप्रमाणो ग्रन्थः.

APOCRYPHAL, *a.* (Of uncertain authority) सन्दिग्धप्रमाणः -णा -णं, असिद्धप्रमाणः -णा -णं.

APOLOGETIC, APOLOGETICAL, *a.* व्यपदेशकः -का -कं, पक्षपाती -तिनी -ति (न्), प्रतिवादकः -का -कं, छाद्मिकः -की -कं.

APOLOGIST, *s.* (For another) पक्षपातकर्ता *m.* (र्तृ), पररक्षार्थं वादी *m.* (न्), प्रतिवादी *m.* (न्), उत्तरवादी *m.*—(For one's self) व्यपदेष्टा *m.* (ष्टृ), छद्मकारी, स्वदोषस्वीकारी *m.* (न्), प्रत्यवस्कन्दकारी *m.* (न्).

APOLOGISE, *v. n.* (To state some plea) व्यपदिश् (c. 6. -दिशति -देष्टुं), छद्म or व्यपदेशं or प्रत्यवस्कन्दं कृ.—(To acknowledge one's fault) स्वदोषस्य स्वीकारं कृ.—(To apologise for another) पक्षपातं कृ, पररक्षार्थं प्रतिवद् (c. 1. -वदति -वदितुं).

APOLOGUE, *s.* उपकथा, हितोपदेशकं उपाख्यानं, नीतिवाक्यं.

APOLOGY, *s.* व्यपदेशः, अपदेशः, उपदेशः, प्रतिवादः, उत्तरं, छद्म *n.* (न्), प्रत्यवस्कन्दः, स्वदोषस्वीकारः, छद्मकरणं.—(For another) पक्षपातः, पररक्षार्थं प्रतिवादः.

APOPHLEGMATIC, *a.* कफनाशनः -नी -नं, कफघ्नः -घ्नी -घ्नं, श्लेष्मघ्नः -घ्नी -घ्नं.

APOPHTHEGM, *s.* सूत्रं, नीतिवाक्यं, वचनं, आदेशः.

APOPLECTICAL, APOPLECTIC, *a.* (Relating to apoplexy) अङ्गविकृतिविषयः -या -यं.—(Inclined to apoplexy) अङ्गविकृतिशीलः -ला -लं.

APOPLEXY, *s.* अङ्गविकृतिः *f.*

APOSTACY, *s.* स्वधर्मत्यागः, स्वधर्मच्युतिः *f.*, अवहारः, स्वधर्मभंशः, भ्रष्टत्वं, स्वजातीयधर्मत्यागानन्तरं परधर्माश्रयः.

APOSTATE, *s.* स्वधर्मत्यागी *m.* (न्), स्वजातीयव्यवहारभ्रष्टः, आत्मधर्मच्युतः, अन्यशाखः, स्वजातीयधर्मं त्यक्त्वा परधर्माश्रितः.

To APOSTATIZE, *v. n.* स्वधर्मात् or स्वजातीयव्यवहाराद् भंश् (c. 4. भश्यति, c. 1. भंशते भंशितुं) or च्यु (c. 1. च्यवते च्योतुं), विच्यु; स्वजातीयधर्मं त्यक्त्वा परधर्मं आश्रि (c. 1. -श्रयति -श्रयितुं).

APOSTEME, APOSTHUME, *s.* श्वयथुः, विद्रधिः *m.*, शोफः, स्फोटः, पूयसम्पूर्णः स्फोटः.

APOSTLE, *s.* ईश्वरप्रेरितः, ईश्वरदूतः, ईश्वराज्ञावहः, प्रेरितः.

APOSTLESHIP, *s.* ईश्वरप्रेरितत्वं, ईश्वरदौत्यं, प्रेरित्वं.

APOSTOLICAL, APOSTOLIC, *a.* (Enjoined by an apostle) ईश्वरप्रेरितेनादिष्टः -ष्टा -ष्टं.—(Relating to the Apostles) ईश्वरप्रेरितसम्बन्धी -न्धिनी -न्धि (न्).

APOSTROPHE, *s.* सम्बोधनं, वाक्यालङ्कारविशेषः.

To APOSTROPHISE, *v. a.* सम्बोधनं कृ, सम्बोधनेन आमन्त्र् (c. 10. -मन्त्रयते -यितुं).

APOSTUME, *s.* पूयसम्पूर्णः स्फोटः, विद्रधिः *m.*

APOTHECARY, *s.* विक्रयार्थं औषधपेश्वरः, भेषजविक्रेता *m.* (तृ), औषधविक्रेता *m.* (तृ), अगदङ्कारः.

APOTHEGM, *s.* *See* APOPHTHEGM.

APOTHEOSIS, *s.* देवत्वं, ब्रह्मत्वं, ब्रह्मनिर्द्धाणं, देवगणितत्वं.

To APPAL, *v. a.* भी in caus. (भाययति or भीषयति -यितुं), त्रस् in caus. (त्रासयति -यितुं), वित्रस्, सन्त्रस्; उद्विज् in caus. (-वेजयति -यितुं), व्याकुलीकृ.

APPALLED, *p. p.* भयविप्लुतः -ता -तं, भयसंदृष्टरोमा -मा -म (न्), शङ्कितः -ता -तं, सन्त्रस्तः -स्ता -स्तं, व्याकुलीकृतः -ता -तं.

APPARATUS, *s.* उपकरणं, सज्जा, यन्त्रं, सामग्र्यं, सामग्री *f.*—(Military apparatus) शस्त्रोपकरणं.

APPAREL, *s.* वेशः, वस्त्रं, परिधानं, परिच्छदः, अम्बरं, आभरणं, संव्यानं.

To APPAREL, *v. a.* वस्त्र (nom. वस्त्रयति -यितुं), आछद् (c. 10. -छादयति -यितुं); वेष्ट् (c. 1. वेष्टते, वेष्टितुं), वस् in caus. (वासयति -यितुं), प्रवस्; प्रवृ (c. 5. -वृणोति, -वरितुं or -वरीतुं), संव्ये (c. 1. -व्ययति -व्यातुं).—(To apparel one's self) वस् (c. 2. वस्ते, वसितुं).

APPARELLED, *p. p.* आच्छादितः -ता -तं, प्रच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, वस्त्रवेष्टितः -ता -तं, संवीतः -ता -तं.

APPARENT, *a.* व्यक्तः -क्ता -क्तं, अभिव्यक्तः -क्ता -क्तं, प्रव्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, स्फुटः -टा -टं, प्रेक्षणीयः -या -यं, प्रेक्ष्यः -क्ष्या -क्ष्यं, प्रत्यक्षः -क्षा -क्षं.—(Not real) अवास्तवः -वी -वं; 'apparent praise,' *i. e.*

Digitized by Google

'not real,' व्याजस्तुतिः *f.*, मिथ्याप्रशंसा; 'heir-apparent,' युवराजः.—(To make apparent) प्रादुष्कृ, आविष्कृ, प्रत्यक्षीकृ, स्पष्टीकृ, प्रकटीकृ.

APPARENTLY, *adv.* प्रादुस् *ind.*, साक्षात् *ind.*, आविस्, प्रत्यक्षतस्, स्पष्टं.

APPARITION, *s.* (Appearance, form) आभासः, आभा, छाया, आकारः, आकृतिः *f.*, रूपं.—(Spectre, walking spirit) रात्रिचरः, प्रेतनरः, प्रेतः, वेतालः.

APPARITOR, *s.* यष्टिधरः, प्रेष्यजनः, राजदूतः.

APPEACHMENT, *s.* अभियोगः, अपवादः.

To APPEAL, *v. n.* परावस्तुं प्रार्थ् (c. 10. -अर्थयते -यितुं); यत् कार्यं अवरप्राड्विवाकेन तीरितं or निर्णीतं तस्यापि पुनर्विचारम् उत्तमप्राड्विवाकसकाशात् प्रार्थ्.—(To call another as witness) साक्षिणं कृ, आह्वे (c. 1. -ह्वयति -ते -ह्वातुं).

APPEAL, *s.* परावस्त्र्यव्यवहारः, पुनराह्वानं, पुनर्विचारप्रार्थना, उत्तमप्राड्विवाकसाक्षाद् आह्वानं.—(The calling upon any one as witness or judge) आह्वानं.

To APPEAR, *v. n.* (To become visible) दृश् in pass. (दृश्यते), अभिदृश्, प्रतिदृश्; प्रभू (c. 1. -भवति -भवितुं), सम्भू, प्रकाश् (c. 1. -काशते -काशितुं), सम्प्रकाश्, सङ्काश्, उदि (c. 1. उदयति -यितुं), अभ्युदि, उच्चर् (c. 1. -चरति -चरितुं).—(Show one's self) आत्मानं दृश् in caus. (दर्शयति -यितुं), दर्शनं दा.—(To seem) प्रतिभा (c. 2. -भाति -भातुं), सम्प्रभा, निर्भा, आभा; लक्ष् in pass. (लक्ष्यते).—(To be evident) प्रकाश्, प्रादुर्भू (c. 1. -भवति -भवितुं), आविर्भू; प्रादुरस् (c. 2. -अस्ति); 'you appear dismayed,' विस्मित इव प्रतिभासि.

APPEARANCE, *s.* (Coming into sight) दर्शनं, सन्दर्शनं.—(Entry into a place or company) उपस्थितिः *f.*, प्रवेशनं.—(The thing seen) रूपं, आकृतिः *f.*, मूर्त्तिः *f.*, आकारः.—(Semblance, not reality) छाया, आभासः, आभा, अवस्तुता.—(Presence, mien) रूपं, अवस्था, भावः, आकारः.—(Probability) अनुमेयत्वं, अनुभवनीयत्वं.

To APPEASE, *v. a.* शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्; सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, उपसान्त्व्; तुष् in caus. (तोषयति -यितुं), परितुष्, सन्तुष्; प्रसद् in caus. (-सादयति -यितुं), अभिप्रसद्, सम्प्रसद्; सुस्थिरं -रां -रं कृ; परिमृश् (c. 6. -मृशति -र्ष्टुं), परामृश्, अनुनी (c. 1. -नयति -ते -नेतुं).—(To be appeased) शम् (c. 4. शाम्यति, शमितुं), उपशम्; प्रसद् (c. 1. -सीदति -सत्तुं).

APPEASED, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशान्तः -न्ता -न्तं, आराधितः -ता -तं, अनुनीतः -ता -तं, प्रसन्नः -न्ना -न्नं, प्रसादितः -ता -तं.

APPEASING, *s.* शान्तिः *f.*, उपशान्तिः *f.*, प्रशान्तिः *f.*, आराधनं, प्रसादनं.

APPELLANT, *s.* उत्तमप्राड्विवाकसकाशात् परावस्त्रप्रार्थकः, परावस्त्रप्रार्थयिता *m.* (तृ), पुनराह्वानकर्त्ता *m.* (र्त्तृ), आह्वानकर्त्ता *m.* (र्त्तृ), आवेदकः.

APPELLATE, *s.* पुनराहूतः, उत्तमप्राड्विवाकसाक्षाद् आहूतः, प्रत्यर्थी *m.* (न्).

APPELLATION, *s.* नामधेयं, नाम *n.* (न्), आख्या, संज्ञा, अभिधानं, अभिधा, अभिख्या, आह्वा.

APPELLATIVE, *a.* अभिधायिकः -का -कं, अभिधानीयकः -का -कं.—(Common) सामान्यः -न्या -न्यं, साधारणः -णा -णं.

APPELLEE, *s.* आहूतः, अभियुक्तः, प्रत्यर्थी *m.* (न्).

To APPEND, *v. a.* अनुबन्ध् (c. 9. -बध्नाति -बन्धुं or caus. -बन्धयति -यितुं), आबन्ध्; उपाधा (c. 3. -दधाति -धत्ते -धातुं), आधा; अवलम्ब् in caus. (-लम्बयति -यितुं).

APPENDAGE, *s.* अनुबन्धः, सम्बन्धः, उपाहितं, शेषांशः, उपाहितभागः.

APPENDANT, *adj.* अनुबन्धी -न्धिनी -न्धि (न्), सम्बन्धी -न्धिनी -न्धि (न्).

अवलम्बी -म्बिनी -म्बि (न्).

APPENDIX, *s.* परिशिष्टं, उपग्रन्थः, शेषग्रन्थः.

To APPERTAIN, *v. n.* (To belong to one's self) आत्मसात् or आत्माधीनः -ना -नं, or स्वाधीनः -ना -नं, or स्वकीयः -या -यं अस्.—(To belong, in general) सम्बन्ध् in pass. (-बध्यते). The sense of 'appertaining' may often be expressed by the root अस् or विद् with the gen. case; as, 'money appertains to me,' मम धनं विद्यते.

APPERTAINING, *p.* सम्बन्धी -न्धिनी -न्धि (न्), अनुबन्धी -न्धिनी -न्धि (न्).

APPERTENANCE, *s.* अनुबन्धः, सम्बन्धः, उपकरणं, सामग्री.

APPETENCY, *s.* कामः, लोभः, अभिलाषः, वाञ्छा, इच्छा.

APPETITE, *s.* (Desire) कामः, लोभः, रागः, रुचिः *f.*, अभिरुचिः *f.*, अतिवाञ्छा, अतिशयलोभः, अभिलाषः, इच्छा.—(Hunger) बुभुक्षा, क्षुधा, आहारादिवाञ्छा, भक्तच्छन्दं.—(The digestive faculty causing appetite) अग्निः *m.*, वह्निः *m.*, अग्निवृद्धिः *f.*—(One who has no appetite for food) अग्निरहितः.

APPETITIVE, *a.* कामुकः -का -कं, अभिलाषुकः -का -कं, इच्छुकः -का -कं.

To APPLAUD, *v. a.* प्रशंस् (c. 1. -शंसति -शंसितुं), अभिप्रशंस्; प्रतिनन्द् (c. 1. -नन्दति -नन्दितुं), प्रणादेन प्रशंस्, प्रशंसां कृ, श्लाघां कृ.—(By clapping the hands) करतालेन प्रशंस्.

APPLAUDER, *s.* प्रशंसकः, स्तावकः, श्लाघाकर्त्ता *m.* (र्त्तृ).

APPLAUSE, *s.* (Loudly expressed) प्रणादः, जयशब्दः, धन्यवादः, प्रशंसाशब्दः, साधुवादः, भुजनिःस्वनः, शब्दोऽनुरागजः.—(Praise) श्लाघा, प्रशंसा, स्तुतिः *f.*

APPLAUSIVE, *a.* प्रशंसकः -का -कं, स्तुतिमयः -यी -यं, श्लाघान्वितः -ता -तं.

APPLE, *s.* (A kind of fruit) फलप्रभेदः.—(Pupil of the eye) नयनतारा, कनीनिका, चक्षुर्गोलकः.

APPLIANCE, *s.* (The means applied) उपायः, अभ्युपायः, उपकरणं, सामग्री.—(The act of applying) योगः, अर्पणं.

APPLICABILITY, *s.* योग्यता, प्रयोज्यत्वं, सामञ्जस्यं, साङ्गत्यं.

APPLICABLE, *a.* योग्यः -ग्या -ग्यं, प्रयोक्तव्यः -व्या -व्यं, प्रयोज्यः -ज्या -ज्यं, उपयोग्यः -ग्या -ग्यं, व्यवहरणीयः -या -यं, अर्पणीयः -या -यं, अर्प्यः -र्प्या -र्प्यं, संयोजनीयः -या -यं, व्यापी -पिनी -पि (न्), समञ्जसः -सा -सं.

APPLICATION, *s.* (Of one thing to another) योगः, अर्पणं, न्यसनं.—(Attention to) आसक्तिः *f.*, अनुष्ठानं, योगः, प्रवेशः, व्यसनं.—(Use) उपयोगः, प्रयोगः, प्रयोजनं.—(Application of mind, study) मनःप्रवेशः, अभिनिवेशः, प्रवेशः, अभ्यसनं, अभ्यासः, विद्याभ्यासः, अध्यवसायः, अभियुक्तता, मनोयोगः.—(Petition) याञ्चा, प्रार्थना, निवेदनपत्रं.

APPLIED, *p. p.* प्रयुक्तः -क्ता -क्तं, अर्पितः -ता -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, निवेशितः -ता -तं.

APPLIER, *s.* उपेता *m.* (तृ), प्रयोजकः.

To APPLY, *v. a.* (One thing on another) संयुज् (c. 10. -योजयति -यितुं), न्यस् (c. 4. -अस्यति, -असितुं), विन्यस्; क्षिप् in caus. (अर्पयति -यितुं), सङ्क्रम् in caus. (-गमयति -यितुं), प्रविश् in caus. (-वेशयति -यितुं), निविश्, संलग्नीकृ.—(To make use of) प्रयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं), उपयुज्.—(To attend to) आस्था (c. 1. -तिष्ठति -ते -स्थातुं), समास्था, अनुष्ठा.—(To have recourse to, solicit) प्रयाच् (c. 1. -याचति -याचितुं), अभियाच्, आश्रि (c. 1. -श्रयति -ते -श्रयितुं), प्रार्थ् (c. 10. -अर्थयति -ते -यितुं).—(To make effort, study) अभ्यस् (c. 4. -अस्यति -असितुं), यत् (c. 1. यतते, यतितुं), प्रयत्.

To APPLY, *v. n.* (Suit, fit) युज् in pass. (युज्यते), संयुज्, उपपद्

Digitized by Google

(c. 4. -पद्यते -पत्तुं), सङ्कृतः -ता -तं भू.—(Have recourse as a petitioner) कार्य्यसिद्धिनिमित्ते अन्यम् आश्रि (c. 1. -अयति -ते -अयितुं), अर्थ् (c. 10. अर्थयते -यितुं), प्रार्थ्.

To APPOINT, *v. a.* निधा (c. 3. -दधाति -धातुं), स्था in caus. (स्थापयति -यितुं), अवस्था, प्रस्था; युज् (c. 10. योजयति -यितुं).—(To appoint over any office) अधिकृ (c. 8. -करोति -कुरुते -कर्तुं), प्रकृ; नियुज् (c. 10. -योजयति -यितुं, c. 7. -युनक्ति -योक्तुं), with acc. of the pers. and loc. of the thing; अभिषिच् (c. 6. -सिञ्चति -सेक्तुं), with two acc. or with acc. and loc.; समादिश् (c. 6. -दिशति -देष्टुं), व्यादिश्.—(To make an appointment) समयं कृ, समयाकृ.

APPOINTED, *p. p.* स्थापितः -ता -तं, प्रस्थापितः -ता -तं, नियोजितः -ता -तं, नियतः -ता -तं, विहितः -ता -तं, नियुक्तः -क्ता -क्तं, व्यवस्थितः -ता -तं.—(To any office) अधिकृतः -ता -तं, व्यापृतः -ता -तं, वावृत्तः -त्ता -त्तं.—(An appointed duty) नियोगः.—(An appointed time) कालावधिः *m.*—(Agreed upon) कृतसङ्केतः -ता -तं.—(As to time) कृतकालः -ला -लं, कृतावधिः -धिः -धि.

APPOINTMENT, *s.* नियोगः, -जनं, नियुक्तिः *f.*, प्रस्थापनं, निरूपणं, कल्पनं.—(Engagement) समयः, प्रज्ञप्तिः *f.*—(Breaking an appointment) समयभेदः, समयव्यभिचारः.—(Stipulation) समयः, नियमः, सङ्केतः.—(Order) आज्ञा.—(Decree) नियमः, विधिः *m.*—(Office) अधिकारः, पदं.—(Equipment, furniture) सज्जा, उपकरणं, सामग्री.—(Allowance) वर्त्तनं, निरूपितमूल्यं.—(Assignation) अभिसारः.

To APPORTION, *v. n.* विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्, संविभज्; अंश् (c. 10. अंशयति -यितुं), व्यंश्; विन्यस् (c. 4. -अस्यति -असितुं), परिकॢप् (c. 10. -कल्पयति -यितुं), विधा (c. 3. -दधाति -धातुं).

APPORTIONMENT, *s.* विभागः, संविभागः, अंशनं, परिकल्पनं, विन्यासः.

APPOSITE, *a.* योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, सङ्गतः -ता -तं, हृदयङ्गमः -मा -मं, यथार्थः -र्था -र्थं, यथार्हः -र्हा -र्हं.

APPOSITELY, *adv.* स्थाने, यथार्हतस् *ind.*, यथार्थं, सङ्गतप्रकारेण.

To APPRAISE, *v. a.* (Set a price on) अर्घं संख्या in caus. (-ख्यापयति -यितुं), मूल्यं निरूप् (c. 10. -रूपयति -यितुं) or व्यवसो, (c. 4. -स्यति -सातुं), मूल्यनिर्णयं कृ, मूल्यं निश्चितं कृ.

APPRAISER, *s.* अर्घसंख्यापकः, मूल्यनिरूपकः, मूल्यविज्ञापकः.

APPRAISING, *s.* अर्घसंख्यापनं, मूल्यनिरूपणं, मूल्यविज्ञापनं.

To APPRECIATE, *v. a.* मूल्यं or अर्घं or गुणागुणं or भद्राभद्रतां or सारासारं विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), or निरूप (c. 10. -रूपयति -यितुं), or निश्चितं कृ or विविच् (c. 7. -विनक्ति -वेक्तुं); 'one who knows how to appreciate,' गुणज्ञः, गुणागुणज्ञः, गुणग्राही *m.* (न्), मर्म्मज्ञः.

APPRECIATION, *s.* मूल्यविज्ञानं, गुणागुणज्ञानं, भद्राभद्रनिरूपणं, दोषादोषबोधः, विज्ञानं.

To APPREHEND, *v. a.* (Lay hold on) ग्रह् (c. 9. गृह्णाति -ह्लीते ग्रहीतुं), परिग्रह्, सङ्ग्रह्; परामृश् (c. 6. -मृशति -मर्ष्टुं), धृ (c. 1. धरति धर्त्तुं).—(Seize in order for trial) आसिध् (c. 1. -सेधति -सेद्धुं); ग्रह्, धृ, आक्रम् (c. 1. -क्रामति -क्रमति -क्रमितुं).—(By the mind) उपलभ् (c. 1. -लभते -लब्धुं), ऊह् (c. 1. ऊहते ऊहितुं); अनुमा (c. 2. -माति -मातुं), अवगम् (c. 1. -गच्छति -गन्तुं), अववुध् (c. 4. -बुध्यते -बोद्धुं).—(To fear) शङ्क् (c. 1. शङ्कते शङ्कितुं) आशङ्क्; भी (c. 3. बिभेति भेतुं).

APPREHENDED, *p. p.* (Understood) उपलब्धः -ब्धा -ब्धं, अवगतः -ता -तं.—(Arrested) आसिद्धः -द्धा -द्धं.

APPREHENSIBLE, ग्राह्यः -ह्या -ह्यं, धीगम्यः -म्या -म्यं, उपलभ्यः -भ्या -भ्यं.

APPREHENSION, *s.* (Fear) भयं, शङ्का, आशङ्का, सन्देहः.—(Opinion) मतिः *f.*, बुद्धिः *f.*, बोधः.—(Seizure) ग्रहणं, आक्रमणं, धरणं.—(Arrest) आसेधः.—(Conception) उपलब्धिः *f.*, मेधा, अनुभवः, अनुमानं, अवगमः, अनुबोधः, उपलम्भः.

APPREHENSIVE, *a.* शङ्कितः -ता -तं, शङ्की -ङ्किनी -ङ्कि (न्), शङ्कान्वितः -ता -तं, कृतभयः -या -यं.

APPRENTICE, *s.* शिल्पविद्याशिष्यः, शिष्यः, निरूपितकालपर्य्यन्तं शिल्पविद्याशिक्षार्थं नियमपत्रेण स्थापितः or धृतः सेवकः.

To APPRENTICE, *v. a.* आविहितकालात् शिल्पविद्याशिक्षार्थं नियमपत्रेण शिष्यं or सेवकं स्था in caus. (स्थापयति -यितुं).

APPRENTICESHIP, *s.* शिल्पविद्याशिक्षावधिः *m.*, शिल्पशिक्षासमयः, सेवाकालः, दास्यकालः.

To APPRIZE, *v. a.* ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा; विद् in caus. (वेदयति -यितुं), निविद्, समाविद्; बुध् in caus. (बोधयति -यितुं), सूच् (c. 10. सूचयति -यितुं).

APPRIZED, *p. p.* विज्ञापितः -ता -तं, अनुज्ञापितः -ता -तं, विज्ञप्तः -प्ता -प्तं, सन्दिष्टः -ष्टा -ष्टं, प्रत्यादिष्टः -ष्टा -ष्टं, बोधितः -ता -तं.

To APPROACH, *v. n.* (Draw near to) अधिगम् (c. 1. -गच्छति -गन्तुं), आगम्, अभिगम्, अभ्यागम्, उपागम्, उपगम्, समुपगम्; या (c. 2. याति यातुं), अभिया, आया, उपाया, प्रत्याया, समाया, उपया, समुपया; उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), ऋ (c. 1. ऋच्छति अर्त्तुं), अभ्यृ; अभिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), उपावृत्, प्रतिवृत्, उपवृत्; समभ्यागा used only in the 3d pret.; as, 'he approached,' समभ्यागात्. इ, *i. e.* इ with आ (c. 2. ऐति, ऐतुं), अभ्ये, उपे, अभी (अभ्येति); उपसृप् (c. 1. -सर्पति -सर्प्तुं), समुपसृप्; आक्रम् (c. 1. -क्रामति -क्रमितुं), उपक्रम्; आव्रज् (c. 1. -व्रजति -व्रजितुं), प्रतिव्रज्, अभिपद् (c. 4. -पद्यते -पत्तुं), समापद्, समुपपद्, प्रतिपद्; अंह् (c. 1. अंहते अंहितुं).

To APPROACH, *v. a.* उपस्था in caus. (-स्थापयति -यितुं), समीपं स्था in caus.; समीपं धा (c. 3. -दधाति -धत्ते -धातुं), निकटे धा; सङ्क्रम् in caus. (-गमयति -यितुं).

APPROACH, *s.* आगमः, अभिगमनं, आगमनं, उपगमः, उपस्थितिः *f.*, उपसन्नता.

APPROACHABLE, *a.* आगम्यः -म्या -म्यं, उपगम्यः -म्या -म्यं, उपसाद्यः -द्या -द्यं.

APPROACHED, *p. p.* अभिगतः -ता -तं, उपगतः -ता -तं, उपस्थितः -ता -तं, अभ्यासगतः -ता -तं, प्रत्युपस्थितः -ता -तं.

APPROACHING, *a.* (Near at hand) उपस्थितः -ता -तं, समुपस्थितः -ता -तं, आसन्नः -न्ना -न्नं.

APPROBATION, *s.* सम्मतिः *f.* or -तं, अनुमतिः *f.* or -तं, प्रशंसा, प्रसादः, मनःसन्तोषः, ग्रहणं.

To APPROPRIATE, *v. a.* (To consign to some particular use) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, caus. -योजयति -यितुं), उपयुज्, विनियुज्.—(To claim to one's self by an exclusive right) स्वीकृ, स्वीयमिति or ममेति वद् (c. 1. वदति वदितुं), स्वकीयं -यां -यं or आत्मीयं -यां -यं or स्वाधीनं -नां -नं or आत्माधीनं -नां -नं or आत्मसात् कृ, स्वस्वत्वं बुध् in caus. (बोधयति -यितुं), or ज्ञा in caus. (ज्ञापयति -यितुं.)

APPROPRIATE, *a.* (Suited to the occasion) प्रस्तावसदृशः -शी -शं.—(Belonging peculiarly) आत्मनीनः -ना -नं, स्वकीयः -या -यं, सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धकः -का -कं, विशेषकः -का -कं, जनीनः -ना -नं.—(Suitable) युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, सङ्गतः -ता -तं, उपयोगी -गिनी -गि (न्).

APPROPRIATED, *p. p.* (Made one's own) आत्मसात्कृतः -ता -तं.

APPROPRIATELY, *adv.* युक्तं, यथायोग्यं, यथोचितं, यथातथा, स्थाने.

Digitized by Google

APPROPRIATENESS, *s.* (Fitness of application) युक्तता, योग्यत्वं, औचित्यं, उपयुक्तता, सामञ्जस्यं, सङ्गतता.

APPROPRIATION, *s.* (The application of something to a particular purpose) उपयोगः, प्रयोगः, विनियोगः.—(Claiming any thing as peculiar) आत्मग्रहणं, स्वत्वबोधनं, आत्मसात्करणं.

APPROVAL, *s.* अनुमतिः *f.*, सम्मतिः *f.*, अनुमन्त्रं, सम्मतं, प्रशंसा.

To APPROVE, *v. a.* अनुमन् (c. 4. -मन्यते -मन्तुं), सम्मन्; प्रशंस् (c. 1. -शंसति -शंसितुं), रुच्, in caus. (रोचयति -यितुं), अनुरुच्; 'that is approved by me,' तन् मया प्रशस्यते or तन् मह्यं रोचते. प्रतिनन्द् (c. 1. -नन्दति -नन्दितुं), अनुरुध् (c. 4. -रुध्यते -रोद्धुं).—(To prove, show) प्रमाणीकृ, प्रमाण् (nom. प्रमाणयति -यितुं), विभू in caus. (-भावयति -यितुं).

APPROVED, *p. p.* सम्मतः-ता-तं, अभिमतः-ता-तं, मतः-ता-तं, यथाभिमतः-ता-तं, प्रशस्तः-स्ता-स्तं, शिष्टः-ष्टा-ष्टं.—(Tried) परीक्षितः-ता-तं.—(Of tried probity) उपधाशुचिः-चिः-चि.

To APPROXIMATE, *v. n.* उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), समीपं or निकटं वृत् (c. 1. वर्त्तते वर्त्तितुं), or स्था, उपागम् (c. 1. -गच्छति -गन्तुं), उपगम्, समुपगम्, अभिगम्.—(To be like) तुल्यः-ल्या-ल्यं or सदृशः-शी-शं अस्.

To APPROXIMATE, *v. a.* नेद् (nom. नेदयति -यितुं), उपस्था in caus. (-स्थापयति -यितुं), समीपं स्था in caus., उपनी (c. 1. -नयति -नेतुं), सङ्गम् in caus. (-गमयति -यितुं).

APPROXIMATE, *a.* समीपः-पा-पं, आसन्नः-न्ना-न्नं, सन्निकृष्टः-ष्टा-ष्टं, उपस्थायी-यिनी-यि (न्).

APPROXIMATED, *p. p.* उपस्थापितः-ता-तं, उपनीतः-ता-तं, उपनतः-ता-तं, उपसन्नः-न्ना-न्नं, कृतसन्निधानः-ना-नं.

APPROXIMATION, *s.* (Approach) उपगमः, समुपगमः, समीपगमनं, संहतता -त्वं, उपस्थितिः *f.*, उपस्थानं, समुपस्था.—(Nearness) नैकट्यं, सामीप्यं, सान्निध्यं, सन्निधानं.

APPULSE, *s.* आघातः, आघातनं, प्रतिहननं, प्रतिघातः.

APPURTENANCE, *s.* *See* APPERTENANCE.

APRICOT, *s.* फलविशेषः.

APRIL, *s.* चैत्रः, चैत्रिकः, मधुः, वैशाखः, माधवः, राधः.

APRON, *s.* मलनिवारणार्थं स्त्रीभिर् धृतम् आच्छादनं.

APROPROS, *adv.* स्थाने, यथायोग्यं, यथावसरं, यथावकाशं.

APSIS, *s.* (In astronomy) मन्दोच्चः.

APT, *a.* (Fit) उपयुक्तः-क्ता-क्तं, योग्यः-ग्या-ग्यं, युक्तः-क्ता-क्तं, आप्तः-प्ता-प्तं.—(Having a tendency to) expressed by शीलः in composition; as, 'disposed to piety,' धर्म्मशीलः-ला-लं, or by the affix आलु; as, 'apt to sleep,' शयालुः-लुः-लु, or by the desiderative adjective; as, 'apt to do,' चिकीर्षुः-र्षुः-र्षु; 'apt to fall,' पिपतिषुः-षुः-षु.—(Skilful) कुशलः-ला-लं, दक्षः-क्षा-क्षं, पटुः-टुः-टुी-टु, अभिज्ञः-ज्ञा-ज्ञं.—(Ready, quick) त्वरितः-ता-तं, उद्युक्तः-क्ता-क्तं.

APTITUDE, *s.* (Fitness) योग्यता, पात्रता or -त्वं, उपयोगिता, आप्तिः *f.*—(Tendency) शीलत्वं, -ता, अभिप्रायः, आशयः.—(Disposition) शीलः, स्वभावः, भावः, रीतिः *f.*

APTLY, *adv.* यथायोग्यं, योगतस् *ind.*, स्थाने.—(Skilfully) दाक्ष्येण, चातुर्य्येण, सपाटवं.

APTNESS, *s.* (Fitness) योग्यता.—(Skill) कुशलता, पाटवं, विदग्धता, चातुर्य्यं.—(Ability) शक्तिः *f.*, सामर्थ्यं.

AQUATIC, *a.* (Inhabiting the water) जलेचरः-रा-रं, जलजः-जा-जं, वारिजः-जा-जं, वारिचरः-रा-रं, अम्बुचरः-रा-रं, अम्बुजः-जा-जं, आम्भसिकः-की-कं, जलोद्भवः-वा-वं, जलभूः-भूः-भु.—(Growing in the water) अम्भोरुहः, जलरुहः.—(Watery) औदकः-की-कं, आप्यः-प्या-प्यं; 'an aquatic animal,' जलजन्तुः *m.*

AQUEDUCT, *s.* जलमार्गः, जलपथः, जलनिर्गमः, जलप्रणाली.

AQUEOUS, *a.* अम्मयः-यी-यं, सजलः-ला-लं, जलसः-सा-सं, अनूपः-पा-पं.

AQUEOUSNESS, *s.* सजलता, औदकत्वं, अनूपता.

AQUILINE, *a.* (Resembling an eagle) उत्क्रोशरूपः-पा-पं, गृध्राकारः-रा-रं.—(Hooked) वक्रः-क्रा-क्रं, कुञ्चितः-ता-तं, वृजिनः-ना-नं; 'having an aquiline nose,' प्रलम्बघोणः.

ARABIA, *s.* यवनः, यवनदेशः.

ARABIAN, *a.* यवनसम्बन्धी-न्धिनी-न्धि (न्), यवनदेशीयः-या-यं; 'an Arabian,' यवनदेशजः.

ARABLE, *a.* कृषियोग्यः-ग्या-ग्यं, कर्षणीयः-या-यं, फालकृष्टः-ष्टा-ष्टं.

ARATION, *s.* कृषिः *f.*, कार्षिः *f.*, कर्षणं, हलहतिः *f.*

ARBITER, *s.* प्रमाणपुरुषः, मध्यस्थः, निर्णेता *m.* (तृ), विचारकर्त्ता *m.* (र्तृ).

ARBITRABLE, *a.* निर्णेयः-या-यं, विचारणीयः-या-यं.

ARBITRARILY, *adv.* स्वेच्छया, स्वेच्छातस् *ind.*, स्वकामतस् *ind.*

ARBITRARY, *a.* (Following the will) कामकारी-रिणी-रि (न्), यथाकामी-मिनी-मि (न्), स्वतन्त्रः-न्त्रा-न्त्रं, स्वच्छन्दः-न्दा-न्दं, स्वाधीनः-ना-नं, अनायत्तः-त्ता-त्तं, स्वैरवृत्तः-त्ता-त्तं.—(Capricious) चपलः-ला-लं.—(Tyrannical) क्रूरचरितः-ता-तं.—(Depending on no rule) अविहितः-ता-तं.

To ARBITRATE, *v. n., v. a.* विचर् in caus. (-चारयति -यितुं), निर्णी (c. 1. -नयति -ते -नेतुं), निश्चि (c. 5. -चिनोति -चेतुं), तीर् (c. 10. तीरयति -यितुं), निश्चयं or विचारं or निर्णयं or परिच्छेदं कृ.

ARBITRATED, *p. p.* निर्णीतः-ता-तं, तीरितः-ता-तं, निश्चितः-ता-तं, कृतनिश्चयः-या-यं.

ARBITRATION, *s.* (Determination) निर्णयः, विचारः, -रणं, निश्चयः, परिच्छेदः.—(Mediation) माध्यस्थ्यं.

ARBITRATOR, *s.* प्रमाणपुरुषः, स्थेयः, मध्यस्थः, निर्णेता *m.* (तृ), निश्चायकः, विचारकः.

ARBOROUS, *a.* वार्क्षः-र्क्षी-र्क्षं, वार्क्ष्यः-र्क्ष्यी-र्क्ष्यं, वृक्षसम्बन्धी-न्धिनी-न्धि (न्).

ARBOUR, *s.* लतागृहं, कुञ्जः, निकुञ्जः, पर्णशाला, मण्डपः-पं, कुटुङ्कः, छत्वरः.

ARC, *s.* (Segment of a circle) खण्डमण्डलं, वृत्तखण्डं, गोलखण्डं.—(Arched gateway) तोरणः.

ARCADE, *s.* (Garden-walk) वृक्षैर् आच्छादित उद्यानपथः.—(A street arched over) इष्टकानिर्म्मिततोरणाकारपटला वीथिः, or धनुराकारेण पटलेन आवृता वीथिः.

ARCH, *s.* (Part of a circle) खण्डमण्डलं, वृत्तखण्डं, गोलखण्डं.—(Arched gateway) तोरणः-णं.—(The arched roof of a house) खोडकशीर्षं.—(Vault of heaven) खगोलः, नभोमण्डलं.

ARCH, *a.* (Sly, waggish) क्रीडाशीलः-ला-लं, रसिकः-का-कं, लोलापाङ्गः-ङ्गा-ङ्गं, विदग्धः-ग्धा-ग्धं.—(Chief) प्रधानः-ना-नं, मुख्यः-ख्या-ख्यं, उत्तमः-मा-मं, श्रेष्ठः-ष्ठा-ष्ठं.

To ARCH, *v. a.* (To make in the form of an arch) मण्डलीकृ, गोलीकृ तोरणरूपेण निर्मा (c. 2. -माति, c. 4. -मायते -मातुं) or कृ in caus. (कारयति -यितुं), तोरणाकारपटलेन आच्छद् (c. 10. -छादयति -यितुं).—(To build an arch) तोरणं निर्मा.

ARCHANGEL, *s.* ईश्वरदूतानां मध्ये मुख्यदूतः or प्रधानदूतः, ईश्वरदूताधिष्ठाता *m.* (तृ).

Digitized by Google

ARCHBISHOP, *s.* धर्म्माध्यक्षाणां मध्ये प्रधानो or मुख्यो धर्म्माध्यक्षः.

ARCHDEACON, *s.* (The bishop's vicegerent) धर्म्माध्यक्षसहायः, धर्म्माध्यक्षोपकारकः.

ARCHAIOLOGY or ARCHÆOLOGY, *s.* प्राक्कालीनव्यवहारविषयं वाक्यं, पुरातनशास्त्रं.

ARCHED, *p. p.* मण्डलीकृतः -ता -तं, गोलीकृतः -ता -तं, तोरणाकारः -रा -रं, कुचितः -ता -तं.

ARCHER, *s.* धनुर्धरः, धन्वी *m.* (न्), धन्वा *m.* (न्), धनुष्मान् *m.* (-न्), धानुष्कः, धनुर्धारी *m.* (न्), इष्वासः, इषुधरः, काण्डीरः, निषङ्गी *m.*, अस्त्री *m.*

ARCHERY, *s.* धनुर्विद्या, शराभ्यासः, उपासनं, शराघातः, बाणमोक्षणं.—(Skilled in) कृतहस्तः, सुप्रयोगविशिखः, कृतपुङ्खः.

ARCHETYPE, *s.* मूलं, मूलमूर्त्तिः *f.*, आदर्शः, सूक्ष्मशरीरं.

ARCHITECT, *s.* स्थपतिः *m.*, गृहादिनिर्म्माणविद्याज्ञः, गृहनिर्म्माणाध्यक्षः, निर्म्माता *m.* (तृ).

ARCHITECTURAL, *a.* निर्म्माणविद्यासम्बन्धी -न्धिनी -न्धि (न्).

ARCHITECTURE, *s.* निर्म्माणविद्या, निर्म्माणशिल्पं, गृहादिनिर्म्माणशिल्पं.

ARCHITRAVE, *s.* गृहस्य यो भागः स्तम्भाग्रे अवलम्बते or निवेश्यते.

ARCHIVES, *s.* प्राक्कालीनग्रन्थरक्षागारं.—(Ancient records) इतिहासः, पुरावृत्तं.

ARCHNESS, *s.* विदग्धता, वैदग्ध्यं, रसित्वं.

ARCHWISE, *adv.* तोरणरूपेण, अर्द्धमण्डलाकारेण, तोरणवत्; धनुराकारेण.

ARCTIC, *a.* उत्तरः -रा -रं, उदीचीनः -ना -नं, उत्तरकेन्द्रीयः -या -यं, चित्रशिखण्डध्रुवःस्थितो भूगोलभागः.

ARDENCY, *s.* उत्तापः, उत्साहः, उग्रता, व्यग्रता, कौतूहलं, उत्सुकता.

ARDENT, *a.* (Hot) उत्तप्तः -प्ता -प्तं, प्रचण्डः -ण्डा -ण्डं.—(Eager) कुतूहली -लिनी -लि (न्), उत्सुकः -का -कं, अतीच्छः -च्छा -च्छं, व्यग्रः -ग्रा -ग्रं, उत्साही -हिनी -हि (न्).—(Affectionate) अनुरागी -गिणी -गि (न्).

ARDENTLY, *adv.* उत्तापेन, कौतूहलेन, औत्सुक्येन, सानुरागं.

ARDOUR, *s.* उत्तापः, आसक्तिः *f.*, उग्रता, व्यग्रता, कौतूहलं, औत्सुक्यं, उत्साहः.—(Of affection) अनुरागः.

ARDUOUS, *a.* (Lofty) उच्चः -च्चा -च्चं, प्रांशुः -शुः -शु, आरोहणदुर्गम्यः -म्या -म्यं.—(Difficult) दुष्करः -रा -रं, सुदुष्करः -रा -रं, अतिदुष्करः -रा -रं, कठिनः -ना -नं, दुर्गम्यः -म्या -म्यं, दुःसाध्यः -ध्या -ध्यं, दुष्करः -रा -रं.

ARDUOUSNESS, *s.* उच्चता, उन्नुङ्गता.—(Difficulty) कठिनता, काठिन्यं.

AREA, *s.* अङ्गणं, प्राङ्गणं, अभ्यन्तरस्थानं.

ARENA, *s.* रङ्गः, रङ्गभूमिः *f.*, मल्लभूः, अक्षवाटः.

ARGENT, *a.* रूप्यः -प्या -प्यं, रौप्यः -प्यी -प्यं, राजतः -ती -तं.

ARGILLOUS, *a.* मृण्मयः -यी -यं, मार्त्तिकः -की -कं, चिक्कणमृत्तिकामयः -यी -यं.

To ARGUE, *v. n.* (To reason) विचर् in caus. (-चारयति -यितुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्, विवेचनं कृ.—(To dispute) विवद् (c. 1. -वदते -वदितुं), वादानुवादं or उत्तरप्रत्युत्तरं कृ.

To ARGUE, *v. a.* (To prove by argument) प्रमाण्, (nom. प्रमाणयति -यितुं), प्रमाणीकृ, प्रमाणेन or तर्केण or विचारेण सिद्धीकृ; सूच् (c. 10. सूचयति -यितुं).—(To charge with, as a crime) दोषारोपं कृ, अपवद् (c. 1. -वदति -वदितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

ARGUER, *s.* तर्की *m.* (न्), विवादी *m.* (न्), विचारकः, प्रतिवादी *m.* (न्), न्यायी *m.* (न्).

ARGUMENT, *s.* (A reason stated) पक्षः, प्रमाणं, हेतुः *m.*, कारणं, वितर्कः, न्यायः; 'a false argument,' पक्षाभासः; 'a different side of the argument,' पक्षान्तरं.—(Controversy) वादानुवादः, वादयुद्धं, वाक्कलहं, विचारः, वितर्कः, विवादः, वितण्डा.—(The subject of any work) विषयः.—(Table of contents) अनुक्रमणिका, निर्घण्टः.

ARGUMENTATION, *s.* वितर्कणं, विचारणं, न्यायः.

ARGUMENTATIVE, *a.* (Consisting of argument) तार्किकः -की -कं, वितर्की -र्किणी -र्कि (न्), विवादी -दिनी -दि (न्), न्यायी -यिनी -यि (न्), विचारी -रिणी -रि (न्).—(Disposed to controversy) विवादशीलः -ला -लं, विवादार्थी -र्थिनी -र्थि (न्), विवादप्रियः -या -यं.

ARGUMENTATIVELY, *adv.* सवितर्कं, वादानुवादपूर्व्वकं, वितर्कपूर्व्वकं, न्यायवत्.

ARID, *a.* शुष्कः -ष्का -ष्कं, शोषितः -ता -तं, परिशुष्कः -ष्का -ष्कं; 'arid soil,' मरुः *m.*, मरुस्थली, धन्वा *m.* (न्).

ARIDITY, *s.* शुष्कता, -त्वं, शोषः, शोषणं, परिशोषः.

ARIGHT, *adv.* युक्तं, ऋतं, यथातथं, यथोचितं, यथायोग्यं, सम्यक्, यथार्हं.

To ARISE, *v. n.* (To stand up) उत्था for उत्स्था (c. 1. -तिष्ठति -ते -थातुं).—(To have origin) उत्पद् (c. 4. -पद्यते -पत्तुं), समुत्पद्; उच्चर् (c. 1. -चरति -चरितुं), उदि (c. 1. -अयति -एतुं), अभ्युदि, समुदि; प्रभू (c. 1. -भवति -भवितुं), सम्भू, आविर्भू, प्रादुर्भू; प्रवृत् (c. 1. -वर्त्तते -वर्त्तितुं), प्रसृ (c. 1. -सरति -सर्त्तुं), उद्भा (c. 2. -भाति -भातुं), निर्भा; आत्मानं दृश् in caus. (दर्शयति -यितुं), जन् (c. 4. जायते जनितुं), अभिजन्, उपजन्, सञ्जन्.—(From death) प्रतिसञ्जन्, समुत्था.

ARISEN, *p. p.* उत्थितः -ता -तं, सञ्जातः -ता -तं, जातः -ता -तं, जनितः -ता -तं, उत्पन्नः -न्ना -न्नं, समुत्पन्नः -न्ना -न्नं, विनिःसृतः -ता -तं, जन्यः -न्या -न्यं.

ARISTOCRACY, *s.* (A form of government) कुलीनजनाधिष्ठितं राज्यं, कुलीनवर्गप्रमुखं राज्यं, कुलीनवर्गप्रभुत्वं.—(The persons of whom it is composed) कुलीनजनाः, कुलीनवर्गः.

ARISTOCRATICAL, *a.* कुलीनः -ना -नं, कुलीनकः -का -कं, कौलेयः -यी -यं, कुलीनवर्गयोग्यः -ग्या -ग्यं, उत्कृष्टः -ष्टा -ष्टं.

ARISTOCRATICALLY, *adv.* कुलीनजनवत्, राजन्यवत्, कुलीनकप्रकारेण.

ARITHMETIC, *s.* गणनाविद्या, गणितं, पाटीगणितं, अङ्कविद्या, परिपाटिः *f.* -टी, परिकर्म्म *n.* (न्); 'the eight rules of arithmetic,' परिकर्म्माष्टकं.

ARITHMETICAL, *a.* गणनाविद्यानुरूपः -पा -पं, अङ्कविद्यानुसारी -रिणी -रि (न्).

ARITHMETICIAN, *s.* गणनाविद्याज्ञः, गणनाशास्त्रपण्डितः, अङ्कविद्याज्ञः, गणकः.

ARK, *s.* (A vessel, ship) नौः, नौका, पोतः, तरणी, वृहन्नौका.—(A chest) आधारः, कोषः, पेटिका, पेटः -टा -टी.

ARM, *s.* (Of the body) बाहुः *m.f.*, भुजः or -जा *f.*, दोषा *f.*, दोः *m.* (-स्), प्रवेष्टः.—(Of a tree) शाखा, उपशाखा.—(Of the sea) समुद्रबङ्गः.—(Of a river) वक्रं, वङ्गः, नदीवङ्गः, नदीवक्रं, पुटभेदः.—(Power, might) बलं, शक्तिः *f.*; 'a dominion acquired by one's own arm,' स्वभुजोपार्জ্জितं राज्यं'—(The upper arm) प्रगण्डः.

To ARM, *v. a.* सन्नह् (c. 4. -नह्यति -नद्धुं), सज्जीकृ, अस्त्रैः or शस्त्रैः सज्जीकृ, or युज् in caus. (योजयति -यितुं), or समायुज्.—(To arm one's self, put on one's arms) नह् (c. 4. नह्यते नद्धुं), सन्नह्.—(To put on armour) वर्म्म (nom. वर्म्मयति -यितुं or संवर्म्मयति).

ARMADA, *s.* वृहन्नौकासमूहः, समुद्रयुद्धाय सज्जीकृतो वृहन्नौकासमूहः.

ARMADILLO, *s.* युगः, कवचाकारचर्म्मधारी विलवासी क्षुद्रजन्तुः.

ARMAMENT, *s.* सैनिकः, युद्धाय सज्जीकृतं बलं, योद्धृसज्जनं.

ARMED, *p. p.* सज्जः -ज्जा -ज्जं, वर्म्मितः -ता -तं, सन्नद्धः -द्धा -द्धं, अभिसन्नद्धः -द्धा -द्धं, सायुधः -धा -धं, कृतास्त्रः -स्त्रा -स्त्रं, शस्त्री -स्त्रिणी -स्त्रि (न्).—(Having a weapon in the hand) शस्त्रपाणिः -णिः -णि.

ARM-HOLE, *s.* कक्षः, बाहुमूलं, भुजकोटरः, कक्षस्थानं, दोर्मूलं.

ARMISTICE, *s.* किञ्चित्कालपर्य्यन्तं युद्धनिवर्त्तनं, सन्धिः *m.*, क्षमा.

ARMLESS, *a.* (Without an arm) अभुजः -जा -जं.—(Without weapons) अस्त्रहीनः -ना -नं, अशस्त्रः -स्त्रा -स्त्रं.

Digitized by Google

ARMLET. *s.* (Bracelet) वलयः or यं, केयूरं, अङ्गदं.—(A little arm) क्षुद्रबाहुः *m.*, उपशाखा.

ARMORIAL, *a.* कावचिकः -की -कं, आयुधिकः -का -कं, आयुधीयः -या -यं.—(Belonging to the escutcheon of a family) कुलचिह्नसम्बन्धी -न्धिनी -न्धि (न्).

ARMORY, *s.* आयुधागारं, शस्त्रागारं, अस्त्रागारः.—(A collection of arms) शस्त्रसंहतिः *f.*, शस्त्रसमूहः.

ARMOUR, *s.* वर्म्म *n.* (न्), लौहवर्म्म *n.* (न्), तनुत्रं, तनुत्राणं, कवचः or -चं, वारवाणः, कञ्चुकः, त्वक्त्रं, दंशनं, सन्नाहः, देहावरणं, युद्धास्त्रं, तनुवारं, सज्जा.—(Chain-armour) जालिका, जालप्राया; 'arrayed in armour,' वर्म्मितः -ता -तं, कवची -चिनी -चि (न्).

ARMOUR-BEARER, *s.* सान्नह्यानकः, वर्म्मवाहकः.

ARMOURER, *s.* अस्त्रकारकः, शस्त्रकारः, शस्त्रमार्जः, अस्त्रनिर्म्माणशिल्पज्ञः, सज्जाकर्त्ता *m.* (र्त्तृ), असिधावकः.

ARM-PIT, *s.* कक्षः, बाहुमूलं, भुजकोटरः, दोर्मूलं.

ARMS, *s.* अस्त्रं, शस्त्रं, आयुधः, युद्धास्त्रं, शस्त्रास्त्रं.—(War in general) विग्रहः, समरः, रणः, युद्धं, सङ्ग्रामः.—(State of hostility) युद्धावस्था, रणसमयः; 'dexterity in arms,' अस्त्रलाघवं; 'the taking up of arms,' अस्त्रग्रहणं, युद्धे प्रवृत्तिः, अस्त्रधारणं; 'passage of arms,' अस्त्रशिक्षा, शस्त्राभ्यासः; 'a brother in arms,' सहयुध्वा *m.* (न्).—(The ensigns armorial of a family) कुलीनपदसूचकचिह्नं, कुलचिह्नं.

ARMY, *s.* सेना *f.*, सैन्यं, बलं, वाहिनी, चमूः *f.*, दलः or -लं, अनीकं, चक्रं, ध्वजिनी, व्यूहः, योधसमूहः, पृतना, वरूथिनी.—(A complete army) अक्षौहिणी, चतुरङ्गः.—(In motion) प्रचक्रं.

AROMA, *s.* गन्धः, वासः, आमोदः, धूपः, परिमलः.

AROMATIC. *a.* सुगन्धीयः -या -यं, गन्धी -न्धिनी -न्धि (न्), तिक्तः -क्ता -क्तं, सुरभितः -ता -तं, सुवासितः -ता -तं, धूपितः -ता -तं.

AROMATICS, *s.* उपस्कराः *m. pl.*, सुगन्धिद्रव्याणि *n. pl.*, सुगन्धानि *n. pl.*

To AROMATISE, *v. a.* वास् (c. 10. वासयति -यितुं), धूप् (c. 1. धूपायति, धूपितुं).

AROUND, *adv.* (Circularly) परितस्, अभितस्.—(On every side) समन्ततस्, सर्व्वतस्, विश्वतस्, समन्तात्.

AROUND, *prep.* परि, अभि.

To AROUSE, *v. a.* (To excite) उत्सह् in caus. (-साहयति -यितुं), प्रोत्सह्, उत्था for उत्स्था in caus. (उत्थापयति -यितुं), उद्बुध् in caus. (-बोधयति -यितुं), प्रबुध्.—(To wake from sleep) जागृ in caus. (जागरयति -यितुं), प्रबुध् in caus., निद्रां भञ्ज् (c. 7. भनक्ति भंक्तुं).

AROUSED, *p. p.* प्रोत्साहितः -ता -तं.—(Awaked) प्रबोधितः -ता -तं, प्रबुद्धः -द्धा -द्धं, निद्राभङ्गः -ङ्गा -ङ्गं.

To ARRAIGN, *v. a.* (To set in order) विरच् (c. 10. -रचयति -यितुं), स्वस्थाने स्था in caus. (स्थापयति -यितुं).—(To accuse) अभियोगं कृ, आह्वे (c. 1. -ह्वयति -ह्वातुं), अपवद् (c. 1. -वदति -वदितुं), अभिशप् (c. 1. -शपति -शप्तुं).

ARRAIGNED, *p. p.* अभियुक्तः -क्ता -क्तं, आहूतः -ता -तं, अभिशप्तः -प्ता -प्तं.

ARRAIGNMENT, *s.* अभियोगः, आह्वानं, अपवादः.

To ARRANGE, *v. a.* रच् (c. 10. रचयति -यितुं), विरच्; विधा (c. 3. -दधाति -धातुं), संविधा; क्रमेण or यथाक्रमं स्था in caus. (स्थापयति -यितुं), ग्रन्थ् (c. 1. ग्रन्थति, c. 9. ग्रथ्नाति, ग्रन्थितुं).

ARRANGED, *p. p.* विरचितः -ता -तं, ग्रथितः -ता -तं, विन्यस्तः -स्ता -स्तं, विहितः -ता -तं, प्रतिविहितः -ता -तं, परिमितः -ता -तं, व्यूढः -ढा -ढं; 'well-arranged,' सुघटितः -ता -तं.

ARRANGEMENT, *s.* विन्यासः, पर्य्यायः, प्रतिविधानं, व्यूहनं, व्यूढिः *f.*, रचना, विरचनं, ग्रन्थनं, -ना, व्यवस्थापनं, अनुसन्धानं, क्रमेण स्थापनं, परिपाटिः *f.*—(The state of being in order) क्रमः.

ARRANGER, *s.* विरचकः, उपायज्ञः, उपेता *m.* (तृ), व्यासः.

ARRANT, *a.* (Bad in a high degree) अतिदुष्टः -ष्टा -ष्टं, अतिनिकृष्टः -ष्टा -ष्टं, अतिकुत्सितः -ता -तं.—(Excessive) अत्यन्तः -न्ता -न्तं.

ARRAS, *s.* नानावर्णानि चित्रितवस्त्राणि.

ARRAY, *s.* (Of battle) व्यूहः, or -हनं, व्यूढिः *f.*, बलविन्यासः; 'to draw up in battle array,' व्यूह् (c. 1. -ऊहते -ऊहितुं).—(Order) क्रमः, श्रेणी, पङ्क्तिः *f.*, रचना.—(Dress) आभरणं, भूषणं, परिच्छदः.

To ARRAY, *v. a.* (To put in order) क्रमेण or व्यूहेन रच् (c. 10. रचयति -यितुं), विरच् or स्था in caus. (स्थापयति -यितुं), or व्यवस्था; or विधा (c. 3. -दधाति -धातुं), or सज्जीकृ.—(To dress) वस्त्रम् आछद् (c. 10. -छादयति -यितुं), संव्ये (c. 1. -व्ययति -व्यातुं), भूष् (c. 10. भूषयति -यितुं); अलङ्कृ, परिष्कृ.

ARREAR, *s.* ऋणशेषं, ऋणशेषांशः, ऋणस्य अशोधितो भागः, ऋणस्य शोधनीयो भागः.

ARREST, *s.* आसेधः, धरणं, ग्रहणं, निरोधः, बन्धनं.—(Stop) निवारणं.

To ARREST, *v. a.* (As a bailiff) आसिध् (c. 1. -सेधति -सेद्धुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं), ऋणहेतोः or दोषहेतोः राजलेखेन or राजाज्ञया बन्ध् (c. 9. बध्नाति -बन्द्धुं), or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं).—(Stop, bring to a stand) स्तम्भ् in caus. (स्तम्भयति -यितुं), विष्टम्भ् (c. 5. -स्तभ्नोति, c. 9. -स्तभ्नाति -स्तम्भितुं), निवृ in caus. (-वारयति -यितुं).

ARRESTED, *p. p.* आसिद्धः -द्धा -द्धं, धृतः -ता -तं, बद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं.

ARRIVAL, *s.* आगमनं, अभिगमनं, उपस्थितिः *f.*, उपयातं, आयः.

To ARRIVE, *v. n.* आगम् (c. 1. -गच्छति -गन्तुं), अभिगम्, उपगम्; उपस्था (c. 1. -तिष्ठति -स्थातुं), प्राप् (c. 5. -आप्नोति -आप्तुं), सम्प्राप्, अवाप्, अनुसम्प्राप्, उपसम्प्राप्, आया (c. 2. -याति -यातुं), अभिया, उपाया, समाया.

ARRIVED, *p. p.* आगतः -ता -तं, समायातः -ता -तं, उपस्थितः -ता -तं, प्राप्तः -प्ता -प्तं.

ARROGANCE, *s.* गर्वः, धर्षः, दर्पः, मानः, अभिमानः, मदः, अवलेपः, अहङ्कारः, प्रागल्भ्यं, प्रगल्भता, साटोपः, चित्तसमुन्नतिः, औद्धत्यं, प्रतिभानं.

ARROGANTLY, *adv.* सगर्व्वं, सदर्पं, साटोपं, गर्व्वेण, धर्षेण, प्रागल्भ्यं.

ARROGANT, *a.* प्रगल्भः -ल्भा -ल्भं, गर्व्वी -र्व्विणी -र्व्वि (न्), अतिगर्व्वितः -ता -तं, सगर्व्वः -र्व्वा -र्व्वं, मानी -निनी -नि (न्), मदोद्धतः -ता -तं, अहङ्कारी -रिणी -रि (न्), आत्मश्लाघी -घिनी -घि (न्), प्रधर्षितः -ता -तं, अवलिप्तः -प्ता -प्तं, उद्धतः -ता -तं, प्रतिभामुखः -खी -खं.—(To be arrogant) प्रगल्भ् (c. 1. -गल्भते -गल्भितुं), दृप् (c. 4. दृप्यति, दर्प्तुं दृप्तुं).

To ARROGATE, *v. a.* (To claim proudly) गर्व्वपूर्व्वकं or सगर्व्वं or अनर्हतस् or अधर्म्मतस् or मिथ्या ग्रह् (c. 9. गृह्णाति ग्रहीतुं), अभिग्रह, परिग्रह; or लभ् (c. 1. लभते लब्धुं), or आदा (c. 3. -ददाति -दातुं), or अभ्यनुज्ञा (c. 9. -जानाति -ज्ञातुं), or आत्मीयं -यां -यं कृ or स्वीकृ; मृषा or मिथ्या ग्रह्; उपधां कृ, ध्वजीकृ.

ARROGATION, *s.* सगर्व्वग्रहणं, अनर्हग्रहणं, अभिग्रहणं, अन्याय्यग्रहणं, मिथ्याग्रहणं, ध्वजीकरणं, उपधा.

ARROW, *s.* शरः, बाणः, इषुः *m.*, शायकः, काण्डं, शल्यं, विपाठः, विशिखः, पृषत्कः, पत्री *m.* (न्), भल्लः, नाराचः, प्रक्ष्वेडनः, अजिह्मगः, खगः, आशुगः, मार्गणः, कलमः, रोपः; 'arrow-head,' बाणाग्रं; 'arrow-shaft,' शरकाण्डं; 'a shower of arrows,' शरासारः, शरवर्षः.

ARROWY, *a.* (Consisting of arrows) बाणी -णिनी -णि (न्), बाणवान्

Digitized by Google

-वती -वत् (त्).—(Arrow-shaped) वाणाकारः -रा -रं.

Arsenal, *s.* आयुधागारं, आयुधगृहं, शस्त्रागारं, अस्त्रागारं, युद्धभाण्डागारं.—(A collection of arms) शस्त्रसंहतिः, शस्त्रसमूहः.

Arsenic, *s.* मनःशिला, शिला, मनोगुप्ता, नागजिह्विका, नैपाली, कुनटी.

Arson, *s.* आगारदाहः, गृहदाहापराधः.

Art, *s.* शिल्पं, शिल्पविद्या, कला, व्यवसायः, कर्म्म *n.* (न्).—(Invention) कल्पनं, -ना.—(Science) विद्या.—(Skill) निपुणता, पाण्डित्यं, दक्षता, युक्तिः *f.*, शिक्षाशक्तिः *f.*—(Cunning) विदग्धता, वैदग्ध्यं, माया.

Artery, *s.* नाडी, नाडिः *f.*, कण्डरा, नाली, नालिः *f.*, सिरा, रक्तवाही *m.* (न्).

BEARDED, *a.* (Having a beard) सश्मश्रुः -श्रुः -श्रु, श्मश्रुमान् -मती -मत् (न्), श्मश्रुलः -ला -लं.—(As corn) शूकवान् -वती -वत् (न्); 'bearded corn,' शूकधान्यं.—(As an arrow) कर्णी -र्णिनी -र्णि (न्).—(A bearded dart) प्रासः, कुन्तः.—(Insulted) अवज्ञातः -ता -तं.

BEARDLESS, *a.* श्मश्रुहीनः -ना -नं.—(A stripling) अप्राप्तव्यवहारः, वटुः, माणवकः.

BEARER, *s.* वाहकः, वाही *m.* (न्).—(Of burdens) भारवाहः -हनः, भारहारः, धुरन्धरः; 'one who carries out the dead,' प्रेतनिहारकः; 'letter-bearer,' पत्रवाहः; 'bearer of news,' सन्देशहरः.

BEARING, *s.* (The relative situation of a place) दिश्यं, दिक् *f.* (श्), अवस्थानं, अवस्थितिः *f.*, स्थानं.—(Behaviour) वृत्तिः *f.*, दर्शनं, रीतिः *f.*, गतिः *f.*, भावः, वर्त्तनं.

BEARISH, *a.* ऋक्षशीलः -ला -लं, भल्लकस्वभावः -वा -वं, अशिष्टः -ष्टा -ष्टं.

BEAST, *s.* पशुः *m.*, जन्तुः *m.*, तिर्य्यङ् (च्).—(Four-footed beast) चतुष्पात् *m. f. n.* (द्).—(Beast of prey) श्वापदः.—(Of burden) धुरीणः, धुरीयः, धुर्य्यः, भारवाहनः.—(Applied to a man) पुरुषपशुः *m.*, दुराचारः.

BEASTLINESS, *s.* पशुता -त्वं, पाशवं, पशुशीलता, अमनुष्यता.

BEASTLY, *a.* पाशवः -वी -वं, पशुशीलः -ला -लं, पशुव्यवहारः -रा -रं, अमानुषः -षी -षं.

BEASTLY, *adv.* पशुवत्, पशुव्यवहारानुसारेण, मानुषाचारविरुद्धं.

BEAT, *s.* आघातः, घातः, प्रहारः, पातः.—(Of the pulse or heart) स्पन्दनं, स्फुरणं, विष्पन्दः; 'at the beat of the drum,' आहतेषु पटहेषु.

To BEAT, *v. a.* तड् (c. 10. ताडयति -यितुं), वितड्; हन् (c. 2. हन्ति, हन्तुं), निहन्, अभिहन्; प्रह्व (c. 1. -हरति -ते -हर्त्तुं), तुद् (c. 6. तुदति, तोत्तुं), आतुद्, वितुद्.—(With a stick) वेत्राघातं कृ.—(To conquer, excel) पराजि (c. 1. -जयति -ते -जेतुं), विजि; अभिभू (c. 1. -भवति -भवितुं), अती (c. 2. अत्येति, अत्येतुं).—(To mix by beating) आलुड् (c. 1. -लोडति -लोडितुं), मन्थ् (c. 1. मथति, मथितुं).—(To bruise) चूर्ण् (c. 10. चूर्णयति -यितुं), मृद् (c. 9. मृद्नाति, मर्दितुं).—(To beat off, beat back) प्रतिहन् (c. 2. -हन्ति -हन्तुं).—(To beat down) निपत् in caus. (-पातयति -यितुं).—(To beat down the price) मूल्यं न्यूनीकृ or ह्रस् in caus. (ह्रासयति -यितुं).—(To flap the wings) पक्षास्फालं कृ, पक्षौ चल् in caus. (चालयति -यितुं).—(To rouse game by striking the bushes) मृगयासमये यथा मृगाः स्वस्थानानि त्यजन्ति तथा कोलाहलेन गुल्मादिताडनं कृ, मृगान्वेषणे यथा मृगो निजाश्रयात् पलायते तथा गुल्मादीन् तड्.

To BEAT, *v. n.* (To palpitate) स्पन्द् (c. 1. स्पन्दते, स्पन्दितुं), परिस्पन्द्; कम्प् (c. 1. कम्पते, कम्पितुं), स्फुर् (c. 6. स्फुरति, स्फुरितुं).

BEATEN, *part. a.* आहतः -ता -तं, ताडितः -ता -तं.—(Conquered) पराजितः -ता -तं; 'beaten by the waves,' उत्तरङ्गः -ङ्गा -ङ्गं.—(One that deserves to be beaten) कश्यः -श्या -श्यं, कशार्हः -र्हा -र्हं.

BEATER, *s.* ताडयिता *m.* (तृ), ताडकः, घाती *m.* (न्).—(A gold-beater)

मुद्गरादिना यः सुवर्णम् अतिशयेन सूक्ष्मीकरोति स्वर्णकारविशेषः; स्वर्णपत्रकृत्.—(An instrument for comminuting) मुद्गरः.

BEATIFIC OR BEATIFICAL, *a.* अपवर्गदः -दा -दं, परमसुखावहः -हा -हं, परमानन्दकरः -री -रं.

BEATIFICATION, *s.* अमुकसाधुजनः स्वर्गं or अपवर्गं or सिद्धिं प्राप्तवान् इति घोषणापत्रेण महाधर्म्माध्यक्षसकाशाद् विज्ञापनं, स्वर्गीयलोकमध्ये आरोपणं.

BEATIFIED, *p. p.* गृहीतापवर्गः -र्गा -र्गं, स्वर्गप्राप्तः -प्ता -प्तं, स्वर्गारोपितः -ता -तं.

To BEATIFY, *v. a.* (To make happy) सुख् (c. 10. सुखयति -यितुं), परमसुखं or परमानन्दं दा (c. 3. ददाति -दातुं).—(To proclaim publicly that a person is received into heaven) अमुकसाधुजनः स्वर्गं or सिद्धिं प्राप्तवान् इति महाधर्म्माध्यक्षाज्ञया घोषणापत्रं प्रचर् in caus. (-चारयति -यितुं); स्वर्गीयलोकमध्ये आरुह् in caus. (-रोपयति -यितुं).

BEATING, *s.* ताडनं, आघातः, घातः, दण्डः.—(With a stick) वेत्राघातः.—(Throbbing) स्पन्दनं, स्फुरणं.

BEATITUDE, *s.* मुक्तिः *f.*, मोक्षः, निर्वाणं, सिद्धिः *f.*, अपवर्गः, स्वर्गप्राप्तिः *f.*, परमागतिः *f.*, श्रेयः *n.* (स्) or निःश्रेयः, अमृतता, कैवल्यं.—(Felicity) परमसुखं, परमानन्दः, श्रेयस्त्वं, सुखं.—(Desirous of) मुमुक्षुः.

BEAU, *s.* सुवेशी *m.* (न्), सुवेशः, सुवस्त्रपरिच्छन्नः, दर्शनीयमानी *m.* (न्).

BEAU-MONDE, *s.* नृत्यगीतस्वाद्वन्नभोजनमद्यपानसुवस्त्रपरिधानादिभोगतत्परो लोकः, भोगासक्तो लोकः.

BEAUTEOUS OR BEAUTIFUL, *a.* चारुः -रुः -रुः, सुन्दरः -रा -री -रं, रुचिरः -रा -रं, सुदृश्यः -श्या -श्यं, शोभनः -ना -नं, कान्तः -न्ता -न्तं, वामः -मा -मं, रूपवान् -वती -वत् (त्), रूपी -पिणी -पि (न्), सुरूपः -पी -पं, मनोरमः -मा -मं, मनोज्ञः -ज्ञा -ज्ञं, लावण्यवान् -वती -वत् (त्), साधुः -धुः -ध्वी -धु, सौम्यः -म्या -म्यं, श्रीयुक्तः -क्ता -क्तं, सुमुखः -खी -खं, अभिरामः -मा -मं, सुषमः -मा -मं, पेशलः -ला -लं, रुच्यः -च्या -च्यं, मञ्जुः -ञ्जुः -ञ्जु, मञ्जुलः -ला -लं, वृन्दारः -रा -रं. Often expressed by सु; as, 'a beautiful day,' सुदिनं. 'A beautiful woman,' रूपवती, प्रमदा; 'to be beautiful,' शुभ् (c. 1. शोभते, शोभितुं).

BEAUTEOUSLY OR BEAUTIFULLY, *adv.* साधु, सुन्दरं, रुचिरं, सुष्ठु, सुन्दरप्रकारेण, सु prefixed; as, 'beautifully dressed,' सुवेशी -शिनी -शि (न्).

BEAUTEOUSNESS, *s.* कान्तता, अभिरामता, वामता, रूपवत्त्वं, रमणीयता, मुग्धता.

BEAUTIFIED, *p. p.* शोभितः -ता -तं, उपशोभितः -ता -तं, कृतशोभः -भा -भं.

BEAUTIFIER, *s.* शोभकृत्, शोभकः, शोभयिता *m.* (तृ), भूषणः.

To BEAUTIFY, *v. a.* शुभ् in caus. (शोभयति -यितुं), उपशुभ्, अलङ्कृ, परिष्कृ, भूष् (c. 10. भूषयति -यितुं), विभूष्.

BEAUTY, *s.* सौन्दर्य्यं, चारुता, शोभा, कान्तिः *f.*, रूपं, लावण्यं, रूपलावण्यं, श्रीः, आभा, अभिख्या, द्युतिः *f.*, छविः *f.*, मञ्जिमा *m.* (न्), सुषमा.

BEAUTY-SPOT, *s.* तिलकः -कं, सौन्दर्य्यवर्द्धकं चिह्नं, कान्तिदायकम् अङ्कं.

BEAVER, *s.* (An animal) स्थलजलचरजन्तुप्रभेदो यन्नोमनिर्म्मितं शिरस्त्रम् अधुनातनजनैर् भियते.—(A hat) पूर्व्वोक्तजन्तुलोमनिर्म्मितं शिरस्त्रं or शिरस्त्राणं.—(Part of a helmet) शिरस्त्राणस्य यो भागश् चिबुकदेशं or मुखस्य अधोभागं प्रच्छादयति.

BECAFICO, *s.* अञ्जीरद्राक्षादिखादको विदेशीयपक्षिभेदः, अञ्जीरप्रतुदः.

To BECALM, *v. a.* (To still the elements) निर्व्वातं -तां -तं कृ, वायुं निवृत् in caus. (-वर्त्तयति -यितुं), निस्तरङ्गं -ङ्गां -ङ्गं कृ.—(To quiet) शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्.

BECALMED, *p. p.* निर्व्वातः -ता -तं, निर्वेगः -गा -गं, निस्तरङ्गः -ङ्गा -ङ्गं.

BECAME, the preterite of 'become;' which *see*. Sometimes expressed by जातः -ता -तं.

Digitized by Google

BECAUSE, *conj.* यतस्, यत्, येन, यस्मात्, इति हेतोः, यतोहतोः, हि. 'Because' may be often expressed by the abl. or inst. c. of the abstract noun; as, 'because it had no deepness of earth,' मृदल्पत्वात्; 'because he was a just man,' सज्जनत्वात्; 'because he was a friend,' मित्रतया. It may even be expressed by इति; thus, 'I am come, because a servant ought to be present at the fitting occasion,' अनुजीविना प्राप्तकाले सान्निध्यं कर्त्तव्यम् इति आगतोऽस्मि.

BECAUSE OF, *prep.* (By reason of) हेतोः, हेतौ, कारणात्.—(For the sake of) अर्थं, अर्थे, कृते, निमित्ते affixed to a crude noun; 'because of that,' अनेन हेतुना, इति हेतोः. 'Because of' is often expressed by the abl. c. of the noun; as, 'because of their unbelief,' तेषाम् अविश्वासात्.

BECK, *s.* सङ्केतः, इङ्गितं.—(With the hand) करसङ्केतः.

To BECKON, *v. n.* शिरसा or हस्तेन सङ्केतं or इङ्गितं दा (c. 3. ददाति, दातुं) or कृ.—(To summon with a sign) इङ्गितेन समाह्वे (c. 1. -ह्वयति -ह्वातुं).

To BECOME, *v. n.* भू (c. 1. भवति, भवितुं), सम्भू; सम्पद् (c. 4. -पद्यते -पत्तुं), प्रतिपद्, वृत् (c. 1. वर्त्तते, वर्त्तितुं), संवृत्, जन् (c. 4. जायते), सञ्जन्. The pass. part. of जन् (जात) is often used in the sense 'became.' आह् in caus. (-हारयति -यितुं) with acc.

To BECOME, *v. a.* (Suit) युज् in pass. (युज्यते), उपपद् (c. 4. -पद्यते -पत्तुं) with loc.

BECOMING, *a.* युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, यथायोग्यः -ग्या -ग्यं, उचितः -ता -तं, यथोचितः -ता -तं, समुचितः -ता -तं, समञ्जसः -सा -सं.

BECOMINGLY, *adv.* यथायोग्यं, यथोचितं, युक्तं, यथार्हं, यथातथं, यथायथं, योगतस्.

BECOMINGNESS, *s.* युक्तता, औचित्यं, योग्यता, उपयुक्तत्वं, सामञ्जस्यं, उपपत्तिः *f.*, याथातथ्यं.

BED, *s.* शय्या, शयनं, पर्य्यङ्कः, तल्पः, खट्वा, संस्तरः, पल्यङ्कः, स्तरिमा *m.* (न्), शयनीयं, मञ्चः, मञ्चकः, प्रस्तरः, आस्तरणं.—(To go to bed) शी (c. 2. शेते, शयितुं); 'gone to bed,' शय्यागतः, खट्वारूढः -ढा -ढं.—(To make a bed) शय्यां प्रस्तुतीकृ or उपस्तृ (c. 5. -स्तृणोति -स्तरितुं -स्तरीतुं), आस्तृ.—(To lie down in bed) शय्याम् अधिशी.—(Channel of a river) गर्भः, नदीमध्यं, नदीवहनपथः, नदीरयपथः.—(Garden-bed) स्थलं, उद्याने पुष्पोत्पत्तियोग्य ईषदुन्नतो भूभागः.—(Marriage) विवाहः.—(A layer) फलकः.

To BED, *v. a.* (To place in a bed) खट्वाम् आरुह् in caus. (-रोपयति -यितुं).—(To cohabit with) उपगम् (c. 1. -गच्छति -गन्तुं).

To BEDABBLE OR BEDASH, *v. a.* सिच् (c. 6. सिञ्चति, सेक्तुं), अवसिच्, संसिच्, अवकॄ (c. 6. -किरति -करितुं -करीतुं), प्रोक्ष् (c. 1. -उक्षति -उक्षितुं).

To BEDAGGLE OR BEDASH, *v. a.* कर्दमेन or पङ्केन or मलेन लिप् (c. 6. लिम्पति, लेप्तुं) or दुष् in caus. (दूषयति -यितुं), मलिन (nom. मलिनयति -यितुं).

To BEDAUB, *v. v.* लिप् (c. 6. लिम्पति, लेप्तुं), आलिप्, उपलिप्, अञ्ज् (c. 7. अनक्ति, अङ्क्तुं) or in caus. (अञ्जयति -यितुं).

To BEDAZZLE, *v. a.* अतिशयतेजसा दृष्टिम् उपहन् (c. 2. -हन्ति -हन्तुं).

BEDCHAMBER, *s.* शयनागारः, शयनगृहं, स्वप्ननिकेतनं, निद्राशाला, विश्रामशाला, वासगृहं, वासागारं.

BEDCLOTHES, *s. pl.* शय्यास्तरणं, शय्यावरणं, खट्वासन्धि वस्त्रादिद्रव्यं, उत्तरच्छदः, मन्दरा.

BEDDING, *s.* शय्या, शय्योपकरणं, आस्तरणं, वोरपट्टी, खट्वासामग्री.

To BEDECK, *v. a.* भूष् (c. 10. भूषयति -यितुं), विभूष्, मण्ड् (c. 10. मण्डयति -यितुं), अलङ्कृ, परिष्कृ, शुभ् in caus. (शोभयति -यितुं).

BEDECKED, *p. p.* भूषितः -ता -तं, अलङ्कृतः -ता -तं, मण्डितः -ता -तं.

To BEDEW, *v. a.* शिशिरेण or नीहारेण क्लिद् in caus. (क्लेदयति -यितुं) or अवसिच् (c. 6. -सिञ्चति -सेक्तुं) or प्रोक्ष् (c. 1. -उक्षति -उक्षितुं) or आर्द्रीकृ.

BEDEWED, *p. p.* क्लिन्नः -न्ना -न्नं, आर्द्रः -र्द्रा -र्द्रं, प्रोक्षितः -ता -तं, तिमितः -ता -तं.

BEDFELLOW, *s.* सहशायी *m.* -यिनी *f.* (न्), एकखट्वाशायी *m.* -यिनी *f.* (न्).

BED-HANGINGS, *s.* मशहरी, चतुष्की, शय्यातिरस्करिणी.

To BEDIM, *v. a.* तिमिर् (nom. तिमिरयति -यितुं), तिमिरीकृ, मलिनीकृ.

To BEDIZEN, *v. a.* भूष् (c. 10. भूषयति -यितुं), विभूष्, परिभूष्, अलङ्कृ, परिष्कृ.

BEDIZENED, *p. p.* भूषितः -ता -तं, अलङ्कृतः -ता -तं, शोभितः -ता -तं.

BEDLAM, *s.* उन्मत्तानाम् आरोग्यशाला, वातुलागारं, वातुललोकालयः.

BEDLAM, *a.* उन्मत्तः -त्ता -त्तं, उन्मादः -दा -दं, वातुलः -ला -लं.

BEDLAMITE, *s.* उन्मत्तः, उन्मादी *m.* (न्), वातुलः, मत्तः.

BED-MAKER, *s.* राजविद्यालये या स्त्री or यो जनो ऽन्तेवासिनां शय्यास्तरणं करोति; शयनकल्पिका, शय्यां कल्पयति या परिचारिका.

BEDPOST, *s.* खट्वास्तम्भः, खट्वादण्डः, शयनस्थूणा.

BEDRID OR BEDRIDDEN, *a.* शयनाद् उत्थातुम् अक्षमः; अतिजीर्णः -र्णा -र्णं, अतिवृद्धः -द्धा -द्धं.

BEDROOM, *s.* शयनगृहं, स्वप्ननिकेतनं, शयनागारः, निद्राशाला, विश्रामशाला.

BEDSIDE, *s.* शय्यापार्श्वः, खट्वापार्श्वः, शयनोपान्तं, खट्वासमीपं.

BEDSTEAD, *s.* पर्य्यङ्कः, खट्वा, मञ्चः, मञ्चकः, पल्यङ्कः, तल्पः.

BEDTIME, *s.* शयनकालः, स्वप्नकालः, निद्राकालः, शय्यागमनसमयः, विश्रामकालः.

BEE, *s.* मधुकरः -कारी *m.* (न्), अलिः *m.*, मधुकृत् *m.*, मधुपायी *m.* (न्), मधुपः, मधुमक्षिका, मधुलिट् *m.* (ह्), भृङ्गः, पुष्पन्धयः, पुष्पलिट् *m.* (ह्), षट्पदः, द्विरेफः, भ्रमरः, मधुव्रतः, सरघा.

BEECH, *s.* भूर्ज्जजातीयो वन्यवृक्षप्रभेदः.

BEECHEN, *a.* पूर्व्वोक्तवृक्षकाष्ठमयः -यी -यं.

BEE-EATER, *s.* मधुमक्षिकाखादकः पक्षिप्रभेदः.

BEEF, *s.* गोमांसं; 'roast beef,' शूलिकगोमांसं; 'boiled beef,' शृतगोमांसं.

BEEF-EATER, *s.* राजपरिचरः -परिचारकः, राजोपासकः.

BEE-GARDEN, *s.* मधुमक्षिकापालनस्थानं, मधुकरपालनोद्यानं.

BEE-HIVE, *s.* मधुकोषः, करण्डः, छत्रकः, मधुमक्षिकाधारः.

BEE-MASTER, *s.* मधुमक्षिकापालकः, मधुकररक्षकः.

BEESWAX, *s.* मधूच्छिष्टं, मधुजं, शिक्थं, सिक्थकं.

BEER, *s.* यवसुरं, यवमद्यं, यवरसः, यवनिर्म्मितं पानीयं.

BEER-HOUSE, *s.* यवसुरविक्रयस्थानं, यवसुरगृहं, आपानं, पानगोष्ठिका.

BEET, *s.* (A plant) पालङ्कः, पालङ्कशाकः.

BEETLE, *s.* भ्रमरभेदः, भृङ्गप्रभेदः, परोष्णी, पिङ्गकपिशा.—(A mallet) मुद्गरः.

To BEETLE, *v. n.* बहिर् लस् (c. 1. लसते, लसितुं), प्रलस्.

BEETLE-BROWED, *a.* ललाटाभोगविशिष्टः -ष्टा -ष्टं, प्रलम्बललाटः -टा -टं.

BEEVES, *s.* (Oxen) गावः *m. pl.*, गोकुलं.

To BEFALL, *v. n.* घट् (c. 1. घटते, घटितुं), निपत् (c. 1. -पतति -पतितुं), उपस्था (c. 1. -तिष्ठति -स्थातुं), सम्पद् (c. 4. -पद्यते -पत्तुं), उपपद्, सम्भू (c. 1. -भवति -भवितुं).

BEFALLEN, *p. p.* आपतितः -ता -तं, उपस्थितः -ता -तं, समुपस्थितः -ता -तं, समापन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, घटितः -ता -तं, वृत्तः -त्ता -त्तं.

To BEFIT, *v. a.* युज् in pass. (युज्यते), उपपद् (c. 4. -पद्यते -पत्तुं) with loc.

Digitized by Google

BEFITTING, *a.* योग्यः -ग्या -ग्यं, यथायोग्यः -ग्या -ग्यं, यथोचितः -ता -तं.

To BEFOOL, *v. a.* मुह् in caus. (-मोहयति -यितुं), व्यामुह्, विप्रमुह्, भ्रम् in caus. (भ्रमयति -यितुं), वञ्च् in caus. (वञ्चयति -ते -यितुं).

BEFORE, *prep.* and *adv.* प्र, अभि prefixed.—(In the front of, not behind) अग्रे, अग्रतस्, पुरस्, पुरतस्, पुरस्तात्, अभितस्, प्रतिमुखं, अभिमुखं; 'going before,' पुरोगः -गा -गं, अग्रेसरः -रा -रं; 'before the fire,' अभ्यग्नि.—(In the presence of) साक्षात्, प्रत्यक्षे, अग्रे, समक्षं, प्रतिमुखं; 'he took them before the king,' तान् राजसमीपम् आनीतवान्.—(In the sight of, before the face) समक्षं, प्रत्यक्षं, प्रत्यक्षतस्, साक्षात्, सम्मुखं; 'before many persons,' बहुजनसमक्षं.—(Earlier in time, sooner than) प्राक्, पूर्वं, with the abl. c.; अग्रे; 'before offering the cakes,' पिण्डदानात् पूर्वं; 'before the appointed time,' निरूपितसमयात् पूर्वं or प्राग् विहितकालात्; 'he knows your necessities before you ask,' यत् तव प्रयोजनं तद् याञ्ज्ञातः पूर्वं जानाति; 'before dinner,' भोजनात् पूर्वं; 'before the event,' प्राग् घटनात्; 'before me,' मदग्रे.—(In time past) पुरा, पूर्वं, पूर्वकाले.—(As yet, hitherto) अद्य यावत्, अद्यपर्य्यन्तं, एतत् कालं यावत्, अद्यापि.—(Already) तत्पूर्वं, प्राग् वर्त्तमानकालात्; 'before mentioned,' पूर्वोक्तः -क्ता -क्तं, प्रागुक्तः -क्ता -क्तं, पूर्वोचोदितः -ता -तं; 'the day before yesterday,' अपरेद्युस्; 'before and after,' पूर्वोत्तरं.

BEFORE-HAND, *adv.* पूर्वं, अग्रे, पूर्वं, अग्रतस्, पूर्वतस्; 'determining beforehand,' अग्रनिरूपणं; 'to taste beforehand,' पूर्वास्वादनं कृ.

BEFORE-TIME, *adv.* पुरा, पूर्वं, पूर्वकाले, गतकाले.

To BEFOUL, *v. a.* मलिन (nom. मलिनयति -यितुं), दुष् in caus. (दूषयति -यितुं), कलुष (nom. कलुषयति -यितुं), आविल (nom. आविलयति -यितुं), समलं -लां -लं कृ.

To BEFRIEND, *v. a.* मित्र (nom. मित्रीयते -यितुं), उपकृ (c. 8. -करोति -कुरुते -कर्तुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), साहाय्यं कृ.

BEFRIENDED, *p. p.* कृतोपकारः -रा -रं, उपकृतः -ता -तं, अनुगृहीतः -ता -तं.

To BEG, *v. a.* (To ask) अर्थ् (c. 10. अर्थयते -यितुं), अभ्यर्थ्, प्रार्थ्, सम्प्रार्थ्, याच् (c. 1. याचति -ते, याचितुं), अभियाच्, प्रयाच्, सम्प्रयाच्, संयाच्.—(To ask alms) भिक्ष् (c. 1. भिक्षते, भिक्षितुं).—(To beg as a favour) वृ (c. 9. वृणीते, वरितुं, वरीतुं) or in caus. (वारयति -यितुं) with 2 acc., प्रसद् in caus. (-सादयते -यितुं).—(To beg for pardon) क्षम् in caus. (क्षमयति -यितुं) with acc. of the pers.

To BEG, *v. n.* भिक्ष् (c. 1. भिक्षते, भिक्षितुं), भैक्ष्यं चर् (c. 1. चरति, चरितुं), भिक्षाटनं कृ.

To BEGET, *v. a.* जन् in caus. (जनयति -यितुं), विजन्, सञ्जन्, प्रसु (c. 2. -सूते, c. 4. -सूयते -सोतुं).—(To produce, cause) उत्पद् in caus. (-पादयति -यितुं).—(To create) सृज् (c. 6. सृजति, स्रष्टुं).

BEGETTER, *s.* जनकः, जननः, जनयिता *m.* (तृ), जनिता *m.* (तृ), जन्मदः, सुती *m.* (न्), उत्पादकः.

BEGGAR, *s.* (One who lives on alms) भिक्षुः *m.*, भिक्षुकः -की *f.*, भिक्षोपजीवी *m.* (न्), भिक्षाचरः, दरिद्रः.—(A petitioner) प्रार्थकः, अर्थी *m.* (न्) -र्थिनी *f.*, प्रार्थयिता *m.* (तृ), याचकः, याचनकः, मार्गणः -णकः, वनीयकः.—(In ragged garments) कर्पटी *m.* (न्).

To BEGGAR, *v. a.* दरिद्रीकृ, सर्वस्वं हृ (c. 1. हरति, हर्तुं), धनाद् भ्रंश् in caus. (भ्रंशयति -यितुं).

BEGGARED, *a.* दरिद्रितः -ता -तं, धनच्युतः -ता -तं, हृतसर्वस्वः -स्वा -स्वं, परिक्षीणः -णा -णं, गतवित्तः -त्ता -त्तं, नष्टार्थः -र्था -र्थं, गतविभवः -वा -वं, गतलक्ष्मीकः -का -कं, गतश्रीकः -का -कं; 'he is beggared,' अनर्णायते.

BEGGARLY, *a.* (Indigent) दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, दुर्गतः -ता -तं, कृपणः -णा -णं, दीनः -ना -नं.—(Mean) तुच्छः -च्छा -च्छं, नीचः -चा -चं, अपकृष्टः -ष्टा -ष्टं.

BEGGARLY, *adv.* कृपणं, कार्पण्येन, दीनं, नीचप्रकारेण.

BEGGARY, *s.* (Indigence) दरिद्रता, दारिद्र्यं -द्र्यं, निर्धनता, परिक्षीणता, कार्पण्यं, अर्थिता, दीनता.

BEGGED, *p. p.* प्रार्थितः -ता -तं, याचितः -ता -तं, भिक्षितः -ता -तं.

BEGGING, (Act of) *s.* भिक्षा, भिक्षाटनं, भैक्षचर्य्या, अर्थना, अभ्यर्थना, याचना, याञ्ज्ञा, प्रार्थनं -ना, अर्हणा, अभिशस्तिः *f.*

To BEGIN, *v. a.* and *n.* आरभ् (c. 1. -रभते -रब्धुं), अभ्यारभ्, प्रारभ्, समारभ्, प्रक्रम् (c. 1. -क्रमते -क्रमितुं), उपक्रम्, समुपक्रम्, प्रवृत् (c. 1. -वर्त्तते -वर्त्तितुं); प्रकृ, सम्प्रकृ; प्रस्तु (c. 2. -स्तौति -स्तोतुं); 'he began to cut,' छेत्तुं प्रवृत्तः.

BEGINNER, *s.* (One who begins) आरम्भा *m.* (भृ), आरम्भकः, उपक्रन्ता *m.* (न्तृ), उपक्रमिता *m.* (तृ), उपक्रमकारी *m.* (न्).—(A novice) नवच्छात्रः, नूतनशिष्यः, प्राथमकल्पिकः.

BEGINNING, *s.* आरम्भः, प्रारम्भः, समारम्भः, प्रारम्भिः *f.*, आदिः *m.* उपक्रमः, प्रक्रमः, उद्घातः, उपोद्घातः, अभ्यादानं.—(Origin, source) मूलं, योनिः *m. f.*, उद्भवः, प्रभवः, गर्भः, जन्म *n.* (न्).—(Rudiments) आरम्भः.—(Elementary property) कारणगुणः; 'without beginning,' अनाद्यः -द्या -द्यं; 'from beginning to end,' आद्यन्तं, आप्रथमात् शेषं यावत्; 'beginning, middle, and end,' आदिमध्यावसानं; 'beginning with,' आदि, आद्य affixed.

To BEGIRD, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

BEGIRT, *p. p.* परिवेष्टितः -ता -तं, परिगतः -ता -तं, वलयितः -ता -तं, आवृतः -ता -तं; 'begirt with the sea,' समुद्रमेखलः -ला -लं.

BEGONE, *interj.* अपैहि, अपसर, दूरम् अपसर.

BEGOTTEN, *p. p.* जनितः -ता -तं, उत्पादितः -ता -तं, प्रसूतः -ता -तं.

To BEGREASE, *v. a.* वसया or स्नेहेन or तैलेन or घृतेन लिप् (c. 6. लिम्पति -लेप्तुं), स्निग्धीकृ.

To BEGRIME, *v. a.* मलेन दुष् in caus. (दूषयति -यितुं), मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं).

BEGRIMED, *p. p.* मलदूषितः -ता -तं, कलुषितः -ता -तं, कलङ्कितः -ता -तं.

To BEGRUDGE, *v. a.* स्पृह् (c. 10. स्पृहयति -यितुं), असूय (nom. असूयति -यितुं).

To BEGUILE, *v. a.* मुह् in caus. (मोहयति -यितुं), विप्रमुह्, व्यामुह्, वञ्च् in caus. (वञ्चयते -यितुं), परिवञ्च्, प्रवञ्च्, भ्रम् in caus. (भ्रमयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, आकृष् (c. 1. -कर्षति -क्रष्टुं -कर्षितुं).—(To beguile the time) विनुद् in caus. (-नोदयति -यितुं).

BEGUILED, *p. p.* मोहितः -ता -तं, विमोहितः -ता -तं, वञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं, विमूढः -ढा -ढं, प्रपञ्चितः -ता -तं, प्रलोभितः -ता -तं, विलोभितः -ता -तं, प्रतारितः -ता -तं.

BEGUN, *p. p.* आरब्धः -ब्धा -ब्धं, प्रारब्धः -ब्धा -ब्धं, उपक्रान्तः -न्ता -न्तं.

BEHALF, *s.* (In behalf of) अर्थं, अर्थे, हेतोः, हेतौ, कारणात्, निमित्ते, कृते, generally affixed to the crude of a noun; 'on my behalf,' मत्कृते or मदर्थे; 'on behalf of (his) son,' पुत्रहेतोः.—(Favour) अनुग्रहः, प्रसादः.

To BEHAVE, *v. n.* चर् (c. 1. चरति, चरितुं), आचर्, समाचर्, वृत् (c. 1.

Digitized by Google

वर्त्तते, वर्त्तितुं); sometimes वृत्तिं is added; as, 'in whatever way you behave towards them,' यां वृत्तिं तेषु वर्त्तसे. वृत्तिम् अनुष्ठा (c. 1. -तिष्ठति -स्थातुं), व्यवह् (c. 1. -हरति -हर्त्तुं).—Well-behaved) सदाचारयुक्तः -क्ता -क्तं, सदाचारवान् -वती -वत् (त्).

Behaviour, *s.* वृत्तिः *f.*, वृत्तं, आचारः, रीतिः *f.*, व्यवहारः, चरित्रं, चरितं, आचरणं, गतिः *f.*, चेष्टितं, स्थितिः *f.*

To behead, *v. a.* शिरः or मस्तकं छिद् (c. 7. छिनत्ति, छेत्तुं), विमस्तक (nom. विमस्तकयति -यितुं).

Beheaded, *p. p.* विमस्तकितः -ता -तं, छिन्नमस्तः -स्ता -स्तं, -स्तकः -का -कं.

Beheading (act of) *s.* शीर्षच्छेदः.—(Worthy of) शीर्षच्छेद्यः -द्या -द्यं.

Beheld, *p. p.* आलोकितः -ता -तं, दृष्टः -ष्टा -ष्टं, आलोचितः -ता -तं, ईक्षितः -ता -तं. ईक्ष्यमाणः -णा -णं.

Behest, *s.* आज्ञा, आदेशः, निर्देशः, निदेशः, शासनं, वशं.

Behind, *prep.* or *adv.* पश्चात्, अनु prefixed.—(Behind the back, at the back of) पृष्ठतस्; 'following behind,' अनुगामी -मिनी -मि (न्).—(Below, inferior) अधस्तात्, अधरस्तात्.—(Posterior) अवरतस्, अवरस्तात्.—(At a distance) दूरतस्, दूरे.—(The hinder part) पृष्ठदेशः, पश्चाद्देशः, पृष्ठं, नितम्बः.

Behindhand, *adv.* अतीतकालः -ला -लं, विलम्बी -म्बिनी -म्बि (न्), दीर्घकालीनः -ना -नं.—(Surpassed by another) अतिक्रान्तः -न्ता -न्तं.

To behold, *v. a.* दृश् (c. 1. पश्यति, द्रष्टुं), अभिदृश्, विदृश्, सन्दृश्; ईक्ष् (c. 1. ईक्षते, ईक्षितुं), समीक्ष्, वीक्ष्, अभिवीक्ष्, प्रेक्ष्, अभिप्रेक्ष्, सम्प्रेक्ष्, उदीक्ष्, अवेक्ष्, अन्वीक्ष्, अवलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -लोकितुं), आलोक्, समालोक्, विलोक्, लक्ष् (c. 10. लक्षयति -ते -यितुं), आलक्ष्, समालक्ष्, उपलक्ष्, संलक्ष्; आलोच् (c. 10. -लोचयति -यितुं).

Behold, *interj.* पश्य, प्रेक्षस्व.

To be beholden, *v. n.* कृतोपकारस्मरणेन पराधीनः -ना -नं or परायत्तः -त्ता -त्तं भू, प्राप्तोपकारहेतोर् बद्धः -द्धा -द्धं or निबद्धः -द्धा -द्धं भू or अस्, कृतोपकारं ज्ञा (c. 9. जानाति, ज्ञातुं), प्रत्युपकारः करणीय इति ज्ञा, आप्तोपकारमोक्षात् परवशं ज्ञा.

Beholder, *s.* प्रेक्षकः, द्रष्टा *m.* (ष्टृ), प्रेक्षमाणः, दर्शी *m.* (न्), पश्यन् *m.* (त्).

Behoof, *s.* अर्थः, फलं, लाभः, वृद्धिः *f.*, विवृद्धिः *f.*, फलोदयः.

Behoveful, *a.* यथोचितः -ता -तं, योग्यः -ग्या -ग्यं, अर्थकरः -री -रं.

It behoves, *v. imp.* Expressed by the future passive participle; as, 'it behoves you to marry the damsel,' त्वया कन्या वोढव्या; or by the potential mood, as, त्वं कन्यां वहेः; or by the use of the verb अर्ह् (c. 1. अर्हति), as त्वं कन्यां वोढुम् अर्हसि; 'to act as it behoves one,' यथोचितं कृ.

Being, *s.* (A being) भूतं, सत्त्वः.—(A sentient being) प्राणी *m.* (न्), प्राणभृत् *m. f. n.*, शरीरी *m.* (न्), देही *m.* (न्), जन्तुः *m.*, जन्युः *m.*, चेतनः, जन्मी *m.* (न्).—(Existence) प्राणधारणं, असुधारणं, निश्वसनप्रश्वसनं, सम्भवः, अस्ति *ind.*, वृत्तिः *f.*, सत्त्वं.—(Particular state) भावः, अवस्था, दशा, वृत्तिः *f.*—(Supreme Being) परमेश्वरः.—(Pres. part.) सन् सती सत् (त्), वर्त्तमानः -ना -नं.

Being that, *conj.* (Since) यतस्, यस्मात्, येन, इति हेतोः, यतोहेतोः. 'Being,' is often expressed by the loc. c. of सत्, as, 'the man being gone,' पुरुषे गते सति; 'it being so,' एवं सति, तथात्वे, एवम्भूत्वा. 'Being' may also be expressed by the abl. c. of the abstract noun in such phrases as 'he being a good man,' सज्जनत्वात्.

Be it so, एवमस्तु, तथास्तु, भवतु, अस्त्वेवं.

To belabour, *v. a.* ताड् (c. 10. ताडयति -यितुं), हन् (c. 2. हन्ति, हन्तुं), अभिहन्, अभ्याहन्, समाहन्; प्रह् (c. 1. -हरति -हर्त्तुं).—(With a stick) वेत्राघातं कृ.

To belay, *v. a.* (Block up) प्रतिरुध् (c. 7. -रुणद्धि -रोद्धुं), उपरुध्.

To belch, *v. a.* उद्गम् (c. 1. -गच्छति -गन्तुं), उद्गॄ (c. 6. -गिरति -गरितुं -गरीतुं).

Belch, belching, *s.* उद्गमः, उद्गमनं, उद्गारः, उद्गिरणं.

Beldam, *s.* वृद्धा स्त्री, जरिणी, जरापरिणता स्त्री, कुट्टिनी, कुरूपी.

To beleaguer, *v. a.* (To besiege) रुध् (c. 7. रुणद्धि, रोद्धुं), अवरुध्, उपरुध्; परिवेष् (c. 1. -वेष्टते -वेष्टितुं).

Beleaguered, *p. p.* परिवेष्टितः -ता -तं, उपरुद्धः -द्धा -द्धं, बाधितः -ता -तं.

Belfounder, *s.* घण्टाकारी *m.* (न्), घण्टानिर्म्माणकर्त्ता *m.* (र्तृ), कांस्यकारः.

Belfry, *s.* घण्टाताडनयोग्यं प्रासादशृङ्गं, घण्टास्थानं, घण्टाशाला.

To belie, *v. a.* (To counterfeit, imitate) छल् (c. 10. छलयति -यितुं), छद्म or छद्मवेशं कृ, अनुकृ (c. 8. -करोति -कर्त्तुं).—(To charge any one with falsehood, to argue) अनृतं or असत्यं or मिथ्यावादं कस्मैचिद् आरुह् in caus. (-रोपयति -यितुं), पिशुन (nom. पिशुनयति -यितुं).—(To calumniate) परिवद् (c. 1. -वदति -वदितुं), अपवद्, कलङ्कं कृ, मिथ्याभियोगं कृ.

Belief, *s.* (Credence) प्रत्ययः, विश्वासः, विश्रम्भः, प्रमाणं.—(Religious belief) श्रद्धं -द्धा, भक्तिः *f.*, विश्वासः.—(Opinion) मतिः *f.*, बुद्धिः *f.*, बोधः.—(The thing believed in, tenet) मतं; 'my belief is,' मन्ये.

Believable, *a.* विश्वास्यः -स्या -स्यं, श्रद्धेयः -या -यं, विश्वासयोग्यः -ग्या -ग्यं.

To believe, *v. a.* (To give credit to) प्रती (c. 2. प्रत्येति, प्रत्येतुं), प्रत्ययीकृ.—(To have religious belief in) विश्वस् (c. 2. -श्वसिति -श्वसितुं) with loc. c.

To believe, *v. n.* (To exercise religious faith) श्रद्धा (c. 3. -दधाति -धातुं), विश्वासं कृ, प्रत्ययं कृ.—(To believe in, hold as an object of faith) विश्वस् (c. 2. -श्वसिति -श्वसितुं) with loc. c.—(To think) मन् (c. 4. मन्यते, मन्तुं).

Believed, *p. p.* विश्वसितः -ता -तं, विश्वस्तः -स्ता -स्तं, प्रतीतः -ता -तं.

Believer, *s.* श्रद्धान्वितः, आस्तिकः, प्रत्ययी *m.* (न्), विश्वासी *m.* (न्).

Believing, *a.* श्रद्दधानः -ना -नं, श्रद्धालुः -लुः -लु, श्राद्धः -द्धा -द्धं, श्रद्धावान् -वती -वत् (त्), जातविश्वासः -सा -सं, विश्वासी -सिनी -सि (न्), प्रत्ययी -यिनी -यि (न्).

Belike, *adv.* अपिनाम, किंस्वित्, किल, स्यात्.

Bell, *s.* घण्टा, घण्टिका, घनं.—(Tinkling ornaments) किङ्किणी; 'to ring a bell,' घण्टां हन् (c. 2. हन्ति, हन्तुं) or ताड् (c. 10. ताडयति -यितुं) or वद् in caus. (वादयति -यितुं); 'bell-shaped,' घण्टाकारः -रा -रं.

Bell-clapper, *s.* घण्टावादकः, घण्टाकोणः, घण्टाभ्यन्तरे लम्बमान इतस्ततो दोलायमानस् तद्वादनयोग्यो लवङ्गाकारः कोणः; घण्टाभ्यन्तरे लग्नः स्थूलशिरस्को मुसलाकार आयसकीलो येन इतस्ततो लोलमाना घण्टा वाद्यते.

Belle, *s.* सुन्दरी *f.*, सुरूपी *f.*, रूपवती *f.*, सुवेशिनी *f.*, प्रमदा.

Belles-lettres, *s.* अलङ्कारविद्या, रसविद्या, रसिका विद्या, वाङ्मयं.

Belligerent, *a.* युध्यमानः -ना -नं, रणशीलः -ला -लं, युयुत्सुः -त्सुः -त्सु.

Bellipotent, *a.* रणवीरः -रा -रं, विक्रमी -मिणी -मि (न्), महावीर्य्यः -र्य्या -र्य्यं.

Bell-metal, *s.* कांस्यं, घण्टाशब्दं, घोषः, ताम्राढ्यं, घोरपुष्पः, पीतलोहं.

To bellow, *v. n.* गर्ज् (c. 1. गर्जति, गर्जितुं), नद् (c. 1. नदति, नदितुं), विनद्, रस् (c. 1. रसति, रसितुं), रु (c. 2. रौति, रवितुं), विरु, संरु; रट् (c. 1. रटति, रटितुं), गज् (c. 1. गजति, गजितुं), हम्भ (nom. हम्भायते -यितुं).

Digitized by Google

BELLOWED, *p. p.* गर्ज्जितः -ता -तं, नर्दितः -ता -तं, प्रणर्दितः -ता -तं.

BELLOWING, *s.* गर्ज्जनं, नादः, रुतं, नर्दनं, नर्दितं.

BELLOWS, *s.* भस्त्रा *f.*, भस्त्री, भस्त्रिका, चर्म्मप्रसेवकः -विका, व्यजनं, दृतिः *f.*

BELL-RINGER, *s.* घण्टाताडः -डकः, घण्टावादकः, घण्टावादयिता *m.* (तृ).

BELLUINE, *a.* पाशवः -वी -वं, पशुशीलः -ला -लं, अमानुषः -षी -षं.

BELLY, *s.* उदरं, जठरं -रा, कुक्षिः *m.*, पिचिण्डः, पिचण्डः, तुन्दं, तुन्दि *n.*

To BELLY OR BELLY-OUT, *v. n.* (To swell out, bulge out) उदरवत् or उदररूपेण लस् (c. 1. लसते, लसितुं) or पृ in pass. (पूर्य्यते).

BELLY-ACHE, *s.* उदरवेदना, उदरामयः.

BELLY-BAND, *s.* उदरत्राणं, उदरदाम *n.* (न्), अवसक्तिका.

BELLY-BOUND, *a.* आनद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं, बद्धोदरः -रा -रं.

BELLY-FULL, *s.* उदरपूरणं, पिचिण्डपूरणं, जठरपूरणं.

BELLY-GOD, *s.* उदरम्भरिः *m.*, कुक्षिम्भरिः *m.*, औदरिकः, उदरकामुकः, आत्मम्भरिः *m.*

BELLY-WORMS, *s. pl.* उदरावेष्टः, मीवा, कृमिः *m.*, क्रिमिः *m.*

BELMAN, *s.* घोषकः, घण्टाधरः, घण्टाताडनपूर्ब्बकं घोषणाकर्त्ता *m.*, वैवोधिकः.

To BELONG, *v. n.* (To be one's own property) आत्मीयः -या -यं or स्वकीयः -या -यं or स्वाधीनः -ना -नं अस्. But the sense of 'belonging' is more usually expressed by the use of the roots अस् or भू or विद् with the gen. c.; as, 'money belongs to me,' मम धनं विद्यते or अस्ति.—(To have relation to) सम्बन्ध् in pass. (-बध्यते).—(To be fit, or becoming) युज् in pass. (युज्यते); 'this belongs to me,' *i.e.* 'this is my business,' मम अयं व्यापारः.

BELONGING, *part.* सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धकः -का -कं.

BELOVED, *a.* प्रियः -या -यं, सुप्रियः -या -यं, दयितः -ता -तं, इष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, इष्टतमः -मा -मं, प्रेष्ठः -ष्ठा -ष्ठं, प्रीतः -ता -तं, हृद्यः -द्या -द्यं, वल्लभः -भा -भं, अभीप्सितः -ता -तं.—(Dear as one's life) असुसमः -मा -मं, प्राणैर् गरीयान् -यसी -यः (स्).

BELOW, *prep.* (Under in place) अधस्, अधस्तात्, तले, नीचे, अधोधस्; 'below the bed,' खट्वातले or खट्वाधः.—(Inferior, beneath) अवरः -रा -रं, अधःस्थः -स्था -स्थं, अवरतस्, अवरस्तात्, अधरेण, अधरात्, अधरतस्, अधरस्तात्.—(Unworthy of) अयोग्यः -ग्या -ग्यं, अनर्हः -र्हा -र्हं.—(Subject to) अधीनः -ना -नं.—(Less than) ऊनः -ना -नं; 'below two years of age,' ऊनद्विवार्षिकः or अप्राप्तद्वितीयवर्षः.

BELOW, *adv.* अधस्, नीचे, नीचकैस्, अधःस्थाने, अधोभागे, अधःस्थः -स्था -स्थं.—(On earth, as opposed to heaven) इहलोके, इह.—(In hell) अधोलोके, अधोभुवने.

BELROPE, *s.* घण्टारज्जुः *m.*, घण्टासूत्रं, अधुनातनगृहेषु घण्टावादने प्रयुक्तं सूत्रं.

BELT, *s.* मेखला, काञ्ची, कटिसूत्रं, शृङ्खलं -ला, रसना.

To BELT, *v. a.* मेखलारूपेण परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं).

BELWETHER, *s.* यो मेषश् चरन् चरन् कण्ठलग्नां घण्टां वादयति एवम्प्रकारेण च मेषयूथम् एकत्र करोति सः; मेषयूथाग्रगः, मेषयूथपः.

To BEMANGLE, *v. a.* व्रश्च् (c. 6. वृश्चति, व्रश्चितुं, व्रष्टुं), प्रव्रश्च्, खण्डशः कृ, खण्डं खण्डं कृ, शकलीकृ, व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं).

To BEMIRE, *v. a.* मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), पङ्केन or मलेन दुष् in caus. (दूषयति -यितुं).

BEMIRED, *p. p.* मलदूषितः -ता -तं, मलपङ्की -ङ्किनी -ङ्कि (न्).

To BEMOAN, *v. a.* विलप् (c. 1. -लपति -लपितुं), अनुशुच् (c. 1. -शोचति -शोचितुं), परिदेव् (c. 1. -देवते देवितुं), लप् in freq. (लालप्यते).

BEMOANING, *s.* विलपनं, विलापः, परिदेवनं, क्रन्दितं, अनुशोचनं, रोदनं.

BENCH, *s.* दीर्घासनं, दीर्घपीठं, आसनं, फलकः -कं; 'carpenter's bench,' उड्डनः.—(Seat of justice) धर्म्मासनं, विचारासनं.

BENCHER, *s.* विचारकर्त्तॄणां संसर्गे ज्येष्ठः or उत्तमपदप्राप्तः, सभ्यः, सभासद् *m.*—(Judge) प्राड्विवाकः.

To BEND, *v. a.* (To bow, inflect) नम् in caus. (नामयति -यितुं), अवनम्, आनम्; नम्रीकृ.—(To make crooked) वक्रीकृ, जिह्म (nom. जिह्मयति -यितुं), अञ्च् (c. 1. अञ्चति, अञ्चितुं).—(To direct towards) आवृज् in caus. (-वर्जयति -यितुं).—(To bend a bow) धनुर् विस्फुर् in caus. (-स्फारयति -यितुं) or आयम् (c. 1. -यच्छति -यन्तुं).—(To bend the brow) भ्रूभङ्गं कृ.—(To bend the mind) मनः प्रविश् in caus. (-वेशयति -यितुं).—(To subdue) वशीकृ.

To BEND, *v. n.* (To be incurvated) नम् (c. 1. नमति, नन्तुं), अवनम्, आनम्; नम्रीभू, वक्रीभू.—(To jut over) प्रणतः -ता -तं अस्; प्रलम्ब् (c. 1. -लम्बते -लम्बितुं).—(To be bent or resolved on) कृतनिश्चयः -या -यं or दृढनिश्चयः -या -यं or सुनिश्चितः -ता -तं अस्.—(To be submissive) आनतः -ता -तं or वश्यः -श्या -श्यं भू.

BEND, *s.* (Incurvation) नतिः *f.*, वक्रता, जिह्मता, वक्रिमा *m.* (न्), कुञ्चनं, अवकुञ्चनं, भङ्गी.—(Bend of a river) वक्रं वङ्कः, पुटभेदः, भङ्गुरः.

BENEATH, *prep.* (Lower in place) अधस्, अधस्तात्, तले, नीचे, अधोधस्, अधरस्तात्, अधरतस्, अधरात्; 'beneath the tree,' वृक्षतले or वृक्षस्याधस्तात्; 'the water beneath the earth,' धरण्या अधःस्थं तोयं.—(Inferior) अवरः -रा -रं, अवरतस्, अवरस्तात्.—(Unbeseeming) अयोग्यः -ग्या -ग्यं, अनर्हः -र्हा -र्हं.

BENEATH, *adv.* अधस्, नीचे, अधःस्थाने, नीचस्थाने, अधःस्थः -स्था -स्थं; 'the earth beneath,' नीचस्था पृथिवी.

BENEDICTION, *s.* आशीः *f.* (स्), आशीर्वचनं, आशीर्वादः, स्वस्ति *ind.* धन्यवादः.—(Praise) स्तवः, स्तुतिः *f.*—(The advantage conferred) मङ्गलं, धन्यत्वं, वरः.

BENEDICTORY, *a.* सौवस्तिकः -की -कं, स्वस्तिमान् -मती -मत् (त्), माङ्गलिकः -की -कं.

BENEFACTION, *s.* उपकारः, उपकृतं, उपकारकत्वं, हितं, प्रसादः.

BENEFACTOR, *s.* हितकरः, उपकर्त्ता *m.* (र्तृ), उपकारकः, उपकारी *m.* (न्), उपकारकरः, कृतोपकारः, प्रियकृत्, प्रियकारः, परवाञ्छापूरकः.

BENEFACTRESS, *s.* हितकरी, उपकारिणी, उपकर्त्री, प्रियकारी.

BENEFICE, *s.* धर्म्माध्यापकवृत्तिः *f.*, धर्म्मशिक्षकवृत्तिः *f.*, धर्म्माध्यापकप्रतिपत्तिः *f.*

BENEFICENCE, *s.* परोपकारकत्वं, परोपकारः, उपकारशीलता, दानशीलता, दया, कृपा, स्थूललक्ष्यत्वं, त्यागशीलता, त्यागिता.

BENEFICENT, *a.* परोपकारकः -का -कं, परोपकारी -रिणी -रि (न्), उपकारशीलः -ला -लं, उपकारपरः -रा -रं, हितकरः -री -रं, दानशीलः -ला -लं, त्यागशीलः -ला -लं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, प्रियकारः -री -रं, प्रियङ्करः -री -रं, दयाकरः -रा -रं.

BENEFICENTLY, *adv.* हितकरवत्, प्रियकरवत्, वदान्यवत्, स्थूललक्ष्यतया, दयापूर्ब्बं.

BENEFICIAL, *a.* हितः -ता -तं, फलवान् -वती -वत् (त्), सफलः -ला -लं, सोपकारः -रा -रं, हितवान् -वती -वत् (त्), अर्थकरः -री -रं, उपकारकः -का -कं, उपकारी -रिणी -रि (न्), लाभवान् -वती -वत् (त्), लाभजनकः -का -कं, अर्थजनकः -का -कं.—(Medicinally wholesome) पथ्यः -थ्या -थ्यं, औषधीयः -या -यं.

BENEFICIALLY, *adv.* सोपकारं, सफलं, सलाभं, सार्थं, फलाय, लाभाय.

BENEFICIARY, *a.* पराधीनः -ना -नं, पराश्रितः -ता -तं, परतन्त्रः -त्रा -त्रं.—(One who holds a benefice) धर्म्माध्यापनवृत्तिभागी *m.* (न्).

Digitized by Google

BENEFIT, *s.* (Favour conferred) हितं, उपकारः, उपकृतं, उपकारकत्वं -ता, अनुग्रहः, प्रसादः, मङ्गलं.—(Advantage, profit) फलं, लाभः, अर्थः; 'for the public benefit,' प्रजार्थं.

To BENEFIT, *v. a.* उपकृ (c. 8. -करोति -कुरुते -कर्तुं) with loc. or acc. c., हितं कृ, अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), उपचर् (c. 1. -चरति -चरितुं), फलं or लाभं दा (c. 3. ददाति, दातुं).

To BENEFIT, *v. n.* उपकारं or फलं or लाभं or हितं प्राप् (c. 5. -आप्नोति -आप्तुं).

BENEFITTED, *p. p.* उपकृतः -ता -तं, कृतोपकारः -रा -रं, कृतलाभः -भा -भं.

BENEVOLENCE, *s.* परहितेच्छा, हितेच्छा, प्रेम *n.* (न्), दयालुत्वं, परोपकारशीलता, हितकाम्या, सौजन्यं, परवाञ्छापूरणं, दया, कृपा.

BENEVOLENT, *a.* हितकामः -मा -मं, परहितैषी -षिणी -षि (न्), परोपकारशीलः -ला -लं, हितप्रेप्सुः -प्सुः -प्सु, प्रियैषी -षिणी -षि (न्), परहितः -ता -तं, उपकारपरः -रा -रं, दयालुः -लुः -लु, सुशीलः -ला -लं, सुहृदयः -या -यं.

BENEVOLENTLY, *adv.* सुशीलवत्, प्रेम्ना, प्रियं, दयापूर्वं, सद्भावात्, कृपया.

BENGAL, *s.* (The country) बङ्गः.—(Belonging to it) बाङ्गः -ङ्गी -ङ्गं.

To BENIGHT, *v. a.* तिमिर (nom. तिमिरयति -यितुं), तमसा प्रच्छद् in caus. (-छादयति -यितुं).

BENIGHTED, *p. p.* निशाक्रान्तः -न्ता -न्तं, रात्रिग्रस्तः -स्ता -स्तं, तमोवृतः -ता -तं, तमोभूतः -ता -तं, सन्तमसः -सा -सं, तमसाच्छन्नः -न्ना -न्नं.

BENIGN, BENIGNANT, *a.* प्रियः -या -यं, हितः -ता -तं, प्रीतः -ता -तं, दयाशीलः -ला -लं, दयालुः -लुः -लु, सुशीलः -ला -लं, कृपालुः -लुः -लु. मृदुः -दुः -दु, प्रेमपरः -रा -रं.

BENIGNITY, *s.* प्रियता, प्रेम *n.* (न्), प्रीतिः *f.*, स्नेहः, दया, कृपा, कृपालुत्वं, मृदुता, माईवं, दयालुत्वं, अनुग्रहः.—(Wholesomeness) पथ्यता.

BENIGNLY, *adv.* प्रियं, प्रीत्या, दयापूर्वं, कृपया, सद्भावात्, प्रसादात्.

BENISON, *s.* आशीः *f.* (स्), आशीर्वचनं, स्वस्ति *ind.*, धन्यवादः.

BENJAMIN, *s.* कालानुसार्यं, शैलनिर्यासः, शिलारसः, शिलाजं, वस्तान्ती.

BENT, *s.* (Curvature) नतिः *f.*, वक्रता, नम्रत्वं, जिह्मता, वक्रिमा *m.* (न्), कुचनं.—(Declivity) प्रवणः, पातुकः.—(Inclination) शीलः, भावः, स्वभावः, प्रकृतिः *f.*, वाञ्छा, इच्छा.—(Determination) निश्चयः.—(Purpose) चिकीर्षितं, अभिप्रायः.—(Application of mind) मनःप्रवेशः.—(A kind of grass) दुब्बा, शकुलाक्षकः.

BENT, *p. p.* नतः -ता -तं, नामितः -ता -तं, आनतः -ता -तं, प्रणतः -ता -तं, नम्रः -म्रा -म्रं, परिणतः -ता -तं, भुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, विभुग्नः -ग्ना -ग्नं, रुग्नः -ग्ना -ग्नं, वक्रिमः -मा -मं, प्रवणः -णा -णं, प्रह्वः -ह्वा -ह्वं, कुञ्चितः -ता -तं, आकुञ्चितः -ता -तं, अवायः -या -यं.

To BENUMB, *v. a.* जडीकृ, मुह् in caus. (मोहयति -यितुं), स्तम्भ् (c. 5. स्तभ्नोति, c. 9. स्तभ्नाति, स्तम्भितुं).

BENUMBED, *p. p.* शीताकुलः -ला -लं, जडीकृतः -ता -तं, जडीभूतः -ता -तं, स्तम्भितः -ता -तं, सुप्तत्वक् *m. f. n.* (च्).

BENZOIN, *s.* कालानुसार्यं, अश्मपुष्पं, शीतशिवं, वृङ्गं, शैलं, वस्तान्ती, शिलाजं, शिलाभवं, शैलनिर्यासः.

To BEPAINT, *v. a.* चित्र् (c. 10. चित्रयति -यितुं), रञ्ज् in caus. (रञ्जयति -यितुं).

To BEPISS, *v. a.* अवमूत्र् (c. 10. -मूत्रयति -यितुं).

To BEQUEATH, *v. a.* प्राग् मरणात् or मरणात् पूर्वं or आसन्ने मरणकाले नियमपत्रेण स्वरिक्थं दायादादिभ्यः प्रदा (c. 1. -यच्छति -दातुं) or प्रतिपद् in caus. (-पादयति -यितुं) or समृ in caus. (-अर्पयति -यितुं).

BEQUEATHED, *p. p.* रिक्थहारिने प्रदत्तः -त्ता -त्तं or प्रत्तः -त्ता -त्तं or प्रतिपादितः -ता -तं.

BEQUEST, *s.* मृत्पूर्वदानं, उत्तरदानं, आसन्ने मरणकाले दायादादिभ्यो रिक्थप्रदानं.

To BEREAVE, *v. a.* वियुज् in caus. (-योजयति -यितुं), विप्रयुज् with abl. or inst. c., अपहृ (c. 1. -हरति -हर्तुं), अपनी (c. 1. -नयति -नेतुं), भंश् in caus. (भंशयति -यितुं).—(To be bereaved) हा in pass. (हीयते), परिहा in pass. with inst. c., भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं) with abl. c., वियुज् in pass. (-युज्यते).

BEREAVED or BEREFT, *a.* हीनः -ना -नं, रहितः -ता -तं, वर्जितः -ता -तं, हृतः -ता -तं, अपहृतः -ता -तं, परित्यक्तः -क्ता -क्तं, वियुक्तः -क्ता -क्तं; 'bereft of money,' धनहीनः -ना -नं; 'bereft of one's all,' हृतसर्वस्वः; 'bereft of life,' हृतजीवितः -ता -तं. Often expressed by गत in the first member of a compound; as, 'bereft of feeling,' गतचेतनः -ना -नं.

BEREAVEMENT, *s.* हानिः *f.*, वियोगः, विप्रयोगः, अपहारः, अपचयः.

BERGAMOT, *s.* फलभेदः, सुगन्धविशिष्टो निर्यासविशेषः.

To BERHYME, *v. a.* उपगीतं -तां -तं कृ, कवि (nom. कव्यति).

BERRY, *s.* बीजपूर्णं गुटिकाकारं क्षुद्रफलं, गुटिका, गुली.

BERYL, *s.* गोमेदः, गोमेदकः -कं.

To BESCATTER, *v. a.* अवकृ (c. 6. -किरति -करितुं, करीतुं), पर्यवकृ.

To BESEECH, *v. a.* प्रार्थ् (c. 10. -अर्थयते -यितुं), अभ्यर्थ्, सम्प्रार्थ्; विनयेन प्रार्थ्, विनी (c. 1. -नयति -नेतुं), याच् (c. 1. याचति -ते, याचितुं), अभियाच्, प्रयाच्, सम्प्रयाच्; प्रसद् in caus. (-सादयते -यितुं).

BESEECHED, *p. p.* विनयेन प्रार्थितः -ता -तं, अभ्यर्थितः -ता -तं, याचितः -ता -तं.

BESEECHER, *s.* प्रार्थकः, प्रार्थयिता *m.* (तृ), अर्थी *m.* (न्), याचकः.

To BESEEM, *v. a.* युज् in pass. (युज्यते), उपपद् (c. 4. -पद्यते -पत्तुं) with loc. c.

BESEEMLY, *a.* युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, यथोचितः -ता -तं.

To BESET, *v. a.* (To besiege) रुध् (c. 7. रुणद्धि, रोद्धुं), उपरुध्, आक्रम् (c. 1. -क्रामति -क्रमितुं).—(To surround) परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), उपवेष्ट्, संवेष्ट्; परिष्ठा (c. 1. -तिष्ठति -ते -स्थातुं), पर्युपस्था.—(To embarrass) आकुलीकृ, बाध् (c. 1. बाधते, बाधितुं), परिक्लिश् (c. 9. -क्लिश्नाति -क्लेष्टुं).

BESET, *p. p.* रुद्धः -द्धा -द्धं, उपरुद्धः -द्धा -द्धं, वेष्टितः -ता -तं, परिवेष्टितः -ता -तं, आक्रान्तः -न्ता -न्तं, परिगतः -ता -तं, अभिपरिप्लुतः -ता -तं, बाधितः -ता -तं, परीतः -ता -तं, अभिपरीतः -ता -तं.

To BESHREW, *v. a.* दुर्भाग्यं or अमङ्गलं प्रार्थ् (c. 10. -अर्थयते -यितुं), धिक्कृ.

BESIDE or BESIDES, *prep.* (At the side of) पार्श्वे, पार्श्वतस्, निकटे, समीपे, सन्निधाने, अभितस्; 'beside the river,' नदीतीरे, नदीसमीपे.—(Over and above) अधिकं, व्यतिरिक्तं, अन्तरेण, मुक्त्वा.—(Except) ऋते with abl. or acc., विना with inst. or acc.—(Beside one's self) हतज्ञानः -ना -नं, उपहतबुद्धिः -द्धिः -द्धि, उन्मत्तः -त्ता -त्तं.

BESIDE or BESIDES, *adv.* अपरञ्च, अपरं, अन्यच्च, अपिच, किञ्च, अधिकन्तु, अधिकं; 'are there any here besides?' किम् अत्र अपरे सन्ति.

To BESIEGE, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), अवरुध्, उपरुध्, परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), आक्रम् (c. 1. -क्रामति -क्रमितुं), बाध् (c. 1. बाधते, बाधितुं).

BESIEGED, *part. a.* रुद्धः -द्धा -द्धं, परिवेष्टितः -ता -तं, बाधितः -ता -तं.

BESIEGER, *s.* अवरोधकः, रोधी *m.* (न्), अवरोधी *m.* (न्), वेष्टकः, बाधकः.

To BESLAVE, *v. a.* वशीकृ, दासीकृ, करदीकृ, दम् in caus. (दमयति -यितुं).

To BESMEAR, *v. a.* लिप् (c. 6. लिम्पति -ते -लेप्तुं), आलिप्, समालिप्, उपलिप्, अञ्ज् (c. 7. अनक्ति, अंक्तुं), or caus. (अञ्जयति -यितुं), दिह् (c. 2. देग्धि, देग्धुं), प्रदिह्.

BESMEARED, *p. p.* लिप्तः -प्ता -प्तं, विलिप्तः -प्ता -प्तं, उपलिप्तः -प्ता -प्तं, अभ्यक्तः -क्ता -क्तं, दिग्धः -ग्धा -ग्धं; 'besmeared with blood,' रक्ताक्तः -क्ता -क्तं, शोणिताक्तः -क्ता -क्तं, शोणितोक्षितः -ता -तं.

Digitized by Google

BESOM, *s.* मार्जनी, सम्मार्जनी, शोधनी, विमार्गः, झहनी, समूहनी.

To BESORT, *v. a.* युज् in pass. (युज्यते), उपपद् (c. 4. -पद्यते -पत्तुं).

To BESOT, *v. a.* मुह् in caus. (मोहयति -यितुं), जडीकृ, मूढीकृ.

BESOTTED, *p. p.* मूढचेताः -ताः -तः (स्), मूढबुद्धिः -द्धिः -द्धि, मूढात्मा -त्मा -त्म (न्), प्रमूढसंज्ञः -ज्ञा -ज्ञं, मोहितः -ता -तं, जडीकृतः -ता -तं.

BESOTTEDNESS, *s.* मोहः, सम्मोहः, मूढता, जडता, जडिमा *m.* (न्).

To BESPANGLE, *v. a.* नक्षत्राकारैर् भूषणैर् अनुव्यध् (c. 4. -विध्यति -व्यद्धुं) or शुभ् in caus. (शोभयति -यितुं), उपशुभ्.

To BESPATTER, *v. a.* पङ्केन or मलेन सिच् (c. 6. सिञ्चति -ते, सेक्तुं), अवसिच् or अवकॄ (c. 6. -किरति -करितुं -करीतुं), अभ्यवकॄ or उक्ष् (c. 1. उक्षति उक्षितुं), प्रोक्ष्; मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं).

BESPATTERED, *p. p.* मलदूषितः -ता -तं, कलङ्कितः -ता -तं, कलुषितः -ता -तं.

To BESPEAK, *v. a.* (To order beforehand) प्रख्या (c. 2. -ख्याति -ख्यातुं), पूर्वादेशं कृ; अग्रनिवेदनं कृ; मम पूर्वभुक्तिः स्यादिति वद् (c. 1. वदति, वदितुं).—(To betoken, indicate) सूच् (c. 10. सूचयति -यितुं), प्रदिश् (c. 6. -दिशति -देष्टुं).—(To forebode) अग्रनिरूपणं कृ, प्रदृश् in caus. (-दर्शयति -यितुं).

To BESPECKLE, *v. a.* चित्र् (c. 10. चित्रयति -यितुं), शबलीकृ, कर्बुरीकृ.

To BESPIT, *v. a.* निष्ठीव् (c. 1. -ष्ठीवति -ष्ठेवितुं), अवनिष्ठीव्.

BESPOKEN, *p. p.* प्रख्यातः -ता -तं, पूर्वादिष्टः -ष्टा -ष्टं, अग्रनिवेदितः -ता -तं.—(Any commodity bespoken) प्रख्यातभाण्डं.

BESPREAD, *p. p.* आस्तीर्णः -र्णा -र्णं, आवृतः -ता -तं, परिच्छन्नः -न्ना -न्नं.

To BESPRINKLE, *v. a.* सिच् (c. 6. सिञ्चति -ते, सेक्तुं), अवसिच्, निषिच्, संसिच्, अवकॄ (c. 6. -किरति -करितुं -करीतुं), अभ्यवकॄ, पर्यवकॄ, समवकॄ, उक्ष् (c. 1. उक्षति, उक्षितुं), अभ्युक्ष्, प्रोक्ष्; क्लिद् in caus. (क्लेदयति -यितुं).

BESPRINKLED, *p. p.* सिक्तः -क्ता -क्तं, उक्षितः -ता -तं, प्रोक्षितः -ता -तं.

BEST (superl. of good), *a.* सर्वोत्तमः -मा -मं, उत्तमः -मा -मं, अनुत्तमः -मा -मं, सत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, सर्वश्रेष्ठः -ष्ठा -ष्ठं, परमः -मा -मं, परः -रा -रं, भद्रतमः -मा -मं, अर्हत्तमः -मा -मं, प्रवरः -रा -रं, प्रशस्तः -स्ता -स्तं, अग्रिमः -मा -मं, पराद्यः -द्या -द्यं; 'which is the best of these?' एतेषां को भद्रतमः; 'best beloved,' इष्टतमः -मा -मं. Any thing the best of its kind may sometimes be expressed by रत्नं.

BEST (superl. of well), *adv.* उत्तमं, श्रेष्ठं, सत्तमं, श्रेष्ठतस्.

BESTAINED, *p. p.* कलङ्कितः -ता -तं, दूषितः -ता -तं, परिमलितः -ता -तं.

To BESTEAD, *v. a.* (To profit) फलाय or लाभाय भू or अस्.

BESTIAL, *a.* पाशवः -वी -वं, पशुशीलः -ला -लं, पशुव्यवहारः -रा -रं, पशुसदृशः -शी -शं, अमानुषः -षी -षं, क्रूराचारः -रा -रं.

BESTIALITY, *s.* पशुता -त्वं, पशुशीलता, अमनुष्यता, क्रूराचारत्वं, पशुगमनं.

To BESTIALIZE, *v. a.* पशूकृ, पशुसदृशं -शीं -शं कृ.

BESTIALLY, *adv.* पशुवत्, पशुरूपेण, पशुव्यवहारानुसारात्, मानुषाचारविरुद्धं.

To BESTIR ONE'S SELF, *v. r.* चेष्ट् (c. 1. चेष्टते, चेष्टितुं), विचेष्ट्, आत्मानं चेष्ट् in caus. (चेष्टयति -यितुं), यत् (c. 1. यतते, यतितुं), प्रयत्, घट् (c. 1. घटते, घटितुं), व्यवसो (c. 1. -स्यति -सातुं), उद्यमं or उत्साहं कृ.

To BESTOW, *v. a.* (To give) दा (c. 3. ददाति, c. 1. यच्छति, दातुं), प्रदा, अभिदा, अनुदा, वितॄ (c. 1. -तरति -तरितुं -तरीतुं), प्रतिपद् in caus. (-पादयति -यितुं), उपपद्; निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं); उपाकृ.—(To apply, lay out) प्रयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं), उपयुज्; निधा (c. 3. -दधाति -धातुं).—(To give in marriage) कन्यां प्रदा.

To BESTOW ONE'S SELF, *v. r.* (Attend to) सेव् (c. 1. सेवते, सेवितुं). उपसेव्; आस्था (c. 1. -तिष्ठति -स्थातुं), मनो निविश् in caus. (-वेशयति -यितुं).

BESTOWED, *p. p.* दत्तः -त्ता -त्तं, प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, निहितः -ता -तं, विश्राणितः -ता -तं, प्रतिपादितः- ता -तं, निक्षिप्तः -प्ता -प्तं, वितीर्णः -र्णा -र्णं.

BESTOWER, *s.* दाता *m.* (तृ), प्रदाता *m.* (तृ), प्रदः or दः in comp.

BESTRAUGHT, *p. p.* चिन्ताकुलः -ला -लं, व्यग्रः -ग्रा -ग्रं, उपहतबुद्धिः -द्धिः -द्धि.

To BESTREW, *v. a.* आस्तॄ (c. 5. -स्तृणोति -स्तरितुं -स्तरीतुं).

To BESTRIDE, *v. a.* (A horse) पादौ or जङ्घे पृथक्कृत्वा अश्वम् आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, अध्यारुह्; अधिक्रम् (c. 1. -क्रामति -क्रमितुं); 'bestriding a horse,' अश्वारूढः.

To BESTUD, *v. a.* गण्डादिभूषणैर् अनुव्यध् (c. 4. -विध्यति -व्यद्धुं) or खच् (c. 10. खचयति -यितुं).

BESTUDDED, *p. p.* अनुविद्धः -द्धा -द्धं, खचितः -ता -तं, प्रत्युप्तः -प्ता -प्तं.

BET, *s.* (Wager) पणः, प्रतिज्ञा, आक्षिकपणः.

To BET, *v. n.* पण् (c. 1. पणते, पणितुं), विपण्; दिव् (c. 4. दीव्यति, देवितुं).

To BETAKE ONE'S SELF, *v. r.* आश्रि (c. 1. -श्रयति -ते -श्रयितुं), अभिश्रि, उपाश्रि, संश्रि, समुपाश्रि.

BETEL, *s.* (Nut) ताम्बूलं, पूगं, उद्वेगं, पूगफलं.—(The plant) ताम्बूली, ताम्बूलवल्ली, नागवल्ली.—(A seller of it) ताम्बूलिकः.—(Relating to it) ताम्बूली -लिनी -लि (न्).—(Betel box) पूगपात्रं, ताम्बूलपेटिका.—(Betel-bearer) ताम्बूलवाहकः, ताम्बूलदः, वाग्गुलिः *m.*

To BETHINK ONE'S SELF, *v. r.* अनुचिन्त् (c. 10. -चिन्तयति -यितुं), सञ्चिन्त्, अनुध्यै (c. 1. -ध्यायति -ध्यातुं), विमृश् (c. 6. -मृशति -मर्ष्टुं -मर्ष्टुं), अनुबुध् (c. 4. -बुध्यते -बोद्धुं), अनुस्मृ (c. 1. -स्मरति -स्मर्तुं).

To BETHUMP, *v. a.* ताड् (c. 10. ताडयति -यितुं), प्रहृ (c. 1. -हरति -हर्तुं).

To BETIDE, *v. n.* सम्भू (c. 1. -भवति -भवितुं), उपस्था (c. 1. -तिष्ठति -स्थातुं), निपत् (c. 1. -पतति -पतितुं), सम्पद् (c. 4. -पद्यते -पत्तुं), घट् (c. 1. घटते, घटितुं); 'may good betide you,' भद्रं ते भूयात्; 'woe betide you,' अवग्राहस्ते or अजीवनिस्ते or अकरणिस्ते भूयात्.

BETIMES, *adv.* प्रभाते, सकालं, प्रातर्, व्युष्टं, प्रत्यूषे, समया, समये, उपयुक्तसमये, वेलायां.

To BETOKEN, *v. a.* सूच् (c. 10. सूचयति -यितुं), प्रदिश् (c. 6. -दिशति -देष्टुं), सन्दिश्; अभिदृश् in caus. (-दर्शयति -यितुं).—(To foreshew) प्रदृश् in caus.; 'betokening,' सूचकः -का -कं, वाचकः -का -कं.

To BETOSS, *v. a.* क्षुभ् in caus. (क्षोभयति -यितुं), क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

To BETRAY, *v. a.* परहस्तेषु or शत्रुकरेषु or शत्रुपाणिषु or अन्येषां करेषु समृ in caus. (-सर्पयति -यितुं), परादा (c. 3. -ददाति -दातुं), प्रदा, वच् (c. 10. वञ्चयते -यितुं), विश्वासघातं or विश्वासभङ्गं कृ, खण्ड् (c. 10. खण्डयति -यितुं), शत्रोरायत्तं -त्तां -त्तं कृ.—(To shew, discover) सूच् (c. 10. सूचयति -यितुं); दृश् in caus. (दर्शयति -यितुं), पिशुन (nom. पिशुनयति -यितुं), व्यक्तीकृ, प्रकटीकृ.—(To betray secrets) गोप्यानि प्रकाश् in caus. (-काशयति -यितुं), मन्त्रभेदं कृ.

BETRAYED, *p. p.* शत्रुहस्तार्पितः -ता -तं, वञ्चितः -ता -तं, परादत्तः -त्ता -त्तं.

BETRAYER, *s.* परहस्तार्पकः, वञ्चकः, विश्वासघातकः, प्रदाता *m.* (तृ).

To BETRIM, *v. a.* भूष् (c. 10. भूषयति -यितुं), अलङ्कृ, परिष्कृ.

To BETROTH, *v. a.* वाग्दानं कृ, नियमपत्रेण विवाहप्रतिज्ञां कृ, प्रतिज्ञापत्रेण विवाहसम्बन्धं कृ.

BETROTHED, *p. p.* वाग्दत्तः -त्ता -त्तं, प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, प्रतिज्ञाविवाहितः -ता -तं.—(Woman) वाग्दत्ता, प्रत्ता.

BETROTHMENT, *s.* वाग्दानं, कन्याप्रदानं.

To BETRUST, *v. a.* परिदा (c. 3. -ददाति -दातुं), नियुज् in caus. (-योजयति

Digitized by Google

-यितुं), समृ in caus. (-अर्पयति -यितुं).

BETTER, (compar. of good) *a.* भद्रतरः -रा -रं, श्रेयान् -यसी -यः (स्), श्रेष्ठः -ष्ठा -ष्ठं, गरीयान् -यसी -यः (स्), प्रशस्तः -स्ता -स्तं, अहेतरः -रा -रं, साधीयान् -यसी -यः (स्), ज्यायान् -यसी -यः (स्).

BETTER (compar. of well) *adv.* वरं, प्रशस्तं, श्रेयस्, भद्रतरं, भद्रतरप्रकारेण, श्रेष्ठं.—(More) अधिकं, अधिकतरं, अतिरिक्तं.—(The better, the superiority) श्रेष्ठता, श्रेयस्त्वं, प्रधानता, प्रमुखत्वं.—(To get the better) अभिभू, अतिरिच् in pass. (-रिच्यते).

To BETTER, *v. a.* भद्रतरं -रां -रं कृ, श्रेयांसं -यसीं -यः कृ.—(To advance) वृध् in caus. (वर्धयति -यितुं), संवृध्, परिवृध्, एध् in caus. (एधयति -यितुं), समेध्.—(To surpass) अतिरिच् in pass. (-रिच्यते), अभिभू.

BETTERS, *s. pl.* (Superiors) श्रेष्ठाः *m. pl.*, प्रधानपुरुषाः *m. pl.*, उच्चपुरुषाः *m. pl.*

BETTING, *s.* पणनं, पणकरणं, पणार्पणं, आक्षिकपणकरणं, प्रतिज्ञानं.

BETTOR, *s.* पणकर्त्ता *m.* (र्तृ), पणकः, पणार्पकः.

BETTY, *s.* द्वारकपाटादिभञ्जने सन्धिचौरैः प्रयुक्तं लोहयन्त्रं.

BETWEEN or BETWIXT, *prep.* मध्ये, संभ्यन्तरे, अन्तरेण, अन्तरे, अन्तर्, अन्तरा, मध्यतस्, मध्यस्थाने; 'the mediator between God and man,' ईश्वरस्य मानुषाणाञ्च मध्ये मध्यस्थः. Between is sometimes expressed by the gen. or inst. c.; as, 'there is a great difference between a master and a servant,' सेव्यसेवकयोर् महदन्तरं; 'great is the difference between thee and the ocean,' त्वया समुद्रेण च महदन्तरं; 'I will put enmity between thee and the woman,' त्वया नार्य्या च वैरितां जनिष्यामि; 'I am in a strait betwixt two,' उभाभ्यां सङ्कुचितोऽस्मि; 'they parted the paternal inheritance between them,' दायं पित्र्यं परस्परं व्यभजन्.

BEVER, *s.* माध्यन्दिनभोजनानन्तरं प्रायाग्निभोजनात् तत्कालान्तरे लघ्वाहारः or अल्पाशनं.

BEVERAGE, *s.* पानीयं, पेयं, पानं, पयः *n.* (स्).—(Of the gods) अमृतं.

BEVY, *s.* गणः, सङ्घः, समवायः, यूथं, कुलं; 'a bevy of young lasses,' तरुणीगणः.

To BEWAIL, *v. a.* and *n.* विलप् (c. 1. -लपति -लपितुं), शुच् (c. 1. शोचति, शोचितुं), अनुशुच्, परिदेव् (c. 1. -देवति -ते -देवितुं); 'to grieve exceedingly,' शुच् in freq. (शोशुच्यते), परिशुच् in freq., लप् in freq. (लालप्यते).

BEWAILABLE, *a.* शोच्यः -च्या -च्यं, शोचनीयः -या -यं, विलपनीयः -या -यं.

BEWAILING, *s.* विलपनं, विलापः, परिदेवनं, अनुशोचनं, क्रन्दनं.

To BEWARE, *v. n.* अवधा (c. 3. -धत्ते -धातुं), सावधानः -ना -नं भू, अवधानं कृ.—(Abstain from, avoid) परिहृ (c. 1. -हरति -हर्तुं), वृज् in caus. (वर्जयति -यितुं), विवृज्, परिवृज्; 'beware of men,' मानुषेभ्योऽवधत्स्व; 'beware of too great avarice,' अतिलोभात् सावधानो भव; 'beware lest any one deceive you,' सावधाना भवत कोऽपि युष्मान् न भ्रमयेत्.

To BEWEEP, *v. a.* रुद् (c. 2. रोदिति, रोदितुं), अनुशुच् (c. 1. -शोचति, -शोचितुं).

To BEWET, *v. a.* क्लिद् in caus. (क्लेदयति -यितुं), सिच् (c. 6. सिञ्चति, सेक्तुं).

To BEWILDER, *v. a.* मुह् in caus. (मोहयति -यितुं), व्यामुह्, परिमुह्, विप्रमुह्; आकुलीकृ, व्याकुलीकृ, विभ्रम् in caus. (-भ्रमयति -यितुं), सम्भ्रम्.

BEWILDERED, *p. p.* आकुलः -ला -लं, व्याकुलः -ला -लं, आकुलितः -ता -तं. आकुलीकृतः -ता -तं, सम्भ्रान्तः -न्ता -न्तं, कातरः -रा -रं, व्यग्रः -ग्रा -ग्रं. मोहितः -ता -तं, मुग्धः -ग्धा -ग्धं, विमूढः -ढा -ढं, विमुग्धः -ग्धा -ग्धं, व्यस्तः -स्ता -स्तं, परिविह्वलः -ला -लं.

BEWILDERMENT, *s.* व्याकुलता, आकुलत्वं, व्यग्रता, वैक्लव्यं, सम्भ्रमः, कातरता.

To BEWITCH, *v. a.* मन्त्रद्वारा वशीकृ or मुह् in caus. (मोहयति -यितुं), मोहं कृ, अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं).—(To captivate) मनो हृ (c. 1. हरति, हर्तुं).

BEWITCHED, *p. p.* मोहितः -ता -तं, वशीकृतः -ता -तं, अभिमन्त्रितः -ता -तं.

BEWITCHER, *s.* मोहकः, मोहनः, मायी *m.* (न्), वशीकर्त्ता *m.* (र्तृ), मायाकृत्.

BEWITCHMENT, *s.* वशीक्रिया, वशिः *m.*, वशिता, वशीकरणं, मोहनं, परिमोहनं, विमोहनं, सम्मोहः, मोहः, माया, कार्म्मणत्वं.

BEWITCHING, *a.* मोही -हिनी -हि (न्), मोहनः -नी -नं, मनोहारी -रिणी -रि (न्), मनोहरः -रा -रं, प्रलोभकः -का -कं, आकर्षिकः -की -कं, मायी -यिनी -यि (न्).

BEWITCHINGLY, *adv.* यथा मनो ह्रियते or वशीक्रियते तथा, मनोहरप्रकारेण, यथा मोहो जायते तथा, मायया, प्रलोभनाय.

To BEWRAY, *v. a.* (To betray) परादा (c. 3. -ददाति -दातुं), प्रदा; शत्रुहस्तेषु समृ in caus. (-अर्पयति -यितुं).—(To indicate) सूच् (c. 10. (सूचयति -यितुं), पिशुन (nom. पिशुनयति -यितुं).

BEYOND, *prep.* and *adv.* अति prefixed.—(On the farther side) पारं, पारे; 'beyond the sea,' समुद्रपारं; 'from beyond,' पारात्; 'to go beyond,' अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिचर् (c. 1. -चरति -चरितुं).—(In front) अग्रे.—(Superior to) अतिरेकी -किणी -कि (न्), विशिष्टः -ष्टा -ष्टं.—(More than) अधिकं, or expressed by अति prefixed; as, 'beyond mortal strength,' अतिमानुषः -षा -षं; 'beyond's one's power,' अतिशक्ति; 'beyond measure,' अतिशयं, अतीव; 'passed beyond the range of sight,' चक्षुर्विषयम् अतिक्रान्तः.—(At a distance) दूरे.

BEZEL or BEZIL, *s.* रत्नाधारयोग्योऽङ्गुरीयकभागः, अङ्गुरीयकस्य यत्स्थाने मणिः खच्यते or प्रणिधीयते तत्.

To convey, *v. a.* (Carry) वह् (c. 1. वहति -ते, वोढुं), आवह्, उपवह्, संवह्; आनी (c. 1. -नयति -नेतुं), तॄ in caus. (तारयति -यितुं), गम् in caus. (गमयति -यितुं), प्राप् in caus. (प्रापयति -यितुं), स्थानान्तरीकृ.—(Transmit) सञ्चर् in caus. (-चारयति -यितुं), चल् in caus. (चालयति -यितुं), अभिवह्.—(Make over to another) परस्मै or परस्मिन् समृ in caus (-अर्पयति -यितुं).

Conveyance, *s.* (Vehicle) वाहनं, यानं, प्रवहणं, वाहः, रथः, चातुरं.—(Act of making over to another) परस्मै समर्पणं.—(Act of conveying) वाहनं, तारणं, आनयनं, अभिवाह्यं, सञ्चारणं, चालनं.—(Deed of sale or transfer) क्रयलेख्यं, समर्पणपत्रं.

Conveyancer, *s.* क्षेत्रद्रव्यादीनां दानपत्रलेखकः, स्थावरास्थावराणां समर्पणपत्रलेखकः or क्रयपत्रलेखकः.

Conveyed, *p. p.* ऊढः-ढा-ढं, भृतः-ता-तं, सञ्चारितः-ता-तं, चालितः-ता-तं, तारितः-ता-तं; 'being borne along,' उह्यमानः-ना-नं, नीयमानः-ना-नं.

Conveyer, *s.* वाहकः, वाही *m.* (न्), तारकः, तारी *m.* (न्), सञ्चारकः.

To convict, *v. a.* आधृष् (c. 10. -धर्षयति -यितुं, c. 1. -धर्षति -र्षितुं), संसूच् (c. 10. -सूचयति -यितुं), अपराधनिश्चयं कृ, अपराधनिर्णयं कृ, निर्णीतापराधं -धां -धं कृ, दोषप्रमाणं कृ, सदोषं or सापराधं or अपराधिनं -धिनीं -धि ज्ञा (c. 9. जानाति, ज्ञातुं), अभियुक्तजनं निरूत्तरं कृ, असौ सापराध इति निश्चि (c. 5. -चिनोति -चेतुं), दूषदोषम् आख्या (c. 2. -ख्याति -तुं).

Convict or convicted, *p. p.* आधर्षितः-ता-तं, दूषदोषः-षा-षं,

Digitized by Google

दूष्टापराधः -धा: -धं, निश्चितदोषः -षा -षं, निर्णीतदोषः -षा -षं, उपपादितदोषः -षा -षं; 'of falsehood,' दूष्टवितथवचनः -ना -नं.

Convict, *s.* आधर्षितः, दूष्टदोषः, दूष्टापराधः, दोषनिश्चयात् प्रवासितः or कायक्लेशे चलेन नियोजितः.

Conviction, *s.* (Of crime) आधर्षणं, दोषनिश्चयः, दोषनिर्णयः, अपराधनिर्णयः.—(Full persuasion) निश्चयः, निर्णयः, सुनिश्चयः, विश्वासः, प्रत्ययः, ग्रहणं, धारणं, परिज्ञानं.

To convince, *v. a.* (Make to acknowledge) स्वीकारं कृ in caus. (कारयति -यितुं), उरीकारं or अङ्गीकारं कृ in caus., अभिज्ञातुं or उरीकर्त्तुम् आनी (c. 1. -नयति -नेतुं) or अनुनी, निरुत्तरं -रां -रं कृ, निरुत्तरीकृ, अभिज्ञा in caus. (-ज्ञापयति -यितुं), परिज्ञा in caus., ग्रह् in caus. (ग्राहयति -यितुं).—(Make to believe, persuade) प्रत्ययं or विश्वासं or निश्चयं कृ in caus. or जन् in caus. (जनयति -यितुं), प्रत्येतुं or विश्वसितुम् आनी or अनुनी.—(Destroy doubt) संशयं or सन्देहं छिद (c. 7. छिनत्ति, छेत्तुं) or खण्ड् (c. 10. खण्डयति -यितुं).

Convinced, *p. p.* कृतनिश्चयः -या -यं, कृतनिर्णयः -या -यं, जातनिश्चयः -या -यं, जातविश्वासः -सा -सं, जातप्रत्ययः -या -यं, निरुत्तरीकृतः -ता -तं, छिन्नसंशयः -या -यं.

Convincing *a.* निश्चायकः -का -कं, निर्णायकः -का -कं, निश्चयजनकः -का -कं, विश्वासकारी -रिणी -रि (न्), परिज्ञानकृत्, प्रत्ययजनकः -का -कं.

Convincingly, *adv.* यथा निश्चयो जायते तथा, निःसन्दिग्धं, अत्र न संशय इति प्रकारेण.

Convivial, *a.* औत्सविकः -की -कं, सम्भोजनः -नी -नं, उत्सवसम्बन्धी -न्धिनी -न्धि (न्); 'a convivial party,' सम्भोजनं, सहभोजनं, सम्मीतिः *f.*

Convocation, *s.* (The act of calling together) समाह्वानं, आह्वानं.—(Assembly) सभा, समाजः, सदः *n.* (स्).—(Assembly of the clergy) पुरोहितसभा, धर्म्माध्यक्षसमाजः.

To convoke, *v. a.* समाह्वे (c. 1. -ह्वयति -ह्वातुं), आह्वे, सङ्घट्ट् (c. 10. -घट्टयति -यितुं).

To convolve, *v. a.* समावृत् in caus. (-वर्त्तयति -यितुं), आवृत्, व्यावृत्; संसृ in caus. (-सारयति -यितुं).

Convolvolus, *s.* क्षीरविदारी, विदारी, महाश्वेता, इक्षुगन्धा, वृक्षगन्धिका, क्रोष्ट्री, श्यामा, भूमिकुष्माण्डकः.

To convoy, *v. a.* (Attend by way of defence) रक्षार्थम् अनुव्रज् (c. 1. -व्रजति -जितुं) or अनुया (c. 2. -याति -यातुं).—(Guide) सञ्चर् in caus. (-चारयति -यितुं).—(Convey) आवह् (c. 1. -वाहयति -यितुं).—(Guard on a journey) अध्वनि रक्ष् (c. 1. रक्षति -क्षितुं).

Convoy, *s.* (Attendance by way of defence) रक्षार्थम् अनुव्रजनं, अनुव्रज्या.—(Guide) सञ्चारकः.—(Guard) रक्षकः.—(A ship for convoy) वाणिज्यपोतरक्षका वृहद्युद्धनौका.

Convoyed, *p. p.* अनुयातः -ता -तं, सञ्चारितः -ता -तं, अध्वनि रक्षितः -ता -तं.

To convulse, *v. a.* (Agitate greatly) क्षुभ् in caus. (क्षोभयति -यितुं), व्याक्षुभ्, सङ्क्षुभ्, विक्षुभ्; कम्प् in caus. (कम्पयति -यितुं), प्रकम्प्.—(Contract convulsively) आकृष्, (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं), आक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अपतन् in caus. (-तानयति -यितुं); 'to be convulsed,' क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), सङ्क्षुभ्, सम्प्रक्षुभ्.

Convulsion, *s.* (Spasm) आक्षेपकः, अपतानकः, अपतन्त्रकः, आकर्षः, ग्रहामयः, शूलं.—(Commotion) क्षोभः, व्याक्षोभः, कम्पः, कम्पनं, कम्पितं.

Convulsive, *a.* आकर्षकः -का -कं, आक्षेपकः -का -कं, कम्पकः -का -कं, कम्पकरः -री -रं; 'a convulsive contraction,' आकर्षः, अपतानकः; 'convulsive utterance,' गद्गदः, गद्गदवाक् *f.* (च्).

Cony, *s.* शशः, शशकः, विलवासी *m.* (न्), गर्त्तवासी *m.* (न्).

To coo, *v. n.* (As a bird) कू (c. 1. कवते, c. 6. कुवते, c. 2. कौति, कवितुं, कोतुं), कूज् (c. 1. कूजति -जितुं), अनुकूज्, कुकु शब्दं कृ.

Cooing, *s.* कूजनं, कूजितं, अनुकूजनं, कुकु शब्दः.

Cook, *s.* सूपकारः, पाचकस्त्री *f.*, पचकः, पाचकः, पचः, पचेलुकः, सदः, सूदाध्यक्षः, भक्ष्यकारः, अन्नसंस्कर्त्री *m.* (र्त्तृ), भक्तकारः, औदनिकः, आन्धसिकः.

To cook, *v. a.* पच् (c. 1. पचति -ते, पक्तुं), आ in caus. (आपयति -ते -यितुं), अन्नानि संस्कृ or सन्धा (c. 3. -दधाति -धातुं) or सिद्धीकृ.

Cooked, *p. p.* पक्वः -क्वा -क्वं, आमः -मा -मं, शृतः -ता -तं, अपितः -ता -तं, सिद्धः -द्धा -द्धं, संस्कृतः -ता -तं, प्रणीतः -ता -तं, उपसम्पन्नः -न्ना -न्नं, राद्धः -द्धा -द्धं.

Cookery, *s.* (Art of) पाकविद्या.—(Act of cooking) पचनं, पाकः, पचा, पाचा, पाचिका, पाकनिष्पत्तिः *f.*

Cook-maid, *s.* पाचकस्त्री, पाचिका, अन्नसंस्कर्त्री, भक्ष्यकारी, सूपकारी.

Cook-room, *s.* पाकशाला, पाकस्थानं, पाकागारं, सूदशाला, महानसः -सं.

Cool, *a.* शीतलः -ला -लं, शीतः -ता -तं, शिशिरः -रा -रं, अतप्तः -प्ता -प्तं, अतपः -पा -पं, अघर्म्मः -र्म्मा -र्म्मं, अनुष्णः -ष्णा -ष्णं, शीतलस्पर्शः -र्शा -र्शं, जडः -डा -डं.—(Calm, composed) असम्भ्रमः -मा -मं, अव्यग्रः -ग्रा -ग्रं, शान्तः -न्ता -न्तं, धीरः -रा -रं.—(Without passion) वीतरागः -गा -गं.—(Cool in affection) विरक्तः -क्ता -क्तं; 'it grows cool,' शीतलायते.

Cool, *s.* शीतलं, शीतं, शीतलता, शीतता, शिशिरः, शैत्यं, अनुष्णता, अघर्म्मः.

To cool, *v. a.* शीतलीकृ, शीतीकृ, शिशिरीकृ, शीतल (nom. शीतलयति -यितुं).—(Cause an abatement, extinguish) शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्.

To cool, *v. n.* शीतल (nom. शीतलायते), शीतलीभू, शिशिरीभू, शीतीभू.—(Abate, subside) शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्.

Cooled, *p. p.* शीतीकृतः -ता -तं, शीतलीकृतः -ता -तं, हततापः -पा -पं.

Cooler, *s.* शीतलकारकः.—(For wine, &c.) मद्यादिशीतलीकरणार्थं मृन्मयभाजनं.

Cooling, *a.* शीतलकारी -रिणी -रि (न्), तापहरः -री -रं, सन्तापहरः -रा -रं, घर्म्मनाशकः -का -कं.—(Causing abatement) शमकः -का -कं, शान्तिदः -दा -दं; 'cooling breeze,' शीतलवातः, स्वेदचूषको वायुः.

Coolly, *adv.* शीतलं, शिशिरं, सशैत्यं.—(Without discomposure) असम्भ्रमं, सम्भ्रमं विना, अव्यग्रं, शान्तं, प्रशान्तं, असहसा.

Coolness, *s.* शीतलता, शैत्यं, शीतता, शीतीभावः, शिशिरत्वं, अनुष्णता.—(Of affection) विरागः, विरक्तिः *f.*, निःस्नेहता..

Coom, *s.* (Soot that gathers over an oven's mouth) कन्दुमुखलग्नम् अङ्गारमलं.—(Grease which works out of the nave of a wheel) चक्रनाभिमध्याद् निर्गतः स्नेहः.

Coop, *s.* (Barrel) भाण्डं, भाजनं, काष्ठभाण्डं, काष्ठपात्रं.—(Cage for poultry) ग्राम्यकुक्कुटादिरक्षणार्थं पिञ्जरं or वीतंसः, कुक्कुटपालिका.

To coop-up, *v. a.* पिञ्जरे or वीतंसे प्रविश् in caus. (-वेशयति -यितुं).—(Confine in a narrow place) सङ्कटस्थाने निरुध् (c. 7. -रुणद्धि -रोद्धुं).

Cooper, *s.* काष्ठभाण्डकृत्, काष्ठभाजनकारः, काष्ठपात्रदोहनादीनां तक्षकः.

Cooperage, *s.* (Price paid for cooper's work) काष्ठपात्रादितक्षकस्य मूल्यं or भृतिः *f.*—(Cooper's work) काष्ठपात्रादितक्षकस्य कर्म्म *n.* (न्) or व्यापारः.

To co-operate, *v. n.* अन्येन सह व्यवसो (c. 4. -स्यति -सातुं) or आचर् (c. 1. -चरति -रितुं) or चेष्ट् (c. 1. चेष्टते -ष्टितुं); प्रतियोगं कृ, साहाय्यं

Digitized by Google

कृ; सहकारी -रिणी -रि भू.

Co-operation, *s.* सहकारः -रिता, साहाय्यं, सहायता, प्रतियोगः, प्रतियोगिता, सम्प्रतिपत्तिः *f.*, अङ्गाङ्गिभावः.

Co-operative, *a.* सहकारी -रिणी -रि (न्), सहोद्योगी -गिनी -गि (न्).

Co-operator, *s.* सहकारी *m.* (न्), सहकृत्वा *m.* (न्), प्रतियोगी *m.* (न्), साहाय्यकृत्, सम्भूयकारी *m.* (न्).

Coot, *s.* जलचरः कृष्णवर्णः क्षुद्रपक्षिभेदः.

Coparcenary, *s.* संसृष्टता -त्वं, संसृष्टिता, समांशिता.

Coparcener, *s.* समांशी *m.* (न्), समांशहारी *m.* (न्), अंशहरः, संसृष्टी *m.* (न्), संसृष्टः, रिक्थसंविभागी *m.* (न्), सहाधिकारी *m.* (न्).

Copartner, *s.* समांशी *m.* (न्), समांशहारी *m.* (न्), अंशी *m.* (न्), अंशभागी *m.* (न्), अंशहारी *m.* (न्), सम्भूयकारी *m.* (न्).

Copartnership, *s.* समांशिता, सम्भूयसमुत्थानं, अंशभागिता, अविभक्तत्व.

Cope, *s.* (Covering for the head) मस्तकाभरणं, मस्तकाच्छादनं, शिरस्त्राणं, शिरस्त्रं.—(Sacerdotal cloak) पुरोहितप्रावारः, पुरोहितपरिधेयं.

To cope with, *v. n.* प्रतियुध् (c. 4. -युध्यते -योद्धुं), स्पर्ध् (c. 1. स्पर्धते -र्धितुं), सङ्घृष् (c. 1. -र्षति -र्षितुं), प्रतिकूल (nom. प्रतिकूलयति -यितुं), विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतियोगं कृ.

Copier or copyist, *s.* लेखकः, लिपिकरः -कारः, प्रतिलिपिकरः.—(Imitator) अनुकारी *m.* (न्), गतानुगतिकः.—(Plagiary) वागपहारकः, शब्दचोरः.

Coping, *s.* प्राकारशृङ्गं, कपिशीर्षं, क्रयशीर्षं, खोडकशीर्षं, सालशृङ्गं.

Copious, *a.* बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, प्रचुरः -रा -रं, भूरिः -रिः -रि, पुष्कलः -ला -लं, सम्पूर्णः -र्णा -र्णं, परिपूर्णः -र्णा -र्णं, अनेकः -का -कं, विपुलः -ला -लं.

Copiously, *adv.* बाहुल्येन, बहुशस्, बहु, प्राचुर्येण, प्रचुरं, भूरि, भूरिशस्, विस्तारेण, विस्तरशस्, अनेकशस्.

Copiousness, *s.* बाहुल्यं, प्राचुर्यं, बहुत्वं, प्रचुरत्वं, प्रपञ्चनं, सम्पूर्णता, पुष्कलत्वं, विपुलता.

Copper, *s.* ताम्रं, ताम्रकं, शुल्वं, द्वाष्टं, द्विष्टं, नैपालिकं, तपनेष्टं, लोहिततायः *n.* (स्), उडुम्बरं, ब्रह्मवर्द्धनं, अम्रकं, अरविन्दं, रविलोहं; 'copper vessel,' ताम्रपात्रं, ताम्रकटाहः, ताम्रस्थाली, ताम्रपिठरः; 'copper coin,' पणः.

Copper-coloured, *a.* ताम्रवर्णः -र्णा -र्णं, ताम्रमुखः -खी -खं, ताम्रतनुः -नुः -नु.

Copperas, *s.* तुत्थं -त्थकं, मूषातुत्थं, मलीमसः.

Copperplate, *s.* ताम्रफलकं, ताम्रपट्टं, ताम्रपत्रं, पट्टं.

Coppersmith, *s.* ताम्रकारः, ताम्रिकः, ताम्रकुट्टकः -कुटः, शौल्विकः, कांस्यकारः.

Coppery, *a.* ताम्रः -म्री -म्रं, ताम्रिकः -की -कं, ताम्रमयः -यी -यं, औडुम्बरः -रीं -रं, कुङ्कुमताम्रः -म्रा -म्रं.

Coppice or copse, *s.* गुल्मावृतं स्थानं, इन्धनावृतं स्थानं, जङ्गलः, उपवनं, कृत्रिमवनं.

Copula, *s.* विशेष्यविशेषणसंज्ञा.

To copulate, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं), सन्धा (c. 3. -दधाति -धातुं).

To copulate, *v. n.* स्त्रीपुरुषवत् सङ्गम् (c. 1. -गच्छति -गन्तुं), अभिगम्; मैथुनं कृ, सम्भोगं कृ, संसर्गं कृ.

Copulation, *s.* मैथुनं, रतं, सुरतं, रतिकर्म्म *n.* (न्), रतिक्रिया, शृङ्गारः, अङ्गसङ्गः, औपस्थ्यं, सम्भोगः, संसर्गः, सम्पर्कः, संयोजनं, व्यवायः, गमनं, अभिगमनं, महासुखं, रहः *n.* (स्), उपसृष्टं, अभिमानितं, धर्षितं, कामकेलिः, मोहनं.

Copulative, *a.* संयोगकारी -रिणी -रि (न्) or संसर्गकारी; 'copulative conjunction,' संयोगकारिणी अव्ययसंज्ञा.

Copy, *s.* (Transcript from an original) प्रतिलिपिः *f.*, प्रतिरूपं.—(An individual book) एकपुस्तकं, एकग्रन्थः.—(An original from which any thing is copied) आदर्शः, मूलं.—(Autograph) स्वहस्तलिखितं, हस्ताक्षरं, हस्तलिपिः *f.*

To copy, *v. a.* and *n.* (Transcribe) उद्धृ (c. 1. -तरति -रितुं -रीतुं), लिपिं दृष्ट्वा प्रतिलिपिं कृ, रूपं दृष्ट्वा प्रतिरूपं कृ, मूलदर्शनाद् लिख् (c. 6. लिखति, लेखितुं).—(Imitate) अनुकृ, अनुगम् (c. 1. -गच्छति -गन्तुं).

Copy-book, *s.* प्रतिलिपिपुस्तकं, प्रतिलिखनपुस्तकं.—(The writing by looking at which boys learn to write) आदर्शः, पुस्तकं यस्य पत्रेषु वर्णविन्यासश् चारुरूपेण लिख्यते यद्दर्शनाद् बालका लिखनशिक्षां कुर्वन्ति, बालानां लिखनशिक्षार्थम् पुस्तकारोपितानि अक्षराणि वाक्यानि वा.

Copyhold, *s.* (Land, &c.) ग्रामेश्वराधीनं क्षेत्रादि.

Copyholder, *s.* आहर्त्रा *m.* (र्त्रे), ग्रामेश्वराधीनक्षेत्रधारी *m.* (न्).

Copyright, *s.* स्वकीयमुद्रितग्रन्थे निबन्धुर् अधिकारः, मुद्राङ्कितपुस्तके स्वत्वं.

To coquet, *v. n.* विलस् (c. 1. -लसति -सितुं), विलासं कृ, हावं कृ, लल् (c. 1. ललति -लितुं), खेला (nom. खेलायति -यितुं), प्रेमललितं कृ.

Coquetry, *s.* विलासः, हावः, ललितं, विभ्रमः, खेला, रसिकता, मोहनेच्छा, लालसा, रम्यं.

Coquette, *s.* रसिका स्त्री, रसिनी, विलासिनी, विलासवती, दामिनी, मोहनकारिणी, लालिनी, कामिनी, लीलावती.

Coral, *s.* विद्रुमः, प्रवालः -लं, रत्नवृक्षः, मन्दटः, मन्दारः, रक्तकन्दः -न्दलः, हेमकन्दलः, रत्नकन्दलः, रत्नवृक्षः, लतामणिः *m.*, अङ्गारकमणिः, माहेयः, पारिजातः, पारिभद्रः, क्रिमिशत्रुः *m.*, भौमरत्नं, भोमीरा, सुपुष्पः, रक्तपुष्पकः.

Coralline, *a.* प्रवालमयः -यी -यं, विद्रुममयः -यी -यं, सप्रवालः -ला -लं.

Coralloid, *a.* प्रवालोपमः -मा -मं, विद्रुमसदृशः -शी -शं.

Cord, *s.* रज्जुः *m. f.*, पाशः, दाम *n.* (न्), दामनी, दामा, गुणः, सूत्रं, शणतन्तुः *m.*, शणसूत्रं, सन्दानं, रसना, शुल्बं, शुल्वः, योक्त्रं, वटः, वराटः -टकः, दोरकः; 'Brahminical cord,' उपवीतं, यज्ञोपवीतं, निवीतं, पञ्चवटः, मौञ्जी.—(A load of wood measured by a cord) रज्जुपरिमितः काष्ठभारः, इन्धनराशिः *m. f.*

To cord, *v. a.* रज्ज्वा बन्ध् (c. 9. बध्नाति, बन्धुं), पाश (nom. पाशयति -यितुं), योक्त्र (nom. योक्त्रयति -यितुं), यन्त्र् (c. 10. यन्त्रयति -यितुं).

Cordage, *s.* शणसूत्रं.—(Of a ship) नावो रज्ज्वादिसामग्र्यं.

Corded, *a.* (Fastened with a cord) रज्जुबद्धः -द्धा -द्धं, पाशितः -ता -तं.—(Made of ropes) रज्जुमयः -यी -यं.

Cordial, *s.* अग्निवर्द्धनं, रुचकं, रोचकः, रोचनः, बलवर्द्धकं or तेजोवर्द्धनम् औषधं.

Cordial, *a.* (Invigorating tonic) अग्निवर्द्धकः -का -कं, अग्निदः -दा -दं, तेजस्करः -रा -रं, दीपकः -का -कं, रुचकः -का -कं, रुचिरः -रा -रं, पौष्टिकः -की -कं, धातुपोषकः -का -कं.—(Sincere, friendly) सरलः -ला -लं, सौहार्द्दवान् -वती -वत् (त्), सुहृत्तमः -मा -मं.

Cordiality, *s.* सौहार्दं, सौहृद्यं, सुहृत्ता, सारल्यं, सरलता, सुशीलता.

Cordially, *adv.* सौहार्देन, सुहृत्तया, ससौहार्दं, ससारल्यं, सुशीलवत्.

Cordmaker, *s.* रज्जुकारः, शणसूत्रकारी *m.* (न्), शणतन्तुकृत्.

Cordon, *s.* (Of a rampart) प्राकारशीर्षं.—(Band) दाम *n.* (न्).

Cordwainer, *s.* पादुकाकारः, चर्म्मकारः, चर्म्मकृत्, चर्म्मपादुकाकृत्, पादुकृत्.

Core, *s.* (Heart, inner part) हृदयं, गर्भः, अन्तरं, मध्यभागः, बीजं, सारः.

Coriaceous, *a.* चर्म्ममयः -यी -यं, चार्म्मिकः -की -कं, अजिनीयः -या -यं.

Coriander, *s.* (Plant) धानी, धानः, धानेयः, सूक्ष्मपत्रः, तीक्ष्णपत्रः,

Digitized by Google

तीक्ष्णफलः, कुनटी.—(Seed) छत्रा, अजारिका, सुगन्धि *n.*, धान्यकं, धान्यबीजं, तुषुरु *n.* -रौ, कुस्तुषुरुः *f.* -रुरी.

CORK, *s.* (Bark of a tree) विदेशीयतरुत्वक् *f.* (च्).—(Stopple of a bottle, &c.) पिधानं, कूपीछिद्रपिधानं, कूपीछिद्रनिरोधनार्थं तरुत्वङ्मयं पिधानं.

To CORK, *v. a.* (Stop with a cork) पूर्व्वोक्तपिधानेन निरुध् (c. 7. -रुणद्धि -रोद्धुं), पिधा (c. 3. -दधाति -धातुं).

CORKED, *p. p.* सपिधानः -ना -नं, पूर्व्वोक्तपिधाननिरुद्धः -द्धा -द्धं.

CORMORANT, *s.* मत्स्यखादकः पक्षिभेदः.—(A glutton) अत्याहारी *m.* (न्), गृध्रः, धस्मरः, कुक्षिम्भरिः *m.*

CORN, *s.* (Grain) धान्यं.—(Growing corn) शस्यं, सस्यकरिः *m.*, सीत्यं. (Food) अन्नं, खाद्यं, भक्ष्यं, आहारः, जीवसाधनं.—(Callosity on the foot) किणः, कदरः.

To CORN, *v. a.* लवणीकृ, लवण (nom. लवणयति -यितुं), लवणाक्तं -क्तां -क्तं कृ.

CORNCHANDLER, *s.* धान्यमायः, धान्यादिविक्रेता *m.* (तृ), वैवधिकः -की *m.* (न्).

CORNCUTTER, *s.* किणच्छेदकः, कदरकृत्, कदरोच्छेदकः, किणोन्मूलकः.

CORNEA, *s.* (Of the eye) शुक्लमण्डलं.

CORNEL, *s.* (A tree) वक्ष्यमाणप्रस्तरसवर्णफलो वृक्षः.

CORNELIAN, *s.* (A precious stone) स्वच्छप्रस्तरभेदः.

CORNEOUS, *a.* शार्ङ्गः -र्ङ्गी -र्ङ्गं, शृङ्गमयः -यी -यं, शृङ्गोपमः -मा -मं.

CORNER, *s.* (Angle) कोणः, अस्रः, आरं.—(Of the mouth) सृक्क *n.* (न्), सृक्किणी.—(Of the eye) अपाङ्गं, नयनोपान्तः, नेत्रपर्य्यन्तः.—(Secret place, retreat) निर्जनदेशः, विविक्तदेशः, आश्रमः.

CORNERED, *p. p.* सास्रः -स्रा -स्रं, सकोणः -णा -णं, कोणविशिष्टः -ष्टा -ष्टं.

CORNER-STONE, *s.* कोणप्रस्तरः, आरप्रस्तरः, प्रस्तरो येन प्राचीरद्वयं सम्बद्धं, प्रधानप्रस्तरः.

CORNER-WISE, *adv.* कोणाकोणि, आरारि, अस्रास्रि.

CORNET, *s.* (A musical instrument) शुषिरवादित्रभेदः.—(Officer of horse) आश्विकसैन्यदलनायकः, अश्वारूढसैन्यपताकाधारी कुलीनकुमारः, सादी *m.* (न्).—(Envelope of paper) कोशः, आवेष्टनं, प्रच्छदपटः.

CORNETCY, *s.* पूर्व्वोक्तस्य सैन्यदलनायकस्य पदं or अधिकारः.

CORNFIELD, *s.* शस्यक्षेत्रं, धान्यक्षेत्रं, सीत्यक्षेत्रं, सीत्यभूमिः *f.*

CORNFLOWER, *s.* कक्षः, शस्यक्षेत्ररुह ओषधिभेदः.

CORNICE, *s.* प्राकारशीर्षं, खोडकशीर्षं, कपिशीर्षं, क्रयशीर्षं, प्राकारशेखरः.

CORNIGEROUS, *a.* शृङ्गी -ङ्गिणी -ङ्गि (न्), शृङ्गिणः -णा -णं.

CORN-MILL, *s.* धान्यपेषणी, धान्यपेषणयन्त्रं, पेषणं -णिः *f.*

CORN-ROSE, *s.* खसखसजातीय ओषधिप्रभेदः,

CORNUCOPIA, *s.* श्रीभृतं सम्पत्तिसूचकं पुष्पफलादिसम्पूर्णं विषाणं, श्रीपन्नः.

CORNUTED, *a.* व्यभिचारिणीभार्य्यावान् *m.* (त्), पुंश्चली स्त्री यस्य सः, बन्धकीभार्य्यः.

CORNY, *a.* (Horny) शार्ङ्गः -र्ङ्गी -र्ङ्गं.—(Producing grain) धान्यवान् -वती -वत् (त्).

COROLLARY, *s.* अनुमानं, अपवादः, सिद्धान्तः, उपलक्ष्यः, अभ्यूहः, ऊहा, युक्तिः *f.*

COROMANDEL, *s.* (Coast of) द्राविडः.

CORONAL, *s.* मुकुटं, किरीटः, मौलिः *m. f.*, शेखरः, माला.

CORONAL, *a.* मस्तकाग्रसम्बन्धीयः -या -यं, मस्तकोपरिस्थः -स्था -स्थं.

CORONARY, *a.* किरीटी -टिनी -टि (न्), मुकुटसम्बन्धीयः -या -यं.

CORONATION, *s.* राजाभिषेकः, अभिषेकः, मुकुटधारणसंस्कारः.—(The hall of coronation) अभिषेकशाला.

CORONER, *s.* अपमृत्युविचारकः, अपमृत्युकारणपरीक्षकः, अपमृत्युवृत्तान्तविचारको राजप्रतिनिधिः.

CORONET, *s.* कुलीनवर्गलाक्षणिकः क्षुद्रकिरीटः, मौलिः *m. f.*, मुकुटं.

CORPORAL, *s.* सेनायां पदभाजां मध्ये अवरपदभाक्, सेनारक्षाध्यक्षः.

CORPORAL, *a.* शारीरः -री -रं -रिकः -की -कं, शरीरी -रिणी -रि (न्), दैहिकः -की -कं, देही -हिनी -हि (न्), आङ्गः -ङ्गी -ङ्गं, अङ्गी -ङ्गिनी -ङ्गि (न्), अङ्गिकः -की -कं, अङ्गकः -का -कं, कायिकः -की -कं, कायकः -का -कं. *See* CORPOREAL.

CORPORALITY, *s.* मूर्त्तिमत्त्वं, शरीरवत्ता, देहवत्त्वं, शारीरिकत्वं.

CORPORALLY, *adv.* शरीरतस्, देहतस्, शारीरं, सशरीरं.

CORPORATE, *a.* सङ्घातवान् -वती -वत् (त्), कृतसंसर्गः -र्गा -र्गं, सामाजिकः -की -कं, समूहीभूतः -ता -तं.

CORPORATION, *s.* (Corporate body) श्रेणी -णिः *m. f.*, ग्रामसङ्घः.

CORPOREAL, *a.* शरीरवान् -वती -वत् (त्), मूर्त्तिमान् -मती -मत् (त्), देहवान् -वती -वत् (त्), वपुष्मान् -ष्मती -ष्मत् (त्), सशरीरः -रा -रं, सदेहः -हा -हं, तनुमान् -मती -मत् (त्), विग्रहवान् -वती -वत् (त्), देहभाक् *m. f. n.* (ज्). *See* CORPORAL.

CORPS, *s.* (Body of soldiers) सैन्यदलं, सैन्यगुल्मः, दण्डः, अनीकं.

CORPSE, *s.* शवः -वं, कुणपः -पं, मृतकं, मृतशरीरं, मृतदेहः, पञ्चावस्थः, प्रेतं, शपः.

CORPULENCE or CORPULENCY, *s.* मेदस्विता, मेदोवृद्धिः *f.*, स्थूलता, शरीरस्थूलता, स्थूलकायत्वं, उन्मेदा, आप्यायनं.

CORPULENT, *a.* स्थूलः -ला -लं, स्थूलकायः -या -यं, पृथूदरः -रा -रं, उदरी -रिणी -रि (न्), मेदस्वी -स्विनी -स्वि (न्), मांसलः -ला -लं, आप्यानः -ना -नं, पीनः -ना -नं, पीवरः -रा -रं, बृहत्कुक्षिः -क्षिः -क्षि, तुन्दवान् -वती -वत् (त्), तुन्दिकः -का -कं, वृद्धनाभिः -भिः -भि, स्थविष्ठः -ष्ठा -ष्ठं.

CORPUSCLE, *s.* अणुः *m.*, परमाणुः, कणः, लवः, लेशः, कणिका, काकिणिका, रेणुः *m. f.*, अणुरेणुः *f.*, सूक्ष्ममूर्त्तिः *f.*

CORPUSCULAR, *a.* अणुविषयकः -का -कं, सूक्ष्ममूर्त्तिविषयकः -का -कं.

To CORRECT, *v. a.* (Amend) शुध् in caus. (शोधयति -यितुं), परिशुध्, विशुध्, संशुध्; समाधा (c. 3. -दधाति -धत्ते -धातुं), निर्द्दोषं -षां -षं कृ.—(Chastise) शास् (c. 2. शास्ति, शासितुं), अनुशास्, दण्ड् (c. 10. दण्डयति -यितुं).—(Destroy or modify by the addition of opposite qualities) विपरीतगुणप्रक्षेपेण नश् in caus. (नाशयति -यितुं) or शम् in caus. (शमयति -यितुं) or प्रतिकृ.

CORRECT, *a.* शुद्धः -द्धा -द्धं, विशुद्धः -द्धा -द्धं, निर्दोषः -षा -षं, दोषरहितः -ता -तं, सत्यः -त्या -त्यं, यथार्थः -र्था -र्थं, ऋतः -ता -तं, तथ्यः -थ्या -थ्यं, अवितथः -था -थं, समञ्जसः -सा -सं, शुचिः -चिः -चि, यथातथः -था -थं, याथार्थिकः -की -कं, यथामार्गः -र्गा -र्गं, स्पष्टः -ष्टा -ष्टं, प्रकृतः -ता -तं.—(Correct in conduct) साधुवृत्तिः -त्तिः -त्ति.

CORRECTED, *p. p.* (Amended) शोधितः -ता -तं, विशोधितः -ता -तं.—(Counteracted) प्रतिकृतः -ता -तं.—(Chastised) शासितः -ता -तं, अनुशासितः -ता -तं.

CORRECTION, *s.* (Chastisement) शास्तिः *f.*, शिष्टिः *f.*, शासनं, अनुशासनं, दण्डः -डनं, साहसं, निग्रहः, प्रतिफलं.—(Amendment) शोधनं, विशोधनं, शुद्धिः *f.*, संशुद्धिः *f.*, प्रतिसमाधानं, समाधानं.

CORRECTIVE, *a.* (Destroying noxious qualities) नाशकः -का -कं -म्रः -म्रा -म्रं in comp., अपनुदः -दा -दं, हरः -रा -रं, अपहः -हा -हं or -हृः -हृा -हृं in comp.—(Counteracting) प्रतीकारकः -का -कं.—(Amending) शोधकः -का -कं.

CORRECTIVE, *s.* प्रतीकारः, प्रतिकारः, प्रतिसमाधानं, अपनोदनं, अभिघातः.

CORRECTLY, *adv.* शुद्धं, यथार्थं, निर्दोषं, तथ्यं, ऋतं, सत्यं, अञ्जसा, अवितथं, समञ्जसं, शुचि, यथातथं, यथावत्, यथामार्गं, साधु.

CORRECTNESS, *s.* शुद्धत्वं, शुद्धिः *f.*, विशुद्धिः *f.*, निर्दोषता, यथार्थता,

Digitized by Google

सत्यता, याथातथ्यं, याथार्थ्यं, तथ्यता, सामञ्जस्यं, शुचिता, साधुत्वं.

CORRECTOR, s. (Chastiser) शास्ता m. (स्तृ), शासिता m. (तृ), दण्डप्रणेता m. (तृ).—(Amender) शोधकः, शोधनकृत्, समाधाता m. (तृ), प्रतिसमाधाता, प्रतिकारकः.

CORRELATIVE, a. परस्परसम्बन्धी -न्धिनी -न्धि (न्), अन्योन्यसम्बद्धः -द्धा -द्धं, इतरेतरसंबद्धः -द्धा -द्धं, व्यतिकरः -रा -रं.

CORRELATIVENESS, s. परस्परसम्बन्धित्वं, अन्योन्यसम्बद्धभावः, व्यतिकरः.

To CORRESPOND, v. n. (Suit) युज् in pass. (युज्यते), उपयुज्, उपपद् in pass. (-पद्यते), अनुरूपः -रा -पं or सदृशः -शी -शम् अस्, अनुसृ (c. 1. -सरति -सर्तुं),—(Keep up intercourse by alternate letters) परस्परां पत्रलिखनेन संवद् (c. 1. -वदति -दितुं), लेखालेखि कृ, पत्रद्वारेण उत्तरप्रत्युत्तरं कृ.—(Assent) संवद्, अनुवद्.

CORRESPONDENCE, s. (Adaptation) योग्यता, युक्तिः f., सादृश्यं, अनुरूपता, आनुरूप्यं, आनुगुण्यं, तुल्यता, समानता, अनुसारः, पर्य्याप्तिः f., उपपत्तिः f.—(By letter) परस्परां पत्रलिखनेन संवादः, पत्रविनिमयः, लेखालेखिकरणं.—(Connexion, intercourse) सम्बन्धः, सम्पर्कः, सङ्गः, संसर्गः; 'correspondence of character,' प्रतिभावः.

CORRESPONDENT, a. योग्यः -ग्या -ग्यं, सदृशः -शी -शं, अनुरूपः -पा -पं, अनुगुणः -णा -णं, अनुसारी -रिणी -रि (न्), तुल्यः -ल्या -ल्यं, समानः -ना -नं, उपयुक्तः -क्ता -क्तं, पर्य्याप्तः -प्ता -प्तं, सङ्गतः -ता -तं, अविरुद्धः -द्धा -द्धं.

CORRESPONDENT, s. (One who interchanges letters) अन्येन सह पत्रलिखनेन संवादी m. (न्).—(An agent, a connexion) नियोगी m. (न्), प्रतिपुरुषः, सम्पर्की m. (न्), सम्बन्धी m. (न्).

CORRIDOR, s. दुर्गपरिगतश् छन्नपथः, गृहपरिगतश् छन्नपथः.

CORRIGIBLE, a. (Punishable) शासनीयः -या -यं, शास्यः -स्या -स्यं, अनुशासनीयः -या -यं, दण्डनीयः -या -यं.—(Capable of amendment) शोधनीयः -या -यं, साध्यः -ध्या -ध्यं, समाधातुं शक्यः -क्या -क्यं.

CORRIVAL, s. सपत्नः, प्रतिस्पर्द्धी m. (न्), प्रतियोगी m. (न्), प्रतिपक्षः.

CORRIVALRY, s. प्रतिस्पर्द्धा, सङ्घर्षः, विजिगीषा, परस्पराभिभवेच्छा.

To CORROBORATE, v. a. दृढीकृ, स्थिरीकृ, द्रढ (nom. द्रढयति -यितुं), संस्तम्भ् (c. 5. -स्तभ्नोति, c. 9. -स्तभ्नाति -स्तम्भितुं or caus. -स्तम्भयति -यितुं), सबलं -लां -लं कृ, सत्याकृ.—(Confirm another's opinion by new evidence) प्रमाणीकृ, प्रमाणं दा, दृढप्रमाणं दा, अनुवद् (c. 1. -वदति -दितुं), परवाक्यं दृढीकृ.

CORROBORATED, p. p. दृढीकृतः -ता -तं, स्थिरीकृतः -ता -तं, संस्तम्भः -म्भा -म्भं, प्रमाणीकृतः -ता -तं, सत्याकृतः -ता -तं, दृढनिश्चयः -या -यं, सप्रमाणः -णा -णं.

CORROBORATION, s. दृढीकरणं, स्थिरीकरणं, दार्ढ्यं, दृढोक्तिः f., संस्तम्भः, सत्याकृतिः f., प्रमाणीकरणं, दृढप्रमाणदानं, अनुवादः.

CORROBORATIVE, a. अनुवादकः -का -कं, दृढीकरणः -णा -णं, स्थिरीकरणः -णा -णं.

To CORRODE, v. a. क्रमशः क्षि in caus. (क्षययति, क्षपयति -यितुं) or नश् in caus. (नाशयति -यितुं) or भक्ष् (c. 10. भक्षयति -यितुं) or खाद् (c. 1. खादति -दितुं), विली in caus. (-लाययति -यितुं), विलयनं कृ.

CORRODED, p. p. क्षीणः -णा -णं, विलीनः -ना -नं, गलितः -ता -तं.

CORRODENT, a. क्षयकरः -री -रं, अरुन्तुदः -दा -दं, नाशकः -का -कं.

CORRODIBLE or CORROSIBLE, a. गलनीयः -या -यं, क्षयणीयः -या -यं, विलयनीयः -या -यं, नाश्यः -श्या -श्यं.

CORRODY, s. (Assignment of money) निबन्धः, निबन्धदानं.

CORROSION, s. क्रमशः क्षयकरणं or नाशनं, विलयनं, गलनं, जारणं.

CORROSIVE, a. अरुन्तुदः -दा -दं, अरुष्करः -री -रं, तिग्मः -ग्मा -ग्मं, तीव्रः -व्रा -व्रं, विलयनः -ना -नं, मर्मस्पृक् m. f. n. (ष्), मर्मभेदी -दिनी -दि (न्), खादकः -का -कं, व्रणकृत् m. f. n., प्रखरः -रा -रं, कटुः -टुः -टु.

CORROSIVENESS, s. अरुन्तुदत्वं, अरुष्करत्वं, तैग्म्यं, खादकत्वं, तीव्रता.

To CORRUGATE, v. a. (The skin) त्वचं or चर्म्म कुच् (c. 1. कुचति -चितुं) or आकुच् or सङ्कुच् (c. 1. -कोचति -चितुं); त्वक्सङ्कोचं कृ, चर्म्मतरङ्गान् कृ.

CORRUGATION, s. कुचनं, आकुचनं, सङ्कोचनं, चर्म्मसङ्कोचः, त्वगाकुचनं.

To CORRUPT, v. a. (Vitiate) दुष् in caus. (दूषयति -यितुं), सन्दुष्, प्रतिदुष्; नश् in caus. (नाशयति -यितुं), भ्रष्टीकृ, क्षि in caus. (क्षपयति -यितुं).—(Change to a bad state) विकृ.—(Infect) पूतीकृ, पूतिगन्धं -न्धां -न्धं कृ.—(Bribe) उत्कोचं दा.

To CORRUPT, v. n. दुष् (c. 4. दुष्यति, दोष्टुं), विप्रदुष्, सम्प्रदुष्, पूतीभू, पूतिगन्धः -न्धा -न्धं भू, दुर्गन्धः -न्धा -न्धं भू.

CORRUPT, a. दुष्टः -ष्टा -ष्टं.—(In morals) दुष्टभावः -वा -वं or विप्रदुष्टभावः, दुष्टमतिः -तिः -ति, अन्तर्दुष्टः -ष्टा -ष्टं, नष्टधीः -धीः -धि, दुराचारः -रा -रं, दुरात्मा -त्मा -त्म (न्), पापचेताः -ताः -तः (स्), शठः -ठा -ठं, मन्दचरित्रः -त्रा -त्रं.—(Stinking) पूतः -ता -तं, पूतिगन्धः -न्धा -न्धं -न्धिः -न्धिः -न्धि, दुर्गन्धः -न्धा -न्धं.

CORRUPTED, p. p. दूषितः -ता -तं, नष्टः -ष्टा -ष्टं, नाशितः -ता -तं, भ्रष्टः -ष्टा -ष्टं, विकारितः -ता -तं, विप्लुतः -ता -तं, विशीर्णः -र्णा -र्णं.

CORRUPTER, s. दूषकः, दूषणः, दूषणकृत्, नाशकः, भंशकारी m. (न्).

CORRUPTIBILITY, s. दूषणीयता, दूषयितव्यत्वं, दूषणशीलत्वं, नश्वरता.

CORRUPTIBLE, a. दूष्यः -ष्या -ष्यं, दूषणीयः -या -यं, दूषणक्षमः -मा -मं, क्षयी -यिणी -यि (न्), क्षयिष्णुः -ष्णुः -ष्णु, नश्वरः -रा -रं.

CORRUPTION, s. (Act of corrupting) दूषणं.—(Putrescence) पूतिः f., पूतता, दुर्गन्धत्वं, पूयं, दूष्यं, गलितत्वं.—(Depravation of morals) दुष्टता, दुष्टभावता, मतिदुष्टता, अन्तर्दुष्टता, दौरात्म्यं, भ्रष्टता, शाठ्यं, दौर्जन्यं.—(In language) अपभंशः, अपशब्दः.

CORRUPTIVE, a. दूषकः -का -कं, दूषणः -णा -णं, दूषयिष्णुः -ष्णुः -ष्णु.

CORRUPTLESS, a. अदुष्टः -ष्टा -ष्टं, अक्षयः -या -यं, निर्जरः -रा -रं.

CORRUPTLY, adv. दुष्टं, सदूषणं, सदोषं, भावदुष्टत्वात्, दुरात्मत्वात्.

CORRUPTNESS, s. दुष्टत्वं, दुष्टभावता, भ्रष्टता, कुसृतिः f. *See* CORRUPTION.

CORSAIR, s. समुद्रयायी दस्युः m., समुद्रीयदस्युः m.

CORSE, s. शवः, कुणपः -पं, मृतकं, मृतशरीरं. *See* CORPSE.

CORSET, s. चोलिका, चोलः -ली, अङ्गिका, कञ्चुलिका, कूर्पासकः -कं.

CORSLET, s. कवचः -चं, उरस्त्राणं, वक्षस्त्राणं, उरश्छदः, शरीररक्षणी.

CORTICAL, a. वाल्कलः -ली -लं, त्वङ्मयः -यी -यं, त्वाचः -ची -चं.

CORTICATED, a. वृक्षवल्कलोपमः -मा -मं, तरुत्वग्रूपः -पी -पं.

CORUSCANT, a. स्फुरन् -रन्ती -रत् (त्), विद्योतमानः -ना -नं, उज्ज्वलः -ला -लं.

To CORUSCATE, v. n. स्फुर् (c. 6. स्फुरति -रितुं), विद्युत् (c. 1. -द्योतते -तितुं).

CORUSCATION, s. स्फुरणं, स्फुरितं, विद्युद्दाम n. (न्), छटा, विद्युदाभा.

CORYMBIFEROUS, a. गुच्छाकारफलविशिष्टः -ष्टा -ष्टं.

COSINE, s. ज्या, ज्यका.—(Of a right-angled triangle) कोटिज्या.

COSMETIC, a. त्वक्कान्तिकरः -री -रं, कान्तिवर्द्धकः -का -कं, अङ्गरागकारी -रिणी -रि (न्), शोभकृत्; 'a cosmetic,' गात्रमार्जनद्रव्यं.

COSMICAL, a. जगत्सम्बन्धीयः -या -यं, पार्थिवः -वी -वं.

COSMOGONY, s. जगदुत्पत्तिः f., जगत्सृष्टिः f., पृथिवीसृष्टिः f., पृथिव्युत्पत्तिः.

COSMOGRAPHER, s. जगद्विवरणकृत्, जगद्वर्णनकर्त्ता m. (र्तृ), पृथिवीविवरणरचकः.

COSMOGRAPHICAL, a. जगद्विवरणविषयः -या -यं, जगद्वर्णनसम्बन्धीयः -या -यं.

COSMOGRAPHY, s. जगद्विवरणं, जगद्वर्णनं, पृथिवीविवरणविद्या.

Digitized by Google

Cosmopolite, *s.* जगद्वासी *m.* (न्), पृथिवीवासी, सर्व्वत्रवासी, सर्व्वत्रस्थायी *m.* (न्), सर्व्वदेशवासी *m.* (न्), निर्व्विशेषेण सर्व्वलोकमित्रं.

Cost, *s.* (Price) मूल्यं, अर्घः.—(Expense) व्ययः; 'high cost,' दुर्मूल्यं, बहुमूल्यं, माहार्घ्यं; 'little cost,' अल्पमूल्यं, अल्पव्ययः; 'at the cost of life,' प्राणव्ययेन; 'at the cost of a large sum,' बहुधनव्ययेन.

To cost, *v. n.* अर्घ् (c. 10. अर्घयति -यितुं). Usually expressed by the inst. c. of मूल्यं or व्ययः in conjunction with some other verb; as, 'what does it cost?' कियता मूल्येन विक्रीयते; 'the building of the house cost a large sum of money,' बहुधनव्ययेन गृहं निर्म्मितं.

Costal, *a.* पञ्जरास्थिसम्बन्धी -न्धिनी -न्धि (न्), पार्श्वीयः -या -यं.

Costive, *a.* आनद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं, बद्धकोष्ठः -ष्ठा -ष्ठं, अवरुद्धमलः -ला -लं, बद्धमलः -ला -लं. *See* Constipated.

Costiveness, *s.* मलावरोधः, मलावष्टम्भः, आनाहः, नाहः, निबन्धः, बद्धकोष्ठं.

Costliness, *s.* बहुमूल्यता, महार्घता, माहार्घ्यं, महार्हता, दुर्मूल्यता.

Costly, *a.* बहुमूल्यः -ल्या -ल्यं, महार्घः -र्घा -र्घं, महाधनः -ना -नं, महार्हः -र्हा -र्हं, दुर्मूल्यः -ल्या -ल्यं, उत्कृष्टः -ष्टा -ष्टं, अर्घ्यः -र्घ्या -र्घ्यं.

Costume, *s.* (Dress) वेशः -षः, नेपथ्यं.—(Conformity of dress), वेषसारूप्यं.

Cot, *s.* कुटीरः, कुटेरः, कुटिरं, उटजः, कुट्टिमः -मं, वेश्म *n.* (न्), पर्णशाला, तृणकुटी, तृणौकः *n.* (स्), कायमानं.—(A small bed) खट्वा, दोला, प्रेङ्खा, प्रेङ्खोलनं.

Cotemporary, *a.* समानकालीनः -ना -नं, एककालीनः -ना -नं, समकालवर्त्ती -र्त्तिनी -र्त्ति (न्), सवयाः -याः -यः (स्), समानवयस्कः -स्का -स्कं. *See* Contemporary.

Coterie, *s.* भोगासक्तजनानां संसर्गः or पंक्तिः *f.* or गणः.

Cotquean, *s.* गेहशूरः, गेहनर्दी *m.* (न्), गेहमेही *m.* (न्), स्त्रीकार्य्यचर्च्चकः.

Cottage, *s.* कुटीरः, उटजः, वेश्म *n.* (न्), पर्णशाला. *See* Cot.

Cottager or cotter, *s.* कुटीरवासी *m.* (न्), ग्रामवासी *m.*, ग्रामीयः.

Cottier, *s.* कुटीरस्थः, उटजवासी *m.* (न्), ग्रामीणः.

Cotton, *s.* पिचुलः, पिचुः, पिचुतूलं, तूलः -लं, तूलकं, तूलपिचुः *m.*, वदरा -री.—(The plant) कार्पासी, कार्पासी, पिचव्यः; 'roll of cotton,' तूलनाली.—(Cotton cloth) कार्पासं, कार्पासाम्बरं, तूलावस्त्रं, अम्बरं, फालवस्त्रं.

Cottony, *a.* कार्पासः -सी -सं -सिकः -की -कं, फालः -ली -लं, बादरः -री -रं.

Couch, *s.* केलिशयनं, शय्या, शयनीयं, शयः -यनं, पर्य्यङ्कः, मञ्चः, प्रस्तरः, प्रस्तारः, तल्पः, पालङ्कः, विश्रामस्थानं.

To couch, *v. n.* शी (c. 2. शेते, शयितुं), शयनं कृ, संविश् (c. 6. -विशति -वेष्टुं).

To couch, *v. a.* (Cause to lie, lay down) शी in caus. (शाययति -यितुं), निधा (c. 3. -दधाति -धातुं), निविश् in caus. (-वेशयति -यितुं).—(Comprise) परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(Hide) छद् (c. 10. छादयति -यितुं).—(Cut out cataract of the eye) नेत्रमन्थम् उच्छिद् (c. 7. -छिनत्ति -छेत्तुं).

Couchant, *a.* शायी -यिनी -यि (न्), शयितः -ता -तं, शयः -या -यं.

Couched, *p. p.* (Hidden, involved, comprised) समाच्छन्नः -न्ना -न्नं, छादितः -ता -तं, समाविष्टः -ष्टा -ष्टं, उपलक्षितः -ता -तं, सम्भक्तः -क्ता -क्तं, संसृष्टः -ष्टा -ष्टं, अन्तर्गतः -ता -तं.

Couchfellow, *s.* सहशायी *m.* -यिनी *f.* (न्), एकपर्य्यङ्कशायी, सहशयनः.

Couchgrass, *s.* तृणविशेषः, तृणं, कक्षः.

Cough, *s.* काशः, कासः, उत्कासः -सनं, विक्षावः, क्षवः, क्षवथुः *m.*, क्षुत् *f.*, क्षुतः -ता; 'having a cough,' काशी -शिनी -शि (न्), क्षुतवान् -वती -वत् (त्).

To cough, *v. n.* कास् (c. 1. कासते -सितुं), क्षु (c. 2. क्षौति, क्षवितुं).—(Coughing up of phlegm) उत्कासनं.

Cougher, *s.* काशी *m.* (न्), उत्कासी *m.* (न्), क्षुत्कारी *m.* (न्), क्षवकृत्.

Coulter, *s.* लाङ्गलदन्तः, फालदन्तः, लाङ्गलकीलः, कृन्तत्रं, गोदारणं.

Council, *s.* सभा, समाजः, सदः *n.* (स्), संसद् *f.*; 'council of state,' शिष्टसभा, महासभा; 'privy council,' मन्त्रिसभा, गूढसभा; 'council-room,' चिन्तावेश्म *n.* (न्), मन्त्रशाला, दार्ष्टं.

Counsel, *s.* (Advice) मन्त्रः -न्त्रणं -णा, उपदेशः, उपदिष्टं, मन्त्रितं, मन्त्रोपष्टम्भः.—(Deliberation) विचारः -रणं, चिन्ता, सुचिन्ता, सञ्चिन्तनं, विवेचनं, मर्शः, आमर्शः, परामर्शः, प्रत्यवमर्शः; 'good counsel,' सुमन्त्रितं; 'betraying of counsel,' मन्त्रभेदः.—(Plan, scheme, design) उपायः, व्यवसायः, चिन्ता, अभिप्रायः.—(Advocate, pleader) प्रतिवादी *m.* (न्), प्रतिनिधिः *m.*

To counsel, *v. a.* मन्त्र् (c. 10. मन्त्रयते -ति -यितुं), सम्मन्त्र्, मन्त्रणं कृ, मन्त्रं दा, उपदिश् (c. 6. -दिशति -देष्टुं), आदिश्, प्रत्यादिश्, परामर्शं कृ.

Counselled, *p. p.* मन्त्रितः -ता -तं, उपदिष्टः -ष्टा -ष्टं, आदिष्टः -ष्टा -ष्टं.

Counsellor, *s.* (On public affairs) मन्त्री *m.* (न्), अमात्यः, सचिवः.—(Adviser in general) मन्ता *m.* (न्तृ), अभिमन्ता *m.* (न्तृ), मन्त्रकृत्, मन्त्रवित्, मन्त्रदः, मन्त्रज्ञः, उपदेशकः, उपदेष्टा *m.* (ष्टृ), आदेष्टा *m.*, बुद्धिसहायः, भ्रान्तिहरः, कुल्यः.—(Courtier) शिष्टः.

Counsellorship, *s.* मन्त्रित्वं, साचिव्यं, प्रधानमन्त्रिपदं, अमात्यत्वं.

Count, *s.* (Reckoning) गणना -नं, गणितं, संख्या, गणितसंख्या.—(A title of foreign nobility) विदेशीयख्यातिविशेषः.—(Charge in an indictment) पूर्व्वपक्षपादः, भाषापादं, अभियोगः.

To count, *v. a.* (Number) सङ्ख्या (c. 2. -ख्याति -तुं), सम्परिख्या, परिसङ्ख्या, कल् (c. 10. कलयति -यितुं), अङ्क् (c. 10. अङ्कयति -यितुं).—(Calculate) गण् (c. 10. गणयति -यितुं), विगण्, प्रगण्.—(Esteem) मन् (c. 4. मन्यते, मन्तुं or caus. मानयति -यितुं), सम्मन्, प्रतिमन्.

To count-upon, *v. a.* अवलस् (c. 1. -लसते -सितुं), समालस्, संश्रि (c. 1. -श्रयति -ते -यितुं), समाश्रि, उपाश्रि; विश्वस् (c. 2. -श्वसिति -तुं); 'counting upon,' अवलम्ब.

Counted, *p. p.* संख्यातः -ता -तं, गणितः -ता -तं, अङ्कितः -ता -तं, मतः -ता -तं.

Countenance, *s.* (Face) मुखं, आननं, वदनं, आस्यं, वक्त्रं.—(Air, look) वदनं, रूपं, आकारः, आभा.—(Sanction, patronage) दृष्टिः *f.*, अनुग्रहः, आग्रहः, सङ्ग्रहः, आश्रयः, आधारः, अनुपालनं, संवर्द्धनं, प्रसादः, आनुकूल्यं, साहाय्यं, उपकारः; 'one who preserves a composed countenance,' प्रसन्नमुखी *m.* (न्).

To countenance, *v. a.* अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अनुपाल् (c. 10. -पालयति -यितुं), प्रतिपाल्, अनुकूल् (nom. अनुकूलयति -यितुं), संवृध् in caus. (-वर्धयति -यितुं), उपकृ, साहाय्यं कृ.

Countenancer, *s.* अनुग्राही *m.* (न्), अनुपालकः, उपकारकः, संवर्धकः, सहायः.

Counter, *s.* (Table to count money on) गणनफलकं, वणिक्फलकं, वणिजां मुद्रासनं.—(Round piece to count with) गणनार्थं मुद्रा or काकिनी or कपर्द्दकः or वटः or वराटकः or अष्टीला or अक्षः.

Counter, *adv.* प्रति, अभि, प्रतिकूलं, विरुद्धं, विपरीतं, प्रातिकूल्येन, विरोधेन, प्रतिमुखं, प्रतिलोमं, विलोमं; 'a counter-charge,' प्रत्यभियोगः; 'a counter-pledge,' प्रतिपाणं.

To counteract, *v. a.* प्रतिकृ, विप्रतिकृ, विप्रकृ, प्रतिहन् (c. 2. -हन्ति, -हन्तुं), प्रतीकारेण or प्रतियत्नेन विरुध् (c. 7. -रुणद्धि -रोद्धुं) or प्रतिरुध् or निरु in caus. (-वारयति -यितुं); प्रतिकूल (nom. प्रतिकूलयति -यितुं).

Digitized by Google

COUNTERACTED, *p. p.* प्रतिकृतः-ता -तं, विप्रतिकृतः-ता -तं, विप्रकृतः-ता -तं.

COUNTERACTION, *s.* प्रतीकारः, प्रतिकारः, विप्रतिकारः, प्रतिक्रिया, विप्रकारः, विप्रकृतिः *f.*, प्रतिघातः, प्रतियत्नः, प्रतियोगः, विपरीतक्रिया, विरुद्धक्रिया, व्याघातः, अभिघातः.

To COUNTERBALANCE, *v. a.* प्रतितुल् (c. 10. -तुलयति -यितुं), समीकृ, समतोलीकृ, तुल्यीकृ, तुल्यबलं -लां -लं कृ, तुल्यभारं -रां -रं कृ, समानीकृ.

To COUNTERBUFF, *v. a.* प्रतिहन् (c. 2. -हन्ति -हन्तुं), अभिहन्, प्रतिघातं कृ.

COUNTERBUFF, *s.* प्रतिघातः, प्रतिहतिः *f.*, प्रतीघातः, अभिघातः.

COUNTERCHANGE, *s.* परिवर्त्तः -र्त्तनं, विनिमयः, विपर्य्ययः, परस्परपरिवर्त्तनं, आदानप्रतिदानं, व्यतिकरः, इतरेतरयोगः.

To COUNTERCHANGE, *v. a.* परस्परं परिवृत् in caus. (-वर्त्तयति -यितुं) or विनिमे (c. 1. -मयते -मातुं) or आदानप्रतिदानं कृ.

To COUNTERCHARM, *v. a.* मन्त्रं or अभिचारं or वशक्रियां प्रतिकृ, मन्त्रच्छेदं कृ.

COUNTERCHECK, *s.* प्रतिरोधः, प्रतिष्टम्भः, प्रतिबन्धः, प्रतिषेधः, प्रतिघातः.

COUNTEREVIDENCE, *s.* प्रतिकूलसाक्षी *m.* (न्), विरुद्धसाक्ष्यं, विपरीतसाक्ष्यं, प्रतिपक्षप्रमाणं.

To COUNTERFEIT, *v. a.* (Feign) छल (nom. छलयति -यितुं), छद्म कृ, कपटं कृ, कूटं कृ; 'to counterfeit a writing,' कपटलेख्यं or कूटलेखं कृ.—(Imitate) अनुकृ.—(Impose upon) प्रलभ् (c. 1. -लभते -लब्धुं), प्रतृ in caus. (-तारयति -यितुं); 'to counterfeit sleep,' मिथ्याप्रसुप्तः -प्ता -प्तं भू; 'he counterfeits sleep,' आत्मानं प्रसुप्तमिव दर्शयति.

COUNTERFEIT, *s.* कूटं, कपटः -टं, छद्म *n.* (न्), व्याजः.—(Forgery) कपटलेखः -ख्यं.

COUNTERFEIT, *a.* कृत्रिमः -मा -मं, कल्पितः -ता -तं, छाद्मिकः -की -कं, लक्ष्यः -क्ष्या -क्ष्यं, सव्याजः -जा -जं, कपटी -टिनी -टि (न्); 'a counterfeit dress,' कपटवेशः, छद्मवेशः; 'counterfeit gold,' कूटस्वर्णं; 'counterfeit writing,' कपटलेख्यं; 'counterfeit order,' कूटशासनं.

COUNTERFEITER, *s.* (Forger) कूटकः, कूटकृत्, कपटलेख्यकारी *m.* (न्).—(Imposter) कपटिकः, छली *m.* (न्), प्रतारकः, वञ्चकः.

COUNTERFEITLY, *adv.* मिथ्या, सकूटं, सकपटं, सव्याजं, छद्मना, कृत्रिमप्रकारेण.

To COUNTERMAND, *v. a.* प्रत्यादिश् (c. 6. -दिशति -देष्टुं), प्रत्याज्ञा in caus. (-ज्ञापयति -यितुं), विपरीताज्ञां दा, अन्यथा आज्ञा in caus.

COUNTERMAND, *s.* विपरीताज्ञा, प्रत्यादेशः, विपरीतादेशः.

To COUNTERMARCH, *v. n.* प्रतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, विपरीतयात्रां कृ, प्रतियां (c. 2. -याति -तुं), विपरीतं या.

COUNTERMARCH, *s.* विपरीतयात्रा, प्रतियानं, प्रतिगमनं, विपरीतगतिः *f.*, व्यतिक्रमः, प्रतियात्रा.

COUNTERMARK, *s.* प्रतिचिह्नं, प्रतिलक्षणं, चिह्नं चिह्नेन सहितं.

To COUNTERMARK, *v, a.* प्रतिचिह्न (nom. -चिह्नयति -यितुं), चिह्नं चिह्नेन दृढीकृ.

COUNTERMINE, *s.* प्रतिसुरङ्गा, प्रतिसन्धिः *m.*, प्रतिखानिकं, शत्रुसुरङ्गाभिमुखगता सुरङ्गा.

To COUNTERMINE, *v. a.* प्रतिसुरङ्गां कृ, शत्रुसन्धिप्रतिमुखम् अन्यसन्धिं खन् (c. 1. खनति -नितुं).

COUNTERMURE, *s.* प्राचीरपश्चात् प्राचीरं, प्राकारस्य पश्चाद् उपप्राकारः.

COUNTERPANE or COUNTERPOINT, *s.* शय्याप्रच्छदः. शयनीयप्रच्छदपटः, शय्याच्छादनं, शयनास्तरणं.

COUNTERPART, *s.* प्रतिरूपं, प्रतियोगः, प्रतियोगी *m.* (न्), प्रतिमूर्त्तिः *f.*, प्रतिमा, प्रतिमानं, प्रतिबिम्बं, अनुरूपं.

COUNTERPLEA, *s.* प्रत्यर्थं, प्रत्यभियोगः, प्रत्युत्तरं, उद्ग्राहः.

COUNTERPLOT, *s.* प्रतियत्नः, प्रतियोगः, प्रतिचेष्टा, प्रतीकारः, प्रत्युपायः.

To COUNTERPLOT, *v. a.* उपायं प्रत्य् अन्योपायं प्रयुज् (c. 7. -युनक्ति -योक्तुं).

To COUNTERPOISE, *v. a.* प्रतितुल् (c. 10. -तुलयति -यितुं), तुल्यभारं -रां -रं कृ, तुल्यबलं -लां -लं कृ, तुल्यीकृ, समतोलीकृ, समीकृ.

COUNTERPOISE, *s.* तुल्यभारत्वं, तुल्यबलत्वं -ता, समतोलत्वं.

COUNTER-POISON, *s.* प्रतिविषं, विषनाशनं, विषघ्नं, गरघ्नं.

COUNTERSCARP, *s.* कटकनिकटवर्त्ती परिखापार्श्वः.

To COUNTERSIGN, *v. a.* परहस्ताक्षरं स्वहस्ताक्षरेण दृढीकृ.

COUNTERSIGN, *s.* प्रत्याभिज्ञानं.—(Watchword) सम्भाषा, संविद्.

COUNTER-TENOR, *s.* उदात्तविपरीतः स्वरभागः.

COUNTER-TIDE, *s.* प्रतिवेला, विपरीतवेला, प्रतिरयः, विपरीतप्रवाहः.

To COUNTERVAIL, *v. a.* तुल्यबलः -ला -लम् अस्, तुल्यीभू, समानबलीभू.

COUNTESS, *s.* विशिष्टपदस्थितस्य कुलीनपुरुषस्य पत्नी.

COUNTING, *s.* गणनं -ना.—(Counting-house) लेख्यस्थानं.

COUNTLESS, *a.* असंख्येयः -या -यं, असंख्यः -ख्या -ख्यं, असंख्यकः -का -कं, अगण्यः -ण्या -ण्यं, अगणनीयः -या -यं, लक्षगुणः -णा -णं, अस्तसंख्यः -ख्या -ख्यं.

COUNTRY, *s.* (A region) देशः, प्रदेशः, विषयः, राष्ट्रं, दिक् *f.* (श्), आशा, तायिकः, धिष्ण्यं; 'inhabitated country,' जनपदः, नीवृत्; 'barbarous country,' म्लेच्छदेशः.—(As opposed to the town) ग्रामः, जनपदः.—(Native country) जन्मभूमिः *f.*, स्वदेशः, स्वराष्ट्रं, स्वविषयः.—(Country-road) दिङ्मार्गः.

COUNTRY, *a.* जानपदः -दी -दं, ग्राम्यः -म्या -म्यं, ग्रामीयः -या -यं.

COUNTRY-DANCE, *s.* पंक्तिक्रमेण सम्मुखस्थानां स्त्रीपुरुषाणां नृत्यं.

COUNTRY-HOUSE, *s.* जाङ्गलप्रदेशे गृहं, पौरजनस्य नगरोपान्ते खेलिगृहं.

COUNTRY-LIFE, *s.* जानपदानां व्यवहारः or व्यापारः, जनपदे or जाङ्गलदेशे वर्त्तनं, वनवर्त्तिभिः प्रवृत्तं जीवनं.

COUNTRYMAN, *s.* (Rustic) जानपदः, ग्राम्यजनः, ग्रामवासी *m.* (न्), ग्रामी *m.* (न्), ग्रामीयः.—(Fellow-countryman) स्वदेशीयः, स्वदेशजः, एकदेशस्थः, संस्थः, सांस्थानिकः, एकग्रामीणः, एकपौरः.

COUNTRY-PARSON, *s.* ग्राम्यगुरुः *m.*, ग्रामवासिनाम् आचार्य्यः, जानपदानां पुरोहितः.

COUNTY, *s.* मण्डलं, चक्रं, देशः, प्रदेशः, राष्ट्रं.

COUPLE, *s.* (A brace) मिथुनं, द्वन्द्वं, युगं, युग्मं, युगलं, यमलं, यामलं, यमः, यमकं, द्वयं in comp.; as, 'a couple of men,' पुरुषद्वयं; 'a couple of oxen,' गोयुगं, गोमिथुनं; 'a married couple,' दम्पती *m. du.* भार्य्यापती *m. du.*—(A tie for fastening two dogs together) कुक्कुरद्वयसबन्धनार्थं रज्जुः or शुङ्खला.

To COUPLE, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं), सन्धा (c. 3. -दधाति -धातुं), संश्लिष् in caus. (-श्लेषयति -यितुं), सबन्ध् (c. 9. -बध्नाति -बन्धुं), एकत्र कृ.

To COUPLE, *v. n.* भार्य्यापतिभावेन सङ्गम् (c. 1. -गच्छति -गन्तुं) or सम्मील् (c. 6. -मिलति -मेलितुं), मैथुनं कृ, विवाहं कृ.

COUPLET, *s.* (Two lines in verse) श्लोकः.

COURAGE or COURAGEOUSNESS, *s.* वीर्य्यं, वीरता, शौर्य्यं, शूरता, धीरत्वं, धैर्य्यं, विक्रमः, पराक्रमः, निर्भयता, साहसं, पौरुषं, धार्ष्ट्यं, तेजः *n.* (स्), प्रतापः; 'to take courage,' आश्वस् (c. 2. -श्वसिति -सितुं), प्रत्याश्वस्, समाश्वस्; 'to inspire with courage,' आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस् in caus.

COURAGEOUS, *a.* वीरः -रा -रं, प्रवीरः -रा -रं, शूरः -रा -रं, धीरः -रा -रं, निर्भयः -या -यं, अभीतः -ता -तं, अभीरुः -रुः -रु, विक्रान्तः -न्ता -न्तं, पराक्रान्तः -न्ता -न्तं, साहसिकः -की -कं, धृष्टः -ष्टा -ष्टं,

COURAGEOUSLY, *adv.* सवीर्य्यं, सशौर्य्यं, वीर्य्येण, सधैर्य्यं, सविक्रमं, निर्भयं,

Digitized by Google

अभीतवत्, वीरवत्, शूरवत्, साहसपूर्व्वकं.

Courier, *s.* वार्त्ताहरः, अध्वगः, उद्वेगः, वेगी *m.* (न्), प्रजवी *m.* (न्), तरस्वी *m.* (न्), जङ्घाकारिकः, जङ्घालः, जाङ्घिकः, तूः *m.* (तुर्).—(Bearing letters) लेखहारी *m.* (न्).

Course, *s.* (Career) गतिः *f.*, चर्य्या, मार्गः, चलनं, गमनं.—(Progress) क्रमः, प्रक्रमः, प्रगमनं.—(Room, scope) प्रसरः.—(Track) पथः, मार्गः, पद्धती, अयनं.—(Ship's course) नौमार्गः, नौपथः.—(Course of an arrow) बाणगोचरं, शरायणं, वातरायणं.—(Line of study) अध्ययनमार्गः, अध्ययनक्रमः; 'course of mathematics,' गणितमार्गः.—(Order of succession) क्रमः, अनुक्रमः, पर्य्यायः, आनुपूर्व्यं, परम्परा, श्रेणी, आवलिः *f.*—(Course of proceeding) क्रियाप्रसङ्गः, क्रियाविधिः *m.*, अनुष्ठानं.—(Manner) रीतिः *f.*, विधः, विधिः *m.*, प्रकारः, मार्गः.—(Manner of life or conduct) व्यवहारः, वृत्तिः *f.*, रीतिः *f.*, आचारः, चरित्रं, सृतिः *f.*; 'correct course of conduct,' सुमार्गः, सुपथः; 'incorrect course,' उन्मार्गः, विमार्गः, उत्पथः, विपथः, कुपथः, कुसृतिः *f.*—(Course or flow of a river) नदीपद्धतिः *f.*, नदीप्रवाहः, नदीरयः.—(Race-ground) चर्य्याभूमिः *f.*, वाजिधावनस्थानं.—(Number of dishes set on the table at once) यावन्ति भोजनपत्राणि युगपत् परिवेष्यन्ते.—(Catamenia) ऋतुः *m.*, रजः *n.* (स्), स्त्रैवं, पुष्पं; 'of course,' अवश्यं, निःसन्देहं, नूनं, सुनिश्चितं, असंशयं; 'in the course,' मध्ये; 'in the course of three years,' वर्षत्रयमध्ये; 'being in the course of proof,' साध्यमानः -ना -नं; 'course of nature,' सृष्टेरीतिः *f.*

To course, *v. a.* and *n.* कुक्कुरैः शशकम् अनुसृ (c. 1. -सरति -सर्त्तुं), दृष्टिगोचरशशकानुसरणे शिक्षितैः कुक्कुरैर् मृगयां कृ.

Courser, *s.* (Fleet horse) जवनः, जवाधिकः, जवी *m.* (न्).—(War-horse) वारकीरः.

Court, *s.* (An inclosed place, a square) चत्वरं, अङ्गनं, प्राङ्गणं, चतुःशालं -ला, चतुश्शाला, निकषेणः, प्रकोष्ठः, कक्ष्या; 'court of a house,' गृहाङ्गणं.—(Prince's residence) राजशाला, राजसभा, शाला, सभा, राजगृहं, राजमन्दिरं, राजधानी, राजधाम *n.* (न्), नृपवेश्म *n.* (न्), राजद्वारं.—(Court of justice) धर्म्मसभा, राजद्वारं, व्यवहारमण्डपः, विचारस्थानं, धर्म्माधिकरणं, सदः *n.* (स्); 'court-house,' दार्ष्टिकं.—(The judges) धर्म्माधिकारिणः *m. pl.*, प्राड्विवाकाः *m. pl.*, धर्म्माध्यक्षाः *m. pl.*—(The retinue of the prince) तल्लं, राजपरिवारः, राजपरिजनः, परिवर्हः.—(Endeavour to please, civility) अनुनयः, सभाजनं, आराधनं, आनन्दनं, अनुवृत्तिः *f.*, अनुकूलता. भजनं, भक्तिः *f.*

To court, *v. a.* (Endeavour to please, conciliate) अनुनी (c. 1. -नयति -नेतुं), आराध् in caus. (-राधयति -यितुं), अनुरञ्ज् in caus. (-रञ्जयति -यितुं), सेव् (c. 1. सेवते -वितुं), आश्रि (c. 1. -श्रयते -यितुं), भज् (c. 1. भजते, भक्तुं), सभाज् (c. 10. सभाजयति -यितुं).—(Solicit) प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), याच् (c. 1. याचति -चितुं),—(Solicit to marriage) विवाहार्थं स्त्रियं प्रार्थ् or उपास् (c. 1. आस्ते -आसितुं).

Court-chaplain, *s.* राजपुरोहितः, राजाचार्य्यः, राजगुरुः *m.*, राजविप्रः.

Courted, *p. p.* अनुनीतः -ता -तं, आराधितः -ता -तं, अनुरञ्जितः -ता -तं, सभाजितः -ता -तं, सेवितः -ता -तं, अनुरुद्धः -द्धा -द्धं, प्रार्थितः -ता -तं.

Court-day, *s.* विचारदिनं, विचारदिवसः, धर्म्मप्रणयनदिवसः.

Court-favour, *s.* वाल्लभ्यं, राजानुग्रहः, राजप्रसादः.

Courteous, *a.* अनुनयी -यिनी -यि (न्), अनुरोधी -धिनी -धि (न्), अनुकूलः -ला -लं, अनुग्राही -हिणी -हि (न्), सविनयः -या -यं, सानुनयः -या -यं, प्रश्रितः -ता -तं, सभ्यः -भ्या -भ्यं, प्रियंवदः -दा -दं, वन्दारुः -रूः -रु, सान्त्ववादः -दा -दं; 'courteous language,' सूनृतं; as in the phrase 'we are happy that you are come,' धन्या वयं भवदागमनात्.

Courteously, *adv.* सानुनयं, सविनयं, सानन्दनं, सानुरोधं, सभाजनपूर्व्वं.

Courteousness, *s.* सभ्यता, अनुकूलता, सुशीलता, शिष्टता, अभिनीतिः *f.*

Courtesy, *s.* अनुनयः, विनयः, अनुकूलता, अनुरोधः, अनुग्रहः, आनन्दनं, सभाजनं, स्वभाजनं, प्रणयः, प्रश्रयः, अनुवृत्तिः *f.*-वर्त्तनं, सौजन्यं, दाक्षिण्यं; 'in receiving or taking leave of a friend,' आमन्त्रणं, आप्रच्छनं; 'treated with courtesy,' सभाजितः -ता -तं.

Courtezan, *s.* वेश्या, गणिका, पण्यस्त्री, पण्याङ्गना, वारविलासिनी, वारस्त्री, बन्धकी, साधारणस्त्री, पुंश्चली, स्वैरिणी, रूपाजीवा.

Courtier, *s.* राजवल्लभः, नृपवल्लभः, सभास्थो जनः, राजसेवकः, राजभृत्यः, सभ्यः, सभ्यलोकः, शिष्टः, राजसभासद्.

Court-like, *a.* सभ्यः -भ्या -भ्यं, शिष्टाचारः -रा -रं, सभ्याचारः -रा -रं.

Courtliness, *s.* सभ्यता, शिष्टता, सौजन्यं, सुजनता, सुशीलता.

Courtly, *a.* सभ्यशीलः -ला -लं, सुजनः -ना -नं, सुन्दरः -री -रं.

Court-minion, *s.* राजवल्लभः, नृपवल्लभः, राजप्रियः.

Courtship, *s.* (Of a woman) विवाहार्थं प्रार्थनं -ना or याञ्ञा, स्त्र्युपासनं.—(Soliciting favour) आराधनं, अनुरञ्जनं, भजनं, आनन्दनं.

Court-yard, *s.* अङ्गनं, प्राङ्गणं, चत्वरं, चतुःशालं -ला, अभ्यन्तरचतुःशालकः, अजिरं, गृहाङ्गणं, गृहप्राङ्गणं, प्रकोष्ठः.

Cousin, *s.* (Male, by father's brother) पितृव्यपुत्रः, पितृभ्रात्रीयः.—(Female) पितृव्यपुत्री, पितृभ्रात्रीया.—(Male, by father's sister) पितृष्वस्रीयः, पितृष्वसेयः.—(Female) पितृष्वस्रीया, पितृष्वसेयी.—(Male, by mother's brother) मातुलपुत्रः, मातृभ्रात्रीयः.—(Female) मातुलपुत्री, मातृभ्रात्रीया.—(Male, by mother's sister) मातृष्वस्रीयः, मातृष्वसेयः.—(Female) मातृष्वस्रीया, मातृष्वसेयी.—(A kinsman) ज्ञातिः *m.*, बान्धवः, सहजमित्रं.

Cove, *s.* वङ्कः, खङ्गः, खातं, अखातं, पोतबन्धनस्थानं.

Covenant, *s.* नियमः, संविद् *f.*, समयः, पणः, सङ्घट्टनं, समाधिः *m.*, उपगमः, संश्रवः; 'written covenant,' नियमपत्रं; 'covenant-breaker,' समयभेदी *m.* (न्), नियमलङ्घी *m.* (न्).

To covenant, *v. n.* नियमं कृ, नियमीकृ, समयं कृ, समयाकृ, सङ्घट्ट (c. 1. -घट्टते -ट्टितुं), संविदम् उपगम् (c. 1. -गच्छति -गन्तुं), पणं कृ, पण् (c. 1. पणते -णितुं, पणायति -यितुं).

Covenanted, *p. p.* नियमितः -ता -तं, संविदितः -ता -तं, पणितः -ता -तं.

Covenanter, *s.* सामयिकः, नियमबद्धः, नैयमिकः, नियमकारी *m.* (न्).

Cover, *s.* (Any thing put over another) छादनं, आच्छादनं, आवरणं, पिधानं, पटलं, पुटः -टी -टं.—(Screen) व्यवधा -धानं, पटः -टं, अवगुण्ठनं.—(Wrapper) प्रावारः, प्रवारः, आच्छादनवस्त्रं, प्रच्छदपटः, उत्तरच्छदः, उत्तरीयं, निचोलः.—(Lid) मुद्गः, पिधानं, शरावः, वर्द्धमानकः.—(Of a dish) कूर्म्मपृष्ठकं.—(Of a book) पुस्तकवस्त्रं, पुस्तकाच्छादनं.—(Of a well) विनाहः, वीनाहः, नान्दीपटः, नान्दीमुखः.—(Of a carriage) रथगुप्तिः *f.*, रथगोपनं.—(Pretext) छद्म *n.* (न्), व्यपदेशः, अपदेशः.—(Shelter) संश्रयः, समाश्रयः.

To cover, *v. a.* (Put one thing over another) छद् (c. 10. छादयति -ते -यितुं), आछद्, समाछद्, प्रछद्, परिछद्, प्रतिछद्, संछद्, अवछद्, वृ (c. 5. वृणोति, c. 9. वृणाति, वरितुं -रीतुं), आवृ, समावृ, निवृ, संवृ; पिधा (c. 3. -दधाति -धातुं), अपिधा, अवतन् (c. 8. -तनोति -तनितुं).—(Put on in quantities) आचि (c. 5. -चिनोति -चेतुं), समाचि,

Digitized by Google

स्तृ (c. 5. स्तृणोति -णाति, स्तरितुं -रीतुं), आस्तृ.—(Conceal, veil) छद्, गुह्, (c. 1. गूहति -हितुं), निगुह्, अन्तर्धा, व्यवधा, तिरस्कृ, स्थग् (c. 10. स्थगयति -यितुं), गुण्ठ् (c. 10. गुण्ठयति -यितुं), अवगुण्ठ्, ऊर्णु (c. 2. ऊर्णोति, ऊर्णोति, ऊर्णवितुं), प्रोर्णु.—(Cover with a garment) वस्त्रेण आछद् or प्रवृ or परिधा or व्ये (c. 1. व्यति, व्यातुं) or वेष्ट् (c. 1. वेष्टते -ष्टितुं).—(As a horse) स्कु (c. 5. स्कुनोति, c. 9. स्कुनाति, स्कोतुं).

Covered. *p. p.* छन्नः -न्ना -न्नं, छादितः -ता -तं, आच्छन्नः -न्ना -न्नं, आच्छादितः -ता -तं, प्रच्छन्नः -न्ना -न्नं, प्रच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, समवच्छन्नः -न्ना -न्नं, समाच्छन्नः -न्ना -न्नं, आवृतः -ता -तं, प्रावृतः -ता -तं, संवृतः -ता -तं, वृतः -ता -तं, पिहितः -ता -तं, अवततः -ता -तं, आचितः -ता -तं, निचितः -ता -तं, आस्तीर्णः -र्णा -र्णं, आस्तृतः -ता -तं, गूढः -ढा -ढं, निगूढः -ढा -ढं, अन्तर्हितः -ता -तं, व्यवहितः -ता -तं, स्थगितः -ता -तं, गुण्ठितः -ता -तं, ऊर्णोतः -ता -तं, संवीतः -ता -तं, वेष्टितः -ता -तं, पिनद्धः -द्धा -द्धं, रूपितः -ता -तं, अपवारितः -ता -तं; 'a covered way,' छन्नपथः; 'covered with blossoms,' स्तवकाचितः -ता -तं.

Covering, *s.* छादनं, आच्छादनं, प्रच्छादनं, पिधानं, अपिधानं, पटलं, प्रावरणं, आवरणं, वरणं, छदनं, पुटः, अपवारणं, वेष्टनं.—(Screen) व्यवधा -धानं, तिरस्करिणी, तिरोधानं, अन्तर्द्धानं, प्रावृतं.—(Dress) आच्छादनं, परिधानं, प्रवारः, प्रावारः, परिच्छदः.

Coverlet, *s.* शय्याच्छादनं, शयनीयप्रच्छदपटः, उत्तरप्रच्छदः, उत्तरछदः.

Covert, *s.* (Shelter) संश्रयः, समाश्रयः, आश्रयणं,—(Thicket in which beasts hide themselves) गहनं, गह्वरं, गुहिनं, झाटः, कुञ्जः.

Covert, *a.* (Sheltered from the wind) निर्वातः -ता -तं.—(Hidden, secret) गूढः -ढा -ढं, निगूढः -ढा -ढं, छन्नः -न्ना -न्नं, निभृतः -ता -तं, गुप्तः -प्ता -प्तं, रहस्यः -स्या -स्यं; 'covert expression,' व्याजोक्तिः *f.*, व्यङ्ग्योक्तिः *f.*; 'covert meaning,' निगूढार्थः.

Covertly, *adv.* निभृतं, तिरस्, रहस्, रहसि, छलेन, गुप्तं.

To covet, *v. a.* लुभ् (c. 4. लुभ्यति, लोभितुं, लोब्धुं), अभिलष् (c. 1. -लषति -षितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, कांक्ष् (c. 1. कांक्षति -क्षितुं), आकांक्ष्, अतिशयेन लुभ् in des. (लिप्सते -प्सितुं), गृध् (c. 4. गृध्यति, गर्धितुं), काम् (c. 10. कामयते -यितुं), स्पृह् (c. 10. स्पृहयति -यितुं), अभिध्यै (c. 1. -ध्यायति -ध्यातुं).

Covetable, *a.* लोभनीयः -या -यं, लोभ्यः -भ्या -भ्यं, स्पृहणीयः -या -यं, स्पृहः -ह्या -ह्यं, अभिलषणीयः -या -यं, आकांक्षणीयः -या -यं, वाञ्छनीयः -या -यं.

Coveted, *p. p.* अभिलषितः -ता -तं, आकांक्षितः -ता -तं, लिप्सितः -ता -तं, वाञ्छितः -ता -तं, अभीप्सितः -ता -तं, अभीष्टः -ष्टा -ष्टं.

Covetous, *a.* लोभी -भिनी -भि (न्), लुभः -भा -भं, लोभयुक्तः -क्ता -क्तं, लोलुभः -भा -भं, लोभवान् -वती -वत् (त्), अभिलाषी -षिणी -षि (न्) -षुकः -का -कं, आकांक्षी -क्षिणी -क्षि (न्), गृध्नः -ध्ना -ध्नं, गर्द्धनः -ना -नं, गृद्धुः -द्धुः -द्धु, ईप्सुः -प्सुः -प्सु, अभीप्सुः -प्सुः -प्सु, इच्छुः -च्छुः -च्छु, जिघृक्षुः -क्षुः -क्षु, लिप्सुः प्सुः -प्सु, कामवान् -वती -वत् (त्), स्पृहयालुः -लुः -लु, आशायुक्तः -क्ता -क्तं, लालसी -सिनी -सि (न्), तृष्णाकः -का -कं.—(Of riches, gain) धनलुभः -भा -भं, धनाभिलाषुकः -का -कं, अर्थैलुभः -भा -भं, धनार्थी -र्थिनी -र्थि (न्), अर्थेपरः -रा -रं, लाभलिप्सुः -प्सुः -प्सु.

Covetously, *adv.* लोभेन, सलोभं, अतिलिप्सया, लुभत्वात्, लुभं.

Covetousness, *s.* लोभः, लुभ्यता, लिप्सा, तृष्णा, लालसा, अभिलाषः, अतिशयेच्छा, निघृक्षा, अतिशयलिप्सा, लिप्सातिशयः, अतिस्पृहा, अतिकांक्षा, आकांक्षा, अतिवाञ्छा, अभिध्या -ध्यानं, लौल्यं.—(Of wealth) धनलिप्सा, धनलोभः, धनाभिलाषः, धनतृष्णा, विश्नेहा, विश्नेषणा, अर्थकामः.

Covey, *s.* (Hatch of young birds) पक्षिशावकगणः.—(A number of birds) पक्षिगणः, पाक्षिकं, कापोतं; 'covey of partridges,' चकोरमाला, टिट्टिभगणः.

Covin, *s.* कूटसंविद्, कूटपणः, कूटसमयः, कपटसंविद्.

DEPURATION, *s.* निर्म्मलीकरणं, मलापकर्षणं, पवित्रीकरणं, शोधनं.

DEPUTATION, *s.* (Act of deputing) नियोजनं, विनियोगः, प्रेरणं.—(Persons deputed) नियोगिनः *m. pl.*, नियुक्ताः *m. pl.*, नियोगिनां समूहः or गणः.

To DEPUTE, *v. a.* नियुज् (c. 7. -युनक्ति -योक्तुं caus. -योजयति -यितुं), विनियुज्, प्रेर् (c.10.-ईरयति -यितुं), समादिश् (c. 6. -दिशति -देष्टुं), व्यादिश्.

DEPUTED, *p. p.* नियुक्तः -क्ता -क्तं, नियोजितः -ता -तं, विनियुक्तः -क्ता -क्तं, विनियोजितः -ता -तं, प्रेरितः -ता -तं, समादिष्टः -ष्टा -ष्टं.

DEPUTY, *s.* प्रतिनिधिः *m.*, प्रतिपुरुषः, नियोगी *m.* (न्), नियुक्तः, प्रतिहस्तः -स्तकः.

To DERACINATE, *v. a.* उन्मूल् (c. 10. -मूलयति -यितुं), उत्पद् (c. 10. -पाटयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उत्खन् (c. 1. -खनति -नितुं), समूलोद्धरणं कृ.

To DERAIGN, *v. a.* प्रमाणीकृ, सत्याकृ, स्थिरीकृ, दृढीकृ, उपपद् in caus. (-पादयति -यितुं).

DERAIGNMENT, *s.* प्रमाणीकरणं, सत्यापनं, उपपादनं.—(Apostacy) धर्म्मत्यागः.

To DERANGE, *v. a.* पर्य्यस् (c. 4. -अस्यति -असितुं), व्यस्, विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), विक्षुभ् in caus. (-क्षोभयति -यितुं), क्रमं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or उपहन् (c. 2. -हन्ति -न्तुं) or विलुप् (c. 6. -लुम्पति -लोप्तुं), सङ्कुरीकृ, आकुलीकृ, विभ्रम् in caus. (-भ्रमयति -यितुं).

DERANGED, *p. p.* व्यस्तः -स्ता -स्तं, विक्षिप्तः -प्ता -प्तं, असंस्थितः -ता -तं, अनवस्थितः -ता -तं, अव्यवस्थितः -ता -तं, व्यापन्नः -न्ना -न्नं, भग्नक्रमः -मा -मं, अस्वस्थः -स्था -स्थं, अस्तव्यस्तः -स्ता -स्तं.—(In mind) विपरीतचेताः -ताः -तः (स्), भ्रान्तमनाः -नाः -नः (स्), उन्मत्तः -त्ता -त्तं.

DERANGEMENT, *s.* उत्क्रमः, व्युत्क्रमः, भग्नप्रक्रमः, अक्रमः, असंस्थानं, अव्यवस्था, अनवस्थितत्वं, वैलक्षण्यं, व्यस्तता, विसूत्रता, विप्लवः, विक्षिप्तता.—(Of mind) चित्तविप्लवः, चित्तविभ्रमः, मतिविपर्य्ययः.

DERELICTION, *s.* त्यागः, परित्यागः, उत्त्यागः, विरहः, उत्सर्जनं, अपायः.

To DERIDE, *v. a.* अवहस् (c. 1. -हसति -सितुं), अपहस्, उपहस्; अपहास्यास्पदीकृ, अवहासभूमिं कृ; भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), उत्स्मि (c. 1. -स्मयते -स्मेतुं), अवगह् (c. 1. -गहते -हितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

DERIDED, *p. p.* उपहसितः -ता -तं, अवहसितः -ता -तं, विगर्हितः -ता -तं.

DERIDER, *s.* उपहासकः, परिहासकर्त्ता *m.* (र्त्तृ), अवक्षेपकः.

Digitized by Google

DERIDINGLY, *adv.* परिहासेन, उपहासेन, सावज्ञेपं, हास्यपुरःसरं.

DERISION, *s.* उपहासः, अवहासः, अपहासः, परिहासः, हास्यं, अवज्ञेपः, उत्त्रासनं, अवज्ञा, अवहेला, अवमानं, व्यञ्जना, व्यङ्ग्यः.

DERISIVE, *a.* परिहासकः -का -कं, हासकरः -रा -रं, अवज्ञेपकः -का -कं.

DERIVABLE, *a.* प्रापणीयः -या -यं, आनयनीयः -या -यं, उत्पादनीयः -या -यं, व्युत्पादनीयः -या -यं, निष्पादनीयः -या -यं, यौक्तिकः -की -कं.

DERIVATION, *s.* आनयनं, उत्पत्तिः *f.*, व्युत्पत्तिः *f.*, निष्पत्तिः *f.*, अपवाहः. —(Origin) योनिः *f.*, उद्भवः, सम्भवः, प्रभवः, निर्गमः, मूलं.—(Of a word) शब्दोत्पत्तिः *f.*, धातुव्युत्पत्तिः, शब्दयोनिः *f.*

DERIVATIVE, *a.* व्युत्पन्नः -न्ना -न्नं, यौक्तिकः -की -कं, औत्सर्गिकः -की -कं.

DERIVATIVE, *s.* व्युत्पन्नशब्दः, उत्पन्नशब्दः, मूलाद् आनीतं यत्किञ्चित्.

To DERIVE, *v. a.* मूलाद् आनी (c. 1. -नयति -नेतुं) or निर्णी or नी or अपवह् (c. 1. -वहति -वोढुं), निष्कृष् (c. 1. -कर्षति -क्रष्टुं); उत्पत्तिं कृ, व्युत्पत्तिं कृ; निर्गम् in caus. (-गमयति -यितुं), उद्भू in caus. (-भावयति -यितुं), सम्भू in caus.; निःसृ in caus. (-सारयति -यितुं), जन् in caus. (जनयति -यितुं).—(Communicate by transmission) सञ्चर् in caus. (-चारयति -यितुं).

To DERIVE, *v. n.* उत्पद् (c. 4. -पद्यते -पत्तुं), व्युत्पद्, समुत्पद्; जन् (c. 4. जायते, जनितुं), प्रजन्; प्रभू (c. 1. -भवति -वितुं), उद्भू, सम्भू; प्रसृ (c. 1. -सरति -सर्तुं), उद्गम् (c. 1. -गच्छति -गन्तुं), निर्गम्.

DERIVED, *p. p.* उत्पन्नः -न्ना -न्नं, व्युत्पन्नः -न्ना -न्नं, आनीतः -ता -तं.

DERIVER, *s.* व्युत्पत्तिकारकः, आनयनकर्त्री *m.* (र्त्तृ), जन्मदाता *m.* (तृ).

To DEROGATE, *v. a.* न्यूनीकृ, ऊन् (c. 10. ऊनयति -यितुं), अल्पीकृ, कन (nom. कनयति -यितुं), लघ (nom. लघयति -यितुं), लघूकृ, ह्रस् in caus. (ह्रासयति -यितुं), असूय (nom. असूयति -यितुं).

DEROGATION, *s.* न्यूनीकरणं, अल्पीकरणं, लघूकरणं, ह्रासः, अपचयः, असूया, अभ्यसूया, अपवादः, विगानं.

DEROGATORILY, *adv.* असूयया, अभ्यसूयया, सापवादं, अकीर्त्तिकरं.

DEROGATORY, *a.* लघूकारकः -का -कं, असूयकः -का -कं, अभ्यसूयकः -का -कं, अपवादकः -का -कं, अपयशस्करः -री -रं, अकीर्त्तिकरः -रा -रं, ह्रासकः -का -कं.

DERVISE, DERVISH, *s.* तुरुष्कदेशीयः सन्यासी or योगी *m.* (न्).

DESCANT, *s.* (Song) विगीतं, सङ्गीतं, गीतं.—(Discourse) वादः, वाक्यं, प्रवादः, प्रवचनं, वचनं, अनुकथनं, सङ्कथा, वचनक्रमः, भाषितं.

To DESCANT, *v. n.* (Sing) विगै (c. 1. -गायति -गातुं), अनुगै, सङ्गै.—(Discourse at large) सुविस्तरेण वद् (c. 1. वदति -दितुं) or प्रवद्, सुविस्तरं व्याख्या (c. 2. -ख्याति -तुं) or विवरणं कृ.

To DESCEND, *v. n.* (Come down) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं), अवया (c. 2. -याति -तुं), अधो या, अवपत् (c. 1. -पतति -तितुं), अधो गम् (c. 1. गच्छति, गन्तुं).—(Fall) पत्, निपत्, प्रपत्, च्यु (c. 1. च्यवते, च्योतुं), प्रच्यु.—(Make hostile incursion) आक्रम् (c. 1. -क्रामति -क्रमितुं), आसद् (c. 10. -सादयति -यितुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं), अभिधाव् (c. 1. -धावति -वितुं).—(Arrive, enter) आगम्, अभिगम्, उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रविश् (c. 6. -विशति -वेष्टुं).—(Be derived from) उत्पद् (c. 4. -पद्यते -पत्तुं), प्रसृ (c. 1. -सरति -सर्तुं), प्रभू, निर्गम्.—(Devolve by inheritance) वंशक्रमेण or अन्वयक्रमेण आगम् or आया, पितृसकाशात् प्राप् in pass. (-आप्यते -आप्तुं).—(Descend into particulars) विस्तरशः or विभागशः or उपवर्णेन वद् (c. 1. वदति -दितुं), विस्तीर्णैविवरणं कृ, समुद्देशं कृ.

To DESCEND, *v. a.* (Make to come down) अवतॄ in caus. (-तारयति -यितुं), अवरुह् in caus. (-रोहयति -यितुं), अवपत् in caus. (-पातयति -यितुं); 'he descends the tree,' द्रुमात् or तरोर् अवतरति or अवरोहति.

DESCENDANT, *s.* सन्तानः -नं, सन्ततिः *f.*, अपत्यं, प्रवरं, प्रजा, सूनुः *m.*, प्रसवः, प्रसूतिः *f.*, तनुः *m.*; 'descendants,' पुत्रपौत्राः *m. pl.*, कुलसन्ततिः *f.*, अपत्यानि *n. pl.*, कुलं, वंशः; 'male descendant,' पुत्रसन्तानः.

DESCENDED, *p. p.* अवतीर्णः -र्णा -र्णं, अवरूढः -ढा -ढं, अधोगतः -ता -तं; 'lineally descended or inherited,' वंशक्रमागतः -ता -तं or क्रमागतः, क्रमायातः -ता -तं, पितृप्राप्तः -प्ता -प्तं, अन्वयागतः -ता -तं.

DESCENDENT, *a.* अवरोही -हिणी -हि (न्), अधोगामी -मिनी -मि (न्), नीचगः -गा -गं, पातुकः -का -कं, अधःपाती -तिनी -ति (न्), नीचाभिमुखः -खा -खं.

DESCENSION, *s.* अवपातः, अधोगतिः *f.*, पातः, पतनं, अधःपतनं, अधःसरणं.

DESCENT, *s.* (Going downwards) अधोगतिः *f.*, अधोगमः -मनं, अवपातः, अवतारः, अवपतनं, अवतरणं, अवरोहः -हणं, अधोयानं.—(Hostile incursion) अभिक्रमः, अवस्कन्दः, आक्रान्तिः *f.*, प्रयाणं, अभिनियाणं. —(Transmission by succession) क्रमागमः, वंशक्रमागमः, क्रमागतत्वं, अन्वयागमः.—(Birth extraction) जन्म *n.* (न्), उत्पत्तिः *f.*, उद्भवः, सम्भवः, वंशः.—(Lineage) सन्ततिः *f.*, अन्वयः, आवलिः *f.*; 'consanguineous descent,' एकशरीरान्वयः, एकशरीरावयवत्वं.

DESCRIBABLE, *a.* वर्णनीयः -या -यं, निर्देश्यः -श्या -श्यं, निर्वचनीयः -या -यं, व्याख्येयः -या -यं, वर्णयितुं शक्यः -क्या -क्यं.

To DESCRIBE, *v. a.* वर्ण् (c. 10. वर्णयति -यितुं), अनुवर्ण्, उपवर्ण्, संवर्ण्; निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, समुद्दिश्; विवृ (c. 5. -वृणोति -वरितुं -रीतुं), कथ् (c. 10. कथयति -यितुं), सङ्कथ्; कृत् (c. 10. कीर्त्तयति -यितुं), अनुकृत्; निर्वच् (c. 2. -वक्ति -वक्तुं); व्याख्या (c. 2. -ख्याति -तुं), विब्रू (c. 2. -ब्रवीति -वक्तुं), निरूप् (c. 10. -रूपयति -यितुं).

DESCRIBED, *p. p.* वर्णितः -ता -तं, उपवर्णितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः -ष्टा -ष्टं, समुद्दिष्टः -ष्टा -ष्टं, निरुक्तः -क्ता -क्तं, व्याख्यातः -ता -तं, कथितः -ता -तं, निरूपितः -ता -तं, विवृतः -ता -तं.

DESCRIPTION, *s.* वर्णनं -ना, उपवर्णनं, विवरणं, विवृतिः *f.*, निर्देशः, समुद्देशः, निरुक्तिः *f.*, निर्वचनं, व्याख्या-ख्यानं, निरूपणं, कथनं, यथार्थकथनं.

DESCRIPTIVE, *a.* निर्देशकः -का -कं, समुद्देशकः -का -कं, वर्णनकृत् *m. f. n.*, वाचकः -का -कं, विवरणकारी -रिणी -रि (न्), यथार्थकथकः -का -कं.

To DESCRY, *v. a.* (Perceive at a distance, see) दूराद् आलोक् (c. 1. -लोकते, c. 10. -लोकयति -यितुं) or अवलोक्, दृश् (c. 1. पश्यति, द्रष्टुं), अनुदृश्, प्रदृश्, परिदृश्; ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, अभिवीक्ष्, प्रेक्ष्, वीक्ष्, निर्वर्ण् (c. 10. -वर्णयति -यितुं), आलक्ष् (c. 10. -लक्षयति -यितुं), उपलक्ष्.—(Find out, discover) ज्ञा (c. 9. जानाति, ज्ञातुं), अवगम् (c. 1. -गच्छति -गन्तुं), निरूप् (c. 10. -रूपयति -यितुं), सूच् (c. 10. सूचयति -यितुं).

DESCRY, *s.* दूराद् आलोकितं यत्किञ्चिद्, दूरादृष्टं वस्तु.

To DESECRATE, *v. a.* प्रतिष्ठालोपं कृ, संस्कारदूषणं कृ, संस्कारहीनं -नां -नं कृ, अपुण्यं -ण्यां -ण्यं कृ, अपवित्रीकृ, पुण्यत्वं लुप् (c. 6. लुम्पति, लोप्तुं or caus. लोपयति -यितुं), दुष् in caus. (दूषयति -यितुं), व्यभिचर् (c. 1. -चरति -रितुं), कलङ्क (nom. कलङ्कयति -यितुं), मलिनीकृ.

DESECRATED, *p. p.* लुप्तप्रतिष्ठः -ष्ठा -ष्ठं, भग्नसंस्कारः -रा -रं, भ्रष्टपुण्यत्वः -त्वा -त्वं.

DESECRATION, *s.* प्रतिष्ठालोपः, संस्कारदषणं, पुण्यत्वदूषणं, अपवित्रीकरणं, व्यभिचारः, कलङ्ककरणं, अपुण्यकरणं.

DESERT, *s.* (A wilderness) मरुः *m.*, मरुस्थलं -ली, मरुभूमिः *f.*, जङ्गलं, अरण्यं, वनं, ईरिणं, इरिणं, धन्वा *m.* (न्), रोषणं, विदभैः, वल्लुरं -लूरं.

Digitized by Google

DESERT, *a.* (Wild) आरण्यः -ण्यी -ण्यं -ण्यकः -का -कं, जङ्गलः -ला -लं, जाङ्गलः -ली -लं, वन्यः -न्या -न्यं, ईरिणः -णा -णं, ईरिणः -णा -णं, निर्जनः -ना -नं, निर्जलः -ला -लं, निरालयः -या -यं, शून्यः -न्या -न्यं, खिलः -ला -लं.

DESERT, *s.* (Merit or demerit) गुणागुणं, पुण्यापुण्यं, अर्हत्वं, धर्म्माधर्म्मं. —(Excellence, right to reward) गुणः, पुण्यं, श्रेयः *n.* (स्), सुकृतं, उपयोगः, उपयुक्तता, योग्यत्वं, पात्रता, कृतित्वं, उत्कर्षः, शस्यं, प्रशस्यं.

To DESERT, *v. a.* त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, सन्त्यज्; हा (c. 3. जहाति, हातुं), अपहा, प्रहा, विहा, अपाहा; रह् (c. 10. रहयति -यितुं), विरह्; उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, अतिसृज्, उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्; परिद्रु (c. 1. -हरति -द्रोतुं).

To DESERT, *v. n.* (From the army) सेनां त्यक्त्वा परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं) or पलाय् (c. 1. पलायते -यितुं) or विपलाय्.

DESERTED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, उत्सृष्टः -ष्टा -ष्टं, विसर्ज्जितः -ता -तं, हीनः -ना -नं, परिहीणः -णा -णं, वर्जितः -ता -तं, शून्यः -न्या -न्यं, उज्झितः -ता -तं, प्रोज्झितः -ता -तं, विनाकृतः -ता -तं, लुप्तः -प्ता -प्तं, अपविद्धः -द्धा -द्धं.

DESERTER, *s.* त्यागी *m.* (न्), त्यक्ता *m.* (क्तृ), सेनात्यागी *m.*, विपलायी *m.* (न्), पलायी *m.* (न्), परिवर्त्ती *m.* (न्), परिवर्त्तकः, युद्धत्यागी, युद्धपराङ्मुखः.

DESERTION, *s.* (Abandonment) त्यागः, परित्यागः, उत्त्यागः, विरहः, प्रोज्झनं, उत्सर्ज्जनं, विसर्ज्जनं, विसृष्टिः *f.*, परिवर्त्तः.—(From the army) सेनात्यागः, युद्धत्यागः, युद्धपलायनं, विपलायनं.

DESERTLESS, *a.* निर्गुणः -णा -णं, अनर्हः -र्हा -र्हं, अनुपयुक्तः -क्ता -क्तं.

To DESERVE, *v. a.* and *n.* अर्ह् (c. 1. अर्हति -ते -र्हितुं), अर्हः -र्हा -र्हं or उपयुक्तः -क्ता -क्तं or उचितः -ता -तं or योग्यः -ग्या -ग्यम् अस् or भू; 'he deserves honour,' मानम् अर्हति; 'he deserves punishment,' दण्डम् अर्हति; 'he deserves to drink soma juice,' सोमं पातुम् अर्हति; 'does he deserve so large a salary or not?' किम् उपयुक्तोऽयम् एतावद् वर्त्तनं गृह्णात्य् अनुपयुक्तो वा; 'he deserves death,' वधार्होऽस्ति, मरणोचितोऽस्ति. The future pass. part. may sometimes be used in this sense; as, 'he deserves death,' वध्योऽस्ति; 'he deserves honour,' मान्योऽस्ति, पूजनीयोऽस्ति.

DESERVEDLY, *adv.* अर्हं, उपयुक्तं, योग्यं, उचितं, अर्हत्वेन, न्यायतस्.

DESERVER, *s.* अर्हः; 'good deserver,' सत्पात्रं; 'best deserver,' अर्हत्तमः.

DESERVING, *a.* (Worthy of) अर्हः -र्हा -र्हं, उपयुक्तः -क्ता -क्तं, उचितः -ता -तं, योग्यः -ग्या -ग्यं.—(Meritorious) गुणी -णिनी -णि (न्), गुणान्वितः -ता -तं.

DESERVING, *s.* गुणः, उपयोगः, पुण्यं, अर्हत्वं, धर्म्मः, पात्रता, शस्यं.

DESICCANTS, *a.* व्रणशोषकाः *m. pl.*, क्षतशोषणार्थम् उपनाहः or उपदेहः.

To DESICCATE, *v. a.* शुष् in caus. (शोषयति -यितुं), उच्छुष्, उपशुष्, विशुष्, संशुष्.

To DESICCATE, *v. n.* शुष् (c. 4. शुष्यति, शोष्टुं), विशुष्, ओख् (c. 1. ओखति -खितुं).

DESICCATION, *s.* शोषणं, परिशोषः, उच्छोषणं, शुष्ककरणं, शुष्कत्वं.

DESICCATIVE, *a.* शोषकः -का -कं, उच्छोषणः -णी -णं, शुष्ककृत् *m. f. n.*

To DESIDERATE, *v. a.* अप्रत्यक्षं or अविषयं किञ्चिद्वस्तु इष् (c. 6. इच्छति, एषितुं) or उत्कण्ठ् (c. 1. -कण्ठते -ण्ठितुं) or अभ्याप् in des. (-ईप्सति -प्सितुं).

DESIDERATUM, *s.* अविद्यमानं किञ्चिद् अभीष्टं वस्तु, अवर्त्तमानो वाञ्छनीयविषयः.

To DESIGN, *v. a.* (Purpose, intend) कृ in des. (चिकीर्षति -र्षितुं), अभिप्रे (rt. इ with अभि, प्र; अभिप्रेति -तुं), उपलक्ष् (c. 10. -लक्षयति -यितुं); उद्दिश् (c. 6. -दिशति -देष्टुं), अभिसन्धा (c. 3. -दधाति -धातुं), मनः or मतिं or बुद्धिं कृ or प्रकृ with loc. or abl. case; as, 'he designs a crime,' मनः पापे करोति; 'he designs the death of the king,' राज्ञो विनाशाय मतिं करोति.—(Plan, meditate) चिन्त् (c. 10. चिन्तयति -यितुं), प्रचिन्त्, मन्त्र् (c. 10. मन्त्रयति -यितुं), घट् (c. 1. घटते -टितुं), कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, अनुसन्धा (c. 3. -दधाति -धातुं), व्यवसो (c. 4. -स्यति -सातुं).—(Devote to, apply to a particular purpose) प्रयुज् (c. 7. -युंक्ते -योक्तुं), उपयुज्, विनियुज्; as, 'to religious purposes,' धर्म्मार्थम् उपयुज्. —(Draw) आलिख् (c. 6. -लिखति -लेखितुं), सूत्रपातं कृ, संस्कारं कृ, संस्कृ.

DESIGN, *s.* (Intention, purpose) चिकीर्षा -र्षितं, अभिप्रायः, अभिप्रेतं, आशयः, अर्थः, आकूतं, तात्पर्य्यं, आकांक्षा, छन्दः, छन्दः *n.* (स्), सङ्कल्पः, उद्देशः, मतिः *f.*, मतं, कार्य्यं, उपयोगः, प्रयोजनं, उपलक्षितं, अभिसन्धिः *m.*—(Plan, scheme) चिन्ता, उपायः, व्यवसितं, व्यवसायः, प्रक्रान्तं, अनुसन्धानं, कल्पना, घटनं, विधानं.—(Drawing, impression) संस्कारः, आलेख्यं, सूत्रं, सूत्रपातः; 'with the design of,' अर्थं; 'one who has not effected his design,' अकृतार्थः.

To DESIGNATE, *v. a.* (Mark out, indicate) चिह्न् (c. 10. चिह्नयति -यितुं), लक्ष् (c. 10. लक्षयति -यितुं), उपलक्ष्, विशिष् in caus. (-शेषयति -यितुं), प्रदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, सूच् (c. 10. सूचयति -यितुं).—(Appoint) नियुज् (c. 10. -योजयति -यितुं), परिकॢप् (c. 10. -कल्पयति -यितुं).

DESIGNATED, *p. p.* चिह्नितः -ता -तं, लक्षितः -ता -तं, विशेषितः -ता -तं.

DESIGNATION, *s.* लक्षणं, उपलक्षणं, संलक्षणं, चिह्नं, विशेषणं, संज्ञा, अभिज्ञानं, अभिधानं, आख्या, निर्देशः, सूचनं.

DESIGNED, *p. p.* चिकीर्षितः -ता -तं, अभिप्रेतः -ता -तं, उपलक्षितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, अर्थवान् -वती -वत् (त्), व्यवसितः -ता -तं, घटितः -ता -तं.

DESIGNEDLY, *adv.* इच्छातस्, मन्त्रतस्, कामतस्, प्रकामं, यथाकामं, मतिपूर्व्वकं, बुद्धिपूर्व्वं, बुद्धिपुरःसरं, मनोपूर्व्वकं, मत्या, बुद्ध्या, तात्पर्य्यतस्, यथाकल्पं.

DESIGNER, *s.* (Contriver) चिन्तकः, उपायचिन्तकः, परिकल्पकः, व्यवसायी *m.* (न्).—(Drawer) आलेखकः, संस्कारलेखकः, सूत्रपातकः.

DESIGNING, *a.* विदग्धः -ग्धा -ग्धं, छली -लिनी -लि (न्), मायी -यिनी -यि (न्), कापटिकः -की -कं, वञ्चनशीलः -ली -लं, प्रतारकः -का -कं, सव्याजः -जा -जं.

DESIGNLESS, *a.* अभिप्रायहीनः -ना -नं, निरर्थकः -का -कं, निष्प्रयोजनः -ना -नं.

DESIGNMENT, *s.* अभिप्रायः, चिकीर्षा, आशयः, अर्थः, अर्थवत्ता, अर्थत्वं, अभिसन्धिः *m.*

DESIRABLE, *a.* स्पृहणीयः -या -यं, स्पृह्यः -ह्या -ह्यं, अभिलषणीयः -या -यं, वाञ्छनीयः -या -यं, कमनीयः -या -यं, काम्यः -म्या -म्यं, लोभ्यः -भ्या -भ्यं, आकांक्षणीयः -या -यं, एषणीयः -या -यं, प्रार्थनीयः -या -यं, अपेक्षणीयः -या -यं, गम्यः -म्या -म्यं; 'a desirable gift,' काम्यदानं.

DESIRABLENESS, *s.* स्पृहणीयता, वाञ्छनीयत्वं, कमनीयता, काम्यत्वं, इष्टत्वं.

DESIRE, *s.* इच्छा, अभिलाषः, अभिलषितं, स्पृहा, वाञ्छा, ईहा, कामः, कामना, कांक्षा, आकांक्षा, अभिकांक्षा, मनोरथः, अभिमतं, समीहितं, लोभः, आशा, तृषा, तृष्णा, इच्छत्वं, इष्टिः *f.*, इष्टं, अभीष्टं, छन्दः *n.* (स्), छन्दं, रुचिः *f.*, अभिरुचिः *f.*, मनस्कामना, मनोभिमतं, अभीप्सा, लिप्सा, औत्सुक्यं, औत्कण्ठ्यं, वशः, लालसा, कौतूहलं, कान्तिः *f.*, वसा; 'one's desire,' स्वेच्छा; 'according to one's desire,' स्वेच्छातस्, स्वेच्छया, स्ववाञ्छया, स्वरुच्या, यथेष्टं, यथाभिमतं, स्वच्छन्दं. OBS. The noun formed from the desid. base often expresses 'desire'; as, 'desire to drink,' पिपासा; 'desire to burn,' दिधक्षा.

Digitized by Google

To DESIRE, *v. a.* इष् (c. 6. इच्छति, एषितुं), अभिलष् (c. 1. -लषति, c. 4. -लष्यति -लषितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, संवाञ्छ्; कांक्ष् (c. 1. कांक्षति -क्षितुं), आकांक्ष्, अनुकांक्ष्, अभिकांक्ष्; स्पृह् (c. 10. स्पृहयति -यितुं), काम् (c. 10. कामयते -यितुं), ईह् (c. 1. ईहते -हितुं), समीह्, लुभ् (c. 4. लुभ्यति, लोभुं), अभिरुच् in caus. (-रोचयति -यितुं), आप् in des. (ईप्सति -प्तितुं), अभ्याप्, पर्याप्; लभ् in des. (लिप्सते -प्सितुं), अभिलभ्; आशंस् (c. 1. -शंसते -सितुं), गृध् (c. 4. गृध्यति, गर्धितुं), वश् (c. 2. वष्टि, वशितुं).—(Ask, beg for) अर्थ् (c. 10. अर्थयते -ति -यितुं), प्रार्थ्, याच् (c. 1. याचति -चितुं), वृ (c. 9. वृणीते, वरितुं -रीतुं) with 2 acc., निविद् in caus. (-वेदयति -यितुं).

DESIRED, *p. p.* इष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, अभिलषितः -ता -तं, वाञ्छितः -ता -तं, कांक्षितः -ता -तं, आकांक्षितः -ता -तं, अभिकांक्षितः -ता -तं, अभिमतः -ता -तं, ईहितः -ता -तं, समीहितः -ता -तं, ईप्सितः -ता -तं, अभीप्सितः -ता -तं, लिप्सितः -ता -तं, सङ्कल्पितः -ता -तं, हृद्यः -द्या -द्यं.

DESIROUS, *a.* इच्छुः -च्छुः -च्छु, इच्छुकः -का -कं, इच्छकः -का -कं, इच्छावान् -वती -वत् (त्), इच्छान्वितः -ता -तं, अभिलाषी -षिणी -षि (न्) -षुकः -का -कं, वाञ्छी -ञ्छिनी -ञ्छि (न्), आकांक्षी -क्षिणी -क्षि (न्) or अभिकांक्षी, एषी -षिणी -षि (न्), अर्थी -र्थिनी -र्थि (न्), कामी -मिनी -मि (न्), कामुकः -का -कं, कामवान् -वती -वत् (त्), कामयानः -ना -नं, लोभी -भिनी -भि (न्), लुभः -भा -भं, स्पृहयालुः -लुः -लु, जातस्पृहः -हा -हं, सस्पृहः -हा -हं, साकांक्षः -क्षा -क्षं, ईप्सुः -प्सुः -प्सु or अभीप्सुः or प्रेप्सुः or परिप्रेप्सुः, इष्टी -ष्टिनी -ष्टि (न्), जिघृक्षुः -क्षुः -क्षु, आशंसुः -सुः -सु, आशायुक्तः -क्ता -क्तं, लालसी -सिनी -सि (न्), तृष्णाकः -का -कं, कक्षः -क्षा -क्षं. 'Desirous' is sometimes expressed by काम affixed to the infinitive, the final of which is rejected; as, 'desirous to do,' कर्तुकामः -मा -मं; 'desirous to go,' गन्तुकामः -मा -मं; or by the adj. formed from the desid. base; as, 'desirous of drinking,' पिपासुः -सुः -सु; 'desirous of taking,' आदित्सुः -त्सुः -त्सु.

To DESIST, *v. n.* विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्तते -र्त्तितुं), निवृत्, विनिवृत्; शम् (c. 4. शाम्यति, शमितुं), विगम् (c. 1. -गच्छति -गन्तुं), विच्छिद् in pass. (-छिद्यते), विश्रम् (c. 4. -श्राम्यति -श्रमितुं), अपया (c. 2. -याति -तुं); 'he desists from wickedness,' पापाद् विरमति or निवर्त्तते.

DESISTANCE, *s.* विरतिः *f.*, विरामः, निवृत्तिः *f.*, निवर्त्तनं, निर्वृत्तिः *f.*, उपशमः.

DESISTED, *p. p.* निवृत्तः -त्ता -त्तं, विरतः -ता -तं, उपरतः -ता -तं, शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, विगतः -ता -तं, विच्छिन्नः -न्ना -न्नं.

DESK, *s.* लिखनफलकं, लिपिफलकं, लिपिसञ्चाधारः; लेखसाधनाधारः.

DESOLATE, *a.* (Solitary, uninhabited) शून्यः -न्या -न्यं, शून्याकारः -रा -रं, विविक्तः -क्ता -क्तं, निर्जनः -ना -नं, निर्मनुष्यः -ष्या -ष्यं, पुरुषवर्जितः -ता -तं, अप्रजः -जा -जं, विलोकः -की -कं, निःशलाकः -का -कं, निरालयः -या -यं, वसतिहीनः -ना -नं.—(Laid waste) उच्छिन्नः -न्ना -न्नं, प्रबाधितः -ता -तं, उपपीडितः -ता -तं.

To DESOLATE, *v. a.* उपपीड् (c. 10. -पीडयति -यितुं), प्रबाध् (c. 1. -बाधते -धितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), शून्यीकृ, निर्जनीकृ, निर्दह् (c. 1. -दहति -दग्धुं), वसती नश् in caus. (नाशयति -यितुं).

DESOLATION, *s.* (Destruction of inhabitants) शून्यीकरणं, निर्जनीकरणं, वसतिनाशः, उच्छेदः, उपपीडनं.—(State of destitution) शून्यता, निर्जनत्वं, विविक्तता, रहितत्वं, विषादः, विषन्नता.

DESPAIR, *s.* निराशा, नैराश्यं, आशाहीनता, दौर्मनस्यं, वैक्लव्यं, विषादः; 'in despair,' त्यक्ताशः, आशाहीनः, गताशः.

To DESPAIR, *v. n.* आशां हा (c. 3. जहाति, हातुं) or त्यज्, आशया हा in pass. (हीयते), नैराश्यम् उपगम् (c. 1. -गच्छति -गन्तुं) or गम्; निराशीभू, सङ्कुच् (c. 6. -कुटति -टितुं).

DESPAIRINGLY, *adv.* आशां विना, आशया विना, सनैराश्यं, नैराश्यात्.

To DESPATCH, *v. a.* (Send away hastily) सत्वरं प्रस्था in caus. (-स्थापयति -यितुं) or प्रेर् (c. 10. -ईरयति -यितुं) or प्रेष् in caus. (प्रेषयति -यितुं, rt. इष्), सम्प्रेष्, परिप्रेष्, or प्रहि (c. 5. -हिणोति -हेतुं) or प्रया in caus. (-यापयति -यितुं) or चुद् (c. 10. चोदयति -यितुं), or प्रणुद् (c. 6. -णुदति -णोत्तुं).—(Hasten, perform quickly) त्वर् in caus. (त्वरयति -यितुं, सन्त्वर्; त्वरितं कृ or सम्पद् in caus. (-पादयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं).—(Kill) व्यापद् in caus. (-पादयति -यितुं), लोकान्तरं प्राप् in caus. (-आपयति -यितुं) or प्रेर्.

DESPATCH, *s.* (Hasty execution) क्षिप्रकारित्वं, शीघ्रनिर्वाहः, त्वरा, तूर्णिः *f.*, आवेगः, अदीर्घसूत्रता.—(Official message) वाचिकं, वाचिकपत्रं, राजकीयपत्रं, राजलेखः -लेख्यं.—(Hasty messenger) धावकः, वेगी *m.* (न्), प्रजवी *m.* (न्), लेखहारी *m.* (न्), वार्त्ताहरः, दूतः.

DESPATCHED, *p. p.* (Sent) प्रस्थापितः -ता -तं, प्रेरितः -ता -तं, प्रेषितः -ता -तं, प्रहितः -ता -तं, प्रयापितः -ता -तं, दूतः -ता -तं, प्रतिसृष्टः -ष्टा -ष्टं, नुन्नः -न्ना -न्नं, प्रणुन्नः -न्ना -न्नं, गमितः -ता -तं, प्रतिक्षिप्तः -प्ता -प्तं.

DESPATCHFUL, *a.* शीघ्रकारी -रिणी -रि (न्) or क्षिप्रकारी, अविलम्बी -म्बिनी -म्बि (न्), अदीर्घसूत्रः -त्रा -त्रं, त्वरायुक्तः -क्ता -क्तं, त्वराशीलः -ला -लं.

DESPERADO, *s.* साहसी *m.* (न्), साहसिकः, अत्याहितकर्म्मा *m.* (न्), आततायी *m.* (न्).

DESPERATE, *a.* (Without hope) निराशः -शा -शं, आशाहीनः -ना -नं, आशारहितः -ता -तं, गताशः -शा -शं, त्यक्ताशः -शा -शं, निःप्रत्याशः -शा -शं.—(Daring) साहसिकः -की -कं -सी -सिनी -सि (न्).—(Fearless) निर्भयः -या -यं, अकुतोभयः -या -यं.—(Irretrievable) निरूपायी -यिनी -यि (न्), अप्रतिकारः -रा -रं or अशक्यप्रतिकारः.—(Furious) उग्रः -ग्रा -ग्रं, संरब्धः -ब्धा -ब्धं.—(Excessive) अत्यन्तः -न्ता -न्तं, अति or सु prefixed; 'a desperate fool,' अतिमूढः; 'a desperate act,' अत्याहितं, साहसकल्पः, आततायिता.

DESPERATELY, *adv.* (Furiously) उन्मत्तवत्, साहसेन -सात्, उग्रं, संरब्धं.—(In a great degree) सु or अति prefixed; अत्यन्तं, भृशं, तीव्रं.

DESPERATENESS, *s.* (Fury, daringness) उन्मादः, संरम्भः, उग्रत्वं, साहसिकत्वं.

DESPERATION, *s.* नैराश्यं, आशाहीनता, आशाराहित्यं, निराशा.

DESPICABLE, *a.* अवमाननीयः -या -यं, अवमान्यः -न्या -न्यं or अपमान्यः, अवमन्तव्यः -व्या -व्यं, अवज्ञेयः -या -यं, अवज्ञातव्यः -व्या -व्यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, गर्हितः -ता -तं, अवगर्हितः -ता -तं, अतिगर्हितः -ता -तं, निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, निन्दार्हः -र्हा -र्हं, दूष्यः -ष्या -ष्यं, तुच्छः -च्छा -च्छं, कुत्सितः -ता -तं, क्षुद्रः -द्रा -द्रं, अपकृष्टः -ष्टा -ष्टं.

DESPICABLENESS, *s.* अवमान्यता, गर्ह्यत्वं, निन्द्यता, तुच्छत्वं, दूष्यता.

DESPICABLY, *adv.* गर्हणीयं, गर्हितं, कुत्सितं, अपकृष्टं, तुच्छं.

To DESPISE, *v. a.* अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), तृणाय मन्, अभ्यवमन्, परिमन्, गर्ह् (c. 1. गर्हते -र्हितुं), विगर्ह्, कुत्स् (c. 10. कुत्सयति -यितुं), निन्द् (c. 1. निन्दति -न्दितुं), परिभू (c. 1. -भवति -वितुं), अवधीर् (c. 10. अवधीरयति -यितुं), गुप् in des. (जुगुप्सते -प्सितुं), उपेक्ष् (c. 1. -ईक्षते -क्षितुं), अवज्ञे (c. 1. -ध्यायति -ध्यातुं), बाध् in des. (बीभत्सते -त्सितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं),

Digitized by Google

कदर्थ् (c. 10. -अर्थयते -यितुं), कदर्थीकृ, तुच्छीकृ, लघूकृ.

Despised, *p. p.* अवमतः -ता -तं, अवमानितः -ता -तं, विमानितः -ता -तं, अपमानितः -ता -तं, अवज्ञातः -ता -तं, परिभूतः -ता -तं, गर्हितः -ता -तं, विगर्हितः -ता -तं, अवधीरितः -ता -तं, कदर्थितः -ता -तं, अवध्यातः -ता -तं, निन्दितः -ता -तं, उपेक्षितः -ता -तं, अवगणितः -ता -तं.

Despiser, *s.* अवमन्ता *m.* (न्तृ), अवज्ञाता *m.* (तृ), अवमानकर्त्ता *m.* (र्तृ), निन्दकः.

Despite, *s.* (Malice) द्वेषः, द्रोहः, मात्सर्य्यं, ईर्ष्या, अभ्यसूया, दुर्बुद्धिः *f.*, नृशंस्यं, दौर्जन्यं, दंशः.—(Opposition) प्रतिरोधः, विरोधः, प्रतियोगः, प्रतिकारः, प्रतिकूलता; 'in despite,' अनिच्छया, विरुद्धं, प्रातिकूल्येन, or expressed by the gen. c. of the pres. part. of the root दृश् 'to see,' or मिष्; 'in despite of thee,' पश्यतस् तव; 'in despite of the princes,' मिषतां पार्थिवानां.

To despite, *v. a.* कुप् in caus. (कोपयति -यितुं), रुष् in caus. (रोषयति -यितुं), तप् in caus. (तापयति -यितुं), सन्तप्; क्लिश् (c. 9. क्लिश्नाति, क्लेष्टुं), व्यथ् in caus. (व्यथयति -यितुं), दुःख् (c. 10. दुःखयति -यितुं).

Despiteful, *a.* द्रोही -हिणी -हि (न्), द्रोहबुद्धिः -द्धिः -द्धि or दुर्बुद्धिः, ईर्ष्यी -र्ष्यिणी -र्ष्यि (न्), सासूयः -या -यं, विषहृदयः -या -यं, नृशंसः -सा -सं, मात्सरः -रा -रं, द्वेषी -षिणी -षि (न्), अहितेच्छुः -च्छुः -च्छु, हिंसाशीलः -ला -लं.

Despitefully, *adv.* सद्रोहं, सद्वेषं, हिंसापूर्व्वं, नृशंसं, साभ्यसूयं.

Despitefulness, *s.* द्रोहः, द्वेषः, मात्सर्य्यं, नृशंस्यं, दंशः, दौर्जन्यं.

To despoil, *v. a.* हृ (c. 1. हरति, हर्त्तुं), अपहृ, विमुच् (c. 6. -मुञ्चति -मोक्तुं), वियुज् in caus. (-योजयति -यितुं), विप्रयुज् with inst. c.; 'despoil of leaves,' निष्पत्रीकृ.

Despoiled, *p. p.* हृतः -ता -तं, अपहृतः -ता -तं, वियुक्तः -क्ता -क्तं, वियोजितः -ता -तं; 'despoiled of all possessions,' हृतसर्व्वस्वः -स्वा -स्वं.

Despoiler, *s.* हर्त्ता *m.* (र्त्तृ), हारकः, अपहारकः, अपहारकृत्, लुण्टाकः.

Despoliation, *s.* हरणं, अपहारणं, अभिहारः, अभ्याहारः, अभिग्रहणं.

To despond, *v. n.* विषद् (c. 1. -षीदति -षत्तुं), अवसद्; निर्वेदं or विषादं or नैराश्यम् उपगम् (c. 1. -गच्छति -गन्तुं) or गम्; आशां हा (c. 3. जहाति, हातुं) or त्यज् (c. 1. त्यजति, त्यक्तुं), निर्विण्णीभू, निर्विद् (c. 4. -विद्यते -वेत्तुं), सङ्कुच् (c. 6. -कुटति -टितुं).

Despondency, *s.* विषादः, निर्वेदः, विषण्णता, निर्विण्णता, नैराश्यं, निराशा, अवसन्नता, उद्वेगः, दौर्मनस्यं, ग्लानिः *f.*, क्लान्तिः *f.*

Despondent, *a.* विषण्णः -र्ण्णा -र्ण्णं, विषादी -दिनी -दि (न्), निर्विण्णः -र्ण्णा -र्ण्णं, निराशः -शा -शं, आशाहीनः -ना -नं, त्यक्ताशः -शा -शं, अवसन्नः -न्ना -न्नं, उद्विग्नमनाः -नाः -नः (स्) or दुर्मनाः or अन्तर्मनाः, ग्लानः -ना -नं.

Despondingly, *adv.* सनिर्वेदं, सविषादं, निर्वेदात्, सनैराश्यं.

To desponsate, *v. a.* वाग्दत्तां कृ, वाग्दानेन विवाहार्थं प्रतिज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), कन्यां प्रदा, प्रतिज्ञाविवाहितां कृ.

Desponsation, *s.* वाग्दानं, कन्याप्रदानं, विवाहार्थं प्रतिज्ञानं.

Despot, *s.* सम्राज् *m.* (ज्), अधिराजः, चक्रवर्त्ती *m.* (न्), सर्व्वेश्वरः, राजाधिराजः, एकराजः, स्वाधीनराजः, स्वयम्प्रभुः.

Despotic, despotical, *a.* अनधीनः -ना -नं, अनायत्तः -त्ता -त्तं, अधिराजकः -का -कं, स्वयम्प्रभुः -भुः -भु, साम्राजिकः -की -कं, स्वयम्प्रभुत्वकारी -रिणी -रि (न्).

Despotically, *adv.* अधिराजवत्, अनायत्तं, स्वेच्छातस्, स्वकामतस्, स्वच्छन्दं.

Despotism, *s.* साम्राज्यं, अधिराज्यं, एकपत्यं, स्वेच्छाप्रभुत्वं, अनधीनत्वं.

To despumate, *v. n.* फेन (nom. फेनायते), उत्सेचनं कृ, मण्ड (nom. मण्डायते).

Despumation, *s.* फेनोत्सेचनं, मण्डोत्सेचनं, उत्सेचनं, उत्पीडः.

Desquamation, *s.* त्वक्परिपुटनं, अस्थिपरिपुटनं, अभ्यस्थिपरिपुटनं.

Dessert, *s.* भोजनान्ते परिवेशितं फलमोदकादिखाद्यं, फलाहारः.

Destination, *s.* (Purpose for which any thing is intended) अर्थः, अर्थत्वं, प्रयोगः, उपयोगः, प्रयोजनं, उद्देशः, आशयः, अभिप्रायः, तात्पर्य्यं.—(Place of destination) अग्रभूमिः *f.*, अग्रस्थानं, अग्रं, निरूपितस्थानं.

To destine or destinate, *v. a.* निरूप् (c. 10. -रूपयति -यितुं), प्रकॢप् (c. 10. -कल्पयति -यितुं), परिकॢप्, निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, प्रदिश्, समादिश्; नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), प्रयुज्, उपयुज्, विनियुज्, प्रस्था in caus. (-स्थापयति -यितुं), अभिसन्धा (c. 3. -दधाति -धातुं).

Destined, *p. p.* निरूपितः -ता -तं, परिकल्पितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

Destiny, *s.* दैवं, भाग्यं, भागधेयं, कृतान्तः, विधिः *m.*, विधाता *m.* (तृ), भवितव्यता, दैविकं, अदृष्टं, नियतिः *f.*, कालनियोगः, कालधर्म्मः, दिष्टं, प्राक्तनं.

Destitute, *a.* (Poor, abject, friendless) निर्धनः -ना -नं, अर्थहीनः -ना -नं, निष्किञ्चनः -ना -नं, अकिञ्चनः -ना -नं, दुर्गतः -ता -तं, निःस्वः -स्वा -स्वं, निराश्रयः -या -यं, अपाश्रयः -या -यं, अशरणः -णा -णं, बन्धुहीनः -ना -नं.—(Deprived of, in want of) हीनः -ना -नं, विहीनः -ना -नं, परिहीणः -णा -णं, रहितः -ता -तं, विरहितः -ता -तं, वर्जितः -ता -तं, विवर्जितः -ता -तं, शून्यः -न्या -न्यं, विनाकृतः -ता -तं, वियुक्तः -क्ता -क्तं, लुप्तः -प्ता -प्तं, हृतः -ता -तं, अपेतः -ता -तं; 'destitute of fruit,' फलहीनः -ना -नं or फलरहितः -ता -तं or फलापेतः -ता -तं or हृतफलः -ला -लं; 'destitute of means,' असाधनः -ना -नं.

Destitution, *s.* (State of being deprived) हीनत्वं, रहितत्वं, शून्यता.—(Absence of a thing) अभावः, असम्भवः, विरहः.—(Want of money, &c., poverty) धनाभावः, वस्त्रैनाभावः, निष्किञ्चनत्वं, अकिञ्चनं, दारिद्र्यं, बन्धुहीनता, असहायता, अभूमिः *f.*

To destroy, *v. a.* (Put an end to, ruin) नश् in caus. (नाशयति -यितुं), विनश्, प्रणश्; साध् in caus. (साधयति -यितुं), संसाध्; क्षि (c. 5. क्षिणोति, क्षेतुं or caus. क्षपयति, क्षपयति -यितुं), सद् in caus. (सादयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं or caus. लोपयति -यितुं), विलुप्; ध्वंस् in caus. (ध्वंसयति -यितुं), विध्वंस्, प्रध्वंस्; उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), निर्दह् (c. 1. -दहति -दग्धुं), ग्रस् (c. 1. ग्रसते -सितुं).—(Kill) हन् (c. 2. हन्ति -न्तुं or caus. घातयति -यितुं), व्यापद् in caus. (-पादयति -यितुं), मृ in caus. (मारयति -यितुं), सूद् (c. 10. सूदयति -यितुं), अभिसूद्, निसूद्, विनिसूद्, सन्निसूद्; शद् in caus. (शातयति -यितुं), प्रमी in caus. (-मापयति -यितुं), क्षण् (c. 8. क्षणोति -णितुं).

Destroyed, *p. p.* नष्टः -ष्टा -ष्टं, नाशितः -ता -तं, विनाशितः -ता -तं, प्रणष्टः -ष्टा -ष्टं, सादितः -ता -तं, सूदितः -ता -तं, हतः -ता -तं, घातितः -ता -तं, ध्वंसितः -ता -तं, उच्छिन्नः -न्ना -न्नं, भग्नः -ग्ना -ग्नं, व्यापादितः -ता -तं.

Destroyer, *s.* विनाशकः, नाशी *m.* (न्), नाशकारी *m.* (न्), विनाशकारी, हन्ता *m.* (न्तृ), निहन्ता, घाती *m.* (न्), क्षयकरः, अन्तकः, अन्तकृत्, ध्वंसकः, ध्वंसकारी *m.* (न्), प्रलयकर्त्ता *m.* (र्त्तृ), सूदनः, अपहः; 'destroying angel,' कृतान्तः.

Destructible, *a.* नाशनीयः -या -यं, नाश्यः -श्या -श्यं, विनश्वरः -रा -रं, ध्वंसनीयः -या -यं, अवसेयः -या -यं, क्षयी -यिणी -यि (न्).

Destruction, *s.* नाशः, विनाशः, विनष्टिः *f.*, प्रणाशः, क्षयः, ध्वंसः, प्रध्वंसः, सादनं, सूदनं, प्रलयः, संहारः, अपायः, अन्वयः, विलोपनं, लोपः, समुच्छेदः, उद्दलनं, उत्पाटनं, क्षेप्यं.—(Murder) घातः -तनं, मारणं, वधः, निहननं, प्रमापणं.—(Of the world) प्रलयः, कल्पान्तः, जहानकः, जिहानकः, संवर्त्तः, क्षयः.

Digitized by Google

DESTRUCTIVE, *a.* नाशी -शिनी -शि (न्) or प्रणाशी, विनाशकः -का -कं, क्षयकरः -री -रं, घाती -तिनी -ति (न्) or विघाती, घातुकः -का -कं, ध्वंसी -सिनी -सि (न्) or परिध्वंसी, जनकरः -री -रं, सूदनः -नी -नं, प्रमापी -पिणी -पि (न्), आत्ययिकः -की -कं, निधनकारी -रिणी -रि(न्), नाश्यः -श्या -श्यं, प्राणहरः -रा -रं, अपकारकः -का -कं, पांसनः -ना -नं, अभिमर्शनः -ना -नं, क्रूरः -रा -रं, अपहः -हा -हं or हः हा हं or घ्नः घ्ना घ्नं in comp.

DESTRUCTIVELY, *adv.* सनाशं, विनाशेन, विनाशकप्रकारेण, आत्ययिकं.

DESTRUCTIVENESS, *s.* नाशकत्वं, नाशित्वं, घातुकत्वं, अपकारकता.

DESUETUDE, *s.* विरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, निवर्तनं, विच्छेदः.

DESULTORY, *a.* चञ्चलः -ला -लं, अस्थिरः -रा -रं, लोलः -ला -लं, तरलः -ला -लं, चपलः -ला -लं, सङ्कुसुकः -का -कं, अधीरः -रा -रं, उच्छृङ्खलः -ला -लं.

To DETACH, *v. a.* (Separate) भिद् (c. 7. भिनत्ति, भेत्तुं), विभिद्, वियुज् (c. 7. -युनक्ति -योक्तुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अवच्छिद्, विश्लिष् in caus. (-श्लेषयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), पृथक्कृ.—(Send out a party from the main army) सर्वसैन्यमध्यात् कतिपयसैन्यान् इमरकरणार्थं प्रस्था in caus. (-स्थापयति -यितुं).

DETACHED, *p. p.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, विनियुक्तः -क्ता -क्तं, भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, विच्छिन्नः -न्ना -न्नं, अवच्छिन्नः -न्ना -न्नं, विश्लिष्टः -ष्टा -ष्टं, असंलग्नः -ग्ना -ग्नं, असंसक्तः -क्ता -क्तं, असक्तः -क्ता -क्तं, व्यासक्तः -क्ता -क्तं, गतसङ्गः -ङ्गा -ङ्गं, निर्युक्तिकः -का -कं.

DETACHMENT, *s.* (Act of detaching) वियोगः, विप्रयोगः, विभेदः, विच्छेदः, अवच्छेदः, विश्लेषः, व्यासङ्गः, अनभिष्वङ्गः.—(Body of troops sent out for petty warfare) इमरकरणार्थं प्रस्थापितः सैन्यगुल्मः, सैन्यदलं.

DETAIL, *s.* विवरणं, विस्तारः, विस्तरः, वाग्विस्तारः, उपवर्णः -र्णनं, वृत्तान्तविवरणं, सर्ववृत्तान्तव्याख्या; 'in detail,' विस्तरेण, विस्तरशस्, सुविस्तरं, उपवर्णेन, विभागशस्.

To DETAIL, *v. a.* सुविस्तरेण कथ् (c. 10. कथयति -यितुं) or आख्या (c. 2. -ख्याति -तुं), सर्ववृत्तान्तं विवृ (c. 5. -वृणोति -वरितुं -रीतुं) or व्याख्या; उपवर्ण् (c. 10. -वर्णयति -यितुं), वृत्तान्तविवरणं कृ.

DETAILED, *p. p.* and *a.* उपवर्णितः -ता -तं, सविस्तरः -रा -रं, विस्तीर्णः -र्णा -र्णं.

To DETAIN, *v. a.* (Keep what belongs to another) परद्रव्यं धृ (c. 1. धरति, धर्तुं or caus. धारयति -यितुं) or सन्धृ or परिभुज् (c. 7. -भुंक्ते -भोक्तुं).—(Keep back, withhold) निवृ in caus. (-वारयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विधृ in caus., उपसंहृ (c. 1. -हरति -हर्तुं) संहृ.—(Restrain from departure) धृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं) अवरुध्.—(Hold in confinement) कारायां निरुध् or आसिध् (c. 1. -सेधति -सेद्धुं) or बन्ध् (c. 9. बध्नाति, बन्धुं).

DETAINED, *p. p.* धृतः -ता -तं, निरुद्धः -द्धा -द्धं, निवारितः -ता -तं.

DETAINER, *s.* धारकः, धर्त्ता *m.* (र्तृ), परिभोक्ता *m.* (क्तृ), निरोधकः.

To DETECT, *v. a.* ज्ञा (c. 9. जानाति, ज्ञातुं), विज्ञा, परिज्ञा, अभिज्ञा, निरूप् (c. 10. -रूपयति -यितुं), निर्णी (c. 1. -णयति -णेतुं), उपलभ् (c. 1. -लभते -लब्धुं), अवगम् (c. 1. -गच्छति -गन्तुं), अधिगम्, अध्यागम्, धृ (c. 1. धरति, धर्तुं), आसद् (c. 10. -सादयति -यितुं), प्रोत्सद्, अनुसन्धा (c. 3. -दधाति -धातुं), व्यञ्ज् in caus. (-अञ्जयति -यितुं), व्यक्तीकृ, विवृ (c. 5. -वृणोति -वरितुं -रीतुं).

DETECTED, *p. p.* ज्ञातः -ता -तं, विज्ञातः -ता -तं, अभिज्ञातः -ता -तं, अवगतः -ता -तं, निरूपितः -ता -तं, धृतः -ता -तं, निर्णीतः -ता -तं, व्यञ्जितः -ता -तं, व्यक्तीकृतः -ता -तं; 'in a crime,' दृष्टदोषः -षा -षं.

DETECTION, *s.* ज्ञानं, परिज्ञानं, विज्ञानं, निरूपणं, निर्णयः, धरणं, अवगमः, अनुसन्धानं, व्यक्तीकरणं, विवृतिः *f.*

DETENTION, *s.* धरणं, धारणं, सन्धारणं, निग्रहः, निवारणं, संहरणं, संरोधः, अमुक्तिः *f.*, अमोक्षः.—(Confinement) रोधः, निरोधः -धनं, आसेधः, स्थानासेधः, सम्प्रतिरोधकः.—(Forcible detention of a debtor) बलात्कारः.

To DETER, *v. a.* भयहेतुं दर्शयित्वा निवृत् in caus. (-वर्तयति -यितुं) or निर्वृत् in caus., or विरम् in caus. (-रमयति -यितुं) or निवृ in caus. (-वारयति -यितुं), विभी in caus. (-भाययति -यितुं), अवभर्त्स् in caus. (-भर्त्सयति -ते -यितुं).

To DETERGE, *v. a.* मलम् अपमृज् (c. 1. -मार्ष्टि, c. 2. -मार्ष्टि -ष्टुं), परिमृज्, परिष्कृ.

DETERGENT, *a.* परिमार्ज्जकः -का -कं, परिमार्ष्टृकः -क्त्री -क्तृ, शोधकः -का -कं.

To DETERIORATE, *v. n.* क्षि in pass. (क्षीयते), ह्रस् (c. 1. ह्रसते -सितुं), दुष् (c. 4. दुष्यति, दोष्टुं), भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), विकृतीभू, अन्यथाभू, विकलीभू.

To DETERIORATE, *v. a.* दुष् in caus. (दूषयति -यितुं), किकलीकृ, विकृ, अपकृष् (c. 1. -कर्षति -क्रष्टुं), ह्रस् in caus. (ह्रासयति -यितुं).

DETERIORATED, *p. p.* क्षीणः -णा -णं, परिभ्रष्टः -ष्टा -ष्टं, विकलः -ला -लं.

DETERIORATION, *s.* (Growing worse) विकारः, विकृतिः *f.*, ह्रासः, अपचयः, क्षयः, क्षीणता, भ्रष्टता, दुष्टता, अधोगतिः *f.*, अन्यथाभावः.—(Making worse) अपकर्षः -र्षणं, विकलीकरणं.

DETERMENT, *s.* निवर्तनं, निवृत्तिः *f.*, उद्योगभङ्गः, उद्यमव्याघातः, विघ्नः.

DETERMINABLE, *a.* निर्णेयः -या -यं, विवेचनीयः -या -यं, निर्धारणीयः -या -यं, निर्धार्यः -र्य्या -र्य्यं, अवधारणीयः -या -यं, अवधार्यः -र्य्या -र्य्यं.

DETERMINATE, *a.* (Settled, definite) निश्चितः -ता -तं, निर्णीतः -ता -तं, नियतः -ता -तं, निर्धारितः -ता -तं, सिद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं, निर्दिष्टः -ष्टा -ष्टं, व्यवस्थापितः -ता -तं, व्यवस्थितः -ता -तं.—(Decisive) निश्चायकः -का -कं, निर्णायकः -का -कं.—(Resolved) व्यवसितः -ता -तं, कृतनिश्चयः -या -यं.

DETERMINATELY, *adv.* निश्चितं, सनिश्चयं, सनिर्णेयं, निर्णयपूर्वं, सङ्कल्पपूर्वं.

DETERMINATION, *s.* निश्चयः, निर्णेयः, सङ्कल्पः, व्यवसायः, कल्पः, सम्प्रधारणा, निर्धारणं, अवधारणं, सिद्धिः *f.*, निष्पत्तिः *f.*, व्यवस्थितिः *f.*, विचारः, विवेचना; 'firm determination,' दृढनिश्चयः.—(Persevering direction to an end) अभिनिवेशः, निर्बन्धः, अध्यवसायः.

DETERMINATIVE, *a.* निश्चायकः -का -कं, निर्णायकः -का -कं, निर्धारकः -का -कं.

To DETERMINE, *v. a.* (Fix, settle) स्था in caus. (स्थापयति -यितुं), अवस्था, व्यवस्था; सिध् in caus. (साधयति -यितुं), स्थिरीकृ, सिद्धीकृ, परिकॢप् (c. 10. -कल्पयति -यितुं).—(Decide) निश्चि (c. 5. -चिनोति -चेतुं), निर्णी (c. 1. -णयति -णेतुं), विचर् in caus. (-चारयति -यितुं).—(Resolve) व्यवसो (c. 4. -स्यति -सातुं), अध्यवसो, सङ्कॢप्, मनो निविश् in caus. (-वेशयति -यितुं).—(Ascertain) निरूप् in caus. (-रूपयति -यितुं), अवधृ in caus. (-धारयति -यितुं), सम्प्रधृ, निर्धृ.—(Define) निर्दिश् (c. 6. -दिशति -देष्टुं), लक्ष् (c. 10. लक्षयति -यितुं).—(Confine) परिमा (c. 2. -माति -तुं).—(Direct, influence the choice) उद्दिश्; प्रेर् in caus. (-ईरयति -यितुं), प्रयुज् in caus. (-योजयति -यितुं), प्रोत्सह् in caus. (-साहयति -यितुं).

To DETERMINE, *v. n.* (Come to a decision) निश्चयं कृ, निर्णेयं कृ, सङ्कल्पं कृ.—(End, come to a conclusion) सिध् in pass. (सिध्यते or c. 4. सिध्यति), सम्पद् (c. 4. -पद्यते -पत्तुं), अवसो (c. 4. -स्यति -सातुं), व्यवसो; 'I am determined to do that,' तत् कर्त्तुं व्यवसितोऽस्मि.

DETERMINED, *p. p.* निश्चितः -ता -तं, निर्णीतः -ता -तं, कृतनिश्चयः -या -यं,

Digitized by Google

व्यवसितः -ता -तं, सिद्धः -द्धा -द्धं, व्यवस्थितः -ता -तं, निर्धारितः -ता -तं, अवधारितः -ता -तं, नियतः -ता -तं, प्रयतितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, विचारितः -ता -तं, सङ्कल्पितः -ता -तं.—(Resolute) साङ्कल्पिकः -की -कं, व्यवसायी -यिनी -यि (न्), सुस्थिरः -रा -रं, स्थिरमतिः -तिः -ति, अभिनिविष्टः -ष्टा -ष्टं; 'determined to sacrifice life,' प्राणांस् त्यक्तुं सुनिश्चितः or व्यवसितः.

DETERMINEDLY, *adv.* सुस्थिरं, स्थिरचेतसा, सुनिश्चितं, बुद्धिपुरःसरं, बुद्धा.

DETERMINER, *s.* निर्णेता *m.* (तृ), निश्चयकारी *m.* (न्), सङ्कल्पकृत्.

DETERSIVE, *a.* अपमार्ज्जकः -का -कं, शोधकः -का -कं, परिष्कारकः -का -कं.

To DETEST, *v. a.* द्विष् (c. 2. द्वेष्टि -ष्टुं), प्रद्विष्, विद्विष्, गर्ह् (c. 1. गर्हते -र्हितुं), दुह् (c. 4. दुह्यति, द्रोहितुं, द्रोग्धुं), अभिदुह्, बाध् in des. (बीभत्सते -त्सितुं), घृण् (c. 1. घृणते -णितुं).

DETESTABLE, *a.* द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, गर्हणीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, घृणार्हः -र्हा -र्हं, अक्षिगतः -ता -तं.

DETESTABLY, *adv.* गर्हणीयं, गर्हितं, द्वेषणीयं, विद्विष्टं, घृणार्हं.

DETESTATION, *s.* द्वेषः, विद्वेषः, विद्विष्टता, गर्हा -र्हणं, बीभत्सः, घृणा.

DETESTED, *p. p.* द्विष्टः -ष्टा -ष्टं, विद्विष्टः -ष्टा -ष्टं, गर्हितः -ता -तं, घृणितः -ता -तं, ख्यातगर्हणः -णा -णं, अवगीतः -ता -तं.

DETESTER, *s.* द्वेषी *m.* (न्), विद्वेषी *m.*, विद्वेष्टा *m.* (ष्टृ), गर्हाकारी *m.* (न्).

To DETHRONE, *v. a.* राज्यात् or सिंहासनात् पत् in caus. (पातयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or भ्रंश् in caus. (भ्रंशयति -यितुं) or उत्पद् in caus. (-पाटयति -यितुं).

DETHRONED, *p. p.* राज्यभ्रष्टः -ष्टा -ष्टं, भ्रष्टराज्यः -ज्या -ज्यं, राज्यात्प्रभ्रंशितः -ता -तं, राज्यप्रच्युतः -ता -तं, सिंहासनात्पातितः -ता -तं, राज्यादुत्पाटितः -ता -तं.

DETHRONEMENT, *s.* राज्यभ्रंशः, राज्यात्प्रभ्रंशनं, राज्यात्पातनं, राज्यादुत्पाटनं.

To DETONATE, *v. n.* स्तन् (c. 1. स्तनति -नितुं), स्फूर्ज् (c. 1. स्फूर्जति -र्जितुं), तीक्ष्णशब्दं कृ.

DETONATION, *s.* स्तनितं, स्तननं, स्फूर्जनं, विस्फूर्जितं, तीक्ष्णशब्दः, आस्फोटनशब्दः.

To DETORT, *v. a.* विकृ, साचीकृ, वक्रीकृ, विरूप् (c. 10. -रूपयति -यितुं).

To DETRACT, *v. a.* (Take away from) अपकृष् (c. 1. -कर्षति -क्रष्टुं), व्यपकृष्, अपहृ (c. 1. -हरति -हर्तुं), अपनी (c. 1. -नयति -नेतुं).—(Diminish, lessen the value) अल्पीकृ, न्यूनीकृ, कन (nom. कनयति -यितुं), लघ (nom. लघयति -यितुं), लघूकृ, ह्रस् in caus. (ह्रासयति -यितुं).—(Disparage, calumniate) असूय (nom. असूयति -ते -यितुं), अभ्यसूय, अपवद् (c. 1. -वदति -दितुं), परिवद्; निन्द् (c. 1. निन्दति -न्दितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप्.

DETRACTION, *s.* (Taking away, diminishing) अपकर्षः -र्षणं, अपनयनं, अपहरणं, अल्पीकरणं, न्यूनीकरणं, लघूकरणं, ह्रासः.—(Disparagement, calumny) असूया -यनं, अभ्यसया, असूयुः *m.*, अपवादः, परिवादः, गणापवादः, गुणनिन्दा, गुणघातः, परगुणमत्सरः, परदोषवादः, परदोषाभिधानं, दोषाविष्करणं, पिशुनवाक्यं, पैशुन्यं, कौलीनं, विगानं, आक्षेपः, कलङ्कः, वाग्दोषः.

DETRACTOR, *s.* असूयकः, अभ्यसूयकः, अपवादी *m.* (न्), गुणापवादकः, परिवादी *m.* (न्), गुणघाती *m.* (न्), परगुणासहनः, निन्दकः, आक्षेपकः, सूचकः, खलः.

DETRACTORY, DETRACTIVE, *a.* असूयकः -का -कं, अभ्यसूयकः -का -कं, असूकः -का -कं, अपवादकः -का -कं, गुणघाती -तिनी -ति (न्), परिवादी -दिनी -दि (न्), लाघवकारी -रिणी -रि (न्), पिशुनः -ना -नं, कलङ्ककरः -री -रं, अकीर्त्तिकरः -री -रं.

DETRACTRESS, *s.* अपवादिनी, परिवादिनी, अभ्यसूयका, निन्दाकारिणी.

DETRIMENT, *s.* क्षतिः *f.*, अपायः, हानिः *f.*, अपकारः, अपचयः, हिंसा, द्रोहः, अनिष्टं, नाशः, विनाशः, विरोधः, क्षतं, अपकृतं, अपचितिः *f.*, अपहारः, क्षयः, उपक्षयः, दोषः, बाधः, भंशः, ध्वंसः, प्रध्वंसः, व्ययः.

DETRIMENTAL, *a.* अपकारकः -का -कं -री -रिणी -रि (न्), घातुकः -का -कं, उपघातकः -का -कं, हिंसः -सा -सं, हिंसकः -का -कं, विरोधी -धिनी -धि (न्), क्षतिकारकः -का -कं, हानिजनकः -का -कं, द्रोही -हिणी -हि (न्).

To DETRUDE, *v. a.* निपत् in caus. (-पातयति -यितुं), अधःपत् in caus. or अधोऽधः पत्, अधःक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अधःकृ, प्रभंश् in caus. (-भंशयति -यितुं).

To DETRUNCATE, *v. a.* अवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अवकृत् (c. 6. -कृन्तति -कर्त्तितुं).

DETRUNCATION, *s.* छेदः, कर्त्तनं, अवच्छेदः, अवकर्त्तनं, लोपः -पनं.

DETRUSION, *s.* निपातनं, अधःपातनं, अधोऽधःपातनं, अधःक्षेपणं.

DEUCE, *s.* (Two) द्विः, द्वयं, द्विकं.—(Devil) पिशाचः, वेतालः, भूतः.

DEUTERONOMY, *s.* ईश्वरीयव्यवस्थाया द्वितीयविवरणं, मूसालिखितं पञ्चमपुस्तकं.

To DEVASTATE, *v. a.* उपपीड् (c. 10. -पीडयति -यितुं); बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्; उपद्रु (c. 1. -द्रवति -द्रोतुं), अभिमृद् (c. 1. -मर्दति -र्दितुं), अवमृद्, उपप्लु (c. 1. -प्लवते -प्लोतुं), दह् (c. 1. दहति, दग्धुं), निर्दह्.

DEVASTATED, *p. p.* पीडितः -ता -तं, विप्लुतः -ता -तं, उपद्रुतः -ता -तं.

DEVASTATION, *s.* विप्लवः, उपप्लवः, उपपीडनं, पीडनं, उपद्रवः, अवमर्दः, बाधा, प्रबाधा, उच्छेदः, विनाशः, अभिसम्पातः.

To DEVELOP, *v. a.* विवृ (c. 5. -वृणोति -णुते -वरितुं -रीतुं), अपावृ; प्रकाश् in caus. (-काशयति -यितुं), विकाश्, प्रकटीकृ, उत्पद् in caus. (-पादयति -यितुं), विस्तृ in caus. (-स्तारयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), विप्रथ् in caus. (-प्रथयति -यितुं), व्याकृ.

DEVELOPED, *p. p.* विवृतः -ता -तं, विकाशितः -ता -तं, उत्पादितः -ता -तं.

DEVELOPMENT, *s.* विवृतिः *f.*, विवरणं, विकाशनं, प्रकाशनं, प्रसारणं, उत्पत्तिः *f.*, उत्पादनं, विस्तृतिः *f.*, विस्तारणं, प्रकटीकरणं, व्याकरणं.

DEVERGENCE, *s.* अधःपतनं, अधोगतिः *f.*, च्युतिः *f.*, भंशः, उत्क्रमः, वक्रता.

To DEVIATE, *v. n.* भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), विभ्रंश्, च्यु (c. 1. च्यवते, च्योतुं), विच्यु, विचल् (c. 1. -चलति -लितुं), उत्क्रम् (c. 1. -क्रामति -क्रमितुं), व्युत्क्रम्, भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), व्यभिचर् (c. 1. -चरति -रितुं) all with abl. c., त्यज् (c. 1. त्यजति, त्यक्तुं) with acc. c.

DEVIATED, *p. p.* भ्रष्टः -ष्टा -ष्टं, च्युतः -ता -तं, विचलितः -ता -तं.

DEVIATION, *s.* भंशः, च्युतिः *f.*, विचलनं, उत्क्रमः, व्यभिचारः, भ्रान्तिः *f.*, भ्रमः, भ्रेषः, विक्रिया, त्यागः.—(From the right way) सत्पथभंशः, सत्पथत्यागः, उत्पथगमनं, विमार्गगमनं, कुपथगमनं, यथोचिताद्भ्रंशः.

DEVICE, *s.* (Contrivance) उपायः, व्यपदेशः, अपदेशः, व्यवसायः, प्रयोगः, कैतवप्रयोगः, प्रयुक्तिः *f.*, युक्तिः *f.*, कल्पना, चेष्टा, साधनं, प्रोत्सादनं, मन्त्रणा, छलं, माया, विधः; 'a good device,' सुयुक्तिः *f.*—(Project) अभिप्रायः, आशयः, चिन्ता.—(Emblem) चिह्नं, अङ्कः, कुलीनपदचिह्नं.

DEVIL, *s.* पिशाचः, भूतः, वेतालः, अपदेवता. *See* DEMON. The translators of the Bible have coined the word शैतान् from the Arabic.

DEVILISH, *a.* पैशाचः -ची -चं -चिकः -की -कं, भौतः -ती -तं -तिकः -की -कं.

DEVILISHLY, *adv.* पिशाचवत्, वेतालवत्.—(Greatly) अत्यर्थं, भृशं.

DEVIOUS, *a.* वक्रः -क्रा -क्रं, कुटिलः -ला -लं, अमर्य्यादः -दा -दं, उत्क्रान्तमर्य्यादः -दा -दं, व्यभिचारी -रिणी -रि (न्), अनाचारी -रिणी -रि (न्), भ्रमी -मिणी -मि (न्).

Digitized by Google

To DEVISE, *v. a.* प्रचिन् (c. 10. -चिनयति -यितुं), परिचिन्, मनसा कॢप् (c. 10. कल्पयति -यितुं) or परिकॢप्, अनुसन्धा (c. 3. -दधाति -धातुं), विधा, घट् (c. 1. घटते -टितुं), मन्त्र् (c. 10. मन्त्रयति -यितुं), व्यवसो (c. 4. -स्यति -सातुं), आलोच् (c. 10. -लोचयति -यितुं).—(Grant by will) दानपत्रेण स्वरिक्थं दायादादिभ्यः प्रदा (c. 1. -यच्छति -दातुं) or समृ in caus. (-सर्पयति -यितुं).

To DEVISE, *v. n.* उपायप्रयोगं कृ, उपायचिन्तां कृ, व्यपदेशं कृ.

DEVISE, *s.* (Bequeathing by will) दानपत्रेण दायादिभ्यो रिक्थप्रदानं.

DEVISED, *p. p.* प्रचिन्तितः -ता -तं, घटितः -ता -तं, विहितः -ता -तं, परिकल्पितः -ता -तं; 'well-devised,' सुघटितः -ता -तं.

DEVISEE, *s.* धनहारी *m.* (न्), धनाधिकारी *m.* (न्), अधिकारी, दानपात्रं.

DEVISER, *s.* (Contriver) उपायचिन्तकः, उपायज्ञः, उपेता *m.* (तृ), उपायी *m.* (न्), प्रयोजकः, परिकल्पकः, व्यवसायी *m.* (न्).

DEVISOR, *s.* दानपत्रेण रिक्थप्रदाता *m.* (तृ), सम्प्रदाता *m.*

DEVOID, *a.* (Empty) शून्यः -न्या -न्यं.—(Free from) हीनः -ना -नं, विहीनः -ना -नं, रहितः -ता -तं, विरहितः -ता -तं, शून्यः -न्या -न्यं, वर्जितः -ता -तं, विवर्जितः -ता -तं, उज्झितः -ता -तं, वीतः -ता -तं, गतः -ता -तं, or by निर्, वि and स prefixed; as, 'devoid of fruit,' फलहीनः -ना -नं, फलरहितः -ता -तं, फलशून्यः -न्या -न्यं, वीतफलः -ला -लं, निष्फलः -ला -लं, विफलः -ला -लं, अफलः -ला -लं.

DEVOIR, *s.* सत्कारः, सत्कृतं, सत्कृतिः *f.*, आदरकर्म्म *n.* (न्), समादरः, सम्मानं, पूजा, अर्चनं -ना, स्वकर्त्तव्यं, कर्त्तव्यता, व्रतं.

To DEVOLVE, *v. a.* (Roll down) प्रवह् in caus. (-वाहयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), अनुवृत्, प्रपत् in caus. (-पातयति -यितुं).—(Deliver over) न्यस् (c. 4. -अस्यति -असितुं), सन्यस्, उपन्यस्, भू in caus. (सर्पयति -यितुं), समृ, प्रतिपद् in caus. (-पादयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आरुह् in caus. (-रोपयति -यितुं), संक्रम् in caus. (-क्रामयति -यितुं).

To DEVOLVE, *v. n.* (Fall into new hands, be delivered over) आगम् (c. 1. -गच्छति -गन्तुं), आया (c. 2. -याति -तुं), संक्रम् (c. 1. -क्रमते -मितुं), न्यस् in pass. (-अस्यते), सन्यस् in pass., समृ in caus. pass. (-सर्प्यते), न्यस्तः -स्ता -स्तं भू.—(Roll down, fall down) अधो वृत् (c. 1. वर्त्तते -र्त्तितुं), अधो पत्, प्रपत् (c. 1. -पतति -पितुं).

DEVOLUTION, *s.* अधःपतनं, प्रवर्त्तनं, न्यसनं, सन्यसनं, आरोपणं.

To DEVOTE, *v. a.* (Appropriate to any use, dedicate, consecrate) विनियुज् (c. 7. -युनक्ति -योक्तुं), प्रयुज्, समृ in caus. (-सर्पयति -यितुं), निविद् in caus. (-वेदयति -यितुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), प्रणी (c. 1. -नयति -नेतुं), उपकॢप् (c. 10. -कल्पयति -यितुं), प्रतिष्ठा in caus. (-स्थापयति -यितुं), सङ्कल्पं कृत्वा दा or समृ, वितॄ (c. 1. -तरति -रितुं -रीतुं).—(Addict one's self to any thing) आसञ्ज् in pass. (-सज्यते or -सज्जते -सक्तुं) with loc., भज् (c. 1. भजति -ते, भक्तुं), आसेव् (c. 1. -सेवते -वितुं), मनो निविश् in caus. (-वेशयति -यितुं), अनुरञ्ज् in pass. (-रज्यते), समायत् (c. 1. -यतते -तितुं), आसक्तः -क्ता -क्तं भू; 'he is devoted to his wife,' भार्य्यायाम् अनुरज्यते.—(Doom to destruction) नरकं गम्या इति शप्तं कृ.

DEVOTED, *p. p.* भक्तः -क्ता -क्तं, आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, व्यासक्तः -क्ता -क्तं, सक्तः -क्ता -क्तं, रतः -ता -तं, निरतः -ता -तं, आरूढः -ढा -ढं, आस्थितः -ता -तं, समायत्तः -त्ता -त्तं, दृढभक्तिः -क्तिः -क्ति, भक्तियुक्तः -क्ता -क्तं, सक्तिमान् -मती -मत् (त्); 'devoted to one's master,' प्रभुभक्तः; 'to Krishna,' कृष्णाश्रितः or कृष्णांश्रितः; 'a devoted wife,' पतिव्रता, एकपत्नी, पतिसेविनी; 'a devoted husband,' पत्नीसेवी *m.* (न्), भार्य्यानुकूलः; 'a devoted friend,' स्थितप्रेमा *m.* (न्).

DEVOTEDNESS, *s.* (Dedication, consecration) समर्पणं, उत्सर्गः, निवेदनं, विनियोगः, सङ्कल्पकरणं, प्रतिष्ठा, वितरणं.—(Addiction) भक्तिः *f.*, आसक्तिः *f.*, रक्तिः *f.*, उपसेवनं, निवेशः, अभिनिवेशः, निविष्टता, परायणता, उपासकता.

DEVOTEE, *s.* योगी *m.* (न्), सन्यासी *m.* (न्), तपस्वी *m.* (न्), तापसः, यती *m.* (न्), महाव्रती *m.* (न्), वैखानसः, मुनिः *m.*, निर्ग्रन्थः -न्थकः, धर्म्मनिबन्धी *m.* (न्), धर्म्मनिरतः, धर्म्मनिविष्टः.

DEVOTION, *s.* (Devoted attachment) भक्तिः *f.*, भक्तत्वं, अनुरागः, आसक्तिः *f.*, प्रसक्तिः *f.*, सक्तिः *f.*, अनुरक्तिः *f.*, योगः, सेवा, उपासना, उपसेवनं.—(Piety) ईश्वरभक्तिः *f.*, भजनशीलता, धर्म्मित्वं, ईश्वरसेवा, उत्सर्गः.—(Act of worship) नियमः, धर्म्मक्रिया, धर्म्मकृत्यं, तपः *n.* (स्); 'to perform austere devotion,' तपस् (nom. तपस्यति) or तपस् तप् in pass. (तप्यते); 'self-devotion,' आत्मपरित्यागः; 'devotion to a husband,' पतिसेवा, पातिव्रत्यं.

DEVOTIONAL, *a.* (Relating to religion) धर्म्मविषयकः -का -कं, ईश्वरपूजाविषयः -या -यं, तपोमयः -यी -यं.—(Religious) धर्म्मपरः -रा -रं, ईश्वरभावनः -ना -नं, भजनशीलः -ला -लं, औपासनः -नी -नं, नियमनिष्ठः -ष्ठा -ष्ठं.

To DEVOUR, *v. a.* ग्रस् (c. 1. ग्रसते -सितुं), उपग्रस्, भक्ष् (c. 10. भक्षयति -यितुं), सम्भक्ष्, खाद् (c. 1. खादति -दितुं), संखाद्, समद् (c. 2. -अत्ति -त्तुं), समश् (c. 9. -अश्नाति -अशितुं), पर्य्यश्, जक्ष् (c. 2. जक्षिति -तुं) घस् (c. 1. घसति, घस्तुं).—(Swallow up) गॄ (c. 6. गिरति, गरितुं -रीतुं), निगॄ, सङ्गॄ, ग्रस्.—(Consume) उपयुज् (c. 7. -युङ्क्ते -योक्तुं), नश् in caus. (नाशयति -यितुं).

DEVOURED, *p. p.* ग्रस्तः -स्ता -स्तं, जग्धः -ग्धा -ग्धं, भक्षितः -ता -तं, खादितः -ता -तं.

DEVOURER, *s.* भक्षकः, खादकः, भक्षयिता *m.* (तृ), ग्रसनकारः, ग्रसिष्णुः *m.*

DEVOUT, *a.* भक्तः -क्ता -क्तं, भक्तिमान् -मती -मत् (त्), भजनशीलः -ला -लं, धर्म्मी -र्म्मिणी -र्म्मि (न्), धार्म्मिकः -की -कं, धर्म्मिष्ठः -ष्ठा -ष्ठं, धर्म्मात्मा -त्मा -त्म (न्) or पुण्यात्मा or प्रयतात्मा, पूजकः -का -कं, व्रती -तिनी -ति (न्) or महाव्रती, ईश्वरभावनः -ना -नं, आर्द्रः -र्द्री -र्द्रं, पुण्यशीलः -ला -लं, तपस्वी -स्विनी -स्वि (न्), ईश्वरनिष्ठः -ष्ठा -ष्ठं, श्रद्धान्वितः -ता -तं, परमेश्वरे सदाभक्तिः -क्तिः -क्ति.

DEVOUTLY, *adv.* ईश्वरभक्तिपूर्व्वं, ईश्वरभक्तत्वात्, श्रद्धापूर्व्वं.

DEVOUTNESS, *s.* ईश्वरभक्तत्वं, ईश्वरनिष्ठत्वं, नियमनिष्ठता, श्रद्धावत्त्वं.

DEW, *s.* नीहारः, तुषारः, शिशिरः, प्रालेयं, अवश्यायः, रजनीजलं, रात्रिजलं, निशाजलं, खजलं, खवारि *n.*, अवश्यायजलं, अवश्यायसलिलं, निशापुष्पं, खवाष्पः, हिमः -मं, दस्रं.

To DEW, *v. a.* नीहारेण or शिशिरेण क्लिद् in caus. (क्लेदयति -यितुं) or सिच् (c. 6. सिञ्चति, सेक्तुं) or प्रोक्ष् (c. 1. -उक्षति -क्षितुं) or आर्द्रीकृ.

DEW-BESPRENT, *a.* शिशिराक्तः -क्ता -क्तं, नीहारोक्षितः -ता -तं, तुषारक्षिप्तः -प्ता -प्तं, अवश्यायावसिक्तः -क्ता -क्तं.

DEW-DROP, *s.* तुषारकणः, नीहारबिन्दुः *m.*, शिशिरबिन्दुः, अवश्यायबिन्दुः, हिमकणः, तुषारशीकरः.

DEW-LAP, *s.* गलकम्बलः, कम्बलः, साक्ना, वृषगलस्य लोलितमांसं.

DEWY, *a.* तुषारमयः -यी -यं, नीहारसिक्तः -क्ता -क्तं, सशिशिरः -रा -रं.

DEXTERITY, *s.* दक्षता, दाक्ष्यं, हस्तकौशल्यं, करदक्षता, हस्तलाघवं, हस्तपादादिक्षिप्रता, चातुर्य्यं, नैपुण्यं, युक्तिः *f.*, सुप्रयोगः -गता, पटुता, सत्वरता.

DEXTEROUS, *a.* दक्षः -क्षा -क्षं, करदक्षः -क्षा -क्षं, लघुहस्तः -स्ता -स्तं, कृतहस्तः -स्ता -स्तं, चतुरः -रा -रं, निपुणः -णा -णं, क्षिप्रः -प्रा -प्रं, युक्तिमान् -मती -मत् (त्), सुप्रयोगवान् -वती -वत् (त्), पेशलः -ला -लं,

Digitized by Google

पटुः -टुः -टु, सूत्थानः -ना -नं, उक्षणः -क्षणा -क्षणं.

DEXTEROUSLY, *adv.* सदाक्ष्यं, सलाघवं, युक्त्या, सचातुर्य्यं, सपाटवं.

DEXTRAL, *a.* दक्षिणः -णा -णं, दाक्षिणः -णी -णं, अपसव्यः -व्या -व्यं, वामेतरः-रा-रं,अवामः-मा-मं,दक्षिणस्थः-स्था-स्थं,दक्षिणपार्श्वस्थः-स्था-स्थं.

DHANWANTARI, *s.* (The physician of the gods) धन्वन्तरिः *m.*, काशिराजः.

DIABETES, *s.* बहुमूत्रमेहः, बहुमूत्ररोगः, इक्षुमेहः, प्रमेहः.

DIABOLIC, DIABOLICAL, *a.* पैशाचः -ची -चं -चिकः -की -कं, भौतिकः -की -कं, पिशाचोपमः -मा -मं, वैतालिकः -की -कं, दारुणः -णा -णं.

DIABOLICALLY, *adv.* पिशाचवत्, भूतवत्, वेतालवत्, दारुणं.

DIACOUSTICS, *s.* श्रवणविद्या, शब्दनिर्णयविद्या, ध्वनिविद्या.

DIADEM, *s.* किरीटः, मुकुटं, मौलिः *m.* -ली, वेष्टनं, शिरोवेष्टनं, अवतंसः, तिरीटं, बन्धुरं, चूडा, मस्तकाभरणं.

DIADEMED, *a.* किरीटी -टिनी -टि (न्), किरीटधारी -रिणी -रि (न्).

DIÆRESIS, *s.* स्वरविच्छेदः,पदविभेदः,अक्षरविच्छेदः,असन्धिः,यथा तितउ शब्दे.

DIAGNOSTIC, *s.* रोगलक्षणं, रोगचिह्नं, विसूचिका, प्रज्ञानं, उपसर्गः.

DIAGONAL, *a.* एककोणाद् अन्यकोणपर्य्यन्तम् अङ्कितः -ता -तं, कोणाकोणि लिखितः -ता -तं.

DIAGONAL, *s.* कर्णः, श्रुतिः *f.*, श्रवणः, एककोणाद् अन्यकोणपर्य्यन्तम् अङ्किता रेखा, कोणाकोणि लिखिता रेखा यया चतुरस्रं द्विसमीकृतं.

DIAGONALLY, *adv.* कोणाकोणि, आरारि, असाम्नि.

DIAGRAM, *s.* मण्डलकं, चक्रं, कूर्म्मचक्रं, क्षेत्रं, अङ्कः, चित्रं.

DIAL, DIAL-PLATE, *s.* मुहूर्त्तदण्डादिपरिमापकं मण्डलं, अङ्कचिह्निता घटी यया मयूखद्वारेण कालः सूच्यते, द्वन्द्वः, यामघोषा; 'pin of a dial,' मयूखः, कीलः; 'sun-dial,' सूर्य्यघटी, प्रतोदः.

DIALECT, *s.* (Subdivision of a language) विभिन्नभाषा, देशभाषा. —(Language, speech) भाषा, भाषितं -षणं, वचनं, वाक्यं, वाक् *f.* (च्), उक्तिः *f.*; 'foreign dialect,' म्लेच्छभाषा.

DIALECTIC, *s.* (Logic) तर्कः, तर्कविद्या,न्यायः,आन्वीक्षिकी,अनुमानोक्तिः *f.*

DIALECTICAL, *a.* तार्किकः -की -कं, न्यायी -यिनी -यि (न्), प्रोहः -हा -हं.

DIALECTICALLY, *adv.* न्यायतस्, तर्कविद्यानुसारेण, तर्कशास्त्रवत्.

DIALECTICIAN, *s.* तर्की *m.* (न्),न्यायविद्,नैयायिकः,आक्षपादः,सांवादिकः.

DIALLING, *s.* (Science of shadow) छायाविद्या.—(Dial making) घटीनिर्म्माणं, पूर्व्वोक्तमण्डलनिर्म्माणशिल्पं.

DIALOGIST, *s.* कथोपकथकः, सांवादिकः, सम्भाषकः, उत्तरप्रत्युत्तरकृत्, प्रश्नोत्तरक्रमेण कथोपकथनरचकः.

DIALOGUE, *s.* कथोपकथनं, संलापः, सम्भाषा -षणं, संवादः, द्वयोः संवादः, सङ्कथा, सम्प्रवदनं, उत्तरप्रत्युत्तरं, प्रश्नोत्तरं, उक्तिप्रत्युक्तिः *f.*, परस्परालापः, वीथ्यङ्गं.

To DIALOGUE, *v. n.* सम्भाष् (c. 1. -भाषते -षितुं), संवद् (c. 1. -वदति -दितुं), संलप् (c. 1. -लपति -पितुं), संवच् (c. 2. -वक्ति -क्तुं), कथोपकथनं कृ.

DIAMETER, *s.* (Of a circle) व्यासं, विष्कम्भः, विस्तारः, विस्तृतिः *f.*

DIAMETRAL, DIAMETRICAL, *a.* व्यासक्रमेण विपरीतगतः -ता -तं, अभिमुखगतः -ता -तं.

DIAMETRICALLY, *adv.* व्यासक्रमेण विपरीतं, अभिमुखं, प्रतिकूलं, मुखामुखि.

DIAMOND, *s.* हीरं -रकः, वज्रः -ज्रं, वरारकं, अविकं, अशिरं, दधीच्यस्थि *n.*, दृढाङ्गं, लोहजित्, सूचीमुखं, रत्नमुख्यं, भार्गवप्रियः; 'diamond-mine,' वज्राकरः.

DIAMOND-CUTTER, *s.* हीरकारः, हीरकच्छिद्, हीरमार्जकः, हीरपरिष्कारकः.

DIAPASON, *s.* स्वराष्टकं, अष्टस्वराः *m. pl.*, स्वरग्रामः, विरिञ्चाष्टकं.

DIAPER, *s.* पुष्पादिसंस्कारालङ्कृतः क्षौमपटः, चित्रपटः, वरकं.

To DIAPER, *v. a.* क्षौमपटं पुष्पादिसंस्कारेण अलङ्कृ,चित्र् (c. 10. चित्रयति -यितुं).

DIAPHANEITY, *s.* स्वच्छता, अच्छता, प्रसन्नता, प्रसत्तिः *f.*, वैशद्यं.

DIAPHANIC, DIAPHANOUS, *a.* स्वच्छः -च्छा -च्छं, अच्छः -च्छा -च्छं, प्रसन्नः -न्ना -न्नं,विशदः -दा -दं,विमलः -ला -लं,विशुद्धः -द्धा -द्धं,स्फटिकप्रभः -भा -भं.

DIAPHORETIC, *a.* स्वेदकरः -री -रं, स्वेदनः -ना -नं, स्वेदजनकः -का -कं, घर्म्मोत्पादकः -का -कं, प्रस्वेदितवान् -वती -वत् (त्); 'a diaphoretic,' स्वेदनं.

DIAPHRAGM, *s.* शरीरस्य मध्यदेशः, उदरवक्षःस्थलमध्ये शरीरभागः.

DIARRHŒA, *s.* अतिसारः, सारणः, प्रवाहिका, ग्रहणीरुक् *f.* (ज्), ग्रहणी, विरेकः, प्रस्कन्दनं -न्दिका, वसनः.

DIARRHŒTIC, *a.* रेचकः -की -कं, सारकः -का -कं, अधोभागहरः -रा -रं.

DIARY, *s.* आह्निकव्यवहारपुस्तकं, दैनिकवृत्तान्तपुस्तकं, आह्निकचरित्रलिखनं, पुस्तकं यस्मिन् दैनिकचेष्टितानि समारोप्यन्ते, पदभङ्क्तिका, पङ्क्तिका.

DIASTOLE, *s.* रूपकविशेषो येन ह्रस्वस्वरो दीर्घीक्रियते.

DIATESSERON, *s.* गान्धर्वविद्यायां स्वरचतुष्टयं.

DIBBLE, *s.* लघुखनित्रं, क्षुद्रखात्रं, बीजारोपणे प्रयुक्तो तीक्ष्णाग्रो दण्डः.

DICACITY, *s.* वाचालता, अतिशयोक्तिः *f.*, जल्पः, वाचालता, अविनयः.

DICE, *s.*, *pl.* of DIE. अक्षाः *m. pl.*, पाशकाः *m. pl.*, देवनाः *m. pl.*; 'loaded dice,' कूटाक्षाः *m. pl.*; 'player with dice,' अक्षदेवी *m.* (न्).

To DICE, *v. n.* अक्षैर् दिव् (c. 4. दीव्यति -ते, देवितुं) or प्रदिव् or प्रतिदिव् or क्रीड् (c. 1. क्रीडति -डितुं); ग्रह् (c. 1. गृह्णते -हितुं), अक्षक्रीडां कृ.

DICE-BOARD, *s.* पाशकपीठः, नयपीठी, अष्टापदं, शारिफलं.

DICE-BOX, *s.* अक्षाधारः, पाशकभाण्डं, अक्षभाजनं, अक्षसम्पुटकः.

DICER, *s.* अक्षदेवी *m.* (न्), अक्षद्यूतः -द्यूः, अक्षक्रीडकः; 'player with unfair dice,' कूटाक्षदेवी *m.* (न्).

To DICHOTOMIZE, *v. a.* द्विधा कृ or छिद् (c. 7. छिनत्ति, छेत्तुं), पृथक्कृ.

DICKER, *s.* (Of leather) दशचर्म्माणि *n. pl.*, चर्म्मदशकं.

To DICTATE, *v. a.* आज्ञा in caus. (-ज्ञापयति -यितुं), आदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, शास् (c. 2. शास्ति, शासितुं), चुद् in caus. (चोदयति -यितुं), अभिचुद्, प्रेर् in caus. (-ईरयति -यितुं), प्रकॢप् in caus. (-कल्पयति -यितुं).

DICTATE, *s.* आज्ञा, आदेशः, निदेशः, निर्देशः, नियमः, नियोगः, शासनं, चोदनः, विधिः *m.*, विधानं, प्रेरणं, वचनं, प्रयुक्तिः *f.*

DICTATED, *p. p.* आदिष्टः -ष्टा -ष्टं, आज्ञापितः -ता -तं, चोदितः -ता -तं.

DICTATION, *s.* आदेशः, आज्ञापनं, निर्देशः, निदेशः, नियोजनं, विज्ञापनं, चोदना.

DICTATOR, *s.* आपाततः or विनिपातसमये सङ्घसम्मत्या परमाधिकारयुक्तो जनः, अनन्याधीनः शासिता *m.* (तृ), परमशासिता, परमप्रभुः, एकप्रभुः, एकाधिपतिः *m.*

DICTATORIAL, *a.* आज्ञापकः -का -कं, निर्देशकः -का -कं, धृष्टः -ष्टा -ष्टं.

DICTATORSHIP, *s.* पूर्व्वोक्तशासितुः पदं or अधिकारः, ऐकपत्यं, ऐकाधिपत्यं.

DICTION, *s.* वाग्व्यापारः, वाक्यव्यापारः, वागीतिः *f.*, वाक्यं, उक्तिः *f.*, वचनं, भाषा, वाणी, व्याहारः, वचः *n.* (स्).

DICTIONARY, *s.* कोषः, शब्दकोषः, शब्दसङ्ग्रहः, अभिधानं, शब्दग्रन्थः, शब्दजालं, निर्वचनं, निघण्टुः *m.*; 'a dictionary compiler,' कौशिकः.

DICTUM, *s.* (Authoritative saying) वचनं, आदेशः, वक्तव्यं.

DIDACTIC, DIDACTICAL, *a.* उपदेशकः -का -कं, निर्देशकः -का -कं, शिक्षकः -का -कं, शिक्षाकरः -रा -रं, वैधिकः -की -कं, सौत्रः -त्री -त्रं.

DIDAPPER, *s.* (A diving bird) प्लवः, प्लावी *m.* (न्).

DIE, *s.* (To play with) अक्षः, पाशकः, देवनः, नयः, विन्दुतन्तः, दुन्दुभिः *f.* -भी, जयपुत्रकः, शारिशृङ्खला, अष्टाङ्गं; 'a loaded die,' कूटाक्षः,

Digitized by Google

दुरक्षं.—(Chance) दैवं.—(Stamp used in coinage) मुद्रा.

To DIE, *v. a.* (Colour, stain). *See To* DYE.

To DIE, *v. n.* (Lose life) मृ (c. 6. म्रियते, मर्तुं), सम्मृ, प्रे (c. 2. -एति -तुं, with प्र, प्रैति), परे, अती (अत्येति), व्यती; जीवनं or देहम् उत्सृज् (c. 6. -सृजति -स्रष्टुं), तनुं or शरीरं त्यज् (c. 1. त्यजति, त्यक्तुं) or न्यस् (c. 4. -अस्यति -असितुं), प्राणत्यागं कृ, प्रमी (c. 4. -मीयते), विपद् (c. 4. -पद्यते -पत्तुं), व्यापद्; पञ्चत्वं गम् (c. 1. गच्छति, गन्तुं), देहाद् अपगम्, लोकान्तरं गम् or प्राप् (c. 5. -आप्नोति -आप्तुं), संस्था (c. 1. -तिष्ठते -स्थातुं), प्रेतीभू.—(Perish, be lost) नश् (c. 4. नश्यति, नशितुं), प्रणश्, विनश्; म्रक्ष् (c. 4. -क्ष्यते -क्षेतुं), क्षि in pass. (क्षीयते), प्रक्षि, संक्षि, ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्.—(Sink, faint) सद् (c. 1. सीदति, सत्तुं), अवसद्, विषद्; ग्लै (c. 1. ग्लायति, ग्लातुं), मुह् (c. 1. मूह्यति -ढ्वितुं).—(Wither) विश् in pass. (-शीर्य्यते).

DIER, *s.* (One who colours) वस्त्ररागकृत्. *See* DYER.

DIET, *s.* (Food) अन्नं, आहारः, खाद्यद्रव्यं, भोजनं, भक्ष्यं, भोज्यं; 'change of diet,' अन्नपरिवर्त्तः.—(Food regulated by the rules of medicine) पथ्यं, पथ्यान्नं, पथ्यापथ्यं.—(Assembly of princes) राजसभा, शिष्टसभा, मण्डलेश्वरसभा.

To DIET, *v. a.* (Feed by the rules of medicine) पथ्यापथ्यं निर्दिश् (c. 6. -दिशति -देष्टुं), पथ्यान्नं or पथ्यान्नेन भुज् in caus. (भोजयति -यितुं), पथ्यान्नं दा.—(Feed) भुज् in caus., पुष् (c. 10. पोषयति -यितुं), भृ (c. 3. बिभर्त्ति, भर्त्तुं).

To DIET, *v. n.* पथ्यान्नं भुज् (c. 7. भुंक्ते, भोक्तुं) or अश् (c. 9. अश्नाति, अशितुं).

DIET-DRINK, *s.* औषधीयजलं, पथ्यपानीयं, सिद्धजलं.

To DIFFER, *v. n.* (Be distinguished from) विशिष् in pass. (-शिष्यते), भिद् in pass. (भिद्यते), विभिद्, प्रभिद्, all with abl. c.; as, 'the son differs from the father,' पितुर् भिद्यते कुमारः.—(Contend, be at variance) विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं).—(Dissent) विपरीतं मन् (c. 4. मन्यते, मन्तुं), न सम्मन्, अन्यथा मन्, असम्मतिं कृ, विवद् (c. 1. -वदते -दितुं), न स्वीकृ, भिन्नमतः -ता -तं भू.

DIFFERENCE, *s.* (Distinction from something else) भेदः, विभेदः, प्रभेदः, भिदा, विशेषः, विशिष्टता, वैशिष्ट्यं, अन्तरं -रितं, भिन्नता, विभिन्नता, पृथक्त्वं, पार्थक्यं, अवच्छेदः, अन्यथात्वं, परत्वं, इतरत्वं.—(Contrariety) विपरीतता, वैपरीत्यं, विरोधः, विरुद्धता, विपर्य्ययः, वैलक्षण्यं, विप्रतिपत्तिः *f.*, द्वैधं, द्वैविध्यं.—(Difference of opinion, dispute) मतिप्रभेदः, मतिविपर्य्ययः, विमतिः *f.*, वैमत्यं, विवादः, विसंवादः, द्वैधं, कलहः, कलिः *m.*—(Difference of meaning) अर्थभेदः, अर्थान्तरं.—(Difference in quantity) तारतम्यं, वैषम्यं.—(Dissimilarity) असाम्यं, असादृश्यं.

To DIFFERENCE, *v. a.* विशिष् in caus. (-शेषयति -यितुं), भिद् in caus. (भेदयति -यितुं), पृथक्कृ.

DIFFERENT, *a.* (Distinct) भिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, अन्यः -न्या -न्यत्, अन्यतरः -रा -रत्, इतरः -रा -रं, परः -रा -रं, विपरीतः -ता -तं, विविक्तः -क्ता -क्तं, व्यतिरिक्तः -क्ता -क्तं, विशिष्टः -ष्टा -ष्टं, त्वः त्वा त्वं.—(Dissimilar) असदृशः -शी -शं, असमानः -ना -नं, असमः -मा -मं, विषमः -मा -मं.—(Various) विविधः -धा -धं, पृथग्विधः -धा -धं, नानाविधः -धा -धं, बहुविधः -धा -धं; 'by a different road,' भिन्नमार्गेण; 'in a different way,' अन्यथा; 'different state of the case,' अन्यथात्वं. 'Sometimes expressed by अन्तरं affixed; as, 'a different meaning,' अर्थान्तरं.

DIFFERENTIAL, *a.* भेदकरः -री -रं, विशेषकः -का -कं.—(Differential series, dependence of larger numbers on smaller) तारतम्यं.

DIFFERENTLY, *adv.* अन्यथा, इतरथा, परतस्, अन्यतस्, इतरतस्, पृथक्, भिन्नरूपेण, अन्यप्रकारेण, विपरीतं, पृथक्त्वेन.

DIFFICULT, *a.* (Hard, not easy) कठिनः -ना -नं, दुष्करः -रा -री -रं, दुःसाध्यः -ध्या -ध्यं, दुश्चरः -रा -रं, दुर्निवहः -हा -हं, असुकरः -री -रं, असुगमः -मा -मं, विषमः -मा -मं, कष्टः -ष्टा -ष्टं, कष्टकरः -री -रं, आयासी -सिनी -सि (न्); 'difficult to be understood,' दुर्ज्ञेयः -या -यं; 'difficult to be got,' दुर्लभः -भा -भं, दुःप्राप्यः -प्या -प्यं, दुःखलभ्यः -भ्या -भ्यं, दुःखेन प्राप्यः -प्या -प्यं, दुरापः -पा -पं; 'difficult to be overcome,' दुरतिक्रमः -मा -मं; 'difficult to be cut,' दुःखच्छेद्यः -द्या -द्यं; 'difficult to be joined,' दुःसन्धानः -ना -नं; 'difficult of digestion,' दुर्जरः -रा -रं; 'difficult of ascent,' दुरारोहः -हा -हं; 'a difficult case,' सशल्योधीः; 'difficult march,' सङ्क्रमः, दुर्गसञ्चरः.—(Peevish, morose) वक्रभावः -वा -वं, दुर्धीः -धीः -धीं.

DIFFICULTLY, *adv.* दुःखेन, कष्टेन, कृच्छ्रेण, कृच्छ्रात्, कष्टं, आयासेन, कठिनं, विषमं, दुर् prefixed; as, 'difficultly attainable,' दुःप्राप्यः -प्या -प्यं.

DIFFICULTY, *s.* (Hardness, that which is hard to effect) काठिन्यं, कठिनता, दुःखं, कृच्छ्रं, कष्टं, आयासः, दुष्करत्वं, असौकर्य्यं, विषमं, वैषम्यं, दुर्गं, शल्यं, संशयः; 'difficulties,' दुर्गाणि; 'beset with difficulties,' सशल्यः -ल्या -ल्यं, सकण्टकः -का -कं; 'overcoming difficulties,' दुर्गलङ्घनः -नी -नं; 'cut with difficulty,' दुःखच्छेद्यः -द्या -द्यं or दुःखेन छेद्यः; 'without difficulty,' अनायासं -सेन; 'obtained with difficulty,' कृच्छ्राप्तः -प्ता -प्तं.—(Distress, opposition) क्लेशः, दुःखं, बाधः, विरोधः, प्रातिकूल्यं.—(Perplexity) व्यग्रता, वैक्लव्यं, विप्लवः.—(Objection) बाधा, उद्ग्राहः.

To DIFFIDE, *v. n.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, न विश्वस् (c. 2. -श्वसिति -तुं).

DIFFIDENCE, *s.* (Want of confidence in others) अविश्वासः, अप्रत्ययः, शङ्का.—(In one's self) ह्रीः, लज्जा, व्रीडा, अप्रागल्भ्यं, आशङ्का.

DIFFIDENT, *a.* (Distrustful) अविश्वासी -सिनी -सि (न्), अप्रत्ययी -यिनी -यि (न्), शङ्काशीलः -ला -लं, साशङ्कः -ङ्का -ङ्कं, सशङ्कः -ङ्का -ङ्कं.—(Modest, reserved) ह्रीमान् -मती -मत् (त्), लज्जावान् -वती -वत् (त्), अप्रगल्भः -ल्भा -ल्भं, अधृष्टः -ष्टा -ष्टं.

DIFFIDENTLY, *adv.* शङ्कया, शङ्कापूर्वं, लज्जया, अप्रगल्भं, अधृष्टं.

DIFFLUENCE, DIFFLUENCY, *s.* विद्रुतत्वं, द्रुतता, द्रवत्वं, द्राव्यत्वं, विलीनता, तरलता.

DIFFLUENT, *a.* विद्रुतः -ता -तं, द्रवः -वा -वं, विलीनः -ना -नं, तरलः -ला -लं.

To DIFFUSE, *v. a.* (Pour out) प्रसु in caus. (-सावयति -यितुं), प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), पत् in caus. (पातयति -यितुं).—(Spread, scatter, extend) विस्तृ in caus. (-स्तारयति -यितुं), संस्तृ, परिस्तृ, प्रसृ in caus. (-सारयति -यितुं), विसृ, अतिसृ in caus., विसृप् in caus. (-सर्पयति -यितुं), प्रचर् in caus. (-चारयति -यितुं), विद्रु in caus. (-द्रावयति -यितुं), विकॄ (c. 6. -किरति -करितुं -रीतुं), प्रथ् in caus. (प्रथयति -यितुं), तन् (c. 8. तनोति -नितुं), वितन्, वृध् in caus. (-वर्धयति -यितुं), प्रवृध्, विकाश् in caus. (-काशयति -यितुं), प्रपच् (c. 10. -पचयति -यितुं).—(Diffuse itself, be diffused) व्याप् (c. 5. -आप्नोति -आप्तुं), विस्तृ in pass. (-स्तीर्य्यते), विरुह् (c. 1. -रोहति -रोढुं), प्रवृध् (c. 1. -वर्धते -र्धितुं), सर्व्वत्र गम् (c. 1. गच्छति, गन्तुं), व्यश् (c. 5. -अश्नुते -अशितुं), विगाह् (c. 1. -गाहते -हितुं), प्रविश् (c. 6.

Digitized by Google

-विशति -वेष्टुं).

DIFFUSE, *s.* (Not concise, prolix) विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, आयतः -ता -तं, अतिक्रान्तः -न्ता -न्तं, प्रपञ्चितः -ता -तं, दीर्घसूत्रः -त्रा -त्रं, असंक्षिप्तः -प्ता -प्तं, असामासिकः -की -कं.

DIFFUSED, *p. p.* व्याप्तः -प्ता -प्तं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, प्रसारितः -ता -तं, विसारितः -ता -तं, प्रसृतः -ता -तं, विसृतः -ता -तं, विकीर्णः -र्णा -र्णं, प्रकीर्णः -र्णा -र्णं, प्रचारितः -ता -तं, प्रकाशितः -ता -तं, ग्रथितः -ता -तं, प्रवृद्धः -द्धा -द्धं, ततः -ता -तं, वितनः -ता -तं, आततः -ता -तं, प्रवितनः -ता -तं, प्रपञ्चितः -ता -तं, सर्वगतः -ता -तं, सर्वत्रगतः -ता -तं, परिगतः -ता -तं, द्रुतः -ता -तं.

DIFFUSELY, *adv.* विस्तरशस्, विस्तरेण, सुविस्तरं, प्रपञ्चेन, वाग्विस्तारेण, असंक्षेपतस्, असमासतस्, असंक्षिप्तं, दीर्घसूत्रतया.

DIFFUSION, *s.* व्याप्तिः *f.*, व्यापनं, व्यापकत्वं, विस्तारः, विस्तृतिः *f.*, विस्तरः, विस्तीर्णता, प्रसारणं, प्रसरः -रणं, परिसरः, प्रततिः *f.*, विततिः *f.*, सन्ततिः *f.*, तानः, प्रतानः, प्रपञ्चः, प्रकाशः -शनं, विकाशः -शनं, व्यासः, परिक्षेपः, तन्तिः *f.*, विग्रहः.

DIFFUSIVE, *a.* व्यापकः -का -कं, व्यापी -पिनी -पि (न्), व्याप्तिमान् -मती -मत् (त्), विस्तरणशीलः -ला -लं, विस्तृतः -ता -तं, व्यश्नुवानः -ना -नं, प्रतानी -निनी -नि (न्), विसारी -रिणी -रि (न्) or प्रसारी, सान्तानिकः -की -कं, क्षिपण्युः -ण्युः -ण्यु.

DIFFUSIVELY, *adv.* विस्तीर्णं, सुविस्तरं, व्याप्तं, सामान्यतस्, सर्वत्र, सुपर्य्याप्तं.

DIFFUSIVENESS, *s.* विस्तारः, विस्तीर्णता, विस्तृतिः *f.*, व्याप्तिः *f.*, व्यापकत्वं.—(Prolixity of style) वाग्विस्तारः, विस्तरः, प्रपञ्चः, दीर्घसूत्रता.

To DIG, *v. a.* and *n.* खन् (c. 1. खनति -ते -नितुं), अभिखन्, आखन्; 'dig with a spade,' खनित्रेण खन् or खनित्रेण भूमिं भिद् (c. 7. भिनत्ति, भेत्तुं) or दृ in caus. (दारयति -यितुं) or गर्तां कृ.—(Dig up) उत्खन्, प्रोत्खन्.—(Pierce) निखन्, निर्भिद्, छिद्र् (c. 10. छिद्रयति -यितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), व्यध् (c. 4. विध्यति, व्यद्धुं).

DIGERENT, *a.* अग्निवर्द्धकः -का -कं, पाचकः -का -कं, परिपाकी -किणी -कि (न्).

DIGEST, *s.* स्मृतिसंहिता, स्मृतिसङ्ग्रहः, धर्म्मशास्त्रसंहिता, स्मृतिशास्त्रं, स्मृतिसारः.—(Any compilation) सङ्ग्रहः, संहिता, समाहारः, संक्षेपः.

To DIGEST, *v. a.* (Concoct in the stomach) जठरे or उदरे जृ in caus. (जरयति -यितुं), पच् (c. 1. पचति, पक्तुं), परिपच्, क्वथ् (c. 1. क्वथति -यितुं), दह् (c. 1. दहति, दग्धुं).—(Soften by heat) निष्क्वथ्, सिद्धीकृ.—(Arrange, methodise) क्रमेण रच् (c. 10. रचयति -यितुं), विरच्, श्रेणीक्रमेण लिख् (c. 6. लिखति, लेखितुं) or ग्रन्थ् (c. 1. ग्रन्थति -न्थितुं), सङ्ग्रहं कृ.—(Prepare in the mind) मनसा विचर् in caus. (-चारयति -यितुं).—(Put up with) सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते, क्षन्तुं).

To DIGEST, *v. n.* जठरे or उदरे जृ (c. 4. जीर्य्यति, जरितुं -रीतुं).—(Suppurate) पूय् (c. 1. पूयते -यितुं), पूयं जन् (c. 10. जनयति -यितुं).

DIGESTED, *p. p.* जीर्णः -र्णा -र्णं, पक्वः -क्वा -क्वं, क्वथितः -ता -तं, परिपक्वः -क्वा -क्वं, दग्धः -ग्धा -ग्धं, रुचितः -ता -तं, सिद्धः -द्धा -द्धं.

DIGESTER, *s.* (That which strengthens digestion) जारणं, पाचकं, पाचनं, अग्निवर्धनः, रोचकः, रोचनः.—(A vessel) निष्क्वथनयन्त्रं.

DIGESTIBLE, *a.* पक्तव्यः -व्या -व्यं, पचनीयः -या -यं, क्वथनीयः -या -यं.

DIGESTION, *s.* पाकः, परिपाकः, विपाकः, पचनं, जीर्णिः *f.*, जरणं, परिपक्वता, पुटपाकः, अग्निः *m.*, वह्निः *m.*, जठराग्निः, उदराग्निः, जठरानलः, कायाग्निः *m.*, कोष्ठाग्निः; 'slowness of digestion,' अग्निमान्द्यं; 'having a weak digestion,' मन्दाग्निः -ग्निः -ग्नि; 'having a good digestion,' दीप्ताग्निः -ग्निः -ग्नि.—(Suppuration) पूयत्वं, पाकः.

DIGESTIVE, *a.* पाचकः -का -कं, पाचनः -ना -नं, परिपाकी -किणी -कि (न्), अग्निवर्द्धकः -का -कं, अग्निदः -दा -दं, वह्निकरः -री -रं, आग्नेयः -यी -यं, रूक्षकः -का -कं, रोचकः -का -कं, रोचनः -ना -नं.—(Suppurative) पाकलः -ला -लं.

DIGGER, *s.* खनकः, खनिता *m.* (तृ), खननकारी *m.* (न्), खातकः, आखनिकः.

To DIGHT, *v. a.* भूष् (c. 10. भूषयति -यितुं), अलङ्कृ, परिधा (c. 2. -धत्ते -धातुं).

DIGIT, *s.* (Of the moon) कला, इन्दुलेखा, इन्दुरेखा, शशाङ्कलेखा, इन्ददलः.—(Arithmetical character) अङ्कः, गुणनिका.

DIGITATED, *a.* शाखी -खिनी -खि (न्), अङ्गुलिवद् विभिन्नः -न्ना -न्नं.

DIGLADIATION, *s.* असियुद्धं, खड्गयुद्धं, युद्धं, कलिः *m.*, कलहः.

DIGNIFIED, *a.* उदारचरितः -ता -तं, उदारवृत्तिः -त्तिः -त्ति, मानी -निनी -नि (न्), गर्व्वितः -ता -तं, महाशयः -या -यं, महानुभावः -वा -वं, प्रतापी -पिनी -पि (न्), महाप्रतापः -पा -पं, प्रौढः -ढा -ढं, आयतिमान् -मती -मत् (त्).—(Invested with some dignity) उत्कृष्टपदयुक्तः -क्ता -क्तं, प्रवर्द्धितः -ता -तं, प्रतिपत्तिमान् -मती -मत् (त्).

To DIGNIFY, *v. a.* (Prefer) पदं वृध् in caus. (वर्धयति -यितुं), उत्कृष्टपदे नियुज् (c. 7. -युङ्क्ते -योक्तुं) or प्रतिपद् in caus. (-पादयति -यितुं).—(Honour, adorn) मन् in caus. (मानयति -यितुं), सम्मन्, भूष् (c. 10. भूषयति -यितुं), शुभ् in caus. (शोभयति -यितुं).

DIGNITARY, *s.* उत्कृष्टपदयुक्तः पुरोहितः, प्रतिपत्तिमान् *m.* (त्), मान्यलोकः.

DIGNITY, *s.* (Nobleness of mind) माहात्म्यं, औदार्य्यं, उदारता.—(Dignity of mien) प्रतापः, तेजः *n.* (स्), अनुभावः, प्रभावः, आयतिः *f.*—(Dignity of sentiments) गर्व्वः, मानं, अभिमानं, मानिता, सम्मानं, दर्पः.—(Elevation, honourable rank) उत्कृष्टता, उत्कर्षः, औत्कर्षं, अभिजातता, आभिजात्यं, प्रतिपत्तिः *f.*, उत्कृष्टपदं, परमपदं, प्रधानता, उन्नतिः *f.*, अधिष्ठानं, स्थितिः *f.*, मान्यता, महार्घ्यता, मर्य्यादा.

To DIGRESS, *v. n.* (Turn aside out of the road) उत्क्रम् (c. 1. -क्रामति -क्रमितुं), व्युत्क्रम्, विचल् (c. 1. -चलति -लितुं), विच्यु (c. 1. -च्यवते -च्योतुं), पार्श्वं गम् (c. 1. गच्छति, गन्तुं).—(Depart from the tenour of a discourse) वचनक्रमं or वाक्यप्रसङ्गं or कथायोगं त्यज् (c. 1. त्यजति, त्यक्तुं), प्रस्तुतं or प्रकृतं or मूलविषयं or प्रधानविषयं त्यक्त्वा प्रासङ्गिकम् अभिधा (c. 3. -दधाति -धातुं).

DIGRESSION, *s.* (From the tenour of a discourse) प्रस्तुतत्यागः, वचनक्रमत्यागः, वाक्यप्रसङ्गत्यागः, वाक्यक्रमभङ्गः, मूलविषयत्यागः, प्रासङ्गिकवाक्यं, प्रसङ्गः, वाक्यान्तरं, मूलविषयबहिर्गमनं.—(Deviation) उत्क्रमः, विचलनं, वक्रगमनं.

DIGRESSIVE, *a.* निर्विषयः -या -यं, अनन्वितः -ता -तं, अप्रस्तुतः -ता -तं.

To DIJUDICATE, *v. a.* विचर् in caus. (-चारयति -यितुं), निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), तीर् (c. 10. तीरयति -यितुं), परिच्छेदं कृ.

DIJUDICATION, *s.* निर्णयः, विचारः -रणं, निश्चयः, परिच्छेदः.

DIKE, *s.* (Channel) कुल्या, उपकुल्या, परिखा, अखातं, खातं, नालः, प्रणालः, आधारः.—(Mound) सेतुः *m.*, सेतुबन्धः, जलसेतुः *m.*, जलबन्धकः, कूलकं, पालिः *f.*, पिण्डलः, पिण्डिलः, धरणः, संवरः, हिता.

To DILACERATE, *v. a.* विदृ (c. 9. -दृणाति -दरितुं -रीतुं, or caus. -दारयति -यितुं), विभिद् (c. 7. -भिनत्ति -भेत्तुं), निर्भिद्, विदलीकृ.

DILACERATION, *s.* विदारः -रणं, विदरः, विदलीकरणं, भिदा.

To DILAPIDATE, *v. n.* जृ (c. 4. जीर्य्यति, जरितुं -रीतुं), उत्सद् (c. 6. -सीदति -सत्तुं), भंश् (c. 4. भश्यति, भंशितुं), नश् (c. 4. नश्यति, नशितुं), क्षि in pass. (क्षीयते).

Digitized by Google

To DILAPIDATE, *v. a.* नश् in caus. (नाशयति -यितुं), उत्सद् in caus. (-सादयति -यितुं), ध्वंस् in caus. (ध्वंसयति -यितुं), दुष् in caus. (दूषयति -यितुं).

DILAPIDATED, *p. p.* उत्सन्नः -न्ना -न्नं, जीर्णः -र्णा -र्णं, कृतध्वंसः -सा -सं.

DILAPIDATION, *s.* क्षयः, भङ्गः, प्रभङ्गः, ध्वंसः, नाशः, क्षतिः *f.*, दूषणं.

DILATABILITY, *s.* विवारणीयत्वं, विवारक्षमता, विकाशनीयत्वं, विस्तारणीयत्वं.

DILATABLE, *a.* विवारणीयः -या -यं, विवारक्षमः -मा -मं, विकाशनीयः -या -यं, विस्तारयितुं शक्यः -क्या -क्यं, वितततीकरणीयः -या -यं.

DILATATION, *s.* विवारः, विवृतिः *f.*, विकाशः -शनं, विस्तारः, विस्तृतिः *f.*, वितनिः *f.*, वितततीकरणं, प्रततिः *f.*, व्यादानं, विसरणं, प्रसारणं, उत्फुल्लता, विपुलता, विजृम्भणं.

To DILATE, *v. a.* (Extend) विस्तृ in caus. (-स्तारयति -यितुं), वितन् (c. 8. -तनोति -नितुं), व्यातन्, वितततीकृ, विवृ (c. 5. -वृणोति -वरितुं -रीतुं or caus. -वारयति -यितुं), विकाश् in caus. (-काशयति -यितुं), विसृ in caus. (-सारयति -यितुं), व्यादा (c. 3. -ददाति -दातुं), द्राघ् (nom. द्राघयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं).—(Tell diffusely) सुविस्तरेण वद् (c. 1. वदति -दितुं), सुविस्तरं व्याख्या (c. 2. -ख्याति -तुं), विवरणं कृ, अत्युक्तिं कृ.

To DILATE, *v. n.* वितन् in pass. (-तन्यते), वितततीभू, विस्तृ in pass. (-स्तीर्य्यते), विजृम्भ् (c. 1. -जृम्भते -म्भितुं), विवृ in caus. pass. (-वार्य्यते), विवारम् इ (c. 2. एति -तुं).

DILATED, *p. p.* विवृतः -ता -तं, वितनः -ना -नं, वितततीकृतः -ता -तं, विजृम्भितः -ता -तं, उज्जृम्भितः -ता -तं, व्यातः -ता -तं, उत्फुल्लः -ल्ला -ल्लं or फुल्लः, विकाशी -शिनी -शि (न्), विस्तृतः -ता -तं, आयतः -ता -तं, विसारितः -ता -तं, विसृतः -ता -तं, प्रवृद्धः -द्धा -द्धं.

DILATOR, *s.* विवारकृत्, विकाशकः, वितनिकारः, विस्तारकः, व्यादाता *m.* (तृ).

DILATORILY, *adv.* सविलम्बं, विलम्बेन, कालक्षेपेण, मन्दं मन्दं.

DILATORINESS, *s.* दीर्घसूत्रता, चिरकारिता, अक्षिप्रकारित्वं, विलम्बः, विलम्बित्वं, कालक्षेपः, क्षेपः, मन्दः, मन्दता, मान्द्यं.

DILATORY, *a.* चिरकारी -रिणी -रि (न्) or अक्षिप्रकारी, चिरक्रियः -या -यं, दीर्घसूत्रः -त्रा -त्रं, विलम्बी -म्बिनी -म्बि (न्), मन्दः -न्दा -न्दं, मन्दायमानः -ना -नं, मन्थरः -रा -रं, दीर्घकालीनः -ना -नं, जडक्रियः -या -यं, प्रलम्बः -म्बा -म्बं, मनाक्करः -री -रं, कालक्षेपकः -का -कं.

DILECTION, *s.* स्नेहः, प्रीतिः *f.*, प्रेमा *m.* (न्), अनुरक्तिः *f.*, अनुग्रहः.

DILEMMA, *s.* उभयसम्भवः, सन्देहः.—(Doubtful choice) विकल्पः.

DILIGENCE, *s.* उद्योगः, उद्यमः, व्यवसायः, अभ्यासः, अभ्यासता, अभ्यसनं, प्रसक्तिः *f.*, अभिनिवेशः, मनोनिवेशः, अध्यवसायः, उत्साहः, यत्नः, प्रयत्नः, दीर्घप्रयत्नः, प्रवृत्तिः *f.*, अभियुक्तता, योग्यता, व्यवस्थितिः *f.*, अप्रमादः, समुत्थानं, शुश्रूषा, अनलसता.

DILIGENT, *a.* उद्योगी -गिनी -गि (न्), उद्यमी -मिनी -मि (न्), उद्युक्तः -क्ता -क्तं, व्यवसायी -यिनी -यि (न्), उत्साही -हिनी -हि (न्), सोद्योगः -गा -गं, आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, अभिनिविष्टः -ष्टा -ष्टं, परायणः -णा -णं, प्रयत्नवान् -वती -वत् (त्), महोद्यमः -मा -मं, महोत्साहः -हा -हं, अनलसः -सा -सं, प्रसितः -ता -तं, कृतश्रमः -मा -मं.

DILIGENTLY, *adv.* प्रयत्नतस्, सोद्योगं, सव्यवसायं, मनोनिवेशेन, प्रसक्तं.

DILL, *s.* सालेयः, शालेयः, शीतशिवः, मिशी, मधुरिका, शतपुष्पा, शताह्वा.

DILUCID, *a.* (Clear) स्वच्छः -च्छा -च्छं, विमलः -ला -लं.—(Not obscure) स्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, भिन्नार्थः -र्था -र्थं.

To DILUCIDATE, *v. a.* स्पष्टीकृ, व्यक्तीकृ, व्याख्या (c. 2. -ख्याति -तुं), व्याकृ.

DILUCIDATION, *s.* स्पष्टीकरणं, व्यक्तीकरणं, व्याख्या, विशुद्धिः *f.*

DILUENT, *a.* विलयनः -ना -नं, क्षीणकारी -रिणी -रि (न्), तनूकरणः -णा -णं.

DILUENT, *s.* विलयनं, विद्रावणं, विलयकृत्, तनूकृत्, सूक्ष्मकृत्.

To DILUTE, *v. a.* (Attenuate) तनूकृ, क्षीणीकृ, सूक्ष्मीकृ, क्रश् (nom. क्रशयति -यितुं), विलीनं -नां -नं कृ.—(Dilute with water) जलेन संसृज् (c. 6. -सृजति -स्रष्टुं) or मिश्र् (c. 10. मिश्रयति -यितुं).

DILUTED, *p. p.* (With water) जलसंसृष्टः -ष्टा -ष्टं, जलघटितः -ता -तं, जलमिश्रितः -ता -तं.—(Attenuated) तनूकृतः -ता -तं, प्रकृशितः -ता -तं, विलीनः -ना -नं; 'diluted decoction,' अनायासकृतं, फाण्टं.

DILUTER, *s.* जलेन मिश्रयति यो जनः, तनूकारी *m.* (न्), क्षीणकारी.

DILUTION, *s.* (Act of making thin or weak) तनूकरणं, क्षीणकरणं, कृशीकरणं, विलयनं.—(With water) जलसंसर्गः, जलमिश्रणं.

DILUVIAN, *s.* जलप्रलयसम्बन्धी -न्धिनी -न्धि (न्), जलाप्लावनविषयः -या -यं.

DIM, *a.* (Somewhat dark, obscure) मन्दच्छायः -या -यं, मन्दकान्तः -न्ता -न्तं, मलिनप्रभः -भा -भं, मलिनः -ना -नं, निष्प्रभः -भा -भं, अप्रभः -भा -भं, अतेजाः -जाः -जः (स्) or निस्तेजाः, अन्धकः -का -कं, सतिमिरः -रा -रं, अप्रकाशः -शा -शं, अस्पष्टः -ष्टा -ष्टं, अव्यक्तः -क्ता -क्तं, दुर्दृष्टः -ष्टा -ष्टं, दुर्दर्शः -र्शा -र्शं, हतज्योतीः -तीः -तिः (स्), दुरालोकः -का -कं.—(Not seeing clearly) अस्पष्टदृक् (श्), हतदृष्टिः -ष्टिः -ष्टि.—(Dull of apprehension) मन्दबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, जडमतिः -तिः -ति, अन्धधीः -धीः -धि.

To DIM, *v. a.* तिमिर (nom. तिमिरयति -यितुं), अन्धीकृ, निष्प्रभीकृ, मलिन (nom. मलिनयति -यितुं), अस्पष्टीकृ, मलिनीकृ.

DIMENSION, *s.* परिमाणं, प्रमाणं, मात्रं, मात्रा, मानं, विस्तारः, परिसरः, प्रसरः, पर्य्येनं, प्रपञ्चः, विशालता, विपुलता, सन्ततिः *f.*, विषयः, द्राघिमा *m.* (न्), दैर्घ्यं, आयतिः *f.*, आयामः, प्रयामः. The three dimensions are, 'length,' दैर्घ्यं; 'breadth,' विस्तारः; 'depth,' वेधः.

To DIMINISH, *v. a.* अल्पीकृ, न्यूनीकृ, ऊन् (c. 10. ऊनयति -यितुं), कन (nom. कनयति -यितुं), ह्रस् in caus. (ह्रासयति -यितुं), लघ (nom. लघयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं).

To DIMINISH, *v. n.* अल्पीभू, न्यूनीभू, ऊनीभू, ह्रस् (c. 1. ह्रसते -सितुं), क्षि in pass. (क्षीयते), परिक्षि, अपचि in pass. (-चीयते).

DIMINISHED, *p. p.* अल्पीकृतः -ता -तं, अल्पीभूतः -ता -तं, क्षीणः -णा -णं, ह्रसितः -ता -तं, न्यूनीभूतः -ता -तं, अपचितः -ता -तं, लुप्तः -प्ता -प्तं.

DIMINUTION, *s.* (Act of making less) न्यूनीकरणं, अल्पीकरणं, ह्रासः, लोपः.—(State of growing less) क्षयः, न्यूनत्वं -ता, अल्पत्वं, अपचयः, क्षिया, क्षितिः *f.*, ह्रासः, हानिः *f.*, अवसादः.

DIMINUTIVE, *a.* अल्पः -ल्पा -ल्पं, अल्पकः -का -कं, क्षुद्रः -द्रा -द्रं, कणीकः -का -कं, स्तोकः -का -कं, सूक्ष्मः -क्ष्मा -क्ष्मं.—(In body) अल्पतनुः -नुः -नु, स्तोककायः -यी -यं, अल्पमूर्त्तिः -र्त्तिः -र्त्ति.

DIMINUTIVENESS, *s.* अल्पता, क्षुद्रता, सूक्ष्मता, सौक्ष्म्यं, स्तोकता, अणिमा *m.* (न्), लघुता, लाघवं, क्षोदिमा *m.* (न्).

DIMISH, *a.* ईषन्मलिनः -ना -नं, ईषदन्धः -न्धा -न्धं, अस्पष्टः -ष्टा -ष्टं.

DIMISSORY, *s.* गमनानुज्ञापकः -का -कं, प्रेरकः -का -कं, प्रस्थापकः -का -कं; 'letters dimissory,' अन्यधर्म्मीयक्षाधीनदेशे गमनानुज्ञापकं पत्रं.

DIMITY, *s.* सूक्ष्मकार्पासं, सूक्ष्मतूलावस्त्रं, कार्पासाम्बरं, फालवस्त्रं.

DIMLY, *adv.* अस्पष्टं, अप्रकाशं, अव्यक्तं, निष्प्रभं, अस्फुटं, मलिनं.

DIMMED, *p. p.* हतप्रभः -भा -भं, हततेजाः -जाः -जः (स्) or क्षततेजाः, हतज्योतीः -तीः -तिः (स्), हतौजाः -जाः -जः (स्) or क्षतौजाः, मलिनितः -ता -तं.

DIMNESS, *s.* अस्पष्टता, निष्प्रभता, तिमिरं, अव्यक्तता, अप्रकाशत्वं, दुर्दर्शत्वं, दुरालोकता, प्रभाहानिः *f.*, प्रतिभाहानिः *f.*—(Stupidity) बुद्धिमान्द्यं, स्थूलता.

Digitized by Google

DIMPLE, *s.* कपोलभङ्गः, गण्डतरङ्गः, चिबुकरेखा, हनुभङ्गः, त्वग्भूमिका.

DIMPLY, *a.* भङ्गुरः -रा -रं, ऊर्म्मिमान् -मती -मत् (त्).

DIN, *s.* कोलाहलः, तुमुलं, घुष्टं, घोषः, उच्चैःस्वरः, झम्झा, झम्झनं, रासः, स्तनितं, ध्वनितं, क्वणितं, निःस्वनः, उद्रावः, चीत्कारः, निनादः, डिण्डिम शब्दः.

To DIN, *v. a.* डिण्डिम शब्देन or कोलाहलेन or उच्चैःशब्देन कर्णौ उपहन् (c. 2. -हन्ति -न्तुं).

To DINE, *v. n.* आहारं कृ, भोजनं कृ, मध्याह्नभोजनं कृ, माध्याह्निकाहारं कृ; 'one who has dined,' कृताहारः -रा -रं, कृतभोजनः -ना -नं.

To DINE, *v. a.* (Give a dinner to) भुज् in caus. (भोजयति -यितुं), अश् in caus. (आशयति -यितुं), प्राश्, माध्याह्निकभोजनं कृ in caus. (कारयति -यितुं).

To DING, *v. a.* (Dash) प्रसभं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or पत् in caus. (पातयति -यितुं) or अभिहन् (c. 2. -हन्ति -न्तुं) or प्रतिहन्.

To DING, *v. n.* शब्द् (nom. शब्दायते), भर्त्स् (c. 10. भर्त्सयते -यितुं).

DING-DONG, *s.* घण्टाशब्दः, घण्टास्वनः, घण्टानादः.

DINGLE, *s.* दरी -रा, दरीभूः *f.*, कन्दरः -री, अद्रिद्रोणी, प्रान्तरं.

DINING-ROOM, *s.* भोजनशाला, भोजनगृहं, भोजनस्थानं, आहारस्थानं.

DINNER, *s.* मध्याह्नभोजनं, माध्याह्निकाहारः, भोजनं, आहारः; 'a dinner party,' सहभोजनं, सम्भोजनं, सन्धिः *f.*; 'invited to dinner,' भोजनार्थं निमन्त्रितः; 'to serve up dinner,' भोजनं परिविश् in caus. (-वेशयति -यितुं).

DINNER-TIME, *s.* भोजनकालः, मध्याह्नभोजनकालः, आहारकालः.

DINT, *s.* (Blow) आघातः, प्रहारः, आहतिः *f.*, अभिघातः, पातः.—(Mark made by a blow) आघातचिह्नं, भङ्गः.—(Force) बलं, शक्तिः *f.*, प्रभावः; 'by dint of,' बलेन, प्रभावात्; 'by dint of penance,' तपःप्रभावात्.

To DINT, *v. a.* आघातेन चिह्न् (c. 10. चिह्नयति -यितुं) or अङ्क् (c. 10. अङ्कयति -यितुं).

DIOCESAN, *s.* प्रधानधर्म्माध्यक्षः, धर्म्माधिपतिः *m.*, प्रधानधर्म्मोपदेशकः.

DIOCESE, *s.* प्रधानधर्म्माध्यक्षाधीनो देशः or प्रदेशः.

DIOPTRICAL, *a.* दूरदर्शनोपकारकः -का -कं, दूरदृष्टिप्रयोजकः -का -कं.

DIOPTRICS, *s. pl.* दूरस्थवस्तुदृष्टिविषयकं चाक्षुषशास्त्रप्रकरणं.

DIORTHOSIS, *s.* वक्राङ्गचिकित्सा, भग्नाङ्गसमाधानं, वक्राङ्गस्य ऋजूकरणं.

To DIP, *v. a.* (Immerge) मज्ज् in caus. (मज्जयति -यितुं), निमज्ज्, प्रमज्ज्, अवगाह् in caus. (-गाहयति -यितुं); आप्लु in caus. (-प्लावयति -यितुं).—(Moisten) क्लिद् in caus. (क्लेदयति -यितुं), सिच् (c. 6. सिञ्चति, सेक्तुं).—(Engage in) व्यापृ (c. 6. -प्रियते -पर्त्तुं), वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत्, आस्था (c. 1. -तिष्ठति -स्थातुं).—(Dip into a book) शास्त्रं चुच् (c. 1. चुच्यति -क्षितुं) or ईषन्मनोयोगेन अधी (c. 2. अधीते, अध्येतुं).

To DIP, *v. n.* (Immerge one's self) मज्ज् (c. 6. मज्जति, मंक्तुं), निमज्ज्, अवगाह् (c. 1. -गाहते -हितुं), व्यवगाह्, विगाह्, प्लु in caus. pass. (प्लाव्यते), आप्लु (c. 1. -प्लवते -प्लोतुं).—(Enter) विश् (c. 6. विशति, वेष्टुं), प्रविश्, निविश्.—(Be engaged in) व्यापृ (c. 6. -प्रियते), व्यापृतः -ता -तं भू, निष्ठा (c. 1. -तिष्ठति -ष्ठातुं), प्रवृत्तः -त्ता -त्तं भू, आरूढः -ढा -ढं भू.—(Choose by chance) दैवम् आस्थाय ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), दैवात् or अकस्माद् ग्रह्.

DIP, *s.* निमज्जनं, अवगाहः, अवनतिः *f.*, अधोगतिः *f.*, पतनं, आनतिः *f.*, नम्रता.

DIPHTHONG, *s.* द्विस्वरः, युक्तस्वरः, स्वरद्वयं, सन्ध्यक्षरं.

DIPLOMA, *s.* पददायकं or अधिकारदायकं or ख्यातिदायकं पत्रं, अधिकारपत्रं.

DIPLOMACY, *s.* (State of acting under a diploma) प्राप्ताधिकारस्य पदं or अवस्था.—(Privileges or customs of ambassadors) दूताधिकारः, राजदूतव्यवहारः.—(Body of ambassadors) दूतसमूहः, राजदूतमण्डलं.—(Business of an ambassador) राजदूतव्यापारः, राजप्रतिनिधिकर्म्म *n.* (न्), दौत्यकर्म्म.—(Dexterity in negotiation) माया.

DIPLOMATIC, *a.* दौतिकः -की -कं, दूतव्यवहारसम्बन्धी -न्धिनी -न्धि (न्), राजप्रतिनिधिकर्म्मविषयकः -का -कं.

DIPPER, *s.* मज्जयिता *m.* (तृ), निमज्जयिता, आप्लावकः.—(Ladle) स्रजः.

DIRE, *a.* दारुणः -णा -णं, घोरः -रा -रं, उग्रः -ग्रा -ग्रं, भयानकः -का -कं, भयङ्करः -रा -रं, भैरवः -वी -वं, रौद्रः -द्री -द्रं, रौद्रदर्शनः -ना -नं, भीषणः -णा -णं, क्रूरः -रा -रं, भीरूमयः -यी -यं.

DIRECT, *a.* (Not crooked, not oblique) अवक्रः -क्रा -क्रं, अजिह्मः -ह्मा -ह्मं, अकुटिलः -ला -लं, ऋजुः -जुः -जु, अनुलोमः -मा -मं, अञ्जसः -सा -सं, अविलोमः -मा -मं; 'a direct flight,' अविडीनं.—(Not collateral) क्रमागतः -ता -तं.—(Express, plain) व्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, अव्यञ्जनः -ना -नं.

To DIRECT, *v. a.* (Aim at, point towards) अभिसन्धा (c. 3. -दधाति -धातुं), उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्; 'to direct a weapon at any one,' अमुकमुद्दिश्य अस्त्रं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or प्रेर् (c. 10. -ईरयति -यितुं); 'he performed a penance directed to the deity,' देवमुद्दिश्य तपस् तेपे.—(Regulate) शास् (c. 2. शास्ति, शासितुं), अनुशास्, प्रशास्; विधृ in caus. (-धारयति -यितुं), विनियम् (c. 1. -यच्छति -यन्तुं), विधा (c. 3. -दधाति -धातुं).—(Guide, lead) नी (c. 1. नयति, नेतुं), दृश् in caus. (दर्शयति -यितुं), दिश्, प्रदिश्.—(Prescribe, point out) निर्दिश्, प्रदिश्, विनिर्दिश्; सूच् (c. 10. सूचयति -यितुं).—(Order, instruct) आदिश्, उपदिश्, आज्ञा in caus. (-ज्ञापयति -यितुं), चुद् in caus. (चोदयति -यितुं).

DIRECTED, *p. p.* (Aimed at) उद्दिष्टः -ष्टा -ष्टं, उद्दिश्य indecl., अभिसंहितः -ता -तं.—(Regulated) शासितः -ता -तं, अनुशासितः -ता -तं, विनियतः -ता -तं, व्यवस्थितः -ता -तं.—(Prescribed) निर्दिष्टः -ष्टा -ष्टं, प्रदिष्टः -ष्टा -ष्टं, देशितः -ता -तं, सूचितः -ता -तं.—(Ordered, instructed) आदिष्टः -ष्टा -ष्टं, उपदिष्टः -ष्टा -ष्टं, प्रचोदितः -ता -तं, प्रेरितः -ता -तं.—(Applied) प्रयुक्तः -क्ता -क्तं, अर्पितः -ता -तं; 'well-directed,' सुप्रयुक्तः -क्ता -क्तं.

DIRECTION, *s.* (Aim, tendency) सन्धानं, अभिसन्धानं, उद्देशः.—(Order, command) आदेशः, निदेशः, निर्देशः, आज्ञा, शासनं, शास्तिः *f.*, चोदनं, प्रेरणा, प्रयुक्तिः *f.*, मतं, वचनं.—(Management) नयः, नायः, प्रणयनं, नेतृत्वं, अधिकारः, अधिष्ठातृत्वं, सम्पादनं, निर्देशः.—(Address of a letter) पत्रसंज्ञा, पत्रादेशः, पत्रोद्देशः.—(Place of abode) वासस्थानं; 'in three directions,' त्रेधा; 'in every direction,' सर्व्वपथीनः -ना -नं, चतुर्दिक्षु; 'following the natural direction,' अनुलोमनं.

DIRECTIVE, *a.* देशकः -का -कं, उद्देशकः -का -कं, आदेशी -शिनी -शि (न्), निर्देशकः -का -कं, दर्शकः -का -कं, सूचकः -का -कं.

DIRECTLY, *adv.* सद्यस्, अचिरात्, अचिरेण, सपदि, झटिति, अनन्तरं, तत्क्षणात्, क्षणान्तरे, आशु, अविलम्बितं, शीघ्रं, क्षिप्रं, तत्काले.

DIRECTOR, *s.* नायकः, अधिष्ठाता *m.* (तृ), शासिता *m.* (तृ), अनुशासकः, अध्यक्षः, आदेष्टा *m.* (ष्टृ), निर्देष्टा *m.*, आदेशी *m.* (न्), अधिकारी *m.* (न्), ईशिता *m.* (तृ), सम्पादकः, अवेक्षिता *m.* (तृ).

DIREFUL, *a.* दारुणः -णा -णं, घोरः -रा -रं, भीरूमयः -यी -यं. *See* DIRE.

Digitized by Google

DIREFULNESS, DIRENESS, *s.* दारुणत्वं, दारुणं, घोरता, उग्रता, भयानकत्वं, भीमता, क्रूरता, रौद्रता.

DIREPTION, *s.* हरणं, अपहारः, अपहरणं, अभिग्रहः, अभिहारः, विलोपनं.

DIRGE, *s.* करुणं, करुणार्थकं गीतं, कारुणिकगीतं, करुणमयं गीतं.

DIRK, *s.* कट्टारः, कृपाणी, छुरिका, शङ्कुः *m.*, कर्त्तरी, असिपुत्रिका.

DIRT, *s.* (Mud, filth) मलं, पङ्कः, कुपङ्कः, अमेध्यं, कर्दमः, कल्कं, जञ्जालः -लं, कलुषं.—(Sordidness) कदर्य्यत्वं, मालिन्यं.

To DIRT, *v. a.* मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), मलेन or पङ्केन दुष् in caus. (दूषयति -यितुं) or लिप् (c. 6. लिम्पति, लेप्तुं).

DIRTIED, *p. p.* मलिनितः -ता -तं, मलदूषितः -ता -तं, पङ्कदूषितः -ता -तं, अमेध्यलिप्तः -प्ता -प्तं, अमेध्याक्तः -क्ता -क्तं, कलुषितः -ता -तं.

DIRTILY, *adv.* समलं, मलिनं, सकर्दमं, सकल्कं, मलीमसं, समालिन्यं.

DIRTINESS, *s.* मालिन्यं, समलता, मलवत्त्वं, अमेध्यता -त्वं, कलुषत्वं, अशुद्धता.

DIRTY, *a.* (Filthy) मलिनः -ना -नं, समलः -ला -लं, मलवान् -वती -वत् (त्), मलदूषितः -ता -तं, मलीमसः -सा -सं, पङ्की -ङ्किनी -ङ्कि (न्) or मलपङ्की, पङ्किलः -ला -लं, कलुषः -षा -षं -षी -षिणी -षि (न्), सकर्दमः -मा -मं, कार्दमः -मी -मं, कल्की -ल्किनी -ल्कि (न्), कल्मषः -षा -षं, सजञ्जालः -ला -लं, कश्मलः -ला -लं, आविलः -ला -लं, मलीयान् -यसी -यः (स्), अशुद्धः -द्धा -द्धं.—(Mean, base) नीचः -चा -चं, खलः -ला -लं, कदर्य्यः -र्य्या -र्य्यं, कुत्सितः -ता -तं; 'dirty clothes,' वरासी.

To DIRTY, *v. a.* मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), मलेन or अमेध्येन or पङ्केन दुष् in caus. (दूषयति -यितुं) or लिप् (c. 6. लिम्पति, लेप्तुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं), मलिनीकृ, समलं -लां -लं कृ, अमेध्यं -ध्यां -ध्यं कृ, कलङ्क (nom. कलङ्कयति -यितुं).

DIRUPTION, *s.* स्फोटनं, स्फुटनं, भेदः, विभेदः, विभङ्गः, विदारणं.

DISABILITY, *s.* अशक्तिः *f.*, असामर्थ्यं, अक्षमता, दौर्बल्यं, शक्तिहीनता, अयोग्यता, अनुपयुक्तता, निषेधः.

To DISABLE, *v. a.* अशक्तं -क्तां -क्तं कृ, अशक्तीकृ, असमर्थं -र्थां -र्थं कृ, अक्षमं -मां -मं कृ, दुर्बलीकृ, बलं or शक्तिं हृ (c. 1. हरति, हर्त्तुं), विकलीकृ, विहस्तीकृ, उपहन् (c. 2. -हन्ति -न्तुं).

DISABLED, *p. p.* हृतशक्तिः -क्तिः -क्ति or उपहतशक्तिः, विहस्तीकृतः -ता -तं.

To DISABUSE, *v. a.* (Undeceive) भ्रमं or भ्रान्तिं or मोहं or मिथ्यामतिं छिद् (c. 7. छिनत्ति, छेत्तुं) or अपनी (c. 1. -नयति, नेतुं) or हृ (c. 1. हरति, हर्त्तुं), भ्रान्तेर् मुच् (c. 6. मुञ्चति, मोक्तुं), मुक्तभ्रान्तिं कृ, विगतमोहं -हां -हं कृ.

To DISACCUSTOM, *v. a.* अव्यवहारितं -तां -तं कृ, व्यवहारं or अभ्यासं लुप् (c. 6. लुम्पति, लोप्तुं) or निवृत् in caus.

DISADVANTAGE, *s.* अनर्थः, अलाभः, अहितं, अनिष्टं, अफलं, अपायः, अपचयः, अपकारः, अपचितिः *f.*, अपकृतं, अप्राप्तिः *f.*, क्षतिः *f.*, हानिः *f.*, हिंसा, क्षयः, उपक्षयः, अपहरः, नाशः, विरोधः, व्याघातः, बाधः, अनुपकारः.

To DISADVANTAGE, *v. a.* अपकृ, अपायं or अनर्थं जन् in caus. (जनयति -यितुं), अहिताय or अलाभाय भू, विरुध् (c. 7. -रुणद्धि -रोद्धुं), हिंस् (c. 1. हिंसति -सितुं).

DISADVANTAGEOUS, *a.* अपकारकः -का -कं -री -रिणी -रि (न्), अहितः -ता -तं, अनर्थः -र्था -र्थं -र्थकः -का -कं, निरर्थकः -का -कं, अफलः -ला -लं, विरोधी -धिनी -धि (न्), प्रतिकूलः -ला -लं, अनुपकारकः -का -कं, अनिष्टजनकः -का -कं, क्षतिकारकः -का -कं, उपघातकः -का -कं, हिंसकः -का -कं, अमङ्गलः -ला -लं, सापकारः -रा -रं.

DISADVANTAGEOUSLY, *adv.* अहितं, अनिष्टं, अलाभाय, अहिताय, विरोधेन, विरुद्धं, प्रतिकूलं, प्रातिकूल्येन, अनर्थकं, अमङ्गलं, सापकारं.

To DISAFFECT, *v. a.* (Cause disaffection) विरञ्ज् in caus. (-रञ्जयति -यितुं), विरक्तीकृ, वैरक्तं जन् (c. 10. जनयति -यितुं), उपजप् (c. 1. -जपति -पितुं), कर्णे जप् or उपजप्, भेदं or वैरं कृ.

DISAFFECTED, *p. p.* विरक्तः -क्ता -क्तं, अहितः -ता -तं, विप्रियः -या -यं, अहितैषी -षिणी -षि (न्) or अप्रियैषी, क्षीणभक्तिः -क्तिः -क्ति, अभक्तः -क्ता -क्तं, अभक्तिमान् -मती -मत् (त्), अहितबुद्धिः -द्धिः -द्धि, अहितकारी -रिणी -रि (न्).

DISAFFECTEDLY, *adv.* विरक्तं, अहितं, सवैरक्तं, सवैराग्यं, विप्रियं.

DISAFFECTION, *s.* विरक्तिः *f.*, वैरक्तं, विरागः, वैराग्यं, अपरागः, अभक्तिः *f.*, विप्रियता, अहितत्वं, अभक्तिमत्त्वं.

DISAFFIRMANCE, *s.* अपवादः, अपलापः, प्रत्याख्यानं, खण्डनं, अस्वीकारः.

To DISAGREE, *v. n.* (In opinion) विवद् (c. 1. -वदते -दितुं), विसंवद् (-वदति), न सम्मन् (c. 4. -मन्यते -मन्तुं), न अनुमन्, न स्वीकृ, असम्मतः -ता -तं भू, अन्यमतीभू.—(Differ, not to suit) भिद् in pass. (भिद्यते), असदृशः -शी -शं भू, न युज् in pass. (युज्यते).—(Be opposed to) विरुध् (c. 7. -रुणद्धि -रोद्धुं).

DISAGREEABLE, *s.* (Unpleasing) अप्रियः -या -यं, विप्रियः -या -यं, कुप्रियः -या -यं, अनभिमतः -ता -तं, अननुमतः -ता -तं, अरम्यः -म्या -म्यं, अनिष्टः -ष्टा -ष्टं, अहितः -ता -तं, अमनोज्ञः -ज्ञा -ज्ञं, अमनोहरः -रा -रं, अरुचिरः -रा -रं, अप्रीतिकरः -री -रं, अनीहितः -ता -तं, व्यलीकः -का -कं, अलीकः -का -कं, असुखदः -दा -दं, निःसुखः -खा -खं, कष्टः -ष्टा -ष्टं.—(Contrary) विरुद्धः -द्धा -द्धं, विपरीतः -ता -तं, प्रतिकूलः -ला -लं.

DISAGREEABLENESS, *s.* अप्रियता, विप्रियता, अरम्यता, अनिष्टत्वं, व्यलीकता, अलीकता, अनभिमतत्वं, अमनोज्ञत्वं, कष्टता, विरुद्धता, वैपरीत्यं.

DISAGREEABLY, *adv.* अप्रियं, अरम्यं, अनिष्टं, व्यलीकं, अरुचिरं, विरुद्धं.

DISAGREEING, *p. p.* विवदमानः -ना -नं, असम्मतः -ता -तं, परस्परविरुद्धः -द्धा -द्धं.

DISAGREEMENT, *s.* (Difference) भेदः, विभेदः, भिन्नता, असमता, असाम्यं.—(Difference of opinion) विमतिः *f.*, वैमत्यं, मतिप्रभेदः, मतिविपर्य्ययः, असम्मतिः *f.*, विसंवादः, अस्वीकारः.—(Quarrel) कलहः, विप्रतिपत्तिः *f.*, विप्रयोगः.—(Contrariety) विरोधः, विरुद्धता, विपरीतता.

To DISALLOW, *v. a.* (Deny) प्रत्याख्या (c. 2. -ख्याति -तुं), निह्नु (c. 2. -ह्नुते -होतुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), अपलप् (c. 1. -लपति -पितुं), निरस् (c. 4. -अस्यति -असितुं).—(Not to permit) न अनुज्ञा (c. 9. -जानाति -ज्ञातुं), न अनुमन् (c. 4. -मन्यते -मन्तुं), निषिध् (c. 1. -षेधति -षेद्धुं).—(Censure) निन्द् (c. 1. निन्दति -न्दितुं), गर्ह् (c. 1. गर्हते -र्हितुं).

DISALLOWABLE, *a.* प्रत्याख्येयः -या -यं, अननुज्ञेयः -या -यं, अधर्म्यः -र्म्या -र्म्यं.

DISALLOWANCE, *s.* प्रत्याख्यानं, प्रत्यादेशः, निषेधः, प्रतिषेधः, अननुज्ञा, निरसनं.

DISALLOWED, *p. p.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, अननुज्ञातः -ता -तं, प्रत्याख्यातः -ता -तं, वारितः -ता -तं, निवारितः -ता -तं.

To DISANIMATE, *v. a.* निर्जीवीकृ, विषण्णीकृ, अवसद् in caus. (-सादयति -यितुं).

DISANIMATION, *s.* निर्जीवीकरणं, जीवितनाशः, प्राणहरणं, जीवितहरणं.

To DISANNUL, *v. a.* लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, खण्ड् (c. 10. खण्डयति -यितुं), मोघीकृ, निष्फल (nom. निष्फलयति -यितुं), अन्यथा कृ.

DISANNULLED, *p. p.* लुप्तः -प्ता -प्तं, मोघीकृतः -ता -तं, अनिष्पन्नः -न्ना -न्नं.

DISANNULMENT, *s.* लोपः, खण्डनं, मोघीकरणं, अन्यथाकरणं.

To DISAPPEAR, *v. n.* अन्तर्धा in pass. (-धीयते), तिरोधा in pass., तिरोभू, तिरस् (nom. तिरस्यति), नश् (c. 4. नश्यति, नशितुं), प्रणश्, तिरोगम् (c. 1. -गच्छति -गन्तुं), विली (c. 4. -लीयते -लेतुं), अप्रत्यक्षीभू, अदृश्यः -श्या -श्यं भू, अस्तं गम्.

DISAPPEARED, *p. p.* अन्तर्हितः -ता -तं, तिरोहितः -ता -तं, तिरोगतः -ता

Digitized by Google

-तं, नष्टः -ष्टा -ष्टं, अदृष्टः -ष्टा -ष्टं, अदृश्यः -श्या -श्यं, विलीनः -ना -नं, चक्षुरविषयः -या -यं, अप्रत्यक्षः -क्षा -क्षं, अलोकितः -ता -तं, अदृष्टिगोचरः -रा -रं, परोक्षः -क्षा -क्षं, चक्षुरतीतः -ता -तं.

DISAPPEARANCE, *s.* अन्तर्धा -र्धानं, अन्तर्द्धिः *m.*, तिरोधानं, तिरस्कारः, तिरस्क्रिया, अविषयः, अप्रत्यक्षता, अदर्शनं, अलोकनं, अपवारणं, परोक्षं, अगोचरं, अस्तमयनं, अन्तर्हितत्वं.—(Departure) अपगमः, अपायः.

To DISAPPOINT, *v. a.* आशाः खण्ड् (c. 10. खण्डयति -यितुं), सङ्कल्पं or वाञ्छाः or मनोरथान् हन् (c. 2. हन्ति -न्तुं) or प्रतिहन् or भञ्ज् (c. 7. भनक्ति, भंक्तुं), भग्नाशं -शां -शं कृ, मोघीकृ, व्यर्थीकृ, विफलीकृ, वृथा कृ, मृषा कृ, वञ्च् (c. 10. वञ्चयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्.

DISAPPOINTED, *p. p.* भग्नाशः -शा -शं, हताशः -शा -शं, मनोहतः -ता -तं, खण्डितः -ता -तं, खण्डिताशंसः -सा -सं, भग्नसङ्कल्पः -ल्पा -ल्पं, भग्नोद्यमः -मा -मं, आशाविभिन्नः -न्ना -न्नं, मोघाशः -शा -शं, मोघवाञ्छितः -ता -तं, अनधिगतमनोरथः -था -थं, अलब्धाभीप्सितः -ता -तं, विफलीकृतः -ता -तं, प्रतिहतः -ता -तं, अकृतार्थः -र्था -र्थं, विलक्षितः -ता -तं, प्रतिबद्धः -द्धा -द्धं, विप्रलब्धः -ब्धा -ब्धं, वञ्चितः -ता -तं.

DISAPPOINTMENT, *s.* आशाभङ्गः, आशाखण्डनं, उद्यमभङ्गः, सङ्कल्पभङ्गः, फलखण्डनं, विफलीकरणं, कर्म्मध्वंसः, नैराश्यं, विप्रलम्भः, विषादः, विसंवादः, प्रत्यवायः.

DISAPPROBATION, *s.* अप्रसादः, निन्दा, अप्रीतिः *f.*, विमतिः *f.*, विरागः, वैरक्यं, विप्रियता, असम्मतिः *f.*, अस्वीकारः, अनिच्छा, गर्हा -र्हणं, जुगुप्सा, घृणा.

To DISAPPROVE, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), गर्ह् (c. 1. गर्हते -र्हितुं), न सम्मन् (c. 4. -मन्यते -मन्तुं), न अनुमन्, न अभिमन्, न स्वीकृ, न प्रशंस् (c. 1. -शंसति -सितुं), न प्रतिनन्द् (c. 1. -नन्दति -न्दितुं), न रुच् (c. 1. रोचते -चितुं) with dat.; as, 'he disapproves of that,' तत् तस्मै न रोचते.

DISAPPROVED, *p. p.* अनभिमतः -ता -तं, असम्मतः -ता -तं, अमतः -ता -तं, अनिष्टः -ष्टा -ष्टं, अप्रशस्तः -स्ता -स्तं, गर्हितः -ता -तं, निन्दितः -ता -तं, अस्वीकृतः -ता -तं, विद्विष्टः -ष्टा -ष्टं.

To DISARM, *v. a.* शस्त्रं or अस्त्रं हृ (c. 1. हरति, हर्तुं), आयुधम् अपनी (c. 1. -नयति -नेतुं), निरायुधं -धां -धं कृ, निःशस्त्रं -स्त्रां -स्त्रं कृ, विशस्त्रीकृ, विसज्जीकृ.

DISARMED, *p. p.* निरायुधः -धा -धं, निरस्त्रः -स्त्रा -स्त्रं, निःशस्त्रः -स्त्रा -स्त्रं, शस्त्रवर्জ्जितः -ता -तं; 'disarmed of resentment,' क्षीणमन्युः -न्युः -न्यु.

To DISARRANGE, *v. a.* क्रमं or पर्य्यायं भञ्ज् (c. 7. भनक्ति, भंक्तुं), पर्य्यस् (c. 4. -अस्यति -असितुं), व्यस्, विक्षुभ् in caus. (-क्षोभयति -यितुं), आकुलीकृ, सङ्करीकृ.

DISARRANGEMENT, *s.* अक्रमः, उत्क्रमः, व्युत्क्रमः, क्रमभङ्गः, अपर्य्यायः, अपरिपाटिः *f.*, प्रत्यवायः, व्यस्तता, असंस्थानं.

To DISARRAY, *v. a.* (Undress) उच्छद् (c. 10. -छादयति -यितुं), अपनह् (c. 4. -नह्यति -नद्धुं), विवस्त्रीकृ.

DISARRAY, *s.* (Disorder of an army) समुत्पिञ्जः, पिञ्जलः, व्यूहभङ्गः.

DISASTER, *s.* आपद् *f.*, विपद् *f.*, व्यसनं, विपत्तिः *f.*, व्यापद् *f.*, विप्लवः, उपप्लवः, उपद्रवः, अनिष्टपातः, अत्ययः, दुर्दैवं, दुर्घटना, दौर्गत्यं, दुःखं, क्लेशः.—(From heaven) विनिपातः, उत्पातः, विनिहतः.

To DISASTER, *v. a.* पीड् (c. 10. पीडयति -यितुं), उपपीड्, अभिपीड्, बाध् (c. 1. बाधते -धितुं), उपद्रु (c. 1. -द्रवति -द्रोतुं), उपप्लु (c. 1. -प्लवते -प्लोतुं).

DISASTROUS, *a.* आत्ययिकः -की -कं, व्यसनी -निनी -नि (न्), विपद्युक्तः -क्ता -क्तं, आपन्नः -न्ना -न्नं, दुर्गतः -ता -तं, दुर्भाग्यः -ग्या -ग्यं, दैवोपहतः -ता -तं, दुःखी -खिनी -खि (न्), दुरन्तः -न्ता -न्तं, उपाकृतः -ता -तं, दारुणः -णा -णं, अशान्तिकरः -री -रं.

To DISAVOW, *v. a.* प्रत्याख्या (c. 2. -ख्याति -तुं), निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपह्नु, अपलप् (c. 1. -लपति -पितुं), न स्वीकृ, न अङ्गीकृ.

DISAVOWAL, *s.* प्रत्याख्यानं, निह्नवः, अपह्नवः, निह्नुतिः *f.*, अपलापः, अस्वीकारः.

To DISAUTHORIZE, *v. a.* शक्तिं or प्रामाण्यं or प्रभुत्वं or अधिकारित्वं हृ (c. 1. हरति, हर्तुं) or अपहृ, लुप्तप्रमाणं -णां -णं कृ, न अनुज्ञा (c. 9. -जानाति -ज्ञातुं).

To DISBAND, *v. a.* युद्धकर्म्मणो मुच् (c. 6. मुञ्चति, मोक्तुं), सैन्यान् विसृज् (c. 6. -सृजति -स्रष्टुं), सैन्यभङ्गं कृ.

To DISBAND, *v. n.* युद्धकर्म्मणो मुच् in pass. (मुच्यते) or विसृज in pass. (-सृज्यते).

To DISBARK, *v. a.* नौकाया अवरुह् in caus. (-रोपयति -यितुं) or अवतृ in caus. (-तारयति -यितुं).

DISBELIEF, *s.* अविश्वासः, अप्रत्ययः, अश्रद्धा, अभक्तिः *f.*, अविश्रम्भः, प्रत्ययाभावः.

To DISBELIEVE, *v. a.* न प्रती (c. 2. प्रत्येति -तुं rt. इ), न विश्वस् (c. 2. -श्वसिति -तुं), न श्रद्धा (c. 2. -दधाति -धातुं), न प्रत्ययीकृ.

DISBELIEVER, *s.* अविश्वासी *m.* (न्), अप्रत्ययी *m.* (न्), अश्रद्दधानः, नास्तिकः.

DISBELIEVING, *a.* अश्रद्धालुः -लुः -लु, अश्रद्धावान् -वती -वत् (त्).

To DISBRANCH, *v. a.* शाखां छिद् (c. 7. छिनत्ति, छेत्तुं), निःशाखं -खां -खं कृ.

To DISBURDEN, *v. a.* भारम् उत्तृ in caus. (-तारयति -यितुं) or अवतृ in caus., भारात् मुच् (c. 6. मुञ्चति, मोक्तुं) or विमुच्, भारं विनी (c. 1. -नयति -नेतुं) or अपनी, निर्भारं -रां -रं कृ, रिक्तभारं -रां -रं कृ, विशुध् in caus. (-शोधयति -यितुं); 'to disburden the mind,' मनोगतं or अन्तर्गतं मनः परस्मै व्यक्तीकृ or व्याख्या (c. 2. -ख्याति -तुं).

To DISBURSE, *v. a.* व्यय् (c. 1. व्ययति, c. 10. व्यययति -यितुं root इ), व्ययीकृ, विसृज् (c. 6. -सृजति -स्रष्टुं), विनियुज् (c. 7. -युंक्ते -योक्तुं).

DISBURSED, *p. p.* व्ययितः -ता -तं, व्ययीकृतः -ता -तं, व्ययीभूतः -ता -तं, अपचितः -ता -तं, विसर्জ्जितः -ता -तं.

DISBURSEMENT, *s.* व्ययः, धनव्ययः, व्ययीकरणं, विनियोगः, विसर्गः, त्यागः, अपचितिः *f.*, अपचयः; 'receipt and disbursement,' आयव्ययौ.

DISBURSER, *s.* व्ययी *m.* (न्), व्ययकर्त्ता *m.* (र्तृ), अपचेता *m.* (तृ).

DISCALCEATED, *p. p.* निष्पादुकः -का -कं, अपपादत्रः -त्रा -त्रं, उपानद्वर्জ्जितः -ता -तं.

To DISCANDY, *v. a.* विली in caus. (-लाययति -यितुं), विद्रु in caus. (-द्रावयति -यितुं).

To DISCARD, *v. a.* अपास् (c. 4. -अस्यति -असितुं), अवमुच् (c. 6. -मुञ्चति -मोक्तुं), अवसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्জ्जयति -यितुं), विसृज्, व्यपसृज्, उत्सृज्; प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अपहा (c. 3. -जहाति -हातुं), अपहा, विहा; निराकृ, पराकृ; उञ्छ् (c. 6. उञ्छति -ञ्छितुं), प्रोञ्छ्, दूरीकृ, खण्ड् (c. 10. खण्डयति -यितुं).

DISCARDED, *p. p.* अपास्तः -स्ता -स्तं, अवमृष्टः -ष्टा -ष्टं, प्रतिक्षिप्तः -प्ता -प्तं, निराकृतः -ता -तं, सन्त्यक्तः -क्ता -क्तं, प्रोञ्छितः -ता -तं, अवधूतः -ता -तं.

DISCARNATE, *a.* मांसहीनः -ना -नं, निर्म्मांसः -सा -सं, अमांसः -सा -सं.

To DISCERN, *v. a.* (Descry, see) दृश् (c. 1. पश्यति, द्रष्टुं), प्रदृश्, सम्प्रदृश्, प्रतिदृश्, परिदृश्, अनुदृश्, विदृश्, सन्दृश्; ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, निरीक्ष्, वीक्ष्, प्रेक्ष्, सम्प्रेक्ष्; आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), समालोक्, अवलोक्, विलोक्, लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, समालक्ष्, संलक्ष्, आलोच् (c. 10.

Digitized by Google

-लोचयति -यितुं), निर्वर्ण् (c. 10. -वर्णयति -यितुं).—(Distinguish, judge) विविच् (c. 7. -विनक्ति -वेक्तुं or caus. -वेचयति -यितुं), विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), विचर् in caus. (-चारयति -यितुं), निर्णी (c. 1. -णयति -णेतुं), विभू in caus. (-भावयति -यितुं), परिच्छिद् (c. 7. -छिनत्ति -छेत्तुं).

DISCERNED, *p. p.* दृष्टः -ष्टा -ष्टं, ईक्षितः -ता -तं, विज्ञातः -ता -तं.

DISCERNER, *s.* द्रष्टा *m.* (ष्टृ), ईक्षिता *m.* (तृ), विज्ञः, विवेकदृश्वा *m.* (न्), विवेक्ता *m.* (क्तृ).

DISCERNIBLE, *a.* दृश्यः -श्या -श्यं, दृष्टिगोचरः -रा -रं, विज्ञेयः -या -यं, विवेचनीयः -या -यं, विभाव्यः -व्या -व्यं, विभावनीयः -या -यं, प्रत्यक्षः -क्षा -क्षं.

DISCERNIBLY, *adv.* प्रत्यक्षतस्, दृष्टिगोचरं, व्यक्तं, विज्ञेयं, स्पष्टं.

DISCERNING, *a.* विवेकी -किनी -कि (न्), विवेकदृश्वा -श्वा -श्व (न्), विज्ञः -ज्ञा -ज्ञं, अभिज्ञः -ज्ञा -ज्ञं, दीर्घदृष्टिः -ष्टिः -ष्टि or दूरदृष्टिः, मर्म्मज्ञः -ज्ञा -ज्ञं, परिणामदर्शी -र्शिनी -र्शि (न्), बुद्धिमान् -मती -मत् (त्).

DISCERNINGLY, *adv.* सविज्ञानं, सविवेकं, विज्ञवत्, विचारेण, परिच्छेदपूर्व्वं.

DISCERNMENT, *s.* विवेकः -कता, विवेचनं, विवेकृत्वं, विवेकदृश्वत्वं, विज्ञानं, परिच्छेदः, विचारः, परीक्षा, अवबोधः, अर्थज्ञानं, विभावनं, अवधारणं, विज्ञिः *f.*, दूरदृष्टिः *f.*, प्रेक्षा.

To DISCERP, *v. a.* व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), खण्ड् (c. 10. खण्डयति -यितुं), खण्डशः कृ, खण्डं खण्डं कृ, लवशः कृ, शकलीकृ, विदृ in caus. (-दारयति -यितुं).

DISCERPTIBLE, *a.* व्यवच्छेद्यः -द्या -द्यं, विभेद्यः -द्या -द्यं, खण्डनीयः -या -यं.

DISCERPTION, *s.* व्यवच्छेदः, विदारणं, विशसनं, शकलीकरणं.

To DISCHARGE, *v. a.* (Unload) भारम् उत्तृ in caus. (-तारयति -यितुं) or विनी or अपनी, भारात् मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं).—(Set free) मुच्, विमुच्, प्रविमुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्ज्जयति -यितुं), निस्तृ in caus.—(From obligation) ऋणात् उत्तृ or मुच् or शुध् in caus. (शोधयति -यितुं), आनृण्यं दा.—(Pay a debt, &c.) ऋणं शुध् in caus. or अपनी or विनी or अपाकृ or अपवृज् in caus. (-वर्ज्जयति -यितुं) or अपनुद् (c. 6. -नुदति -नोत्तुं) or निरादिश् (c. 6. -दिशति -देष्टुं), आनृण्यं गम् (c. 1. गच्छति, गन्तुं) or उपगम् or आप् (c. 5. आप्नोति, आप्तुं).—(Clear, absolve) शुध् in caus., परिशुध्; पापात् मुच्.—(Dismiss from service) पदात् or अधिकाराद् अवसृज् or विसृज् or मुच् or निराकृ, or अवरुह् in caus. (-रोपयति -यितुं) or अपास् (c. 4. -अस्यति -असितुं) or च्यु in caus. (च्यावयति -यितुं) or निःसृ in caus. (-सारयति -यितुं) or निष्कस् in caus. (-कासयति -यितुं) or बहिष्कृ.—(Perform) अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, सम्पद् in caus. (-पादयति -यितुं), विधा (c. 3. -दधाति -धातुं), आचर् (c. 1. -चरति -रितुं), कृ, सञ्जू, निर्वह् in caus. (-वाहयति -यितुं).—(A missile) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, अस् (c. 4. अस्यति, असितुं), प्रास्, मुच्, प्रमुच्, सृज्, ईर् (c. 10. ईरयति -यितुं), उदीर्, पत् in caus. (पातयति -यितुं).—(A gun) लोहगोलान् युद्धनाडेः प्रक्षिप् or निःसृ in caus., युद्धनाडिस्थम् आग्नेयचूर्णं ज्वल् in caus. (ज्वालयति -यितुं).—(Emit, pour forth) उदीर्, मुच्, प्रमुच्, उत्सृज्, उद्गृ (c. 6. -गिरति -गरितुं -रीतुं), उद्वम् (c. 1. -वमति -मितुं), उच्चर् in caus. (-चारयति -यितुं), सु in caus. (स्रावयति -यितुं or c. 1. स्रवति, स्रोतुं), प्रसु, क्षर् (c. 1. क्षरति -रितुं), स्कन्द् in caus. (स्कन्दयति -यितुं).

To DISCHARGE, *v. n.* मुच् in pass. (मुच्यते), सु (c. 1. स्रवति, स्रोतुं), विली (c. 4. -लीयते).

DISCHARGE, *s.* (Unloading) भारावतरणं, उत्तरणं.—(Setting free) मोक्षः, मुक्तिः *f.*, परिमोक्षणं, उत्सर्गः, निस्तारः.—(From obligation) ऋणमोक्षः, ऋणमुक्तिः *f.*, उत्तरणं.—(Payment of a debt) ऋणशोधनं, ऋणापनयनं, ऋणापाकरणं, ऋणसिद्धिः *f.*, आनृण्यं, ऋणापनोदनं, विगणनं, निरादेशः.—(Acquittance) पापमोचनं, परिशोधः, निस्तारः, निष्कृतिः *f.*—(Dismission from office) अधिकाराद् विसर्ज्जनं or निराकरणं or अपासनं or अवरोपणं or बहिष्करणं, पदच्युतिः *f.*—(Performance) अनुष्ठानं, आचरणं, विधानं, करणं, निर्वाहः; 'discharge of one's duties,' कर्म्मानुष्ठानं.—(Voiding, emission) उत्सर्गः, विसर्गः, मोक्षणं, स्रावः, आस्रावः, आस्रवः, उच्चारः, उद्गारः.

To DISPERSE, *v. a.* विकॄ (c. 6. -किरति -करितुं -रीतुं), इतस्ततः or बहुधा or नानादिक्षु विद्रु in caus. (-द्रावयति -यितुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), व्यस् (c. 4. -अस्यति -असितुं), विधू (c. 5. -धूनोति -धवितुं), निर्धू, इतस्ततो विचल् in caus. (-चालयति -यितुं) or विसृ in caus. (-सारयति -यितुं) or अपनुद् (c. 6. -नुदति -नोत्तुं) or निरस् or गम् in caus. (गमयति -यितुं) or विसृ in caus. (-सारयति -यितुं) or प्रसृ or विध्मा (c. 1. -धमति -ध्मातुं) or अपध्मा; 'dispersing darkness,' तमोनुदः -दा -दं, तमोपहः -हा -हं, तमोहरः -रा -रं. *See* DISPERSER; 'dispersing to different quarters,' अपदिश्य.

DISPERSED, *p. p.* विकीर्णः -र्णा -र्णं, विद्रुतः -ता -तं, विक्षिप्तः -प्ता -प्तं, विगलितः -ता -तं, व्यस्तः -स्ता -स्तं, सुव्यस्तः -स्ता -स्तं, बहुधागतः -ता -तं, विधूतः -ता -तं, विनिर्धूतः -ता -तं, विभिन्नः -न्ना -न्नं, विष्कन्नः -न्ना -न्नं, प्रसृतः -ता -तं, प्रवृद्धः -द्धा -द्धं.

DISPERSEDLY, *adv.* विद्रुतं, असंहतं, सुव्यस्तं, सुविस्तरं, बहुधा, पृथक्.

DISPERSER, *s.* विद्रावयिता *m.* (तृ), विकिरणकृत्; 'a disperser of doubt,' संशयोच्छेदकः; also expressed by नुदः, घ्नः, घाती *m.* (न्), अपहः, नाशकः, हरः, हारी *m.* (न्), अन्तकः in comp.

DISPERSION, *s.* विद्रावणं, विक्षेपः -पणं, परिक्षेपः, विकिरः -रणं, प्रसारणं, विसारणं, विभेदः, बहुधागमनं.

To DISPIRIT, *v. a.* उत्साहं or मनो भञ्ज् (c. 7. भनक्ति, भंक्तुं), उत्साहभङ्गं कृ, साहसभङ्गं कृ, आशाभङ्गं कृ, मनोभङ्गं कृ, विषद् in caus. (-षादयति -यितुं), विषण्णीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं), म्लानीकृ, खिद् in caus. (खेदयति -यितुं).

DISPIRITED, *p. p.* भग्नोत्साहः -हा -हं, भग्नमनाः -नाः -नः (स्), भग्नसाहसः -सा -सं, विषण्णः -ण्णा -ण्णं, निरुत्साहः -हा -हं, म्लानतेजाः -जाः -जः (स्) or निस्तेजाः, दीनमनस्कः -स्का -स्कं, दीनचेतनः -ना -नं, खिन्नः -न्ना -न्नं.

To DISPLACE, *v. a.* (Move out of place) स्वस्थानाद् विचल् in caus. (-चालयति -यितुं) or चल् in caus. or अपसृ in caus. (-सारयति -यितुं) or निःसृ in caus. or निरस् (c. 4. -अस्यति -असितुं) or अपनुद् (c. 6. -नुदति -नोत्तुं) or निराकृ or व्यपोह् (c. 1. -ऊहते -हितुं) or अपकृष् (c. 1. -कर्षति -क्रष्टुं), स्थानान्तरीकृ.—(Remove from office) पदात् or अधिकाराद् भंश् in caus. (-भंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or निराकृ.

DISPLACED, *p. p.* स्थानभ्रष्टः -ष्टा -ष्टं, स्थानच्युतः -ता -तं, पदनिराकृतः -ता -तं.

DISPLACING, *s.* स्वस्थानाद् अपसारणं or अपनुत्तिः *f.*, or निरसनं or निराकरणं.

To DISPLANT, *v. a.* (Remove a plant) उन्मूल् (c. 10. -मूलयति -यितुं), उत्पद् (c. 10. -पाटयति -यितुं), उत्खन् (c. 1. -खनति -नितुं).—(Eject a people) निर्वस् in caus. (-वासयति -यितुं), विवस्, वासस्थानाद् निरस् (c. 4. -अस्यति -असितुं).

To DISPLAY, *v. a.* (Spread wide) विस्तृ in caus. (-स्तारयति -यितुं), परिस्तृ, विकाश् in caus. (-काशयति -यितुं), वितन् (c. 8. -तनोति -नितुं), प्रसृ in caus. (-सारयति -यितुं), प्रपच् (c. 10. -पञ्चयति -यितुं).—(Exhibit) प्रकाश् in caus., दृश् in caus. (दर्शयति -यितुं), प्रत्यक्षीकृ, व्यक्तीकृ, प्रकटीकृ, स्पष्टीकृ, स्फुटीकृ, व्यञ्ज् (c. 7. -अनक्ति c. 10. -अञ्जयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), आविष्कृ, प्रादुष्कृ, प्रकट (nom. प्रकटयति -यितुं).—(Exhibit ostentatiously) सगर्व्वं or सदम्भं दृश् in caus.

DISPLAY, *s.* प्रकाशनं, विकाशनं, दर्शनं, प्रपञ्चः, प्रत्यक्षीकरणं, प्रकाशीकरणं, प्रकटीकरणं, व्यञ्जनं, व्यक्तिः *f.*, विवरणं, प्रादुष्करणं, आविष्करणं.

DISPLAYED, *p. p.* प्रकाशितः -ता -तं, प्रकाशीकृतः -ता -तं, प्रकटीकृतः -ता -तं, प्रत्यक्षीकृतः -ता -तं, दर्शितः -ता -तं, विवृतः -ता -तं, व्यक्तीकृतः -ता -तं.

To DISPLEASE, *v. a.* (Offend any one) कस्यापि विप्रियं or अप्रियं or व्यलीकं कृ, असन्तोषं or अतुष्टिं जन् (c. 10. जनयति -यितुं), वितुष् in caus. (-तोषयति -यितुं), रोषम् उत्पद् in caus. (-पादयति -यितुं), कुप् in caus. (कोपयति -यितुं), रुष् in caus. (रोषयति -यितुं), अपराध् (c. 4. -राध्यति c. 5. -राध्नोति -राद्धुं).

DISPLEASED, *p. p.* वितुष्टः -ष्टा -ष्टं, असन्तुष्टः -ष्टा -ष्टं, अप्रसन्नः -न्ना -न्नं, कृतरुषः -षा -षं, रुष्टः -ष्टा -ष्टं, परिकोपितः -ता -तं, कुपितः -ता -तं, कृतव्यलीकः -का -कं, कृतमन्युः -न्युः -न्यु, आगतमन्युः -न्युः -न्यु, जातामर्षः -र्षा -र्षं.

DISPLEASING, *a.* अप्रियः -या -यं, विप्रियः -या -यं, व्यलीकः -का -कं, विरुद्धः -द्धा -द्धं, अतुष्टिकरः -री -रं, अप्रसादजनकः -का -कं, अप्रीतिकरः -री -रं, असुखावहः -हा -हं.

DISPLEASURE, *s.* (Offence, anger) अतुष्टिः *f.*, असन्तोषः, अप्रीतिः *f.*, अप्रसादः, कोपः, रोषः, मन्युः *m.*, क्रोधः, अमर्षः.—(Pain) दुःखं, असुखं, उद्वेगः.

To DISPLODE, *v. a.* महाशब्दपूर्व्वं स्फुट् in caus. (स्फोटयति -यितुं) or विदॄ in caus. (-दारयति -यितुं).

DISPLOSION, *s.* महाशब्दपूर्व्वं स्फोटनं or विदारणं, अकस्माद् भञ्जनं.

DISPORT, *s.* क्रीडा, विहारः, केलिः *m. f.*, देवनं, विलासः, विलसितं, खेला.

To DISPORT, *v. a.* विनुद् in caus. (-नोदयति -यितुं); 'disport one's self,' विहृ (c. 1. -हरति -हर्त्तुं), विलस् (c. 1. -लसति -सितुं), क्रीड् (c. 1. क्रीडति -डितुं), दिव् (c. 4. दीव्यति, देवितुं), खेला (nom. खेलायति -यितुं).

DISPOSAL, DISPOSE, *s.* (Orderly arrangement) विन्यासः, व्यूहनं, व्यूढिः *f.*, प्रतिविधानं, संविधानं, विधानं, रचना, विरचनं, व्यवस्थापनं, व्यवस्थितिः *f.*, क्रमेण or यथाक्रमं स्थापनं, पर्य्यायः, परिपाटिः *f.*—(Regulation) विनियमः, नियमकरणं.—(Distribution) परिकल्पनं, कल्पना, कॢप्तिः *f.*, परिनिर्व्वपणं, प्रविभागः, वण्टनं.—(Bestowing) विनियोगः, वितरणं, परहस्ते समर्पणं.—(Power of distribution, right of bestowing) परिकल्पनशक्तिः *f.*, विनियोगाधिकारः.—(Control) अधीनता, वशं, वशता, अधिकारः.—(Divine disposal) परमेश्वरेच्छा; 'all this kingdom is at your disposal,' सर्व्वम् इदं राज्यं युष्मदायत्तं; 'this is at my disposal,' इदं ममाधीनं.

To DISPOSE, *v. a.* (Employ to various purposes) विनियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), नियुज्, प्रयुज्, उपयुज्.—(Give, bestow) दा (c. 3. ददाति, दातुं), वितॄ (c. 1. -तरति -रितुं -रीतुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), समृ in caus. (-सर्पयति -यितुं), निधा (c. 3. -दधाति -धातुं).—(Turn to any particular purpose) अमुककर्म्मणि प्रयुज् or विनियुज् or उपयुज्.—(Adapt) युज् in caus. (योजयति -यितुं), नियुज्, प्रयुज्, कॢप् in caus. (कल्पयति -यितुं).—(Incline, give a propension) प्रवृत् in caus. (-वर्त्तयति -यितुं), प्रयुज् in caus., चेष्ट् in caus. (चेष्टयति -यितुं), प्रोत्साह् in caus. (-साहयति -यितुं).—(Regulate, arrange, adjust) विन्यस् (c. 4. -अस्यति -असितुं), विधा (c. 3. -दधाति -धातुं), संविधा, प्रतिविधा, व्यूह् (c. 1. -ऊहते -हितुं), विरच् (c. 10. -रचयति -यितुं), क्रमेण स्था in caus. (स्थापयति -यितुं), परिकॢप्.

To DISPOSE OF, *v. a.* (Apply to any purpose) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), विनियुज्, नियुज्, उपयुज्.—(Transfer to any other person, sell to another) परहस्ते समृ in caus. (-सर्पयति -यितुं), विक्री (c. 9. -क्रीणीते -क्रेतुं); 'to dispose of one's daughter in

Digitized by Google

marriage,' कन्यादानं कृ, दारिकादानं कृ, दुहितरं दा.

DISPOSED, *p. p.* (Arranged, regulated) विन्यस्तः -स्ता -स्तं, प्रतिविहितः -ता -तं, विहितः -ता -तं, व्यूढः -ढा -ढं, व्यवस्थितः -ता -तं, व्यवस्थापितः -ता -तं, परिपाटीकृतः -ता -तं.—(Inclined) प्रवर्त्तितः -ता -तं, प्रयोजितः -ता -तं; 'disposed to take,' गृह्यालुः -लुः -लु, ग्रहीता -त्री -तृ; 'disposed to fall,' पतयालुः -लुः -लु, पिपतिषुः -षुः -षु; or expressed by शील affixed; as, पतनशीलः -ला -लं.

DISPOSER, *s.* (Distributer, bestower) परिकल्पकः, दाता *m.* (तृ), प्रदाता, विनियोगकृत्.—(Regulator, director) विधाता *m.* (तृ), विनियन्ता *m.* (न्तृ), अधिष्ठाता *m.* (तृ).

DISPOSITION, *s.* (Orderly arrangement) विन्यासः, व्यूहनं, व्यूढिः *f.* प्रतिविधानं, विधानं, संविधानं, विरचनं, व्यवस्थापनं, पर्य्यायः, क्रमेण स्थापनं.—(Temper, natural state) भावः, स्वभावः, शीलः, शीलता -त्वं, प्रकृतिः *f.*, अन्तःकरणं; 'good disposition,' सद्भावः, साधुशीलत्वं; 'bad disposition,' असद्भावः; 'an easy contented disposition,' सुखिस्वभावः; 'of a virtuous disposition,' साधुशीलः, पुण्यशीलः, सत्वशीलः; 'disposition of body,' देहस्वभावः.—(Inclination, tendency) प्रावण्यं, प्रवृत्तिः *f.*, प्रवाहः, or expressed by शीलता -त्वं or आलुता -त्वं affixed; as, 'disposition to fall,' पतनशीलता or पतयालुत्वं.

To DISPOSSESS, *v. a.* अधिकारात् or स्वत्वाद् भंश् (c. 10. भंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or पत् in caus. (पातयति -यितुं) or निराकृ, अधिकारं or स्वत्वं हृ (c. 1. हरति, हर्त्तुं) or अपहृ.

DISPOSSESSED, *p. p.* भंशितः -ता -तं, निराकृतः -ता -तं, बहिष्कृतः -ता -तं; 'dispossessed of one's right,' हृताधिकारः -रा -रं, अधिकारभ्रष्टः -ष्टा -ष्टं.

DISPOSURE, *s.* (Disposal, power) शक्तिः *f.*, अधिकारः, परिकल्पनशक्तिः *f.*, विनियोगशक्तिः *f.*—(Posture) स्थितिः *f.*, भूमिः *f.*

DISPRAISE, *s.* निन्दा, अपवादः, अप्रशंसा, तिरस्कारः, उपालम्भः, अयशः *n.* (स्).

To DISPRAISE, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), तिरस्कृ, उपालभ् (c. 1. -लभते -लब्धुं), न प्रशंस् (c. 1. -शंसते -सितुं), अपवद् (c. 1. -वदति -दितुं).

To DISPREAD, *v. a.* बहुधा or इतस्ततः or नानादिक्षु विस्तृ in caus. (-स्तारयति -यितुं) or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or विद्रु in caus. (-द्रावयति -यितुं).

DISPROOF, *s.* अनिश्चयः, अनिर्णयः, अप्रामाण्यं, अप्रमाणं, अनुपपत्तिः *f.*, खण्डनं, आधर्षणं, पक्षाघातः, निरासः, बाधः, बाधा, अधरीकरणं, अपवादः, वितण्डा, उपमर्दः.

DISPROPORTION, *s.* असाम्यं, असमता, असमानता, वैषम्यं, अतुल्यत्वं, अयोग्यता, अनुपयुक्तता, असमञ्जसं, असामञ्जस्यं.

To DISPROPORTION, *v. a.* अयुक्तं सम्बन्ध् (c. 9. -बध्नाति -बन्धुं), असमञ्जसं संयुज् (c. 7. -युनक्ति -योक्तुं), अयोग्यसम्बन्धं कृ.

DISPROPORTIONABLE, DISPROPORTIONATE, *a.* असमः -मा -मं, अयोग्यः -ग्या -ग्यं, असमानः -ना -नं, अतुल्यः -ल्या -ल्यं, अयुक्तः -क्ता -क्तं, असमञ्जसः -सा -सं, अनुपयुक्तः -क्ता -क्तं, विषमः -मा -मं.

DISPROPORTIONABLENESS, DISPROPORTIONATENESS, *s.* असाम्यं, अयोग्यता, अतुल्यता.

DISPROPORTIONABLY, DISPROPORTIONATELY, *adv.* असमं, विषमं, अतुल्यं, अयोग्यं, अयोग्यतस्, अनुपयुक्तं, असमञ्जसं, असमानतस्.

To DISPROVE, *v. a.* खण्ड् (c. 10. खण्डयति -यितुं), संसूच् (c. 10. -सूचयति -यितुं), अधरीकृ, निरस् (c. 4. -अस्यति -असितुं), आधृष् (c. 10. -धर्षयति -यितुं), बाध् (c. 1. बाधते -धितुं), निराकृ, अपवद् (c. 1. -वदति -दितुं).

DISPROVED, *p. p.* खण्डितः -ता -तं, आधर्षितः -ता -तं, अधरीकृतः -ता -तं, बाधितः -ता -तं, निरस्तः -स्ता -स्तं, निराकृतः -ता -तं, प्रत्याख्यातः -ता -तं, असिद्धः -द्धा -द्धं.

DISPROVER, *s.* खण्डनकृत्, आधर्षणकृत्, वितण्डाकृत्, उपमर्दकारी *m.* (न्).

DISPUTABLE, *a.* विवदनीयः -या -यं, विचारणीयः -या -यं, विचार्य्यः -र्य्या -र्य्यं, वितर्क्यः -र्क्या -र्क्यं, वितर्कणीयः -या -यं, प्रत्याख्येयः -या -यं.

DISPUTANT, *s.* तर्की *m.* (न्), विवादी *m.* (न्), वादी *m.*, वादप्रतिवादकृत्, नैयायिकः, विचारणकर्त्ता *m.* (र्त्तृ), प्रोहः, शास्त्रविरोधदर्शी *m.* (न्).

DISPUTATION, *s.* विवादः, वादानुवादः, वादप्रतिवादः, वादः, वितर्कः, तर्कः, वाक्कलहं, वादयुद्धं, वितण्डा, विसंवादः, विरोधोक्तिः *f.* विचारः, हेतुवादः.

DISPUTATIOUS, *a.* विवादार्थी -र्थिनी -र्थि (न्), विवादी -दिनी -दि (न्), वादानुवादशीलः -ला -लं, वितण्डापरः -रा -रं, वितर्कप्रियः -या -यं.

To DISPUTE, *v. a.* and *n.* विवद् (c. 1. -वदते -दितुं), विसंवद्, वादानुवादं कृ, विप्रलप् (c. 1. -लपति -पितुं), वितण्ड् (c. 1. -तण्डते -ण्डितुं), वितण्डां कृ, वितर्क् (c. 10. -तर्कयति -यितुं), कलह (nom. कलहायते), वैर (nom. वैरायते), वाक्कलहं कृ, वाग्युद्धं कृ, व्यवक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).—(In law) व्यवहृ (c. 1. -हरति -हर्त्तुं), विवादास्पदीकृ.

DISPUTE, *s.* विवादः, वादानुवादः, वादप्रतिवादः, विसंवादः, विप्रलापः, वाग्युद्धं, वादयुद्धं, वाक्कलहः, वाक्कलिः *m.*, विरोधोक्तिः *f.*, वाक्यविरोधः, वितर्कः, वितण्डा, विप्रतिपत्तिः *f.*, वितण्डा, विचारः, वादः, वाक्यं, कलहः, विग्रहः, द्वैधं, सन्देहः; 'matter of dispute,' विवादास्पदं.

DISPUTED, *p. p.* विचारितः -ता -तं, सन्दिग्धः -ग्धा -ग्धं, व्याहतः -ता -तं.

DISPUTER, *s.* विवादी *m.* (न्), विवादकारी *m.* (न्), विवादकृत् *m.*, विचारकः, तर्की *m.* (न्), वादी *m.* (न्), हेतुवादी *m.* (न्), वितण्डाकारी *m.* (न्), न्यायी *m.* (न्), सांवादिकः.

DISQUALIFICATION, *s.* अयोग्यकरणं, अपात्रीकरणं, अयोग्यत्वं -ता, अयुक्तिः *f.*, विरोधः -धित्वं, असामर्थ्यं.

DISQUALIFIED, *p. p.* अयोग्यः -ग्या -ग्यं, अपात्रीकृतः -ता -तं, विरुद्धः -द्धा -द्धं.

To DISQUALIFY, *v. a.* अपात्रीकृ, अयोग्यं -ग्यां -ग्यं कृ, अनुपयुक्तं -क्तां -क्तं कृ.

DISQUIET, DISQUIETNESS, DISQUIETUDE, *s.* उद्वेगः, चित्तोद्वेगः, चित्तवेदना, व्यथा, अशान्तिः *f.*, कष्टं, मनोदुःखं, अनिर्वृतिः *f.*, क्लेशः, आधिः *m.*, वैक्लव्यं, मनस्तापः, उत्तापः, व्यामोहः, विडम्बना, औत्सुक्यं, मानसी व्यथा, व्यस्तता, अस्थिरता, चिन्ता.

To DISQUIET, *v. a.* व्यथ् (c. 10. व्यथयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेष्टुं), उद्विज् in caus. (-वेजयति -यितुं), व्याकुलीकृ, आकुल (nom. आकुलयति -यितुं), बाध् (c. 1. बाधते -धितुं), क्षुभ् in caus. (क्षोभयति -यितुं), मुह् in caus. (मोहयति -यितुं), व्यामुह्, विमुह्, परिमुह्.

DISQUIETED, *p. p.* उद्विग्नः -ग्ना -ग्नं, व्यग्रः -ग्रा -ग्रं, व्यथितः -ता -तं, सव्यथः -था -थं, क्लिष्टः -ष्टा -ष्टं, परिक्लिष्टः -ष्टा -ष्टं, अशान्तः -न्ता -न्तं, अनिर्वृतः -ता -तं, विधुरः -रा -रं, विदुरः -रा -रं, उद्भ्रान्तः -न्ता -न्तं, मोहितः -ता -तं, जातशङ्कः -ङ्का -ङ्कं.

DISQUISITION, *s.* विचारः -रणा, वितर्कः, विमर्शः, विवेचना, परीक्षा, वितण्डा.

To DISRANK, *v. a.* पदात् or अधिकाराद् भंश् in caus. (भंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or अपकृष् (c. 1. -कर्षति -क्रष्टुं).

DISREGARD, *s.* उपेक्षा, अनपेक्षा, निरपेक्षता, अनादरः, अननुष्ठानं, असेवनं, अचिन्ता, अनवधानं, परित्यागः, अवक्रिया, उपात्ययः, उत्प्रेक्षा, उद्भावनं, अदर्शनं.—(Contempt) अवज्ञा, अवमानं, अवधीरणं.

To DISREGARD, *v. a.* उपेक्ष् (c. 1. -ईक्षते -क्षितुं), समुपेक्ष्, उपप्रेक्ष्, अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), अवधीर् (c. 10. -धीरयति -यितुं), न अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), न सेव् (c. 1. सेवते -वितुं), परित्यज् (c. 1. -त्यजति -त्यक्तुं).

Digitized by Google

DISREGARDED, *p. p.* उपेक्षितः -ता -तं, अनपेक्षितः -ता -तं, समुपेक्षितः -ता -तं, अवज्ञातः -ता -तं, अवधीरितः -ता -तं, अवमतः -ता -तं, अवमानितः -ता -तं, परिभूतः -ता -तं, असेवितः -ता -तं, अवगणितः -ता -तं, उन्नावितः -ता -तं, अननुष्ठितः -ता -तं.

DISREGARDFUL, *a.* उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, निर्व्यपेक्षः -क्षा -क्षं, मन्दादरः -रा -रं, अवमानी -निनी -नि (न्), अनवधानः -ना -नं.

DISREGARDFULLY, *adv.* निरपेक्षं, अनपेक्ष्य, उपेक्षया, अवमानेन, मन्दादरं.

DISRELISH, *s.* अरुचिः *f.*, अनभिरुचिः *f.*, विरक्तिः *f.*, वैरस्यं, वैराग्यं, विरागः, अप्रीतिः *f.*, विप्रियता, विमतिः *f.*, विमुखता, अनिच्छा, विध्वंसः.—(Bad taste) कुस्वादः, विस्वादः.

To DISRELISH, *v. a.* न अभिमन् (c. 4. -मन्यते -मन्तुं), विद्विष् (c. 2. -द्वेष्टि -ष्टुं), अरुचिं कृ, न अभिरुच् (c. 10. -रोचयति -यितुं), or expressed by the neut. form रोचते; as, 'he disrelishes that,' तत् तस्मै न रोचते.

DISREPUTABLE, *a.* अनार्य्यः -र्य्या -र्य्यं, अपमान्यः -न्या -न्यं, अयशस्यः -स्या -स्यं, अपयशस्करः -री -रं, अकीर्त्तिकरः -री -रं, अवज्ञेयः -या -यं, अप्रतिष्ठः -ष्ठा -ष्ठं, अख्यातिजनकः -का -कं, अप्रशंसनीयः -या -यं, अभिशस्तः -स्ता -स्तं.

DISREPUTABLY, *adv.* अनार्य्यं, अनार्य्यवत्, अयशस्यं, अप्रशंसनीयं.

DISREPUTATION, DISREPUTE, *s.* अयशः *n.* (स्), अपयशः *n.*, अकीर्त्तिः *f.*, अपकीर्त्तिः *f.*, दुष्कीर्त्तिः *f.*, अख्यातिः *f.*, कुख्यातिः *f.*, अनार्य्यत्वं, वाच्यता, अप्रतिष्ठा, अमर्य्यादा, मर्य्यादाहानिः *f.*, अपमानं.

DISRESPECT, *s.* अनादरः, अवज्ञा -ज्ञानं, अपमानं, अवमानं -नता, अमाननं, असम्मानं, असन्मानं, परिभवः, परिभूतिः *f.*, परिभावः, अवधीरणं, उपेक्षा -क्षणं, तिरस्कारः, तिरस्क्रिया, न्यक्कारः, अवहेलं -ला, हेलनं, धर्षणं, अमर्य्यादा, रौढा, असूक्षणं, असूक्षणं, सूक्षणं.

DISRESPECTED, *p. p.* अनादृतः -ता -तं, अवमानितः -ता -तं, अवधीरितः -ता -तं, परिभूतः -ता -तं, उपेक्षितः -ता -तं, अवज्ञातः -ता -तं, अवमतः -ता -तं.

DISRESPECTFUL, *a.* अवमानी -निनी -नि (न्), परिभावी -विनी -वि (न्) -भावुकः -का -कं, उपेक्षकः -का -कं, सावज्ञः -ज्ञा -ज्ञं, अनार्य्यः -र्य्या -र्य्यं.

DISRESPECTFULLY, *adv.* सावज्ञानं, सावमानं, अनादरात्, उपेक्षया.

To DISROBE, *v. a.* विवस्त्रीकृ, वस्त्रम् अवतॄ in caus. (-तारयति -यितुं) or उत्कृष् (c. 1. -कर्षति -क्रष्टुं) or अपनह् (c. 4. -नह्यति -नद्धुं) or उच्छद् (c. 10. -छादयति -यितुं), नग्नीकृ.

DISROBED, *p. p.* विवस्त्रः -स्त्रा -स्त्रं, वस्त्रविवृतः -ता -तं, नग्नीकृतः -ता -तं.

DISRUPTION, *s.* भङ्गः, भेदः, विभेदः, विदारः -रणं, विदरः, भिदा, विघटनं.

DISSATISFACTION, *s.* अतुष्टिः, अतृप्तिः *f.*, असन्तोषः, अपरितोषः, अशान्तिः *f.*, अतृप्तता, वितुष्टिः *f.*

DISSATISFIED, *p. p.* अतुष्टः -ष्टा -ष्टं, असन्तुष्टः -ष्टा -ष्टं, वितुष्टः -ष्टा -ष्टं, अपरितुष्टः -ष्टा -ष्टं, अतृप्तः -प्ता -प्तं, अशान्तः -न्ता -न्तं, अप्रतिलब्धकामः -मा -मं.

To DISSATISFY, *v. a.* न सन्तुष् in caus. (-तोषयति -यितुं), न परितुष्, न तृप् in caus. (तर्पयति -यितुं), अतुष्टिं जन् in caus. (जनयति -यितुं) or उत्पद् in caus. (-पादयति -यितुं).

To DISSECT, *v. a.* शरीराङ्गानि कर्त्तर्य्यादिना व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं) or उच्छिद् or संछिद्, शरीरावयवान् निकृत् (c. 6. -कृन्तति -कर्त्तितुं) or विनिकृत् or पृथक्कृ or पृथक् पृथक् कृ, विशस् (c. 1. -शसति -सितुं).—(Examine minutely) सूक्ष्मं परीक्ष् (c. 1. -ईक्षते -क्षितुं).

DISSECTED, *p. p.* विशसितः -ता -तं, व्यवच्छिन्नः -न्ना -न्नं, विनिकृत्तः -त्ता -त्तं.

DISSECTION, *s.* विशसनं, व्यवच्छेदः, अङ्गच्छेदः, अङ्गकर्त्तनं, पृथक्करणं, सूक्ष्मपरीक्षा.

DISSECTOR, *s.* व्यवच्छेदकः, अङ्गच्छिद् *m.*, विशसिता *m.* (तृ), विशसनकृत्.

To DISSEIZE, *v. a.* अधिकाराद् भ्रंश् in caus. (भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं); हृ (c. 1. हरति, हर्त्तुं) or अपहृ.

DISSEIZING, *s.* अन्यायेन अधिकाराद् भ्रंशनं or भूमिधनादिहरणं.

To DISSEMBLE, *v. a.* and *n.* हु (c. 2. हुते, होतुं), अपहु, निहु, छद्म कृ, छद् (c. 10. छादयति -यितुं), गुह् (c. 1. गूहति -ते -हितुं), निगुह्, अपवृ in caus. (-वारयति -यितुं), गोपनं कृ, अपदिश् (c. 6. -दिशति -देष्टुं), व्यपदिश्, कपटं कृ, अवहित्थां कृ, अपज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), प्रतारणं कृ, छल् (c. 10. छलयति -यितुं).

DISSEMBLER, *s.* छाद्मिकः, छद्मवेशी *m.* (न्), कपटवेशी *m.*, वेशधारी *m.* (न्), दाम्भिकः, गोपनकृत् *m.*, गोप्ता *m.* (प्तृ), प्रच्छादयिता *m.* (तृ).

DISSEMBLING, *s.* अपह्नवः, निह्नुतिः *f.*, निह्नवः, अवहित्था -त्थं, गोपनं, छद्म *n.* (न्), छद्मकरणं, गुप्तिः *f.*, आकारगुप्तिः *f.*, अपलापः, कापट्यं, कृत्रिमता.

DISSEMBLINGLY, *adv.* अपह्नवेन, निह्नवात्, सावहित्थं, छद्मना, मिथ्या, कृत्रिमं.

To DISSEMINATE, *v. a.* विकॄ (c. 6. -किरति -करितुं -रीतुं), प्रकॄ, विस्तॄ in caus. (-स्तारयति -यितुं), प्रचर् in caus. (-चारयति -यितुं), प्रसॄ in caus. (-सारयति -यितुं), विसॄ, वप् (c. 1. वपति, वप्तुं), निवप्; 'to be disseminated,' प्रचर् (c. 1. -चरति -रितुं).

DISSEMINATED, *p. p.* विकीर्णः -र्णा -र्णं, प्रचारितः -ता -तं, सुव्यस्तः -स्ता -स्तं, बहुधागतः -ता -तं, विस्तारितः -ता -तं, उप्तः -प्ता -प्तं.

DISSEMINATION, *s.* विकिरणं, व्यापनं, व्याप्तिः *f.*, विस्तारः, प्रचारणं, प्रसारणं, वपनं, उप्तिः *f.*, व्यासः.

DISSEMINATOR, *s.* विकिरणकृत् *m.*, प्रचारकः, वप्ता *m.* (प्तृ), प्रवापी *m.* (न्).

DISSENSION, *s.* भेदः, विमतिः *f.*, वैमत्यं, कलहः, कलिः *m.*, असम्मतिः *f.*, द्वन्द्वं, विरोधः, विवादः, विप्रतिपत्तिः *f.*, विसंवादः, द्वैधं, मतिविपर्य्ययः; 'a sower of dissension,' उपजापकः; 'family dissensions,' गृहच्छिद्रं, गृहरन्ध्रं.

To DISSENT, *v. n.* न सम्मन् (c. 4. -मन्यते -मन्तुं), विपरीतं मन्, अन्यथा मन्, असम्मतिं कृ, न स्वीकृ, विवद् (c. 1. -वदते -दितुं), विसंवद्, भिन्नमतः -ता -तं भू, मतान्तरम् अवलम्ब् (c. 1. -लम्बते -म्बितुं).

DISSENT, *s.* विमतिः *f.*, वैमत्यं, मतिप्रभेदः, मतिविपर्य्ययः, असम्मतिः *f.*, अस्वीकारः, विसंवादः, विपरीतता, भिन्नमतधारणं, मतान्तरावलम्बनं, अन्यमतधारणं, द्वैधं.

DISSENTANEOUS, *a.* असम्मतः -ता -तं, विमतः -ता -तं, विपरीतमतः -ता -तं.

DISSENTER, *s.* (One that disagrees) भिन्नमतधारी *m.* (न्), मतान्तरावलम्बी *m.* (न्), असम्मतः.—(From the church) विपथगामी *m.* (न्), अपथवर्त्ती *m.* (न्), साधारणधर्म्मविरोधी *m.* (न्), उपधर्म्मसेवी *m.* (न्), उपधर्म्मीः.

To DISSERT, *v. n.* वद् (c. 1. वदति -दितुं), प्रवद्, व्याख्या (c. 2. -ख्याति -तुं), कथ् (c. 10. कथयति -यितुं), प्रसङ्गं कृ, विवरणं कृ.

DISSERTATION, *s.* वाक्यं, वादः, प्रवादः, वचनं, प्रवचनं, वचः *n.* (स्), व्याख्या, विवरणं, प्रसङ्गः, कथोपकथनं, वचनक्रमः.

To DISSERVE, *v. a.* अपकॄ, न उपकॄ, हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं).

DISSERVICE, *s.* अपकारः, अपकृतं, क्षतिः *f.*, अपायः, अपचयः, हिंसा, अनिष्टं, द्रोहः, क्लेशः.

To DISSEVER, *v. a.* वियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), विप्रयुज् विश्लिष् (c. 7. -श्लिनक्ति -श्लेक्तुं), विभिद् (c. 7. -भिनत्ति -भेत्तुं), विश्लिष् in caus. (-श्लेषयति -यितुं), पृथक्कृ, द्वैधीकृ.

DISSEVERED, *p. p.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, विश्लिष्टः -ष्टा -ष्टं, विश्लिष्टः -ष्टा -ष्टं, गतसङ्गः -ङ्गा -ङ्गं, पृथक्कृतः -ता -तं, विगतः -ता -तं.

DISSIDENT, *a.* विमतः -ता -तं, असम्मतः -ता -तं, विपरीतमतः -ता -तं.

DISSIMILAR, *a.* असदृशः -शी -शं, असमानः -ना -नं, असमः -मा -मं, विषमः -मा -मं, अनीदृशः -शी -शं, भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, अन्यः -न्या -न्यत्, इतरः -रा -रं, परः -रा -रं.—(Heterogeneous) विजातीयः -या

Digitized by Google

-यं, भिन्नजातीयः -या -यं.

Dissimilarity, dissimilitude, *s.* असादृश्यं, असदृशता, असाम्यं, असमता, असमानता, अतुल्यता, वैषम्यं, भेदः, विभेदः, भिन्नता, विभिन्नता, अन्तरं, परत्वं, अन्यथात्वं, विजातीयत्वं.

Dissimulation, *s.* अपह्नवः, निह्नवः, निह्नुतिः *f.*, छद्मकरणं, छद्म *n.* (न्), गोपनं, गुप्तिः *f.*, आकारगुप्तिः *f.*, अवहित्था -त्थं, कापट्यं, अपलापः, कृत्रिमता, प्रतारणा, दम्भः.

To dissipate, *v. a.* (Scatter) कॄ (c. 6. किरति, करितुं -रीतुं), विकॄ, प्रकॄ, विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), व्यस् (c. 4. -अस्यति -असितुं), विद्रु in caus. (-द्रावयति -यितुं), विनिधू (c. 5. -धूनोति -धवितुं). *See* Disperse. (Spend) व्यय् (c. 1. व्ययति c. 10. व्यययति -यितुं), अपचि (c. 5. -चिनोति -चेतुं).

Dissipated, *p. p.* क्षीणः -णा -णं, विक्षिप्तः -प्ता -प्तं, बहुधागतः -ता -तं, विनिधूतः -ता -तं, सुव्यस्तः -स्ता -स्तं, विगलितः -ता -तं. *See* Dispersed. (Licentious) कामवृत्तः -त्ता -त्तं, दुराचारः -रा -रं, व्यसनी -निनी -नि (न्).

Dissipation, *s.* विक्षेपः, विकिरणं. *See* Dispersion. (Prodigality) धनव्ययः, अपव्ययः, धनोत्सर्गः, मोक्षणं.—(Licentiousness) स्त्रीसम्भोगनृत्यगीतादिसेवनं, व्यसनिता.

To dissociate, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विप्रयुज्, विसंयुज्, विश्लिष् (c. 10. -श्लेषयति -यितुं), पृथक्कॄ, असंलग्नं -ग्नां -ग्नं कॄ.

Dissolvable, dissoluble, *a.* द्राव्यः -व्या -व्यं, विद्राव्यः -व्या -व्यं, विलयनीयः -या -यं, द्रवणीयः -या -यं, गलनीयः -या -यं, क्षरभावः -वा -वं, क्षरणीयः -या -यं, याव्यः -व्या -व्यं, आर्द्रः -र्द्रा -र्द्रं, लीनः -ना -नं, विलयनशीलः -ला -लं,

To dissolve, *v. a.* (Melt) विली in caus. (-लाययति -लापयति -यितुं), विद्रु in caus. (-द्रावयति -यितुं), द्रवीकॄ, आर्द्रीकॄ.—(Disunite) वियुज् (c. 7. -युनक्ति -योक्तुं).—(Dissolve friendship, &c.) सौहृद्यं भिद् (c. 7. भिनत्ति, भेत्तुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं); 'dissolve a league,' संहतिभेदनं कॄ; 'dissolve an assembly,' सभां विसृज् (c. 6. -सृजति -सृष्टुं), सभाभङ्गं कॄ.

To dissolve, *v. n.* विली (c. 4. -लीयते -लेतुं), प्रविली, प्रली, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, गल् (c. 1. गलति -लितुं), विगल्, क्षर् (c. 1. क्षरति -रितुं), द्रवीभू, आर्द्रीभू.

Dissolved. *p. p.* विद्रुतः -ता -तं, द्रुतः -ता -तं, विलीनः -ना -नं, लीनः -ना -नं, परिगलितः -ता -तं, द्रवीभूतः -ता -तं, असंहतः -ता -तं.

Dissolvent, *a.* द्रावकरः -री -रं, विलयनः -नी -नं, विद्रावकः -का -कं.

Dissolute, *a.* व्यसनी -निनी -नि (न्), अनवस्थः -स्था -स्थं, व्यभिचारी -रिणी -रि (न्), तारलः -ली -लं, तरलः -ला -लं, दुराचारः -रा -रं, कामासक्तः -क्ता -क्तं, भोगासक्तः -क्ता -क्तं, दुष्टः -ष्टा -ष्टं, विषयी -यिणी -यि (न्), अवशः -शा -शं, कामुकः -का -कं, लम्पटः.

Dissolutely, *adv.* लम्पटवत्, दुष्टवत्, कामुकवत्, भोगासक्तवत्.

Dissoluteness, *s.* लम्पटता, लाम्पट्यं, व्यसनिता, अनवस्थितिः *f.*, अनवस्थता, इन्द्रियासंयमः, दुर्वृत्तता, विषयासक्तिः *f.*, भोगासक्तिः *f.*, स्त्रीसेवा, व्यभिचारः.

Dissolution, *s.* (Liquefaction) विलयः -यनं, विद्रावः, द्रावः, द्रवीकरणं.—(Destruction) प्रलयः, नाशः, विनाशः, क्षयः, परिक्षयः, ध्वंसः.—(Dissolution of an assembly) सभाभङ्गः, सभाविरामः, सभानिवृत्तिः *f.*—(Dissolution of partnership) संसर्गभेदः, संसर्गवियोगः, संसर्गिनिवृत्तिः *f.*

Dissonance, *s.* (Discord) विस्वरता -त्वं, अपरवः.—(Disagreement) विसंवादः.

Dissonant, *a.* विस्वरः -रा -रं, विरुतरवः -रा -रं, कर्कशस्वनः -ना -नं.—(Disagreeing) परस्परविरुद्धः -द्धा -द्धं, विसङ्गतः -ता -तं.

To dissuade, *v. a.* मैवं कार्षीर् इति उपदिश्य निवृत् in caus. (-वर्त्तयति -यितुं), भयहेतुं दर्शयित्वा निवृत् in caus. or विरम् in caus. (-रमयति -यितुं) or निवृ in caus. (-वारयति -यितुं), मैवं कृथा इति उपदिश् (c. 6. -दिशति -देष्टुं) or प्रत्यादिश्, विपरीतम् उपदिश्, विपरीतमन्त्रणं कॄ, अन्तःख्या (c. 2. -ख्याति -तुं).

Dissuader, *s.* निवर्त्तयिता *m.* (तृ) मैवं कार्षीर् इति उपदेशकः, प्रत्यादेष्टा *m.* (ष्टृ), विपरीतमन्त्रणदाता *m.* (तृ), निषेधकर्त्ता *m.*, (र्त्तृ).

Dissuasion, *s.* निवर्त्तनं, प्रत्यादेशपूर्व्वं निवर्त्तनं, मैवं कार्षीर् इति प्रत्यादेशः, निषेधार्थैः परामर्शैः, विपरीतमन्त्रणं, उद्यमभङ्गार्थैः प्रबोधः.

Dissuasive, *a.* निवर्त्तकः -का -कं, निवर्त्तनशीलः -ला -लं, निवृत्तिकारी -रिणी -रि (न्), निषेधार्थकः -का -कं, प्रत्यादेशकः -का -कं, भयहेतुप्रदर्शकः -का -कं, विपरीतमन्त्रणकारी -रिणी -रि (न्).

Dissuasive, *s.* निवृत्तिकारणं, निवृत्तिहेतुः *m.*, निवर्त्तनहेतुः *m.*

Dissyllabic, *a.* द्व्यक्षरः -रा -रं, अक्षरद्वयविशिष्टः -ष्टा -ष्टं.

Dissyllable, *s.* द्व्यक्षरं, अक्षरद्वयविशिष्टः शब्दः, द्व्यक्षरः शब्दः.

Distaff, *s.* तकुः *f.*, तकुटं -टी, सूत्रतकुटी, सूत्रला.

To distain, *v. a.* मलिन (nom. मलिनयति -यितुं), दुष् (c. 10. दूषयति -यितुं).

Distance, *s.* (Interval, space) अन्तरं, अभ्यन्तरं, अन्तरालः -लं, मात्रं, व्यवधानं, व्यवायः,—(Remoteness) दूरता, असान्निध्यं, असन्निधानं, असन्निकर्षः; 'a little distance,' कियद्दूरं, ईषद्दूरं, नातिदूरे; 'at a distance,' दूरं, दूरे, दूरतस्, विदूरतस्.—(Haughtiness) दुर्धर्षता, दुराधर्षत्वं, अनालापः.

To distance, *v. a.* दूरीकॄ, दव (nom. दवयति -यितुं), अपसॄ in caus. (-सारयति -यितुं), दूरतः कॄ.

Distanced, *p. p.* दूरीकृतः -ता -तं, अपसारितः -ता -तं.

Distant, *a.* (Remote) दूरः -रा -रं, विदूरः -रा -रं, दूरस्थः -स्था -स्थं, दूरस्थितः -ता -तं, दूरस्थायी -यिनी -यि (न्), अनुपस्थायी, अनुपस्थः -स्था -स्थं, दूरीभूतः -ता -तं, दूरवर्त्ती -र्त्तिनी -र्त्ति (न्), विप्रकृष्टः -ष्टा -ष्टं, असन्निकृष्टः -ष्टा -ष्टं, दविष्ठः -ष्ठा -ष्ठं, दवीयान् -यसी -यः (स्), असन्निहितः -ता -तं, प्राध्वः -ध्वा -ध्वं.—(Haughty) दुर्धर्षः -र्षा -र्षं, दुराधर्षः -र्षा -र्षं, अनालापी -पिनी -पि (न्).

Distaste, *s.* (Aversion of the palate, disrelish) अरुचिः *f.*, अनभिरुचिः *f.*, विरसनं, वितृष्णा, उत्क्लेशः.—(Dislike) विरक्तिः *f.*, वैराग्यं, वैरक्त्यं, अरुचिः *f.*, अननुरागः, अप्रीतिः *f.*, द्वेषः, विद्वेषः, अनिच्छा, घृणा, पराङ्मुखता.

To distaste, *v. a.* and *n.* (Dislike) न रुच् (c. 1. रोचते -चितुं) with dat.; as, "he distastes that,' तत् तस्मै न रोचते; न अभिनन्द् (c. 1. -नन्दति -न्दितुं), अरुचिं कॄ.

Distasteful, *a.* अरुचिरः -रा -रं, अरुच्यः -च्या -च्यं, अप्रियः -या -यं, अरसः -सा -सं, विरसः -सा -सं, अरुचिजनकः -का -कं, अप्रीतिकरः -री -रं, विस्वादः -दा -दं, अस्वादुः -दुः -दु.

Distemper, *s.* (Disease) रोगः, व्याधिः *m.*, आमयः, पीडा, अस्वास्थ्यं, असुस्थता, विकारः.—(Uneasiness) व्यथा, क्लेशः, दुःखं, कष्टं, आर्त्तिः *f.*, उपतापः, तापः, अनिर्वृतिः *f.*—(Bad condition) दुष्प्रकृतिः *f.*, दुःस्थितिः *f.*, असद्भावः, कुभावः, दुर्दशा, दुरवस्था.

To distemper, *v. a.* पीड् (c. 10. पीडयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), उपहन् (c. 2. -हन्ति -न्तुं), उपतप् in caus. (-तापयति -यितुं), बाध् (c. 1. बाधते -धितुं).

Distemperature, *s.* वायुवैलक्ष्यं, वायुगुरुता, आकाशवैलक्षण्यं, गुरुतापः.

Distempered, *p. p.* व्याधितः -ता -तं, रोगी -गिणी -गि (न्), अस्वस्थः -स्था -स्थं, आर्त्तः -र्त्ता -र्त्तं, आतुरः -रा -रं, पीडितः -ता -तं, उपहतः -ता

Digitized by Google

-तं, व्याकुलः -ला -लं, उत्सिक्तः -क्ता -क्तं.

To DISTEND, *v. a.* विस्तृ in caus. (-स्तारयति -यितुं), वितन् (c. 8. -तनोति -नितुं), स्फाय् in caus. (स्फापयति -यितुं), ध्मा in caus. (ध्मापयति -यितुं), आध्मा (c. 1. -धमति -ध्मातुं), प्रध्मा; 'to distend with wind,' वातेन पॄ (c. 10. -पूरयति -यितुं),

DISTENDED, *p. p.* आध्मातः -ता -तं, विततः -ता -तं, प्रवृद्धः -द्धा -द्धं, फुल्लः -ल्ला -ल्लं, शूनः -ना -नं, उच्छूनः -ना -नं, स्फातः -ता -तं, स्फीतः -ता -तं, विस्तृतः -ता -तं, प्रसारितः -ता -तं, प्रचुरीकृतः -ता -तं; 'distended with wind,' वातपूरितः -ता -तं, वातफुल्लः -ल्ला -ल्लं.

DISTENSION, DISTENTION, *s.* आध्मानं, विततिः *f.*, फुल्लता, उत्फुल्लता, विस्तारः, विस्तृतिः *f.*, स्फीतिः *f.*, स्फातिः *f.*, विजृम्भणं.

DISTICH, *s.* श्लोकः, श्लोकद्वयं, चरणयुगं, द्विचरणं, द्विपदं.

To DISTILL, *v. n.* (Fall in drops, flow gently) च्युत्, (c. 1. च्योतति -तितुं) or श्च्युत्, रो (c. 4. रीयते, रेतुं), क्षर् (c. 1. क्षरति -रितुं) स्यन्द् (c. 1. स्यन्दते -न्दितुं) सु (c. 1. सवति, सोतुं).

To DISTILL, *v. a.* (Let fall in drops) सु (c. 1. सवति, सोतुं) with acc.; as, 'the clouds distill water,' तोयं सवन्ति मेघाः; क्षर् (c. 1. क्षरति -रितुं), जलविन्दून् or असुलवान् मुच् (c. 6. मुञ्चति, मोक्तुं), or पत्, in caus. (पातयति -यितुं), or सृज् (c. 6. सृजति, स्रष्टुं). —(Extract the spirit, as chemists) सन्धा (c. 3. -दधाति -धातुं), अभिषु (c. 5. -षुणोति -षोतुं) आसु, मद्यं निष्ट (c. 1. -हरति -हर्तुं).

DISTILLATION, *s.* (Act of extracting spirit) सन्धानं -नी, मद्यसन्धानं, सन्धा, अभिषवः, आसुतिः *f.*—(Act of trickling) सवः, स्रावः, क्षरणं, द्रवः, द्रवणं, द्रवत्वं, निस्यन्दः, स्यन्दः -न्दनं, अभिष्यन्दः.

DISTILLATORY, *a.* सन्धानयोग्यः -ग्या -ग्यं, सन्धानसम्बन्धी -न्धिनी -न्धि (न्).

DISTILLED, *p. p.* सन्धितः -ता -तं, अभिषुतः -ता -तं, चारितः -ता -तं, 'distilled water,' पञ्चवारि, *n.*

DISTILLER, *s.* सान्धिकः, मद्यासवनिकः, मद्यहारकः, शौण्डिकः, शुण्डी *m.* (न्) सुराकारः, सुराजीवी *m.* (न्), आसुतीबलः, कल्यपालः.

DISTILLERY, *s.* सन्धानी, मद्यसन्धानशाला, शुण्डा, मद्यनिर्हारस्थानं.

DISTINCT, *a.* (Different, separate) भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, विविक्तः -क्ता -क्तं, व्यतिरिक्तः -क्ता -क्तं, विशिष्टः -ष्टा -ष्टं, पृथग्विधः -धा -धं, विविधः -धा -धं, व्यस्तः -स्ता -स्तं, अन्यः -न्या -न्यत्, अन्यप्रकारः -रा -रं, इतरः -रा -रं; 'having distinct properties,' पृथग्गुणः -णा -णं.—(Clear) व्यक्तः -क्ता -क्तं, प्रव्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, स्फुटः -टा -टं, प्रत्यक्षः -क्षा -क्षं, सुप्रकाशः -शा -शं.

DISTINCTION, *s.* (Difference, separation) भेदः, विभेदः, प्रभेदः, भिन्नता, विभिन्नता, विशेषः -षणं, विशिष्टता, वैशिष्ट्यं, अन्तरं, पृथक्त्वं, पार्थक्यं, अवच्छेदः, विच्छेदः, अन्यथात्वं, भिदा, व्यासः; 'without distinction,' अविशेषः -षा -षं, निर्विशेषः -षा -षं.—(Discrimination) विवेकः, विवेचनं, परिच्छेदः, व्यवच्छेदः, पृथक्करणं; 'distinction of race,' जातित्वं.—(Eminence, superiority) विशिष्टता, वैशिष्ट्यं, उत्कृष्टता, उत्कर्षः, श्रेष्ठता, प्रमुखत्वं, समुन्नतिः *f.*, परमपदं.

DISTINCTIVE, *a.* विशेषकः -का -कं, विशेषणः -णा -णं, सविशेषः -षा -षं, अवच्छेदकः -का -कं, विच्छेदकः -का -कं, परिच्छेदकः -का -कं, पृथक्कारी -रिणी -रि (न्); 'distinctive mark,' विशेषलक्षणं.

DISTINCTIVELY, *adv.* विशेषेण, विशेषतस्, सविशेषं, पृथक् पृथक्.

DISTINCTLY, *adv.* (Separately) पृथक्.—(Clearly) व्यक्तं, सुव्यक्तं, भिन्नार्थं, स्पष्टार्थं, स्पष्टं, प्रत्यक्षतस् -क्षेण.

DISTINCTNESS, *s.* (State of being different) भिन्नता, विभिन्नभावः, पृथक्त्वं, पार्थक्यं.—(Clearness) व्यक्तिः *f.*, अभिव्यक्तिः *f.*, व्यक्तत्वं, स्पष्टता, भिन्नार्थत्वं.

To DISTINGUISH, *v. a.* and *n.* विशिष् (c. 7. -शिनष्टि -शेष्टुं, c. 10. -शेषयति -यितुं), पृथक्कृ, लक्ष् (c. 10. लक्षयति -यितुं) लक्षीकृ, परिच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं) विविच् (c. 7. -विनक्ति -वेक्तुं c. 10. -वेचयति -यितुं) विचर् (c. 10. -चारयति -यितुं), विभू (c. 10. -भावयति -यितुं); 'distinguish one's self, become illustrious,' विशिष् in pass. (-शिष्यते) उत्कर्षं or परमपदं प्राप् (c. 5. -आप्नोति -आप्तुं).

DISTINGUISHABLE, *a.* विशेषणीयः -या -यं, विशेष्यः -ष्या -ष्यं, विज्ञेयः -या -यं, परिच्छेदनीयः -या -यं, विभावनीयः -या -यं, विभाव्यः -व्या -व्यं, भेदनीयः -या -यं.

DISTINGUISHED, *p. p.* (Separated, discriminated) विशेषितः -ता -तं, विविक्तः -क्ता -क्तं, परिच्छिन्नः -न्ना -न्नं, पृथक्कृतः -ता -तं, विज्ञातः -ता -तं, विभावितः -ता -तं, उल्लिक्तिकृतः -ता -तं.—(Marked) लक्षितः -ता -तं, उपलक्षितः -ता -तं, चिह्नितः -ता -तं, तिलकितः -ता -तं.—(Illustrious) विशिष्टः -ष्टा -ष्टं, उत्कृष्टः -ष्टा -ष्टं, ख्यातः -ता -तं, प्रसिद्धः -द्धा -द्धं, विश्रुतः -ता -तं, प्रथितः -ता -तं, द्वात्रिंशल्लक्षणोपेतः -ता -तं.

DISTINGUISHINGLY, *adv.* विशेषेण, सविशेषं, सपुरस्कारं, सविशेषमानं.

To DISTORT, *v. a.* (Make deformed) विरूप् (c. 10. -रूपयति -यितुं) विरूपीकृ, अपरूपीकृ, कुरूपीकृ, कदाकारीकृ, व्यङ्गीकृ, विकृ, वक्रीकृ, विकलीकृ.—(Twist) आकुच् (c. 1. -कुचति -चितुं c. 10. -कुचयति -यितुं).—(Pervert) साचीकृ, वक्रीकृ.

DISTORTED, *p. p.* विकृतः -ता -तं, विरूपीकृतः -ता -तं, साचीकृतः -ता -तं, वक्रीकृतः -ता -तं; 'having the limbs distorted,' विकृताङ्गः -ङ्गी -ङ्गं, व्यङ्गः -ङ्गी -ङ्गं; 'having the face distorted,' विकृतवदनः -ना -नं.

DISTORTION, *s.* (Act of distorting) विरूपकरणं, अपरूपीकरणं, कुरूपीकरणं, विकारः, विक्रिया, साचीकरणं, वक्रीकरणं, आकुञ्चनं.—(The state) विकृतिः *f.*, वैकृत्यं, विरूपता, वैरूप्यं, व्यङ्गता, वक्रता, वक्रिमा *m.* (न्), साचीकृतं.

To DISTRACT, *v. a.* (Pull in different directions) विकृष् (c. 1. -कर्षति c. 6. -कृषति -क्रष्टुं), नानादिक्षु कृष् or आकृष् or परिकृष्, बहुधा कृ or गम् in caus. (गमयति -यितुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं). —(Divide, rend) विदॄ in caus. (-दारयति -यितुं), विभिद् (c. 7. -भिनत्ति -भेत्तुं), खण्ड् (c. 10. खण्डयति -यितुं), परिखण्ड्, विदलीकृ, विदल् in caus. (-दालयति -यितुं).—(Draw off from any object) अपकृष्, व्यपकृष्, अपाकृष्.—(Perplex) मुह् in caus. (मोहयति -यितुं) विमुह्, व्यामुह्, आकुलीकृ, व्याकुलीकृ.—(Make mad) उन्मद् in caus. (-मादयति -यितुं).—(Be distracted) मुह्, (c. 4. मुह्यति, मोहितुं), उन्मद् (c. 4. -माद्यति -मदितुं); 'my heart is distracted,' अस्मद् हृदयं विदीर्यते.

DISTRACTED, *p. p.* आकृष्टमानसः -सा -सं, विक्षिप्तः -प्ता -प्तं, विकृष्टः -ष्टा -ष्टं, मोहितः -ता -तं, विमोहितः -ता -तं, व्यग्रः -ग्रा -ग्रं, व्याकुलः -ला -लं, चिन्ताकुलः -ला -लं, खण्डितः -ता -तं, उन्मत्तः -त्ता -त्तं, व्यस्तचित्तः -त्ता -त्तं.

DISTRACTEDLY, *adv.* उन्मत्तवत्, व्यग्रं, व्याकुलमनसा, विकृष्टचेतसा, मूढचेतसा.

DISTRACTEDNESS, *s.* विक्षिप्तता, व्यग्रता, उन्मत्तता, चित्तविप्लवः, आकुलत्वं.

DISTRACTION, *s.* विकर्षः -र्षणं.—(Perturbation of mind) मोहः, विमोहः, वैचित्यं, चित्तविक्षिप्तता, आकुलचित्तता, व्यग्रता, चित्तवैकल्यं, व्याकुलता, व्यस्तता.—(Madness) उन्मत्तता.—(Separation) विभेदः, विदारणं. —(Want of attention of mind) अमनोयोगः, विबोधः.—(Distraction of employment, various employment) विकर्म्मन् *n.* (न्).

To DISTRAIN, *v. a.* ऋणहेतोर् अधमर्णस्य द्रव्याणि धृ (c. 1. धरति धर्तुं) or ग्रह् (c. 9. गृह्णाति ग्रहीतुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं).

DISTRESS, *s.* (Act of distraining) द्रव्यग्रहणं, द्रव्यधृतिः *f.*, अस्थाव-

Digitized by Google

रधनग्रहणं, निरोधः.—(Calamity, affliction) क्लेशः, दुःखं, दुर्दशा, दुरवस्था, दुर्गतिः *f.*, दौर्गत्यं, व्यथा, कष्टं, पीडा, शोकः, सन्तापः, उद्वेगः, वैक्लव्यं, आपद् *f.*, विपद् *f.*, विपत्तिः *f.*, व्यसनं, विप्लवः, उपप्लवः, उत्पातः, विधुरं, अरिष्टं, मन्युः *m.*, बाधः, दैन्यं, वृजिनं, विडम्बना, आदीनवः, आश्रवः.

To DISTRESS, *v. a.* क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं, क्लेष्टुं), व्यथ् in caus. (व्यथयति -यितुं), पीड् (c. 10. पीडयति -यितुं), उपपीड्, अभिपीड्, बाध् (c. 1. बाधते -धितुं), तप् in caus. (तापयति -यितुं), सन्तप्, परितप्, उपतप्; उद्विज् in caus. (-वेजयति -यितुं), क्लेशं दा, व्यथां कृ, खिद् in caus. (खेदयति -यितुं).

DISTRESSED, *p. p.* क्लिष्टः -ष्टा -ष्टं, क्लेशितः -ता -तं, पीडितः -ता -तं, व्यथितः -ता -तं, दुःखितः -ता -तं, क्लिश्यमानः -ना -नं, क्लेशभाक् *m. f. n.* तापितः -ता -तं, तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं, सन्तापितः -ता -तं, बाधितः -ता -तं, विपन्नः -न्ना -न्नं, आपन्नः -न्ना -न्नं, आपद्ग्रस्तः -स्ता -स्तं, दुर्दशापन्नः -न्ना -न्नं, आपन्नतः -ता -तं, कृच्छ्रगतः -ता -तं, आपत्प्राप्तः -प्ता -प्तं, दुर्गतः -ता -तं, आतुरः -रा -रं, दुःखान्वितः -ता -तं, दुःखी -खिनी -खि (न्), दुःखार्तः -र्ता -र्तं, कातरः -रा -रं, उपतप्यमानः -ना -नं, आतप्यमानः -ना -नं, अभ्यर्दितः -ता -तं, विधुरः -रा -रं, विदुरः -रा -रं, उद्विग्नः -ग्ना -ग्नं, विद्रूनः -ना -नं, दीनः -ना -नं, आधिमान् -मती -मत् (त्), आकुलितः -ता -तं, परिकर्षितः -ता -तं, आतुरचित्तः -त्ता -त्तं, आर्तः -र्ता -र्तं in comp.; 'friend of the distressed,' आर्तबन्धुः *m.*

DISTRESSFUL, DISTRESSING, *a.* क्लेशकः -का -कं, क्लेशी -शिनी -शि (न्), क्लेशदः -दा -दं, व्यथकः -का -कं, व्यथाकरः -री -रं, दुःखकरः -री -रं, दुःखमयः -यी -यं, पीडाकरः -रा -रं, उपतापनः -ना -नं, उद्वेजकः -का -कं, आत्ययिकः -की -कं.

DISTRIBUTABLE, *a.* विभाज्यः -ज्या -ज्यं, वण्टनीयः -या -यं, परिकल्पनीयः -या -यं.

To DISTRIBUTE, *v. a.* पृथक् पृथग् विभज् (c. 1. -भजति -ते -भक्तुं) or प्रविभज् or संविभज्; विभागशः or यथाविभागं or अंशांशि दा or कॢप् (c. 10. कल्पयति -यितुं), or परिकॢप् or विन्यस् (c. 4. -अस्यति -असितुं) or विधा (c. 3. -दधाति -धातुं), ध्वंस् (c. 10. -ध्वंसयति -यितुं), वण्ट् (c. 10. वण्टयति -यितुं), प्रकुट्ट (c. 10. -कुट्टयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रणी (c. 1. -णयति -णेतुं).—(Distribute food to a party) परिविश् or परिविष् (c. 10. -वेषयति -यितुं).

DISTRIBUTED, *p. p.* विभक्तः -क्ता -क्तं, प्रविभक्तः -क्ता -क्तं, संविभक्तः -क्ता -क्तं, पृथग् विन्यस्तः -स्ता -स्तं, परिकल्पितः -ता -तं, प्रणीतः -ता -तं.

DISTRIBUTER, *s.* विभागकर्त्री *m.* (तृ), संविभागकृत्, विभागकल्पकः, परिकल्पकः, वण्टनकृत्, अंशयिता *m.* (तृ), अंशदः, विभक्ता *m.* (क्तृ), प्रणेता *m.* (तृ).

DISTRIBUTION, *s.* विभागः, विभागकल्पना, संविभागः, प्रविभागः, विभक्तिः *f.*, विभागकरणं, परिकल्पनं, कॢप्तिः *f.*, अंशनं, अंशकरणं, वण्टनं, परिनिवेपणं, प्रणयनं; 'distribution of food to a party,' परिवेषः -षणं.

DISTRIBUTIVE, *a.* विभागदायी -यिनी -यि (न्), विभागकल्पकः -का -कं, अंशकारी -रिणी -रि (न्), वण्टनकारी, संविभागकृत् *m. f. n.*

DISTRIBUTIVELY, *adv.* विभागशस्, विभागतस्, भागशस्, अंशांशि, संविभागेन.

DISTRICT, *s.* मण्डलं, देशः, प्रदेशः, चक्रं, राष्ट्रं, उपवर्त्तनं, गोचरः.

To DISTRUST, *v. a.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, अभिशङ्क्, परिशङ्क्; न विश्वस् (c. 2. -श्वसिति -तुं), न प्रती (c. 2. प्रत्येति -तुं rt. इ).

DISTRUST, *s.* अविश्वासः, अप्रत्ययः, अप्रतीतिः *f.*, शङ्का, आशङ्का, सन्देहः, निह्नवः, अनासङ्गः.

DISTRUSTED, *p. p.* अविश्वस्तः -स्ता -स्तं, आशङ्कितः -ता -तं, अप्रतीतः -ता -तं,

DISTRUSTFUL, *a.* अविश्वासी -सिनी -सि (न्), अप्रत्ययी -यिनी -यि (न्), शङ्काशीलः -ला -लं, आशङ्कान्वितः -ता -तं, साशङ्कः -ङ्का -ङ्कं, रोलम्बः -म्बा -म्बं.

DISTRUSTFULLY, *adv.* अविश्वासेन, अप्रत्ययात्, शङ्कया, साशङ्कं, शङ्कापूर्वं.

To DISTURB, *v. a.* (Agitate, disquiet) क्षुभ् in caus. (क्षोभयति -यितुं), विक्षुभ्, संक्षुभ्, बाध् (c. 1. बाधते -धितुं), उपरुध् (c. 7. -रुणद्धि -रोद्धुं), धू (c. 5. धूनोति c. 9. धुनाति, धवितुं, धोतुं), मथ् (c. 1. मथति -थितुं) or मन्थ् (c. 1. मन्थति -न्थितुं c. 9. मथ्नाति), लुड् (c. 1. लोडति -डितुं c. 10. लोडयति -यितुं), आलुड्, समालुड्, परिलुड्, विलुड्, विलुप् (c. 6. -लुम्पति -लोप्तुं), विप्रलुप्.—(Disturb the mind) मुह् in caus. (मोहयति -यितुं), विमुह्, व्यामुह्, विप्रमुह्, सम्मुह्, परिमुह्, व्याकुल (nom. व्याकुलयति -यितुं), व्याकुलीकृ, आकुल (nom. आकुलयति -यितुं), आकुलीकृ.—(Excite anger) प्रकुप् in caus. (-कोपयति -यितुं).—(Hinder, interrupt) वृ in caus. (वारयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विहन् (c. 2. -हन्ति -न्तुं), भञ्ज् (c. 7. भनक्ति, भंक्तुं).—(Disturb slumber) निद्रां भञ्ज्; 'to be disturbed in mind,' मुह् (c. 4. मुह्यति,) विमुह्, सम्मुह्. आकुलीभू, व्याकुलीभू.

DISTURBANCE, *s.* (Agitation, disorder) क्षोभः, संक्षोभः, विक्षोभः, व्याक्षोभः, व्यस्तता, विमर्दः.—(Emotion of mind, perturbation) आकुलत्वं, व्याकुलत्वं, प्रकोपः, वैक्लव्यं, व्यग्रता, मोहः, आवेगः.—(Tumult) विप्लवः, आहवः, डिम्बः, तुमुलं; 'popular disturbance,' प्रकृतिक्षोभः.—(Interruption) भङ्गः, विच्छेदः, खण्डनं, बाधः.

DISTURBED, *p. p.* क्षुभ्नः -भ्ना -भ्नं, क्षोभितः -ता -तं, बाधितः -ता -तं.—(In mind) आकुलः -ला -लं -लितः -ता -तं, व्याकुलः -ला -लं -लितः -ता -तं, व्याकुलीकृतः -ता -तं, आकुलचित्तः -त्ता -त्तं, मोहितः -ता -तं, विमोहितः -ता -तं, व्यस्तः -स्ता -स्तं, व्यग्रः -ग्रा -ग्रं, कातरः -रा -रं, खेदितः -ता -तं.

DISTURBER, *s.* क्षोभकरः, विक्षोभकर्त्री *m.* (त्रृ), मोहकः.—(Interrupter) भञ्जकः, विच्छेदकारी *m.* (न्), विघ्नकरः, विलोपनकृत्.

DISUNION, *s.* वियोगः, विसंयोगः, विप्रयोगः, असंयोगः, नियुक्तिः *f.*, भेदः, भिन्नता, विभेदः, विश्लेषः, अश्लेषा, असन्धानं, आसङ्क्त्यं, सङ्क्तविच्युतिः *f.*, विच्छेदः, अनैक्यं, पार्थक्यं.

To DISUNITE, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विप्रयुज्, विश्लिष् (c. 10. -श्लेषयति -यितुं), भिद् (c. 7. (भिनत्ति, भेत्तुं), विभिद्, विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), पृथक्कृ, विगम् in caus. (-गमयति -यितुं).

To DISUNITE, *v. n.* वियुज् in pass. (-युज्यते), विप्रयुज्; विश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं); विभिद् in pass. (-भिद्यते), विगम् (c. 1. -गच्छति -गन्तुं).

DISUNITED, *p. p.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, विश्लिष्टः -ष्टा -ष्टं, नियुक्तिकः -की -कं, असंलग्नः -ग्ना -ग्नं, असंसक्तः -क्ता -क्तं, असंहतः -ता -तं, विरहितः -ता -तं, द्वैधीभूतः -ता -तं.

DISUNITER, *s.* वियोगकर्त्री *m.* (त्रृ), भेदकरः, पृथक्कारी *m.* (न्).

DISUSAGE, DISUSE, *s.* अव्यवहारः, अनभ्यासः, असेवनं, अनाचारः, निवृत्तिः *f.*, विरतिः *f.*, व्यवहारनिवृत्तिः *f.*, आचारत्यागः, अभ्यासविच्छेदः.

To DISUSE, *v. a.* व्यवहारं or अभ्यासं त्यज् (c. 1. त्यजति, त्यक्तुं), व्यवहाराद् विरम् (c. 1. -रमति- रन्तुं) or निवृत् (c. 1. -वर्त्तते -र्त्तितुं), न सेव् (c. 1. सेवते -वितुं).

DISUSED, *p. p.* अव्यवहारितः -ता -तं, अनभ्यस्तः -स्ता -स्तं, असेवितः -ता -तं, त्यक्तः -क्ता -क्तं; 'as words,' निरूक्तः -क्ता -क्तं.

DITCH, *s.* खातं, खातकं, परिखा, गर्त्तः, खातभूः *f.*, खेयं, अखातं, उपकुल्या, कुल्या, प्रणालः, प्रतिकूपः, निपानं.

To DITCH, *v. a.* परिखन् (c. 1. -खनति -नितुं), आखन्, परिखाकरणार्थं भूमिं खन्, परिखां कृ, गर्त्तं कृ.

DITCHER, *s.* आखनिकः, परिखाखनकः. गर्त्तखनिता *m.* (तृ), खातकः.

Digitized by Google

DITTANY, *s.* सुगन्धीय ओषधिप्रभेदः, तिक्तशाकः.

DITTO, *s.* तथा, पूर्वोक्तः -क्ता -क्तं, उपरिलिखितः -ता -तं.

DITTY, *s.* गीतं -तकं -तिका, गीतिः *f.*, गानं, गाथा, काव्यबन्धः.

DIURETIC, *a.* मूत्रलः -ला -लं, मूत्रवर्धकः -का -कं, मूत्रोत्पादकः -का -कं.

DIURNAL, *a.* आह्निकः -की -कं, दैनः -नी -नं -निकः -की -कं, दैनन्दिनः -नी -नं, दैवसिकः -की -कं, प्रात्यहिकः -की -कं, दिवातनः -नी -नं, अन्वाहिकः -की -कं, नैत्यिकः -की -कं, नित्यः -त्या -त्यं.

DIURNAL, *s.* पञ्जिका, पञ्जिः *f.*, पदभञ्जिका, दैनिकपुस्तकं.

DIURNALLY, *adv.* प्रतिदिनं, प्रतिदिवसं, प्रत्यहं, दिवसे दिवसे, दिने दिने.

DIUTURNAL, *a.* चिरस्थायी -यिनी -यि (न्), चिरकालिकः -की -कं.

DIVAN, *s.* (Council of state) महासभा, शिष्टसभा, तुरुष्कदेशे राजसभा. —(Saloon fitted up with sofas) केलिशयनयुक्ता शाला.

To DIVARICATE, *v. n.* द्विधा विभिद् in pass. (-भिद्यते), द्विभागीभू, द्विखण्डीभू, द्विधाभू, विगम् (c. 1. -गच्छति -गन्तुं), द्विशाखारूपेण विभिद् in pass.

To DIVARICATE, *v. a.* द्विधाकृ, द्विभागीकृ, द्विखण्डीकृ, द्विशकलीकृ.

DIVARICATION, *s.* द्विधाकरणं, द्विधाभावः, द्विखण्डीकरणं, विभिन्नता.

To DIVE, *v. a.* and *n.* मज्ज् (c. 6. मज्जति, मंक्तुं, मज्जितुं), निमज्ज्; अवगाह् (c. 1. -गाहते -हितुं -गाढुं), व्यवगाह्, जलमध्ये प्रविश् (c. 6. -विशति -वेष्टुं), जलान्तःप्रवेशं कृ, जलान्तःप्रवनं कृ, प्लु (c. 1. प्लवते, प्लोतुं).—(Dive after something) किञ्चिदन्वेषणार्थं जले निमज्ज्.—(Dive into any thing) अमुककर्म्मणि निविश्, निरूप् (c. 10. -रूपयति -यितुं); 'diving into books,' ग्रन्थमग्नः -ग्ना -ग्नं, ग्रन्थनिविष्टः -ष्टा -ष्टं.—(Explore) अन्विष् (c. 6. -इच्छति c. 4. -इष्यति -एषितुं), परीक्ष् (c. 1. -ईक्षते -क्षितुं).

DIVER, *s.* मंक्षा *m.* (क्तृ), निमंक्षा *m.*, गाहिता *m.* (तृ), अवगाहिता *m.*, जलेवाहः.—(Into books) शास्त्रनिष्ठः.—(Bird) प्लवः, प्लावी *m.* (न्).

To DIVERGE, *v. n.* एककेन्द्रात् पराङ्मुखः -खी -खं भू or विचल् (c. 1. -चलति -लितुं) or विगम् (c. 1. -गच्छति -गन्तुं) or विच्यु (c 1. -च्यवते -च्योतुं) or व्युत्क्रम् (c. 1. -क्रामति -क्रमितुं).

DIVERGENCE, *s.* केन्द्रपराङ्मुखता, केन्द्रापसरणं, विचलनं, विच्युतिः *f.*, विगमः, विस्तारः.

DIVERGENT, *a.* केन्द्रपराङ्मुखः -खी -खं, केन्द्रविचलः -ला -लं, विस्तृतः -ता -तं.

DIVERS, *a.* नाना indec., विविधः -धा -धं, अनेकः -का -कं, नानाप्रकारः -रा -रं, नानाविधः -धा -धं, बहुविधः -धा -धं, व्याविधः -धा -धं, नानारूपः -पी -पं.

DIVERSE, *a.* (Different) भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, अन्यः -न्या -न्यत्, असदृशः -शी -शं, असमानः -ना -नं, असमः -मा -मं, अतुल्यः -ल्या -ल्यं, विपरीतः -ता -तं, विविक्तः -क्ता -क्तं, अनीदृशः -शी -शं, इतरः -रा -रं, पृथक् indec., पृथग्विधः -धा -धं.—(Various). *See* DIVERS.

DIVERSELY, *adv.* नानारूपेण, भिन्नप्रकारेण, अनेकधा, पृथक्.

DIVERSIFICATION, *s.* नानाप्रकारकरणं, नानारूपकरणं, अनेकरूपकरणं, आकारपरिवर्त्तनं, वैचित्र्यं, विभिन्नता, विभेदः.

DIVERSIFIED, *p. p.* or *a.* नानारूपः -पी -पं, भिन्नरूपः -पी -पं, नानाप्रकारः -रा -रं, नानाविधः -धा -धं, पृथग्विधः -धा -धं, विविधः -धा -धं, व्याविधः -धा -धं, चित्रितः -ता -तं, विचित्रः -त्रा -त्रं, चित्रविचित्रः -त्रा -त्रं.

To DIVERSIFY, *v. a.* नानारूपं -पीं -पं कृ, भिन्नरूपं -पीं -पं कृ, चित्र् (c. 10. चित्रयति -यितुं), विचित्रं -त्रां -त्रं कृ, चित्रविचित्रीकृ, नानाविधं -धां -धं कृ.

DIVERSION, *s.* (Sport) विनोदः, विलासः, विलसनं, विहारः, क्रीडा, परीहासः, केलिः *m. f.*, कौतुकं.—(Act of amusing the mind) मनोविनोदः, मनोरञ्जनं, अनुरञ्जनं.—(Act of turning aside) स्वपथात् or स्वमार्गाद् भ्रंशकरणं or च्युतिकरणं or विकर्षः or विकर्षणं.

DIVERSITY, *s.* (Difference) भेदः, विभेदः, भिन्नता, विभिन्नता, असादृश्यं, असाम्यं, द्वैधं, द्वैविध्यं.—(Variety) वैचित्र्यं, विचित्रता, भेदाभेदः.

To DIVERT, *v. a.* (Turn from its course) स्वपथात् or स्वमार्गाद् भ्रंश् in caus. (भ्रंशयति -यितुं) or विचल् in caus. (-चालयति -यितुं) or विकृष् (c. 6. -कृषति c. 1. -कर्षति -क्रष्टुं) or विच्यु in caus. (-च्यावयति -यितुं).—(Amuse, please) विनुद् in caus. (-नोदयति -यितुं), विलस् in caus. (-लासयति -यितुं), नन्द् in caus. (नन्दयति -यितुं), रम् in caus. (रमयति -यितुं), रञ्ज् in caus. (रञ्जयति -यितुं).

DIVERTED, *p. p.* विकृष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं, स्वमार्गेच्यावितः -ता -तं. —(Amused) विनोदितः -ता -तं, प्रमोदितः -ता -तं, उल्लासितः -ता -तं.

DIVERTING, *a.* हासकरः -री -रं, प्रहासी -सिनी -सि (न्), हास्ययुक्तः -क्ता -क्तं, विनोदकः -का -कं, विनोदजनकः -का -कं, आनन्दकः -का -कं.

DIVERTISEMENT, *s.* (Diversion) विनोदः, विलासः.—(A ballet between the acts) अङ्कद्वयमध्ये नाटकप्रेक्षकाणां विनोदार्थं हस्तीषकं.

To DIVEST, *v. a* (Strip) विवस्त्र (nom. -वस्त्रयति -यितुं), नग्नीकृ, अवनृ in caus. (-नारयति -यितुं), उत्कृष् (c. 1. -कर्षति -क्रष्टुं), उन्मुच् (c. 6. -मुञ्चति -मोक्तुं), अवमुच्, विमुच्; उच्छद् (c. 10. -छादयति- यितुं), अपनह् (c. 4. -नह्यति -नद्धुं).—(Deprive of) हृ (c. 1. हरति, हर्त्तुं), अपनी (c. 1. -नयति -नेतुं), वियुज् (c. 10. -योजयति -यितुं), विनाकृ.

DIVESTURE, *s.* विवस्त्रीकरणं, नग्नीकरणं, अपनयनं, हरणं.

DIVIDABLE, *a.* विभेद्यः -द्या -द्यं, विभाज्यः -ज्या -ज्यं, खण्डनीयः -या -यं.

To DIVIDE, *v. a.* (Part, separate) भिद् (c. 7. भिनत्ति, भेत्तुं), विभिद्, छिद् (c. 7. छिनत्ति, छेत्तुं), विच्छिद्; खण्ड् (c. 10. खण्डयति -यितुं), वियुज् (c. 7. -युनक्ति -योक्तुं), विप्रयुज्, विश्लिष् (c. 10. -श्लेषयति -यितुं), पृथक्कृ, शकलीकृ.—(Divide in two) द्विधा छिद् or कृ, द्विखण्डीकृ, द्विभागीकृ, द्व्यंशीकृ.—(Make partition of) विभज् (c. 1. -भजति -भक्तुं), प्रविभज्, संविभज्, अंश् (c. 10. अंशयति -यितुं), व्यंस् (c. 10. -अंसयति -यितुं), परिकॢप् (c. 10. -कल्पयति -यितुं).

To DIVIDE, *v. n.* भिद् in pass. (भिद्यते), विभिद्, विच्छिद् in pass. (-छिद्यते), वियुज् in pass. (-युज्यते), विश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं), द्विधाभू.—(Cleave open) स्फुट् (c. 1. स्फोटति c. 6. स्फुटति -टितुं), दल् (c. 1. दलति -लितुं), विदल्.—(Divide upon a question) द्विधाभू, द्वैधीभू.

DIVIDED, *p. p.* भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, विच्छिन्नः -न्ना -न्नं, वियुक्तः -क्ता -क्तं, विश्लिष्टः -ष्टा -ष्टं, द्विधाकृतः -ता -तं, द्विधाभूतः -ता -तं, द्वैधीभूतः -ता -तं, पृथक्कृतः -ता -तं, शकलीकृतः -ता -तं, विभक्तः -क्ता -क्तं, प्रविभक्तः -क्ता -क्तं, संविभक्तः -क्ता -क्तं, अंशितः -ता -तं, द्व्यंशः -शा -शं.

DIVIDEND, *s.* (Share, interest on money, &c.) भागः, अंशः, लभ्यांशः, उद्धारः, भाज्यं, कलान्तरं.—(In arithmetic) भाज्यं.

DIVIDER, *s.* (One that separates) भेदकः, विभेदकः, भेदकरः, विच्छेदकः, छेदकरः, वियोगकृत् *m.*—(Distributer) विभागकल्पकः, संविभागकृत्, अंशयिता *m.* (तृ).

DIVINATION, *s.* गणना, गणकता, पक्षिगतिहस्तरेखादिलक्षणाद् भविष्यदनुमानं or शुभाशुभकथनं, पूर्वलक्षणपरीक्षा, शकुनपरीक्षणं, पूर्वचिह्ननिरीक्षणं, भविष्यत्सूचनं.

DIVINE, *a.* दिव्यः -व्या -व्यं, दैवः -वी -वं, देवकीयः -या -यं, देवकः -का -कं, दैविकः -की -कं, ऐश्वरः -री -रं, ईश्वरीयः -या -यं, ऐशः -शी -शं, ऐशिकः -की -कं, देवार्हः -र्हा -र्हं.—(God-like) ईश्वरतुल्यः -ल्या -ल्यं, देवरूपी -पिणी -पि (न्), ईश्वरमूर्त्तिः -र्त्तिः -र्त्ति.

DIVINE, *s.* (Clergyman) पुरोहितः, धर्म्माध्यापकः, धर्म्मोपदेशकः.—(Theologian) श्रोत्रियः, श्रुताध्ययनसम्पन्नः, परमार्थविद्.

Digitized by Google

To DIVINE, *v. a.* and *n.* (Practice divination) गणनां कृ, पक्षिगति-चक्षुःस्पन्दादिलक्षणाद् भविष्यद् अनुमा (c. 2. -माति -तुं) or शुभाशुभं कथ् (c. 10. कथयति -यितुं) or प्रदृश् in caus. (-दर्शयति -यितुं) or सूच् (c. 10. सूचयति -यितुं), शकुनानि or पूर्वलक्षणानि परीक्ष् (c. 1. ईक्षते -क्षितुं).—(Conjecture) अनुमा.

DIVINELY, *adv.* देवरूपेण, देववत्, दिव्यरूपेण, ईश्वरीयप्रकारेण.

DIVINER, *s.* (One who practices divination) दैवज्ञः, शकुनपरीक्षकः, पूर्वचिह्ननिरीक्षकः, निमित्तज्ञः, पक्षिगतिहस्तरेखादिलक्षणाद् भविष्यत्सूचकः. —(Conjecturer) अनुमाता *m.* (तृ).

DIVING, *s.* मज्जनं, निमज्जनं, अवगाहः -हनं, विगाहः, प्लवः -वनं.

DIVING-BELL, *s.* वायुपूरितं घण्टाकृति यन्त्रं यत्प्रविश्य जलेवाहा गम्भीर-सलिले सुचिरेण वस्तुं शक्नुवन्ति.

DIVINITY, *s.* (State of being divine) देवत्वं -ता, भगवत्त्वं, ब्रह्मत्वं.—(A god) देवः -वी *f.*, देवता, भगवान् *m.* -वती *f.* (त्), सुरः, विबुधः, सुचिरायूः *m.* (स्).—(Theology) परमार्थविद्या, ईश्वरविषया विद्या, श्रुतिविद्या, धर्मशास्त्रविद्या, पारमार्थिकविद्या.

DIVISIBILITY, *s.* छेद्यत्वं, विच्छेद्यता, भेद्यत्वं, अंशनीयता, विभाज्यत्वं.

DIVISIBLE, *a.* छेद्यः -द्या -द्यं, विच्छेद्यः -द्या -द्यं, विच्छेदनीयः -या -यं, भेद्यः -द्या -द्यं, विभाज्यः -ज्या -ज्यं, अंश्यः -श्या -श्यं, अंशनीयः -या -यं, -अंशयितव्यः -व्या -व्यं.

DIVISION, *s.* (Dividing, separating) छेदः, विच्छेदः -दनं, भेदः, विभेदः -दनं, खण्डनं, परिच्छेदः, परिच्छित्तिः *f.*, छित्तिः *f.*, पृथक्करणं, द्विधाकरणं, द्वैधीकरणं.—(Partition) भाजनं, विभागः, प्रविभागः, विभागकरणं, अंशनं, उद्धारविभागः, उद्धारः -रणं.—(Disunion) वियोगः, विसंयोगः, विप्रयोगः, विश्लेषः.—(State of being divided) भिन्नता, विभिन्नता, विच्छिन्नता, विभक्तता.—(Part, distinct portion) भागः, खण्डः, विभागः, देशः, प्रदेशः, एकदेशः.—(Division of time) कालविभक्तिः *f.* —(Of an army) गुल्मः, दलं, सैन्यव्यूहः.—(In arithmetic) भागहरः -हारः, हरणं, छेदनं.

DIVISOR, *s.* (In arithmetic) हरकः, हारकः, सङ्गहारकः, हरः, हारः, भाजकः.

DIVORCE, DIVORCEMENT, *s.* निराकरणं, त्यागः, स्त्रीपुरुषविच्छेदः, धर्मानु-सारेण or व्यवहारदर्शनानन्तरं विवाहसम्बन्धभेदः.—(From a wife) स्वभार्यानिराकरणं, स्वभार्यात्यागः; 'writing of divorce,' त्यागपत्रं.

To DIVORCE, *v. a.* स्वभार्यां or स्वभर्तारं त्यज् (c. 1. त्यजति, त्यक्तुं) or परित्यज् or निराकृ or निरस् (c. 4. -अस्यति -असितुं), व्यवहारदर्श-नानन्तरं विवाहसम्बन्धं भिद् (c. 7. भिनत्ति, भेत्तुं).

DIVORCED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, निराकृतः -ता -तं.

DIVORCER, *s.* स्त्रीपुरुषयोर् विच्छेदकर्त्री *m.* (तृ), विवाहसम्बन्धभेदकः.

ECLIPTIC, *s.* क्रान्तिमण्डलं, क्रान्तिः *f.*, क्रान्तिकक्षः, रविमार्गः.

ECLOGUE, *s.* गोमेषपशुपालनादिविषयं क्षुद्रकाव्यं, ग्राम्यकविता.

ECONOMIC, ECONOMICAL, *a.* (Pertaining to the management of household concerns) गृहकर्म्मनिर्व्वाहसम्बन्धी -न्धिनी -न्धि (न्).—(Frugal) परिमितव्ययः -या -यं, स्वल्पव्ययः -या -यं, अव्ययः -या -यं, अमुक्तहस्तः -स्ता -स्तं, व्ययपराङ्मुखः -खी -खं, अबहुदः -दा -दं.

ECONOMICALLY, *adv.* परिमितव्ययेन, स्वल्पव्ययेन, अमुक्तहस्तेन.

ECONOMICS, *s.* गृहकार्य्यं, गृहव्यापारः, गृहकर्म्मनिर्व्वाहविद्या.

ECONOMIST, *s.* परिमितव्ययी *m.* (न्).—(Political economist) नीतिज्ञः, नीतिविद्याकुशलः, नीतिशास्त्रविद् *m.*

To ECONOMIZE, *v. n.* परिमितव्ययेन गृहकार्य्याणि निर्व्वह् in caus. (-वाहयति -यितुं).

ECONOMY, *s.* (Management of a household) गृहकार्य्यनिर्व्वाहः, गृहकर्म्मनयः, गार्हस्थ्यं.—(Frugality) परिमितव्ययः, स्वल्पव्ययः, अमुक्तहस्तत्वं.—(Management) नयः, नीतिः *f.*, प्रणयनं, निर्व्वाहः.—(Arrangement) विन्यासः, विरचनं, संविधानं, कल्पना.—(System) स्थितिः *f.*, संस्थानं, मार्गः.—(Political economy) नीतिः *f.*, नीतिविद्या, राजनीतिः *f.*, राज्यकर्म्मनिर्व्वाहविद्या.

ECSTASIED, *a.* सम्मोहितः -ता -तं, हर्षमोहितः -ता -तं, हर्षोन्मत्तः -त्ता -त्तं, प्रहर्षितः -ता -तं, आनन्दमग्नः -ग्ना -ग्नं, पुलकितः -ता -तं, रोमाञ्चितः -ता -तं.

ECSTASY, *s.* प्रमदः, उन्मदः, मादः, प्रहर्षः, मोहः, सम्मोहः, आनन्दः, परमानन्दः, हर्षोन्मत्तता, रोमहर्षः, अत्यन्ताह्लादः, अत्यानन्दः.

ECSTATIC, ECSTATICAL, *a.* मादनः -ना -नी -नं, उन्मादनः -ना -नं, मोहनः -ना -नी -नं, सम्मोही -हिनी -हि (न्), परमानन्ददः -दा -दं, परमाह्लादजनकः -का -कं, पुलकजनकः -का -कं.

ECSTATICALLY, *adv.* सपरमानन्दं, सानन्दं, समादं, परमाह्लादेन.

ECUMENICAL, *a.* सार्व्वलौकिकः -की -कं, सर्व्वसाधारणः -णी -णं.

EDACIOUS, *a.* भक्षकः -का -कं, खादकः -का -कं, भोजी -जिनी -जि (न्), अग्रः -ग्रा -ग्रं, घस्मरः -री -रं, ग्रघसः -सा -सं, बहुभुक् *m.* (ज्), बह्वाशी -शिनी -शि (न्), भोजनलुब्धः -ब्धा -ब्धं.

EDACITY, *s.* घस्मरता, अतिभोजनं, गृध्नता, जिघृक्षा.

EDDY, *s.* जलावर्त्तः, जलगुल्मः, आवर्त्तिका, आवर्त्तिनी, भूमिः *m.*, भ्रमः, भ्रमरकः, अवघूर्णः, दरणिः *m.*, आरणिः *m.*, कूलहुण्डकः, कूलन्ध्रयः, तालूरः.

EDENTATED, *a.* निर्दशनः -ना -नं, नीरदः -दा -दं, अदंष्ट्री -ष्ट्रिणी -ष्ट्रि (न्).

EDGE, *s.* (Border, margin) प्रान्तः, अन्तः -न्तं, उपान्तं, समन्तः, पर्य्यन्तं, सीमा, परिसरः, कच्छः, उत्सङ्गः, कोटिः *f.*, धारः.—(Edge or point of a blade) धारा -रं, कोटिः *f.*, अग्रिः *f.*, पालिः *f.*, पाली, पालिका, अणिः *m.*, आणिः *m. f.*, शिखरः -रं, कोणः, अग्रं.—(Edge of a brook) कच्छः, तीरं, तटं, कूलं, कच्छान्तः; 'edge of a wood,' वनान्तं; 'edge of a mountain,' उत्सङ्गः, टङ्का, धारा; 'edge of a roof,' पटलप्रान्तः, वलिकः, नीव्रं; 'two-edged,' द्विधारः -रा -रं, उभयतस् तीक्ष्णः -क्ष्णा -क्ष्णं; 'red-edged,' रक्तकोटिः -टिः -टि; 'state

Digitized by Google

of being set on edge (the teeth),' दन्तहर्षः.—(Keenness) तैक्ष्ण्यं, तीक्ष्णता, तेजः *n.* (स्); 'of appetite,' अग्निः *m.*, रुचिः *f.*

To EDGE, *v. a.* (Border) प्रान्त (nom. प्रान्तयति -यितुं), समन्त, (समन्तयति-यितुं), पर्य्यन्तं कृ.—(Sharpen) तिज् (c. 10. तेजयति -यितुं), तीक्ष्णीकृ, निशो (c. 4. -श्यति -शातुं).

EDGED, *a.* (Having an edge) धारी -रिणी -रि (न्), धाराधरः -रा -रं, कोटिमान् -मती -मत् (त्).—(Sharp-edged) तीक्ष्णधारः -रा -रं, शितधारः -रा -रं, तीक्ष्णाग्रः -ग्रा -ग्रं, लघिः -घिः -घि; 'two-edged sword,' द्विधारखड्गः.

EDGELESS, *a.* धाराहीनः -ना -नं, कोटिरहितः -ता -तं, अतीक्ष्णः -क्ष्णा -क्ष्णं.

EDGING, *s.* कोटिः *f.*—(Of a garment) अञ्चलः, वस्त्राञ्चलः -लं.

EDIBLE, *a.* खाद्यः -द्या -द्यं, खादनीयः -या -यं, भोज्यः -ज्या -ज्यं, भक्ष्यः -क्ष्या -क्ष्यं, भक्षणीयः -या -यं, भोजनीयः -या -यं, आद्यः -द्या -द्यं, अदनीयः -या -यं, आहार्य्यः -र्य्या -र्य्यं.

EDICT, *s.* राजाज्ञा, राजशासनं, शासनं, धर्म्मकीलः; 'written order,' आज्ञापत्रं, शासनपत्रं, पट्टः.

EDIFICATION, *s.* ज्ञाननिष्ठा, निष्ठा, ज्ञानवृद्धिः *f.*, ज्ञानप्राप्तिः *f.*, शिक्षा, समुत्थानं, उपदेशः, ज्ञानदानं.

EDIFICE, *s.* हर्म्यं, शाला, भवनं, मन्दिरं, धाम *n.* (न्), सौधं, अट्टालिका, प्रासादः, सदनं, गृहं, वरणः, वास्त्रं, प्राकारः.

EDIFIED, *p. p.* शिक्षितः -ता -तं, प्राप्तज्ञानः -ना -नं, वृद्धज्ञानः -ना -नं, लब्धज्ञानः -ना -नं, गृहीतज्ञानः -ना -नं, उपदिष्टः -ष्टा -ष्टं.

To EDIFY, *v. a.* निष्ठां कृ or जन् (c. 10. जनयति -यितुं), शिक्ष् (c. 10. शिक्षयति -यितुं), उपदिश् (c. 6. -दिशति -देष्टुं), ज्ञानं वृध् in caus. (वर्धयति -यितुं).

EDIFYING, *a.* निष्ठावर्धकः -का -कं, ज्ञानवर्धकः -का -कं, उपदेशकः -का -कं.

To EDIT, *v. a.* ग्रन्थं शोधयित्वा प्रकाश् (c. 10. -काशयति -यितुं), प्रकटीकृ.

EDITED, *p. p.* प्रकाशितः -ता -तं, शोधितः -ता -तं, शुद्धीकृतः -ता -तं.

EDITION, *s.* (Publication) प्रकाशनं, प्रकाशकरणं, प्रकटीकरणं.—(Number of copies printed at once) एकवारे मुद्रितो ग्रन्थसमूहः.

EDITOR, *s.* प्रकाशकः, ग्रन्थप्रकाशकः, ग्रन्थशोधकः.

To EDUCATE, *v. a.* विनी (c. 1. -नयति -नेतुं), अनुनी, शिक्ष् (c. 10. शिक्षयति -यितुं), अनुशिक्ष्, शास् (c. 2. शास्ति, शासितुं), अनुशास्, अधी in caus. (अध्यापयति -यितुं, rt. इ), उपदिश् (c. 6. -दिशति -देष्टुं), पुष् (c. 10. पोषयति -यितुं), पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, अभ्यस् (c. 4. -अस्यति -असितुं), संवृध् in caus. (-वर्धयति -यितुं), विद्यां दा.

EDUCATED, *p. p.* शिक्षितः -ता -तं, कृतविद्यः -द्या -द्यं, लब्धविद्यः -द्या -द्यं, गृहीतविद्यः -द्या -द्यं, कृताभ्यासः -सा -सं, कृतबुद्धिः -द्धिः -द्धि, कृतधीः -धीः -धि, अनुनीतः -ता -तं, विनीतः -ता -तं, शिष्टः -ष्टा -ष्टं, संवर्धितः -ता -तं, पोषितः -ता -तं, व्युत्पन्नः -न्ना -न्नं, संस्कृतः -ता -तं; 'well-educated,' सुशिक्षितः -ता -तं.

EDUCATION, *s.* शिक्षा, अध्यापनं, विनयः, अनुनयः, शिष्टिः *f.*, शास्तिः *f.*, शासनं, अनुशासनं, उपदेशः, विद्यादानं, अभ्यासः, पोषः -षणं, पुष्टिः *f.*, पालनं, प्रतिपालनं, संवर्धनं, विद्याप्राप्तिः *f.*, विद्यालम्भिः *f.*, विद्याग्रहणं, विद्याज्ञानं, व्युत्पत्तिः *f.*

EEL, *s.* जलव्यालः, कुच्चिका, अन्धाहिः *m. f.*, पङ्कगतिः *f.*

EFFABLE, *a.* कथनीयः -या -यं, वाच्यः -च्या -च्यं, निर्वचनीयः -या -यं.

To EFFACE, *v. a.* अपमृज् (c. 2. -मार्ष्टि -ष्टुं), व्यामृज्, प्रमृज्, अवमृज्, उन्मृज्; व्यामृश् (c. 6. -मृशति -ष्टुं), अवमृश्; अवमृद् (c. 9. -मृद्नाति -मर्दितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विनश् in caus. (-नाशयति -यितुं), उद्धृ (c. 1. -हरति -हर्तुं), समुद्धृ, उन्मूल् (c. 10. -मूलयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, अवमर्षणं कृ, व्यामर्षं कृ.

EFFACED, *p. p.* अपमृष्टः -ष्टा -ष्टं, उन्मृष्टः -ष्टा -ष्टं, व्यामृष्टः -ष्टा -ष्टं, उच्छिन्नः -न्ना -न्नं, अवमृदितः -ता -तं, मृदितः -ता -तं, लुप्तः -प्ता -प्तं.

EFFACEMENT, *s.* मार्जना, अपमार्जना, व्यामर्षः, अवमर्षणं, लोपः.

EFFECT, *s.* (That which is produced by an agent) उत्पन्नं, निष्पन्नं, उद्भूतं, सिद्धिः *f.*, उत्पत्तिः *f.*, कार्य्यं, वृत्तं, अनुवृत्तं, घटना.—(Consequence) फलं, कर्म्मफलं, फलमुत्तरं, प्रयोगः, प्रयुक्तिः *f.*, उत्तरं, अनुसारः, परिणामः, अन्तः -न्तं, वृत्तान्तः, शेषः, अनुषङ्गः, कार्य्यं, अन्वयः, योगः, अनुभवः, भव्यं, फलोदयः, प्रतिफलं, उदर्कः, प्रत्ययः.—(Purpose) अर्थः, प्रयोजनं, अभिप्रायः; 'to what effect?' किमर्थं; 'he spoke to that effect,' इत्युवाच.—(Advantage, validity) फलं, प्रयोजनं, अर्थः, प्रभावः; 'of no effect,' निष्फलः -ला -लं, निरर्थकः -का -कं, निष्प्रयोजनः -ना -नं; 'to destroy the effect of any thing,' निष्फल (nom. निष्फलयति -यितुं), मोघीकृ.—(Completion) निष्पत्तिः *f.*, सिद्धिः *f.*—(Fact) वस्तु *n.*, अर्थः; 'in effect,' वस्तुतस्, अर्थतस्, तत्त्वतस्.—(Effects, goods) द्रव्याणि *n. pl.*, वस्तूनि *n. pl.*, सामग्र्यं, सामग्री, विभवः, रिक्थं.

To EFFECT, *v. a.* उत्पद् in caus. (-पादयति -यितुं), सम्पद्, निष्पद्, उपपद्, समुत्पद्; साध् in caus. (साधयति -यितुं), संसाध्, सिद्धीकृ, जन् in caus. (जनयति -यितुं), सञ्जन्; कृ (c. 8. करोति, कर्तुं), सङ्कृ, तन् (c. 8. तनोति -नितुं), निर्मा (c. 2. -माति -तुं).

EFFECTED, *p. p.* सिद्धः -द्धा -द्धं, सम्पादितः -ता -तं, उत्पादितः -ता -तं, उपपादितः -ता -तं, निष्पादितः -ता -तं, समुत्पादितः -ता -तं, निष्पन्नः -न्ना -न्नं, सम्पन्नः -न्ना -न्नं, उत्पन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, कृतः -ता -तं, साधितः -ता -तं, सिद्धीकृतः -ता -तं, राद्धः -द्धा -द्धं, अनुराद्धः -द्धा -द्धं; 'one who has effected his object,' कृतार्थः, कृतार्थीभूतः.

EFFECTIBLE, *a.* साध्यः -ध्या -ध्यं, साधनीयः -या -यं, प्रसाध्यः -ध्या -ध्यं, निष्पाद्यः -द्या -द्यं, उपपाद्यः -द्या -द्यं, सम्पादनीयः -या -यं, करणीयः -या -यं, कर्तुं or उत्पादयितुं शक्यः -क्या -क्यं.

EFFECTIVE, *a.* साधकः -का -कं, साधिकः -का -कं, कार्य्यसाधकः -का -कं, प्रसाधकः -का -कं, सम्पादकः -का -कं, निष्पादकः -का -कं, प्रतिपादकः -का -कं, उत्पादकः -का -कं, निष्पादनः -ना -नं, कारकः -का -कं, कारी -रिणी -रि (न्), फलोत्पादकः -का -कं.

EFFECTIVELY, *adv.* अमोघं, सफलं, निष्पत्तिपूर्वं, निष्पादकप्रकारेण, अव्यर्थं, सबलं, प्रभावेन.

EFFECTLESS, *a.* निष्फलः -ला -लं, व्यर्थः -र्था -र्थं, मोघः -घा -घं, अनुपपन्नः -न्ना -न्नं, निर्बलः -ला -लं, निर्गुणः -णा -णं, निष्प्रयोजनः -ना -नं.

EFFECTUAL, *a.* अमोघः -घा -घं, फलोत्पादकः -का -कं, सफलः -ला -लं, अव्यर्थः -र्था -र्थं, अव्यर्थयत्नः -त्ना -त्नं, प्रबलः -ला -लं, बलवान् -वती -वत् (त्), शक्तिमान् -मती -मत् (त्), सप्रयोजनः -ना -नं, सार्थकः -का -कं, अनिरर्थकः -का -कं, समर्थः -र्था -र्थं, उपयोगी -गिनी -गि (न्).

EFFECTUALLY, *adv.* अमोघं, अव्यर्थं, सफलं, सप्रयोजनं, बलवत्.

To EFFECTUATE, *v. a.* साध् (c. 10. साधयति -यितुं), सम्पद् (c. 10. -पादयति -यितुं).

EFFEMINACY, *s.* स्त्रैत्वं, स्त्रीता, स्त्रैणं, क्लैव्यं, क्लीवता, सौकुमार्य्यं, कोमलता, मृदुता, स्त्रीव्यवहारित्वं, स्त्रीधर्म्मसेवा.

EFFEMINATE, *a.* स्त्रैणः -णी -णं, स्त्रीधर्म्मा -र्म्मा -र्म्म (न्), स्त्रीधर्म्मी -र्म्मिणी -र्म्मि (न्), स्त्रीव्यवहारी -रिणी -रि (न्), स्त्रीवदाचारी -रिणी -रि (न्), क्लीवः -वा -वं, सुकुमारः -रा -रं, कोमलः -ला -लं; 'an effeminate person,' निष्पुरुषः, कापुरुषः, गेहशूरः.

Digitized by Google

To EFFEMINATE, *v. a.* क्लीवीकृ, स्त्रीवत् कृ, निष्पुरुषीकृ, कोमलीकृ.

EFFEMINATELY, *adv.* स्त्रीवत्, निष्पुरुषवत् कापुरुषवत्, क्लीववत्, नारीरूपेण, स्त्रीधर्म्मानुसारात्.

To EFFERVESCE, *v. n.* फेन (nom. फेनायते) उत्सेचनं कृ, फेनलः -ला -लं भू, फेनलीभू, फुत् कृ, बुद्बुद (nom. बुद्बुदायते), फुत्कारेण वृध् (c. 1. वर्धते -र्धितुं) or उच्छूनीभू, or उग्रीभू or आलोडितः -ता -तं भू.

EFFERVESCENCE, *s.* फेनता, फेनलत्वं, फेनवत्त्वं, उत्सेकः, उत्सेचनं, उच्छूनीभावः, फेनभावः, उग्रत्वं, उत्तापः, अन्तःक्षोभः, आलोडनं.

EFFERVESCING, *a.* फेनलः -ला -लं, फेनायमानः -ना -नं, फेनवान् -वती -वत् (त्), फेनिलः -ला -लं, बुद्बुदायमानः -ना -नं.

EFFETE, *a.* (Barren) वन्ध्यः -न्ध्या -न्ध्यं, अप्रसवी -विनी -वि (न्), निष्फलः -ला -लं, शुष्कः -ष्का -ष्कं.—(Worn out) जीर्णः -र्णा -र्णं.

EFFICACIOUS, *a.* प्रबलः -ला -लं, बलवान् -वती -वत् (त्), सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, शक्तिमान् -मती -मत् (त्), प्रतापी -पिनी -पि (न्), समर्थः -र्था -र्थं, क्षमः -मा -मं, गुणवान् -वती -वत् (त्), अलन्तमः -मा -मं, कार्य्यसाधकः -का -कं, सिद्धिकरः -री -रं, गुणकारी -रिणी -रि (न्), अमोघः -घा -घं, अव्यर्थः -र्था -र्थं, फलवान् -वती -वत् (त्), तेजोवान् -वती -वत् (त्).

EFFICACIOUSLY, *adv.* प्रभावेण, अमोघं, प्रबलं, अलन्तमं, अलन्तरां, सफलं.

EFFICACY, *s.* प्रभावः, प्राबल्यं, बलं, शक्तिः *f.*, सामर्थ्यं, तेजः *n.* (स्), प्रभविष्णुता, प्रतापः, बलवत्त्वं, अमोघता, फलवत्त्वं, फलोत्पादनं.

EFFICIENCY, *s.* कार्य्यसिद्धिक्षमता, कार्य्यसम्पादकत्वं, कार्य्यकारित्वं, कर्म्मक्षमता, कर्म्मसामर्थ्यं, कार्य्योपयुक्तता. *See* EFFICACY.

EFFICIENT, *a.* कार्य्यसाधकः -का -धिका -कं, कार्य्यसम्पादकः -का -कं, कार्य्यसिद्धिक्षमः -मा -मं, कार्य्योपयुक्तः -क्ता -क्तं, कार्य्यक्षमः -मा -मं, कर्म्मक्षमः -मा -मं, अलङ्कर्म्मीणः -णा -णं, फलोत्पादकः -का -कं. *See* EFFICACIOUS.

EFFICIENTLY, *adv.* सिद्धिपूर्व्वं, अमोघं, सप्रभावं, यथा कर्म्म सिध्यते तथा.

EFFIGY, *s.* प्रतिमा -मानं, मूर्त्तिः *f.*, प्रतिकायः, प्रतिरूपं, प्रतिकृतिः *f.*, रूपं, आकृतिः *f.*, आकारः, वपुः *n.* (स्).

EFFLORESCENCE, *s.* पुष्पोत्पादनं, पुष्पोत्पत्तिः *f.*, प्रस्फोटनं.—(Eruption on the skin) दद्रुः *m.*, उदर्दः, पुष्पाकारस्फोटोत्पत्तिः *f.*

EFFLUENCE, *s.* निःसारः -रणं, निःस्रावः, प्रस्रवः -वणं, प्रवृत्तिः *f.*, प्रवाहः, उत्पत्तिः *f.*, निर्गमः.

EFFLUVIUM, EFFLUVIA, *s.* उद्गारः, वासः, वाष्पः.—(Bad odour) दुर्गन्धः, कुत्सितगन्धः, पूतिगन्धः.

EFFLUX, EFFLUXION, *s.* निःस्रावः, प्रस्रावः, प्रस्रवणं, उत्सेकः, प्रसेकः, निःसारः -रणं, संस्रावः, प्रवाहः, प्रवृत्तिः *f.*, उत्पत्तिः *f.*

EFFORT, *s.* यत्नः, प्रयत्नः, चेष्टा, चेष्टितं, विचेष्टितं, उत्साहः, उद्यमः, उद्योगः, व्यवसायः, अध्यवसायः, चेष्टनं, प्रवृत्तिः *f.*, व्यापारः, आयासः, प्रयासः, घटनं -ना, घटा, ग्रहः, गुरणं, गूरणं, गोरणं, उपक्रमः, कर्म्मयोगः, प्रयोगः, व्यायामः; 'to make effort,' यत् (c. 1. यतते -तितुं), प्रयत्, चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, व्यवसो (c. 4. -स्यति -सातुं), उद्यम् (c. 1. -यच्छति -यन्तुं).

EFFRONTERY, *s.* धार्ष्ट्यं, धृष्टता, प्रागल्भ्यं, प्रगल्भता, निर्लज्जत्वं, प्रतिभानं.

EFFULGENCE, *s.* उज्ज्वलता, तेजः *n.* (स्), दीप्तिः *f.*, द्युतिः *f.*, बृहद्द्युतिः *f.*, प्रतापः, प्रभा.

EFFULGENT, *a.* तेजस्वी -स्विनी -स्वि (न्), उज्ज्वलः -ला -लं, अतिशोभनः -ना -नं, सुप्रभः -भा -भं, अतिदीप्तिमान् -मती -मत् (त्), तैजसः -सी -सं.

To EFFUSE, *v. a.* पत् in caus. (पातयति -यितुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, स्कन्द् in caus. (स्कन्दयति -यितुं), उत्सिच् (c. 6. -सिञ्चति -सेक्तुं), अवसिच्, निषिच्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सु in caus. (सावयति -यितुं), प्रसु, आवृत् in caus. (-वर्त्तयति -यितुं).

EFFUSED, *p. p.* स्कन्दितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, स्रावितः -ता -तं.

EFFUSION, *s.* उत्सर्गः, निषेकः, उत्सेकः, स्कन्दनं, स्रावः, अवसेचनं, पातः -तनं, मोचनं, मोक्षणं, विसर्गः, निक्षेपः.

EGG, *s.* अण्डं, डिम्बः, डिम्भः, कोशः, कोषः -षकः, पेशिः *f.*, पेशी; 'fowl's egg,' कुक्कुटाण्डं; 'egg-born,' अण्डजः -जा -जं.

To EGG ON OR EDGE, *v. a.* प्रेर् (c. 10. प्रेरयति -यितुं, rt. ईर्), उत्सह् in caus. (-साहयति -यितुं), प्रोत्सह्, चुद् (c. 10. चोदयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं).

EGG-PLANT, *s.* हिण्डीरः, हिङ्गुली, वङ्गनः, वार्त्ताकुः *m.* -की, भण्डाकी, वातिगः, दुःप्रधर्षणी, चित्रफला, जुकुटं.

EGLANTINE, *s.* जवापुष्पो वन्यलताभेदः, अरण्यजवा.

EGOTISM, *s.* अहङ्कारः, अहङ्क्रिया, अहङ्कृतिः *f.*, अहन्ता, अहमहमिका, अहम्मतिः *f.*, ममता, आत्माभिमानं, आत्मश्लाघा, आत्मस्तुतिः *f.*

EGOTIST, *s.* अहङ्कारी *m.* (न्), अहंयुः *m.*, आत्माभिमानी *m.* (न्), ममतायुक्तः.

EGOTISTICAL, *a.* अहङ्कारी -रिणी -रि (न्), अहङ्कारवान् -वती -वत् (त्) or अहङ्क्रियावान्, अहंयुः -युः -यु, मामकः -की -कं, आत्मनीनः -ना -नं.

EGREGIOUS, *a.* (Eminent) विशिष्टः -ष्टा -ष्टं, ख्यातः -ता -तं, प्रसिद्धः -द्धा -द्धं, उत्कृष्टः -ष्टा -ष्टं, अधिकः -का -कं, प्रमुखः -खा -खं, उद्गमः -मा -मं.—(Great) अत्यन्तः -न्ता -न्तं, अति prefixed; 'an egregious fool,' अतिमूर्खः, प्रतिनिविष्टमूर्खः, अत्यन्तविनष्टचित्तः; 'an egregious rascal,' ख्यातगर्हणः, अत्यन्तदुष्टः, अतिगर्हितः.

EGREGIOUSLY, *adv.* अत्यन्तं, अति, अतीव, अतिशयेन, भृशं, अतिमात्रं.

EGRESS, EGRESSION, *s.* निःसारः -रणं, निःसरणं, अपसारः, निर्गमः, निर्गतिः *f.*, बहिर्गमनं, निष्क्रमणं, निर्यायं, विनिर्गमः.

EGYPT, *s.* (The country) मिसरदेशः.

EGYPTIAN, *s.* and *a.* मिसरदेशजः, मिसरदेशीयः -या -यं.

EIGHT, *a.* अष्ट or अष्टौ *m. f. n.* (अष्टन्), अष्टकः -का -कं, अष्टसंख्यकः -का -कं.

EIGHTEEN, *a.* अष्टादश *m. f. n.* (न्), अष्टादशसंख्यकः -का -कं.

EIGHTEENTH, *a.* अष्टादशः -शी -शं.

EIGHTFOLD, *a.* अष्टगुणः -णा -णं, अष्टविधः -धा -धं, अष्टकः -का -कं, अष्टाङ्गः -ङ्गा -ङ्गं, अष्टप्रकारः -रा -रं, अष्टधा.

EIGHTH, *a.* अष्टमः -मी -मं, अष्टकः -का -कं; 'one-eighth,' अष्टमांशः, अष्टमभागः, पादार्द्धं.

EIGHTIETH, *a.* अशीतः -ती -तं, अशीतितमः -मा -मं.

EIGHTHLY, *adv.* अष्टमस्थले, अष्टमपदे, अष्टमस्थाने.

EIGHTY, *a.* अशीतिः *f. sing.*, अशीतिसंख्यकः -का -कं; 'eighty years old,' अशीतिकः -का -कं; 'eighty-one,' एकाशीतिः *f.*; 'eighty-two,' द्व्यशीतिः *f.*; 'eighty-three,' त्र्यशीतिः *f.*

EITHER, *pron. distrib.* (Of two) अन्यतरः -रा -रत्.—(Of many) अन्यतमः -मा -मत्; 'either of two days,' अन्यतरेद्युस्.

EITHER, *conj.* वा placed after a word, अथवा, वापि, किंवा; 'either a friend or an enemy,' मित्रं वा अथवा शत्रुः.

To EJACULATE, *v. a.* उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्गृ (c. 6. -गिरति -गरितुं -रीतुं).—(Utter a sudden prayer) आकस्मिकप्रार्थनाम् उदीर् (c. 10. -ईरयति -यितुं), अकस्मात्, प्रार्थनाम् उदाहृ (c. 1. -हरति -हर्त्तुं).

EJACULATION, *s.* उद्गारः, उद्गिरणं, उत्क्षेपः, उदीरणं, उदाहरणं.—(Utterance of a sudden prayer) आकस्मिकप्रार्थनोदीरणं.

EJACULATORY *a.* उत्क्षेपकः -का -कं, अकस्माद् उदीरितः -ता -तं, आकस्मिकः -की -कं.

To EJECT, *v. a.* अपास् (c. 4. -अस्यति -असितुं), निःसृ in caus. (-सार-

Digitized by Google

यति -यितुं), निराकृ, बहिष्कृ, बहिःकृ, दूरीकृ, उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रतिक्षिप्, समाक्षिप्, निष्कस् in caus. (-कासयति -यितुं).—(From office) अधिकारात् or साचिव्याद् भ्रंश् in caus. (भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं).—(Vomit up) उत्क्षिप्, उद्गृ (c. 6. -गिरति -गरितुं -रीतुं).

EJECTED, *p. p.* निःसारितः -ता -तं, निरस्तः -स्ता -स्तं, अपास्तः -स्ता -स्तं, निराकृतः -ता -तं, बहिष्कृतः -ता -तं, बहिःकृतः -ता -तं, उत्क्षिप्तः -प्ता -प्तं, अपसारितः -ता -तं, अपविद्धः -द्धा -द्धं.—(From office) च्युताधिकारः -रा -रं, अधिकारात्प्रभ्रंशितः -ता -तं, निर्भिन्नः -न्ना -न्नं.

EJECTION, *s.* निरसनं, निःसारणं, अपसारणं, उत्क्षेपः, बहिष्करणं, अपासनं, निर्वासनं, निराकरणं, अपसज्जनं, प्रयापणं, निष्कासनं.

EJECTMENT, *s.* राजाज्ञापत्रेण क्षेत्रगृहादेर् निराकरणं.

EJULATION, *s.* विलपनं, परिदेवनं, कोलाहलः, क्रुष्टं, क्रन्दनं, हाहाकारः, आर्त्तनादः, हा हतोऽस्मीति उत्क्रोशनं.

To EKE, *v. a.* (Enlarge) वृध् in caus. (वर्धयति -यितुं), विस्तृ in caus. (-स्तारयति -यितुं), प्रसृ in caus. (-सारयति -यितुं).—(Lengthen) द्राघ (nom. द्राघयति -यितुं), तन् (c. 8. तनोति -नितुं), दीर्घीकृ.

To ELABORATE, *v. a.* संस्कृ, परिष्कृ, महायत्नेन or बहुश्रमेण साध् in caus. (साधयति -यितुं) or सिद्धीकृ or निष्पद् in caus. (-पादयति -यितुं) or निर्मा (c. 2. -माति -तुं) or कॢप् (c. 10. कल्पयति -यितुं) or विधा (c. 3. -दधाति -धातुं).

ELABORATE, ELABORATED, *a.* or *p. p.* संस्कृतः -ता -तं, परिष्कृतः -ता -तं, महायत्नेन कल्पितः -ता -तं or विरचितः -ता -तं or सिद्धीकृतः -ता -तं.

ELABORATELY, *adv.* महायत्नेन, महायासेन, सपरिष्कारं, बहुश्रमेण, बहुप्रयासेन, परिष्कारपूर्व्वं.

ELABORATION, *s.* परिष्कारः, परिष्कृतिः *f.*, संस्कारः, महायत्नेन साधनं or निष्पादनं or निर्माणं or कल्पनं or विरचनं.

To ELANCE, *v. a.* अस् (c. 4. अस्यति, असितुं), प्रास्, क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, सृज् (c. 6. सृजति, स्रष्टुं), मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्.

To ELAPSE, *v. n.* अती (c. 2. अत्येति -तुं, rt. इ), व्यती, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, अतिवृत् (c 1. -वर्त्तते -र्त्तितुं), गम् (c. 1. गच्छति, गन्तुं); 'a long time elapsed,' अतिचक्राम सुमहान् कालः; 'ten days having elapsed,' अतिक्रान्ते दशाहे.

ELAPSED, *p. p.* अतीतः -ता -तं, व्यतीतः -ता -तं, अतिक्रान्तः -न्ता -न्तं, गतः -ता -तं, भूतः -ता -तं.

ELASTIC, *a.* स्थितिस्थापकः -का -कं, प्रकृतिप्रापकः -का -कं, वर्द्धनक्षमः -मा -मं, सुखाकुञ्चनीयः -या -यं, वितततीकरणीयः -या -यं, विस्तारयितुं शक्यः -क्या -क्यं, स्वप्रकृतिं प्रति निवर्त्तनशीलः -ला -लं.

ELASTICITY, *s.* स्थितिस्थापकं -कत्वं -कता, वर्धनक्षमता, प्रकृतिप्रापकत्वं, स्वप्रकृतिं प्रति निवर्त्तनशीलता, सुखाकुञ्चनीयता.

ELATE, ELATED, *a.* उद्धतः -ता -तं, समुद्धतः -ता -तं, उद्धतमनस्कः -स्का -स्कं, प्रहृष्टमनाः -नाः -नः (स्), हृष्टचित्तः -त्ता -त्तं, उल्लासितः -ता -तं, उन्नद्धचेताः -ताः -तः (स्), समुन्नतचित्तः -त्ता -त्तं, प्रमुदितः -ता -तं, प्रफुल्लः -ल्ला -ल्लं, दर्पध्मातः -ता -तं; 'elated with victory,' जयगर्व्वितः -ता -तं.

To ELATE, *v. a.* दृप् in caus. (दर्पयति -यितुं), प्रहृष् in caus. (-हर्षयति -यितुं), उल्लस् in caus. (-लासयति -यितुं), प्रमुद् in caus. (-मोदयति -यितुं).

ELATION, *s.* उद्धतिः *f.*, चित्तसमुन्नतिः *f.*, उद्धतमनस्कत्वं, हर्षः, प्रहर्षः, दर्पः, प्रमोदः, गर्व्वः; 'from conquest,' जयगर्व्वः.

ELBOW, *s.* अरत्निः *m.*, कफोणिः *m. f.* -णी, कूर्परः, कफणिः *m. f.* -णी, कीलः.—(Of a river) वङ्कः, वङ्कं, भङ्गुरः, पुटभेदः.—(Corner) कोणः.

To ELBOW, *v. a.* अरत्निना ताडयित्वा बहिष्कृ, अरत्निना आहन् (c. 2. -हन्ति -न्तुं).

ELBOW-CHAIR, *s.* अरत्निधारणयोग्यः पीठविशेषः.

ELBOW-ROOM, *s.* (Room for motion) प्रसरः, अवकाशः.

ELDER, *a.* ज्यायान् -यसी -यः (स्), ज्येष्ठः -ष्ठा -ष्ठं, वयोज्येष्ठः -ष्ठा -ष्ठं, पूर्व्वजः -जा -जं, अग्रजः -जा -जं, वरः -रा -रं, वरीयान् -यसी -यः (स्), वरिष्ठः -ष्ठा -ष्ठं, अधिकवयाः -याः -यः (स्), चरमवयाः &c., अधिकवयस्कः -स्का -स्कं, वर्षीयान् -यसी -यः (स्), वर्षिष्ठः -ष्ठा -ष्ठं, अग्रिमः -मा -मं, अग्रियः -या -यं, अकनिष्ठः -ष्ठा -ष्ठं.

ELDER, *s.* (Venerable person) गुरुः *m.*, गुरुजनः, आर्य्यजनः, वृद्धः; 'elders,' वृद्धाः *m. pl.*, प्राचीनाः *m. pl.*, प्राचीनलोकाः *m. pl.*, पूर्व्वपुरुषाः *m. pl.*, प्राञ्चः *m. pl.*

ELDERLY, *a.* अधिकवयाः -याः -यः (स्), मध्यमवयस्कः -स्का -स्कं, अतिक्रान्तयौवनः -ना -नं, ईषद्वृद्धः -द्धा -द्धं.

ELDERSHIP, *s.* ज्येष्ठता -त्वं, ज्यैष्ठ्यं, अधिकवयस्कता, गुरुत्वं.

ELDEST, *a.* ज्येष्ठः -ष्ठा -ष्ठं or सर्व्वज्येष्ठः, अग्रिमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं. *See* ELDER.

To ELECT, *v. a.* वृ (c. 5. वृणोति -णुते, c. 9. वृणाति -णीते, c. 1. वरति -रितुं -रीतुं, c. 10. वरयति -यितुं), आवृ, उद्वृ, प्रवृ; उद्धृ (c. 1. -हरति -हर्त्तुं), वावृत् (c. 4. वावृत्यते), अनुरुच् in caus. (-रोचयति -यितुं), मनोनीतं -तां -तं कृ.—(Take) ग्रह् (c. 9. गृह्णाति, गृहीतुं), उद्ग्रह्, आदा.—(Appoint) नियुज् (c. 10. -योजयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं).—(Prefer) पुरोधा (c. 3. -दधाति -धातुं); 'they elect a god to rule over them,' देवं राज्ये वरयन्ति; 'she elects him as a husband,' सा तं पतित्वे वरयति.

ELECT, ELECTED, *a.* and *p. p.* मनोनीतः -ता -तं, वृतः -ता -तं, वावृत्तः -त्ता -त्तं, वृत्तः -त्ता -त्तं, उद्धृतः -ता -तं, गृहीतः -ता -तं, उद्गृहीतः -ता -तं, पुरोहितः -ता -तं; 'to any office,' पदे नियुक्तः -क्ता -क्तं.

ELECTION, *s.* वृतिः *f.*, वरः -रणं, उद्धारः, उद्धरणं, उद्ग्रहणं, ग्रहणं, आदानं, नियोजनं, मनोनयः.

ELECTIONEERING, *s.* पदप्रेप्सुसंवर्द्धनार्थं पराश्रयप्रार्थनं.

ELECTIVE, *a.* पराश्रयाधीनः -ना -नं, पराग्रहाधीनः -ना -नं, वरणाधिकारविशिष्टः -ष्टा -ष्टं, वरणकारी -रिणी -रि (न्).

ELECTOR, *s.* वरणकारी *m.* (न्), वरयिता *m.* (तृ), वरणकृत् *m.*, वरणाधिकारवान् *m.* (त्).

ELECTORAL, *a.* वरणाधिकारसम्बन्धी -न्धिनी -न्धि (न्), वरयितृपदसम्बन्धी.

ELECTORATE, *s.* वरयितुः or वरणकारिणः पदं or अधिकारः.

ELECTRE, ELECTRUM, *s.* (Amber) तैलस्फटिकः, शूकापुट्टः.—(Mixed metal) मिश्रितधातुः *m.*, कांस्यं, पीतलोहं.

ELECTRIC, ELECTRICAL, *a.* वैद्युतः -ती -तं, विद्युत्वान् -त्वती -त्वत् (त्), तडित्वान् -त्वती -त्वत् (त्), विद्युन्मयः -यी -यं, विद्युद्विषयः -या -यं.

ELECTRICITY, *s.* विद्युत् *f.*, तडित् *f.*, विद्युद्वस्तु *n.*, वैद्युतशक्तिः *f.*, वज्रस्फुलिङ्गः.—(The science) विद्युद्विद्या, वज्रस्फुलिङ्गविद्या.

ELECTUARY, *s.* लेह्यं, अवलेह्यं, अवलेहः, अवलेह्यौषधं.

ELEEMOSYNARY, *a.* भिक्षादानसम्बन्धी -न्धिनी -न्धि (न्), दरिद्रपालनार्थः -र्थी -र्थं, दरिद्रोपकारी -रिणी -रि (न्), दरिद्रपोषणार्थं दत्तः -त्ता -त्तं.

ELEGANCE, ELEGANCY, *s.* चारुता, सौन्दर्य्यं, विनीतत्वं, विलासः, लावण्यं, शोभा, लालित्यं; 'of form,' रूपलावण्यं; 'of speech,' वाग्विलासः.

ELEGANT, *a.* विलासी -सिनी -सि (न्), चारुः -रुी -रु, सुललितः -ता -तं, ललितः -ता -तं, विनीतः -ता -तं, लावण्यवान् -वती -वत् (त्), लीला-

Digitized by Google

वान् &c., सुन्दरः -रा -री -रं, सुरूपः -पी -पं, रोचिष्णुः -ष्णुः -ष्णु, सुरेखः -खा -खं, भ्राजिष्णुः -ष्णुः -ष्णु, विभ्राट् *m.f.n.* (ज्), शीलः -ला -लं, शुभगः -गा -गं, अग्राम्यः -म्या -म्यं; 'an elegant woman,' रूपवती, सुमध्यमा.—(As composition) सुरसः -सा -सं.

ELEGANTLY, *adv.* सविलासं, विलासतया, सलावण्यं, सुललितं, चारु.

ELEGIAC, *a.* कारुणिकः -की -कं, करुणामयः -यी -यं, शोकसूचकः -का -कं.

ELEGY, *s.* करुणं, कारुणिकगीतं, शोकगानं, शोकसूचकगीतं.

ELEMENT, *s.* (First or constituent principle) मूलवस्तु *n.*, मूलं, भूतं, बीजं, अधिभूतं, मात्रं, विषयः, भूतमात्रं -त्रा, तन्मात्रं, अवयवः; 'the five elements,' पञ्चभूतं, पृथिव्यादि *n.*—(Of a science, &c.) तत्त्वं, सूत्रं.—(Letter) अक्षरं.—(Rudiments) आरम्भः, प्रारम्भः.—(Outline) वस्तुमात्रं, वस्तु.—(Ingredient) अंशः, भागः, अवयवः; 'elementary substance,' अव्याकृतं; 'elementary property,' कारणगुणः.

ELEMENTAL, *a.* भौतः -ती -तं, भौतिकः -की -कं, आधिभौतिकः -की -कं, भूतभावः -वा -वं, पाञ्चभौतिकः -की -कं.

ELEMENTARY, *a.* (Simple, uncompounded) अव्याकृतः -ता -तं, निरवयवः -वा -वं.—(Primary) मूलिकः -की -कं, मौलः -ली -लं.—(Rudimental) आरम्भकः -का -कं, प्रारम्भकः -का -कं.

ELEPHANT, *a.* हस्ती *m.* (न्), गजः, करी *m.* (न्), दन्ती *m.* (न्), द्विपः, वारणः, मातङ्गः, मतङ्गः, कुञ्जरः, नागः, द्विरदः, इभः, रदी *m.* (न्), द्विपायी *m.* (न्), अनेकपः, विषाणी *m.* (न्), करेणुः *m.f.*, लक्षकर्णः, पद्मी *m.* (न्), शुण्डालः, कर्णिकी *m.* (न्), दन्तावलः, स्तम्बेरमः, दीर्घवक्त्रः, द्रुमारिः *m.*, दीर्घमारुतः, विलोमजिह्वः, शक्रा *m.* (न्), पीलुः *m.*, महामृगः, मतङ्गजः, षष्टिहायनः; 'female elephant,' हस्तिनी, करिणी, पद्मिनी, धेनुका, वशा, 'young elephant,' कलभः -भी *f.*, करिशावकः, करेणुशिशुः *m.*, दिङ्कः; 'a large elephant,' गजपुङ्गवः, करेणुवर्ष्यः; 'wild elephant,' वनगजः; 'furious elephant,' मत्तः, प्रभिन्नः, गर्ज्जितः; 'rutting elephant,' मदोत्कटः, मदकलः; 'elephant out of rut,' उद्धान्तः, निर्मदः; 'leader of a herd of elephants,' यूथनाथः, यूथपः; 'herd of elephants,' यूथः -थं, हास्तिकं, गजता, गजव्रजं; 'troop of war-elephants,' घटा, घटना; 'elephants of the quarters,' ऐरावतः, पुण्डरीकः, वामनः, कुमदः, अञ्जनः, पुष्पदन्तः, सार्वभौमः, सुप्रतीकः; 'their females,' अभ्रमुः *f.*, कपिला, पिङ्गला, अनुपमा, ताम्रकर्णी, शुभ्रदन्ती, अञ्जना, अञ्जनावती; 'elephant's trunk,' शुण्डा; 'his temples,' गण्डः, कटः; 'his frontal globes,' कुम्भौ; 'the hollow between them,' विदुः; 'his forehead,' ललाटं, अवग्रहः; 'his eye-ball,' इषीका, ईषिका; 'corner of his eye,' निर्यीणं, निर्याणं; 'root of his ear,' चूलिका; 'of his tail,' पेचकः; 'his withers,' स्कन्धदेशः, आसनं; 'his side,' पक्षभागः, पार्श्वभागः; 'his thigh,' गात्रं, अवरं; 'juice from his temples,' मदः, दानं; 'water emitted from his trunk,' वमथुः *m.*, करशीकरः; 'his roaring,' करिगर्ज्जितं, बृंहितं; 'elephant-breaking,' हस्तिशिक्षा; 'elephant-breaker,' हस्तिशिक्षाजीवी *m.* (न्); 'elephant-stable,' वारणशाला; 'master of the elephants,' गजाध्यक्षः.

ELEPHANT-DRIVER, *s.* हस्तिपः -पकः -पालः, महामात्रः, हस्तिचारी *m.* (न्), हस्त्यारोहः, निषादी *m.* (न्), आधोरणः.

ELEPHANTIASIS, *s.* (Disease of the skin) वल्मीकः, त्वग्रोगः, दुश्चर्म्मत्वं.

ELEPHANTINE, *a.* हास्तेयकः -की -कं, ऐभः -भी -भं; 'as big as an elephant,' हस्तिद्वयसः -सी -सं, गजमात्रः -त्री -त्रं.

To ELEVATE, *v. a.* उन्नम् in caus. (-नमयति -यितुं), उच्छ्रि (c. 1. उच्छ्रयति -यितुं, rt. श्रि), समुच्छ्रि, प्रोच्छ्रि, उन्नम् (c. 1. -यच्छति -यन्तुं), उन्नीकृ, उड्डीकृ, उत्था in caus. (-थापयति -यितुं, rt. स्था), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उन्नी (c. 1. -नयति -नेतुं), उद्वन् (c. 2. -हन्ति -न्तुं), उद्धृ (c. 1. -हरति -हर्त्तुं), अधिरुह् in caus. (-रोपयति -यितुं), उन्नतिं कृ.—(To a high office) उत्कृष्टपदे नियुज् (c. 7. -युंक्ते -योक्तुं) or प्रतिपद् in caus. (-पादयति -यितुं).

ELEVATED, *p. p.* उन्नतः -ता -तं, समुन्नतः -ता -तं, उच्छ्रितः -ता -तं, समुच्छ्रितः -ता -तं, अभ्युच्छ्रितः -ता -तं, उत्कृष्टः -ष्टा -ष्टं, उद्गतः -ता -तं, समुद्गतः -ता -तं, उत्थापितः -ता -तं, उद्धृतः -ता -तं, समुद्धृतः -ता -तं, अभ्युत्थितः -ता -तं, उन्नतः -ता -तं, अधिरोपितः -ता -तं, अधिरूढः -ढा -ढं, आरूढः -ढा -ढं, अध्यारूढः -ढा -ढं, उन्नतः -ता -तं, उद्वृत्तः -त्ता -त्तं, उद्वर्हितः -ता -तं, उन्नुङ्गः -ङ्गा -ङ्गं, सोच्छ्रायः -या -यं, आहितगौरवः -वा -वं, कृतोच्चैस् ind., उच्छ्रायी -यिणी -यि (न्).

ELEVATION, *s.* उन्नतिः *f.*, समुन्नतिः *f.*, उत्कर्षः, उत्कृष्टता, उच्छ्रयः, समुच्छ्रयः, उच्छ्रायः, समुच्छ्रायः, उच्छ्रितिः *f.*, उत्थापनं, अभ्युत्थानं, उत्थितिः *f.*, उत्सेधः, समुत्सेधः, उद्गतिः *f.*, उन्नुङ्गता, औत्कर्षं, उन्नद्धता, उन्नोलनं, ऊर्द्ध्वत्वं, अधिरोहः, उन्नयः -यनं, उन्नामः, उन्नमनं, उपचयः, प्रतिपत्तिः *f.*, उन्नता, उदयः.

ELEVEN, *a.* एकादश *m. f. n. pl.* (न्), एकादशसंख्यकः -का -कं.

ELEVENTH, *a.* एकादशः -शी -शं.

ELF, *s.* विद्याधरः, अपदेवता, वेतालः, भूतः, राक्षसः, पिशाचः.

ELF-LOCK, *s.* जटा, जटिः *f.*, सटा.

ELFISH, *a.* पैशाचिकः -की -कं, भौतिकः -की -कं, राक्षसः -सी -सं.

To ELICIT, *v. a.* निर्णी (c. 1. -णयति -णेतुं), निष्कृष् (c. 1. -कर्षति -क्रष्टुं), उत्कृष्; निर्हृ (c. 1. -हरति -हर्त्तुं), उद्धृ, उत्पद् in caus. (-पादयति -यितुं), उत्पत्तिं कृ, निर्गम् in caus. (-गमयति -यितुं), निःसृ in caus. (-सारयति -यितुं), उद्भू in caus. (-भावयति -यितुं), निर्दुह् (c. 2. -दोग्धि -ग्धुं), उद्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अपवह् (c. 1. -वहति -वोढुं).

ELICITATION, *s.* निर्हारः, उद्धारः, उत्पादनं, निष्कर्षणं, निर्णयनं.

ELICITED, *p. p.* निर्हृतः -ता -तं, उद्धृतः -ता -तं, उत्पादितः -ता -तं.

To ELIDE, *v. a.* (Cut off a syllable) लुप् (c. 6. लुम्पति, लोप्तुं).

ELIGIBILITY, *s.* वरणीयता, वार्य्यत्वं, ग्राह्यत्वं, ग्रहणीयता, योग्यता.

ELIGIBLE, *a.* वरणीयः -या -यं, वार्य्यः -र्य्या -र्य्यं, वृत्यः -त्या -त्यं, ग्राह्यः -ह्या -ह्यं, ग्रहणीयः -या -यं, आदेयः -या -यं, योग्यः -ग्या -ग्यं, उपयुक्तः -क्ता -क्तं.

ELIMINATION, *s.* (Turning out of doors) गृहाद् बहिष्करणं or निराकरणं.—(In algebra) नाशः, मध्यमनाशः, मध्यमाहरणं, मध्यमापनयनं.

ELISION, *s.* (Cutting off of a syllable) लोपः, अक्षरत्यागः.

ELIXIR, *s.* (Medicine prolonging life) रसायनं, तेजोवर्धनं.

ELK, *s.* चतुष्पदजन्तुविशेषः, हरिणप्रभेदः.

ELL, *s.* वस्त्रमापने प्रयुक्तः परिमाणविशेषः.

ELLIPSE, *s.* (An oval figure) अण्डाकारः, अण्डाकृतिः *m.*

ELLIPSIS, *s.* (Figure of rhetoric) शेषः, व्यञ्जना -नं, व्यङ्ग्यः, लक्षणा, उपलक्षणं, व्यञ्जकः; 'supplying an ellipsis,' अध्याहारः, अभ्यूहः, ऊहः.

ELLIPTIC, ELLIPTICAL, *a.* (Oval) अण्डाकारः -रा -रं, अण्डाकृतिः -तिः -ति.—(Requiring something to be supplied) अध्याहार्य्यः -र्य्या -र्य्यं, ऊह्यः -ह्या -ह्यं, अभ्यूह्यः -ह्या -ह्यं, आनुषङ्गिकः -की -कं.

ELM, *s.* वनपादपविशेषः, वन्यवृक्षप्रभेदः.

ELOCUTION, *s.* (Pronunciation) उच्चारणं, उदाहरणं, व्याहारः, वाणी.—(In rhetoric) शब्दचातुर्य्यं, वाङ्मार्गः, वक्तृता, वक्तृत्वशक्तिः *f.*, वाक्पटुता.

To ELONGATE, *v. a.* दीर्घीकृ, द्राघ (nom. द्राघयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), प्रतन् (c. 8. -तनोति -नितुं), वितन्, विततीकृ.

Digitized by Google

ELONGATED, *p. p.* प्रसृतः -ता -तं, आयामितः -ता -तं, आयतः -ता -तं, व्यायतः -ता -तं, आयतिमान् -मती -मत् (त्), लम्बितः -ता -तं.

ELONGATION, *s.* आयतिः *f.*, दीर्घीकरणं, तानं, प्रसारणं, द्राघिमा *m.* (न्).

To ELOPE, *v. n.* गूढविवाहार्थं मातृपितृस्वजनाद्यगोचरेण पलाय् (c. 1. पलायते -यितुं) or मातृपितृस्वजनादीनाम आश्रयं त्यज् (c. 1. त्यजति, त्यक्तुं), व्यपसृप् (c. 1. -सर्पति -सर्तुं).

ELOPEMENT, *s.* गूढविवाहार्थं मातृपितृस्वजनाद्यगोचरेण पलायनं or विपलायनं or मातृपित्राश्रयत्यागः.

ELOQUENCE, *s.* वाक्पटुता, वाक्पाटवं, पटुत्वं, पाटवं, वाग्विभवः, वक्तृत्वं, वक्तृत्वशक्तिः *f.*, वाक्शक्तिः *f.*, सङ्गक्तता, वाग्मित्वं, वाग्विदग्धता, शब्दचातुर्य्यं, सुप्रलापः, सुभाषितं, सुवचनं, वाचाशक्तिः *f.*

ELOQUENT, *a.* वाक्पटुः -टुः -टु, वाग्मी -ग्मिनी -ग्मि (न्), वाक्यविशारदः -दा -दं, वाग्विद् *m. f. n.*, प्रवचनपटुः -टुः -टु, पटुः -टुः -टु, सङ्गक्ता -क्त्री -क्तृ (तृ), वागीशः -शा -शं, वाक्पतिः -तिः -ति, सुवचाः -चाः -चः (स्), वाग्विदग्धः -ग्धा -ग्धं, शब्दचतुरः -रा -रं, सारस्वतः -ती -तं, सुमुखः -खी -खं.

ELOQUENTLY, *adv.* पाटवेन, सपाटवं, वाग्विभवेन, शब्दचातुर्य्येण.

ELSE, *a.* अन्यः -न्या -न्यत्, इतरः -रा -रं, परः -रा -रं, व्यतिरिक्तः -क्ता -क्तं, भिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, अपरः -रा -रं; 'any thing else,' किञ्चिद् अन्यत्; 'what else can he do,' पुनः किं करोति; 'any thing else but this,' एतद्भिन्नं किञ्चित्, अस्मात् परं किञ्चित्, or एतद्व्यतिरिक्तं किञ्चित्.

ELSE, *conj.* (Otherwise) अन्यथा, अथवा, नो चेत्, न चेत्, इतरथा, इतरतस्, अन्यतस्, परतस्, अन्यत्, किंवा, एतद्विना, एतद्व्यतिरेकेण.

ELSEWHERE, *adv.* अन्यत्र, इतरत्र, परत्र, अन्यतस्, अपरतस्, इतरतस्, स्थानान्तरे, अन्यस्थाने, भिन्नस्थाने; 'gone elsewhere,' स्थानान्तरं गतः -ता -तं.

To ELUCIDATE, *v. a.* स्पष्टीकृ, सुस्पष्टीकृ, स्पष्ट (nom. स्पष्टयति -यितुं), प्रकाश् in caus. (-काशयति -यितुं), व्याख्या (c. 2. -ख्याति -तुं), व्यक्तीकृ, व्याकृ, परिशुध् in caus. (-शोधयति -यितुं), दृष्टान्तीकृ, दृष्टान्तेन or निदर्शनेन व्याख्या.

ELUCIDATED, *p. p.* स्पष्टीकृतः -ता -तं, व्याख्यातः -ता -तं, प्रकाशितः -ता -तं.

ELUCIDATION, *s.* स्पष्टीकरणं, व्याख्या, प्रकाशनं, दृष्टान्तेन व्याकरणं.

ELUCIDATOR, *s.* प्रकाशकः, व्याख्याता *m.* (तृ), उद्देशकः, निदर्शनकारकः.

To ELUDE, *v. a.* छलेन अपक्रम् (c. 1. -क्रामति -क्रमितुं) or व्यपक्रम् or पलाय् (c. 1. पलायते -यितुं) or व्यपसृप् (c. 1. -सर्पति -सर्तुं), निर्गम् (c. 1. -गच्छति -गन्तुं), पलायित्वा परिहृ (c. 1. -हरति -हर्त्तुं), निस्तॄ (c. 1. -तरति -रितुं -रीतुं); 'It eludes the grasp by reason of its subtilty,' सूक्ष्मत्वाद् ग्रहीतुं न शक्यते; 'eluding the senses,' इन्द्रियागोचरः -रा -रं.

ELUMBATED, *a.* श्रोणिविकलः -ला -लं, क्षीणकटिबलः -ला -लं.

ELUSION, *s.* छलेन पलायनं or अपक्रमः -मणं, निर्गतिः *f.*, निर्गमः.

ELUSIVE, *a.* पलायनपरायणः -णा -णं, विपलायी -यिनी -यि (न्).

ELUSORY, *a.* छली -लिनी -लि (न्), मायी -यिनी -यि (न्), छाद्मिकः -की -कं.

ELYSIAN, *a.* स्वर्गीयः -या -यं, स्वर्ग्यः -र्ग्या -र्ग्यं, परमानन्ददः -दा -दं.

ELYSIUM, *s.* नन्दनं, स्वर्गः, आनन्दस्थानं, सुखाधारः, सुखदं, वैकुण्ठं.

To EMACIATE, *v. a.* क्षश् (nom. क्षशयति -यितुं), क्षि in caus. (क्षपयति -यितुं), क्षीणं -णां -णं कृ, ग्लै in caus. (ग्लपयति -यितुं), मांसक्षयं कृ, शुष्कीकृ.

To EMACIATE, *v. n.* क्षि in pass. (क्षीयते), कृशीभू, विशृ in pass. (-शीर्य्यते), क्षै (c. 1. क्षायति, क्षातुं), ग्लै (c. 1. ग्लायति, ग्लातुं), शुष् (c. 4. शुष्यति, शोष्टुं), शुष्कीभू.

EMACIATED, *p. p.* or *a.* कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, शुष्कमांसः -सा -सं, शुष्काङ्गः -ङ्गी -ङ्गं, क्षामः -मा -मं, ग्लानः -ना -नं, शीर्णः -र्णा -र्णं, विशीर्णः -र्णा -र्णं, क्षमांसः -सा -सं, ग्लास्नुः -स्नुः -स्नु; 'by hunger,' क्षुत्क्षामः -मा -मं.

EMACIATION, *s.* काश्यं, कृशत्वं -ता, कृशाङ्गत्वं, क्षामता, शीर्णता, शरीरक्षीणता, शरीरशोषणं, शरीरपाकः, मांसशुष्कता, मांसक्षयः, शोषः.

EMANANT, EMANATIVE, *a.* प्रसृतः -ता -तं, निःसृतः -ता -तं, विनिःसृतः -ता -तं, उत्पन्नः -न्ना -न्नं, उद्भूतः -ता -तं, प्रवृत्तः -त्ता -त्तं, निर्गतः -ता -तं.

To EMANATE, *v. n.* (Flow from) सु (c. 1. सवति, सोतुं), प्रसु, निःसु, विसु.—(Proceed from) उत्पद् in pass. (-पद्यते), निःसृ (c. 1. -सरति -सर्त्तुं), विनिःसृ, प्रसृ; निर्गम् (c. 1. -गच्छति -गन्तुं), बहिर्गम्, उद्गम्, उदि (c. 1. -अयति -एतुं), उद्भू, प्रभू.

EMANATION, *s.* निःस्रावः, निःसारः -सरणं, उत्पत्तिः *f.*, निर्गमः -मनं, उद्गमः, उद्भवः, उद्भावः, उदयनं, प्रवृत्तिः *f.*

To EMANCIPATE, *v. a.* मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, उद्धृ (c. 1. -हरति -हर्त्तुं), विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्ज्जयति -यितुं), निस्तॄ in caus. (-तारयति -यितुं), त्रै (c. 1. त्रायते, त्रातुं), परित्रै.

EMANCIPATED, *p. p.* मुक्तः -क्ता -क्तं, विमोचितः -ता -तं, मोक्षितः -ता -तं, उद्धृतः -ता -तं, निस्तारितः -ता -तं, विसृष्टः -ष्टा -ष्टं, परित्राणः -णा -णं, रक्षितः -ता -तं, उत्तीर्णः -र्णा -र्णं.—(From worldly existence) मुक्तः -क्ता -क्तं, निर्वृतः -ता -तं, निर्वाणः -णा -णं, सिद्धः -द्धा -द्धं.

EMANCIPATION, *s.* मुक्तिः *f.*, मोचनं, मोक्षः -क्षणं, विमोक्षः -क्षणं, विमुक्तिः *f.*, विमोचनं, परिमोक्षणं, वैमुक्तं, उद्धारः, उद्धरणं, निस्तारः, त्राणं, परित्राणं, विसर्गः, तारणं.—(From worldly existence) मुक्तिः *f.*, निर्वाणं, निर्वृतिः *f.*, अपवर्गः -वर्ज्जनं, सिद्धिः *f.*, सद्गतिः *f.*, परमागतिः *f.*, श्रेयः *n.* (स्), निःश्रेयः *n.* (स्), निःश्रेयसं, निर्याणं, पुनर्जन्मजयः, कैवल्यं; 'desirous of it,' मुमुक्षुः -क्षुः -क्षु, तितीर्षुः -र्षुः -र्षु.

EMANCIPATOR, *s.* मोचकः, मोक्षकः, उद्धर्त्ता *m.* (र्त्तृ), त्राता *m.* (तृ).

To EMASCULATE, *v. a.* वृषणौ or वृषणद्वयम् उत्कृत् (c. 6. -कृन्तति -कर्त्तितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), अण्डच्छेदं कृ, पुंस्त्वं हृ (c. 1. हरति, हर्त्तुं), विफलीकृ, शण्डीकृ, निष्पुरुषीकृ, क्लीवीकृ.

EMASCULATED, *p. p.* छिन्नवृषणः -णा -णं, मुष्कशून्यः -न्या -न्यं, विफलीकृतः -ता -तं, विफलः -ला -लं, हृतपौरुषः -षा -षं, शण्डः, शण्डः, क्लीवः, नपुंसकः.

EMASCULATION, *s.* वृषणच्छेदः, वृषणोत्पाटनं, पुंस्त्वहरणं, शण्डता.

To EMBALE, *v. a.* द्रव्यकूटं कृ, कूटीकृ, भाण्डं कृ, पोटलिकां कृ.

To EMBALM, *v. a.* मृतशरीरं तद्रक्षणाय सुगन्धिद्रव्याद्यं कृ or तद्रक्षार्थं तिक्तौषधव्यञ्जनादिना पॄ in caus. (पूरयति -यितुं).

EMBANKMENT, *s.* सेतुः *m.*, सेतुबन्धः, मृत्तिकाचयः, धरणः, पिण्डनः, वप्रः.

To EMBAR, *v. a.* निरुध् (c. 7. -रुणद्धि -रोद्धुं), निवृ in caus. (-वारयति -यितुं).

EMBARGO, *s.* निषेधः, निरोधः, अवरोधः, बाधा, वारणं, नावो गमनागमननिषेधः or वाणिज्यकर्म्मनिषेधः.

To EMBARK, *v. a.* नौकाम् आरुह् in caus. (-रोपयति -यितुं) or प्रविश् in caus. (-वेशयति -यितुं) or निविश् in caus., नौकायां सम्पॄ in caus. (-अर्पयति -यितुं).

To EMBARK, *v. n.* नौकां or पोतम् आरुह् (c. 1. -रोहति -रोढुं) or प्रविश् (c. 6. -विशति -वेष्टुं) or निविश्.—(Undertake) आरभ् (c. 1. -रभते -रब्धुं).

EMBARKATION, *s.* नौकारोहणं, नौकारोपणं, नौकाप्रवेशनं, पोतनिवेशनं, नौकासमर्पणं.

Digitized by Google

EMBARKED, *p. p.* नौकारूढः -ढा -ढं, तरणिम् आरूढः -ढा -ढं, पोतारोपितः -ता -तं, नौकाप्रविष्टः -ष्टा -ष्टं, पोतनिवेशितः -ता -तं, नौकासमर्पितः -ता -तं.

To EMBARRASS, *v. a.* मुह् in caus. (मोहयति -यितुं), विमुह्, व्यामुह्, आकुलीकृ, व्याकुलीकृ, व्याकुल (nom. व्याकुलयति -यितुं), व्यग्रीकृ, सङ्कटीकृ, बाध् (c. 1. बाधते -धितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), क्लेशं दा, दुःखं दा, शल्यं कृ, रुध् (c. 7. रुणद्धि, रोद्धुं).

EMBARRASSED, *p. p.* मोहितः -ता -तं, विमोहितः -ता -तं, व्याकुलः -ला -लं, आकुलितः -ता -तं, व्यग्रः -ग्रा -ग्रं, समाकुलः -ला -लं, कातरः -रा -रं, कृच्छ्रगतः -ता -तं, बाधितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, विपन्नः -न्ना -न्नं, आपन्नतः -ता -तं, उपरुद्धः -द्धा -द्धं, दुःस्थः -स्था -स्थं.

EMBARRASSMENT, *s.* व्याकुलता, आकुलत्वं, व्यग्रता, मोहः, व्यामोहः, कातरता, व्यस्तता, सम्भ्रमः, क्लेशः, दुःखं, शल्यं, बाधः -धा, कार्य्यसन्देहः.

EMBASSADOR, *s.* दूतः, राजदूतः, राजप्रेरितः, राजप्रस्थापितः. राजप्रतिनिधिः *m.*, राजकर्म्मकरः, राजकार्य्येश्वरः.

EMBASSADRESS, *s.* दूती -तिः *f.*, दूतिका, राजदूती, राजदूतस्य पत्नी or भार्य्या.

EMBASSAGE, EMBASSY, *s.* दूत्यं, दौत्यं, दूतक्रिया, दूतधर्म्मः; 'sent on an embassy,' प्रस्थापितः -ता -तं, प्रेरितः -ता -तं, दूतः -ता -तं.

To EMBATTLE, *v. a.* व्यूह् (c. 1. -ऊहते -हितुं), सैन्यं युद्धार्थं व्यूहेन रच् (c. 10. रचयति -यितुं) or सज्जीकृ or व्यवस्था in caus. (-स्थापयति -यितुं).

EMBEDDED, *p. p.* or *a.* निहितः -ता -तं, न्यस्तः -स्ता -स्तं, निविष्टः -ष्टा -ष्टं.

To EMBELLISH, *v. a.* भूष् (c. 10. भूषयति -यितुं), विभूष्, अलङ्कृ, समलङ्कृ, परिष्कृ, संस्कृ, शुभ् in caus. (शोभयति -यितुं), उपशुभ्, मण्ड् (c. 10. मण्डयति -यितुं), परिकर्म्म (nom. परिकर्म्मयति -यितुं), रञ्ज् (c. 10. रञ्जयति -यितुं).

EMBELLISHED, *p. p.* भूषितः -ता -तं, विभूषितः -ता -तं, अलङ्कृतः -ता -तं, परिष्कृतः -ता -तं, संस्कृतः -ता -तं, शोभितः -ता -तं, उपशोभितः -ता -तं, कृतशोभः -भा -भं, मण्डितः -ता -तं, प्रसाधितः -ता -तं, सालङ्कारः -रा -रं, कृतालङ्कारः -रा -रं.

EMBELLISHMENT, *s.* अलङ्कारः, अलङ्करणं, अलङ्क्रिया, भूषणं, विभूषणं, भरणं, आभरणं, परिष्कारः, परिष्कृतिः *f.*, संस्कारः, अङ्गसंस्कारः, परिकर्म्म *n.* (न्), प्रतिकर्म्म, प्रसाधनं, मण्डनं, शोभा -भनं, कल्पना, सज्जा, रञ्जनं, आकल्पः, वेशः.—(Of a book) पत्ररञ्जनं.—(Theatrical dress) नेपथ्यं, वर्णः, आहार्य्यः.

EMBER-DAYS, *s. pl.* यथापर्य्यायं वत्सरे वत्सरे चत्वार उपवाससमयाः, पुण्यदिनानि, पुण्याहानि.

EMBERS, *s. pl.* भस्म *n.* (न्), भसितं, तमाङ्गारोच्छिष्टं, अग्नेरुच्छिष्टं, अङ्गारशेषं, भूतिः *f.*

To EMBEZZLE, *v. a.* ग्रस् (c. 1. ग्रसते -सितुं), निक्षिप्तद्रव्यं निह्नवेन स्वीयं कृ or स्वीकृ, न्यस्तधनादि छलेन स्वकीयं कृत्वा उपयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), परवित्तम् अपह्नवेन स्वाधीनं कृत्वा हृ (c. 1. हरति, हर्त्तुं) or अपहृ, अपहु (c. 2. -हुते -होतुं), निहु.

EMBEZZLED, *p. p.* ग्रस्तः -स्ता -स्तं, निहुतः -ता -तं, अपह्नवेन or छलेन स्वीकृतः -ता -तं or उपयुक्तः -क्ता -क्तं or हृतः -ता -तं or अपहृतः -ता -तं.

EMBEZZLEMENT, *s.* ग्रसनं, अपह्नवेन or निह्नवेन हरणं or अपहारः, निक्षिप्तधनादेः or परवित्तस्य छलेन उपयोगः or प्रयोगः, अपह्नवः, निह्नवः, अभिलाषः.

To EMBLAZE or EMBLAZON, *v. a.* कुलीनपदचिह्नानि लिखित्वा शुभ् in caus. (शोभयति -यितुं), कुलीनपदचिह्नैर् अलङ्कृ, रञ्ज् (c. 10. रञ्जयति -यितुं).

EMBLAZONED, *p. p.* कुलीनपदचिह्नशोभितः -ता -तं, उद्द्योतितः -ता -तं.

EMBLEM, *s.* चिह्नं, लक्षणं, व्यञ्जनं, लिङ्गं, लाञ्छनं, निदर्शनं, आदर्शः, दृष्टान्तः, संज्ञा, प्रतिमा, प्रतिरूपं, सङ्केतः, केतुः *m.*, ध्वजः, पताका.

EMBLEMATIC, EMBLEMATICAL, *a.* उद्बोधकः -का -कं, लाक्षणिकः -की -कं, चिह्नकारी -रिणी -रि (न्) or निदर्शनकारी, लिङ्गी -ङ्गिनी -ङ्गि (न्).

EMBLEMATICALLY, *adv.* निदर्शनक्रमेण, लाक्षणिकप्रकारेण, उद्बोधनार्थं.

EMBLIC MYROBALAN, *s.* (A plant) तिष्यफला, आमलकः -की, अमृता, वयस्था, वयःस्था, कायस्था.

EMBODIED, *p. p.* शरीरी -रिणी -रि (न्), शरीरवान् -वती -वत् (त्), देही -हिनी -हि (न्), देहवान् -वती -वत् (त्), सविग्रहः -हा -हं, सशरीरः -रा -रं, सवपुषः -षी -षं, जातरूपः -पी -पं, जातशरीरः -रा -रं, सन्निपतितः -ता -तं.

EMBODIMENT, *s.* शरीरत्वं, देहत्वं, सशरीरता, सन्निपातः, समाहारः, एकशरीरीकरणं.

To EMBODY, *v. a.* सशरीरं -रां -रं कृ, एकशरीरीकृ, एकाङ्गीकृ, देहवन्तं -वतीं -वत् कृ.—(Collect into a mass) सङ्गृह् (c. 9. -गृह्णाति -ग्रहीतुं), एकीषीकृ, एकत्र कृ, एकीकृ.

To EMBOLDEN, *v. a.* आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, निर्भयं -यां -यं कृ.

EMBOLDENED, *p. p.* आश्वासितः -ता -तं, गतभीः -भीः -भि, वीतभयः -या -यं.

To EMBOSS, *v. a.* राजतभाण्डादीनि उच्चरेखादिना अलङ्कृ or उपस्कृ or गण्डाकारेण परिष्कृ or समुत्सेधेन तक्ष् (c. 1. तक्षति -क्षितुं).

EMBOSSMENT, *s.* राजतभाण्डादीनाम् उच्चरेखादिना अलङ्करणं, गण्डाकारेण or उच्चैःप्रकारेण तक्षणं, समुत्सेधेन तक्षणं, प्रतिच्छाया.

To EMBOWEL, *v. a.* नाडीः or अन्त्राणि वहिष्कृ or निर्हृ (c. 1. -हरति -हर्त्तुं).

To EMBRACE, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्; आश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं), संश्लिष्, समाश्लिष्, उपश्लिष्; स्वञ्ज् (c. 1. स्वजते, स्वंक्तुं), परिष्वञ्ज्, सम्परिष्वञ्ज्, उपगुह् (c. 1. -गूहति -हितुं), परिरभ् (c. 1. -रभते -रब्धुं), पीड् (c. 10. पीडयति -यितुं), क्रोडीकृ, क्रोडे कृ.—(Comprise) परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), परिसमाप् (c. 5. -आप्नोति -आप्तुं), प्रतिसंहृ (c. 1. -हरति -हर्त्तुं).—(Encompass) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं), परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).

EMBRACE, *s.* आलिङ्गनं -ङ्गितं, आश्लेषः, संश्लेषः, श्लेषः, परिष्वङ्गः, परिरम्भः, उपगूढं, उपगूहनं, अवगूहनं, अङ्कपाली -लिका, अङ्कपालिः *m.*, श्लिषा, ली: *f.*, अङ्कः, कोलः, लयः, क्रोडीकरणं, क्रोडीकृतिः *f.*

EMBRACED, *p. p.* आलिङ्गितः -ता -तं, श्लिष्टः -ष्टा -ष्टं, आश्लिष्टः -ष्टा -ष्टं, संश्लिष्टः -ष्टा -ष्टं, परिष्वक्तः -क्ता -क्तं, परिरब्धः -ब्धा -ब्धं, परिमृष्टः -ष्टा -ष्टं, उपगूढः -ढा -ढं, पीडितः -ता -तं, अभिलीनः -ना -नं, लीनः -ना -नं, निलीनः -ना -नं, क्रोडीकृतः -ता -तं.

EMBRASURE, *s.* प्राकारे छिद्रं or रन्ध्रं. आकाशजननी *m.* (न्), नालकः.

To EMBROCATE, *v. a.* अङ्गम् औषधीयजलेन लिप् (c. 6. लिम्पति, लेप्तुं) or आलिप् or उपलिप् or अनुलिप् or औषधीयजलेन आर्द्रीकृत्य मृद् (c 9. मृद्नाति, मर्द्दितुं) or सम्मृद् or घृष् (c. 1. घर्षति -र्षितुं).

EMBROCATION, *s.* आलेपनं, लेपः, विलेपः, उपदेहः, औषधीयजलं, प्रक्षणः.

To EMBROIDER, *v. a.* सूचीद्वारेण पुष्पाद्यलङ्कारान् सिव् (c. 4. सीव्यति, सेवितुं) or निषिव् or चित्र् (c. 10. चित्रयति -यितुं), काम्मिकवस्त्रं कृ.

EMBROIDERED, *p. p.* सूचिकर्म्मद्वारेण पुष्पाद्यलङ्कृतः -ता -तं, चित्रितः -ता -तं, काम्मिकः -की -कं; 'embroidered cloth,' काम्मिकवस्त्रं.

EMBROIDERER, *s.* सूचीशिल्पविद् *m. f.*, सूचीशिल्पोपजीवी *m.* -विनी *f.* (न्), काम्मिकवस्त्रकृत् *m. f.*

EMBROIDERY, *s.* सुवर्णसूत्रादिना पुष्पाद्यलङ्कारसीवनं, सूचिता, सूचीकर्म्म *n.* (न्), सूचीशिल्पं; 'embroidered cloth,' काम्मिकवस्त्रं.

To EMBROIL, *v. a.* सङ्कटीकृ, सङ्कुलीकृ, संक्षुभ् in caus. (-क्षोभयति -यितुं), सङ्कृ (c. 6. -किरति -करितुं -रीतुं), अस्तव्यस्तीकृ, आकुलीकृ, व्याकुलीकृ,

Digitized by Google

भेदं or वैरक्यं जन् (c. 10. जनयति -यितुं) or कृ.

EMBROILED, *p. p.* संक्षुब्धः -ब्धा -ब्धं, जातभेदः -दा -दं, जातविरागः -गा -गं.

EMBROILMENT, *s.* सङ्कटीकरणं, संक्षोभः, साङ्कर्य्यं, विप्रतिपत्तिः *f.*, भेदकरणं.

EMBRYO, EMBRYON, *s.* भ्रूणः, गर्भः, कलनं, कललः -लं, षं, गर्भस्थबालकस्य प्रथमावयवः, पुखनः.—(Rudiments of any thing) आरम्भः, प्रारम्भः.

EMENDABLE, *a.* शोधनीयः -या -यं, संशोध्यः -ध्या -ध्यं, समाधेयः -या -यं.

EMENDATION, *s.* शोधनं, शुद्धिः *f.*, संशुद्धिः *f.*, विशोधनं, समाधानं, प्रतिसमाधानं.

EMENDATOR, *s.* शोधकः, संशोधकः, शोधनकृत्, समाधाता *m.* (तृ).

EMENDED, *p. p.* शोधितः -ता -तं, शुद्धीकृतः -ता -तं, संशुद्धः -द्धा -द्धं.

EMERALD, *s.* मरकतः, अश्मगर्भः, हरिन्मणिः *m.*, रौहिणेयं, गारुत्मत् *n.*, गारुडः, गरुडाश्मा *m.* (न्), गरुडाङ्कितं, गरुडोत्तीर्णं, राजनीलः, सुनीलकः, मसारः, आपनिकः; 'of the colour of an emerald,' मारकतः -ती -तं.

To EMERGE, *v. n.* (From the water, &c.) सलिलाद् उन्मज्ज् (c. 6. -मज्जति -मंक्तुं -मज्जितुं) or उत्या (c. 1. -तिष्ठति -थातुं, rt. स्था) or वहिर्गम् (c. 1. -गच्छति -गन्तुं) or निर्गम् or निःसृ (c. 1. -सरति -सर्तुं) or उन्नह् (c. 4. -नह्यति -नद्धुं).—(Rise into view) उदि (c. 1. उदयति, उदेतुं, rt. इ), प्रादुर्भू, आविर्भू, वहिर्भू, प्रभू, उत्पद् (c. 4. -पद्यते -पत्तुं), प्रकाश् (c. 1. -काशते -शितुं), प्रकाशं निर्गम्, उद्भा (c. 2. -भाति -तुं), निर्भा, प्रकाशं or प्रत्यक्षं दृश् in pass. (दृश्यते), दृष्टिगोचरः -रा -रं भू.—(Re-appear) पुनर्दृश् in pass.

EMERGENCE, EMERGENCY, *s.* प्रयोजनं, अवसरः, प्रस्तावः, समयः, कार्य्यं, अवश्यकता, आवश्यकत्वं, अकस्मादुत्पन्नं, अकस्माद्भूतं, अकस्माद्भूतं, आकस्मिकसम्भवः, अनिश्चितविषयः, अभ्युदयः, समुन्नयः, समुत्पत्तिः *f.*, आपद् *f.*, विपद् *f.*; 'according to the emergency,' यथावसरं, यथाप्रयोजनं, प्रस्तावसदृशं, कार्य्यवशात्, यथाकार्य्यं, यथासम्भवं, प्रसङ्गवशात्; 'in this emergency,' इहसमये.

EMERGENT, *a.* उन्मज्जन् -ज्जन्ती -ज्जत् (त्).—(Unexpected) अकस्मादुत्पन्नः -न्ना -न्नं, आकस्मिकः -की -कं.—(Urgent) आवश्यकः -की -कं.

EMERY, *s.* महालोहं, उत्तमलोहः, अयस्कान्तः, लोहपरिष्कारको धातुः.

EMETIC, *s.* वमनं, वान्तिकृत्, वमनोत्पादकम् औषधं.

EMETIC, EMETICAL, *a.* वान्तिदः -दा -दं, वमनकारी -रिणी -रि (न्).

EMIGRANT, *s.* स्वदेशं त्यक्तुकामः, देशान्तरम् अधिवित्सुः, दूरदेशे वित्सुः.

To EMIGRATE, *v. n.* स्वदेशं त्यक्त्वा देशान्तरे or दूरदेशे or प्रदेशे वस् (c. 1. वसति, वस्तुं) or अधिवस् with acc. c., or अध्यास् (c. 2. -आस्ते -आसितुं) with acc. c., दूरदेशे वित्सया स्वदेशं त्यज् (c. 1. त्यजति, त्यक्तुं).

EMIGRATION, *s.* दूरदेशाधिवासनार्थं स्वदेशत्यागः, देशान्तराधिवासनं, प्रदेशाधिवासनं, देशत्यागः.

EMINENCE, *s.* (Exaltation, distinction) उत्कर्षः, उत्कृष्टता, प्रमुखत्वं, औत्कर्षं, विशिष्टता, वैशिष्ट्यं, उन्नतिः *f.*, समुन्नतिः *f.*, प्रधानत्वं, प्रकर्षः, प्रकृष्टत्वं, परमपदं, परपदं, अधिकत्वं, आधिक्यं, शिष्टता, श्रेष्ठत्वं, महोदयः, सुख्यातिः *f.*, विख्यातिः *f.*, सेव्यता.—(Height) उच्छ्रयः, उच्छ्रायः, समुच्छ्रयः, उत्सेधः, समुत्सेधः, उच्चत्वं, उन्नुङ्गता, ऊर्द्धत्वं; 'a rising ground,' उन्नतभूभागः, उच्चस्थानं.

EMINENT, *a.* उत्कृष्टः -ष्टा -ष्टं, प्रमुखः -खा -खं, विशिष्टः -ष्टा -ष्टं, शिष्टः -ष्टा -ष्टं, उन्नतः -ता -तं, समुन्नतः -ता -तं, उत्तमः -मा -मं, परमः -मा -मं, परः -रा -रं, श्रेष्ठः -ष्ठा -ष्ठं, अधिकः -का -कं, मुख्यः -ख्या -ख्यं, अग्र्यः -र्या -र्यं, प्रधान prefixed in comp., प्रवरः -रा -रं, वरेण्यः -ण्या -ण्यं, प्रवर्हः -र्हा -र्हं, उच्चः -च्चा -च्चं, उच्छ्रितः -ता -तं.—(Celebrated) विश्रुतः -ता -तं, ख्यातः -ता -तं, महायशस्कः -स्का -स्कं, प्रथितः -ता -तं; 'of eminent endowments,' महाभागः -गा -गं, गुणाढ्यः -ढ्या -ढ्यं; 'to be eminent,' विशिष्ट् in pass. (-शिष्यते). *See* EXCELLENT.

EMINENTLY, *adv.* अत्यन्तं, अतिशयेन, अत्यर्थं, भृशं, अधिकं, निर्भरं, अति prefixed.

EMISSARY, *s.* दूतः, वार्त्तायनः, चारः, चरः, वार्त्ताहरः, सन्देशहरः, कार्य्यङ्करः, प्रयोज्यः, आख्यायकः.—(Secret agent) गूढपुरुषः, गुप्तदूतः, गुप्तचरः -चारी *m.* (न्), गुप्तगतिः *m.*, रहस्याख्यायी *m.* (न्), प्रणिधिः *m.*, प्रतिष्कः -ष्कशः -ष्कसः.

EMISSION, *s.* निरसनं, उत्सर्गः, उत्सर्जनं, उत्क्षेपः -पणं, विसर्गः, उद्गारः, उच्चारः, स्रावः, आस्रावः, मोक्षणं, मोचनं, प्रमोचनं, उदीरणं, उद्वमनं, उत्सारः, ऊर्द्ध्वशोधनं.

To EMIT, *v. a.* उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, निरस् (c. 4. -अस्यति -असितुं), निःसृ in caus. (-सारयति -यितुं), मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्गृ (c. 6. -गिरति -गरितुं -रीतुं), उदीर् (c. 10. -ईरयति -यितुं), समुदीर्, समीर्, उच्चर् in caus. (-चारयति -यितुं), उद्वम् (c. 1. -वमति -मितुं), सु in caus. (स्रावयति -यितुं), प्रसु, स्कन्द् (c. 10. स्कन्दयति -यितुं), निर्गम् in caus. (-गमयति -यितुं); 'to emit blood,' रक्तं सु in caus.; 'to emit saliva,' श्लेष्मनिरसनं कृ; 'to emit heat,' उष्माणम् उद्वम्.

EMITTED, *p. p.* उत्सृष्टः -ष्टा -ष्टं, उत्क्षिप्तः -प्ता -प्तं, उदीरितः -ता -तं, निरस्तः -स्ता -स्तं, स्कन्दितः -ता -तं, उच्चारितः -ता -तं, उद्वान्तः -न्ता -न्तं.

EMMENAGOGUE, *s.* स्त्रीणाम् ऋतुवर्धकम् औषधं.

EMMET, *s.* पिपीलिका, पुत्रिका.

To EMMEW, *v. a.* पिञ्जरे or सङ्कटस्थाने निरुध् (c. 7. -रुणद्धि -रोद्धुं).

EMOLLIENT, *a.* स्नेही -हिनी -हि (न्), स्निग्धः -ग्धा -ग्धं, स्नेहवान् -वती -वत्, चिक्कणः -णा -णं, शान्तिकरः -री -रं, शान्तिदः -दा -दं, स्निग्धकारी -रिणी -रि (न्).

EMOLLIENT, *s.* स्नेहनं, अभ्यञ्जनं, अभ्यङ्गः, आलेपः, उपदेहः.

EMOLUMENT, *s.* लाभः, फलं, लब्धिः *f.*, प्राप्तिः *f.*, फलोदयः, आयः, प्रतिपत्तिः *f.*, अर्थः, लभ्यं, आगमः, उदयः, वेतनं, वर्त्तनं.

EMOTION, *s.* (Passion, feeling) रसः, भावः, विकारः, मनोविकारः, रागः, चित्तवृत्तिः *f.*, चित्तविकारः, विभ्रमः.—(Agitation of mind) उत्कम्पः, उत्तापः, अन्तःक्षोभः, चित्तक्षोभः, अन्तर्वेगः, अभितापः, मनस्तापः; 'under emotion,' अन्यथावृत्तिः -त्तिः -त्ति.

To EMPALE, *v. a.* (Enclose with a row of stakes or stockade) युद्धे सैन्यरक्षार्थं वार्ष्णेयेन or शङ्कुपंक्त्या परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).—(Put to death by fixing on a stake) शूले or कीले or तीक्ष्णशूले आरुह् in caus. (-रोपयति -यितुं) or समारुह् in caus., or निविश् in caus. (-वेशयति -यितुं), कील (nom. कीलयति -यितुं).

EMPALED, *p. p.* कीलितः -ता -तं, शूलारोपितः -ता -तं, शूलनिवेशितः -ता -तं, प्रोतः -ता -तं.

EMPALEMENT, *s.* शूलारोपः -पणं, शूलनिवेशनं; 'deserving empalement,' शूल्यः -ल्या -ल्यं; 'stake for empalement,' शूलः, कीलः.

To EMPANNEL, EMPARLANCE, EMPASSION. *See To* IMPANNEL, &c.

EMPEROR, *s.* राजाधिराजः, महाराजाधिराजः, अधिराजः, अधीश्वरः, राजराजः, महाराजः, सम्राट् *m.* (ज्) or अधिराट् *m.*, महीलेश्वरः, चक्रवर्त्ती *m.* (न्), सार्व्वभौमः, सर्व्वेश्वरः, अधिराज्यभाक् *m.* (ज्).

EMPHASIS, *s.* अवधारणं, गुरूच्चारणं, दीर्घोच्चारणं, गौरवं.

EMPHATIC, *a.* (Impressive) गुरुः -र्वी -रु.—(Requiring emphasis) अवधारणीयः -या -यं, अवधार्य्यः -र्य्या -र्य्यं.—(Uttered with emphasis) गौरवेण or अवधारणेन उच्चारितः -ता -तं.

EMPHATICALLY, *adv.* अवधारणेन, सावधारणं, गौरवेण, सगौरवं.

EMPIRE, *s.* आधिराज्यं, अधिराज्यं, साम्राज्यं, राज्यं, राजत्वं, आधिपत्यं,

Digitized by Google

ऐश्वर्यं, ईशत्वं, राजाधिकारः, प्रभुत्वं.—(Region governed) राष्ट्रं, विषयः.

EMPIRIC, *s.* (A quack) दुश्चिकित्सकः, मिथ्याचिकित्सकः, क्षुद्रवैद्यः, आयुर्वेदानभिज्ञः.—(One who makes experiments) परीक्षकः.

EMPIRICAL, *a.* (Charlatanical) आयुर्वेदविरुद्धः -द्धा -द्धं, मिथ्याचिकित्सासम्बन्धी -न्धिनी -न्धि (न्), क्षाद्रिकः -की -कं, कापटिकः -की -कं.—(Experimental) परीक्षकः -का -कं.

EMPIRICALLY, *adv.* आयुर्वेदविरुद्धं, दुश्चिकित्सकवत्, परीक्षाक्रमेण.

EMPIRICISM, *s.* मिथ्याचिकित्सा, दुश्चिकित्सा -त्सनं, आयुर्वेदानभिज्ञता, आयुर्वेदविरुद्धा चिकित्सा, परीक्षा -क्षणं.

EMPLASTIC, *a.* लेप्यः -प्या -प्यं, श्यानः -ना -नं, चिक्कणः -णा -णं, सान्द्रः -न्द्रा -न्द्रं.

FLOCK, *s.* (Collection of animals) यूथं, गणः, समूहः, सङ्घः, सङ्घातः, व्रजः, कुलं, वृन्दं, संहतिः *f.*, ओघः, कदम्बकं, निवहः, समुदायः, समुदयः, समाहारः, पाशवं, निकरः, समवायः, सञ्चयः, चयः, निकुरुम्बं -म्बकं, वारः, विसरः, व्रातः, सन्दोहः, समजः, सार्थः, निकायः.—(Flock of sheep) मेषयूथं, अविगणः, अविकुलं, अविकटः, आविकं, औरभ्रकं; 'of goats,' आजकं; 'of goats and sheep,' अजाविकं; 'of cattle,' पशुगणः, गोकुलं, गोवृन्दं; 'of pigeons,' कापोतं; 'of parrots,' शौकं; 'of peacocks,' मायूरं; 'of geese,' हंसमाला, हंसश्रेणी; 'of partridges,' तैत्तिरं; 'in flocks,' यूथशस्.—(Flock of cotton) तूलं -लिका, इन्द्रतूलं; 'flock-mattress,' तूलिका.

To FLOCK TOGETHER, *v. n.* एकत्र मिल् (c. 6. मिलति, मेलितुं), यूथशः or पशुयूथवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or समागम् or समे (c. 2. समैति -तुं, rt. इ) or अनुसृ (c. 1. -सरति -सर्त्तुं), एकीभू, एकत्रभू, एकौघीभू, समूहीभू, सङ्कुलीभू.

To FLOG, *v. a.* चर्म्मदण्डेन or कशया or वेत्रेण तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रह् (c. 1. -हरति -र्त्तुं) or दण्ड् (c. 10. दण्डयति -यितुं).

FLOGGED, *p. p.* कशाताडितः -ता -तं, कशादण्डितः -ता -तं, वेत्राहतः -ता -तं.

FLOGGING, *s.* कशाताडनं, कशाघातः, कशा, रज्जुताडनं, वेत्राघातः, चर्म्मदण्डप्रहारः; 'deserving it,' कश्यः -श्या -श्यं, कशार्हः -र्हा -र्हं.

FLOOD, *s.* (Deluge, inundation) जलाप्लावनं, जलप्लावनं, आप्लावः, जलप्रलयः, जलवेगः, तोयविप्लवः, सलिलोपप्लवः, जलोच्छ्वासः, जलौघः, आप्लाविजलं, परीवाहः, विदारः, वन्या.—(Universal flood) भूतसम्प्लवः, एकार्णवं.—(Stream) स्रोतः *n.* (स्), प्रवाहः.—(Tide) वेला, रयः.—(Overflow of a river) वानं.—(Flood of tears) अश्रुप्रवाहः, अश्रुपातः, अश्रुवर्षः, वाष्पवर्षः, धाराश्रु *n.*, अश्रुकलाप्लुः *m.*

To FLOOD, *v. a.* प्लु in caus. (प्लावयति -यितुं), आप्लु, सम्प्लु; 'is flooded,' प्लाव्यते.

FLOODED, *p. p.* प्लावितः -ता -तं, आप्लावितः -ता -तं, परिप्लुतः -ता -तं अभिप्लुतः -ता -तं, सम्प्लुतोदकः -का -कं, अभिपरिप्लुतः -ता -तं.

FLOOD-GATE, *s.* जलद्वारं, जलपथः, जलवर्त्म *n.* (न्), जलनिर्गमः, जलनिःसरणं.

FLOOK, *s.* लङ्गरदन्तः, लङ्गरभुजः, लङ्गराकर्षणी, नौबन्धनयन्त्रकीलः.

FLOOR, *s.* (Bottom of a building, part on which one walks) तलं, गृहतलं, हर्म्यतलं, गृहभूमिः *f.*, गृहभूः *f.*, वेश्मभूः *f.*, कुट्टिमं, तलिमं, सुतलः, गृहपोटः, गृहपोतकः, पोतः, वास्तुः *m.*, प्रतिष्ठानं, गृहमूलं, भूमिः *f.*, भूतलं, पृष्ठं.—(Story of a house) भूमिः, कोष्ठः -ष्ठं, मञ्चः; 'second floor,' द्वितीयभूमिः *f.*, द्वितीयकोष्ठं; 'upper floor,' उपरिभूमिः *f.*

Digitized by Google

—(Platform of boards) फलकः-कं, फलकास्तरः-रणं, दीर्घकाष्ठास्तरः-रणं, फलकस्तरिमा *m.* (न्), फलकसंस्तरः, मञ्चः-ञ्चकः.

To FLOOR, *v. a.* फलकैः or दीर्घकाष्ठैः or काष्ठफलकैर् आस्तृ (c. 9. -स्तृणाति -स्तरितुं -रीतुं), फलक (nom. फलकयति -यितुं), सफलकीकृ.—(Strike down) भूमौ पत् in caus. (पातयति -यितुं).

FLOORING, *s.* फलकास्तरणं, फलकस्तरः, फलकस्तरिमा *m.* (न्), परिस्तरः.

To FLOP, *v. a.* आस्फोटनशब्देन तड् (c. 10. ताडयति -यितुं), आस्फल् (c. 10. -स्फालयति -यितुं).

FLORA, *s.* (The goddess) सीता, पुष्पदेवता.—(Catalogue of plants) ओषधिपरिसंख्या.

FLORAL, *a.* पौष्पः-ष्पी-ष्पं-ष्पिकः-की-कं, कौसुमः-मी-मं, सौमनसः-सी-सं.

FLORID, *a.* (In colour or complexion) रक्तवर्णः-र्णा-र्णं, अरुणवर्णः-र्णा-र्णं, पुष्पवर्णः-र्णा-र्णं.—(As style) पुष्पितः-ता-तं, अलङ्कृतः-ता-तं, वागलङ्कारमयः-यी-यं, व्यञ्जनामयः-यी-यं, शोभितः-ता-तं.

FLORIDITY, FLORIDNESS, *s.* (Of complexion) कपोलरागः, वदनरक्तता, मुखारुणिमा *m.* (न्).—(Of style) अलङ्कारः, सालङ्कारत्वं, वागलङ्कारः, वागलङ्क्रिया, वाक्शोभा.

FLORIFEROUS, *a.* पुष्पोत्पादकः-का-कं, पुष्पजनकः-का-कं, पुष्पदः-दा-दं.

FLORILEGIUM, *s.* पुष्पचयः, पुष्पावचयः, पुष्पप्रचायः, कुसुमावचयः.

FLORIN, *s.* विदेशीयमुद्राविशेषः, रूप्यमुद्राविशेषः.

FLORIST, *s.* पुष्पादिविद्याज्ञः, पुष्पलावः, ओषधिविद्याज्ञः, मालाकारः, मालिकः, माली *m.* (न्).

FLOTA, *s.* बृहन्नौकासमूहः, महावाणिज्यनौकासमूहः.

FLOTILLA, *s.* क्षुद्रनौकासमूहः, क्षुद्रनौकासङ्ग्रहः.

To FLOUNCE, *v. n.* सम्भ्रमोपहतत्वात् or संरम्भाविष्टत्वात् शरीराङ्गानि or शरीरम् इतस्ततः क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or विक्षिप् or चल् in caus. (चालयति -यितुं) or विचल्.

FLOUNCE, *s.* (Sudden jerk of the body) अकस्माद् अङ्गविक्षेपः or शरीरविक्षेपः.—(A piece of cloth sewed round a gown with the lower border loose) स्त्रीवेशपरितः स्यूतः शिथिलाधोभागो वस्त्रखण्डः, स्त्रीवेशोपरि शोभार्थम् अधिकवस्त्रविन्यासः.

FLOUNCED, *p. p.* अधिकवस्त्रपंक्तिशोभितः-ता-तं, वेशोपरिस्थपटपंक्तिशोभितः-ता-तं.

FLOUNDER, *s.* समुद्रजः क्षुद्रमत्स्यभेदः.

To FLOUNDER, *v. n.* यथा वाजी पङ्के तथा पादादिविक्षेपेण लुड् (c. 6. लुठति -ठितुं), पङ्कपतितवद् निर्गमेच्छया शरीराङ्गानि इतस्ततः क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विप्लु (c. 1. -प्लवते -प्लोतुं).

FLOUR, *s.* शक्तुः *m.*, गोधूमचूर्णं, गोधूमक्षोदः, चूर्णं, क्षोदः, अपूप्यः, पिष्टं, गुण्डिकः-का, समीदः, समिता.

To FLOURISH, *v. n.* (Thrive) ऋध् (c. 5. ऋध्नोति, c. 4. ऋध्यति, अर्धितुं), समृध्, एध् (c. 1. एधते -धितुं), समेध्, वृध् (c. 1. वर्धते -र्धितुं), विवृध्, संवृध्, समृद्धीभू.—(Use lofty language) गर्ह्यितवाक्यम् आश्रि (c. 1. -श्रयति -यितुं).

To FLOURISH, *v. a.* (Embellish with flowers, &c.) पुष्पाद्यलङ्कारेण शुभ् (c. 10. शोभयति -यितुं) or रञ्ज् (c. 10. रञ्जयति -यितुं), अलङ्कृ, समलङ्कृ, चित्र् (c. 10. चित्रयति -यितुं).—(Brandish) भ्रम् in caus. (भ्रमयति, भ्रामयति -यितुं), उद्भ्रम्.

FLOURISH, *s.* (Show, embellishment) शोभा, अलङ्कारः, अलङ्क्रिया, रञ्जनं.—(Lofty language) गर्ह्यितवाक्यं, दर्पवाक्यं.—(Brandishing) भ्रान्तिः *f.*, उद्भ्रमः, उद्भ्रान्तिः *f.*

FLOURISHED, *p. p.* (Embellished) अलङ्कृतः-ता-तं.—(Brandished) उद्भ्रान्तः-न्ता-न्तं.

FLOURISHING, *a.* समृद्धः-द्धा-द्धं, वर्धमानः-ना-नं, वर्ष्मिष्णुः-ष्णुः-ष्णु, अधिकर्द्धिः-र्द्धिः-र्द्धि, उदयी-यिनी-यि (न्), शुभान्वितः-ता-तं, सुस्थः-स्था-स्थं.

To FLOUT, *v. a.* अवहस् (c. 1. -हसति -सितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), गर्ह् (c. 1. गर्हते -र्हितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ.

FLOUTED, *p. p.* अवज्ञातः-ता-तं, मुखरीकृतः-ता-तं, गर्हितः-ता-तं.

To FLOW, *v. n.* (Run as water) सु (c. 1. सवति, सोतुं), प्रसु, परिसु, स्यन्द् (c. 1. स्यन्दते -न्दितुं), प्रस्यन्द्, सृ (c. 1. सरति, सर्तुं), प्रसृ, संसृ, क्षर् (c. 1. क्षरति -रितुं), री (c. 4. रीयते, रेतुं), गल् (c. 1. गलति -लितुं), जलं प्रवह् (c. 1. -वहति -वोढुं), पयस् (nom. पयस्यति).—(Glide along) प्रसृप् (c. 1. -सर्पति -सर्प्तुं), विसृप्, संसृप्, सृप्, विसृ, प्रसृ.—(As the tide) वेलावत् प्रसु, वेला (nom. वेलायते).—(Proceed) प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रसृ, प्रगम् (c. 1. -गच्छति -गन्तुं), प्रया (c. 2. -याति -तुं), प्रचल् (c. 1. -चलति -लितुं).—(Arise from) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् (c. 4. जायते, जनितुं), प्रभू, प्रवृत्.—(Hang loose, as hair, &c.) विगलितः-ता-तं भू, प्रवितनः-ना-नं भू, प्रस्रस्तः-स्ता-स्तं भू, विस्रंस् (c. 1. -संसते -सितुं), शिथिलीभू.

FLOW, *s.* (Stream, course) सवः-वणं, प्रवाहः, स्रोतः *n.* (स्), प्रस्रवः, प्रस्रवणं, प्रस्रावः, स्रावः, संसृतिः *f.*, प्रवृत्तिः *f.*, जलवाहनं, स्यन्दः-न्दनं, निस्यन्दः, अभिष्यन्दः, गलनं, गालः, क्षरणं, उदक्प्रवाहः.—(Current) वेला, वेगः, रयः, धारः-रा, ओघः, पात्रसंस्कारः, असृपद्धतिः *f.*, पात्रझङ्कारः, रायभाटी, ऊर्म्मी.—(Tide) वेला, समुद्रवेला, समुद्ररयः.—(Flow of words) वाक्सरणिः *f.*, वाक्चापल्यं; 'flow of tears,' अश्रुपातः, अश्रुप्रवाहः, धाराश्रु *n.*; 'flow of blood,' असृक्पातः, असृग्धारा.

FLOWER, *s.* पुष्पं, कुसुमं, सुमनाः *m.* -नः *n.* -नस् *f. pl.* (स्), फुल्लं, प्रसवः, प्रसूनं, प्रसूतं, सूनं; 'flower-gathering,' पुष्पचयः, पुष्पावचयः, पुष्पप्रचयः, पुष्पप्रचायः, कुसुमावचयः; 'flower-gatherer,' पुष्पचायी *m.* (न्), पुष्पावचायी *m.* (न्), पुष्पलावः; 'flower-seller,' पुष्पाजीवी *m.* (न्), मालाकारः, मालिकः.—(Prime, best part) सारः, उत्तमभागः, श्रेष्ठभागः; 'flower of age,' यौवनावस्था; 'flower of youth,' यौवनप्रौढिः *f.*, नवयौवनं, अक्षतयौवनं; 'of corn,' धान्यस्य खाद्यभागः; 'in the flower of youth,' प्रौढयौवनः-ना-नं.—(Catamenia) पुष्पं, कुसुमं.

To FLOWER, *v. n.* (Blossom) पुष्प् (c. 4. पुष्पति, पुष्पितुं), कुसुम (nom. कुसुमयति -यितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं), स्फुट् (c. 6. स्फुटति -टितुं, c. 1. स्फोटते -टितुं), विकस् (c. 1. -कसति -सितुं).—(Be in the prime) प्रौढयौवनः-ना-नं भू.—(Froth) फेन (nom. फेनायते) मण्ड (nom. मण्डायते).

To FLOWER, *v. a.* पुष्पाद्यलङ्कारेण शुभ् (c. 10. शोभयति -यितुं).

FLOWER-ARMED, *a.* (The Hindu Cupid) कुसुमायुधः, कुसुमेषुः *m.*, पुष्पास्त्रः, पुष्पचापः.

FLOWER-DE-LUCE or FLOWER-DE-LIS, *s.* उत्पलभेदः, पद्मविशेषः.

FLOWERED, *p. p.* or *a.* पुष्पितः-ता-तं, कुसुमितः-ता-तं, विकसितः-ता-तं, फुल्लः-ल्ला-ल्लं.—(Embellished with flowers) पुष्पाद्यलङ्कारशोभितः-ता-तं.

FLOWERET, *s.* पुष्पकः-कं, क्षुद्रपुष्पं, क्षुद्रकुसुमं.

FLOWER-GARDEN, *s.* पुष्पोद्यानं, कुसुमोद्यानं, पुष्पवाटी-टिका, उद्यानं, कुसुमाकरः.

FLOWERING, *a.* फुल्लवान् -वती -वत् (त्), प्रफुल्लः-ल्ला-ल्लं, पुष्पी-ष्पिणी-ष्पि (न्), पुष्पवान् -वती -वत् (त्), पुष्पितः-ता-तं, कुसुमितः-ता-तं, कुसुमवान् -वती -वत् (त्), स्फुटितपुष्पः-ष्पा-ष्पं, विकासी -सिनी -सि

Digitized by Google

(न्), पुष्पदः -दा -दं.

FLOWERLESS, *a.* अपुष्पः -ष्पा -ष्पं, अपुष्पकः -का -कं, अपुष्पदः -दा -दं.

FLOWER-STALK, *s.* मञ्जरी, पुष्पवृन्तं, प्रसवबन्धनं.

FLOWERY, *a.* (Having flowers) पौष्पः -ष्पी -ष्पं, पुष्पी -ष्पिणी -ष्पि (न्), सपुष्पः -ष्पा -ष्पं, पुष्पितः -ता -तं, पुष्पशाली -लिनी -लि (न्), पुष्पमयः -यी -यं, कौसुमः -मी -मं, सौमनसः -सी -सं, सकुसुमः -मा -मं. —(As style) पुष्पितः -ता -तं, अलङ्कृतः -ता -तं, वागलङ्कारमयः -यी -यं, व्यञ्जनामयः -यी -यं.

FLOWING, *part.* or *a.* सुतः -ता -तं, स्रवन् -वन्ती -वत् (त्), प्रसुतः -ता -तं, स्यन्नः -न्ना -न्नं, स्यन्दी -न्दिनी -न्दि (न्), विसारी -रिणी -रि (न्), प्रसारी &c., विसृत्वरः -रा -रं, विसृमरः -रा -रं, रीणः -णा -णं, स्रुतः -ता -तं.

FLOWING, *s.* स्रवः -र्वणं, प्रस्रवः -र्वणं, प्रस्रावः, स्रावः, उदक्प्रवाहः, वेला.

FLOWINGLY, *adv.* वाक्सरणिपूर्व्वं, वाक्चापल्येन, द्रुतं, द्रुतवाक्येन, अस्खलितवाक्येन, अविलम्बितं, अविलम्बितवाक्येन.

FLUCTUANT, *a.* ऊर्म्मिवद् इतस्ततो लोलमानः -ना -नं or विचलः -ला -लं.

To FLUCTUATE, *v. n.* (Roll or move to and fro) इतस्ततो लुड् (c. 6. लुठति -ठितुं) or लुल् (c. 1. लोलति -ते -लितुं) or चल् (c. 1. चलति -लितुं) or विचल्.—(Be unsteady, irresolute) दोल् (nom. दोलायते -यितुं), विचल्, विचलीभू, अस्थिरः -रा -रं भू, अस्थिरीभू, अनवस्थितः -ता -तं भू, चञ्चलीभू, पातोत्पातं कृ, विकल्प् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं).

FLUCTUATING, *a.* दोलायमानः -ना -नं, विचलः -ला -लं, अप्रतिष्ठः -ष्ठा -ष्ठं, अनवस्थितः -ता -तं, अस्थिरः -रा -रं, चलः -ला -लं, चञ्चलः -ला -लं, लोलः -ला -लं, लोलमानः -ना -नं, चपलः -ला -लं, तरलायितः -ता -तं.

FLUCTUATION, *s.* अस्थैर्य्यं, अस्थिरता, अनवस्थितिः *f.*, विचलनं, चञ्चलता, चाञ्चल्यं, चलता, आन्दोलनं, दोलायमानता, अप्रतिष्ठा, चपलता, पातोत्पातः.

FLUE, *s.* (Passage for smoke) धूमपथः, धूममार्गः, धूमवर्त्म *n.* (न्), धूमनिर्गमपथः.—(Soft down) मृदुलोम *n.* (न्), मृदुपक्षः.

FLUENCY, *s.* (Of speech) वाक्सरणिः *f.*, वाग्द्रुतता, वाक्चापल्यं, वाक्क्षिप्रता, वाग्भवः, वाक्पटुता, वाक्चातुर्य्यं, शब्दचातुर्य्यं, वाक्कौशलं, वाक्शीघ्रता, वाग्बाहुल्यं.

FLUENT, *a.* (In speech) वाग्द्रुतः -ता -तं, द्रुतवाक् *m. f. n.* (च्), वाक्क्षिप्रः -प्रा -प्रं, वाक्त्वरितः -ता -तं, त्वरितवाक् *m. f. n.*, वाक्पटुः -टुः -टु, अस्खलितवाक्यः -क्या -क्यं, अस्खलद्वाक्यः -क्या -क्यं, अविलम्बितवाक्यः -क्या -क्यं, शब्दचतुरः -रा -रं.

FLUENTLY, *adv.* द्रुतवाक्येन, क्षिप्रवाक्येन, वाक्चापल्येन, अविलम्बितवाचा, अस्खलितवाचा, त्वरितवाचा, वाग्विभवेन, द्रुतं, शीघ्रं, अस्खलितं, अविलम्बितं.

FLUID, *a.* द्रवः -वा -वं, द्रुतः -ता -तं, विद्रुतः -ता -तं, द्राव्यः -व्या -व्यं, विलीनः -ना -नं, तरलः -ला -लं, पयस्यः -स्या -स्यं, विभाजनीयः -या -यं.

FLUID, *s.* द्रवः, रसः, द्रवद्रव्यं, द्रववस्तु *n.*, जलवद्द्रव्यं, वारि *n.*, जलं, पयः *n.* (स्).

FLUIDITY, *s.* द्रवता -त्वं, द्राव्यत्वं, द्रुतत्वं, विद्रुतत्वं, विलीनता, तारल्यं.

FLUKE, *s.* लक्कररदनः, लक्कारभुजः. *See* FLOOK.

FLUMMERY, *s.* मिथ्याप्रशंसा, मिथ्यास्तुतिः *f.*, कल्पितप्रशंसा, अनर्थकस्तुतिः *f.*

FLUNG, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं; 'flung aside,' अपास्तः -स्ता -स्तं, अपसारितः -ता -तं, समाक्षिप्तः -प्ता -प्तं.

FLUNKEY, *s.* दासः, नीचकर्म्मकरः, तुच्छकर्म्मकरः, कापुरुषः, लटकः.

FLURRIED, *p. p.* आकुलितः -ता -तं, आकुलीकृतः -ता -तं, व्याकुलः -ला -लं -लितः -ता -तं, सम्भ्रान्तः -न्ता -न्तं, ससम्भ्रमः -मा -मं, विभ्रान्तमनाः -नाः -नः (स्), विक्षिप्तचित्तः -त्ता -त्तं, व्यग्रः -ग्रा -ग्रं, समाकुलः -ला -लं, चित्तवेगवान् -वती -वत् (त्), व्यस्तः -स्ता -स्तं, कातरः -रा -रं.

FLURRY, *s.* आकुलत्वं, व्याकुलता, सम्भ्रमः, विभ्रमः, चित्तभ्रान्तिः *f.*, चित्तवेगः, व्यग्रता, आवेगः, संवेगः, व्यस्तता, कातरता, वैक्लव्यं, विस्मयः, मोहः.

To FLURRY, *v. a.* आकुलीकृ, व्याकुलीकृ, व्याकुल (nom. व्याकुलयति -यितुं), कातरीकृ, मुह् (c. 10. मोहयति -यितुं), विमुह्, चित्तवेगं जन् (c. 10. जनयति -यितुं).

To FLUSH, *v. n.* (Become suddenly red) अकस्माद् रक्तोन्नमत्वाद् अरुणमुखीभू or लोहिताननः -ना -नं भू or रक्तवदनः -ना -नं भू, अरुणीभू, रक्तीभू, लोहित (nom. लोहितायते), रञ्ज् in pass. (रज्यते) संरञ्ज्.

To FLUSH, *v. a.* (Redden suddenly) अकस्माद् अरुणीकृ or रक्तीकृ or अरुण (nom. अरुणयति -यितुं), सरागं -गां -गं कृ, रञ्ज् in caus. (रञ्जयति -यितुं).—(Elate) दृप् in caus. (दर्पयति -यितुं), उद्धतीकृ, गर्व्वितीकृ.

FLUSH, *a.* (Vigorous) प्रौढतेजाः -जाः -जः (स्), तेजस्वी -स्विनी -स्वि (न्), प्रौढः -ढा -ढं.—(Affluent) धनाढ्यः -ढ्या -ढ्यं, समृद्धः -द्धा -द्धं. —(Liberal) धनव्ययशीलः -ला -लं, मुक्तहस्तः -स्ता -स्तं.

FLUSH, *s.* कपोलरागः, कपोलरक्तता, मुखारुणिमा *m.* (न्), वदनरागः, नववर्णः.—(Abundance, affluence) बाहुल्यं, धनबाहुल्यं, समृद्धिः *f.*

FLUSHED, *p. p.* (Colored) अरुणितः -ता -तं, अरुणीकृतः -ता -तं, रञ्जितः -ता -तं, रक्तः -क्ता -क्तं, रागी -गिणी -गि (न्), कपोलरागवान् -वती -वत् (त्).—(Elated) उद्धतः -ता -तं, दर्पोद्भातः -ता -तं, दृप्तः -प्ता -प्तं; 'with victory,' जयगर्व्वितः -ता -तं.

FLUSHING, *s.* अरुणीभावः, वदनरक्तत्वं, रक्तवर्णः, लोहितवर्णः.

To FLUSTER, *v. a.* पानादिना मद् in caus. (मादयति -यितुं) or उन्मत्तीकृ or विमुह् (c. 10. -मोहयति -यितुं) or चित्तविभ्रमं जन् (c. 10. जनयति -यितुं).

FLUSTER, *s.* चित्तविभ्रमः, मद्यपानजः सम्भ्रमः, व्यग्रता, मोहः, व्याकुलता.

FLUTE, *s.* (Instrument) वेणुः *m.*, वंशः -शी, मुरली, सानेयी -यिका, सानिका, विवरनालिका, ददुरः, नन्दः; 'sound of the flute,' वेणुशब्दः, वेणुध्वनिः *m.*, क्षोजनं.—(Channel of a column) स्तम्भरेखा, स्तम्भसीता.

To FLUTE, *v. n.* (Play on the flute) वेणुं or वंशीं ध्मा (c. 1. धमति, ध्मातुं) or प्रध्मा or वद् in caus. (वादयति -यितुं) or संवद् or प्रवद्.

To FLUTE, *v. a.* स्तम्भपरितो दीर्घरेखाः कृ or निखन् (c. 1. -खनति -नितुं).

FLUTE-PLAYER, *s.* वेणुध्मः, वांशिकः, वैणविकः, मुरलीवादकः.

FLUTED, *p. p.* or *a.* स्तम्भवद् दीर्घरेखायुक्तः -क्ता -क्तं or रेखापंक्तियुक्तः -क्ता -क्तं.

To FLUTTER, *v. n.* (Flap the wings in mid air) विहायसा or व्योममध्ये पक्षास्फालनं कृ or पक्षस्पन्दनं कृ or पक्षौ स्फल् (c. 10. स्फालयति -यितुं) or आस्फल्, प्रडीनम् अकृत्वा आकाशमध्ये पक्षौ विचल् in caus. (-चालयति -यितुं) or चल्.—(Move about with bustle) इतस्ततश् चल् or धाव् (c. 1. धावति -वितुं).—(Vibrate, beat, be agitated) स्पन्द् (c. 1. स्पन्दते -न्दितुं), कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, स्फुर् (c. 6. स्फुरति -रितुं), क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), उच्छ्वस् (c. 2. -च्छ्वसिति -तुं, rt. श्वस्), दोल् (nom. दोलायते -यितुं).

FLUTTER, *s.* (Vibration) स्पन्दनं, प्रतिस्पन्दनं, स्फुरणं, कम्पः -म्पनं, विकम्पः, उच्छ्वासः, उच्छ्वसनं, इतस्ततो विचलनं or चलनं.—(Hurry, agitation) सम्भ्रमः, वेगः, संवेगः, आवेगः, चित्तवेगः, क्षोभः.

FLUTTERING, *s.* पक्षास्फालनं, पक्षस्पन्दनं, पक्षकम्पनं, पक्षचालनं, स्फालः -लनं.

FLUTTERING, *part.* or *a.* आस्फालितः -ता -तं, स्पन्दमानः -ना -नं, कम्पमानः -ना -नं, विचलः -ला -लं, विचलन् -लन्ती -लत् (त्), उच्छ्वासी -सिनी -सि (न्); 'in the breeze,' अनिलोद्धतः -ता -तं, पवनाहतः -ता -तं, पवनक्षिप्तः -प्ता -प्तं.

FLUVIAL, FLUVIATIC, *a.* नादेयः -यी -यं, नदीसम्बन्धी -न्धिनी -न्धि (न्).

Digitized by Google

FLUX, *s.* (Flow) स्रवः -वणं, प्रस्रवः -वणं, प्रस्रावः, प्रवाहः, स्यन्दः, क्षरणं, गलनं, गालः.—(Of the tide) वेला.—(Confluence) सङ्गमः, समागमः.—(Bloody flux) आमातिसारः, आमरक्तः.

To FLUX, *v. a.* विली in caus. (-लाययति -लापयति -यितुं), द्रवीकृ, द्रु in caus. (द्रावयति -यितुं), विद्रु, गल् in caus. (गालयति -यितुं), विलीनीकृ.

FLUXIBILITY, FLUXILITY, *s.* द्रवत्वं, द्राव्यत्वं, गलनीयता, विलीनता.

FLUXIBLE, *a.* द्राव्यः -व्या -व्यं, गलनीयः -या -यं, सुविलयः -या -यं.

FLUXION, *s.* स्रवः -वणं, प्रस्रवः -वणं, स्रावः, प्रवाहः, गलनं, क्षरणं.

To FLY, *v. n.* (As a bird in the air) डी (c. 4. डीयते, c. 1. डयते -यितुं), प्रडी, उड्डी, खे or वियति विसृप् (c. 1. -सर्पति -सर्तुं) or सृप्, आकाशेन गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं), पत् (c. 1. पतति -तितुं), उत्पत्, प्रोत्पत्, समुत्पत्, सम्पत्.—(Move along swiftly) त्वरितं or सत्वरं or शीघ्रं गम् or चल् (c. 1. चलति -लितुं) or सृ (c. 1. सरति, सर्तुं) or प्रसृ.—(Run away) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्, प्रद्रु (c. 1. -द्रवति -द्रोतुं), विद्रु, विप्रद्रु, प्रधाव् (c. 1. -धावति -वितुं), अपधाव्, अपक्रम् (c. 1. -क्रामति -क्रमितुं), अपगम्, निर्गम्, अपसृप् (c. 1. सर्पति -सर्तुं), अपया (c. 2. -याति -तुं), अपसृ (c. 1. -सरति -सर्तुं), अपे (c. 2. अपैति -तुं, rt. इ).—(Pass rapidly) शीघ्रम् अतिक्रम् or अती (c. 2. अत्येति -तुं, rt. इ) or अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं); 'to fly away,' उड्डी, प्रडी, प्रोड्डी, निष्पत्; 'he flew away,' पलायितः; 'to fly at,' अभिपत्, आपत्, उपपत्, अभिद्रु, आद्रु, उपद्रु, अभिधाव्, आधाव्, प्रतिधाव्; 'to fly up,' उड्डी, उत्पत्, अधिरुह् (c. 1. -रोहति -रोढुं); 'to let fly,' मुच् (c. 6. मुञ्चति, मोक्तुं), सृज् (c. 6. सृजति, स्रष्टुं), पत् in caus. (पातयति -यितुं).

To FLY, *v. a.* (Avoid) वृज् (c. 10. वर्जयति -यितुं), विवृज्, त्यज् (c. 1. त्यजति, त्यक्तुं), परिहृ (c. 1. -हरति -हर्तुं).—(Cause to float in the air) आकाशे विसृप् in caus. (-सर्पयति -यितुं) or विसृ in caus. (-सारयति -यितुं).

FLY, *s.* (Insect) मक्षिका, मशकः, मक्षीका, माचिका, भम्भः, भम्भराली, बम्भराली.

FLY-BITTEN, *a.* मक्षिकादष्टः -ष्टा -ष्टं, मक्षिकादंशाङ्कितः -ता -तं.

To FLY-BLOW, *v. a.* मक्षिकावद् अण्डप्रसवेन खाद्यमांसं दुष् (c. 10. दूषयति -यितुं).

FLY-BOAT, *s.* प्रणालीप्लवनयोग्या लघुनौका, द्रुतगामिनी दीर्घनौका.

FLY-CATCHER, *s.* मक्षिकाखादकः पक्षिभेदः, मक्षिकाभुक् *m.* (ज्), मक्षिकानाशकः.

To FLY-FISH, *v. n.* मक्षिकां वडिशे निवेश्य मत्स्यान् ग्रह् (c. 9. गृह्णाति, गृहीतुं).

FLY-FLAP, *s.* मक्षिकानिवारणार्थं चामरं, अवचूलकं, रोमगुच्छः.

FLY-LEAF, *s.* मलपृष्ठं, पुस्तकस्य आद्यन्तयोः शून्यपत्रं.

FLYER, *s.* डीयमानः, खविसर्पी *m.* (न्), आकाशगामी. *See* FLIER.—(Wheel) तुलाचक्रं.

FLYING, *s.* (Act of) डीनं, डयनं, प्रडीनं, विसर्पणं, आकाशगमनं, पतनं; 'flying up and down,' डीनावडीनं.

FLYING, *part.* डीयमानः -ना -नं, खविसर्पी -र्पिणी -र्पि (न्), आकाशगतिः -तिः -ति, आकाशगामी -मिनी -मि (न्), आकाशयायी -यिनी -यि (न्), पतन् -तन्ती -तत् (त्), नभोगतिः -तिः -ति; 'flying up,' उड्डीयमानः -ना -नं.

FLYING-BRIDGE, *s.* नौसेतुः *m.*, चलसेतुः *m.*, जङ्गमसेतुः.

FLYING-FISH, *s.* आकाशगमनशीलो मत्स्यभेदः.

FOAL, *s.* अश्वशावः -वकः, किशोरः, घोटकवत्सः, बालः, बालघोटकः, अश्वरीषः.

To FOAL, *v. n.* किशोरं or अश्वशावकं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् (c. 10. जनयति -यितुं) or प्रजा (c. 4. -जायते -जनितुं).

FOAM, *s.* फेनः, मण्डः -ण्डं, पराग्रः, परग्रः, कारुजः, उत्पीडः, उत्सेकः, उत्सेचनं.

To FOAM, *v. n.* फेन (nom. फेनायते -यितुं), मण्ड (nom. मण्डायते -यितुं), उत्सेचनं कृ, उत्पीडं कृ, फेनम् उत्पद् in caus. (-पादयति -यितुं) or निर्गम् in caus. (-गमयति -यितुं).

FOAMING, *part.* फेनायमानः -ना -नं, उत्सेचनकारी -रिणी -रि (न्).

FOAMY, *a.* फेनलः -ला -लं, फेनिलः -ला -लं, फेनवान् -वती -वत् (त्), फेनी -निनी -नि (न्), फेनोत्पादकः -का -कं.

FOB, *s.* घटीकोषः, घटीपिधानं, क्षुद्रघटीधारकः, कटिवस्त्रपार्श्वे कालमापनयन्त्राधारः or -कोषः.

To FOB, *v. a.* छल् (c. 10. छलयति -यितुं), वञ्च् in caus. (वञ्चयते -यितुं), छद्म कृ.

FOCUS, *s.* अग्रांशुः *m.*, अग्रकरः, केन्द्रं, विन्दुः *m.*, अक्षः, तेजःसङ्कर्षदेशः, नाभिः *m. f.*

FODDER, *s.* पशुभोजनं, गवादनं, गवादिभोजनं, अश्वादनं, पशुखादनीयं शुष्कतृणादि, विधः -धा -धानं, विधिः *m.*

To FODDER, *v. a.* शुष्कतृणादि दा (c. 3. ददाति, दातुं) or भुज् (c. 10. भोजयति -यितुं).

FOE, *s.* शत्रुः *m.*, रिपुः *m.*, अरिः *m.*, अराति: *m.*, वैरी *m.* (न्), विपक्षः, अमित्रः, प्रतिपक्षः, विरोधी *m.* (न्), प्रतिद्वन्द्वः, सपत्नः, अपकारी *m.* (न्), अहितः.

FŒTAL, FŒTUS, FŒCES. *See* FETAL, &c.

FOG, *s.* (Mist) धूमिका, धूलिका, धूपिका, शीकरः, खवाष्पः, मृगतृष्णा -तृषा -ष्णिका, मृगतृट् *f.* (ष्), कूहा, कुहेडिका, कुज्झटिका, कुज्झटिः *f.* -टी-टिका, हिमज्झटिः *f.*, रुभेटिः *f.*, धूममहिषी.—(After grass) द्वितीयतृणं.

FOGGINESS, *s.* सधूमिकत्वं, धूमलता, सशीकरत्वं, कुज्झटिकावस्था, कुज्झटिकाकीर्णता, सान्धकारत्वं, शीकराकीर्णता.

FOGGY, *a.* सधूमिकः -का -कं, धूमिकावृतः -ता -तं, धूमलः -ला -लं, सशीकरः -रा -रं, शीकरीयः -या -यं, शीकरौघः -घा -घं, कुज्झटिकाच्छन्नः -न्ना -न्नं, सान्धकारः -रा -रं, सकुज्झटिकः -का -कं, अभियः -या -यं.—(Dull) स्थूलः -ला -लं.

FOH, *exclam.* धिक्, शानं, अपैहि, अपसर.

FOIBLE, *s.* छिद्रं, दोषः, कलङ्कः, अपराधः, वैकल्यं, हानिः *f.*, हीनता.

To FOIL, *v. a.* (Frustrate) प्रतिहन् (c. 2. -हन्ति -न्तुं), व्याहन्, परास् (c. 4. -अस्यति -असितुं), खण्ड् (c. 10. खण्डयति -यितुं), उद्यमभङ्गं कृ, विफलीकृ, वृथा कृ.—(Blunt) रुग्नीकृ, विरुग्नीकृ; 'one who foils one's designs,' कार्य्यहन्ता *m.* (तृ).

FOIL, *s.* (Defeat, frustration) प्रतिहतिः *f.*, खण्डनं, भङ्गः.—(Blunt sword) धाराहीनः खड्गः, क्रीडाखड्गः, युद्धक्रीडायां प्रयुक्तो लोहयष्टिः.—(Leaf of metal) धातुपत्रं; 'tin-foil,' त्रपुपत्रं.—(Foil of a jewel) रत्नप्रभावर्धकं, मणितेजोवर्धको धातुपत्रखण्डः.—(Any thing which sets off) प्रकाशकः -का -कं, कान्तिवर्धकः -का -कं, शोभकृत् *m. f. n.*

FOILED, *p. p.* प्रतिहतः -ता -तं, परास्तः -स्ता -स्तं, भग्नोद्यमः -मा -मं, विफलीकृतः -ता -तं, खण्डिताशंसः -सा -सं, अकृतार्थः -र्था -र्थं, हताशः -शा -शं, मनोहतः -ता -तं, विक्षिप्तः -प्ता -प्तं, विनिवृत्तकामः -मा -मं, तिरस्कृतः -ता -तं.

FOILER, *s.* कार्य्यहन्ता *m.* (तृ), उद्यमभङ्गकारी *m.* (न्), कर्म्मध्वंसकारी *m.*

FOIN, *s.* यष्टिक्रीडायां यष्ट्याघातः or यष्टिप्रहारः, खड्गाघातः.

To FOIN, *v. a.* यष्टिक्रीडायां यष्टिना प्रह् (c. 1. -हरति -हर्तुं) or आहन् (c. 2. -हन्ति -न्तुं).

To FOIST, *v. a.* छलेन or कपटेन निविश् in caus. (-वेशयति -यितुं) or अभिलिख् (c. 6. -लिखति -लेखितुं), मिथ्या कॢप् (c. 10. कल्पयति

Digitized by Google

-यितुं), कृत्रिमं -मां -मं कृ.

Foisted, *p. p.* छलेन निवेशितः -ता -तं or अभिलिखितः -ता -तं.

Foistiness, *s.* पर्य्युषितत्वं, विरसत्वं, ईषत्पूतत्वं, पूतिगन्धिता, कुरसवत्त्वं.

Fold, *s.* (For sheep or cattle) मेषस्थानं -नकं, व्रजः, व्रजाजिरं, मेषव्रजः, मेषशाला, गोष्ठं, गोस्थानकं.—(A double in cloth, &c.) पुटः, वस्त्रपुटः, ऊर्म्मिः *m. f.* -र्म्मिका -र्म्मी, भङ्गः, वस्त्रभङ्गः, तरङ्गः, व्यावर्त्तनं, वृणः. 'Fold,' in comp. is expressed by the affix धा; as, 'two-fold,' द्विधा, or by गुण; as, द्विगुणः -णा -णं.

To fold, *v. a.* (Double) पुटीकृ, पुट (nom. पुटयति -यितुं), द्विगुण (nom. द्विगुणयति -यितुं), द्विगुणीकृ, व्यावृत् (c. 10. -वर्त्तयति -यितुं) विपरिवृत्, व्यावर्त्तनं कृ, संवृ (c. 5. -वृणोति, c. 1. -वरति -रितुं -रीतुं), सम्पीड् (c. 10. -पीडयति -यितुं); 'fold the arms,' भुजौ सम्पीड्; 'in the arms,' भुजापीडं कृ.—(Confine sheep in a fold) मेषान् व्रजे निविश् in caus. (-वेशयति -यितुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

Folded, *p. p.* पुटितः -ता -तं, पुटीकृतः -ता -तं, द्विगुणितः -ता -तं, संवृतः -ता -तं, सम्पीडितः -ता -तं, व्यावर्त्तितः -ता -तं; 'folded or wrapped up,' वेष्टितः -ता -तं, वासनस्थः -स्था -स्थं; 'folded leaf,' दलकपाटः.

Folding, *s.* पुटीकरणं, व्यावर्त्तनं, संवृतिः *f.*; 'folding in the arms,' भुजापीडं कृ.

Folding-doors, *s.* द्विकपाटयुक्तं or द्विशाखायुक्तं द्वारं.

Foliage, *s.* पत्रं -त्राणि *n. pl.*, पर्णं, दलं, वृक्षपत्रं, तरुच्छदः, तरुजं.

To foliate, *v. a.* मुद्गराघातेन धातुं सूक्ष्मपत्राकारं कृ or धातुपत्रं कृ, उद्वर्त्तनं कृ.

Foliation, *s.* मुद्गराघातेन धातुपत्रकरणं, उद्वर्त्तनं.

Folio, *s.* पुस्तकपत्रं, महापत्रं, पृथुपत्रं, वृहत्पत्रं, विशालपत्रं, द्विपत्रं.

Folk, *s.* लोकः, जनः, मनुष्यजातिः *f.*, नृजातिः *f.*, प्रजा, जगती.

To follow, *v. a.* (Go after) अनुगम् (c. 1. -गच्छति -गन्तुं), अन्वागम्, पश्चाद् गम्, अनुया (c. 2. -याति -तुं), समनुया, अन्वि (c. 2. -एति -तुं), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), समनुवृत्, अनुसृ (c. 1. -सरति -सर्त्तुं), अनुव्रज् (c. 1. -व्रजति -जितुं), समनुव्रज्, अनुक्रम् (c. 1. -क्रामति -क्रमितुं), अनुचर् (c. 1. -चरति -रितुं), अन्वग्या, पुरस्कृ.—(Imitate) अनुकृ, अनुवृत्, अनुगम्.—(Observe, practise) अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, सेव् (c. 1. सेवते -वितुं), उपसेव्, निषेव्, समासेव्, आश्रि (c. 1. -श्रयति -यितुं), विधा (c. 3. -दधाति -धातुं).—(Adhere to, serve, honour) आश्रि, शु in des. (शुश्रूषते -षितुं), उपास् (c. 2. -आस्ते -आसितुं), भज् (c. 1. भजते, भक्तुं), परिचर्.—(Result from) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् in pass. (जायते), अनुवृत्, उद्भू, अनुभू.

Followed, *p. p.* अनुगतः -ता -तं, अनुयातः -ता -तं, अनुगम्यमानः -ना -नं, अन्वीयमानः -ना -नं.—(Observed) अनुष्ठितः -ता -तं, सेवितः -ता -तं, आश्रितः -ता -तं.

Follower, *s.* (One who goes after) अनुगामी *m.* (न्), पश्चाद्गामी, अनुगः -गतः, अनुयायी *m.* (न्), अनुवर्त्ती *m.* (न्), अनुचरः -चारी *m.* (न्), अनुगतिकः, अनुयात्रिकः, अभिसरः, पार्श्वपरिवर्त्ती *m.* (न्), पार्ष्णिग्राहः, उपधावनः.—(Adherent, disciple) अनुचक्री, भक्तः, आश्रितः, भात्तिकः, शिष्यः; 'follower of Krishna,' कृष्णाश्रितः.—(Attendant, defendant) परिजनः, अनुचरः, सेवकः, अनुजीवी *m.* (न्) -विकः, उपजीवी *m.*, परिवारः.—(Companion, associate) सहायः, सहचरः, सङ्गी *m.* (न्).

Following, *part.* (Going after) अनुगः -गा -गं, अनुयायी -यिनी -यि (न्), अनुसारी -रिणी -रि (न्), अनुवर्त्ती -र्त्तिनी -र्त्ति (न्), अनुपथः -था -थं, अन्वक्षः -क्षा -क्षं, अन्वङ् अनूची अन्वक् (च्), अनुपदं.—(Next after) परः -रा -रं.—(Succeeding) अनुयायी &c.

Following, *s.* (Act of) अनुगमः -मनं, अनुसरणं, अनुवर्त्तनं, अनुव्रजनं.

Folly, *s.* मूर्खता, मौर्ख्यं, मूढता -त्वं, मोहः, मौढ्यं, बुद्धिहीनता, निर्बुद्धिता, अज्ञता, अविज्ञता, अनभिज्ञता, अज्ञानं, ज्ञानाभावः, प्रज्ञाहीनता.

To foment, *v. a.* (Heat with warm lotions) स्विद् in caus. (स्वेदयति -यितुं), प्रस्विद्, घर्म्मोदकादिना or उष्णोदकादिना लिप् (c. 6. लिम्पति, लेप्तुं) or अनुलिप् or अभ्यञ्ज् (c. 7. अनक्ति, अंक्तुं) or दिह् (c. 2. देग्धि -ग्धुं) or सिच् (c. 6. सिञ्चति, सेक्तुं) or निषिच्.—(Encourage, excite) वृध् in caus. (वर्धयति -यितुं), संवृध् in caus., प्रवृत् in caus. (-वर्त्तयति -यितुं), तेजो दा, तेजोवृद्धिं कृ, उत्तिज् (c. 10. -तेजयति -यितुं), उत्तप् (c. 10. -तापयति -यितुं), उद्दीप् (c. 10. -दीपयति -यितुं); 'foment dissensions,' उपजप् (c. 1. -जपति -पितुं), कर्णे जप्, उपजापेन भेदं वृध् in caus.

Fomentation, *s.* (Act of heating with warm lotions, &c.) स्वेदनं, प्रस्वेदनं, घर्म्मोदकादिना विलेपनं or अनुलेपनं or सेचनं.—(The lotion itself) घर्म्मलेपः, घर्म्मानुलेपनं, उष्णोपदेहः.—(Encouragement) उद्दीपनं, उत्तेजनं, उत्तापः, संवर्धनं.

Fomented, *p. p.* स्वेदितः -ता -तं.—(Encouraged) उद्दीप्तः -प्ता -प्तं, संवर्धितः -ता -तं.

Fomenter, *s.* (Of dissension) उपजापकः, कर्णेजपः, भेदकरः, कलिकारकः.

Fond, *a.* (Loving) अनुरक्तः -क्ता -क्तं, अनुरागवान् -वती -वत् (त्), अनुरागी -गिणी -गि (न्), सानुरागः -गा -गं, स्नेही -हिनी -हि (न्), स्नेहितः -ता -तं, कामी -मिनी -मि (न्), प्रणयी -यिनी -यि (न्).—(Attached to, delighting in) आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, परः -रा -रं, तत्परः -रा -रं, रतः -ता -तं, सेवी -विनी -वि (न्), अभिलाषी -षिणी -षि (न्), आनन्दी -न्दिनी -न्दि (न्) -न्दितः -ता -तं, प्रमोदी -दिनी -दि (न्); 'fond of one's ease,' सुखाभिलाषी -षिणी -षि (न्); 'fond of embracing,' आलिङ्गनतत्परः -रा -रं; 'fond of noise,' ध्वनमोदी &c. Often expressed by प्रिय in comp.; as, 'fond of water,' जलप्रियः -या -यं, ; 'fond of mountains,' गिरिप्रियः -या -यं; 'fond of ornament,' प्रियमण्डनः -ना -नं; or by काम in comp.; as, 'fond of flesh,' मांसकामः -मा -मं; 'to be fond of,' अनुरागवान् -वती -वद् अस् or भू, सेव् (c. 1. सेवते -वितुं), अभिलष् (c. 1. -लषति -षितुं), रुच् (c. 1. रोचते -चितुं), with dat. of the person; अभिनन्द् (c. 1. -नन्दति -न्दितुं).—(Doting) अत्यनुरक्तः -क्ता -क्तं.—(Silly) मूढः -ढा -ढं, मुग्धः -ग्धा -ग्धं.

To fondle, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्, परिष्वञ्ज् (c. 1. -ष्वजते -ष्वंक्तुं), परिमृश् (c. 6. -मृशति -शितुं), लल् (c. 10. लालयति -यितुं), क्रोडीकृ, भुजापीडितं -तां -तं कृ, प्रेम कृ, अनुरागं कृ, अङ्कीकृ, अङ्के कृ, अङ्के पाल् (c. 10. पालयति -यितुं).

Fondled, *p. p.* लालितः -ता -तं, क्रोडीकृतः -ता -तं, भुजापीडितः -ता -तं.

Fondling, *s.* (Caressing) आलिङ्गनं, परिष्वङ्गः, लालनं, क्रोडीकरणं, अङ्कपाली -लिका -लिः *m.*, भुजापीडः.—(The person or thing fondled) प्रेमपात्रं, प्रेमभूमिः *f.*, अनुरागपात्रं.

Fondly, *adv.* सानुरागं, वात्सल्येन, अतिस्नेहेन, अतिप्रीतिपूर्व्वं.—(Foolishly) मूढवत्.

Fondness, *s.* स्नेहः, प्रीतिः *f.*, अनुरक्तिः *f.*, अनुरागः, प्रेम *n.* (न्), प्रियता, वात्सल्यं, वात्सलता, प्रणयः, अभिरुचिः *f.*, रुचिः *f.*, सन्तोषः.

Font, *s.* पूजाशालामध्ये जलसंस्कारकरणे प्रयुक्तः प्रस्तरमयो जलाधारः.—(Complete assortment of printing types of one size) समपरिमाणमुद्राक्षरपरिसंख्या.

Food, *s.* भोजनं, आहारः, भोज्यं, भक्ष्यं, खाद्यं, अन्नं, अद्यं, अदनं, खादनं,

Digitized by Google

आहार्य्यं, अभ्याहार्य्यं, आमिषं, जग्धिः *f.*, अशनं, भक्ष्यं, भक्तं, चाम्यं, जेमनं, जमनं, चनः *n.* (स्), घसिः *m.*, निघसः, विघसः, ग्रासः, घ्यानं, प्रत्यदनं, आशः, देहयात्रा, जीवनकः, शरीरयात्रा, न्यादः, लेपः, लेहः; 'choice food,' परमान्नं, उत्तमान्नं, भोजनविशेषः; 'bad food,' कदन्नं; 'food and raiment,' ग्रासाच्छादनं, अन्नाच्छादनं, अशनाच्छादनं or -ने n. du., अन्नवस्त्रं, कशिपूः m. du.; 'food of the gods,' अमृतं, पीयूषं, पेयूषं, सुधा, लेह्यं; 'to eat food,' आहारं कृ. Food is divided by the Hindús into five kinds, भक्ष्यं, भोज्यं, लेह्यं, चोष्यं, पेयं.

Fool, *s.* मूर्खः, मूढः, अज्ञः, निर्बुद्धिः *m.*, निर्बोधः, अबुद्धिः *m.* -द्धिमान् *m.* (त्), अबुधः, अप्राज्ञः, अविज्ञः, अविद्वान् *m.* (स्), प्रमूढः, प्रज्ञाहीनः, अज्ञानी *m.* (न्), जडः, जडमतिः *m.*, अल्पधीः *m.*, मन्दबुद्धिः *m.*, मन्दः, वङ्कैरः, कुण्डकः, लटः.—(Buffoon, jester) विदूषकः, नर्म्मसचिवः, भण्डः.

To Fool, *v. n.* खेला (nom. खेलायति), क्रुड् (c. 6. क्रुडति -डितुं), परिहासं कृ, लट् (c. 1. लटति -टितुं).

To Fool, *v. a.* मुह् (c. 10. मोहयति -यितुं), सम्मुह्, वञ्च् (c. 10. वञ्चयते -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), छल् (c. 10. छलयति -यितुं).

Foolery, *s.* मूर्खैकर्म्म *n.* (न्), मूर्खक्रिया, मूर्खता, बालकर्म्म *n.*, बालिश्यं.

Fool-hardiness, *s.* असमीक्ष्य साहसं, अविचारेण प्रगल्भता, अतिसाहसिकत्वं, जाल्मत्वं, अविमृश्यकारित्वं, अत्याहितं, दर्पः, प्रमत्तता.

Fool-hardy, *a.* असमीक्ष्य साहसी -सिनी -सि (न्), अविमृश्य प्रगल्भः -ल्भा -ल्भं, जाल्मः -ल्मा -ल्मं, प्रमत्तवीरः -रा -रं, प्रमत्तशूरः -रा -रं.

Foolish, *a.* मूर्खः -र्खा -र्खं, मूढः -ढा -ढं, अज्ञः -ज्ञा -ज्ञं, अनभिज्ञः -ज्ञा -ज्ञं, निर्बुद्धिः -द्धिः -द्धि, निर्बोधः -धा -धं, अबुद्धिमान् -मती -मत् (त्), अप्राज्ञः -ज्ञा -ज्ञं, अल्पबुद्धिः &c., दुर्बुद्धिः &c., अल्पधीः -धीः -धि, बुद्धिहीनः -ना -नं, प्रज्ञाहीनः -ना -नं, दुर्मेधाः -धाः -धः (स्), दुर्मतिः -तिः -ति, अज्ञानः -ना -नं -नी -निनी -नि (न्), अकोविदः -दा -दं, बालिशः -शा -शं, बालिशमतिः -तिः -ति, अल्पधीः -धीः -धि, वैधेयः -यी -यं, असङ्गतः -ता -तं.

Foolishly, *adv.* मूर्खवत्, मूढवत्, अज्ञवत्, अज्ञानात्, मौर्ख्यात्, अल्पबुद्धा.

Foolishness, *s.* मूर्खता, मौर्ख्यं, मूढता, मौढ्यं, अज्ञता, अनभिज्ञता, निर्बुद्धित्वं, मोहः, बुद्धिहीनता, अबोधता, अज्ञानं, ज्ञानाभावः, बालिशता, बालिश्यं.

Foolscap, *s.* मूर्खशिरोवेष्टनसंज्ञकः कार्पासविशेषः or पत्रविशेषः.

Foot, *s.* (Part of the body) पादः, पदं, चरणं -णः, अंहिः *m.*, अङ्घ्रिः *m.*, अधमाङ्गं, लम्बः; 'both feet,' पादौ du., चरणे du., चरणयुगं; 'point of the foot,' पादाग्रं, पदिकं; 'foot and knee,' पदष्टीवं.—(Bottom, base) तलं, अधोभागः, अधःस्थानं, मूलं, उपस्थः; 'foot of a tree,' तरुतलं, वृक्षतलं, वृक्षाङ्घ्रिः *m.*, पादः; 'foot of a mountain,' उपत्यका, शैलोपशल्यं, पर्व्वततलं, गिरिपादः, पर्व्वताधोभागः.—(Measure) मनुष्यपादपरिमाणं, सार्द्धचतुरङ्गुलिपरिमाणं; 'ornament for the feet,' नूपुरः, पादाङ्गदं, चरणाभरणं, पादकटकः, तुलाकोटिः *f.*, मञ्जीरं; 'water for ablution of the feet,' पाद्यं, पादोदकं; 'to go on foot,' पद्भ्यां or पादाभ्यां व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं); 'going on foot,' पादचारः; 'foot by foot,' पादशश्, पदे पदे, पच्छश्; 'at the foot,' पादतस्; 'to set on foot,' प्रवृत् (c. 10. -वर्त्तयति -यितुं); 'set on foot,' प्रवर्त्तितः -ता -तं, उपक्रान्तः -न्ता -न्तं.

To Foot, *v. a.* (Kick) पादेन प्रह (c. 1. -हरति -हर्त्तुं) or आहन् (c. 2. -हन्ति -न्तुं), पादाघातं कृ.—(Tread) क्रम् (c. 1. क्रामति, क्रमितुं), चरणपातं कृ.

To Foot it, *v. n.* नृत् (c. 4. नृत्यति, नर्त्तितुं), पादादि सञ्चल् in caus. (-चालयति -यितुं).

Foot-ball, *s.* चाताम्रातो गोवस्त्रिर् यः सङ्क्रीडमानजनपादाघातेन इतस्ततो विक्षिप्यते, पादाहतकन्दुकक्रीडा.

Foot-board, *s.* पादफलकं, चरणफलकं, पादकाष्ठं.

Foot-boy, *s.* बालसेवकः, युवसेवकः, बालभृत्यः, युवप्रेष्यः.

Foot-bridge, *s.* सङ्क्रमः, सङ्क्रामः, सङ्क्रमसेतुः *m.*, दुर्गसञ्चरः -सञ्चारः.

Footed, *p. p.* पादाहतः -ता -तं.—(Having feet) पादी -दिनी -दि (न्), पदी &c.

Foot-fall, *s.* पदपातः, पादपातः, चरणपातः, पदन्यासः, पदविष्टम्भः.—(Trip) स्खलनं.

Foot-fight, *s.* पादातियुद्धं, पदातियुद्धं, पदिकयुद्धं, पदगयुद्धं.

Foot-guard, *s.* पादातिकसैन्यः, पदातिकसैनिकः, पदगरक्षकः.

Footing, *s.* (Ground for the feet) पादन्यासस्थानं, पादनिक्षेपस्थानं, पदविष्टम्भस्थानं, पदं, स्थानं, भूमिः *f.*, स्थलं, आस्पदं, वर्त्म *n.* (न्), पदवी -विः *f.*. अयनं, सरणिः *f.*, वर्त्तनं; 'firm footing,' प्रतिष्ठानं; 'place with no firm footing,' अस्थानं.—(Basis, foundation) मूलं, उपष्टम्भः, तलं.—(Support) उपस्तम्भः, उपग्रः, आश्रयः, अवलम्बनं. (Condition, position) अवस्था, स्थितिः *f.*, भावः, संस्थानं, वृत्तिः *f.*

Footless, *a.* पादहीनः -ना -नं, निष्पादः -दा -दं, चरणहीनः -ना -नं.

Foot-licker, *s.* पादसेवकः, चरणसेवकः, पदानुरागः, पीठमर्द्दः.

Foot-man, *s.* (Foot-soldier) पदातिः *m.* -तिकः, पादातिः *m.* -तिकः, पादातः, पदातः, पादात्, पत्तिः *m.*, पदगः, पद्गः, पदिकः, पादचारः -री *m.* (न्), पादाविकः, पदाजिः *m.*—(Running footman) जाङ्घिकः.—(Servant) सेवकः, प्रेष्यः, कुलसेवकः, परिचरः, किङ्करः.

Foot-mark, *s.* पादचिह्नं, पदचिह्नं, पदाङ्कः, पदपंक्तिः *f.*, पादमुद्रा, चरणपदवी, पदवी, पदं; 'of a horse,' खुरपदवी.

Foot-pace, *s.* पदपातः, पादगतिः *f.*, पदक्रमः, चरणक्रमः,

Foot-pad, *s.* सारणिकाग्रः, पादविकाग्रः, परिपन्थी *m.* (न्), होडा *m.* (ड्).

Foot-pan, *s.* पाद्यपात्रं, पाद्यभाजनं, पाद्याधारः, पादोदकपात्रं.

Foot-path, *s.* पदविः *f.* -वी, पदगपथः, पदिकमार्गः, पादचारयोग्यः क्षुद्रपथः.

Foot-soldier, *s.* पदातिः *m.*, पत्तिः *m.*, पदातिकसैन्यः, पादातिकयोद्धा *m.* (ड्). *See* Foot-man.

Foot-stalk, *s.* प्रसवबन्धनं, वृन्तं, मञ्जरी.

Foot-step, *s.* (Mark of the foot) पादचिह्नं, पदाङ्कः, पदपंक्तिः *f.*, पादमुद्रा, चरणपदवी.—(Tread) पदपातः, पादपातः, पादन्यासः, चरणपातः, पदविक्षेपः, पदविष्टम्भः.—(Course, track) पदविः -वी *f.*, अनुपदं, पद्धतिः *f.*, पथः, मार्गः, अयनं, वर्त्म *n.* (न्).—(Token) चिह्नं, लक्षणं.

Foot-stool, *s.* पादपीठं, चरणपीठं, पादासनं, पादपः, पदासनं.

Fop, *s.* दर्शनीयमानी *m.* (न्), दम्भी *m.* (न्), गर्व्वी *m.* (न्), आत्माभिमानी, रूपगर्व्वितः, सुवेशमानी *m.*, सुवेशिनम्मन्यः, छेकः.

Foppery, *s.* सुवेशमानिता, रूपमानिता, मूर्खता, मूर्खकर्म्म *n.* (न्).

Foppish, *a.* दम्भी -म्भिनी -म्भि (न्), वेशाभिमानी -निनी -नि (न्).

Foppishness, *s.* वेशाभिमानता, दम्भः, दाम्भिकत्वं, रूपगर्व्वितत्वं.

For, *conj.* (Because) यतस्, यत्, येन, यस्मात्, हि, इति हेतोः, तदर्थं, अनेन हेतुना. *See* Because.—(For as much as) यतस्, यत्, or expressed by the abl. c. of the abst. noun; as, 'for as much as he was a good man,' सज्जनत्वात्.

For, *prep.* (In exchange for) प्रति with abl. c., विनिमयेन; 'he exchanges beans for sesamum seed,' तिलेभ्यः प्रति माषान् ददाति; or expressed by the inst. c., as, तिलैर् माषान् परिवर्त्तयति; 'in exchange for one's life,' स्वप्राणविनिमयेन.—(Instead of, in place of) स्थाने, प्रति.—(Toward) प्रति, उद्दिश्य with

Digitized by Google

acc. c.—(On account of, by reason of) अर्थं, अर्थे, हेतोः, हेतौ, कृते, निमित्ते, कारणात् all affixed to the crude; as, 'for this cause,' तदर्थं, or expressed by उद्दिश्य with acc. c., or by the abl. c.; as, 'for anger he did it,' कोपात् तत् कृतवान्; 'for want of money,' धनाभावात्.—(Conducive to) अर्थं, अर्थे, or expressed by the dat. c., as, 'for the good of the world,' भूतये भुवः; 'for one's own advantage,' आत्मविवृद्धये.—(For the sake of) अर्थं, अर्थे, हेतोः, कृते, or by dat. c., as, 'for the satisfying of hunger,' क्षुधाशान्तये; 'for thy enjoyment,' तव भोगाय.—(In order to obtain) अर्थं, अर्थे or by dat. c., as, 'for fame,' प्रतिपत्तये, or even by inst. c., as, 'for hire,' भाटकेन.—(In return for) प्रति, or more usually expressed by the indec. part.; as, 'for so doing,' तत् कृत्वा.—(During a certain time) यावत्, पर्य्यन्तं; 'for life,' पुरुषस्यायुर् यावत्, यावज्जीवं, जीवनपर्य्यन्तं, or by prefixing आ with abl. c., as, आमरणात्, आजीवनान्तात् (*i. e.* until death); 'lasting for life,' आमरणान्तिकः -का -कं; 'for three days,' दिनत्रयपर्य्यन्तं; 'for a hundred years,' वर्षशतं यावत्. Sometimes expressed by the acc. c., as, 'for one month,' एकं मासं; 'for two months,' द्वौ मासौ; 'for a hundred years,' वर्षशतं, or even by the instr. c., as, 'for twelve years,' द्वादशभिर् वर्षैर्; 'for a few days,' कतिपयदिवसैः; 'for a long time,' चिरकालं, अनेककालं, चिरात्, चिरेण, चिराय; 'food for a year,' वर्षोपभोग्यम् अन्नं.—(In proportion to, considering) अपेक्ष्य, उद्दिश्य, प्रतीक्ष्य, अवेक्ष्य, all with acc. c.—(On the part of) अपेक्ष्य, उद्दिश्य, कृते; 'as for me,' मामपेक्ष्य, मामुद्दिश्य, मत्कृते.—(On the side of) सपक्षः -क्षा -क्षं; 'he is for us,' अस्माकं सपक्षो भवति.—(Notwithstanding, for all that) तथापि.—(As if) वत् affixed, इव; 'he shewed himself for dead,' मृतवत् or मृतम् इव आत्मानम् अदर्शयत्.—(According to) यथा, अनुसारेण, अनुरूपेण; 'for one's ability,' यथाशक्ति. 'For,' may be expressed by the acc. c. in such phrases as 'looking for,' 'waiting for,' &c.; as, 'he looks for me,' माम् अपेक्षते, or by other cases; as, 'we depend on God for success,' ईश्वराधीना सिद्धिः; 'I have great affection for her,' तस्याम् अनुरागवान् अस्मि or तया सह महान् स्नेहः, or by गत, as, 'through love for him,' तद्गतेन अनुरागेण, or by the crude form, as, 'search for money,' धनान्वेषणं, or even by the affix सात्, as, 'he built a house for the Brahman,' गृहं चकार द्विजातिसात्.—(For the most part) प्रायेण, प्रायस्, प्रायशस्, भूयिष्ठं.

Forage, *s.* (Food for horses and cattle) अश्वादनं, गवादनं, अश्वादिभोजनं.—(Provisions) यात्रिकं, पाथेयं, खाद्यद्रव्यं, भोज्यं, भोजनसम्भारः.—(Search for food) खाद्यद्रव्यान्वेषणं; 'going to forage,' प्रसारः -रणं, प्रसरणं.

To forage, *v. n.* परिभ्रमणं कृत्वा खाद्यद्रव्याणि or अश्वादनम् अन्विष् (c. 4. -इष्यति -एषितुं), प्रसारं or अवस्कन्दं or उपद्रवं कृत्वा धान्यादिभोज्यम् अपहृ (c. 1. -हरति -हर्तुं).

Forager, *s.* भोजनार्थं परिभ्रमणकारी *m.* (न्) or अवस्कन्दकारी or प्रसारी *m.* (न्), युद्धसमये खाद्यद्रव्यान्वेषी *m.* (न्), or अश्वादिभोजनार्थं धान्यादिहारकः.

Foraging, *s.* भोजनान्वेषणार्थं परिभ्रमणं or प्रसारणं or प्रसरणं or अवस्कन्दः or उपद्रवः, युद्धसमये खाद्यद्रव्यान्वेषणं; 'foraging army,' प्रचक्रं.

Foray, *s.* उपद्रवः, अवस्कन्दः, विप्लवः, लोष्ट्रार्थम् उपप्लवः.

To forbear, *v. a.* and *n.* (Cease from) निवृत् (c. 1. -वर्त्तते -वर्त्तितुं), विरम् (c. 1. -रमति -रन्तुं).—(Delay, pause) विलम् (c. 1. -लम्बते -म्बितुं), विरम्, आक्रालान्तरात् त्यज् (c. 1. त्यजति, त्यक्तुं).—(Avoid) वृज् (c. 10. वर्जयति -यितुं), परिहृ (c. 1. -हरति -हर्तुं).—(Be patient) सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते -मितुं, क्षन्तुं).

Forbearance, *s.* (Cessation from, avoidance) निवृत्तिः *f.*, विनिवृत्तिः *f.*, सन्निवृत्तिः *f.*, विरतिः *f.*, विरामः, उपरतिः *f.*, वर्जनं, त्यागः, परिहारः.—(Patience) क्षमा, क्षान्तिः *f.*, तितिक्षा, सहनं, सहनशीलता, सहिष्णुता, मर्षः, परामर्षः, अपकारेऽपि चित्तस्याविकारः.—(Restraint) संयमः, यमः, यामः, संयामः, वियामः, वियमः, दमः.

Forbearing, *a.* सहनशीलः -ला -लं, सहिष्णुः -ष्णुः -ष्णु, तितिक्षुः -क्षुः -क्षु, क्षमी -मिणी -मि (न्), संयामवान् -वती -वत् (त्).

To forbid, *v. a.* (Prohibit) प्रतिषिध् (c. 1. -षेधति -षेद्धुं, c. 10. -षेधयति -यितुं), निषिध्, प्रत्याख्या (c. 2. -ख्याति -तुं), अनुःख्या, परिभाष् (c. 1. -भाषते -षितुं), मैवं कुरु or मैवं कार्षीर् इति आज्ञा in caus. (-ज्ञापयति -यितुं) or आदिश् (c. 6. -दिशति -देष्टुं).—(Prevent) वृ in caus. (वारयति -यितुं), निवृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं), बाध् (c. 1. बाधते -धितुं); 'heaven forbid!' इत्थं न भूयात्, एतादृशं न भवतु, शान्तं.

Forbiddance, *s.* निषेधः, प्रतिषेधः, प्रतिषेधोक्तिः *f.*, प्रत्याख्यानं, वारणं, निवारणं, निरोधः, बाधः, बाधकता.

Forbidden, *p. p.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, निवारितः -ता -तं.

Forbidding, *a.* बीभत्सजनकः -का -कं, घृणोत्पादकः -का -कं, अनिष्टः -ष्टा -ष्टं.

Force, *s.* (Strength) बलं, शक्तिः *f.*, सामर्थ्यं, समर्थता.—(Energy) might) तेजः *n.* (स्), वीर्य्यं, विक्रमः, पराक्रमः, ऊर्जः, शौर्य्यं.—(Violence) बलात्कारः, साहसं, प्रमाथः, प्रसभं.—(Momentum) वेगः, आपातः.—(Efficacy) प्रभावः, प्राबल्यं, गौरवं, सामर्थ्यं, प्रतापः.—(Validity) सिद्धिः *f.*, निष्पत्तिः *f.*; 'of force,' सिद्धः -द्धा -द्धं, निष्पन्नः -न्ना -न्नं; 'of no force,' असिद्धः -द्धा -द्धं, मोघः -घा -घं, निष्फलः -ला -लं; 'put in force,' प्रवर्त्तितः -ता -तं.—(Force of a word) शब्दशक्तिः *f.*, शब्दसामर्थ्यं -समर्थता, निरूढः, लक्षणं.—(Forces, troops) बलं, सैन्यं, सेना, सैन्याः *m. pl.*, अनीकं -कानि *n. pl.*, अनीकिनी, दलः; 'by force,' बलात्, बलेन, बलात्कारेण; 'taken by force,' बलाद्गृहीतः -ता -तं, कलहापहृतः -ता -तं.

To force, *v. a.* (Compel). Expressed by the causal form usually in conjunction with बलात् or बलेन or बलात्कारेण or यत्नेन; as, 'to force a man to do any thing,' बलेन पुरुषं किञ्चित् कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं); 'to force to give,' दा in caus. (दापयति -यितुं); 'to force to go,' बलेन गम् in caus. (गमयति -यितुं).—(Impel, drive) प्रेर् (c. 10. प्रेरयति -यितुं), कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्, प्रणुद् (c. 6. -नुदति -नोत्तुं).—(Use force) बलात्कारं कृ, साहसं कृ, विक्रमं कृ, यत्नं कृ, प्रतियत्नं कृ.—(Force a town, storm) दुर्गं लङ्घ् (c. 10. लङ्घयति -यितुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं) or बलेन प्रविश् (c. 6. -विशति -वेष्टुं).—(Violate) धृष् (c. 10. धर्षयति -यितुं), बलात्कारेण अभिगम् (c. 1. -गच्छति -गन्तुं).—(Cause to produce fruit prematurely) प्राक्पूर्णकालात् फलोत्पत्तिं जन् (c. 10. जनयति -यितुं).

Forced, *p. p.* (To do) बलात् कारितः -ता -तं.—(To pay) दापितः -ता -तं.—(Done by force) बलाकृतः -ता -तं, बलात्कारितः -ता -तं, यत्नकृतः -ता -तं, यत्नपूर्वः -र्वा -र्वं.—(Strained, unnatural, affected)

Digitized by Google

क्लिष्टः -ष्टा -ष्टं, प्रतियत्नपूर्वः -र्वा -र्वं, विलक्षः -क्षा -क्षं, कृत्रिमः -मा -मं; 'a forced idea,' क्लिष्टकल्पना; 'a forced smile,' वैलक्ष्यस्मितं.

FORCEDLY, *adv.* बलात्, यत्नपूर्वं, प्रतियत्नपूर्वं, वैलक्ष्येण, सवैलक्ष्यं.

FORCEFUL, *a.* बलवान् -वती -वत् (त्), शक्तः -क्ता -क्तं, साहसी -सिनी -सि (न्).

FORCELESS, *a.* निर्बलः -ला -लं, शक्तिहीनः -ना -नं, अशक्तः -क्ता -क्तं.

FORCE-MEAT, *s.* बुस्तं, निस्तनी, मिष्टान्नं, उपस्करः, व्यञ्जनं.

FORCEPS, *s.* सन्दंशः -शकं -शका, खड्गधारा, शल्योद्धरणयन्त्रं.

FORCIBLE, *a.* (Powerful) प्रबलः -ला -लं, बलवान् -वती -वत् (त्), शक्तिमान् -मती -मत् (त्), समर्थः -र्था -र्थं, तेजोवान् -वती -वत् (त्), —(Efficacious) सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, अमोघः -घा -घं, अव्यर्थः -र्था -र्थं.—(Impressive) निर्बन्धेन or दार्ढ्येन or गौरवेण or सगौरवम् उक्तः -क्ता -क्तं, तीक्ष्णः -क्ष्णा -क्ष्णं.—(Violent, done by force) साहसिकः -की -कं, बलेन कृतः -ता -तं; 'forcible entry,' बलप्रवेशः or बलात्प्रवेशः; 'forcible removal,' बलापकर्षः.

FORCIBLENESS, *s.* बलवत्त्वं, शक्तिमत्त्वं, प्राबल्यं, सामर्थ्यं, तैक्ष्ण्यं, गौरवं.

FORCIBLY, *adv.* बलात्, बलेन, बलात्कारेण, बलवत्, प्रसभं, प्रसह्य, अभिभूय, प्रमथ्य, बलापकर्षं, अवगृह्य.—(Impressively) निर्बन्धेन, दार्ढ्येन, गौरवेण, सगौरवं.

FORD, *s.* नदीतरस्थानं, नदीतरस्थलं, तरणस्थानं, उत्तरणस्थानं, ईषज्जलो नदीभागः, घट्टः.

To FORD, *v. a.* पद्भ्यां or पादाभ्यां or अश्वगजादिवाहनेन नदीम् ईषज्जलस्थाने तॄ (c. 1. तरति -रितुं -रीतुं) or नदीपारं तॄ.

FORDABLE, *a.* पद्भ्यां or पादाभ्यां or अश्वगजादिवाहनेन तार्य्यः -र्य्या -र्य्यं, सुतरः -रा -रं, पादस्पृश्यतलः -ला -लं, अल्पजलः -ला -लं.

FORDING, *s.* पद्भ्यां or पादाभ्यां or अश्वादिवाहनेन नदीतरणं or उत्तरणं.

FORE, *a.* पूर्वः -र्वा -र्वं, अग्रः -ग्रा -ग्रं, पूर्ववर्त्ती -र्त्तिनी -र्त्ति (न्), अग्रगामी -मिनी -मि (न्), पूर्वगतः -ता -तं; 'fore-part,' अग्रभागः, अग्रांशः; 'fore part of the thigh,' अग्रजङ्घा.

FORE, *adv.* पूर्वं, पूर्वे, अग्रे, अग्रतस्, पूर्वतस्, प्राक्; 'fore and aft,' नावोऽग्रभागात्प्रभृति पश्चिमभागपर्य्यन्तं.

To FORE-ADMONISH, *v. a.* अग्रे प्रबुध् (c. 10. -बोधयति -यितुं) or उपदिश् (c. 6. -दिशति -देष्टुं).

FORE-ARM, *s.* प्रकोष्ठः, प्रवेष्टः, कलाचिका, अग्रबाहुः *m.*, अग्रभुजः.

To FORE-ARM, *v. a.* अग्रे or पूर्वं सन्नह् (c. 4. -नह्यति -नद्धुं) or युद्धार्थं सज्जीकृ.

To FORE-BODE, *v. a.* अनिष्टघटनां पूर्वं सूच् (c. 10. सूचयति -यितुं) or अग्रे ज्ञा (c. 9. जानाति, ज्ञातुं) or प्रदृश् (c. 1. -पश्यति -द्रष्टुं), पूर्वलक्षणं दा, पूर्वचिह्नं दा, पूर्वलक्षणेन अनिष्टम् अनुमा (c. 2. -माति -तुं) or अवगम् (c. 1. -गच्छति -गन्तुं).

FOREBODER, *s.* अनिष्टसूचकः, अनिष्टप्रदर्शकः, पूर्वलक्षणज्ञः, पूर्वलिङ्गज्ञः, अग्रसूचकः.

FOREBODING, *s.* अनिष्टसूचनं -ना, अनिष्टप्रदर्शनं, पूर्वलक्षणाद् अनिष्टानुमानं.

To FORECAST, *v. a.* and *n.* अग्रे or पूर्वं चिन्त् (c. 10. चिन्तयति -यितुं) or प्रचिन्त् or निरूप् (c. 10. -रूपयति -यितुं) or उपायम् अनुसन्धा, (c. 3. -दधाति -धातुं), अग्रविवेचनां कृ, अग्रकल्पनां कृ.

FORECAST, *s.* अग्रचिन्तनं, अग्रनिरूपणं, पूर्वविवेचनं, पूर्वकल्पना, दीर्घदृष्टिः *f.*

FORECASTLE, *s.* नावः पूर्वभागः or अग्रभागः, अग्रकूपकपुरतो नौभागः.

To FORECLOSE, *v.* प्रतिबन्ध् (c. 9. -बध्नाति -बन्धुं), प्रतिषिध् (c. 1. -षेधति -षेद्धुं).—(Foreclose a mortgage) न्यासकारिणं ऋणमोक्षणक्षमताम् अपनी (c. 1. -नयति -नेतुं).

FORECLOSURE, *s.* प्रतिबन्धनं, प्रतिषेधः, अवरोधनं, ऋणमोक्षणक्षमताहरणं.

FORE-DECK, *s.* नौकापृष्ठस्य पूर्वभागः or अग्रभागः, पूर्वपृष्ठं, अग्रपृष्ठं.

To FORE-DETERMINE, *v. a.* अग्रे निश्चि (c. 5. -चिनोति -चेतुं) or निर्णी (c. 1. -णयति -णेतुं).

FORE-DETERMINED, *p. p.* पूर्वनिश्चितः -ता -तं, पूर्वनिर्णीतः -ता -तं, अग्रविचारितः -ता -तं.

To FOREDOOM, *v. a.* अग्रे or पूर्वं निर्दिश् (c. 6. -दिशति -देष्टुं) or प्रकॢप् (c. 10. -कल्पयति -यितुं) or विचर् in caus. (-चारयति -यितुं).

FOREFATHERS, *s. pl.* पूर्वाः *m. pl.*, पूर्वपुरुषाः *m. pl.*, पूर्वजाः *m. pl.*, पितृलोकः, पितरः *m. pl.*, पितृपितामहादि *n.*, वृद्धाः *m. pl.*; 'practice of forefathers,' वृद्धाचारः.

To FOREFEND, *v. a.* निवॄ (c. 10. -वारयति -यितुं), प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिकॄ.

FOREFINGER, *s.* प्रदेशिनी, प्रदेशनी, देशिनी, देशी *m.* (न्), तर्ज्जनी, तरिता.

FOREFOOT, *s.* अश्वादिचतुष्पदजन्तूनां पूर्वपादः or सम्मुखीनपादः.

To FOREGO, *v. a.* अवसृज् (c. 6. -सृजति -सष्टुं), उत्सृज्, त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, हा (c. 3. जहाति, हातुं), उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्.

FOREGONE, *s.* त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, अवसृष्टः -ष्टा -ष्टं.

FOREGROUND, *s.* चित्रगतभूमेर् अग्रभागः or पूर्वभागः.

FOREHEAD, *s.* ललाटं, अलिकं, अलीकं, भालं, गोधिः *m.*, मुखः -खं, ललाटतटं, ललाटपट्टं, लकं, निटलं, गण्डशैलः, महाशङ्खः; 'having a high forehead,' उच्चललाटः -टा -टं; 'the open forehead,' ललाटफलकं.

FOREIGN, *a.* विदेशीयः -या -यं, वैदेशिकः -की -कं, विदेशी -शिनी -शि (न्), पारदेशिकः -की -कं, परदेशी -शिनी -शि (न्), विदेशजः -जा -जं, अन्यदेशीयः -या -यं, अन्यदेशजः -जा -जं, अन्यदेशोद्भवः -वा -वं, भिन्नदेशीयः -या -यं; 'a foreign country,' विदेशः, बहिर्देशः, देशान्तरं, अन्यदेशः.—(Extraneous) बहिर्भवः -वा -वं, बहिर्भूतः -ता -तं, बहिःस्थः -स्था -स्थं, बाह्यः -ह्या -ह्यं.—(Not pertaining) असम्बन्धी -न्धिनी -न्धि (न्), अनन्वितः -ता -तं, असम्पर्कीयः -या -यं.

FOREIGNER, *s.* विदेशी *m.* (न्), विदेशीयः, वैदेशिकः, परदेशी *m.* (न्), पारदेशिकः, पारदेश्यः, भिन्नदेशीयः, बहिर्देशजः, विदेशादागतः, देशान्तरादागतः, बहिर्देशोद्भवः, वैदेश्यः.

FOREIGNNESS, *s.* बाह्यत्वं, बहिर्भूतत्वं, दूरत्वं, असम्बन्धः, असम्पर्कः.

To FORE-IMAGINE, *v. a.* अग्रे मन् (c. 4. मन्यते, मन्तुं) or चिन्त् (c. 10. चिन्तयति -यितुं).

To FORE-JUDGE, *v. a.* अग्रे or पूर्वं विचर् (c. 10. -चारयति -यितुं) or निर्णी (c. 1. -णयति -णेतुं).

To FORE-KNOW, *v. a.* अग्रे or पूर्वं ज्ञा (c. 9. जानाति, ज्ञातुं) or विद् (c. 2. वेत्ति, वेदितुं) or निरूप् (c. 10. -रूपयति -यितुं) or बुध् (c. 4. बुध्यते, बोद्धुं), भविष्यद् ज्ञा, प्रवेद् (c. 1. -ईक्षते -क्षितुं), प्रदृश् (c. 1. -पश्यति -द्रष्टुं), पूर्वं लक्ष्यीकृ.

FOREKNOWLEDGE, *s.* अग्रज्ञानं, पूर्वज्ञानं, अग्रनिरूपणं, भविष्यज्ज्ञानं, भाविज्ञानं, प्रवेक्षणं, प्रदर्शनं, पूर्वलक्ष्यं, अग्रदृष्टिः *f.*, पूर्वदृष्टिः *f.*

FOREKNOWN, *p. p.* पूर्वज्ञातः -ता -तं, अग्रज्ञातः -ता -तं, अग्रनिरूपितः -ता -तं.

FORELAND, *s.* अन्तरीपः -पं, समुद्रमध्ये महाद्वीपबहिःस्थो भूमिभागः, उदग्रभूमिः *f.*, उदग्रभूः *f.*, उदग्रस्थलं, महाद्वीपनासिका, समुद्रनासिका.

FORELOCK, *s.* ललाटरुहः -हं, ललाटजः -जं, केशपाशी, ललाटकेशः, मस्तकाग्रकेशः, मस्तकाग्ररुहः केशपाशः or केशपक्षः.

FOREMAN, *s.* (Of a jury) द्वादशप्रमाणपुरुषप्रग्रहः, द्वादशमध्यस्थपुरुषमुखं, प्रधानमध्यस्थः, मुख्यप्रमाणपुरुषः.—(Superintendant) कार्य्याधिष्ठाता *m.* (तृ), अधिकर्म्मिकः, कार्य्याधीशः, कार्य्याध्यक्षः, कार्य्याधिकृतः, श्रेष्ठी *m.* (न्), कर्म्मे कुशलताम् अधिष्ठाता *m.*

Digitized by Google

FOREMAST, *s.* नौकाग्रस्थः कूपकः, नौकाग्रभागे गुणवृक्षकः, अग्रकूपकः.

FORE-MENTIONED, *a.* पूर्वोक्तः -क्ता -क्तं, पूर्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

FOREMOST, *a.* अग्रः -ग्रा -ग्रं, मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्र्यः -ग्र्या -ग्र्यं, अग्रीयः -या -यं, प्राग्र्यः -ग्र्या -ग्र्यं, प्रधानः -ना -नं, प्रथमः -मा -मं, उत्तमः -मा -मं, उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, सर्वश्रेष्ठः -ष्ठा -ष्ठं, सर्वाग्रस्थः -स्था -स्थं; 'first in rank,' प्रथमपदस्थः -स्था -स्थं.

FORENAMED, *a.* पूर्वोक्तः -क्ता -क्तं, पूर्वाभिहितः -ता -तं, पूर्वोदाहृतः -ता -तं.

FORENOON, *s.* पूर्वाह्णः, प्राह्णः, पूर्वाह्णकालः; 'in the forenoon,' प्राह्णे, पूर्वाह्णे, प्राह्णेतनां; 'relating to it,' प्राह्णेतनः-नी-नं, पूर्वाह्णेतनः-नी-नं.

FORENSIC, *a.* व्यावहारिकः-की-कं or व्यवहारिकः, व्यवहारी -रिणी-रि(न्), विचारसभासु व्यवहारितः -ता -तं, विचारस्थानसम्बन्धीयः -या -यं.

To FORE-ORDAIN, *v. a.* अग्रे or पूर्वं निरूप् (c. 10. -रूपयति -यितुं) or प्रकॢप् (c. 10. -कल्पयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं) or नियुज् (c. 7. -युनक्ति -योक्तुं) or विधा (c. 3. -दधाति -धातुं).

FORE-ORDAINED, *p. p.* अग्रनिरूपितः -ता -तं, पूर्वनिर्दिष्टः -ष्टा -ष्टं, पूर्वप्रकल्पितः -ता -तं.

FOREPART, *s.* अग्रभागः, पूर्वभागः, आदिभागः, प्रथमभागः, सम्मुखभागः.

FORERANK, *s.* अग्रपदं, प्रथमपदं, प्रधानपदं, मुख्यपदं, श्रेष्ठपदवि: *f.*

To FORE-RUN, *v. a.* अग्रे or अग्रतः or पुरः or प्राक् सृ (c. 1. सरति, सर्तुं) or गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं).

FORE-RUNNER, *s.* अग्रेसरः, अग्रसरः, अग्रगः-गामी *m.* (न्), पुरोगः-गामी *m.*, प्राग्गामी *m.*, अग्रवर्त्ती *m.* (न्), अग्रगतः, पूर्वपुरुषः.

FORESAID, *p. p.* पूर्वोक्तः -क्ता -क्तं, पूर्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

FORESAIL, *s.* नौकाग्रस्थकूपकालम्बितं वायुवसनं or वातवसनं.

To FORESAY, *v. a.* अग्रे or पूर्वं वद् (c. 1. वदति -दितुं) or प्रवद्, भविष्यद् वद्.

GALLOWS, *s.* उद्बन्धनकाष्ठं, उद्बन्धनवृक्षः, वधस्थानं, घातस्थानं.

GALOCHE, GALOSHE, *s.* काष्ठपादुका, उत्तरपादुका, उपपादुका.

GALVANIC, *a.* वक्ष्यमाणवैद्युतशक्तिसम्बन्धी -न्धिनी -न्धि (न्).

GALVANISM, *s.* गल्वाणिनाम्ना विदेशीयविदुषा परिकल्पिता विद्युतीयशक्तिः or वैद्युतशक्तिः or आकर्षकशक्तिः, विद्युद्विद्याङ्गं.

GALVANIST, *s.* पूर्व्वोक्तविद्युद्विद्याशास्त्रज्ञः.

To GALVANIZE, *v. a.* पूर्व्वोक्तविद्युतीयशक्त्या आकृष् (c. 1. -कर्षति -क्रष्टुं) or उपहन् (c. 2. -हन्ति -न्तुं).

GALVANIZED, *p. p.* पूर्व्वोक्तवैद्युतशक्त्युपहतः -ता -तं.

To GAMBLE, *v. n.* (With dice, &c.) अक्षैः or अक्षान् दिव् (c. 4. दीव्यति -ते, देवितुं) or प्रदिव् or प्रतिदिव्, अक्षैः क्रीड् (c. 1. क्रीडति -डितुं), अक्षादिक्रीडां कृ, द्यूतक्रीडां कृ, अक्षद्यूतं कृ.

GAMBLER, *s.* द्यूतकरः -कारः, अक्षद्यूतः, अक्षद्यूः *m.*, अक्षदेवी *m.* (न्), अक्षधूर्त्तः, धूर्त्तः, कितवः, द्यूतक्रीडकः, आक्षिकः. *See* GAMESTER.

GAMBLING, *s.* अक्षद्यूतं, द्यूतं, द्यूतक्रीडा, अक्षादिक्रीडा, देवनं, अक्षवती, द्यूतसेवा, कैतवं, ग्रहः, पणः, दुरोदरं.

GAMBOGE, *s.* पीतवर्णः पूर्व्वदेशीयवृक्षनिर्यासः.

To GAMBOL, *v. n.* (Frolic) क्रीड् (c. 1. क्रीडति -डितुं), विक्रीड्, परिक्रीड्, दिव् (c. 4. दीव्यति -ते, देवितुं), चित्तप्रहर्षाद् इतस्ततः प्लु (c. 1. प्लवते, प्लोतुं) or नृत् (c. 4. नृत्यति, नर्त्तितुं), खेला (nom. खेलायति -यितुं), कुमार (nom. कुमारयति -यितुं).

GAMBOL, *s.* क्रीडा -डनं, देवनं, खेला, केलिः *m. f.*, लीला, नृत्यं, लास्यं.

GAMBOLING, *part.* क्रीडन् -डन्ती -डत् (त्), क्रीडमानः -ना -नं, दीव्यन्, व्यती -व्यत् (त्).

GAME, *s.* (Sport) क्रीडा, खेला, केलिः *m. f.*, लीला, नर्म्म *n.* (न्), परीहासः, कूर्दनं, विलासः.—(Game of play) रासः, रासेरसः.—(Wild animals) जाङ्गलं, जङ्गलपक्ष्यादि, वन्यपश्वादि, आरण्यपशुपक्ष्यादि.—(The chase) मृगव्यं, मृगया.—(Scheme) सङ्कल्पः, निश्चितं, व्यवसितं, व्यवसायः, कल्पना.

To GAME, *v. n.* क्रीड् (c. 1. क्रीडति -डितुं), दिव् (c. 4. दीव्यति -ते, देवितुं).—(With dice, &c.) अक्षैः क्रीड् or दिव् द्यूतक्रीडां कृ.

GAME-COCK, *s.* चरणायुधः, नखायुधः, युद्धे शिक्षितः कृकवाकुः.

GAMEKEEPER, *s.* वन्यपक्षिरक्षकः, जाङ्गलपक्षिप्रतिपालकः, वन्यजन्तुपोषकः.

GAME-LEG, *s.* खञ्जजङ्घा, पङ्गुजङ्घा, गतिविकलः पादः, पङ्गुपादः.

GAMESOME, *a.* क्रीडापरः -रा -रं, क्रीडावान् -वती -वत् (त्), लीलावान् &c., खेलापरः -रा -रं, विलासी -सिनी -सि (न्), केलिकः -का -कं.

GAMESOMENESS, *s.* क्रीडापरत्वं, खेलापरत्वं, सविलासता, लीलावत्त्वं, उल्लसता.

GAMESTER, *s.* द्यूतकरः -कारः, द्यूतकृत् *m.*, अक्षदेवी *m.* (न्), अक्षद्यूतः, अक्षद्यूः *m.*, अक्षधूर्त्तः, द्यूतवृत्तिः *m.*, द्यूतसेवी *m.* (न्), द्यूतप्रसक्तः, अक्षक्रीडकः, धूर्त्तः, कितवः, अक्षादिसेवी *m.*, दुरोदरः, कृष्णकोहलः.

GAMING, *s.* अक्षद्यूतं, द्यूतं-तः, द्यूतकर्म्म *n.* (न्), द्यूतक्रीडा, द्यूतसेवा, अक्षादिक्रीडा, अक्षवती, देवनं, कैतवं, ग्रहः, पणः, दुरोदरं.

GAMING-HOUSE, *s.* द्यूतसभा, द्यूतस्थानं, द्यूतशाला, द्यूतगृहं; 'keeper of one,' द्यूतसभाधिकारी *m.* (न्), सभिकः, द्यूताधिकारी *m.*, द्यूतकारः -रकः, द्यूतवृत्तिः *m.*

GAMMON, *s.* (Dried hog's flesh) वह्लूरं, शूकरस्य शुष्कमांसं or वासितमांसं.—(Game) चर्म्मपट्टिकाक्रीडा, शारिक्रीडा.—(Imposition, hoax) छलं, वञ्चनं, कपटः, दम्भः.

To GAMMON, *v. a.* शूकरमांसं शुष्कीकृ or लवणीकृ, वह्लूरं कृ.—(Hoax) प्रलभ् (c. 1. -लभते -लब्धुं), अभिसन्धा (c. 3. -दधाति -धातुं), वञ्च् (c. 10. वञ्चयति -यितुं).

GAMUT, *s.* (Musical scale) ग्रामः. The seven musical notes of the Hindú gamut are called निषादः, ऋषभः, गान्धारः, षड्जः, मध्यमः, धैवतः, पञ्चमः.

GANDER, *s.* वरटः, हंसः, राजहंसः, कलहंसः, चक्रः, चक्रवाकः, चक्राङ्गः.

GANDHARBA, *s.* (A celestial musician. These are demigods who inhabit heaven, and form the orchestra at the banquets of the gods) गन्धर्व्वः, हाहाः(स्), हुहुः *m.*, हूहूः *m.*, हहाः *m.*

GANESHA, *s.* (Son of Siva and Párvatí, the god of wisdom, and remover of difficulties and obstacles, addressed at the commencement of all undertakings, and at the opening of all compositions. He is called 'Ganesha,' as presiding over the troop of deities attendant on Siva) गणेशः, गणनाथः, गणाधिपः, गणनायकः, गणपतिः *m.*, गणाग्रणीः *m.*,

Digitized by Google

गणः, हेमाङ्गः, हेरम्बः, हस्तिमल्लः,—(As remover of obstacles) विघ्नेशः, विघ्नराजः, विघ्ननाशकः -शनः, विघ्नविनायकः, विनायकः, विघ्नहारी *m.* (न्).—(Elephant-faced) गजाननः, गजवदनः, गजास्यः.—(Elephant-toothed) गजदन्तः.—(One-toothed) एकदन्तः.—(Big-bellied) लम्बोदरः.—(Two-bodied) द्विदेहः.—(Having two mothers) द्वैमातुरः.

GANG, *s.* (Company of persons) गणः, जनसमूहः, जनसंसर्गः, जननिवहः, सङ्घः, सङ्गः; 'of thieves,' चौरगणः.

GANG-BOARD, *s.* नौकारोहणावरोहणार्थं दीर्घकाष्ठफलकं.

GANG-DAYS, *s.* भ्रमणदिवसाः *m. pl.*, परिक्रमदिवसाः, पर्य्यटनकालः.

GANGES, *s.* (The River) गङ्गा, गङ्गाका, गङ्गिका. The name Gangá is derived from the root *gam*, 'to go,' *i. e.* 'that which goes or flows on the earth,' whence also the name भवायना, 'going in the world.' (Daughter of Jahnu. The Ganges in its course from heaven disturbed the devotions of this saint, upon which he drank up its waters, but released them again at the intercession of the sage Bhagíratha. Hence the following names) जाह्नवी, जह्नुतनया, जह्नुसुता, भागीरथी, (Crest of Siva. The Ganges, in its descent from heaven, alighted on the head of Siva, where it wandered for a time in the tresses of his hair) हरशेखरा. (River of heaven) स्वर्णदी, सुरनदी, सुरनिम्नगा, खरापगा, स्वर्गङ्गा, खवापी, खापगा, सिद्धापगा.—(Flowing in heaven, earth, and hell) त्रिपथगा, त्रिस्रोताः *f.* (स्).—(Flowing from the foot of Vishnu) विष्णुपदी.—(Mother of Bhíshma) भीष्मसूः *f.*—(The very auspicious one) महाभद्रा.

GANGLION, *s.* स्नायुस्फोटः -टकः, शिरास्फोटकः, नाडीविस्फोटः.

GANGRENE, *s.* कोथः, पूतिमांसं, विदृधिः *m.*, क्षतं, नालीव्रणः, मांसपाकः, रक्तविदृधिः *m.*, मांसपूतिः, शरीरस्य परभागे स्वस्थे सति एकभागस्य पूतीभावः.

To GANGRENE, *v. n.* मांसैकदेशे पूतीभू, पूतमांसीभू, कोथीभू.

GANGRENOUS, *a.* कोथवान् -वती -वत् (त्), कोथीयः -या -यं, पूतिमांसवान् &c.

GANGWAY, *s.* नौकायां गमनागमनपथः or आरोहणावरोहणपथः.

GANTLET, GANTLOPE, *s.* सेनायां दण्डार्हस्य दण्डविशेषः; 'to run the gantlet,' महापातकिवत् सैन्यानां यष्टिपाणीनां द्विपंक्तिमध्ये धाव् (c. 1. धावति -ते -वितुं) यावद् एकैकेन यष्ट्याघातः क्रियते.

GAOL, *s.* कारा, कारागारं, कारावेश्म *n.* (न्), बन्धनागारं, बन्धनालयः, बन्धनगृहं, बन्धनस्थानं, गुप्तिः *f.*

To GAOL, *v. a.* कारायां बन्ध् (c. 9. बध्नाति, बन्धुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

GAOL-DELIVERY, *s.* काराशुद्धिः *f.*, कारागारशोधनं, बन्धनागारविशोधनं.

GAOLER, *s.* कारागाराध्यक्षः, कारारक्षकः, बन्धनालयरक्षकः.

GAP, *s.* (In a wall) सन्धिः *m.*, गृहरन्ध्रं, सुरङ्गा, कुड्यच्छेदः.—(Breach, chasm) भङ्गः, भेदः, छेदः, रन्ध्रं, छिद्रं, विवरं, विच्छेदः, गर्त्तः, खड्डः -डनं.

To GAPE, *v. n.* जृम्भ् (c. 1. जृम्भते -म्भितुं), विजृम्भ्, प्रजृम्भ्, जभ् or जम्भ् (c. 1. जभते, जम्भते -म्भितुं), मुखं व्यादा (c. 3. -ददाति -दातुं) or विस्तृ in caus. (-स्तारयति -यितुं), जृम्भं कृ, ग्लै (c. 1. ग्लायति, ग्लातुं).—(Open in fissures) स्फुट् (c. 6. स्फुटति -टितुं), विदल् (c. 1. -दलति -लितुं), विदृ in pass. (-दीर्य्यते).

GAPER, *s.* जृम्भी *m.* (न्), जृम्भकः, जृम्भणकारी *m.* (न्), मुखव्यादानकारी.

GAPING, GAPE, *s.* जृम्भः -म्भा -म्भणं -म्भिका, जृम्भितं, विजृम्भितं, विजृम्भणं, हम्मे *n.* (न्), हाफिका, उपपुष्पिका.—(Opening the mouth) मुखव्यादानं, मुखविवृतिः *f.*

GAPING, *part.* जृम्भः -म्भा -म्भं, जृम्भमाणः -णा -णं, जृम्भी -म्भिणी -म्भि (न्), जृम्भावान् -वती -वत् (त्), जृम्भितः -ता -तं, विजृम्भितः -ता -तं, व्याक्तमुखः -खा -खं, विवृतमुखः -खा -खं.

GAP-TOOTHED, *a.* विरलदन्ती -न्तिनी -न्ति (न्), विच्छिन्नदन्ती &c.

GARB, *s.* वेशः, वेषः, वासः *n.* (स्), परिधानं, परिच्छदः, अक्षरं, वस्त्रं, वसनं, आच्छादनं, सज्जा, प्रसाधनं.

GARBAGE, *s.* उच्छिष्टं, उच्छिष्टान्नं, शेषान्नं, पशोर् अन्त्रादि, मलं.

To GARBLE, *v. a.* (Pick out the best parts of a book to serve a purpose) छलार्थं or वञ्चनार्थं ग्रन्थस्य उत्तमवचनानि or उत्तमदेशान् उद्धृ (c. 1. -हरति -हर्त्तुं) or समुद्धृ or ग्रन्थचूर्णिं कृ, ग्रन्थं खण्ड् (c. 10. खण्डयति -यितुं).—(Pervert) साचीकृ, वक्रीकृ, विकृ, विकलीकृ.

GARBLED, *p. p.* साचीकृतः -ता -तं, छलेन विकलीकृतः -ता -तं or खण्डितः -ता -तं.

GARBOIL, *s.* कोलाहलः, तुमुलं, हलहलाशब्दः, हाहाकारः.

GARDEN, *s.* उद्यानं, आरामः, उपवनं, पुष्पवाटी -टिका, पुष्पवनं, वाटिका, वृक्षवाटिका, कुसुमाकरः, वेलं, तेवनं, पुष्पफलोपचयहेतुर् भूभागः; 'pleasure-garden,' क्रीडार्थो भूमिः, क्रीडावाटिका, क्रीडावनं; 'garden near a house,' गृहवाटिका, गृहारामः; 'kitchen-garden,' शाकशाकटं, शाकशाकिनं, शाकवाटिका.

To GARDEN, *v. n.* उद्यानं कृ, पुष्पफलोत्पत्तियोग्यं भूमिभागं कृष् (c. 6. कृषति, क्रष्टुं), उद्यानकर्षणं कृ.

GARDENER, *s.* उद्यानपालः -लकः, उद्यानरक्षकः, उद्यानसेवकः, मालिकः, माली *m.* (न्).

GARDENING, *s.* उद्यानकरणं, उद्यानकर्षणं, उद्यानसेवनं, पुष्पफलोत्पत्तिकर्म्म *n.* (न्).

GARDEN-PLOT, *s.* पुष्पफलोत्पत्तियोग्यो भूमिभागः, पुष्पस्थलं, स्थलं -ला.

GARDEN-STUFF, *s.* उद्यानजं, उद्यानोद्भिद् *m. f. n.*, उद्यानजं शाकादि.

GARDEN-WALL, *s.* उद्यानपरिसरः, वाटिकापरिसरः, उद्यानप्राकारः.

GARGARISM, *s.* आचाम्यं, आचमनीयं, कवलः, मुखमार्जनजलं.

To GARGARIZE, *v. a.* आचम् (c. 1. -चामति -चमितुं), जलम् उपस्पृश् (c. 6. -स्पृशति -स्प्रष्टुं).

GARGLE, *s.* आचाम्यं, आचमनीयं, कवलः, मुखधावनार्थं जलादि.

To GARGLE, *v. a.* जलम् आचम् (c. 1. -चामति -चमितुं) or उपस्पृश् (c. 6. -स्पृशति -स्प्रष्टुं), आचमनं कृ, उपस्पर्शं कृ, जलोपस्पर्शं कृ, जलादिना मुखं मृज् (c. 2. मार्ष्टि -ष्टुं) or धाव् (c. 10. धावयति -यितुं).

GARGLED, *p. p.* आचान्तः -न्ता -न्तं, उपस्पृष्टः -ष्टा -ष्टं.

GARISH, *a.* *See* GAIRISH.

GARLAND, *s.* माला, माल्यं, सक् *f.* (ज्), दाम *n.* (न्), हारः, आवलिः -ली *f.*, प्रालम्बः -म्बिका; 'of flowers,' कुसुममाला, पुष्पावली, कुसुमस्तवकः, कुसुमावतंसकं; 'of pearls,' मुक्तावली, देवच्छन्दः, शतयष्टिकः; 'other kinds of garlands,' गुत्सः, गुत्साङ्गः, गोस्तनः.

To GARLAND, *v. a.* मालया or स्रजा अलङ्कृ, मालायुक्तं -क्तां -क्तं कृ.

GARLANDED, *p. p.* माली -लिनी -लि (न्), स्रग्वी -ग्विनी -ग्वि (न्), सग्धरः -रा -रं.

GARLIC, *s.* लशुनं, रशुनं, लशूनं, लसुनः, रसुनः, रसोनः -नकः, गृञ्जनः, महौषधं, महाकन्दः, अरिष्टः, सोनहः, उग्रगन्धः, दीर्घपत्रः, ग्रन्थिमूलं, श्रीमत्तकः, मुखदूषणः, राहूच्छिष्टः, तरिता.

GARLIC-EATER, *s.* लशुनाशी *m.* (न्), लशुनभोजी *m.* (न्), लशुनादः.

GARLICKY, *a.* लशुनीयः -या -यं, रशुनीयः -या -यं.

GARMENT, *s.* वस्त्रं, वेशः, वेषः, वासस् *n.*, वसनं, परिधानं, परिच्छदः, अक्षरं, आच्छादनं, प्रच्छादनं, प्रसाधनं, संव्यानं, प्रवारः, शर्म्मरः; 'under-

Digitized by Google

garment,' अन्तरीयं, अन्तर्वासस्, अधोवसनं; 'upper,' उत्तरीयं, प्रावारः.

GARNER, *s.* कुशूलः, धान्यागारं, अन्नकोष्ठः, कोष्ठः -ष्ठकं, भाण्डागारं, व्रीह्यगारं, कण्डोलः -लकः, काण्डालः, पिटः, कूदरः.

To GARNER, *v. a.* कुशूले निविश् (c. 10. -वेशयति -यितुं) or सञ्चि (c. 5. -चिनोति -चेतुं).

GARNERED, *p. p.* कुशूलभूतः -ता -तं, कोष्ठभूतः -ता -तं, कुशूलीकृतः -ता -तं.

GARNET, *s.* रक्तवर्णो मणिविशेषः, पद्मरागविशेषः, सर्पमणिः *m. f.*

To GARNISH, *v. a.* शुभ् (c. 10. शोभयति -यितुं), उपशुभ्, भूष् (c. 10 भूषयति -यितुं), विभूष्, अलङ्कृ, समलङ्कृ, परिष्कृ, रञ्ज् (c. 10. रञ्जयति -यितुं).

GARNISH, *s.* अलङ्कारः, अलङ्क्रिया, शोभा -भनं, भूषणं, विभूषणं, आभरणं. सज्जा, प्रसाधनं. *See* GARNISHMENT.

GARNISHED, *p. p.* शोभितः -ता -तं, उपशोभितः -ता -तं, अलङ्कृतः -ता -तं, भूषितः -ता -तं, विभूषितः -ता -तं, परिष्कृतः -ता -तं, प्रसाधितः -ता -तं, कृतशोभः -भा -भं.

GARNISHMENT, GARNITURE, *s.* सज्जा, उपकरणानि *n. pl.*, शोभार्थम् अनुबन्धाः *m. pl.*

GARRET, *s.* उपरिस्थः कोष्ठः, क्षोमः -मं, क्षौमः -मं, अट्टः, अट्टालः, कूटागारं, चन्द्रशाला -लिका, चूला.

GARRISON, *s.* दुर्गनिवासिनः सैन्याः *m. pl.*, दुर्गस्थाः सैन्याः, दुर्गस्थसैन्यं, दुर्गसैन्यं, दुर्गबलं, दुर्गरक्षिणः *m. pl.*, दुर्गरक्षकाः *m. pl.*, रक्षिणः *m. pl.*, रक्षकाः *m. pl.*, रक्षिवर्गः.

To GARRISON, *v. a.* नगररक्षार्थं दुर्गे सैन्यान् or रक्षकान् निविश् in caus. (-वेशयति -यितुं), नगररक्षणे सैन्यगुल्मं नियुज् (c. 7. युनक्ति -योक्तुं).

GARRISONED, *p. p.* रक्षकयुक्तः -क्ता -क्तं, रक्षार्थं सैन्ययुक्तः -क्ता -क्तं.

GARRULITY, *s.* वावदूकता, वाचालता, बहुवादित्वं, बहुभाषिता, अतिशयोक्तिः *f.* जल्पकता, जल्पाकत्वं, वाग्मित्वं, अतिभाषणं, अत्यालापः, अतिवादः.

GARRULOUS, *a.* वावदूकः -का -कं, वाचालः -ला -लं, बहुभाषी -षिणी -षि (न्), बहुवादी -दिनी -दि (न्), जल्पकः -का -कं, जल्पाकः -का -कं, वाग्मी -ग्मिनी -ग्मि (न्), गदयिलुः -लुः -लु, मुखरः -रा -रं, वक्त्रा -क्त्री -क्त्रं (क्तृ).

GARTER, *s.* जङ्घाबन्धनी, पादबन्धनी, जङ्घाबन्धः, जङ्घावस्त्ररक्षणी.

GARUDA, *s.* (The bird on which the god Vishnu is carried, represented as being something between a man and a bird, and considered as the lord of the feathered tribe. He is the son of Kasyapa by Vinatá, and younger brother of Aruna) गरुडः, गरुत्मान् *m.* (-त्मत्), तार्क्ष्यः, खगेश्वरः, सुपर्णः, विष्णुरथः, वैनतेयः, विनतासूनुः *m.*, नागान्तकः, पन्नगाशनः, भुजगदारणः, सिताननः, दक्षाय्यः. The son of Garuda is called सम्पातिः -तिकः.

GAS, *s.* वायुः *m.*, वाष्पः, वातः, धूमः, धूमिका, अङ्गारजो वायुः *m.*

GASH, *s.* दीर्घछेदः, गम्भीरछेदः, दीर्घक्षतं, गम्भीरक्षतं, दीर्घगम्भीरस् त्वग्भेदः or त्वक्छेदः.

To GASH, *v. a.* दीर्घछेदं कृ, गम्भीरछेदं कृ, दीर्घगम्भीरं त्वग्भेदं कृ.

GASOMETER, *s.* वायुमापनयन्त्रं, अङ्गारजवायुनिर्म्माणस्थानं.

To GASP, *v. n.* मुखं व्यादाय कृच्छ्रेण श्वासप्रश्वासं कृ, कृच्छ्रेण श्वस् (c. 2. श्वसिति -तुं) or प्राण् (c. 2. प्राणिति -तुं), दुःश्वासं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.

GASP, *s.* दुःश्वासः, श्वासः, श्वसितं, दुःश्वसितं, उच्छ्वासः, उच्छ्वसितं, प्राणः.

GASPING, *part.* उच्छ्वसन् -सन्ती -सती -सत् (त्), कृच्छ्रेण श्वसन् &c., उच्छ्वसितः -ता -तं, काशश्वासः -सा -सं, दुःश्वासी -सिनी -सि (न्), श्वासकृच्छ्रोपहतः -ता -तं, यष्टिप्राणः -णा -णं.

GASTRIC, *a.* जाठरः -री -रं, औदरिकः -की -कं, उदरीयः -या -यं, जठरीयः -या -यं; 'gastric juice,' कोष्ठाग्निः *m.*, अग्निः.

GASTRONOME, *s.* उदरपरायणः, उदरसेवी *m.* (न्), कुक्षिम्भरिः *m.*, सर्व्वान्नरसज्ञः.

GASTRONOMY, *s.* सर्व्वान्नरसविद्या, परमान्नरसविद्या, उदरसेवा.

GASTROTOMY, *s.* उदरछेदः -दनं, जठरछेदः -दनं.

GATE, *s.* द्वारं, द्वाः *f.* (र्), प्रतीहारः, प्रतिहारः, अरः -री -रं, गृहमुखं, द्वारकण्टकः; 'back-gate,' पक्षद्वारं; 'private-gate,' अन्तर्द्वारं, प्रच्छन्नद्वारं; 'city-gate,' पुरद्वारं, नगरद्वारं, गोपुरं; 'raised place over it,' हस्तिनखः; 'outer-gate,' बहिर्द्वारं.

GATE-POST, *s.* द्वारस्तम्भः, द्वारस्थूणा, द्वारदारुः *m.*; 'its ornament,' तोरणः.

GATE-WAY, *s.* द्वारवर्त्म *n.* (न्), द्वारपथः, निःसरणं.

To GATHER, *v. a.* (Collect) चि (c. 5. चिनोति, चेतुं), अवचि, समाचि, सञ्चि, आचि, प्रचि, समानी (c. 1. -नयति -नेतुं), समुपानी, समादा (c. 3. -ददाति -दातुं), समाहृ (c. 1. -हरति -हर्त्तुं), उपसंहृ, समूह् (c. 1. जहते -हितुं), सङ्गृह् (c. 9. -गृह्णाति -ग्रहीतुं), ग्रह् सम्भृ (c. 1. -भरति, c. 3. -बिभर्त्ति -भर्त्तुं), संवृ (c. 5. -वृणोति, c. 1. -वरति -रितुं), एकीकृ, एकत्र कृ.—(Gather flowers, &c.) पुष्पाणि चि or अवचि or लू (c. 9. लुनाति, लवितुं).—(Select) उद्धृ, समुद्धृ, वृ, उद्धृ.—(Deduce, infer) अनुमा (c. 2. -माति -तुं, c. 3. -मिमीते), ऊह् (c. 1. जहते -हितुं), अपोह्, अवगम् (c. 1. -गच्छति -गन्तुं).

To GATHER, *v. n.* (Congregate) सङ्गम् (c. 1. -गच्छति -गन्तुं), समागम्, समे (सम् and आ with rt. इ, समैति -तुं), एकत्र मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, एकत्र आगम्.—(Increase) वृध् (c. 1. वर्धते -र्धितुं), उपचि in pass. (-चीयते).—(Form matter) पूय् (c. 1. पूयते -यितुं), पूयं बन्ध् (c. 9. बध्नाति, बन्धुं), पूयपूर्णः -र्णा -र्णं भू.

GATHER, *s.* (Fold) वस्त्रपुटः, ऊर्म्मिः *m. f.*, ऊर्म्मिका, व्यावर्त्तनं, चूर्णः.

GATHERED, *p. p.* चितः -ता -तं, सञ्चितः -ता -तं, अवचितः -ता -तं, उपचितः -ता -तं, समूढः -ढा -ढं, सङ्गृहीतः -ता -तं, लूनः -ना -नं.

GATHERER, *s.* अवचायी *m.* (न्), सञ्चयी *m.* (न्), सङ्गृहीता *m.* (तृ), सङ्ग्राहकः; 'gatherer of taxes,' करग्रहः, शुल्कग्राही *m.* (न्); 'of flowers,' पुष्पावचायी *m.*

GATHERING, *s.* (Act of collecting) चयनं, सञ्चयनं, चायः, अवचयः, अवचायः, लावः, सङ्ग्रहः -हणं, एकत्रकरणं; 'of flowers,' पुष्पचयः, कुसुमावचयः, पुष्पप्रचायः.—(Crowd, assembly) समूहः, सङ्घः, सञ्चयः, सङ्घातः, समागमः, समवायः, समाहारः, सन्नयः; 'of people,' जनसमूहः, जननिवहः, लोकसङ्घः.—(Abscess) विद्रधिः *m.*, पूयसम्पूर्णः स्फोटः.—(Gathering of clouds) घनचयः, घनौघः, घनजालं, घनघनौघः.

GAUDERY, *s.* अलङ्कारः, चित्रविचित्राभरणानि *n. pl.*, शोभाकरद्रव्याणि *n. pl.*

GAUDILY, *adv.* सचित्रालङ्कारं, शोभाकरणार्थं, एकान्तशोभनं, चित्रविचित्रं; 'gaudily dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).

GAUDINESS, *s.* रक्तता, सरागत्वं, रागः, रक्तिः, चित्रता, चित्रविचित्रता, शोभा, एकान्तशोभा, अतिशोभा, वर्णः, नानावर्णत्वं, कर्बुरता, वाह्यदृष्टिः *f.*

GAUDY, *a.* बहुवर्णः -र्णा -र्णं, नानावर्णः -र्णा -र्णं, चित्रः -त्रा -त्रं, चित्रविचित्रः -त्रा -त्रं, अतिशोभनः -ना -नं, एकान्तशोभनः -ना -नं, रक्तः -क्ता -क्तं, अतिरागी -गिणी -गि (न्), चित्रालङ्कारवान् -वती -वत् (त्), उज्ज्वलः -ला -लं.

GAUDY, *s.* (A feast) उत्सवः, उत्सवदिनं, पर्व्वाहः, उद्धर्षः.

To GAUGE, *v. a.* प्रमाणदण्डेन भाण्डभरकं मा (c. 2. माति -तुं, c. 10. मापयति -यितुं).

GAUGE, *s.* (Measure) परिमाणं, प्रमाणं, मानं, परिमाणविधिः *m.*, परिमाणरीतिः *f.*—(Instrument for measuring) मापनयन्त्रं, परिमापनदण्डः, प्रमाणदण्डः, भाण्डपूरकमापनार्थं यष्टिः *m.* *See* GAGE.

Digitized by Google

GAUGER, *s.* प्रमाणदण्डद्वारेण भाण्डभरकमापकः, परिमाणकर्त्ता *m.* (र्त्तृ).

GAUGING, *s.* प्रमाणदण्डेन भाण्डभरकमापनं or भाण्डपूरकपरिमापणं.

GAUNT, *a.* कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, क्षामः -मा -मं, शुष्काङ्गः &c., क्षुत्क्षामः &c.

GAUNTLET, *s.* लोहनिर्म्मितं हस्ताच्छादनं or हस्तत्राणं; 'to throw the gauntlet,' पूर्व्वोक्तहस्ताच्छादनं भूमौ प्रक्षिप्य युद्धार्थम् आह्वे (c. 1. -ह्वयति -ह्वातुं).

GAUR, *s.* (The country) गौडः; 'its inhabitants,' गौडाः *m. pl.*

GAUZE, *s.* विरलतन्तुः स्वच्छवस्त्रविशेषः, विरलांशुकं, सूक्ष्मांशुकं.

GAVOT, *s.* गवोत्संज्ञको लघुनृत्यविशेषः.

GAWK, *s.* मूर्खः, मूढः, स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, जडधीः *m.*

GAWKY, *a.* स्थूलः -ला -लं, स्थूलशरीरः -रा -रं, दीर्घस्थूलः -ला -लं, दीर्घदेहः -हा -हं, अदक्षः -क्षा -क्षं, विरूपः -पी -पं.

GAY, *a.* (Merry) उल्लसः -सा -सं -सितः -ता -तं, आनन्दी -न्दिनी -न्दि (न्), हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, प्रफुल्लः -ल्ला -ल्लं, उल्लासितः -ता -तं, समुल्लसितः -ता -तं, विलासी -सिनी -सि (न्), केलिकः -का -कं, मुदितः -ता -तं, प्रमोदी -दिनी -दि (न्), ललितः -ता -तं, परिहासशीलः -ला -लं, हासी -सिनी -सि (न्).—(Showy) नानावर्णः -र्णा -र्णं, बहुवर्णः -र्णा -र्णं, चित्रविचित्रः -त्रा -त्रं, अतिशोभनः -ना -नं.

GAYETY, *s.* उल्लसता, उल्लासः, आनन्दः, आह्लादः, सानन्दता, हर्षः, प्रहर्षः, प्रफुल्लता, मुदा, प्रमोदः, चित्रप्रसन्नता, प्रहसनं.—(Merry making) उत्सवः, महोत्सवः, उत्सवकरणं.

GAYLY, *adv.* सानन्दं, सहर्षं, प्रमोदेन, उल्लासेन, प्रहृष्टवत्.—(Showily) सबहुवर्णं, चित्रविचित्रं, अतिशोभनं; 'gayly dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).

To GAZE, *v. a.* and *n.* ईक्ष् (c. 1. ईक्षते -क्षितुं), प्रेक्ष्, निरीक्ष्, वीक्ष्, अभिवीक्ष्, समीक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), बद्धदृष्ट्या or स्थिरदृष्ट्या or अनिमिषनयनाभ्यां निरीक्ष् or दृश् (c. 1. पश्यति, द्रष्टुं), स्थिरदृष्टिं कृ, दृष्टिं or लक्षं बन्ध् (c. 9. बध्नाति, बन्धुं).

GAZE, *s.* स्थिरदृष्टिः *f.*, बद्धदृष्टिः *f.*, अनिमिषदृष्टिः *f.*, दृष्टिः *f.*, आलोकनं, ईक्षणं, निरीक्षा, वीक्षणं, वीक्षितं, प्रेक्षणं, प्रेक्षितं, दर्शनं, लक्षः -क्षणं; 'with fixed gaze,' बद्धदृष्टिः -ष्टिः -ष्टि, अनिमिषनयनः -ना -नं.

GAZEHOUND, *s.* दृष्टिमात्रेण शशकाद्यनुसरणशीलो मृगव्यकुक्कुरः.

GAZELLE, *s.* तनुशरीरो हरिणभेदः, मृगः -गी; 'gazelle-eyed,' मृगीदृक् *m. f. n.* (श्).

GAZETTE, *s.* वाचिकपत्रं, समाचारपत्रं, संवादपत्रं, सन्देशपत्रं.

To GAZETTE, *v. a.* वाचिकपत्रेण प्रकाश् (c. 10. -काशयति -यितुं).

GAZETTEER, *s.* अमुकदेशे यत्किञ्चिद् नगरग्राममार्गादि विद्यते तदाकारनामादिवाचकं पुस्तकं.

GAZING, *part.* स्थिरदृष्ट्या प्रेक्षमाणः -णा -णं or आलोकयन् -यन्ती -यत् (त्); 'gazing up to heaven,' नभोदृष्टिः -ष्टिः -ष्टि; 'in various directions,' इतस्ततो दत्तदृष्टिः.

GAZING-STOCK, *s.* तिरस्कारविषयः, अवहासभूमिः *f.*, परिभवास्पदं, कौतुकं.

GEAR, *s.* उपकरणं, सामग्री -ग्यं, सज्जा, परिच्छदः, पारिणाह्यं, आभरणं, प्रसाधनं, प्रतिकर्म्म *n.* (न्); 'plough-gear,' हलोपकरणं.

GEESE, *s. pl.* हंसाः *m. pl.* *See* GOOSE.

GELATIN, *s.* क्वथितमांसनिर्म्मितं घनीभूतं or श्यानीभूतं स्वच्छद्रव्यं.

GELATINOUS, *a.* पूर्व्वोक्तश्यानद्रव्यगुणविशिष्टः -ष्टा -ष्टं, श्यानः -ना -नं, शीनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, संलग्नशीलः -ला -लं, अवलेह्यः -ह्या -ह्यं.

To GELD, *v. a.* वृषणाव् उत्कृत् (c. 6. -कृन्तति -कर्त्तितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), वृषणद्वयम् उत्पट् (c. 10. -पाटयति -यितुं).

GELDED, *p. p.* छिन्नवृषणः -णा -णं, छिन्नमुष्कः -ष्का -ष्कं, मुष्कशून्यः -न्या -न्यं.

GELDING, *s.* (Horse) अवृषणो -ष्णः, छिन्नवृषणो वाजी *m.* (न्).

GELID, *a.* अतिशीतलः -ला -लं, अत्यन्तशिशिरः -रा -रं, हिमः -मा -मं.

GELIDITY, GELIDNESS, *s.* अतिशीतलता, अतिशैत्यं, शीतता, शिशिरत्वं.

GELLY, *s.* क्वथितमांसनिर्म्मितो घनीभूतः or श्यानीभूतः स्वच्छरसः.

GEM, *s.* (Precious stone) मणिः *m. f.* -णी, रत्नं, चारुशिला, प्रस्तरः, मणिरत्नं; 'necklace of gems,' मणिमाला, मणिसरः, रत्नावलिः *f.*; 'its central gem,' तरलः; 'mine of gems,' रत्नाकरः.—(Bud) मुकुलं, जालकं, पल्लवः -वं, कुट्मलं.

To GEM, *v. a.* मणिभिः or रत्नैर् अलङ्कृ or भूष् (c. 10. भूषयति -यितुं).

To GEM, *v. n.* (Bud) फुल्ल् (c. 1. फुल्लति -ल्लितुं), अङ्कुर (nom. अङ्कुरयति -यितुं).

To GEMINATE, *v. a.* द्विगुणीकृ, द्विगुण (nom. द्विगुणयति -यितुं), द्वैधीकृ, द्विकं -कां -कं कृ.

GEMINATION, *s.* द्विगुणीकरणं, द्वैगुण्यं, द्विरावृत्तिः *f.*, पुनरुक्तिः *f.*

GEMINI, *s. pl.* (Twins) यमौ m. du., यमजौ m. du.—(Constellation) द्वन्द्वः, मिथुनः, जिह्मः.

GEMINOUS, *a.* द्विगुणः -णा -णं, द्विकः -का -कं, द्वैधः -धी -धं, द्विविधः -धा -धं, यमः -मा -मं, यमकः -का -कं.

GEMINY, *s.* मिथुनं, द्वन्द्वं, यमकं, यमलं, युगं, युग्मं, युगलं, द्वयं.

GEMMATE, *a.* मुकुलितः -ता -तं, फुल्लवान् -वती -वत् (त्), पल्लवितः -ता -तं.

GEMMED, *p. p.* रत्नवान् -वती -वत् (त्), मणिमान् -मती -मत् (त्), रत्नमयः -यी -यं, रत्नानुविद्धः -द्धा -द्धं, रत्नालङ्कृतः -ता -तं, मणिभूषितः -ता -तं.

GEMMY, *a.* मणिज्ञः -ज्ञा -ज्ञं, रत्नद्योती -तिनी -ति (न्), मणिमयः -यी -यं.

GENDER, *s.* लिङ्गं, प्रकृतिः *f.*; 'masculine gender,' पुंलिङ्गं, पुरुषः; 'feminine gender,' स्त्रीलिङ्गं; 'a noun of invariable gender,' अजहल्लिङ्गः

To GENDER, *v. a.* जन् in caus. (जनयति -यितुं), सञ्जन्, प्रसू or प्रसु (c. 2. -सूते, c. 4. -सूयते -सोतुं), उत्पद् in caus. (-पादयति -यितुं).

To GENDER, *v. n.* स्त्रीपुरुषवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or मैथुनं कृ.

GENEALOGICAL, *a.* वंशावलीविषयः -या -यं, वंशान्वयविषयकः -का -कं, वंशक्रमसम्बन्धी -न्धिनी -न्धि (न्).

GENEALOGIST, *s.* अन्वयज्ञः, वंशावलिज्ञः, घटकः, कुलाचार्य्यः, वंशावलिरचकः, वंशपरम्पराज्ञः.

GENEALOGY, *s.* वंशावली -लिः *f.*, आवलिः *f.*, वंशान्वयः, अन्वयः, वंशश्रेणी, वंशक्रमः, वंशपरम्परा, वंशानुचरितं, वंशविततिः *f.*, वंशविवरणं; 'of kings,' राजावलिः *f.*, नृपावलिः, पार्थिवावलिः.

GENERAL, *a.* (Common to many, or all) साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, सर्व्वसामान्यः -न्या -न्यं, बहुसामान्यः -न्या -न्यं, सर्व्वसाधारणः -णी -णं, सर्व्वः -र्व्वा -र्व्वं, सार्व्वः -र्व्वी -र्व्वं, सार्व्वत्रिकः -की -कं, सर्व्वीयः -या -यं, सर्व्वजनीयः -या -यं, सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, विश्वजनीनः -ना -नं, विश्वजनीयः -या -यं, विश्वजन्यः -न्या -न्यं, सार्व्वलौकिकः -की -कं, लौकिकः -की -कं, व्यापकः -का -कं, सर्व्वव्यापकः -का -कं, सर्व्वमयः -यी -यं, औत्सर्गिकः -की -कं.—(Not particular) अविशेषकः -का -कं, अवच्छेदावच्छेदकः -का -कं.—(Usual) प्रायिकः -की -कं, लोकसिद्धः -द्धा -द्धं, आचारिकः -की -कं, सर्व्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं; 'general practice,' जनरीतिः *f.*, लोकव्यवहारः; 'general order,' सामान्यशासनं; 'general opinion,' बहुमतं; 'general collection,' सर्व्वसङ्ग्रहः; 'general reader,' चुञ्चुकः, प्रघटाविद् *m.*; 'in general,' प्रायेण, प्रायशस्, बहुशस्. *See* GENERALLY.

Digitized by Google

GENERAL, *s.* (Of an army) सेनापतिः *m.*, वाहिनीपतिः *m.*, सेनानीः *m.*, सेनाधिपः, सेनाग्रगः, चमूपतिः *m.*, योधमुख्यः, सेनाध्यक्षः, सैन्याध्यक्षः, बलाध्यक्षः, दण्डनायकः, महासेनः; 'skilful general,' सांयुगीनः.—(Total, whole) साकल्यं, सामान्यं, साधारण्यं, समुदायः.

GENERALISSIMO, *s.* प्रधानसेनापतिः *m.*, अग्रसेनानीः *m.*, प्रधानसैन्याध्यक्षः.

GENERALITY, *s.* (State of being general) सामान्यं -न्यत्वं, साधारण्यं, साधारणत्वं.—(Greatest part) प्रधानभागः, अधिकभागः, बहुतरभागः, प्रधानांशः.

GENERALIZATION, *s.* अवच्छेदावच्छेदः, व्यापकत्वं, जातिनिर्देशः, बहुसामान्यकरणं, गणीकरणं.

To GENERALIZE, *v. a.* अवच्छेदावच्छेदं कृ, बहुव्यापकं -कां -कं कृ, बहुसामान्यं -न्यां -न्यं कृ, गणीकृ, जातिनिर्देशं कृ.

GENERALLY, *adv.* प्रायस्, प्रायशस्, प्रायेण, भूयस्, बहुशस्, बाहुल्येन, भूयिष्ठं, बहुतरं, साधारण्येन, सामान्यतस्, साकल्येन.

GENERALNESS, *s.* साधारणत्वं, सामान्यत्वं, व्यापकत्वं, बाहुल्यं, प्रसिद्धत्वं.

GENERALSHIP, *s.* सैनापत्यं, सेनापतित्वं.—(Skill in tactics) व्यूहपाण्डित्यं, रणपाण्डित्यं, सेनाव्यूहनैपुण्यं, बलविन्यासकौशल्यं, सेनानयप्रवीणता.

GENERALTY, *s.* साकल्यं, समस्तत्वं, सामान्यं, कात्स्न्यं, आखिल्यं, समुदायः.

To GENERATE, *v. a.* जन् in caus. (जनयति -यितुं), सञ्जन्, प्रसू or प्रसु (c. 1. -सवति, c. 2. -सूते, c. 4. -सूयते -सोतुं), सू, उत्पद् in caus. (-पादयति -यितुं).

GENERATED, *p. p.* जातः -ता -तं, जनितः -ता -तं, उपजातः -ता -तं, सञ्जातः -ता -तं, उत्पादितः -ता -तं, समुत्पादितः -ता -तं, प्रसूतः -ता -तं, प्ररूढः -ढा -ढं, कृतजन्मा -न्मा -न्म (न्), उद्भवः -वा -वं, प्रभवः -वा -वं; 'generated in water,' जलोद्भवः -वा -वं.

GENERATION, *s.* (Production) जननं, प्रजननं, जन्म *n.* (न्), उत्पादनं, उत्पत्तिः *f.*, प्रसूतिः *f.*, प्रसवः, सम्भवः, उद्भवः, प्रभवः.—(Race) जातिः *f.*, वंशः, सन्तानः, सन्ततिः *f.*, कुलं, अन्वयः, प्रवरं.—(The people living at the same time) समवयस्काः or समकालजीविनः पुरुषाः *m. pl.*—(Series of descendants) वंशावली, वंशपरम्परा, वंशश्रेणी; 'extending to seven generations,' साप्तपौरुषः -षी -षं; 'organ of generation,' उपस्थः.

GENERATIVE, *a.* जनकः -का -कं, उत्पादकः -का -कं, सावकः -विका -कं.

GENERATOR, *s.* जनयिता *m.* (तृ), जनिता *m.* (तृ), जननः, जनकः, जन्मदः -दाता *m.* (तृ), वीजप्रदः, वीजी *m.* (न्), उत्पादकः.

GENERIC, GENERICAL, *a.* सामान्यः -न्या -न्यं, साधारणः -णा -णी -णं, वर्गीयः -या -यं, जातीयः -या -यं, जातिसम्बन्धीयः -या -यं, व्यापकः -का -कं; 'generic property,' जातित्वं, जातिधर्मः, जातिस्वभावः, सामान्यं, समानाधिकरणं; 'generic characteristic,' जातिलक्षणं, सामान्यलक्षणं.

GENERICALLY, *adv.* जातिमुद्दिश्य, वर्गमुद्दिश्य, जातितस्, सामान्यतस्.

GENEROSITY, *s.* (Liberality) औदार्यं, उदारता, दानशीलता, त्यागशीलता -त्वं, त्यागः, त्यागिता, बहुप्रदत्वं, अतिसर्जनं, अतिदानं, वदान्यता, अकार्पण्यं, विलम्भः.—(Nobleness of soul) माहात्म्यं, औदार्यं, उदीर्णता.

GENEROUS *a.* (Liberal) उदारः -रा -री -रं, दानशीलः -ला -लं, त्यागशीलः -ला -लं, बहुप्रदः -दा -दं, बहुदः -दा -दं, अतिदाता -त्री -तृ (तृ), दायकः -का -कं, दानरतः -ता -तं, वदान्यः -न्या -न्यं, अकृपणः -णा -णं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, उदात्तः -त्ता -त्तं.—(Noble-minded) उदारचेताः -ताः -तः (स्), उदारधीः -धीः -धि, उदारचरितः -ता -तं, माहात्मिकः -की -कं, महामनाः -नाः -नः (स्), महानुभावः -वा -वं, महेच्छः -च्छा -च्छं, उदीर्णः -र्णा -र्णं.—(Of honourable birth) सत्कुलीनः -ना -नं, महाकुलः -ला -लं.

GENEROUSLY, *adv.* उदारवत्, वदान्यवत्, औदार्येण, दानशीलत्वात्, माहात्म्येन.

GENEROUSNESS, *s.* औदार्यं, उदारता, माहात्म्यं. *See* GENEROSITY.

GENESIS, *s.* धर्मग्रन्थानां मध्यात् प्रथमग्रन्थः, जगत्सृष्टिविषयकं मूसालिखितम् आदिपुस्तकं.

GENET, *s.* (Horse) सुरूपी विदेशीयः क्षुद्रवाजी *m.* (न्).—(Civet) गन्धमार्जारः.

GENETHLIAC, *s.* (Birthday poem) जन्मदिवसमुद्दिश्य काव्यं.

GENIAL, *a.* (Contributing to propagation) सावकः -का -कं, प्रसवकारी -रिणी -रि (न्), प्रसूतिवर्धकः -का -कं.—(Contributing to life and cheerfulness) जीवदः -दा -दं, तेजोवर्धकः -का -कं, आनन्दकरः -रा -रं, रम्यः -म्या -म्यं, रमणीयः -या -यं, मनोरमः -मा -मं, सुखकरः -री -रं, प्रसन्नः -न्ना -न्नं, सुभगः -गा -गं, प्रसादकरः -रा -रं, रुचिरः -रा -रं.

GENIALLY, *adv.* प्रसन्नं, प्रसादेन, सप्रसादं, सानन्दं, प्रमोदेन, सहर्षं.

GENIALNESS, *s.* सुनन्दता, रम्यता, रमणीयत्वं, प्रसन्नता, सानन्दता.

GENICULATED, *a.* जानुपट्टीकारग्रन्थियुक्तः -क्ता -क्तं, ग्रन्थिलः -ला -लं.

GENITAL, *a.* प्रसवसम्बन्धी -न्धिनी -न्धि (न्), जननसम्बन्धी &c., यौनः -नी -नं.

GENITALS, *s. pl.* उपस्थः, शिश्नादि *n.*, भगादि *n.*, अधोङ्गं, जननाङ्गं.

GENITIVE, *a.* or *s.* (In grammar) सम्बन्धः, शेषः, षष्ठी विभक्तिः *f.*

GENITOR, *s.* जनयिता *m.* (तृ), जनिता *m.* (तृ), जनकः, जननः, जन्मदः.

GENIUS, *s.* (Natural disposition) स्वभावः, प्रकृतिः *f.*, शीलः, गुणः.—(Strength of mind, power of intellect) धीशक्तिः *f.*, बुद्धिशक्तिः *f.*, मनःशक्तिः *f.*, मनोयुक्तिः *f.*, बुद्धिसामर्थ्यं, बुद्धिप्रभावः, मतिसुप्रयोगता.—(Power of invention) कल्पनाशक्तिः *f.*—(Man endowed with talent) गुणी *m.* (न्), गुणवान् *m.* (त्), धीशक्तियुक्तः, बुद्धिशक्तिमान् *m.* (त्), युक्तबुद्धिः *m.*, बुद्धिमान् *m.* (त्), धीमान् *m.* (त्).—(Peculiar characteristic) विशेषणं, लक्षणं, स्वभावः, स्वधर्मः, वृत्तिः *f.*; 'poetical genius,' कविताशक्तिः *f.*

GENIUS, *s.* (Demon) भूतः, असुरः, दैत्यः, दानवः, प्रेतः, पिशाचः; 'evil genius,' दुर्दैवं; 'good genius,' सुदैवं, शुभदैवं.

GENTEEL, *a.* सभ्यः -भ्या -भ्यं, सभ्याचारी -रिणी -रि (न्), आर्यः -र्या -र्यं, आर्यव्यवहारः -रा -रं, आर्यवृत्तः -त्ता -त्तं, सद्वृत्तः -त्ता -त्तं, सुजनः -ना -नं, साधुवृत्तः -त्ता -त्तं, साधुव्यवहारः -रा -रं, सुशीलः -ला -लं, अग्राम्यः -म्या -म्यं, शिष्टाचारी -रिणी -रि (न्), महानुभावः -वा -वं.—(Elegant) विनीतः -ता -तं, चारुः -रुः -रु, ललितः -ता -तं.

GENTEELLY, *adv.* सभ्यवत्, सुशीलवत्, आर्यवत्, सुजनवत्, सभ्याचारानुसारेण.

GENTEELNESS, *s.* सभ्यता, आर्यत्वं, सभ्याचारत्वं, आर्यवृत्तत्वं, सुशीलता, शिष्टाचारत्वं, सौजन्यं, सुजनता, साधुता, विनीतत्वं.

GENTIAN, *s.* (Plant) किरातः, किराततिक्तः, अनार्यतिक्तः, चिरातिक्तः, चिरतिक्तः, काण्डतिक्तकः, कैरातं, भूनिम्बः, भूतीकः.

GENTILE, *s.* अन्यदेशीयः, भिन्नदेशीयः, भिन्नदेशीयलोकः, अन्यदेशीयलोकः, देवतार्चकः, देवताभ्यर्चकः, देवार्चकः.—(Kindred) गोत्रजः; 'in grammar,' ज्ञातिवाचकः.

GENTILE, *a.* अन्यदेशीयः -या -यं, भिन्नदेशीयः -या -यं, जातीयः -या -यं.

GENTILISM, *s.* देवार्चकत्वं, देवतार्चनं -ना, देवताभ्यर्चनं, भिन्नदेशीयता.

GENTILITIAL, *a.* कौलिकः -की -कं, कूलजः -जा -जं, वंशिकः -की -कं, वंश्यः -श्या -श्यं, जातीयः -या -यं, दैशिकः -की -कं.

GENTILITY, *s.* (Politeness of manners) सभ्यता, सभ्याचारत्वं, सुशीलता, शिष्टाचारत्वं, आर्यत्वं, आर्यवृत्तत्वं, सौजन्यं, सुजनता, साधुवृत्तत्वं, सुविनीतता, महानुभावता.—(Good birth) कुलीनता, महाकुलत्वं, वंशविशुद्धता, कुलोत्कर्षः.

GENTLE, *a.* (Well-born) कुलीनः -ना -नं, सत्कुलीनः -ना -नं, महाकुलः

Digitized by Google

-ला -लं, महाकुलप्रसूतः -ता -तं, साधुजः -जा -जं, साधुवंशजः -जा -जं, आर्य्यवंशजः -जा -जं, सुजन्मा -न्मा -न्म (न्); 'a maid of gentle birth,' कुलकन्यका.—(Mild, soft, bland) मृदुः -दुी -दु, मृदुलः -ला -लं, मन्दः -न्दा -न्दं, कोमलः -ला -लं, सौम्यः -म्या -म्यी -म्यं, स्निग्धः -ग्धा -ग्धं, सुकुमारः -रा -री -रं, मसृणः -णा -णं, अनुग्रः -ग्रा -ग्रं, अकर्कशः -शा -शं, अपरूषः -षा -षं, अचण्डः -ण्डा -ण्डी -ण्डं, असरः -रा -रं, असाहसिकः -की -कं, सुकरः -रा -री -रं; 'of a gentle disposition,' मृदुभावः -वा -वं, मृदुस्वभावः -वा -वं.—(Quiet, tame) शान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, शमी -मिनी -मि (न्), दान्तः -न्ता -न्तं; 'a gentle breeze,' मन्दानिलः, मृदुवातः; 'a gentle laugh,' मन्दहास्यं, मन्दस्मितं, ईषद्धासः; 'gentle remedy,' सौम्योपचारः, सामोपचारः; 'by gentle means,' सान्त्वा; 'gentle speech,' प्रियवाक्यं, प्रियोदितं.

GENTLE, *s.* (Maggot) अलिः *m.*, अली *m.* (न्), कोषकारी *m.* (न्).

GENTLEFOLK, *s.* आर्य्यलोकाः *m. pl.*, साधुजनाः *m. pl.*, आर्य्यमिश्राः *m. pl.*, कुलीनलोकः.

GENTLEMAN, *s.* आर्य्यः, आर्य्यजनः, आर्य्यमिश्रः, साधुः *m.*, साधुजनः, महाशयः, महानुभावः, कुलीनः, कुलीनजनः, सत्कुलीनः, सुजनः, सुजन्मा *m.* (न्), सज्जनः, सज्जातिः *m.*, महाजनः, सत्कुलजातः, सुविनीतः, श्री prefixed.

GENTLEMAN-COMMONER, *s.* राजविद्यालये अन्तेवासिनां मध्यात् प्रथमपदस्थः.

GENTLEMANLIKE, GENTLEMANLY, *a.* आर्य्यव्यवहारानुसारी -रिणी -रि (न्), सभ्याचारानुसारी &c., सभ्यः -भ्या -भ्यं, आर्य्यवृत्तः -त्ता -त्तं, सुशीलः -ला -लं, सुविनीतः -ता -तं, शिष्टाचारयोग्यः -ग्या -ग्यं; 'gentlemanly deportment,' आर्य्यवृत्तिः *f.*, सौजन्यं.

GENTLEMANLINESS, *s.* आर्य्यत्वं, सुशीलता, सौजन्यं, सुविनीतता.

GENTLENESS, *s.* मृदुता, मृदिमा *m.* (न्), माईवं, मन्दता, कोमलता, सौम्यता -त्वं, स्निग्धता, सौकुमार्य्यं, सुकुमारता, अनुग्रता, अकार्कश्यं, अकर्कशत्वं, अपरूषता, अपारूष्यं, अचण्डता, असाहसं; 'of disposition,' भावमृदुता.

GENTLEWOMAN, *s.* आर्य्या, कुलीना स्त्री, सुशीला स्त्री, सुविनीता स्त्री.

GENTLY, *adv.* शनैस्, शनैः शनैस्, शनकैस्, मन्दं मन्दं, मृदु, अनुग्रं, अकर्कशं, अपरूषं, अचण्डं, साहसं विना.

GENTRY, *s.* आर्य्यलोकाः *m. pl.*, आर्य्याः *m. pl.*, साधुलोकाः *m. pl.*, कुलीनलोकाः *m. pl.*, कुलीनवर्गः, सुजनवर्गः, सुजनता, सौजन्यं.

GENUFLEXION, *s.* पूजार्थं जानुभ्यां नतिः *f.* or आनतिः *f.*, जानुनतिः *f.*

GENUINE, *a.* सत्यः -त्या -त्यं, प्रकृतः -ता -तं, वास्तवः -वी -वं -विकः -की -कं, अकल्पितः -ता -तं, अकृत्रिमः -मा -मं, अकपटः -टा -टं, निष्कपटः -टा -टं, निर्व्याजः -जा -जं, निर्व्यलीकः -का -कं, यथार्थः -र्था -र्थं, सारः -रा -रं.

GENUINELY, *adv.* सत्यं, निष्कपटं, कपटं विना, निर्व्याजं, निर्व्यलीकं, यथार्थं.

GENUINENESS, *s.* सत्यता, प्रकृतत्वं, अकृत्रिमता, अकल्पितत्वं, याथार्थ्यं, यथार्थता, निर्व्यलीकता, निर्व्याजत्वं, वास्तविकता, सारता.

GENUS, *s.* (In logic) परं.—(A class) जातिः *f.*, गणः, वर्गः, जातिमात्रं, गोत्रं.

GEOGRAPHER, *s.* भूपृष्ठविद्याज्ञः, भूगोलविद्याज्ञः, भूगोलशास्त्रज्ञः, भूपृष्ठलेखकः, भूगोलज्ञानी *m.* (न्), भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिलेखकः, भूपृष्ठस्य देशसमुद्रपत्तनद्यादिव्याख्याता *m.* (तृ), भूपृष्ठविवरणकृत्.

GEOGRAPHICAL, *a.* भूगोलविषयः -या -यं, भूपृष्ठविषयकः -का -कं, भूगोलशास्त्रविषयः -या -यं, भूपृष्ठसम्बन्धी -न्धिनी -न्धि (न्), भूगोलशास्त्रीयः -या -यं.

GEOGRAPHICALLY, *adv.* भूगोलशास्त्रानुसारेण, भूगोलशास्त्रवत्.

GEOGRAPHY, *s.* भूपृष्ठविद्या, भूगोलविद्या, भूपृष्ठविषयकं ज्ञानं, भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिव्याख्या, भूपृष्ठस्य देशसमुद्रपत्तनद्यादीनां ज्ञानं or विवरणं, भूगोलशास्त्रं.

GEOLOGICAL, *a.* पार्थिवांशविषयः -या -यं, पृथिवीविद्यासम्बन्धी -न्धिनी -न्धि (न्), पृथिवीसंस्थानविषयकः -का -कं.

GEOLOGIST, *s.* पार्थिवांशविद्याज्ञः, पृथिवीविद्याज्ञः, पृथिवीसंस्थानव्याख्याता *m.* (तृ), मृत्तिकाभावगुणादिविवरणकृत् *m.*

GEOLOGY, *s.* पार्थिवांशानां ज्ञानं or विद्या, पार्थिवांशविषयं ज्ञानं, पृथिवीविद्या, पार्थिवांशानां प्राचीनेतिहासः, पृथिवीसंस्थानविद्या, मृत्तिकासंस्थानविद्या, मृत्तिकाभावगुणादिविवरणविद्या.

GEOMETRAL, GEOMETRIC, GEOMETRICAL, *a.* क्षैत्रः -त्री -त्रं, क्षेत्रपरिमाणविषयः -या -यं, क्षेत्रगतः -ता -तं, क्षेत्रविद्यानुसारी -रिणी -रि (न्), रेखागणितसम्बन्धी -न्धिनी -न्धि (न्); 'geometrical proof,' क्षेत्रगतोपपत्तिः *f.*

GEOMETRICALLY, *adv.* क्षेत्रविद्यानुसारेण, रेखागणितशास्त्रवत् or -तस्.

GEOMETRICIAN, *s.* क्षेत्रविद्याज्ञः, रेखागणितविद् *m.*, क्षैत्रज्ञः, रेखागणितशास्त्रदर्शी *m.* (न्), क्षेत्रपरिमाणविद्यावान् *m.* (त्).

GEOMETRY, *s.* क्षैत्रं, क्षेत्रं, क्षेत्रविद्या, क्षेत्रपरिमाणविद्या, क्षेत्रपरिमाणविषया विद्या, रेखागणितं, रेखागणितशास्त्रं, रेखागणनाविद्या; 'proof by geometry,' क्षेत्रगतोपपत्तिः *f.*

GEORGIC, *s.* गोमेषादिविषयं गीतं, कृषिविद्याविषयकं काव्यं.

GERANIUM, *s.* वकमुखाकारबीजकोषः सुपुष्पवान् ओषधिभेदः.

GERFALCON, *s.* श्येनभेदः, कपोतारिः *m.*, पातिपक्षी *m.* (न्).

GERM, GERMEN, GERMIN, *s.* (The embryo of fruit, a bud) पल्लवः -वं, अङ्कुरः, अभिनवोद्भिद् *m.*, जालकं, क्षारकः, जोषिका, कुन्दुकं; 'of leaves,' माढिः *f.*—(Origin, that from which any thing springs) बीजं, योनिः *m. f.*, आदिः *m.*, आरम्भः, गर्भः, मूलं.

GERMAN, *a.* (Related) सम्बन्धी -न्धिनी -न्धि (न्), सम्पर्की -र्किणी -र्कि (न्); 'cousin german,' पितृव्यपुत्रः -त्री, मातुलपुत्रः -त्री.—(Belonging to Germany) जर्म्मणिदेशसम्बन्धी &c., जर्म्मणिदेशजः -जा -जं; 'language,' जर्म्मणिदेशभाषा.

GERMANDER, *s.* अनेकौषधीनां सामान्यनाम *n.* (न्), ओषधिगणसंज्ञा.

GERMANISM, *s.* जर्म्मणिदेशभाषासम्बन्धी सम्प्रदायः.

To GERMINATE, *v. n.* स्फुट् (c. 6. स्फुटति -टितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं), अङ्कुर (nom. अङ्कुरयति -यितुं), विकस् (c. 1. -कसति -सितुं), उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, प्ररुह् (c. 1. -रोहति -रोढुं), वृध् (c. 1. वर्धते -र्धितुं).

GERMINATING, *part.* उद्भिन्नः -न्ना -न्नं, उद्भिद् *m. f. n.*, उद्भिदः -दा -दं, प्ररोही -हिणी -हि (न्), अङ्कुरितः -ता -तं, फुल्लवान् -वती -वत्, प्रस्फुटः -टा -टं, स्फुटन् -टन्ती -टत् (त्).

GERMINATION, *s.* स्फुटनं, स्फुटता, उद्भेदः, प्रोद्भेदः, प्ररोहः, उद्भवनं.

GERUND, *s.* लाटीनभाषाव्याकरणे क्रियावाचकः शब्दः.

GESTATION, *s.* गर्भधारणं, गर्भपोषणं, गर्भवहनं, गर्भिणीभावः.

To GESTICULATE, *v. n.* अङ्गानि विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), हस्तादि विक्षिप् or सञ्चल् in caus. (-चालयति -यितुं), अङ्गविक्षेपं कृ, इङ्ग् (c. 1. इङ्गति -ङ्गितुं), नट् (c. 10. नाटयति -यितुं), अभिनयं कृ, आङ्गिककर्म्म कृ.

GESTICULATION, *s.* अङ्गविक्षेपः -पणं, हस्तादिविक्षेपः, अङ्गहारः, इङ्गितं, इङ्गितकरणं, अङ्गसञ्चालनं, हस्तादिसञ्चालनं, सङ्केतकरणं, शाणी, सूचा -चना, भावकरणं, आङ्गिककर्म्म *n.* (न्).

GESTICULATOR, *s.* अङ्गविक्षेपकः, हस्तादिविक्षेपकः, अङ्गसञ्चालकः, इङ्गितकारी *m.* (न्), सङ्केतकारी *m.* (न्).

GESTURE, *s.* इङ्गितं, अङ्गविक्षेपः, हस्तादिविक्षेपः, सङ्केतः, अङ्गहारः -रिः *m.*, चेष्टा, भावः, इङ्गः, अभिनयः, अभिनीतिः *f.*, सूचना.

To GESTURE, *v. a.* साङ्गविक्षेपं कृ, सहस्तविक्षेपं कृ, साभिनयं कृ.

To GET, *v. a.* (Obtain) आप् (c. 5. आप्नोति, आप्तुं), प्राप्, अवाप्,

Digitized by Google

सम्प्राप्, समवाप्; लभ् (c. 1. लभते, लब्धुं), उपलभ्, अर्ज् (c. 1. अर्जति -र्जितुं, c. 10. अर्जयति -यितुं), उपार्ज्, आसद् (c. 10. -सादयति -यितुं), समासद्, अधिगम् (c. 1. -गच्छति -गन्तुं), गम्, प्रतिपद् (c. 4. -पद्यते -पत्तुं), आपद्, अभिपद्, आविश् (c. 6. -विशति -वेष्टुं), इ (c. 2. एति -तुं), अश् (c. 5. अश्नुते, अशितुं), उपाश्, समश्.—(Have) धा (c. 3. दधाति, धत्ते, धातुं), धृ in caus. (धारयति -यितुं), भृ (c. 3. बिभर्त्ति, भर्त्तुं), आप्.—(Beget) जन् (c. 10. जनयति -यितुं).—(Learn) शिक्ष् (c. 1. शिक्षते -क्षितुं), अधी (c. 2. अधीते, अध्येतुं rt. इ), अधिगम्.—(Induce, persuade) अनुनी (c. 1. -नयति -नेतुं), प्रोत्सह् (c. 10. -साहयति -यितुं), or expressed by the causal; as, 'he got him to return,' निवर्त्तयामास.—(Earn) उपार्ज्, लभ्.—(Receive, take) आदा (c. 3. -दत्ते -दातुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), उपलभ्.—(Procure, get ready) कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, सज्जीकृ, उत्पद् (c. 10. -पादयति -यितुं).—(Get together) समानी (c. 1. -नयति -नेतुं), सञ्चि (c. 5. -चिनोति -चेतुं), समादा, सङ्ग्रह्, एकीकृ, एकत्र कृ.—(Get over, get through, surmount) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), तीर् (c. 10. तीरयति -यितुं), पार् (c. 10. पारयति -यितुं), तॄ (c. 1. तरति -रितुं -रीतुं), निस्तॄ; 'get over a difficulty,' दुःखम् आरुह्, दुःखपारं गम् (c 1. गच्छति, गन्तुं), दुःखस्यान्तं गम्.—(Get up, prepare) उपस्कृ, संस्कृ, पुरस्कृ, विरच् (c. 10. -रचयति -यितुं), सज्जीकृ.—(Get into debt) ऋणं कृ, ऋणग्रस्तः -स्ता -स्तं भू, ऋणवान् -वती -वद् भू.

To GET, *v. n.* (Arrive at) आगम् (c. 1. -गच्छति -गन्तुं), उपगम्, अभिगम्, प्राप् (c. 5. -आप्नोति -आप्तुं), अवाप्, आया (c. 2. -याति -तुं), उपस्था (c. 1. -तिष्ठति -स्थातुं).—(Get away) अपगम्, अपया, अपे (c. 2. अपैति -तुं, rt. इ), अपसृ (c. 1. -सरति -सर्त्तुं), अपक्रम् (c. 1. -क्रामति -क्रमितुं), चल्, (c. 1. चलति -लितुं), प्रस्था.—(Get before) अग्रे or पूर्व्वे or पूर्व्वेम् आगम् or प्राप्.—(Get clear) मुच् in pass. (मुच्यते).—(Get down) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं), अधो या or गम्.—(Get in) विश् (c. 6. विशति, वेष्टुं), प्रविश्, निविश्, आविश्.—(Get off, escape) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, निस्तॄ, अपक्रम्, निर्गम्.—(Get off, alight) अवतॄ, अवरुह्.—(Get out) अपगम्, अपसृ, अपे.—(Get up) उत्था for उत्स्था.—(Get quit of) मुच् in pass.—(Get on) प्रगम्, प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रसृ, प्रया, प्रचल्.—(Get drunk) मत्तः-त्ता-त्तं भू, उन्मत्तीभू; 'get out with you,' अपसर, अपैहि, अपेहि.

GETTER, *s.* प्रापकः, अवाप्ता *m.* (तृ), लब्धा *m.* (धृ), अर्जकः, उपार्जकः, अधिगन्ता *m.* (न्तृ), लाभकृत् *m.*, आदाता *m.* (तृ), ग्राहकः, जनकः, उत्पादकः.

GETTING, *s.* लाभः, लब्धिः *f.*, आप्तिः *f.*, प्रापणं, अवाप्तिः *f.*, सम्प्राप्तिः *f.*, अर्जनं, उपार्जनं, आसादनं, अधिगमः, आगमः, ग्रहणं.

GEWGAW, *s.* अल्पमूल्यकम् आभरणं, अल्पार्घं क्रीडाद्रव्यं, क्रीडनकं, कङ्कणं, खेलाद्रव्यं, कदर्थद्रव्यं.

GHASTFULLY, *adv.* पिशाचवत्, भूतवत्, प्रेतवत्, दारुणं, भयानकं, घोरं.

GHASTLINESS, *s.* रूपदारुण्यं, वदनघोरता, मुखरौद्रता, भूतसरूपता, भौतत्वं, करालत्वं, विकटत्वं.

GHASTLY, *a.* (Like a ghost) भूतसरूपः -पी -पं, प्रेतसरूपः -पी -पं, भौतिकः -की -कं, पैशाचिकः -की -कं, शवसवर्णः -र्णी -र्णं, प्रेतसवर्णः -र्णी -र्णं.—(Frightful) घोररूपः -पी -पं, घोराकृतिः -तिः -ति, दारुणः -णा -णं, भयानकः -का -कं, रौद्रः -द्री -द्रं, भीमदर्शनः -ना -नं, उग्रम्पश्यः -श्या -श्यं, करालमुखः -खी -खं.

GHAUT, *s.* (Landing-place) घट्टः -ट्टी, सज्जनं, गुल्मः.—(Malaya range of mountains) मलयः, मलयाचलः, मलयपर्व्वतः, मलयाद्रिः *m.*, दक्षिणाचलः, दक्षिणपर्व्वतः.

GHEE, *s.* घृतं, हविस् *n.*, सर्पिस् *n.*, हव्यं, हवनीयं, हविष्यं, आज्यं, तनूनपं, नृप्रः.

GHOST, *s.* (Soul) आत्मा *m.* (न्), अन्तरात्मा *m.* (न्).—(Disembodied spirit) प्रेतः, प्रेतनरः, परेतः, नारकः, नरकवासी *m.* (न्), नरकामयः.—(Goblin) वेतालः, रात्रिचरः, निशाचरः, निशाटः, भूतः -तं, श्मशानवासी *m.* (न्), राक्षसः; 'to give up the ghost,' प्राणत्यागं कृ, ईश्वरहस्ते जीवनं or प्राणं समृ in caus. (-सर्पयति -यितुं).

GHOSTLIKE, *s.* प्रेतसरूपः -पा -पी -पं, भूतसरूपः -पा -पी -पं.

GHOSTLINESS, *s.* प्रेतत्वं, भूतत्वं, परेतत्वं, आत्मता, पारमार्थिकत्वं.

GHOSTLY, *a.* (Spiritual) आत्मिकः -की -कं, आत्मविषयः -या -यं, पारमार्थिकः -की -कं, अशारीरिकः -की -कं, पारत्रिकः -की -कं.—(Pertaining to ghosts) भौतिकः -की -कं, प्रेतसम्बन्धी -न्धिनी -न्धि (न्).

GIANT, *s.* (A man of extraordinary size) वृहत्कायः, वृहच्छरीरः, विकटशरीरः, भीमविग्रहः, प्रकाण्डशरीरः, अखर्वः.—(A titan) दैत्यः, असुरः, राक्षसः, दानवः, दैतेयः, रक्षस् *n.*, इन्द्रारिः *m.*, सुरद्विट् *m.* (ष्), दितिसुतः, दनुजः, यातु *n.*, यातुधानः, पूर्व्वदेवः, शुक्रशिष्यः, कौणपः, नैर्ऋतः, निकषात्मजः, क्रव्याद् *m.*, निशाचरः.

GIANTESS, *s.* वृहत्काया, वृहच्छरीरा, विकटशरीरा स्त्री, राक्षसी.

GIANT-LIKE, GIANTLY, *a.* वृहत्कायः -या -यं, वृहच्छरीरः -रा -रं.

To GIBBER, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), अस्पष्टं वद् (c. 1. वदति -दितुं).

GIBBERISH, *s.* अनर्थकवाक्यं, असम्बद्धवाक्यं, वृथाकथा, मृषार्थकवचनं, जल्पितं; 'one who talks it,' अनिबद्धप्रलापी *m.* (न्).

GIBBET, *s.* उद्बन्धनकाष्ठं, उद्बन्धनवृक्षः, वधस्थानं, घातस्थानं.

To GIBBET, *v. a.* रज्जुपाशेन उद्बन्ध् (c. 9. -बध्नाति -बन्धुं), उद्बन्धनं कृ.

GIBBOSITY, *s.* कुब्जता, न्युब्जता, कूर्म्मपृष्ठाकारत्वं, विडाकारता, आभोगः, खण्डमण्डलत्वं.

GIBBOUS, *a.* (Convex, protuberant) न्युब्जः -ब्जा -ब्जं, विडाकारः -रा -रं, कूर्म्मपृष्ठाकारः -रा -रं, गण्डाकारः -रा -रं, आभोगी -गिनी -गि (न्); 'as the moon,' खण्डमण्डलः -ला -लं.—(Hump-backed) कुब्जः -ब्जा -ब्जं, गदुरः -रा -रं.

GIBBOUSNESS, *s.* न्युब्जता, कूर्म्मपृष्ठाकारता, साभोगता. *See* GIBBOSITY.

GIB-CAT, *s.* जीर्णमार्जारः, अतिवृद्धो विडालः.

To GIBE, *v. a.* and *n.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, परिक्षिप्, अवहस् (c. 1. -हसति -सितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ.

GIBE, *s.* क्षेपः, अवक्षेपः, तिरस्कारः, अवहासः, दुर्वाक्यं, दुरुक्तं, कटुवाक्यं.

GIBER, *s.* क्षेपकः, अवक्षेपकः, दुर्मुखः, मुखरः, दुर्वक्ता *m.* (क्तृ).

GIBLETS, *s. pl.*, हंसादेर् यत् पादमस्तकयकृदादि प्राक्शूलारोपणाद् अवच्छिन्नीभूय पृथक् पच्यते, हंसस्य पचनयोग्यं हृद्यकृदन्त्रादि, हंसखण्डकाः *m.-pl.*

GIDDILY, *adv.* भ्रामररोगग्रस्तवत्, सभ्रामरं, चपलं, मनोलौल्यात्.

GIDDINESS, *s.* (Of the head, &c.) भ्रमरं, भ्रामरं, भ्रमिः *f.*, भ्रमः, विभ्रमः, विभ्रान्तिः *f.*, घूर्णिः *f.*, घूर्णनं, चक्षुरादिचापल्यं -चापलं, चक्षुरादिविभ्रान्तिः *f.*, प्रमादः.—(Of character) चपलता, चापल्यं, चञ्चलत्वं, चाञ्चल्यं, चलचित्तता, अस्थिरता, अस्थैर्य्यं, लोलता, अनवस्थितिः *f.*, अधीरत्वं, लौल्यं, मनोलौल्यं, विभ्रान्तिः *f.*, विभ्रान्तशीलता, तरलता, प्रमत्तता.

GIDDY, *a.* (In the head) भ्रामरी -रिणी -रि (न्), भ्रमी -मिणी -मि (न्), घूर्णरोगी -गिणी -गि (न्), भ्रामररोगी &c., विभ्रान्तः -न्ता -न्तं.—(Causing giddiness) भ्रमकरः -री -रं.—(In character) चपलः -ला -लं, चञ्चलः -ला -लं, विभ्रान्तशीलः -ला -लं, अस्थिरः -रा -रं, अनवस्थः -स्था -स्थं, अनवस्थितः -ता -तं, अधीरः -रा -रं, चपलबुद्धिः -द्धिः -द्धि, चपलात्मकः -का -कं, चलचित्तः -त्ता -त्तं, लोलः -ला -लं, लोलमनाः

Digitized by Google

-नाः -नः (स्), प्रमत्तः -त्ता -त्तं, प्रमादी -दिनी -दि (न्).—(Elated) उद्धतः -ता -तं, मत्तः -त्ता -त्तं; 'with power,' ऐश्वर्यमत्तः -त्ता -त्तं.

Gift, *s.* दानं, प्रदानं, दत्तं, प्रदेयं, सम्प्रदानं, दायः, उपहारः, उपायनं, वितरणं, त्यागः, उत्सर्ज्जनं, विसर्गः, विसर्ज्जनं, विश्राणनं, संहतिः *f.*, उपग्राह्यं, उपढौकनं, उपदा -दानकं, प्रदा, दादः, दा, दं, विहापितं, प्रतिपादनं, निर्वपणं, स्पर्शनं, प्रादेशनं, प्रदेशनं, अपवर्ज्जनं, उपचारः, प्रीतिदानं, प्राभृतं; 'a special gift,' सदायः, सुदायः, हरणं; 'nuptial gift,' यौतकं; 'desirable gift,' प्रवारणं, प्रहारणं; 'gift to deceased ancestors,' पितृदानं.—(Endowment) गुणः, शक्तिः *f.*

Gifted, *p. p.* or *a.* (Endowed) सम्पन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, उपेतः -ता -तं, अन्वितः -ता -तं, शीलितः -ता -तं.—(With talents) गुणी -णिनी -णि (न्), गुणवान् -वती -वत् (त्), इष्टगुणसम्पन्नः -न्ना -न्नं, सद्गुणोपेतः -ता -तं.

Gig, *s.* (Any thing that whirls round in play) भ्रमरं, भ्रमरक्रीडनकं.—(A light carriage) द्विचक्रयुक्तं लघुयानं, लघुरथः.—(Boat) उपनौका, लघुनौका, क्षुद्रनौका.

Gigantic, *a.* वृहत्कायः -या -यं, वृहच्छरीरः -रा -रं -री -रिणी -रि (न्), भीमविग्रहः -हा -हं, अतिकायः -या -यं, विकटशरीरः -रा -रं, अतिमहान् -हती -हत् (त्), अतिवृहन् -हती -हत् (त्), राक्षसपरिमाणः -णा -णं, दैत्यपरिमाणः -णा -णं.

Giggle, *s.* असम्बद्धपरिहासः, अनर्थकहासः, कुहसितं, मूर्खहसितं.

To giggle, *v. n.* असम्बद्धपरिहासं कृ, अनर्थकहासं कृ, मूर्खवत् or असम्बद्धं or कु हस् (c. 1. हसति -सितुं), कङ्क् (c. 1. कङ्कति -ङ्कितुं), कख् (c. 1. कखति -खितुं).

Giggler, *s.* असम्बद्धपरिहासशीलः, निरर्थकहासकारी *m.* (न्).

To gild, *v. a.* (Overlay with gold) सुवर्णं (nom. सुवर्णयति -यितुं), स्वर्णपत्रपिनद्धं -द्धां -द्धं कृ, सुवर्णोपेतं -तां -तं कृ.—(Illuminate) रञ्ज् (c. 10. रञ्जयति -यितुं), द्युत् (c. 10. द्योतयति -यितुं), विराज् (c. 10. -राजयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं).

Gilded, *p. p.* सुवर्णितः -ता -तं, रसितः -ता -तं, स्वर्णपत्रपिनद्धः -द्धा -द्धं, स्वर्णमण्डितः -ता -तं, स्वर्णपत्रसंवीतः -ता -तं or -प्रतिबद्धः -द्धा -द्धं, राजतान्वितः -ता -तं, रञ्जितः -ता -तं, राजितः -ता -तं, प्रद्योतितः -ता -तं.

Gilder, *s.* स्वर्णपत्रादिना रञ्जकः, स्वर्णपत्रपिनद्धकारी *m.* (न्).

Gilding, *s.* स्वर्णरञ्जनं, सुवर्णीकरणं, स्वर्णमण्डनं; 'of the leaves of a book,' पत्ररञ्जनं.

Gill, *s.* (Organ of respiration in fishes) मत्स्यानां श्वासेन्द्रियं, मत्स्यानां श्वासप्रश्वासार्थं मस्तकरन्ध्रं or शिरोरन्ध्रद्वयं.—(Of a fowl) कुक्कुटस्य मुखकन्दलः or मुखस्याधःस्थं लोलमांसं.—(Flesh on the lower part of the cheek) अधोगण्डमांसं, अधोगण्डः, अधःकपोलः, चिबुकमांसं.—(Measure) द्रवद्रव्याणां परिमाणविशेषः.

Gilly-flower, *s.* अनेकौषधीनां सामान्यनाम *n.* (न्), ओषधिगणसंज्ञा.

Gilt, *p. p.* or *a.* सुवर्णितः -ता -तं, रसितः -ता -तं, राजतान्वितः -ता -तं. *See* Gilded.

Gilt, *s.* सुवर्णरञ्जनं, स्वर्णपत्रं; 'silver-gilt,' विमलं.

Gilt-head, *s.* (Fish) गडकः, शकुलगण्डः, शकुलाभेकः, शालः, कुम्भिलः.

Gimcrack, *s.* निरर्थकयन्त्रं, क्रीडायन्त्रं, क्रीडाद्रव्यं, क्रीडनकं.

Gimlet, *s.* वेधनिका, आस्फोटनी, लास्फोटनी, आविधः.

Gimp, *s.* कौशिकसूत्रनिर्म्मितः सुतनुचेलकः.

Gin, *s.* (Spirit) शुण्डा, सुरा -री, वारुणी, शीधुः *m.* -धु *n.*, मदिरा, हाला, आसवं; 'gin-drinker,' सुरापः -पी, शुण्डापायी *m.* -यिनी; 'gin-drinking,' सुरापानं; 'gin-shop,' शुण्डापानं, पानगोष्ठिका.—(Snare, trap) पाशः, उन्माथः, जालं, कूटयन्त्रं, वागुरा, पाशबन्धः.

Ginger, *s.* आर्द्रकं, शृङ्गवेरं, अङ्गलोद्भः, गुल्मूलं, अपाकशाकं; 'dry ginger,' शुष्कार्द्रं, शुण्ठि *f.* -ण्ठी -ण्ठ्यं, विश्वभेषजं, विश्व -श्वा, महौषधं, नागरं.

Ginger-beer, *s.* आर्द्रकपानं, आर्द्रकरसः, आर्द्रकपानीयं, आर्द्रकसुरा.

Ginger-bread, *s.* आर्द्रकपिष्टकः, आर्द्रकपूपः, आर्द्रकमयं मिष्टान्नं.

Ginger-wine, *s.* आर्द्रकमद्यं, आर्द्रकमदिरा, आर्द्रकसुरा.

Gingerly, *adv.* सावधानं, अवधानेन, शनैः शनैस्, असहसा.

Gingham, *s.* रेखाचित्रितं कार्पासाम्बरं or तूलावस्त्रं.

Gingival, *a.* दन्तमांससम्बन्धी -न्धिनी -न्धि (न्), दन्तशिरासम्बन्धी &c.

To gingle, *v. n.* शिञ्ज् (c. 2. शिञ्क्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), किङ्किण् (nom. किङ्किणायते), झङ्कृतं कृ.

Gingle, gingling, *s.* शिञ्जः -ञ्जा, शिञ्जितं, आशिञ्जितं, क्वणितं, किङ्किणिशब्दः, झङ्कृतं, झनत्कारः.

Gingling, *part.* क्वणन् -णन्ती -णत् (त्), शिञ्जी -ञ्जिनी -ञ्जि (न्).

Ginnet, *s.* अश्वकः. *See* Jennet.

Gipsy, *s.* हस्तरेखानिरीक्षणाननरं दैवकथनाद्युपजीवी चक्राटः, अवनिचरः -रा *f.*, भूम्नः -म्नी *f.*, काकचरित्रः -त्रा.

Giraffe, *s.* तरक्षुरूपेण चित्रित उष्ट्रजातीयो दीर्घग्रीवो जन्तुभेदः.

To gird, *v. a.* (Bind round) बन्ध् (c. 9. बध्नाति, बन्धुं), परिबन्ध्.—(Bind on) आबन्ध्, पिनह् (c. 4. -नह्यति -नद्धुं), अवनह्, सन्नह्, पिनद्धं -द्धां -द्धं कृ, आकच् (c. 1. -कचते -चितुं); 'gird the loins,' कटिं बन्ध्.—(Encircle, invest) परिवेष् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), परिधा (c. 3. -दधाति -धत्ते -धातुं), परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).

To gird, *v. n.* (Gibe) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, अवहस् (c. 1. -हसति -सितुं).

Gird, *s.* आकर्षः, शूलं, अपतानकः, अपतन्त्रकः, आक्षेपकः, वेत्राघातः.

Girded, *p. p.* बद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, आनद्धः -द्धा -द्धं, अवनद्धः -द्धा -द्धं, आबद्धः -द्धा -द्धं, परिवेष्टितः -ता -तं, परिहितः -ता -तं.

Girder, *s.* गृहतले वृहत्काष्ठं or अग्रकाष्ठं or महादारुः *m.*

Girdle, *s.* (Belt) मेखला, रसना, कटिसूत्रं, कटिबन्धनं -नी, काञ्ची, कलापः, कक्षा, कक्ष्या, परिकरः, सारसं -सनं, वस्त्रनं, सप्तकी, शाङ्करी, रशना, शृङ्खला.—(Inclosure, circumference) वेष्टनं, परिवेष्टनं, आवेष्टनं, मण्डलं, वलयः, चक्रवालं.—(Zodiac) राशिचक्रं.

To girdle, *v. a.* मेखलया बन्ध् (c. 9. बध्नाति, बन्धुं), वेष् (c. 1. वेष्टते -ष्टितुं, c. 10. वेष्टयति -यितुं), परिवेष्, परिवृ (c. 5. -वृणोति -वरितुं -रीतुं).

Girdler, *s.* मेखलाकारः, रसनाकर्त्ता *m.* (र्त्तृ), कटिसूत्रकारी *m.* (न्).

Girl, *s.* कन्या, कुमारी, तरुणी, बाला, बालिका, पुत्री, दारिका, अनाग-तार्त्तवा, लग्निका, नग्निका, गौरी, वामूः *f.*

Girlhood, *s.* कन्यात्वं, कुमारीत्वं, तरुणीत्वं, कौमार्य्यं, तारुण्यं.

Girlish, *a.* कन्यायोग्यः -ग्या -ग्यं, कुमारीयोग्यः -ग्या -ग्यं.

Girlishly, *adv.* कन्यावत्, कुमारीवत्, तरुणीवत्, कन्यारूपेण.

Girt, *p. p.* बद्धः -द्धा -द्धं, पिनद्धः -द्धा -द्धं, वेष्टितः -ता -तं, परिवेष्टितः -ता -तं; 'girt with a falchion,' बद्धनिस्त्रिंशः -शा -शं; 'sea-girt,' समुद्रमेखलः -ला -लं.

Girth, *s.* उदरत्राणं, अधोबन्धनं -नी, वरत्रा, वर्द्धं, वर्द्धी, नद्धी, चूषा, कक्षा, कक्ष्या.

To girth, *v. a.* वरत्रया बन्ध् (c. 9. बध्नाति, बन्धुं), उदरत्राणं पिनह् (c. 4. -नह्यति -नद्धुं).

Gist, *s.* अर्थः, मुख्यार्थः, परमार्थः, उत्तमार्थः, अग्रविषयः.

To give, *v. a.* दा (c. 3. ददाति, दत्ते, दातुं), प्रदा, प्रादा, अभिदा, सम्प्रदा,

Digitized by Google

HUMOUR, *s.* (Moisture) क्लेदः -दं, संक्लेदः, स्तेमः, तेमः, जलावसेकः, चिक्लिदं, समुन्दनं, स्नेहः, आर्द्रता.—(Fluid) रसः, जलं; 'of the body,' धातुः *m.*; 'disorder of the humours,' दोषः; 'vitiation of the three humours,' दोषत्रयं.—(Temper of mind) भावः, स्वभावः, शीलः, शीलता -त्वं, प्रकृतिः *f.*; 'good humour,' सद्भावः सत्प्रकृतिः *f.*, सुशीलता, सुप्रकृतिः *f.*; 'bad humour,' असद्भावः, वक्रभावः; 'in a bad humour,' दुष्प्रकृतिः -तिः -ति, दुःशीलः -ला -लं, वक्रभावः -वा -वं.—(Whim) छन्दस् *n.*, छन्दं, मनोलौल्यं, बुद्धिलौल्यं, बुद्धिविलासः, बुद्धिचापल्यं, चापलं, तरङ्गः, लहरी, अखट्टिः *m.*—(Wit) रसः, रसिकता, रसिता, चित्रं, वैदग्ध्यं, कौतुकं.

To HUMOUR, *v. a.* अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), अनुकूल् (c. 10. -कूलयति -यितुं), सन्तुष् (c. 10. -तोषयति -यितुं), परितुष्, अनुरुध् (c. 4. -रुध्यते -त्ति -रोद्धुं), आराध् (c. 10. -राधयति -यितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), प्रसद् (c. 10. -सादयति -यितुं), अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), भज् (c. 1. भजति -ते, भक्तुं), लल् (c. 10. लालयति -यितुं), 'to humour one's inclination,' छन्दोऽनुवृत्.—(Suit) युज् (c. 4. युज्यते, c. 10. योजयति -यितुं).

HUMOURED, *p. p.* अनुवृत्तः -त्ता -त्तं, अनुरुद्धः -द्धा -द्धं, अनुगृहीतः -ता -तं, आराधितः -ता -तं, प्रसादितः -ता -तं, सन्तोषितः -ता -तं.

HUMOURING, *s.* (Indulging) अनुवर्त्तनं, अनुवृत्तिः *f.*, छन्दोनुवृत्तं, अनुरोधः -धनं, सन्तोषणं, तुष्टिकरणं, तुष्टिदानं, आराधनं, प्रसादनं, प्रीतिकरणं, तर्पणं.

HUMP, *s.* गडुः *m.*, स्थगुः *m.*, पृष्ठग्रन्थिः *m.*; 'of a bull, &c.,' ककुद् *f.*, ककुदः -दं, संसकूटः; 'having a hump,' ककुद्मान् -द्मती -द्मत् (न्), ककुमी -मिनी -मि (न्), न्युब्जः -ब्जा -ब्जं.

Digitized by Google

HUMP-BACKED, *a.* कुब्जः -ब्जा -ब्जं, कुब्जकः -का -कं, गडुः -डुः -डु, गडुरः -रा -रं, गडुलः -ला -लं, वक्रपृष्ठः -ष्ठा -ष्ठं, उच्चस्कन्धः -न्धा -न्धं.

HUNCH, *s.* (A hump) गडुः *m.*, स्थगुः *m.*—(A lump) पिण्डः, गण्डिका, घनः.

To HUNCH, *v. a.* अरत्निना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं).

HUNCH-BACKED, *a.* गडुपृष्ठः -ष्ठा -ष्ठं. *See* HUMP-BACKED.

HUNDRED, *a.* शतं, शतसंख्यकः -का -कं, एकशतसंख्यकः -का -कं, शतकः -का -कं, दशतिः *f.* The word शतं may be used with the nom. pl. or gen. pl.; as, 'a hundred ancestors,' शतं पितरः or शतं पितॄणां; or in comp., as, 'a hundred years,' वर्षशतं, शतवर्षं; 'a hundred and fifty,' सार्द्धशतं; 'a hundred thousand,' लक्षं -क्षा; 'a hundred millions,' अर्बुदं; 'a hundred years old,' शतायूः -यूः -युः (स्).

HUNDRED, *s.* शतं, शतकः, दशतिः *f.*; 'by hundreds,' शतशस्.

HUNDREDTH, *a.* शततमः -मी -मं, शतः -ती -तं.

HUNGER, *s.* क्षुधा, क्षुत् *f.* (ध्), बुभुक्षा, जिघत्सा, अन्नलिप्सा, आहारलिप्सा, अशनाया -यितं, अन्नायी, क्षारिका; 'hunger and thirst,' क्षुत्पिपासा or -से *f.* du.

To HUNGER, *v. n.* क्षुध् (c. 4. क्षुध्यति, क्षोद्धुं), भुज् in des. (बुभुक्षति -ते -क्षितुं), घस् in des. (जिघत्सति -त्सितुं), अशन (nom. अशनायति -यितुं), अन्नं or आहारं लभ् in des. (लिप्सते -प्सितुं); 'to hunger after righteousness,' धर्म्माय क्षुध्.

HUNGER-BIT, HUNGER-BITTEN, *a.* क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुत्पीडितः -ता -तं.

HUNGERED, *a.* क्षुधितः -ता -तं, बुभुक्षितः -ता -तं, क्षुधार्त्तः -र्त्ता -र्त्तं.

HUNGERLY, *a.* अन्नार्थी -र्थिनी -र्थि (न्), भोजनार्थी &c., आहारार्थी &c.

HUNGER-STARVED, *a.* क्षुदवसन्नः -न्ना -न्नं, क्षुधावसन्नः -न्ना -न्नं, क्षुधादितः -ता -तं.

HUNGRY, *a.* क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुधितः -ता -तं, क्षुत्पीडितः -ता -तं, क्षुधापीडितः -ता -तं, क्षुधातुरः -रा -रं, बुभुक्षितः -ता -तं, बुभुक्षुः -क्षुः -क्षु, जिघत्सुः -त्सुः -त्सु, आहारार्थी -र्थिनी -र्थि (न्), अन्नार्थी &c., अन्नलिप्सुः -प्सुः -प्सु, आहारलिप्सुः -प्सुः -प्सु, अशनायितः -ता -तं, क्षुधाव्याकुलः -ला -लं; 'hungry and thirsty,' क्षुत्पिपासितः -ता -तं, क्षुत्तृष्णोपपीडितः -ता -तं.—(Lean) कृशः -शा -शं, अपुष्टः -ष्टा -ष्टं, विपुष्टः -ष्टा -ष्टं.

HUNKS, *s.* कृपणः, कदर्य्यः, धनलोभी *m.* (न्), मितम्पचः.

To HUNT, *v. a.* and *n.* (Chase) मृग् (c. 10. मृगयते -यितुं), मृगयां कृ, आखिद् (c. 1. -खेटति -टितुं), परिकल् (c. 10. -कालयति -यितुं).—(Pursue, follow after, search for) अनुसृ (c. 1. -सरति -सर्त्तुं), अनुधाव् (c. 1. -धावति -वितुं), पश्चाद्धाव्, अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), पश्चाद्वृत्, अन्विष् (c. 4. -इष्यति -एषितुं).

HUNT, *s.* (Chase) मृगया, मृगव्यं, खेटः -टं, आखेटः, आक्षोदनं, आच्छोदनं, पापर्द्धिः *f.*, पराधिः *f.*—(Pursuit, search) अनुसरणं, अनुधावनं, अन्वेषणं -णा, पर्य्येषणा, मृगणं, मार्गणं.

HUNTED, *p. p.* मृगितः -ता -तं, अनुसृतः -ता -तं, अनुधावितः -ता -तं, आखेटितः -ता -तं, अन्विष्टः -ष्टा -ष्टं, अन्वेषितः -ता -तं.

HUNTER, *s.* (One who pursues wild animals) व्याधः, मृगयुः *m.*, लुब्धकः, मृगवधाजीवः, मृगजीवनः, आखेटकः, मृगादिपशुहन्ता *m.* (न्तृ), सौकरिकः, अन्ध्रः, खट्टिकः; 'with nets,' जालिकः.—(Horse) मृगयाश्वः.

HUNTING, *s.* मृगया, मृगव्यं, खेटः -टं, आखेटः, आक्षोदनं, आच्छोदनं, पापर्द्धिः *f.*, पराधिः *f.*; 'hunting-knife,' कर्त्तरिका; 'hunting-dog,' आखेटकः श्वा *m.* (न्), मृगयाकुक्कुरः; 'hunting appointments,' मृगयावेशः.—(Pursuit, search) अनुसरणं, अनुधावनं, अन्वेषणं -णा, पर्य्येषणा, मृगणं, मार्गणं.

HUNTING-HORN, *s.* मृगयाशृङ्गः, मृगव्यशृङ्गः, व्याधवादितं शृङ्गं or विषाणं.

HUNTRESS, *s.* व्याधी *f.*, व्याधस्त्री, आखेटकी, मृगयाकारिणी.

HUNTSMAN, *s.* मृगयाकारी *m.* (न्), मृगव्यकारी *m.*, मृगयुः *m.*, आखेटकः.

HUNTSMANSHIP, *s.* मृगयाविद्या, मृगव्यविद्या, आखेटविद्या.

HURDLE, *s.* काष्ठशलाकानिर्म्मितम् अवरोधकं or आवरणं, स्तम्भकरः.

HURDY-GURDY, *s.* कर्कशशब्दः सतन्त्रीवाद्यविशेषः.

To HURL, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, अस् (c. 4. अस्यति, असितुं), प्रास्, ईर् (c. 10. ईरयति, -यितुं), उदीर्, समीर्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), व्यवसृज्, पत् (c. 10. पातयति -यितुं), प्रह् (c. 1. -हरति -ते -हर्त्तुं), प्रेष् (c. 10. प्रेषयति -यितुं, rt. इष्), उद्गुर् (c. 6. -गुरते -रितुं); 'to hurl stones,' शिलाप्रहरणं कृ; 'is hurled down,' निपात्यते.

HURL, *s.* (Throw) क्षेपः -पणं, असनं, पातनं.—(Tumult) तुमुलं, कोलाहलः, विप्लवः, डिम्बः.

HURLED, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं, प्रास्तः -स्ता -स्तं, पातितः -ता -तं, ईरितः -ता -तं, विसृष्टः -ष्टा -ष्टं.

HURLER, *s.* क्षेपकः, क्षेप्ता *m.* (प्तृ), असिता *m.* (तृ), प्रासकः.

HURLING, *s.* क्षेपणं, असनं, पातनं; 'of stones,' शिलाप्रहरणं.

HURLY-BURLY, *s.* कोलाहलः, हलहलाशब्दः, कालकीलः -लकः, तुमुलं.

HURRAH, *exclam.* जयशब्दः, प्रशंसाशब्दः, आनन्दशब्दः.

HURRICANE, *s.* चक्रवातः, प्रभञ्जनः, उत्पातवातः, अतिवातः, वात्या, वात्यावेगः, चण्डवातः, प्रचण्डवायुः *m.*, वाताली, वातरूषः, वातगुल्मः, झञ्झावातः, झञ्झा, जवानिलः, भूमिः *m.*, निर्घातः, पवनाघातः.

HURRIED, *a.* त्वरितः -ता -तं; 'spoken fast,' त्वरितोदितः -ता -तं, निरस्तः -स्ता -स्तं.

HURRIEDLY, *adv.* त्वरितं, सत्वरं, द्रुतं, शीघ्रं, अविलम्बितं, सरभसं.

To HURRY, *v. a.* त्वर् (c. 10. त्वरयति -यितुं), सन्त्वर्.—(Hurry along, drive, impel) कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्, प्रेर् (c. 10. -ईरयति -यितुं), प्रणुद् (c. 6. -णुदति -णोत्तुं).

To HURRY, *v. n.* त्वर् (c. 1. त्वरते -रितुं), सन्त्वर्, अतित्वर्, शीघ्र (nom. शीघ्रायते), सत्वरं or शीघ्रं गम् (c. 1. गच्छति, गन्तुं) or चर् (c. 1. चरति -रितुं).

HURRY, *s.* त्वरा, सम्भ्रमः, संवेगः, आवेगः, वेगः, रभसः, क्षिप्रकारिता, त्वरितगतिः *f.*, आशुगमनं, शीघ्रता.—(Bustle) सम्भ्रमः, आकुलत्वं, व्यग्रता, व्यस्तता; 'in a hurry,' त्वरितः -ता -तं, सम्भ्रमी -मिणी -मि (न्), सम्भ्रान्तः -न्ता -न्तं, आकुलः -ला -लं.

HURRY-SKURRY, *adv.* ससम्भ्रमं, सरभसं, सावेगं, व्याकुलं, सम्भ्रमेण.

To HURT, *v. a.* हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं), विहिंस्, उपहिंस्, आहिंस्, क्षतं कृ, क्षतिं कृ, क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्, अपकृ, द्रोहं कृ, अद् (c. 10. अदयति -यितुं), समद्, पीड् (c. 10. पीडयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), रिष् (c. 1. रेषति, c. 4. रिष्यति, रेषितुं, रेष्टुं), क्षि (c. 5. क्षिणोति, c. 1. क्षयति, क्षेतुं), हन् (c. 2. हन्ति -न्तुं), विहन्, उपहन्, तुद् (c. 6. तुदति, तोत्तुं), नश् (c. 10. नाशयति -यितुं), दुष् (c. 10. दूषयति -यितुं), द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं); 'you hurt me by your sharp words,' तुदसि मे मर्म्माणि वाक्शरैः.

HURT, *s.* क्षतं, क्षतिः *f.*, परिक्षतं, हिंसा -सनं, अपकारः, अपकृतं, द्रोहः, अभिद्रोहः, अपायः, क्षयः, उपक्षयः, पीडा, व्यथा, आघातः, बाधः, नाशः, दोषः, विहेठः -ठनं, हानिः *f.*, रिष्टं.

HURT, *p. p.* क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, हिंसितः -ता -तं, विहिंसितः -ता -तं, अपकृतः -ता -तं, कृतापकारः -रा -रं, अर्दितः

Digitized by Google

-ता -तं, पीडितः -ता -तं, निपीडितः -ता -तं, व्यथितः -ता -तं, विहतः -ता -तं, दूषितः -ता -तं, रिष्टः -ष्टा -ष्टं.

HURTER, *s.* क्षतकारी *m.* (न्), अपकारी *m.*, हिंसकः, रेष्टा *m.* (ष्टृ).

HURTFUL, *a.* हिंसः -सा -सं, हिंसालुः -लुः -लु -लुकः -का -कं, हिंसात्मकः -का -कं, अपकारी -रिणी -रि (न्), अपकारकः -का -कं, आपकरः -री -रं, क्षतिकारी &c., क्षतिजनकः -का -कं, अहितः -ता -तं, नृशंसः -सा -सं, शरारुः -रूः -रु, शारुकः -का -कं, घातुकः -का -कं, उपघातकः -का -कं, हानिजनकः -का -कं, बाधकः -का -कं, सबाधः -धा -धं, रिप्वः -प्वा -प्वं, अनिष्टजनकः -का -कं, द्रोही -हिणी -हि (न्).

HURTFULLY, *adv.* हिंसापूर्वं, हिंसया, क्षतपूर्वं, सक्षतं, हिंसं, हिंसप्रकारेण, अहितं, यथा हिंसा क्रियते तथा, यथा क्षतं जायते तथा.

HURTFULNESS, *s.* हिंसता -त्वं, हिंसालुता, क्षतिकारिता, अहितत्वं.

To HURTLE, *v. a.* समाहन् (c. 2. -हन्ति -न्तुं), परस्परसमाघातं कृ.—(Whirl) भ्रम् (c. 10. भ्रमयति -यितुं).

HURTLESS, *a.* अहिंसः -सा -सं, अनपकारी -रिणी -रि (न्).

HUSBAND, *s.* (Man married to a woman) पतिः *m.*, भर्त्ता *m.* (र्तृ), स्वामी *m.* (न्), वरः, वोढा *m.* (ढृ), विवोढा *m.*, वरयिता *m.* (तृ), कान्तः, परिणेता *m.* (तृ), परिणायकः, नाथः, दयितः, इष्टः, प्रियः -यतमः, धवः, उपयन्ता *m.* (न्तृ), परिग्रहीता *m.* (तृ), क्षेत्रिकः, हृदयेशः, प्राणेशः, जीवितेशः, प्राणनाथः, प्राणाधिनाथः, वेत्ता *m.* (त्तृ); 'husband and wife,' दम्पती *m.* du., जम्पती *m.* du., भार्य्यापती *m.* du., जायापती *m.* du.; 'a husband's brother,' देवा *m.* (वृ), देवः, देवरः, देवलः; 'a second husband,' दिधिषुः *m.* -षूः *m.*—(Economist) परिमितव्ययी *m.* (न्), अल्पव्ययी *m.*—(Cultivator) कृषकः, कृषिकारी *m.* (न्).

To HUSBAND, *v. a.* (Economize) परिमितव्ययं कृ, न व्ययीकृ, न विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं); 'to husband one's time,' न कालक्षेपं कृ.—(Cultivate) कृष् (c. 6. कृषति, क्रष्टुं).

HUSBANDLESS, *a.* पतिहीना, भर्त्रीहीना, भर्त्रैरहिता, निर्नाथा, अनाथा.

HUSBANDLY, *a.* परिमितव्ययः -या -यं, गृहव्यापाराभिज्ञः -ज्ञा -ज्ञं.

HUSBANDMAN, *s.* (Cultivator, farmer) कृषकः, कृषिकः, कर्षकः, कार्षकः, कार्षिकः, कृषीवलः, क्षेत्रकर्षकः, क्षेत्रिकः, क्षेत्री *m.* (न्). क्षेत्राजीवः, कृषिजीवी *m.* (न्), हालिकः, क्षेत्रपतिः *m.*, कृषाणः, कीनाशः, आड्डिकः.—(Man of the third tribe) वैश्यः, विट् *m.* (श्), ऊरुजः, ऊरव्यः, अर्य्यः, भूमिस्पृक् *m.* (श्).

HUSBANDRY, *s.* (Agriculture) कृषिः *f.*, कार्षिः *f.*, कृषिकर्म्म *n.* (न्), कृषिविद्या, अनृतं, वैश्यक्रिया, वैश्यवृत्तिः *f.*, हलभृतिः *f.*, कर्षणं, कृष्टिः *f.*, प्रमृतं.—(Frugality, economy) परिमितव्ययः, गृहकर्म्मनयः, गृहकर्म्मनिर्वाहविद्या.

HUSH, *exclam.* शान्तं, शान्तं शान्तं, शब्दं मा कुरु, तूष्णीम्भव, मौनीभव, निःशब्दो भव, वाचं यम, वाग्रोधं कुरु, हूम्, नीचैस्.

To HUSH, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् (c. 10. सान्त्वयति -यितुं), शब्दशान्तिं कृ, शब्दरोधं कृ, निःशब्दीकृ.

To HUSH, *v. n.* शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्, प्रसद् (c. 1. -सीदति -सत्तुं), शान्तीभू, निःशब्दीभू, मौनीभू, तूष्णीम्भू.

HUSHED, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशमितः -ता -तं.

HUSK, *s.* तुषः -षा, तुसः, त्वक् *f.* (च्), कञ्चुकः, कोशः, पुटः, आवेष्टनं; 'of corn,' धान्यत्वक् *f.* (च्), धान्यतुषः.——(Chaff) बुसं, बुषं, तुच्छं, तुच्छधान्यकं, धान्यकल्कं; 'rice in husk,' शुष्कान्नं.

To HUSK, *v. a.* निस्तुष (nom. निस्तुषयति -यितुं), निस्तुषीकृ, तुषीकृ, निस्त्वच (nom. निस्त्वचयति -यितुं), निस्त्वचीकृ, त्वच (nom. त्वचयति -यितुं), तुषं or त्वचं हृ (c. 1. हरति, हर्त्तुं).

HUSKED, *p. p.* (Stripped of the husk) निस्तुषितः -ता -तं, निस्तुषः -षा -षं, निस्त्वचः -चा -चं, तुषीकृतः -ता -तं.—(Having a husk) तुषरः -रा -रं, तुषवान् -वती -वत् (त्), त्वग्युक्तः -क्ता -क्तं.

HUSKY, *a.* (Having husks, consisting of husks) सतुषः -षा -षं, बहुतुषवान् -वती -वत् (त्), तुषमयः -यी -यं, त्वङ्मयः -यी -यं.—(Rough, harsh) रूक्षः -क्षा -क्षं, ककैशः -शा -शं; 'in sound,' रूक्षस्वरः -रा -रं.

HUSSAR, *s.* अश्वारूढः सैन्यः, अश्वारोही *m.* (न्), सादी *m.* (न्).

HUSSY, *s.* पापीयसी, दासीपुत्री, बन्धकी, दुष्टा स्त्री.

HUSTINGS, *s.* काष्ठनिर्म्मितो मञ्चविशेषो यत्र नगरप्रतिनिधिवरणं क्रियते.

To HUSTLE, *v. a.* निरस् (c. 4. -अस्यति -असितुं), निःसृ (c. 10. -सारयति -यितुं), निराकृ, बहिष्कृ, सबाध् (c. 1. -बाधते -धितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं).

HUSWIFE, *s.* गृहिणी, कुटुम्बिनी, गेहिनी, स्वामिनी, गृहमेधिनी, गृहव्यापारकुशला.

HUSWIFERY, *s.* गृहव्यापारकुशलता, गृहकार्य्यदक्षता, गृहकर्म्मनिपुणता, गृहमेधित्वं, परिमितव्ययः.

HUT, *s.* उटजः, कुटीरः, पर्णशाला, कुटेरः, कुटिरं, सहोटजः, तृणौकस् *n.*, तृणकुटी, कुट्टिमः, वेश्म *n.* (न्), कायमानं.

HUTCH, *s.* (Bin) धान्यकोष्ठकं, कुशूलः, पिटः.—(For rabbits) शशकाधारः, शशकरक्षणी.

HUZZA, *s.* जयशब्दः, जयनादः, आनन्दशब्दः, प्रणादः, जयध्वनिः *m.*, जयकोलाहलः, जयारवः, प्रशंसानादः.

To HUZZA, *v. n.* जयशब्दं कृ, प्रणादं कृ, जयप्रणादं कृ.

HYACINTH, *s.* सुगन्धपुष्प ओषधिभेदः, सुगन्धिकुसुमा.

HYBRID, *a.* सङ्कीर्णजातिः -तिः -ति, सङ्कीर्णजातीयः -या -यं, सङ्करजातः -ता -तं, सङ्कीर्णः -र्णा -र्णं.

HYDRA, *s.* जलव्यालः, जलभुजङ्गमः, कविकल्पितो बहुमस्तकविशिष्टो बृहन् जलव्यालः.

HYDRAULIC, HYDRAULICAL, *a.* जलचलनविषयः -या -यं, चलनजलसम्बन्धी -न्धिनी -न्धि (न्), जङ्गमजलसम्बन्धी &c.

HYDRAULICS, *s.* चलनजलविद्या, जङ्गमजलविद्या, जलचलनविषया विद्या.

HYDROCELE, *s.* कोषवृद्धिः *f.*, मुष्कवृद्धिः *f.*, कुरण्डः.

HYDROCEPHALUS, *s.* जलमस्तकः, उदकमस्तकः, मस्तकाध्मानं.

HYDRODYNAMICS, *s.* जलगुणविषया विद्या, जलशक्तिविषया विद्या.

HYDROGEN, *s.* जलकरः, जलजं, जलजो वायुः, जलजो वाष्पः.

HYDROGRAPHER, *s.* समुद्रवेलादिपत्रलेखकः, नदीसमुद्रादिपत्रलेखकः, समुद्रलेखकः, समुद्रालेख्यकृत् *m.*, वेलालेख्यकृत् *m.*

HYDROGRAPHICAL, *a.* समुद्रलिखनसम्बन्धी -न्धिनी -न्धि (न्).

HYDROGRAPHY, *s.* समुद्रलिखनं, समुद्रलिखनविद्या, नदीसमुद्रादिपत्रलिखनं, समुद्रवेलादिविवरणं.

HYDROMANCY, *s.* जलादिलक्षणात् शुभाशुभदर्शनं or भविष्यदनुमानं or अनागतवृत्तसूचनं or भाविविषयप्रदर्शनं.

HYDROMEL, *s.* जलसंसृष्टं मधु, जलमधु *n.*, जलमाक्षिकं, मधु *n.*

HYDROMETER, *s.* जलपरिमापकयन्त्रं, जलमापनी.

HYDROPATHY, *s.* शीतजलप्रयोगेण रोगचिकित्सा, जलोपचारः.

HYDROPHOBIA, *s.* जलकैरोगः, जलभयं, जलकैदंशनप्रयुक्तो जलभयरोगः.

HYDROPIC, HYDROPICAL, *a.* जलोदरी -रिणी -रि (न्), जलोदरीयः -या -यं.

HYDROPSY, *s.* जलोदरं -री, उदरी, उदकोदरं, आध्मानं, जठरामयः.

HYDROSTATICS, *s.* स्थावरजलविषया or अजङ्गमजलविषया विद्या, जलादिद्रवद्रव्यधर्म्मविषया विद्या.

HYEMAL, *a.* शीतकालीनः -ना -नं, हैमनः -नी -नं -निकः -की -कं.

Digitized by Google

HYENA, *s.* तरक्षुः *m.*, तरक्षुकः, तरक्षः, तक्षुः *m.*, मृगाजीवः, मृगादनः, युयुक्सुरः.

HYGROMETER, *s.* क्लेदपरिमापकयन्त्रं, तेमपरिमापकः.

HYMEN, *s.* विवाहाधिष्ठात्री देवता, विवाहाधिष्ठाता *m.* (तृ).

HYMENEAL, *a.* वैवाहिकः -की -कं, विवाहीयः -या -यं, उद्वाहिकः -की -कं, पाणिग्रहणिकः -की -कं.

HYMN, *s.* स्तुतिगीतं, ईश्वरस्तुतिगीतं, स्तुतिगानं, गीतं, सङ्गीतं, गानं, भक्तिगानं, गाथा, गेयं, खेलिः *f.*, स्तोत्रं, सूक्तं; 'a chanter of hymns,' सुन्वयुः *m.*, गायकः, उद्गाता *m.* (तृ).

To HYMN, *v. a.* (Celebrate in song) सङ्गीतद्वारेण स्तु (c. 2. स्तौति, स्तोतुं) or स्तुतिं कृ or प्रशंस् (c. 1. -शंसति -सितुं), उपवीण (nom. उपवीणयति -यितुं).

To HYMN, *v. n.* गै (c. 1. गायति, गातुं), उद्गै, प्रगै, सुन्व (nom. सुन्वायते), स्तुतिं पठ् (c. 1. पठति -ठितुं), स्तुतिपाठं कृ.

HYMNED, *p. p.* उपगीतः -ता -तं, उपगीयमानः -ना -नं, स्तुतः -ता -तं, संस्तुतः -ता -तं, स्तूयमानः -ना -नं.

HYP, *s.* विषादः, अवसादः, अवसन्नता, उद्वेगः, ग्लानिः *f.*, खेदः.

To HYP, *v. a.* विषद् (c. 10.-षादयति -यितुं), विषण्णीकृ, ग्लानीकृ, उद्विग्नीकृ.

HYPERBOLE, *s.* अत्युक्तिः *f.*, अतिशयोक्तिः *f.*, चित्रोक्तिः *f.*, अधिकोक्तिः *f.*, अधिकं, वागाधिक्यं, वागुपचयः, वाक्यबाहुल्यं, अतिवर्णना, सत्यातिक्रमः, याथार्थ्यातिक्रमः, यथार्थोल्लङ्घनं, सत्यातिरिक्ता कथा.

HYPERBOLIC, HYPERBOLICAL, *a.* अत्युक्तिपूर्णः -र्णा -र्णं, अत्युक्तिमान् -मती -मत् (त्), अधिकः -का -कं, अधिकवाङ्मयः -यी -यं, अतिक्रान्तसत्यः -त्या -त्यं, उल्लङ्घितसत्यः -त्या -त्यं.

HYPERBOLICALLY, *adv.* अत्युक्त्या, अत्युक्तिपूर्णं, अतिशयोक्त्या, सत्यातिक्रमेण.

To HYPERBOLIZE, *v. n.* अत्युक्तिं कृ, अतिशयोक्तिं कृ, अतिवर्णनं कृ, अतिशयोक्त्या वद् (c. 1. वदति -दितुं).

HYPERBOREAN, *a.* उत्तरः -रा -रं, उत्तरदिश्यः -श्या -श्यं, उत्तरीयः -या -यं, उदङ् -दीची -दक् (च्), उदीचीनः -ना -नं, उत्तरदिक्सम्बन्धी -न्धिनी -न्धि (न्); 'a hyperborean,' उत्तरदेशजः.

HYPERCRITIC, *s.* अतिशयेन गुणदोषपरीक्षकः, एकान्ततो गुणदोषनिरूपकः or दोषग्राही *m.* (न्), वितण्डकः.

HYPERCRITICISM, *s.* अतिशयेन गुणदोषपरीक्षा or गुणदोषनिरूपणं, वितण्डा, अतिवितण्डा.

HYPHEN, *s.* सम्बन्धचिह्नं, संयोगचिह्नं, सम्बन्धसूचकं चिह्नं or अङ्कः.

HYPOCHONDRES, HYPOCHONDRIA, *s.* कुपितवायुः *m.*, वायुरोगः, विषादः, विषण्णता, अवसादः, उद्वेगः.

HYPOCHONDRIAC, HYPOCHONDRIACAL, *a.* कुपितवायुग्रस्तः -स्ता -स्तं, विषादी -दिनी -दि (न्), विषण्णः -र्णा -र्णं, अन्तर्मनाः -नाः -नः (स्), चिन्ताकुलः -ला -लं, उद्विग्नः -ग्ना -ग्नं.

HYPOCRISY, *s.* कुहना -निका, दम्भः, कुहकवृत्तिः *f.*, धर्म्मोपधा, मिथ्याधर्म्मः -र्म्मत्वं, कापटधर्म्मः, धर्म्मविषये छद्म *n.* (न्), छद्मवेशः or कापट्यं, कुक्कुटिः *f.* -टी, काल्पनिकता, धर्म्मध्वजमात्रं, आर्य्यरूपता, आर्य्यवेशधारणं, मक्षः, सक्षः.

HYPOCRITE, *s.* दम्भी *m.* (न्), दाम्भिकः, कुहकः, कुहकवृत्तिः *m.*, कपटधर्म्मी *m.* (न्), कपटी *m.* (न्), आर्य्यवेशधारी *m.* (न्), वेशधारी *m.*, धर्म्मध्वजी *m.* (न्), आर्य्यरूपः, आर्य्यलिङ्गी *m.* (न्), छद्मतापसः, कपटतपस्वी *m.* (न्), कपटव्रती *m.* (न्), लिङ्गवृत्तिः *m.*, छद्मवेशी *m.* (न्), कपटवेशी *m.* (न्), वकव्रती *m.* (न्), वैडालव्रतिकः, कौक्कुटिकः, कुयोगी *m.* (न्), छन्दपातनः, लोकरञ्जनार्थम् आर्य्यकर्म्मानुष्ठायी *m.* (न्), साधुम्मन्यः.

HYPOCRITICAL, *a.* दाम्भिकः -की -कं, दम्भी -म्भिनी -म्भि (न्), कुहनः -ना -नं, कपटी -टिनी -टि (न्), कापटिकः -की -कं, छद्मवेशी -शिनी -शि (न्), छाद्मिकः -की -कं, धर्म्मोपधः -धा -धं, काल्पनिकः -की -कं.

HYPOCRITICALLY, *adv.* कुहकवत्, दाम्भिकवत्, सदम्भं, सकपटं, मिथ्याधर्म्मेण.

HYPOGASTRIC, *a.* वास्तेयः -यी -यं; 'hypogastric region,' वस्तिः *m. f.*

HYPOTHENUSE, *s.* कर्णः, विषमकर्णः.

HYPOTHESIS, *s.* उपन्यासः, प्रतिज्ञा, कल्पना, प्रमेयं, निष्प्रमाणेन उपन्यासः, अप्रमाणपूर्व्वं उपन्यासः, अनुमानं, अनुभवः.

HYPOTHETIC, HYPOTHETICAL, *a.* अप्रमाणपूर्व्वम् उपन्यस्तः -स्ता -स्तं, आनुमानिकः -की -कं, काल्पनिकः -की -कं, सोपन्यासः -सा -सं, निष्प्रमाणः -णा -णं.

HYPOTHETICALLY, *adv.* उपन्यासक्रमेण, प्रतिज्ञाक्रमेण, सोपन्यासं, निष्प्रमाणेन.

HYSSOP, *s.* हिस्सप्संज्ञकः कटुरसविशिष्ट ओषधिभेदः.

HYSTERIC, HYSTERICAL, *a.* मूर्च्छालः -ला -लं, मूर्च्छावान् -वती -वत् (त्), गर्भरोगोपहतत्वाद् मूर्च्छाग्रस्तः -स्ता -स्तं, मूर्च्छोपहतः -ता -तं.

HYSTERICS, *s.* जरायुरोगजाता मूर्च्छना or मूर्च्छा, गर्भरोगजात उपसर्गः or आवेशः.

I.

I, *pron.* अहम् (अस्मद्); 'I myself,' सो ऽहं.

IAMBIC, *s.* ध्वजं, द्व्यक्षरं पदं यस्य पूर्व्वाक्षरं लघु पश्चिमाक्षरं गुरु.

IBEX, *s.* पर्व्वतवासी छागभेदः, अजः, वस्तः, पर्णभोजनः.

IBIS, *s.* पूर्व्वं मिसरदेशे महापूजापुरःसरं पालितः पक्षिभेदः.

ICE, *s.* हिमं, हिमानी, हिमसंहतिः *f.*, हिमसंहतम् उदकं, शीतमुदकं, घनजलं, संहतजलं, घनीकृतजलं, तुषारः, नीहारः, प्रालेयं, अवश्यायः.

To ICE, *v. a.* हिमीकृ, तुषारीकृ, हिमरूपं -पां -पं कृ.—(Cool with ice) हिमद्वारेण or तुषारद्वारेण शीतलीकृ or शिशिरीकृ or शीतल (nom. शीतलयति -यितुं).

ICEBERG, *s.* हिमपर्व्वतः, हिमराशिः *m.*, तुषारपर्व्वतः, तुषारराशिः *m.*, घनजलराशिः.

ICE-BOUND, *a.* हिमबद्धः -द्धा -द्धं, हिमपरिवेष्टितः -ता -तं.

ICE-HOUSE, *s.* ग्रीष्मकाले हिमरक्षणयोग्यं गृहं, हिमगृहं, हिमगुप्तिः *f.*

ICHNEUMON, *s.* अङ्कूषः, नकुलः, बभुः *m.*

ICHOR, *s.* पूयरक्तं, पूयशोणितं.

ICHTHYOLOGY, *s.* मत्स्यविद्या, मत्स्यजातिगुणादिविषया विद्या.

ICHTHYOSAURUS, *s.* मत्स्यमकरः.

ICICLE, *s.* हिमकणः -णिका, तुषारकणः, नीहारकणः, हिमबिन्दुः *m.*

ICINESS, *s.* हिमता, हिम्यता, हिमवत्त्वं, हैमता, हैमं, शीतता, शैत्यं.

ICONOCLASM, *s.* देवताप्रतिमाभङ्गः, देवतामूर्त्तिभञ्जनं.

ICONOCLAST, *s.* देवताप्रतिमाभञ्जकः, देवतामूर्त्तिभङ्गकरः.

ICONOGRAPHY, *s.* प्रतिमालिखनं, मूर्त्तिविवरणं, प्रतिमूर्त्तिव्याख्या.

ICONOLOGY, *s.* प्रतिमाविद्या, देवतादिप्रतिमानविषया विद्या.

ICY, *a.* हिमः -मा -मं, हिम्यः -म्या -म्यं, हैमः -मी -मं, हिमवान् -वती -वत् (त्), तुषारवान् &c., तौषारः -री -रं, नीहारवान् &c.—(Frigid) शीतः -ता -तं, शीतलः -ला -लं, शिशिरः -रा -रं, जडः -डा -डं.—(Wanting in affection) निःस्नेहः -हा -हं, स्नेहशून्यः -न्या -न्यं.

IDEA, *s.* बुद्धिः *f.*, मतिः *f.*, सङ्कल्पः, मनोगतं, मनसिजं, चिन्ता, मनःकल्पितं, मनःकल्पना, कल्पना, वासना, भावना, बोधः; 'with the idea that,' 'under the idea of,' is expressed by the inst. c. of बुद्धिः; as, 'with the idea that he was a tiger,' व्याघ्रबुद्ध्या; 'with the idea of reaching,' प्रापणबुद्ध्या; 'from an idea of (his) incapacity,' अपात्रबुद्ध्या.—(Abstract idea) भावः.

IDEAL, *a.* मनसिजः -जा -जं, मनोगतः -ता -तं, मनोजः -जा -जं, मानसिकः

Digitized by Google

-की -कं, मानसः -सी -सं, मनोभवः -वा -वं, चिन्तोद्भूतः -ता -तं, चिन्ताभवः -वा -वं, काल्पनिकः -की -कं, मनःकल्पितः -ता -तं, मायामयः -यी -यं, मायिकः -की -कं.

IDEALISM, *s.* माया, विषयाभावबुद्धिः *f.*, अमूर्त्तिवादः, अविद्या.

IDEALIST, *s.* मायिकमतावलम्बी *m.* (न्), विषयाभाववादी *m.* (न्).

IDEALLY, *adv.* मनसा, मनसि, बुद्धा, बुद्धिमात्रेण, चिन्तया, चिन्तामात्रेण.

IDENTICAL, *a.* अनन्यः -न्या -न्यं, अभिन्नः -न्ना -न्नं, अविभिन्नः -न्ना -न्नं, अनन्यरूपः -पा -पं, अभिन्नरूपः -पा -पं, समः -मा -मं, समानः -ना -नं, समसमानः -ना -नं, तुल्यः -ल्या -ल्यं, अभेदः -दा -दं, अपरः -रा -रं, अविपरीतः -ता -तं, निरस्तभेदः -दा -दं, निर्विशेषः -षा -षं; 'identical with the world,' जगत्समः -मा -मं, जगदात्मकः -का -कं.

IDENTICALLY, *adv.* अनन्यं, अभिन्नं, समं, समानं, समसमानं, अपृथक्.

IDENTIFICATION, *s.* समीकरणं, एकीकरणं, सायुज्यं; 'with Brahma,' ब्रह्मसायुज्यं, ब्रह्मभूयं.

IDENTIFIED, *p. p.* समीकृतः -ता -तं, समानीकृतः -ता -तं, समीभूतः -ता -तं, समानीभूतः -ता -तं, एकीकृतः -ता -तं, सरूपीकृतः -ता -तं.

To IDENTIFY, *v. a.* समीकृ, समानीकृ, एकीकृ, सरूपीकृ, तुल्यीकृ, अनन्यीकृ.

To IDENTIFY, *v. n.* समीभू, समानीभू, एकीभू, सरूपीभू, संयुक्तः -क्ता -क्तं भू.

IDENTITY, *s.* समता, समानता, साम्यं, अभिन्नता, अनन्यता, अभेदः, अविभेदः, अविभिन्नता, सारूप्यं, सरूपता, आत्मता, स्वरूपता, तादात्म्यं; 'identity of class,' सावर्ण्यं, सजातित्वं.

IDES, *s.* रोमीयपञ्जिकायां मासस्य त्रयोदशो दिवसः or पञ्चदशो दिवसः.

IDIOCY, *s.* जडता, जाड्यं, मूढता, मूर्खता, बुद्धिवैकल्यं, बुद्धिन्यूनता, अज्ञता, मेधाभावः, बुद्धभावः, बोधाभावः.

IDIOM, *s.* वाग्रीतिः *f.*, वाग्वृत्तिः *f.*, वाग्व्यापारः, वाग्व्यवहारः, वाग्धारा, विशेषवाक्यं, विशेषवचनं, सविशेषवाक्यं, भाषाविशेषणं, विशेषभाषा, विशिष्टवचनं, विशिष्टवाक्यं, विशिष्टभाषा, भाषालक्षणं, भाषावच्छेदः, अवच्छेदकवाक्यं, सम्प्रदायः.

IDIOMATIC, *a.* भाषाविशेषकः -का -कं, भाषालाक्षणिकः -की -कं, विशेषवाग्रीत्यनुसारी -रिणी -रि (न्), भाषारीत्यनुसारी &c.

IDIOSYNCRASY, *s.* प्रकृतिस्वभावः, शरीरस्वभावः, देहस्वभावः, जातिस्वभावः.

IDIOT, *s.* जडः, मूढः, न्यूनबुद्धिः *m.*, न्यूनधीः *m.*, बुद्धिविकलः, विकलबुद्धिः *m.*, निर्बुद्धिः *m.*, बुद्धिहीनः, हतबुद्धिः *m.*, हतज्ञानः, मूर्खः, अज्ञः, निर्बोधः, न्यूनपञ्चाशज्ज्ञावः, पामरः, बर्बरः, वैधेयः, बालिशः, यथाजातः.

IDIOTCY, *s.* *See* IDIOCY.

IDIOTIC, *a.* जडः -डा -डं, मूढः -ढा -ढं, मूर्खः -र्खी -र्खं, न्यूनबुद्धिः -द्धिः -द्धि, न्यूनधीः -धीः -धि, निर्बुद्धिः -द्धिः -द्धि, अल्पबुद्धिः -द्धिः -द्धि, निर्बोधः -धा -धं, बुद्धिविकलः -ला -लं, बालिशः -शा -शं, वैधेयः -यी -यं.

IDIOTISM, *s.* (Peculiarity of expression) विशेषवाक्यं, विशेषभाषा, भाषाविशेषणं, वाग्रीतिः *f.*, विशेषवाग्रीतिः *f.*—(Idiotcy) जडता, जाड्यं, मूढता, बुद्धिवैकल्यं, बुद्धिन्यूनता.

IDLE, *a.* (Averse to labour, doing nothing) अलसः -सा -सं, आलस्यः -स्या -स्यं, निष्कर्म्मा -र्म्मा -र्म्म (न्), निष्कर्म्मकः -का -कं, अकर्म्मशीलः -ला -लं, अकर्म्मा &c., कर्म्मरहितः -ता -तं, कार्य्यशून्यः -न्या -न्यं, निर्व्यापारः -रा -रं, अव्यापारी -रिणी -रि (न्), अक्रियः -या -यं, निरुद्योगः -गा -गं -गी -गिनी -गि (न्), निरुत्साहः -हा -हं, अनुद्योगः -गा -गं, निरुद्यमः -मा -मं, निश्चेष्टः -ष्टा -ष्टं, कार्य्यपराङ्मुखः -खा -खं, अकर्म्मकृत् *m. f. n.*, कर्म्मविमुखः -खा -खं, उदासीनः -ना -नं, सावकाशः -शा -शं, कर्म्मद्वेषी -षिणी -षि (न्); 'to be idle,' उदास् (c. 2. -आस्ते -आसितुं), अलसीभू.—(Vain, useless) निरर्थकः -का -कं, अनर्थकः -का -कं, व्यर्थः -र्था -र्थं, मोघः -घा -घं, निष्प्रयोजनः -ना -नं, क्रिमर्थः

-र्था -र्थं, असद्वद्धः -द्धा -द्धं; 'idle talk,' आलस्यवचनं, वृथाकथा; 'idle talker,' असद्वद्धभाषकः.

To IDLE, *v. n.* आलस्यं कृ, अलसीभू, कालक्षेपं कृ, कालहरणं कृ, कालव्ययं कृ, कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), उदास् (c. 2. -आस्ते -आसितुं).

IDLENESS, *s.* आलस्यं, अलसता -त्वं, अकर्म्मशीलता, कार्य्यप्रद्वेषः, कार्य्यपराङ्मुखता, कर्म्मविमुखता, अनुद्योगः, अव्यापारः, कार्य्यशून्यता, निष्कर्म्मत्वं, उदासीनता, कालक्षेपः.

IDLER, *s.* अलसजनः, आलस्यकारी *m.* (न्), निष्कर्म्मकः, निर्व्यापारः, अव्यापारी *m.* (न्), मुखनिरीक्षकः, लालाटिकः, कालक्षेपकः, कार्य्यपुटः.

IDLY, *adv.* अलसवत्, अलसं, आलस्येन, सालस्यं, उदासीनवत्.—(Vainly) वृथा, मुधा, असद्वद्धं, निरर्थकं.

IDOL, *s.* देवताप्रतिमा -मानं, देवप्रतिमा, देवतामूर्त्तिः *f.*, देवमूर्त्तिः *f.*, देवता, दैवतः -तं, प्रतिमा -मानं, विग्रहः, देवताविग्रहः, देवताप्रतिमूर्त्तिः *f.*, ठक्कुरः, पुत्तलिका; 'attendant on an idol,' देवलः, देवाजीवी *m.* (न्), देवाजीवः, प्रतिमापरिचारकः.

IDOLATER, *s.* देवतार्च्चकः, देवताभ्यर्च्चकः, देवार्च्चकः, देवतापूजकः, प्रतिमापूजकः, देवप्रतिमापूजकः, देवतोपासकः, देवतासेवी *m.* (न्), विग्रहसेवी, प्रतिमासेवी *m.* (न्) -सेविता *m.* (तृ).

IDOLATRESS, *s.* देवतार्च्चका, देवताभ्यर्च्चका, प्रतिमापूजयित्री, देवतापूजका, देवतोपासिका, प्रतिमासेविनी, प्रतिमासेवित्री.

To IDOLATRIZE, *v. n.* देवताः पूज् (c. 10. पूजयति -यितुं), प्रतिमाः पूज् or अर्च् (c. 1. अर्चति -र्चितुं) or अभ्यर्च्, देवतार्चनं कृ, प्रतिमापूजां कृ.

IDOLATROUS, *a.* देवतार्च्चकः -का -कं, प्रतिमापूजकः -का -कं, देवप्रतिमापूजकः -का -कं, प्रतिमापूजाविशिष्टः -ष्टा -ष्टं, प्रतिमापूजासम्बन्धी -न्धिनी -न्धि (न्).

IDOLATRY, *s.* देवतार्च्चनं -ना, देवताभ्यर्च्चनं -ना, देवताभ्यर्च्चा, देवार्च्चा, देवतापूजा, प्रतिमापूजा, देवप्रतिमापूजा, देवतोपासना, प्रतिमासेवा, विग्रहपूजा, मूर्त्तिसेवा, देवताराधना -नं, देवतोपचर्य्या.

IDOLIST, *s.* प्रतिमापूजकः, मूर्त्तिपूजयिता *m.* (तृ), प्रतिमानसेवी *m.* (न्).

To IDOLIZE, *v. a.* अतिप्रेम कृ, अत्यनुरागवान् -वती -वत् or अत्यन्तानुरक्तः -क्ता -क्तं भू or अस्, अतिशयेन or एकान्ततः प्री (c. 4. प्रीयते, प्रेतुं) all with instr. or loc. c., देववत् पूज् (c. 10. पूजयति -यितुं) or भज् (c. 1. भजते, भक्तुं).

IDONEOUS, *a.* युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं.

IDYL, *s.* पशुपालनादिविषयम् अबहुश्लोकं क्षुद्रकाव्यं.

IF, *conj.* यदि, चेत् usually with the indicative; as, 'if he live he will behold prosperity,' यदि जीवति भद्राणि पश्यति; 'if there be need of me,' यदि मया प्रयोजनम् अस्ति; 'if avarice were abandoned, who would be poor?' तृष्णा चेत् परित्यक्ता को दरिद्रः.—(As if) इव.—(If so) यद्येवं.—(If not) यदि न, न चेत्, नो चेत्, न वा.

IGNEOUS, *a.* आग्नेयः -यी -यं, अग्निमयः -यी -यं, अग्निमान् -मती -मत् (त्), अग्नितुल्यः -ल्या -ल्यं, अग्निसमभावः -वा -वं, काशीनवः -वी -वं.

To IGNIFY, *v. a.* अग्निसात्कृ, अग्निरूपं -पां -पं कृ, अग्निवत् कृ.

IGNIS-FATUUS, *s.* मिथ्याग्निः *m.*, मिथ्यादीप्तिः *f.*, मिथ्याद्युतिः *f.*, पिशाचदीपिका.

To IGNITE, *v. a.* ज्वल् (c. 10. ज्वालयति, ज्वलयति -यितुं), प्रज्वल्, संज्वल्, समिन्ध् (c. 7. -इन्द्धे -इन्धितुं), दीप् (c. 10. दीपयति -यितुं), प्रदीप्, सन्दीप्, आदीप्, उद्दीप्, सन्धुक्ष् (c. 10. -धुक्षयति -यितुं), दह् (c. 1. दहति, दग्धुं), तप् (c. 10. तापयति -यितुं), समिद्धीकृ, ज्योतिस्त्वात्कृ.

To IGNITE, *v. n.* समिन्ध् in pass. (-इध्यते), समिद्धीभू, दीप् (c. 4. दीप्यते, दीपितुं), सन्दीप्, प्रदीप्, ज्वल् (c. 1. ज्वलति -लितुं), प्रज्वल्, दह् (c. 4. दह्यति, दग्धुं), सन्धुक्ष् (c. 1. -धुक्षते -क्षितुं), अग्निदीप्तः -प्ता -प्तं भू.

Digitized by Google

IGNITED, *p. p.* समिद्धः -द्धा -द्धं, इद्धः -द्धा -द्धं, ज्वलितः -ता -तं, प्रज्वालितः -ता -तं, दीपितः -ता -तं, उद्दीप्तः -प्ता -प्तं, प्रदीप्तः -प्ता -प्तं, सन्धुक्षितः -ता -तं, सन्तप्तः -प्ता -प्तं.

IGNITIBLE, *a.* दीपनीयः -या -यं, दीप्यः -प्या -प्यं, ज्वलनीयः -या -यं, ज्वलनशीलः -ला -लं, दाह्यः -ह्या -ह्यं.

IGNITION, *s.* इन्धनं, समिन्धनं, ज्वलनं, दीपनं, उद्दीपनं, दहनं, तापः.

IGNOBLE, *a.* (Of low birth) अकुलीनः -ना -नं, दुष्कुलीनः -ना -नं, अकुलः -ला -लं, हीनजातिः -तिः -ति, न्यग्जातिः -तिः -ति, अपकृष्टजातिः -तिः -ति.—(Mean, base) नीचः -चा -चं, अपकृष्टः -ष्टा -ष्टं, निकृष्टः -ष्टा -ष्टं, अधमः -मा -मं, खलः -ला -लं, अनार्य्यः -र्य्या -र्य्यं, कदर्य्यः -र्य्या -र्य्यं, कृपणः -णा -णं, कुत्सितः -ता -तं, तुच्छः -च्छा -च्छं, दीनः -ना -नं, जघन्यः -न्या -न्यं, प्राकृतः -ती -तं, हीनः -ना -नं.—(Disgraceful) अकीर्त्तिकरः -री -रं.

IGNOBLY, *adv.* अकुलीनवत्, अपकृष्टवत्, नीचवत्, हीनजातिवत्, अनार्य्यवत्, अनार्य्यं, खलवत्, कृपणवत्, अधमजनवत्, अपकृष्टं, कृपणं, कुत्सितं, सदैन्यं, कदर्य्यं.

IGNOMINIOUS, *a.* अकीर्त्तिकरः -री -रं, अपयशस्करः -री -रं, अयशस्यः -स्या -स्यं, अयशस्वी -स्विनी -स्वि (न्), गर्हितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं, कलङ्ककरः -री -रं, कलङ्की -ङ्किनी -ङ्कि (न्), लज्जाकरः -री -रं, अपमानकरः -री -रं, वाच्यः -च्या -च्यं, कुत्सितः -ता -तं, कदर्य्यः -र्य्या -र्य्यं, अपकृष्टः -ष्टा -ष्टं, अनार्य्यः -र्य्या -र्य्यं.

IGNOMINIOUSLY, *adv.* गर्हितं, अयशस्यं, सापमानं, कदर्य्यं, कुत्सितं, अनार्य्यं.

IGNOMINY, *s.* अकीर्त्तिः *f.*, अयशस् *n.*, अपकीर्त्तिः *f.*, अपयशस्, अपमानं, अख्यातिः *f.*, कुख्यातिः *f.*, यशोहानिः *f.*, कीर्त्तिहानिः *f.* मर्य्यादाहानिः *f.*, तेजोहानिः *f.*, कलङ्कः, अपकलङ्कः, अपकर्षः, अपध्वंसः, अवमानं, अवज्ञा, परिभवः, तिरस्कारः, अप्रतिष्ठा, अमर्य्यादा.

IGNORAMUS, *s.* अज्ञः, अज्ञानी *m.* (न्), निर्बुद्धिः *m.*, निर्बोधः, अबुद्धिमान् *m.* (त्).

IGNORANCE, *s.* अज्ञानं -नता, अज्ञता, अनभिज्ञता -त्वं, अनभिज्ञानं -नत्वं, अविज्ञता, ज्ञानाभावः, प्रज्ञाहीनता, ज्ञानहीनता, अबोधः -धता, अबुद्धिः *f.*, अविद्या, अज्ञानित्वं, निर्बुद्धिता, बुद्धिहीनता; 'spiritual ignorance,' मोहः, अज्ञानं, अविद्या, अहम्मतिः *f.*

IGNORANT, *a.* अज्ञानः -ना -नं, अज्ञानी -निनी -नि (न्), अज्ञः -ज्ञा -ज्ञं, अनभिज्ञः -ज्ञा -ज्ञं, अविज्ञः -ज्ञा -ज्ञं, अप्राज्ञः -ज्ञा -ज्ञं, अबोधः -धा -धं, अबुधः -धा -धं, ज्ञानहीनः -ना -नं, प्रज्ञाहीनः -ना -नं, विद्याहीनः -ना -नं, विद्याविहीनः -ना -नं, विद्यारहितः -ता -तं, विद्याशून्यः -न्या -न्यं, बोधहीनः -ना -नं, निर्बोधः -धा -धं, निर्बुद्धिः -द्धिः -द्धि, दुर्बुद्धिः -द्धिः -द्धि, अबुद्धिमान् -मती -मत् (त्), दुर्मतिः -तिः -ति, अविपश्चित्, अविद्वान् -दुषी -द्वत् (स्), अविद्यः -द्या -द्यं, अकोविदः -दा -दं, अव्युत्पन्नः -न्ना -न्नं, अश्रुतः -ता -तं, वैधेयः -यी -यं.

IGNORANTLY, *adv.* अज्ञानतस्, अज्ञानात्, अज्ञानेन, अज्ञानपूर्व्वं, अबोधपूर्व्वं.

IGUANA, *s.* गौधारः, गौधेयः, गौधेरः, गोधा, गोधिका, गोधिः *m.*, गोधिकात्मजः, निहाका, नक्रः.

ILIAC, *a.* आन्त्रिकः -की -कं, नाडिसम्बन्धी -न्धिनी -न्धि (न्); 'iliac-passion,' उदावर्त्तः, शूलव्याधिः *m.*, शूलरोगः, अन्त्रशूलं.

ILL, *a.* (Bad, evil) दुष्टः -ष्टा -ष्टं, पापः -पा -पं, खलः -ला -लं, मन्दः -न्दा -न्दं, कदर्य्यः -र्य्या -र्य्यं, निर्गुणः -णा -णं, कुत्सितः -ता -तं, नीचः -चा -चं, अधमः -मा -मं, शठः -ठा -ठं, अभद्रः -द्रा -द्रं, असाधुः -धुः -धु, असन् -सती -सत् (त्), असारः -रा -रं, अधार्म्मिकः -की -कं; 'ill,' as a general word, is often expressed by दुर्, कु, अप or वि; as, 'ill conduct,' दुर्नीयः, कुकर्म्म *n.* (न्), अपकर्म्म *n.*, विकर्म्म *n.*; 'an ill road,' दुरध्वः, कुपथं, विमार्गः, कदध्वा *m.* (न्); 'ill policy,' अनीतिः *f.*, दुर्नीतिः *f.*; 'ill luck,' दुर्भाग्यं, दुर्दैवं.—(Unwell, sick) अस्वस्थः -स्था -स्थं, अस्वस्थशरीरः -रा -रं, असुस्थशरीरः -रा -रं, असुस्थः -स्था -स्थं, असुस्थितः -ता -तं, रोगी -गिणी -गि (न्), सरोगः -गा -गं, रोगग्रस्तः -स्ता -स्तं, रोगान्वितः -ता -तं, रोगवान् -वती -वत् (त्), रोगार्त्तः -र्त्ता -र्त्तं, व्याधितः -ता -तं, व्याधियुक्तः -क्ता -क्तं, सामयः -या -यं, अमी -मिनी -मि (न्), विकारी -रिणी -रि (न्). Expressed also by पीडितः -ता -तं, आतुरः -रा -रं, आर्त्तः -र्त्ता -र्त्तं, ग्रस्तः -स्ता -स्तं in comp.; as, 'ill with fever,' ज्वरपीडितः -ता -तं, ज्वरातुरः -रा -रं, ज्वरग्रस्तः -स्ता -स्तं, सज्वरः -रा -रं.

ILL, *s.* (Evil, wickedness) दुष्टता, पापं, दोषः, व्यसनं -निता, दौष्ट्यं, शाठ्यं, शठता, खलता, मन्दता, असाधुता, अधर्म्मः, दुराचारत्वं, भ्रष्टता, कुसृतिः *f.*—(Distress, calamity) अपायः, अनिष्टं, दुःखं, अशुभं, अकुशलं, दुर्गतिः *f.*, दौर्गत्यं, अभद्रं, अरिष्टं, अहितं, व्यसनं, उत्पातः, विपद् *f.*, आपद् *f.*, विपत्तिः *f.*, अनिष्टपातः, क्लेशः, कष्टं, दुर्दशा, दुरवस्था.—(Disadvantage, loss, injury) अनयः, अपायः, अहितं, अपचयः, अपकारः, अपकृतं, क्षतिः *f.*, हानिः *f.*, क्षयः, नाशः.—(Disease, pain) रोगः, व्याधिः *m.*, आमयः, पीडा, दुःखं, क्लेशः, कष्टं, आर्त्तिः *f.*, उपतापः, तापः, अस्वास्थ्यं; 'boding ill,' अनिष्टसूचकः -का -कं; 'designing ill,' द्रोहचिन्तकः -का -कं.

ILL, *adv.* (Not well, badly) दुष्टु, दुष्टं, असम्यक्, अभद्रं, अयुक्तं or expressed by दुर्, वि, अ, कु, अप, दुष्ट, पाप &c. prefixed; as, 'ill-intentioned,' दुराशयः -या -यं, दुष्टबुद्धिः -द्धिः -द्धि, पापाशयः -या -यं; 'ill-done,' दुष्कृतः -ता -तं, अपकृतः -ता -तं; 'ill-behaved,' दुःशीलः -ला -लं, कुशीलः -ला -लं, दुर्वृत्तः -त्ता -त्तं; 'ill-natured,' दुष्प्रकृतिः -तिः -ति; 'ill-fated,' दुर्दैवग्रस्तः -स्ता -स्तं, दुर्दैवोपहतः -ता -तं, दुर्भाग्यः -ग्या -ग्यं; 'ill-managed,' दुर्नीतः -ता -तं; 'ill-conditioned,' दुःस्थः -स्था -स्थं, दुःस्थितः -ता -तं; 'ill at ease,' अनिर्वृतः -ता -तं; 'ill-grounded,' अमूलः -ला -लं -लकः -का -कं; 'ill-ordered,' दुष्क्रमः -मा -मं, अक्रमः -मा -मं; 'ill-regulated,' अव्यवस्थितः -ता -तं; 'ill-qualified,' अयुक्तः -क्ता -क्तं, अयोग्यः -ग्या -ग्यं; 'ill-shaped,' कुरूपः -पा -पं, अपरूपः -पा -पं, विरूपः -पा -पी -पं; 'ill-sounding,' विस्वरः -रा -रं, अस्वरः -रा -रं; 'ill-treated,' अपकृतः -ता -तं; 'ending ill, turning out ill,' दुरन्तः -न्ता -न्तं, दुष्परिणामः -मा -मं.—(Not well in health) अस्वस्थं, अस्वास्थ्येन, असुस्थं; 'to be ill,' अस्वस्थः -स्था -स्थं भू. *See* ILL, *a.* (Not easily) दुःखेन, कष्टेन, कष्टं, कृच्छ्रेण, कठिनं, विषमं.

ILL-ADVISED, *a.* असमीक्ष्य कृतः -ता -तं, अनालोचितः -ता -तं, अपरीक्षितः -ता -तं.

ILL-AFFECTED, *a.* अहितः -ता -तं, विरक्तः -क्ता -क्तं, द्रोहबुद्धिः -द्धिः -द्धि, अहितैषी -षिणी -षि (न्), अपकारार्थी -र्थिनी -र्थि (न्); 'to be ill-affected,' विरक्तीभू, अभिद्रुह् (c. 4. -द्रुह्यति -द्रोग्धुं).

ILLACERABLE, *s.* अविदार्य्यः -र्य्या -र्य्यं, अविदारणीयः -या -यं, अच्छेदनीयः -या -यं.

ILLAPSE, *s.* निपतनं, प्रपतनं, प्रवेशः, अकस्माद् आक्रमणं.

To ILLAQUEATE, *v. a.* उन्माथे or पाशे पत् (c. 10. पातयति -यितुं), जाले पातयित्वा बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाश (nom. पाशयति -यितुं), पाशीकृ.

ILLAQUEATION, *s.* उन्माथे पातनं, जाले बन्धनं, पाशीकरणं.

ILL-ARRANGED, *a.* दुष्क्रमः -मा -मं, दुर्विरचितः -ता -तं, दुर्विहितः -ता -तं.

ILLATION, *s.* अनुमानं, अनुमितिः *f.*, अपवाहः, अपोहः -हनं, अभ्यूहः.

ILLATIVE, *a.* आनुमानिकः -की -कं, आनुषङ्गिकः -की -कं, यौक्तिकः -की -कं.

ILLATIVELY, *adv.* अनुमानेन, अनुमानतस्, प्रयोगतस्, अपवाहेन.

Digitized by Google

ILLAUDABLE, *a.* अप्रशंसनीयः-या-यं, अश्लाघ्यः-घ्या-घ्यं, अश्लाघनीयः-या-यं.

ILL-BEHAVED, *a.* *See* ILL-BRED.

ILL-BRED, *a.* दुर्विनीतः-ता-तं, अविनीतः-ता-तं, अनीतः-ता-तं, दुर्विनयः-या-यं, अविनयः-या-यं, विनयरोधी-धिनी-धि (न्), विनयप्रमाथी-थिनी-थि (न्), विनयापेतः-ता-तं, अशिष्टः-ष्टा-ष्टं, विशीलः-ला-लं, कुशीलः-ला-लं, दुःशीलः-ला-लं, असभ्यः-भ्या-भ्यं, दुराचारः-रा-रं, दुश्चेष्टितः-ता-तं, दुर्वृत्तः-त्ता-त्तं, व्यभिचारी-रिणी-रि (न्), असभ्यङ्कारी &c.

ILL-BREEDING, *s.* अविनयः, दुर्विनीतता, कुशीलता, दुःशीलता, अशिष्टता, असभ्यता, विनयभङ्गः, शीलवच्चना.

ILL-CONTRIVED, *a.* दुर्घटितः-ता-तं, दुर्गीतः-ता-तं, अपक्वः-क्वा-क्वं.

ILL-CONDITIONED, *a.* दुःस्थः-स्था-स्थं, दुःस्थितः-ता-तं, दुर्वृत्तिः-त्तिः-त्ति.

ILL-CONDUCTED, *a.* दुर्गीतः-ता-तं, दुर्घटितः-ता-तं, असम्यग् घटितः-ता-तं.

ILL-DRESSED, *a.* दुर्वासाः-साः-सः (स्), कुवेष्टितः-ता-तं, कुप्रावृतः-ता-तं.

ILLEGAL, *a.* स्मृतिविरुद्धः-द्धा-द्धं, व्यवहारविरुद्धः-द्धा-द्धं, नियमविरुद्धः-द्धा-द्धं, व्यवस्थाविरुद्धः-द्धा-द्धं, स्मृत्ययेतः-ता-तं, अस्मार्तः-र्ती-र्तं, शास्त्रविरुद्धः-द्धा-द्धं, धर्म्मरोधी-धिनी-धि (न्), अधर्म्यः-र्म्या-र्म्यं, निषिद्धः-द्धा-द्धं, अव्यवस्थितः-ता-तं, अशास्त्रिकः-का-कं, अशास्त्रीयः-या-यं, अवैधः-धी-धं, अविधिः-धिः-धि, विधिभङ्गकः-का-कं.

ILLEGALITY, *s.* स्मृतिविरोधः-विरुद्धता, व्यवहारविरोधः, नियमविरोधः, शास्त्रविरोधः, अस्मृतिः *f.*, अधर्म्यता, धर्म्मविरोधः, व्यवस्थाविरोधः, अव्यवस्था, विकर्म्म *n.* (न्), विकर्म्मक्रिया, व्यवस्थातिक्रमः, व्यवहारातिक्रमः, नियमभङ्गः, विधिभङ्गः, व्यवस्थाभङ्गः.

ILLEGALLY, *adv.* स्मृतिविरोधेन, व्यवहारविरुद्धं, नियमविरुद्धं, शास्त्रविरोधेन, धर्म्मविरुद्धं; 'acting illegally,' विकर्म्मकृत् *m.f.n.*, विकर्म्मिकः-की-कं.

ILLEGIBILITY, *s.* अस्पष्टता, अव्यक्तत्वं, अस्पष्टाक्षरत्वं, दुर्वाच्यता.

ILLEGIBLE, *a.* अस्पष्टाक्षरः-रा-रं, अव्यक्ताक्षरः-रा-रं, दुर्वाच्यः-च्या-च्यं, अस्पष्टवर्णः-र्णा-र्णं.

ILLEGITIMACY, *s.* अनौरसता, विजातता, विजन्म *n.* (न्), वैजात्यं, अनभिजातत्वं, जारजत्वं, जारजातता, उपस्त्रीजातत्वं, दासीजातत्वं, जन्मवैलक्षण्यं.

ILLEGITIMATE, *a.* विजातः-ता-तं, विजनितः-ता-तं, विजन्मा-न्मा-न्म (न्), विजातीयः-या-यं, अधर्म्मजः-जा-जं, अनभिजातः-ता-तं, उपस्त्रीजातः &c., जारजातः &c., जारजः-जा-जं, असतीप्रसूतः-ता-तं, कृष्णपक्षजः-जा-जं, कृष्णपक्षीयः-या-यं; 'an illegitimate child,' अनौरसः-सी, कुण्डः-ण्डी *m.* (न्), उपस्त्रीसुतः-ता, उपस्त्रीपुत्रः-त्री, जारजः-जा, दासीपुत्रः, कौलटेरः-रा, कौलटेयः-यी, कौलटिनेयः-यी, बन्धुलः, बान्धकिनेयः; 'of a widow,' गोलकः.—(Spurious) कृत्रिमः-मा-मं, कल्पितः-ता-तं.—(Unlawful) व्यवहारविरुद्धः-द्धा-द्धं, अव्यवहारिकः-की-कं, नियमविरुद्धः-द्धा-द्धं, अधर्म्यः-र्म्या-र्म्यं, निषिद्धः-द्धा-द्धं.

ILLEGITIMATELY, *adv.* विजन्मना, जन्मवैलक्ष्येण, वैजात्येन, कुण्डवत्, अधर्म्मेण.—(Unlawfully) व्यवहारविरुद्धं, नियमविरुद्धं.

ILL-FAME, *s.* अपयशस् *n.*, अयशस् *n.*, अकीर्त्तिः *f.*, अख्यातिः *f.*, अप्रतिष्ठा.

ILL-FATED, *a.* दैवोपहतः-ता-तं, हतदैवः-वी-वं, दुर्दैवग्रस्तः-स्ता-स्तं, दुर्भाग्यः-ग्या-ग्यं, उपहतकः-का-कं.

ILL-FAVORED, *a.* कुरूपः-पा-पी-पं, अपरूपः-पी-पं, कदाकारः-रा-रं, कुत्सितरूपः-पी-पं, असुन्दरः-री-रं, दुर्दर्शनः-ना-नं, अवलक्षणी-णिनी-णि (न्).

ILL-FITTED, *a.* अयोग्यः-ग्या-ग्यं, अयुक्तः-क्ता-क्तं, अक्षमः-मा-मं.

ILL-FORMED, *a.* कुरूपी-पिणी-पि (न्), विरूपः-पी-पं, अपरूपः-पी-पं.

ILL-GOTTEN, *a.* द्रोहार्ज्जितः-ता-तं, अन्यायोपार्ज्जितः-ता-तं, वृजिनार्ज्जितः-ता-तं.

ILLIBERAL, *a.* अनुदारः-रा-रं, कृपणः-णा-णं, अदानशीलः-ला-लं, अत्यागशीलः-ला-लं, अदाता-त्री-तृ (तृ), अवदान्यः-न्या-न्यं, कुत्सितः-ता-तं, मात्सरी-रिणी-रि (न्), कृपणबुद्धिः-द्धिः-द्धि, कृपणधीः-धीः-धि, कृपणचेताः-ताः-तः (स्), कृपणस्वभावः-वा-वं, दीनचेताः &c., नीचमनाः-नाः-नः (स्).

ILLIBERALITY, *s.* कार्पण्यं, कृपणता, अनौदार्य्यं, अनुदारता, अदानशीलता, बुद्धिकार्पण्यं, स्वभावकार्पण्यं, कृपणबुद्धित्वं, स्वभावदैन्यं, बुद्धिनीचता, अत्यागशीलता, अवदान्यता, मात्सर्य्यं.

ILLIBERALLY, *adv.* अनुदारं, कृपणं, कार्पण्येन, सकार्पण्यं, कृपणवत्.

ILLICIT, *a.* निषिद्धः-द्धा-द्धं, प्रतिषिद्धः-द्धा-द्धं, अधर्म्यः-र्म्या-र्म्यं, धर्म्मविरुद्धः-द्धा-द्धं, धर्म्मरोधी-धिनी-धि (न्), नियमविरुद्धः-द्धा-द्धं, व्यवहारविरुद्धः-द्धा-द्धं, अव्यवहारिकः-की-कं, निवारणीयः-या-यं, निवार्य्यः-र्य्या-र्य्यं.

ILLIMITABLE, *a.* अनन्यः-न्या-न्यं, अनन्तः-न्ता-न्तं, अनन्तवान् -वती -वत् (त्), अप्रमेयः-या-यं, अमेयः-या-यं.

ILLIMITED, *a.* अनन्तः-न्ता-न्तं-न्तकः-का-कं, अमितः-ता-तं, अपरिमितः-ता-तं, निरवधिः-धिः-धि, अपर्य्यन्तः-न्ता-न्तं, अमर्य्यादः-दा-दं, अशेषः-षा-षं, असीमकः-का-कं.

ILLITERATE, *a.* निरक्षरः-रा-रं, अनक्षरः-रा-रं, अशिक्षितः-ता-तं, विद्याहीनः-ना-नं, ज्ञानहीनः-ना-नं, अपण्डितः-ता-तं, अप्राज्ञः-ज्ञा-ज्ञं, अकृतबुद्धिः-द्धिः-द्धि, असंस्कृतबुद्धिः-द्धिः-द्धि, अकृतः-ता-तं, अविद्यः-द्या-द्यं.

ILLITERATENESS, *s.* अपाण्डित्यं, विद्याहीनता, विद्याभावः, अप्राज्ञता, अविद्या, अशिक्षितत्वं, अकृतबुद्धित्वं.

ILL-JUDGED, *a.* अविचार्य्य or अविमृश्य or अविवेचनपूर्व्वं कृतः-ता-तं.

ILL-JUDGING, *a.* विवेकशून्यः-न्या-न्यं, अविवेकी-किनी-कि (न्).

ILL-LOOKING, *a.* दुर्दर्शनः-ना-नं, कुदर्शनः-ना-नं, कुरूपः-पी-पं.

ILL-LUCK, *s.* दुर्दैवं, दुर्भाग्यं, दौर्भाग्यं, दुर्गतिः *f.*, दौर्गत्यं, अमङ्गलं, अकुशलं, अभद्रं, अरिष्टं, व्यसनं-नित, विपत् *f.*, दुरदृष्टं, दुर्जातं, अनिष्टपातः, अश्लीकं.

ILL-MANNERED, *a.* कुशीलः-ला-लं, वामशीलः-ला-लं, दुःशीलः-ला-लं, विशीलः-ला-लं, दुर्विनीतः-ता-तं, दुर्विनयः-या-यं, दुराचारः-रा-रं, असङ्गतः-ता-तं.

ILL-NATURE, *s.* भावदुष्टता, कुशीलता, वामशीलता, दुःशीलता, दौःशील्यं, भावप्रतीपता, भावकार्कश्यं, स्वभाववक्रता, कर्कशभावत्वं, निकृतिः *f.*, प्रकृतिवक्रता.

ILL-NATURED, *a.* दुष्प्रकृतिः-तिः-ति, दुष्टप्रकृतिः-तिः-ति, दुष्टस्वभावः-वा-वं, कर्कशभावः-वा-वं, प्रतीपस्वभावः-वा-वं, वक्रप्रकृतिः-तिः-ति, दुःशीलः-ला-लं, कुशीलः-ला-लं, वामशीलः-ला-लं, कदुस्वभावः-वा-वं, नैकृतिकः-की-कं.

ILL-NATUREDLY, *adv.* स्वभावकार्कश्यात्, प्रकृति दुष्टत्वात्, कर्कशं, वामशीलत्वात्.

ILLNESS, *s.* रोगः, व्याधिः *m.*, रोगिता, आमयः, रुक् *f.* (ज्), रुजा, पीडा, अस्वास्थ्यं, अस्वस्थता, अमुस्थता, क्लेशः, दुःखं, रुग्नता, आर्त्तिः *f.*, उपतापः, कष्टं, विकारः, विकृतिः *f.*, विकरः, अमः, अमसः, तापः; 'dangerous illness,' सन्निपातकः.

ILLOGICAL, *a.* न्यायविरुद्धः-द्धा-द्धं, न्यायविपरीतः-ता-तं, अन्यायी-यिनी-यि (न्), अन्याय्यः-य्या-य्यं, अन्यायानुसारी-रिणी-रि (न्), अन्यायसिद्धः-द्धा-द्धं, अयुक्तिसिद्धः-द्धा-द्धं, अनानुमानिकः-की-कं, अतार्किकः-की-कं; 'illogical conclusion,' अविनिगमः.

ILLOGICALLY, *adv.* न्यायविरुद्धं, न्यायविरोधेन, अन्यायानुसारेण, अयुक्त्या.

ILL-OMENED, *a.* अनिष्टलक्षणः-णा-णं, अनिष्टशकुनः-ना-नं, अशस्तः-स्ता-स्तं.

Digitized by Google

ILL-STARRED, *a.* हतदैवः -वा -वं, दैवोपहतः -ता -तं, उपहतकः -का -कं, दुर्भाग्यः -ग्या -ग्यं, मन्दभाग्यः -ग्या -ग्यं.

ILL-TEMPERED, *a.* दुष्प्रकृतिः -तिः -ति, ककैशभावः -वा -वं. *See* ILL-NATURED.

ILL-TIMED, *a.* अप्राप्तावसरः -रा -रं, अप्राप्तकालः -ला -लं, अकालिकः -की -कं, असामयिकः -की -कं, अप्राप्तसमयः -या -यं, अनवसरः -रा -रं.

ILL-TRAINED, *a.* दुर्विनीतः -ता -तं, अविनीतः -ता -तं, अशिक्षितः -ता -तं.

To ILL-TREAT, *v. a.* अपकृ, अपकारं कृ, द्रोहं कृ, अर्द् (c. 10. अर्दयति -यितुं).

ILL-TREATED, *p. p.* अपकृतः -ता -तं, कृतापकारः -रा -रं, पीडितः -ता -तं, अर्दितः -ता -तं.

ILL-TURN, *s.* अपकृतं, अपकारः, अप्रियं, अहितं, हिंसा, द्रोहः, क्षतिः *f.*

To ILLUDE, *v. a.* वञ्च् (c. 10. वञ्चयते -यितुं), प्रवञ्च्, मुह् (c. 10. मोहयति -यितुं), छल् (c. 10. छलयति -यितुं), प्रतॄ (c. 10. -तारयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), प्रलुभ् (c. 10. -लोभयति -यितुं).

ILLUDED, *p. p.* मोहितः -ता -तं, विमोहितः -ता -तं, वञ्चितः -ता -तं.

To ILLUME, ILLUMINE, ILLUMINATE, *v. a.* द्युत् (c. 10. द्योतयति -यितुं), प्रद्युत्, उद्द्युत्, विद्युत्, प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, दीप् (c. 10. दीपयति -यितुं), विदीप्, उद्दीप्, प्रदीप्, विराज् (c. 10. -राजयति -यितुं), भास् (c. 10. भासयति -यितुं), प्रभास्, उद्भास्, अवभास्, भ्राज् (c. 10. भ्राजयति -यितुं), रञ्ज् (c. 10. रञ्जयति -यितुं), तेजसा रञ्ज्, विमल (nom. विमलयति -यितुं), विमलीकृ.—(Illuminate a manuscript) पत्रं रञ्ज्.

ILLUMINATED, ILLUMINED, *p. p.* द्योतितः -ता -तं, प्रद्योतितः -ता -तं, उद्द्योतितः -ता -तं, प्रकाशितः -ता -तं, विकाशितः -ता -तं, दीपितः -ता -तं, आदीपितः -ता -तं, उद्दीपितः -ता -तं, प्रदीपितः -ता -तं, राजितः -ता -तं, विराजितः -ता -तं, उज्ज्वलितः -ता -तं, भासितः -ता -तं, अवभासितः -ता -तं, उद्भासितः -ता -तं, चकासितः -ता -तं, रञ्जितः -ता -तं.

ILLUMINATION, *s.* द्योतनं, प्रद्योतनं, उद्द्योतः, द्युतिः *f.*, प्रकाशनं, विकाशनं, दीपनं, दीप्तिः *f.*, प्रदीपनं, प्रदीप्तिः *f.*, उद्दीपनं, उज्ज्वलनं, उज्ज्वलता, उद्भासः, भ्राजिष्णुता, प्रकाशता.—(Rows of lights displayed in token of joy) उत्सवकाले हर्षसूचका दीपमाला -लिका or दीपशृङ्खला or दीपसमूहः.—(Of a manuscript) पत्ररञ्जनं, कलधौतलिपिः *f.*

ILLUMINATOR, *s.* दीपकः, प्रदीपकः, प्रकाशकः, द्युतिकरः, दीप्तिकर्त्री *m.* (तृ); 'of a manuscript,' पत्ररञ्जकः.

ILLUSION, *s.* माया, मोहः, व्यामोहः, भ्रमः, भ्रान्तिः *f.*, विभ्रमः, मतिविभ्रमः, आभासः, प्रपञ्चः, इन्द्रजालं, जालं, अलीकता, कूटः, अजया, आवरणं, अविद्या; 'power of illusion,' मायाशक्तिः *f.*, आवरणशक्तिः *f.*

ILLUSIVE, ILLUSORY, *a.* मायी -यिनी -यि (न्), मायिकः -की -कं, मायावी -विनी -वि (न्), मायामयः -यी -यं, मोही -हिनी -हि (न्), जाली -लिनी -लि (न्), इन्द्रजालिकः -की -कं, ऐन्द्रजालिकः -की -कं, भ्रमी -मिणी -मि (न्), भ्रान्तिजनकः -का -कं, वञ्चकः -का -कं, अलीकः -का -कं.

To ILLUSTRATE, *v. a.* (Make clear, brighten) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, शुभ् (c. 10. शोभयति -यितुं), विमल (nom. विमलयति -यितुं), विमलीकृ, द्युत् (c. 10. द्योतयति -यितुं), दीप् (c. 10. दीपयति -यितुं).—(Elucidate, explain) व्याख्या (c. 2. -ख्याति -तुं), स्पष्टीकृ, व्यक्तीकृ, व्याकृ, सुस्पष्टीकृ, स्पष्ट (nom. स्पष्टयति -यितुं), व्याह् (c. 1. -हरति -हर्तुं), उदाह्, परिशुध् (c. 10. -शोधयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), विवरणं कृ, प्रकाश्, दृष्टान्तीकृ, दृष्टान्तेन or निदर्शनेन व्याख्या or प्रकाश्.

ILLUSTRATED, *p. p.* प्रकाशितः -ता -तं, स्पष्टीकृतः -ता -तं, व्याख्यातः -ता -तं, उदाहृतः -ता -तं, समुदाहृतः -ता -तं, द्योतितः -ता -तं, व्याकृतः -ता -तं, निरूपितः -ता -तं, वर्णितः -ता -तं, दार्ष्टान्तिकः -की -कं, उपमितः -ता -तं.

ILLUSTRATION, *s.* उदाहरणं, उदाहारः, समुदाहरणं, निदर्शनं, दृष्टान्तः, उत्प्रेक्षा, उद्देशः, उपोद्घातः, व्याख्या, प्रदर्शनं; 'for an illustration,' निदर्शनार्थं, प्रदर्शनार्थं.

ILLUSTRATIVE, *a.* प्रकाशकः -का -कं, उद्देशकः -का -कं, दार्ष्टान्तिकः -की -कं.

ILLUSTRATIVELY, *adv.* निदर्शनार्थं, प्रदर्शनार्थं, दृष्टान्तक्रमेण, उदाहरणार्थं.

ILLUSTRATOR, *a.* प्रकाशकः, अर्थप्रकाशकः, उद्देशकः, अर्थव्याख्याता *m.* (तृ), अर्थप्रदर्शकः, निदर्शनकृत्, दृष्टान्तकारी *m.* (न्), उदाहर्त्ता *m.* (र्तृ).

ILLUSTRIOUS, *a.* विश्रुतः -ता -तं, ख्यातः -ता -तं, विख्यातः -ता -तं, सुख्यातः -ता -तं, यशस्वी -स्विनी -स्वि (न्), महायशाः -शाः -शः (स्), महायशस्कः -स्का -स्कं, प्रथितः -ता -तं, प्रसिद्धः -द्धा -द्धं, कीर्त्तिमान् -मती -मत् (त्), कीर्त्तितः -ता -तं, श्रीमान् -मती -मत् (त्), दीप्तिमान् &c., यशस्वान् -स्वती -स्वत् (त्), पृथुप्रथः -था -थं, प्रतिपत्तिमान् -मती -मत् (त्), प्रतिष्ठः -ष्ठा -ष्ठं, प्रतिष्ठान्वितः -ता -तं, सुप्रतिष्ठः -ष्ठा -ष्ठं, लोकविश्रुतः -ता -तं, परिख्यातः -ता -तं, लोकप्रथितः -ता -तं, विशालः -ला -लं, प्रतीतः -ता -तं, विज्ञातः -ता -तं, द्वात्रिंशल्लक्षणोपेतः -ता -तं, लब्धनामा -मा -म (न्).—(Eminent) उत्कृष्टः -ष्टा -ष्टं, प्रमुखः -खा -खं, महाभागः -गा -गं, विशिष्टः -ष्टा -ष्टं, महान् -हती -हत् (त्), शिष्टः -ष्टा -ष्टं; 'rendering illustrious,' यशस्करः -री -रं, यशस्यः -स्या -स्यं, कीर्त्तिकरः -री -रं.

ILLUSTRIOUSLY, *adv.* महायशसा, महाकीर्त्तिपूर्वं, उत्कृष्टं, विशिष्टं, विश्रुतं, प्रथितं, प्रसिद्धं, यशस्यं.

ILLUSTRIOUSNESS, *s.* विश्रुतिः *f.*, कीर्त्तिमत्त्वं, ख्यातिमत्त्वं, यशस्विता, उत्कृष्टता.

ILL-WILL, *s.* दुष्टभावः, दुष्टबुद्धिः *f.*, द्रोहबुद्धिः *f.*, दुर्बुद्धिः *f.*, द्रोहचिन्तनं, द्रोहः, मात्सर्यं, असूया, अभ्यसूया, द्वेषः, अहितत्वं, अप्रीतिः *f.*

IMAGE, *s.* प्रतिमा, प्रतिमानं, प्रतिरूपं, प्रतिमूर्त्तिः *f.*, मूर्त्तिः *f.*, प्रतिकृतिः *f.*, प्रतिकायः, उपमा -मानं, प्रतियातना, प्रतिच्छन्दः, प्रतिनिधिः *m.*, अर्चा, विग्रहः.—(Reflected image) प्रतिबिम्बं, प्रतिच्छाया, बिम्बः -म्बं, प्रतिच्छन्दः -न्दकं.—(Idol) देवताप्रतिमा.—(Iron image) लोहप्रतिमा, सूर्मी, स्थूणा.—(Mental image) मनःकल्पना, मनःसङ्कल्पः, मनसिजं, 'image maker,' प्रतिमाकारः, उपमाता *m.* (तृ); 'a son the image of his father,' पितृरूपः पुत्रः.

To IMAGE, *v. a.* (Form an image of) बिम्ब (nom. बिम्बयति -यितुं), प्रतिबिम्ब, प्रतिमानं कृ, प्रतिरूपं कृ, प्रतिमूर्त्तिं कृ.—(In the mind) मनसा कॢप् (c. 10. कल्पयति -यितुं) or संकॢप्.

IMAGED, *p. p.* बिम्बितः -ता -तं, प्रतिबिम्बितः -ता -तं, बिम्बगतः -ता -तं, बिम्बागतः -ता -तं, कल्पितः -ता -तं; 'in the water,' जलप्रतिबिम्बितः -ता -तं; 'in the mind,' मनःकल्पितः -ता -तं.

IMAGERY, *s.* (Forms of the fancy) मनःकल्पना, मनःकल्पितं, कल्पना, मनःसङ्कल्पः, मनोवासना, मनःसृष्टिः *f.*, मनःपरिकल्पनं, मनोवासना, वासनाकल्पितं.—(Figurative style) व्यञ्जनावृत्तिः *f.*, व्यञ्जनं, व्यङ्ग्यः, उपलक्षणं, लक्षणा, निदर्शनं.

IMAGE-WORSHIP, *s.* प्रतिमापूजा, देवताभ्यर्चा, प्रतिमासेवा, मूर्त्तिसेवा.

IMAGINABLE, *a.* विभावनीयः -या -यं, विभाव्यः -व्या -व्यं, भावनीयः -या -यं, मन्तव्यः -व्या -व्यं, बोध्यः -ध्या -ध्यं, बोधनीयः -या -यं, मनःकल्पनीयः -या -यं, मनसा कल्पनीयः -या -यं, चिन्तनीयः -या -यं, चिन्यः -न्या -न्यं, बोधगम्यः -म्या -म्यं, अन्तर्भावनीयः -या -यं.

IMAGINARY, *a.* मनःकल्पितः -ता -तं, वासनाकल्पितः -ता -तं, बुद्धिकल्पितः -ता -तं, मनसा कल्पितः -ता -तं, काल्पनिकः -की -कं, मनसिजः -जा -जं, मनोजः -जा -जं, मनोभवः -वा -वं, मानसिकः -की -कं, मनोगतः -ता -तं, सङ्कल्पजः -जा -जं, मनःसृष्टः -ष्टा -ष्टं, मनोरथसृष्टः -ष्टा -ष्टं,

Digitized by Google

चिन्तामात्रकल्पितः -ता -तं, चिन्तामात्रेण परिकल्पितः -ता -तं, चिन्ताभवः -वा -वं, अमूलकः -का -कं, मायामयः -यी -यं, असत्यः -त्या -त्यं.

IMAGINATION, *s.* भावना -नं, विभावना -नं, सङ्कल्पः, कल्पना, मनःकल्पना, वासना, चिन्ता.—(Idea) बुद्धिः *f.*, मतिः *f.*, मनोगतं, मनःकल्पितं, मनसिजं, मनोजं, बोधः.—(Faculty of conception) कल्पनाशक्तिः *f.*, भावनाशक्तिः *f.*, विभावनाशक्तिः *f.*, उपलब्धिः *f.*, अनुभवः.

IMAGINATIVE, *a.* विभावकः -का -कं, कल्पकः -का -कं, परिकल्पकः -का -कं, काल्पनिकः -की -कं, भावनापरः -रा -रं, वासनापरः -रा -रं, विभावनशीलः -ला -लं.

To IMAGINE, *v. a.* (Form in the mind) मनसा कॢप् (c. 10. कल्पयति -यितुं) or संकॢप् or परिकॢप् or भू (c. 10. भावयति -यितुं) or विभू or सम्भू, मनसा सृज् (c. 6. सृजति, स्रष्टुं) or कृ.

To IMAGINE, *v. n.* (Think, conceive) मन् (c. 4. मन्यते, मन्तुं), चिन्त् (c. 10. चिन्तयति -यितुं), भू (c. 10. भावयति -यितुं), विभू, सम्भू, बुध् (c. 1. बोधति -धितुं), तर्क् (c. 10. तर्कयति -यितुं), ध्यै (c. 1. ध्यायति, ध्यातुं), अवगम् (c. 1. -गच्छति -गन्तुं), उपलभ् (c. 1. -लभते -लब्धुं), अवे (c. 2. अवैति -तुं, rt. इ), अनुभू; 'I imagine,' मन्ये; 'don't imagine,' मैवं मंस्थाः.

IMAGINED, *p. p.* चिन्तितः -ता -तं, भावितः -ता -तं, विभावितः -ता -तं, मतः -ता -तं, मनःकल्पितः -ता -तं, मनसा कल्पितः -ता -तं, वासनाकल्पितः -ता -तं, मनःसृष्टः -ष्टा -ष्टं, बुद्धः -द्धा -द्धं, उपलब्धः -ब्धा -ब्धं, अवगतः -ता -तं, मनोगतः -ता -तं, अनुभूतः -ता -तं.

IMBALM, IMBARGO, IMBARK. *See* EMBALM, &c.

IMBECILE, *a.* दुर्बलः -ला -लं, अल्पबलः -ला -लं, कृपणः -णा -णं, क्षीणबलः -ला -लं, अल्पशक्तिः -क्तिः -क्ति, क्लीबः -बा -बं.—(In mind) न्यूनबुद्धिः -द्धिः -द्धि, न्यूनधीः -धीः -धि, अल्पबुद्धिः -द्धिः -द्धि, बालिशमतिः -तिः -ति, कृपणबुद्धिः &c.

IMBECILITY, *s.* दौर्बल्यं, दुर्बलता, कार्पण्यं, कृपणता, क्लीबता, क्लैब्यं, अतेजस् *n.*, अयोग्यता, बालिश्यं.—(Mental) बुद्धिन्यूनता, न्यूनबुद्धित्वं, अल्पबुद्धित्वं, बालिशमतित्वं, बुद्धिकार्पण्यं.

IMBEDDED, *a.* अन्तर्गतः -ता -तं, निष्ठितः -ता -तं, निविष्टः -ष्टा -ष्टं; 'in rocks,' पाषाणान्तर्गतः -ता -तं.

To IMBIBE, *v. a.* निपा (c. 1. -पिबति -पातुं), उत्पा, आपा, शुष् (c. 10. शोषयति -यितुं), उच्छुष्, ग्रस् (c. 1. ग्रसते -सितुं); 'water is imbibed,' पयो निपीयते.—(Receive in the mind) मनसा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or उपलभ् (c. 1. -लभते -लब्धुं).

IMBIBED, *p. p.* निपीतः -ता -तं, आपीतः -ता -तं, उपलब्धः -ब्धा -ब्धं.

To IMBITTER, *v. a.* दुःख् (c. 10. दुःखयति -यितुं), दुःखं जन् (c. 10. जनयति -यितुं), निरानन्दं -न्दां -न्दं कृ, सदुःखं -खां -खं कृ, दुःखमयं -यीं -यं कृ, उग्रीकृ, कटूकृ, तिग्मीकृ, तीव्रीकृ, कठोरीकृ, निष्ठुरीकृ.

IMBODIED, IMBODY, IMBOLDEN. *See* EMBODIED, &c.

To IMBORDER, *v. a.* प्रान्त (nom. प्रान्तयति -यितुं), पर्य्यन्तं कृ, सीमां कृ.

INHERITANCE, *s.* (Act of receiving an inheritance) पैतृकरिक्थग्रहणं, रिक्थप्राप्तिः *f.*, अधिकारप्राप्तिः *f.*, रिक्थहरणं, वंशहरणं, रिक्थभागग्रहणं, दायभागप्राप्तिः *f.*—(Right of inheritance) उत्तराधिकारः -रिता, अधिकारः -रिता -त्वं, रिक्थाधिकारः, दायत्वं, दायाधिकारः.—(Heritage, estate, patrimony) पैतृकरिक्थं, पैतृकं रिक्थं or ऋक्थं, गोत्ररिक्थं, पैतृकधनं, गोत्रधनं, दायः, ऋक्थभागः, पैतृकं, औद्धारिकं, क्रमागतरिक्थं, क्रमागतधनं.—(Portioning of inheritance) दायविभागः, दायभागः, रिक्थविभागः, उद्धारविभागः, रिक्थवण्टनं; 'to divide an inheritance,' पैतृकरिक्थं भज् (c. 1. भजति -ते, भक्तुं) or विभज्.—(Share of an inheritance) भागः, अंशः, उद्धारः.

INHERITED, *p. p.* पितृप्राप्तः -प्ता -प्तं, पितृगृहीतः -ता -तं, क्रमागमेन प्राप्तः -प्ता -प्तं, क्रमागतः -ता -तं, क्रमायातः -ता -तं, क्रमाद् आगतः -ता -तं, अन्वयागतः -ता -तं, परम्पराप्राप्तः -प्ता -प्तं, परम्परायातः -ता -तं, पारम्पर्येणागतः -ता -तं, परम्परीणः -णा -णं.

INHERITOR, *s.* अधिकारी *m.* (न्), उत्तराधिकारी *m.*, दायादः, भागी *m.* (न्), भाक् in comp. (ज्), अंशी *m.* (न्); 'inheritor of property,' धनाधिकारी *m.*, रिक्थभागी *m.* (न्). *See* HEIR.

INHERITRESS, INHERITRIX, *s.* अधिकारिणी, उत्तराधिकारिणी, दायादी.

To INHIBIT, *v. a.* नियम् (c. 1. -यच्छति -यन्तुं), संयम्, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, वॄ (c. 10. वारयति -यितुं), निवॄ, निषिध् (c. 1. -षेधति -षेद्धुं).

INHIBITION, *s.* संयमः, निग्रहः, निवारणं, निरोधः, संरोधः, निषेधः.

INHOSPITABLE, *a.* अनातिथेयः -यी -यं, अनातिथ्यः -थ्यी -थ्यं, अतिथिद्वेषी -षिणी -षि (न्), अभ्यागतद्वेषी &c., आतिथ्यविमुखः -खा -खं, सत्कारद्वेषी &c., सत्कारविमुखः -खा -खं, असत्कारशीलः -ला -लं, अभ्यागतानुपकारी -रिणी -रि (न्), अभ्यागताशरणः -णा -णं, अभ्यागताहितः -ता -तं, अभ्यागतानादरी -रिणी -रि (न्).

INHOSPITABLENESS, INHOSPITALITY, *s.* अनातिथ्यं, अनातिथेयत्वं, अनतिथित्वं, असत्कारः, असत्कर्म्म *n.* (न्), अतिथिद्वेषः, अभ्यागतद्वेषः, अतिथ्यनादरः, अतिथ्यसत्कारः.

INHOSPITABLY, *adv.* अनातिथेयं, अनातिथ्यपूर्व्वं, असत्कारेण, असत्कारपुरःसरं, अतिथिद्वेषिवत्.

INHUMAN, *a.* अमनुष्यः -ष्या -ष्यं, अमनुष्यधर्म्मा -र्म्मी -र्म्म (न्), मनुष्यविधर्म्मा &c.—(Cruel) निर्दयः -या -यं, दयाहीनः -ना -नं, क्रूरः -रा -रं, क्रूरकर्म्मा -र्म्मी -र्म्म (न्), निष्ठुरः -रा -रं, निष्कृपः -पा -पं, निष्करुणः -णा -णं, निर्घृणः -णा -णं, राक्षसधर्म्मा &c., कठिनहृदयः -या -यं.

INHUMANITY, *s.* अमनुष्यत्वं, निर्दयता -त्वं, क्रूरता, क्रौर्य्यं, दयाहीनता, निष्ठुरता, नैष्ठुर्य्यं, निष्करुणता, कृपाहीनता, दौरात्म्यं.

INHUMANLY, *adv.* अमनुष्यवत्, निर्दयं, निष्ठुरं, नैष्ठुर्य्येण, क्रूरवत्, क्रौर्य्येण, निष्करुणं, राक्षसवत्, निष्कृपं, दुरात्मवत्.

INHUMATION, *s.* भूमिखननं, निखननं, निखातत्वं, भूमौ निखननं, भूमिसमर्पणं, भूमिनिक्षेपः, भूमिनिवेशनं, क्षितिन्यासः.

To INHUME, *v. a.* भूमौ निखन् (c. 1. -खनति -नितुं) or निधा (c. 3. -दधाति -धातुं) or स्था in caus. (स्थापयति -यितुं) or समृ in caus. (-सर्पयति -यितुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or न्यस् (c. 4. -अस्यति -असितुं).

INIMICAL, *a.* वैरी -रिणी -रि (न्), अहितः -ता -तं, अहितकारी -रिणी -रि (न्), द्वेषी -षिणी -षि (न्), द्वेषणः -णा -णं, विद्वेषी &c., विद्वेष्टा -ष्ट्री -ष्टृ (ष्टृ), सवैरः -रा -रं, अपथ्यकारी &c., अपकारी &c., प्रतिकूलः -ला -लं, विरोधी -धिनी -धि (न्), विपक्षः -क्षा -क्षं, प्रतिपक्षः -क्षा -क्षं, द्रोहबुद्धिः -द्धिः -द्धि, द्रोहवृत्तिः -त्तिः -त्ति, शात्रवः -वी -वं, शात्रवीयः -यी -यं, अहितमनाः -नाः -नः (स्), अहितशीलः -ला -लं, अमित्रः -त्रा -त्रं, अस्निग्धः -ग्धा -ग्धं, असुहृद् *m. f. n.*, अनुपकारी -रिणी -रि (न्), अननुकूलः -ला -लं, विपरीतः -ता -तं.

INIMICALLY, *adv.* शत्रुवत्, अहितवत्, सवैरं, अमित्रवत्, अस्निग्धवत्, शत्रुबुद्धा, द्रोहबुद्धा, प्रतिकूलं, विरोधेन, विरुद्धं, विपक्षवत्, अननुकूलं, विपरीतं, रिपुवत्.

INIMITABILITY, *s.* अनुपमेयता, अननुकार्य्यता, अनन्यसाध्यत्वं, अद्वितीयता.

INIMITABLE, *a.* अनुपमेयः -या -यं, अननुकार्य्यः -र्य्या -र्य्यं, अननुकरणीयः

Digitized by Google

-या -यं, अनुपमः -मा -मं, अप्रतिमः -मा -मं, उपमातीतः -ता -तं, अनुकरणातिगः -गा -गं, अनन्यसाध्यः -ध्या -ध्यं, अनन्यशक्यः -क्या -क्यं, अन्यासाध्यः -ध्या -ध्यं, अन्याशक्यः -क्या -क्यं, अतुल्यः -ल्या -ल्यं, अद्वितीयः -या -यं, असाधारणः -णा -णी -णं.

INIMITABLY, *adv.* अनुपमेयं, अननुकरणीयं, अतुल्यं, अनुपमं.

INIQUITOUS, *a.* अन्यायी -यिनी -यि (न्), अन्याय्यः -य्या -य्यं, अयथान्यायः -या -यं, न्यायविरुद्धः -द्धा -द्धं, अधार्म्मिकः -की -कं, अधर्म्मी -र्म्मिणी -र्म्मि (न्), धर्म्मापेतः -ता -तं, पापः -पा -पं, पापी -यिनी -पि (न्), पापिष्ठः -ष्ठा -ष्ठं, खलः -ला -लं, दुर्वृत्तः -त्ता -त्तं, दुराचारः -रा -रं, कुकर्म्मी -र्म्मी -र्म्मि (न्), दुष्टः -ष्टा -ष्टं, किल्बिषी -षिणी -षि (न्).

INIQUITOUSLY, *adv.* अन्यायतस्, अयथान्यायं, न्यायविरुद्धं, न्यायविरोधेन, अधर्म्मतस्, अधर्म्मेण, पापिष्ठवत्, दुष्टवत्, खलवत्, दुराचारवत्.

INIQUITY, *s.* अधर्म्मः -र्म्मता -त्वं, अन्यायः, अन्याय्यत्वं -ता, अन्यायिता, धर्म्मविरोधः, न्यायविरोधः, न्यायविरुद्धता, धर्म्मापेतत्वं, पापं, दुष्टता, पापिष्ठता, खलता, दुर्वृत्तिः *f.*, दुर्वृत्तत्वं, अनीतिः *f.*, नीतिविरोधः, कुकर्म्म *n.* (न्), दुष्कर्म्म *n.*, कुक्रिया, दुराचारत्वं, अपकर्म्म *n.*, अपचारः, शठता, दौरात्म्यं, कुमतिः *f.*, व्यसनं.

INITIAL, *a.* आदि in comp., आद्यः -द्या -द्यं, आदिकः -का -कं, आदिमः -मा -मं, आदिस्थः -स्था -स्थं, आदिवर्त्ती -र्त्तिनी -र्त्ति (न्), प्राथमिकः -की -कं, प्रथमः -मा -मं, पूर्व्वः -र्व्वी -र्व्वं, पौर्व्विकः -की -कं, पौरस्यः -स्या -स्यं, आरम्भकः -का -कं, आरम्भस्थः -स्था -स्थं.

INITIAL, *s.* (First letter of a name) नामादिवर्णः, नामाद्यक्षरं, आद्यवर्णः, प्रथमवर्णः.

To INITIATE, *v. a.* (Instruct in rudiments or principles) विद्यारम्भान् or विद्यातत्त्वानि or प्रथमतत्त्वानि उपदिश् (c. 6. -दिशति -देष्टुं), प्रथमोपदेशं कृ, प्रथमशिक्षां कृ, विद्याप्रवेशं कृ, विद्याभिनिवेशं कृ, विद्योपक्रमं कृ.—(Introduce by initiatory ceremonies) दीक्ष् (c. 1. दीक्षते -क्षितुं), उपनी (c. 1. -नयति -नेतुं), दीक्षापूर्व्वम् उपनी, दीक्षाकर्म्मपूर्व्वं or संस्कारपूर्व्वं or अभिमन्त्रणपूर्व्वं or मन्त्रपूर्व्वं प्रविश् (c. 10. -वेशयति -यितुं), दीक्षां कृ, दीक्षाकर्म्म कृ.—(Instruct in initiatory ceremonies) दीक्षाकर्म्म उपदिश्, संस्कारमन्त्रान् or दीक्षामन्त्रान् उपदिश्.

INITIATED, *p. p.* दीक्षितः -ता -तं, कृतदीक्षः -क्षा -क्षं, संस्कृतः -ता -तं, कृतसंस्कारः -रा -रं, ज्ञातसंस्कारः -रा -रं, संस्कारितः -ता -तं, अभिसंस्कृतः -ता -तं, अभिमन्त्रितः -ता -तं, मन्त्रवान् -वती -वत् (त्), उपनीतः -ता -तं, उपनीयमानः -ना -नं, कृताभिषेकः -का -कं, राद्धः -द्धा -द्धं, उपदिष्टः -ष्टा -ष्टं, कृतविद्यारम्भः -म्भा -म्भं, कृतविद्योपक्रमः -मा -मं, कृतविद्याप्रवेशः -शा -शं, विद्याप्रविष्टः -ष्टा -ष्टं.

INITIATION, *s.* (Instruction in rudiments or principles) विद्यारम्भोपदेशः, विद्यातत्त्वोपदेशः, प्रथमतत्त्वोपदेशः, प्रथमोपदेशः, प्रथमशिक्षा, विद्याप्रवेशः -शनं, विद्याभिनिवेशः -शनं.—(Introduction by initiatory ceremonies, &c.) दीक्षा, दीक्षाकरणं, दीक्षाकर्म्म *n.* (न्), उपनयः -यनं, उपनायः, दीक्षापूर्व्वम् उपनयनं, दीक्षापूर्व्वं प्रवेशनं, संस्कारः, अभिमन्त्रणं, अभिषेकः.—(Instruction in initiatory ceremonies) दीक्षाकर्म्मोपदेशः, मन्त्रोपदेशः, उपदेशः.

INITIATIVE, *s.* (Introductory step) आरम्भः, प्रत्युत्क्रमः, प्रत्युत्क्रान्तिः *f.*

INITIATIVE, INITIATORY, *a.* आरम्भकः -का -कं, प्रारम्भकः -का -कं, आद्यः -द्या -द्यं, आदिमः -मा -मं, आदिकः -का -कं.—(Relating to introductory ceremonies) दीक्षाकर्म्मसम्बन्धी -न्धिनी -न्धि (न्).

To INJECT, *v. a.* अन्तःक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अन्तःप्रक्षिप्, निक्षिप्, अन्तःक्षेपं कृ, अन्तःप्रक्षेपं कृ, अन्तःकृ.—(With a syringe) वस्तिद्वारेण अन्तःक्षिप् or अन्तःप्रक्षिप्.

INJECTED, *p. p.* अन्तःक्षिप्तः -प्ता -प्तं, अन्तःप्रक्षिप्तः -प्ता -प्तं, निक्षिप्तः -प्ता -प्तं.

INJECTION, *s.* अन्तःक्षेपः -पणं, अन्तःप्रक्षेपः -पणं, निक्षेपणं.—(Clyster) वस्तिः *m. f.*

To INJOIN. *See To* ENJOIN.

INJUDICIOUS, *a.* अविवेकी -किनी -कि (न्), अविवेचकः -का -कं, विवेकशून्यः -न्या -न्यं, विवेचनाशून्यः -न्या -न्यं, अविवेकदूष्या -ष्या -ष्य (न्), अविज्ञः -ज्ञा -ज्ञं, अविचक्षणः -णा -णं, अबुद्धिमान् -मती -मत् (त्), अविचारी -रिणी -रि (न्), अविचारकः -का -कं, विचारशून्यः -न्या -न्यं, अपरिच्छेदी -दिनी -दि (न्).

INJUDICIOUSLY, *adv.* अविवेकेन, अविवेचकवत्, विवेकं विना, अविज्ञवत्, अविचारेण, विचारं विना, अविचक्षणवत्.

INJUDICIOUSNESS, *s.* अविवेकः -कता -किता, अविवेचकत्वं, विवेकशून्यता, अविवेचना, अविज्ञता, अविचारः, विचारशून्यता, अविचक्षणता, अवैचक्षण्यं, अबुद्धिमत्त्वं, अपरिच्छेदः, परिच्छेदहीनता.

INJUNCTION, *s.* आज्ञा, आदेशः, निदेशः, निर्देशः, नियोगः, चोदनं -ना, नियमः, निदर्शनं, विधानं, शासनं, वचनं; 'sacred injunction,' विधिः *m.*, कल्पः; 'chief injunction,' मुख्यः; 'secondary,' अनुकल्पः.

To INJURE, *v. a.* हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं), विहिंस्, उपहिंस्, आहिंस्, अपकृ, क्षतिं कृ, क्षतं कृ, क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्, विक्षण्, पीड् (c. 10. पीडयति -यितुं), अर्द् (c. 10. अर्दयति -यितुं), समर्द्, व्यथ् (c. 10. व्यथयति -यितुं), रिष् (c. 1. रेषति, c. 4. रिष्यति, रेषितुं, रेष्टुं), क्षि (c. 5. क्षिणोति, c. 1. क्षयति, क्षेतुं), दुष् (c. 10. दूषयति -यितुं), नश् (c. 10. नाशयति -यितुं), हन् (c. 2. हन्ति -न्तुं), विहन्, उपहन्, धृष् (c. 10. धर्षयति -यितुं), द्रोहं कृ, द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं), अपराध् (c. 5. -राध्नोति, c. 4. -राध्यति -राद्धुं) with gen. c., रिह् (c. 1. रेहति, रेढुं), अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं), अपकारं कृ, अपायं कृ, हिंसां कृ, अहितं कृ, अन्यायं कृ, हानिं कृ, ध्वंसं कृ, दुःखं दा, क्लेशं दा, अनिष्टं कृ.

INJURED, *p. p.* हिंसितः -ता -तं, विहिंसितः -ता -तं, अपकृतः -ता -तं, प्राप्तापकारः -रा -रं, कृतापकारः -रा -रं, क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, अर्दितः -ता -तं, पीडितः -ता -तं, निपीडितः -ता -तं, व्यथितः -ता -तं, रिष्टः -ष्टा -ष्टं, कृतध्वंसः -सा -सं, दूषितः -ता -तं, विहतः -ता -तं, जातापायः -या -यं, प्राप्तहानिः -निः -नि, व्यापन्नः -न्ना -न्नं, व्यापादितः -ता -तं.

INJURER, *s.* हिंसकः, हिंसाकारी *m.* (न्), अपकारी *m.*, अपकारकः, क्षतिकारकः, अन्यायकारी *m.*, परापकारी *m.*, अनिष्टकारी *m.*, अहितकारी *m.*, द्रोहकारी *m.*, रेष्टा *m.* (ष्टृ), नशिता *m.* (तृ), नंष्टा *m.* (ष्टृ), द्रोही *m.* (न्), द्वेषी *m.* (न्), विहेठकः.

INJURIOUS, *a.* हिंसकः -का -कं, हिंस्रः -स्रा -स्रं, हिंसालुः -लुः -लु -लुकः -का -कं, हिंसात्मकः -का -कं, अपकारी -रिणी -रि (न्), अपकारकः -का -कं, आपकरः -री -रं, क्षतिकरः -री -रं, क्षतिजनकः -का -कं, हानिकरः -री -रं -जनकः -का -कं, अहितकरः -री -रं, अनिष्टकरः -री -रं, अहितः -ता -तं, नृशंसः -सा -सं, शरारुः -रुः -रु, शारुकः -का -कं, रिष्वः -ष्वा -ष्वं, घातुकः -का -कं, उपघातकः -का -कं, नंशुकः -का -कं, बाधकः -का -कं, द्रोही -हिणी -हि (न्), भूतघ्नः *m. f. n.* (ह्).

INJURIOUSLY, *adv.* हिंसापूर्व्वं, हिंसया, सापकारं, सापायं, अपकारेण, अहितं, क्षतिपूर्व्वं, द्रोहपूर्व्वं, क्षतपूर्व्वं, द्रोहेण, हिंसप्रकारेण, नृशंसं, यथा हिंसा क्रियते तथा, यथा क्षतं or अपायो जायते तथा, सद्रोहं, सदघणं.

INJURY, *s.* (Wrong) हिंसा -सनं, अपकारः, अपकृतं, अपकृतिः *f.*, अपक्रिया, द्रोहः, अभिद्रोहः, अन्यायः, अपराधः, हिंसाकर्म्म *n.* (न्), निकारः,

Digitized by Google

विप्रकारः, पीडा -डनं, प्राणिपीडा, अहितं, अनिष्टं, व्यापादः -दनं, विहेठः -ठनं.—(Hurt, harm, detriment) क्षतिः *f.*, क्षतं, परिक्षतिः *f.*, परिक्षतं, अपकारः, अपकृतं, अपायः, हानिः *f.*, नाशः, ध्वंसः, अपचयः, अपचितिः *f.*, दूषणं, अर्दना, क्षयः, उपक्षयः, बाधः, दुःखं, दोषः, भंशः.

INJUSTICE, *s.* अधर्म्मः -र्म्मता -त्वं, अन्यायः -यता -त्वं, अन्याय्यता, अन्यायिता, धर्म्मविरोधः, धर्म्मविरुद्धता, धर्म्मापेतता, न्यायविपर्य्ययः, न्यायविरोधः, न्यायविरुद्धता, अनीतिः *f.*, अनयः, दुर्नीतिः.

INK, *s.* मसिः *f.* -सी, मषिः *f.* -षी, मसिका, मसीजलं, मलिनाम्बु *n.*, पत्राञ्जनं, अञ्जनं, कालिका, काली, वर्णिका, मेला, गोला; 'red ink,' अलक्तरसः, अलक्तः -क्तकं.

To INK, *v. a.* मस्या लिप् (c. 6. लिम्पति, लेप्तुं) or मलिन (nom. मलिनयति -यितुं) or दुष् (c. 10. दूषयति -यितुं), मसिदूषितं -तां -तं कृ, कालीकृ.

INK-HORN, *s.* मसिधानी, मसिकूपी, मसिभाजनं, मसिपात्रं, मस्याधारः.

INKLING, *s.* ईषज्ज्ञानं, किञ्चिज्ज्ञानं, ईषद्बोधनं, ईषत्सूचना -नं, किञ्चित्सूचितं, इङ्गितं, सङ्केतः, भासः, आभासः, वासना.

INKSTAND, *s.* मसिधानी -नं, मसिकूपी, मसिभाजनं, मस्याधारः, मसिपात्रं, मेलान्धुः *m.*, वाह्लेलः -लं, लिपिसज्जापात्रं, लेखसाधनपात्रं, लिपिसामग्र्यभाजनं.

INKY, *a.* मसिमयः -यी -यं, मसिवर्णः -र्णा -र्णं, समसिः -सिः -सि, मसीयः -या -यं, मसिलिप्तः -प्ता -प्तं, मसिदूषितः -ता -तं.

INLAID, *p. p.* खचितः -ता -तं, अनुविद्धः -द्धा -द्धं, प्रतिबद्धः -द्धा -द्धं, प्रणिहितः -ता -तं, छुरितः -ता -तं, पिनद्धः -द्धा -द्धं, जडितः -ता -तं, करब्धः -ब्धा -ब्धं -ब्धितः -ता -तं; 'is inlaid,' प्रणिधीयते.

INLAND, *a.* मध्यदेशीयः -या -यं, मध्यदेशी -शिनी -शि (न्), मध्यदेशस्थः -स्था -स्थं, देशमध्यस्थः -स्था -स्थं, देशमध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), समुद्रदूरस्थः -स्था -स्थं, समुद्रदूरवर्त्ती -र्त्तिनी -र्त्ति (न्), समुद्रानिकटवर्त्ती &c., असमुद्रतीरस्थः -स्था -स्थं.—(Not foreign, domestic) अविदेशीयः -या -यं, देशीयः -या -यं, दैशिकः -की -कं, देश in comp.

INLANDER, *s.* समुद्रदूरवासी *m.* (न्), मध्यदेशजः, मध्यदेशवासी *m.*

To INLAPIDATE, *v. a.* पाषाणीकृ, प्रस्तरीकृ, पाषाणवत् कठिनीकृ.

To INLAY, *v. a.* नानावर्णद्रव्यैः खच् (c. 10. खचयति -यितुं) or अनुव्यध् (c. 4. -विध्यति -व्यद्धुं) or छुर् (c. 6. छुरति -रितुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं), निधा (c. 3. -दधाति -धातुं), प्रणिधा, चित्रविचित्रीकृ, करब्धीकृ, नानाविधद्रव्यैः खचितं -तां -तं कृ or जडितं कृ.

INLAYER, *s.* प्रणिधाता *m.* (तृ), नानावर्णद्रव्यनिबन्धा *m.* (न्धृ), प्रणिधायी *m.* (न्).

INLAYING, *s.* नानावर्णद्रव्यनिबन्धनं, प्रणिधानं, विचित्रीकरणं.

INLET, *s.* (Entrance, place of ingress) द्वारं, प्रवेशद्वारं, प्रवेशमार्गः, पथः, मार्गः.—(Creek, or recess in the shore of the sea) समुद्रवङ्कः, वङ्कः, खज्जः, तटभङ्गः, तीरभङ्गः, तीरभेदः, पुटभेदः, खातं.

To INLIST, *v. a.* *See* ENLIST.

INLY, *a.* आन्तरिकः -की -कं, अन्तरस्थः -स्था -स्थं. *See* INTERNAL, INWARD.

INMATE, *s.* सहवासी *m.* (न्), निवासी *m.* (न्), सहवर्त्ती *m.* (न्), सहस्थायी *m.*, एकगृहवासी *m.*, एकगृहस्थायी *m.*

INMOST, *a.* अन्तरतमः -मा -मत्, अन्तरतमस्थः -स्था -स्थं, अत्यभ्यन्तरः -रा -रं, अत्यभ्यन्तरस्थः -स्था -स्थं, अत्यन्तरस्थः &c., अत्यभ्यन्तरवर्त्ती -र्त्तिनी -र्त्ति (न्), अत्यान्तरिकः -की -कं, अत्यन्तगतः -ता -तं, अत्यन्तभूतः -ता -तं.

INN, *s.* (House for the lodging of travellers) उत्तरणगृहं, उत्तरणशाला, उत्तरणस्थानं, उत्तरणीयगेहं, उपकारी -रिका, उपकारिकागृहं, उपकार्य्यी, औपकार्य्यी -र्य्यं, प्रवासीयगृहं.—(Tavern) गञ्जा -ञ्जिका, मदिरागृहं, मदिराशाला.—(Residence of lawyers) स्मृतिशास्त्रज्ञमठः, स्मृतिशास्त्रज्ञवेश्म *n.* (न्).

To INN, *v. n.* उत्तरणगृहे वस् (c. 1. वसति, वस्तुं), उत्तरणशालां निविश् (c. 6. -विशति -वेष्टुं), अध्वमध्ये रथाद् अवतीर्य्य पूर्व्वीकृतगृहं निविश्.

To INN, *v. a.* उत्तरणगृहे वस् (c. 10. वासयति -यितुं), उत्तरणशालां निविश् (c. 10. -वेशयति -यितुं).

INN-KEEPER, *s.* उत्तरणगृहपतिः *m.*, उत्तरणशालास्वामी *m.* (न्), उपकारिकागृहाधिकारी *m.* (न्), शौण्डिकः.

INNATE, *a.* सहजः -जा -जं, सहजातः -ता -तं, अन्तर्जातः -ता -तं, निजः -जा -जं, अन्तर्भवः -वा -वं, अन्तरुत्पन्नः -न्ना -न्नं, अन्तर्भूतः -ता -तं, अन्तर्वर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तरस्थः -स्था -स्थं, स्वाभाविकः -की -कं, स्वभावजः -जा -जं, नैसर्गिकः -की -कं, निसर्गजः -जा -जं, औत्सर्गिकः -की -कं, प्रकृतिस्थः -स्था -स्थं, प्राकृतिकः -की -कं, औत्पत्तिकः -की -कं, अन्तरीयः -या -यं.

INNATELY, *adv.* स्वभावात् -वेन, स्वभावतस्, सहजं, निजभावेन.

INNATENESS, *s.* स्वाभाविकत्वं, सहजत्वं, अन्तर्भावः, अन्तर्जातत्वं, नैसर्गिकत्वं.

INNAVIGABLE, *a.* अनौतार्य्यः -र्य्या -र्य्यं, अनाव्यः -व्या -व्यं, नावतार्य्यः -र्य्या -र्य्यं, नावगम्यः -म्या -म्यं, अनौगम्यः -म्या -म्यं, नौगमनाशक्यः -क्या -क्यं.

INNER, *a.* अन्तरस्थः -स्था -स्थं, आन्तरिकः -की -कं, आन्तरः -री -रं, अन्तरीयः -या -यं, आभ्यन्तरः -री -रं, अभ्यन्तर or अन्तर or अन्तर् in comp., अन्तर्भवः -वा -वं, अन्तर्गतः -ता -तं, अन्तर्भूतः -ता -तं, अन्तर्वर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तरतमः -मा -मत्, अन्तःस्थितः -ता -तं, मध्यस्थः -स्था -स्थं, गर्भस्थः -स्था -स्थं, अन्तरङ्गः -ङ्गा -ङ्गं; 'inner apartments,' अन्तर्गृहं, अन्तर्भवनं, भवनोदरं, वासगृहं.

INNERMOST, *a.* अन्तरतमः -मा -मत्. *See* INMOST.

INNOCENCE, INNOCENCY, *s.* (Freedom from guilt) शुचिता, शुद्धता -त्वं, निष्पापत्वं, निरपराधता -धिता, अनपराधता, निर्दोषत्वं, अपापत्वं, दोषहीनता, अपराधहीनता, अपराधशून्यता, निष्कलङ्कता -त्वं, अनघता, निर्म्मलता, शुद्धमतित्वं, विमलचित्तत्वं, मतिशुद्धता, चित्तशुद्धिः *f.*, शुद्धिः *f.*—(Guilelessness) निष्कापट्यं, अकापट्यं, मायाहीनता, छलहीनता, सारल्यं, अदुष्टता; 'innocence and guilt,' गुणदोषौ *m.* du.

INNOCENT, *a.* शुचिः -चिः -चि, निरपराधः -धा -धं, अनपराधः -धा -धं -धी -धिनी -धि (न्), निर्दोषः -षा -षं -षी -षिणी -षि (न्), अदोषः -षा -षं, निष्पापः -पा -पं -पी -पिनी -पि (न्), अपापः -पा -पं, पापहीनः -ना -नं, अपराधहीनः -ना -नं -शून्यः -न्या -न्यं, पापरहितः -ता -तं, शुद्धः -द्धा -द्धं, शुद्धमतिः -तिः -ति, शुचिमनाः -नाः -नः (स्), शुचिकर्म्मा -र्म्मा -र्म्म (न्), शुक्लकर्म्मा &c., अकृष्णकर्म्मा &c., शिष्विदानः -ना -नं, निष्कलङ्कः -ङ्का -ङ्कं, अनघः -घा -घं, अकृतापराधः -धा -धं, अकृतैनाः -नाः -नः (स्), अकृतपापः -पा -पं, निर्म्मलः -ला -लं, निर्म्मलचित्तः -त्ता -त्तं, विमलचित्तः -त्ता -त्तं, अदृष्टदोषः -षा -षं, अदृष्टापराधः -धा -धं, अहेतुकः -का -कं.—(Guileless) निष्कपटः -टा -टं, निर्व्याजः -जा -जं, छलरहितः -ता -तं, निर्व्यलीकः -का -कं, विमलात्मा -त्मा -त्म (न्), मायाहीनः -ना -नं, सरलः -ला -लं, निष्कृत्रिमः -मा -मं, अकृत्रिमः -मा -मं, अदुष्टः -ष्टा -ष्टं.

INNOCENT, *s.* (A guiltless person) शुचिजनः, निरपराधी *m.* (न्).

INNOCENTLY, *adv.* अनपराधेन, निरपराधं, पापं विना, निष्पापं, शुचि, शुचिवत्, शुचिमनसा, निर्म्मलचेतसा, अनघं, अनघवत्, निर्व्यलीकं, निष्कपटं.

INNOCUOUS, *a.* अहिंसकः -का -कं, अहिंसः -सा -सं, हिंसारहितः -ता -तं. अहिंसाकरः -री -रं, अनपकारी -रिणी -रि (न्), अनपकारकः -का -कं, अक्षतिकारकः -का -कं, अद्रोही -हिणी -हि (न्).

INNOCUOUSLY, *adv.* अहिंसया, अहिंसापूर्व्वं, अक्षतिपूर्व्वं, अद्रोहेण.

Digitized by Google

INNOCUOUSNESS, *s.* अहिंसा, अनपकारः -रकता, अहिंसकत्वं, अद्रोहः.

To INNOVATE, *v. a.* (Introduce new customs) नूतनरीतिं or नवव्यवहारान् स्था in caus. (स्थापयति -यितुं) or संस्था or प्रवृत् (c. 10. -वर्त्तयति -यितुं) or कॢप् (c. 10. कल्पयति -यितुं) or प्रकॢप्, व्यवहारानन्तराणि स्था, कुलव्यवहारभिन्नान् नवाचारान् स्था, कुलाचारभिन्नान् नवीनव्यवहारान् कॢप्, देशव्यवहारभिन्नान् नूतनव्यवहारान् प्रकॢप्, देशाचारान् परिवृत् or नवीकृ, नूतनसम्प्रदायान् or मतान्तराणि स्था, अन्यसम्प्रदायान् कृ or कॢप्, नूतनकर्म्माणि प्रवृत् (c. 10. -वर्त्तयति -यितुं).

INNOVATION, *s.* (The act) नवव्यवहारस्थापनं, नूतनरीतिसंस्थापनं, व्यवहारान्तरकल्पनं, नवीनाचारसंस्थापनं, नूतनसम्प्रदायकल्पनं, देशाचारपरिवर्त्तनं, कुलाचारपरिवर्त्तनं, नूतनकर्म्मप्रवर्त्तनं, नवीकरणं.—(The change made) नूतनरीतिः *f.*, नवरीतिः *f.*, नवीनव्यवहारः, व्यवहारान्तरं, रीत्यन्तरं, नवाचारः, नवाचरितं, नवचरितं, नवमार्गः, नवधारा.

INNOVATOR, *s.* नवरीतिस्थापकः, नूतनव्यवहारस्थापकः, व्यवहारान्तरप्रकल्पकः, नवव्यवहारप्रवर्त्तकः, देशव्यवहारपरिवर्त्तकः, कुलाचारपरिवर्त्तकः, नवसम्प्रदायप्रवर्त्तकः, मतान्तरस्थापकः.

INNOXIOUS, *a.* अहिंसकः -का -कं, अहिंसः -सा -सं, अनपकारी -रिणी -रि (न्), अक्षतिकरः -री -रं, अघातुकः -का -कं, अद्रोही -हिणी -हि (न्), अरिष्यः -ष्या -ष्यं, अशारुकः -की -कं.

INNOXIOUSLY, *adv.* अहिंसया, अनपकारेण, अद्रोहेण, अक्षतिपूर्ब्बं.

INNOXIOUSNESS, *s.* अहिंसता -त्वं, अनपकारः -रकत्वं, अहिंसकत्वं -ता, अघातुकत्वं, अशारुकत्वं, हिंसात्यागः.

INNUENDO, *s.* वक्रोक्तिः *f.*, व्यंग्योक्तिः *f.*, व्यंग्यः -ग्यं, भङ्गिः *f.*, भंग्युक्तिः *f.*, श्लेषोक्तिः *f.*, पर्य्यायोक्तिः *f.*

INNUMERABLE, *a.* अगणनीयः -या -यं, अगण्यः -ण्या -ण्यं, असंख्येयः -या -यं, असंख्यः -ख्या -ख्यं, असंख्यः -ख्या -ख्यं, गणनातीतः -ता -तं, गणनाशक्यः -क्या -क्यं, संख्यातीतः -ता -तं, लक्षगुणः -णा -णं, कोटिगुणः -णा -णं, अगणितः -ता -तं; 'in innumerable numbers,' कोटिशस्.

INNUMERABLENESS, *s.* अगणनीयता, अगण्यता, असंख्येयता, असंख्यता.

INNUTRITION, *s.* अपुष्टिः *f.*, अपोषणं, पोषणाभावः, अभरणं.

INNUTRITIOUS, *a.* अपुष्टिदः -दा -दं, अपुष्टिकरः -री -रं, अपोषकः -का -कं.

INOBSERVABLE, *a.* अलक्ष्यः -क्ष्या -क्ष्यं, दुर्लक्ष्यः &c., अदृश्यः -श्या -श्यं.

To INOCULATE, *v. a.* (A tree) एकवृक्षशाखायां भिन्नवृक्षपल्लवं निविश् (c. 10. -वेशयति -यितुं), जालकं निविश्.—(Insert infectious matter in the flesh) विस्फोटरसबिन्दुं बाहुमांसे निविश् (c. 10. -वेशयति -यितुं), रक्तवरटीजपूयलवम् अन्यमांसे निविश् or त्वक्छेदनानन्तरं बाहुमांसे निविश्, विस्फोटजरसनिवेशनेन रक्तवरटीरोगम् अन्यस्मिन् संक्रम् (c. 10. -क्रामयति -यितुं) or सञ्चर् (c. 10. -चारयति -यितुं).

INOCULATED, *p. p.* (Budded) भिन्नवृक्षशाखानिवेशितः -ता -तं.—(Infected by inoculation with small-pox, &c.) स्फोटजरसनिवेशनेन रक्तवरटीरोगदूषितः -ता -तं.

INOCULATION, *s.* (Budding) एकवृक्षशाखायां भिन्नवृक्षपल्लवनिवेशनं.—(Inserting infectious matter in the flesh) सुस्थजनमांसे विस्फोटपूयलवनिवेशनं, स्फोटजरसनिवेशनेन रक्तवरटीरोगदूषणं or रक्तवटीरोगसञ्चारणं.

INOCULATOR, *s.* (Of plants) वृक्षशाखायां भिन्नवृक्षपल्लवनिवेशकः.—(Of infectious matter) विस्फोटपूयलवनिवेशकः, रक्तवरटीरोगसञ्चारकः.

INODOROUS, *a.* निर्गन्धः -न्धा -न्धं, अगन्धः -न्धा -न्धं, गन्धहीनः -ना -नं.

INOFFENSIVE, *a.* अनपकारी -रिणी -रि (न्), अनपकारकः -का -कं, अनपकारशीलः -ला -लं, अनपराधी -धिनी -धि (न्), निरपराधः -धा -धं, अहिंसकः -का -कं, अहिंसः -सा -सं, हिंसारहितः -ता -तं, अहिंसाकरः -री -रं, अपरद्रोही -हिणी -हि (न्), अद्रोहशीलः -ला -लं, निर्द्रोही &c., अपरदुःखदः -दा -दं, अपरक्लेशदः -दा -दं, अघातुकः -का -कं, अबाधकः -का -कं, अविरोधी -धिनी -धि (न्), निर्दोषी -षिणी -षि (न्), निरुपद्रवी -विणी -वि (न्), सात्विकः -की -कं, सत्वशीलः -ला -लं, अप्रतिभुक् *m. f. n.* (ज्).

INOFFENSIVELY, *adv.* अनपकारेण, अहिंसया, अद्रोहेण, अनपराधेन, निरपराधं.

INOFFENSIVENESS, *s.* अहिंसा, अनपकारः -रिता -रकता, अनपकारशीलता, अहिंसाशीलता, अहिंसा, अद्रोहः, अद्रोहशीलता, अबाधकता, सत्वशीलता, अनपराधिता, हिंसात्यागः.

INOFFICIAL, *a.* अनाधिकारिकः -की -कं, अनधिकारप्रयुक्तः -क्ता -क्तं.

INOPERATIVE, *a.* असाधकः -का -कं, अकार्य्यसाधकः -का -कं, अकार्य्यकारकः -का -कं -री -रिणी -रि (न्), अकिञ्चित्करः -री -रं, अफलोत्पादकः -का -कं.

INOPPORTUNE, *a.* अकालिकः -की -कं, आकालिकः -की -कं, अप्राप्तकालः -ला -लं, अकालीनः -ना -नं, अनवसरः -रा -रं, अप्राप्तावसरः -रा -रं, असामयिकः -की -कं, असमयोचितः -ता -तं, असमयोपयुक्तः -क्ता -क्तं, अप्रसङ्गोचितः -ता -तं, अप्राप्तप्रसङ्गः -ङ्गा -ङ्गं, अप्रास्ताविकः -की -कं, अकालसदृशः -शी -शं, अप्रस्तावसदृशः -शी -शं, अप्रस्तावयोग्यः -ग्या -ग्यं, असमयानुरूपः -पा -पं, अयथाकालः -ला -लं, अस्थानः -ना -नं, अयोग्यः -ग्या -ग्यं.

INOPPORTUNELY, *adv.* अकाले -लेन, अस्थाने -नं, अनवसरं -रेण, असमयेन, अकालसदृशं, असमयानुरूपेण, अयोग्यं, अयथाकालं, अप्रसङ्गवत्, अपदं, असाम्प्रतं, असम्प्रति.

INOPPORTUNENESS, *s.* अकालिकत्वं, आकालिकत्वं, अकालीनता, असामयिकत्वं, अनवसरः, असमयः, अयोग्यता.

INORDINATE, *a.* अपरिमितः -ता -तं, अत्यन्तः -न्ता -न्तं, आत्यन्तिकः -की -कं, अतिमर्य्यादः -दा -दं, अमर्य्यादः &c., उन्मर्य्यादः &c., मर्य्यादातीतः -ता -तं, अतिक्रान्तमर्य्यादः -दा -दं, मर्य्यादातीतः -ता -तं, अतिमात्रः -त्रा -त्रं, अमितः -ता -तं, अपरिमाणः -णा -णं, अतिमितः -ता -तं, अनियमितः -ता -तं, लंघितमर्य्यादः -दा -दं, लंघितनियमः -मा -मं, उद्रिक्तः -क्ता -क्तं, अतिरिक्तः -क्ता -क्तं.

INORDINATELY, *adv.* अपरिमितं, अत्यन्तं, अतिमर्य्यादं, अतिमात्रं, अतिशयेन, नितान्तं, सातिशयं, अतितरां, सुतरां, अत्यर्थं, तीव्रं, सुभृशं.

INORDINATENESS, *s.* अपरिमितता -त्वं, अपरिमाणं, अमितत्वं, मर्य्यादातिक्रमः, नियमातिक्रमः, आत्यन्तिकत्वं, अमर्य्यादा, उद्रिक्तता, अतिरिक्तता.

INORGANIC, *a.* अप्राणी -णिनी -णि (न्), निर्जीवः -वा -वं, जीवितसाधनहीनः -ना -नं, प्राणवायुसञ्चारहीनः -ना -नं, जडः -डा -डं, निरवयवः -वा -वं, अङ्गरहितः -ता -तं.

INOSCULATION, *s.* अग्रद्वयसन्धिः *m.* -न्धानं, पार्श्वद्वयसंयोगः.

INQUEST, *s.* (Judicial inquiry) विचारः -रणं -णा, व्यवहारपरीक्षा, व्यवहारदर्शनं.—(Inquiry into the cause of a sudden death) अपमृत्युपरीक्षा, अपमृत्युकारणविचारः, अपमृत्युवृत्तान्तविचारः.

INQUIETUDE, *s.* अशान्तिः *f.*, अशान्तचित्तता, चित्ताशान्तिः *f.*, चित्तोद्वेगः, उद्वेगः, उद्विग्नता, अनिर्वृतिः *f.*, चित्तानिर्वृतिः *f.*, मनस्तापः, चित्तवेदना, चित्तव्यथा, मनोदुःखं, मनःपीडा, कष्टं, अस्वास्थ्यं, असस्थता, असमाधानं, आधिः *m.*, क्लेशः, व्याकुलता, व्यामोहः, मानसी व्यथा, व्यस्तता, अस्थिरता, अस्थैर्य्यं, औत्सुक्यं, वैक्लव्यं.

To INQUINATE, *v. a.* दुष् (c. 10. दूषयति -यितुं), मलिन (nom. मलिनयति -यितुं).

To INQUIRE, *v. a.* (Ask a question) प्रच्छ् (c. 6. पृच्छति, प्रष्टुं), अनुप्रच्छ्, परिप्रच्छ्, समनुप्रच्छ्, प्रश्नं कृ, पृच्छनं कृ, अनुयुज् (c. 7. -युनक्ति

Digitized by Google

-युंक्ते -योक्तुं), अनुयोगं कृ, अभिचुद् (c. 10. -चोदयति -यितुं).—(Investigate, examine into) परीक्ष् (c. 1. -ईक्षते -क्षितुं), निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), ज्ञा in des. (जिज्ञासते -सितुं), अन्विष् (c. 4. -इष्यति -एषितुं), अन्वेष् (c. 1. -एषते -षितुं), विचर् (c. 10. -चारयति -यितुं), विमृश् (c. 6. -मृशति -मर्ष्टुं), चर्च् (c. 1. चर्चति -र्चितुं), निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), विनिश्चि, मार्ग् (c. 1. मार्गति, c. 10. मार्गयति -यितुं), मृग् (c. 10. मृगयते -यितुं), गवेष् (c. 10. गवेषयति -यितुं), अभिनिध्यै (c. 1. -ध्यायति -ध्यातुं), जिज्ञासां कृ, अन्वेषणं कृ.—(Inquire about one's health, &c.) कुशलप्रश्नं कृ, कुशलसम्प्रश्नं कृ, सम्प्रश्नं कृ.

INQUIRED, *p. p.* पृष्टः -ष्टा -ष्टं, अनुयुक्तः -क्ता -क्तं, परीक्षितः -ता -तं, जिज्ञासितः -ता -तं, निर्णीतः -ता -तं, चर्चितः -ता -तं, निरूपितः -ता -तं.

INQUIRER, *s.* (One who asks a question) प्रष्टा *m.* (ष्टृ), पृच्छकः, प्रश्नकारी *m.* (न्), अनुयोक्ता *m.* (क्तृ), अनुयोगकृत् *m.*—(One who investigates) परीक्षकः, निरूपकः, विचारकः, अनुसन्धाता *m.* (तृ), निर्णेता *m.* (तृ), जिज्ञासुः *m.* -सकः, अन्वेषकः, जिज्ञासाकृत् *m.*—(Inquirer after knowledge) ज्ञानेप्सुः *m.*, ज्ञानेच्छुः *m.*

INQUIRING, *a.* जिज्ञासुः -सुः -सु, ज्ञानेप्सुः -प्सुः -प्सु, ज्ञानेच्छुः -च्छुः -च्छु.

INQUIRY, *s.* (Question, interrogation) प्रश्नः, सम्प्रश्नः, पृच्छा -च्छनं, अनुयोगः -योजनं.—(Investigation) परीक्षा -क्षणं, निरूपणं, अनुसन्धानं, जिज्ञासा, विचारः -रणं -णा, अन्वेषणं -णा, चर्चा, समीक्षा -क्षणं, निर्णयः, पर्य्येषणा, गवेषणं -णा, परीष्टिः *f.*, निश्चयः, अनुसरणं, विमर्शः, विवेचना, शोधः -धनं; 'spirit of inquiry,' ज्ञानेच्छा, ज्ञानेप्सा; 'friendly inquiry respecting health,' &c. कुशलप्रश्नः, सम्प्रश्नः, सान्त्वना.

INQUISITION, *s.* (Examination) परीक्षा -क्षणं, अनुसन्धानं, जिज्ञासा, अनुयोगः, समीक्षणं, संवीक्षणं.—(Judicial) विचारः -रणा.—(Court for religious inquiry) धर्म्मपरीक्षणसभा, धर्म्मविचारणसभा.

INQUISITIVE, *a.* पिपृच्छिषुः -षुः -षु, पृच्छकः -का -कं, प्रश्नशीलः -ला -लं, पृच्छनशीलः -ला -लं, कुतूहली -लिनी -लि (न्), कौतूहलपरः -रा -रं, कौतूहलान्वितः -ता -तं, कौतुकाविष्टः -ष्टा -ष्टं, जिज्ञासुः -सुः -सु, अनुसन्धानेच्छुः -च्छुः -च्छु, अनुसन्धानशीलः -ला -लं, अन्वेषणशीलः -ला -लं, अन्वेषणासक्तः -क्ता -क्तं.—(Inclined to seek knowledge) ज्ञानेच्छुः -च्छुः -च्छु, ज्ञानेप्सुः -प्सुः -प्सु.

INQUISITIVELY, *adv.* कौतूहलेन -लात्, कुतूहलेन, जिज्ञासया, अन्वेषणशीलत्वात्, कौतुकेन, सकौतुकं.

INQUISITIVENESS, *s.* कौतूहलं, कुतूहलं, जिज्ञासाकुतूहलं, ज्ञानकुतूहलं, अनुसन्धानेच्छा, पिपृच्छिषा, जिज्ञासा, कौतुकं, कुतुकं, निरूपणेच्छा, ज्ञानेच्छा, अन्वेषणाकांक्षा, अन्वेषणासक्तिः *f.*, अन्वेषणशीलता, पृच्छनशीलता, अनुसन्धानशीलत्वं, असति प्रयोजने किमेतदिति जिज्ञासा.

INQUISITOR, *s.* परीक्षकः, विचारकः, अनुसन्धाता *m.* (तृ), निरूपकः.—(Member of court of inquisition) धर्म्मपरीक्षासभासद् *m.*, धर्म्मविचारसभासद्.

INQUISITORIAL, *a.* परीक्षकः -का -कं, अतिपरीक्षकः -का -कं, अनुसन्धायी -यिनी -यि (न्), निरूपकः -का -कं, चर्चकः -का -कं, परीक्षासम्बन्धी -न्धिनी -न्धि (न्).

INQUISITORIALLY, *adv.* अतिपरीक्षापूर्व्वं, अत्यनुसन्धानपूर्व्वं, अतिचर्चया.

To INRAIL, *v. a.* शङ्कुपंक्त्या परिवेष्ट् (c. 10. -वेष्टयति -यितुं) or आवृ (c. 5. -वृणोति -वरितुं -रीतुं) or अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

INROAD, *s.* उपद्रवः, अभिद्रवः, अवस्कन्दः -न्दनं, उपप्लवः, विप्लवः, अभिक्रमः -मणं, अकस्माद् आक्रमणं, अभिमर्दः, अभिनियोगः; 'to make inroads,' अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), उपद्रु (c. 1. -द्रवति -द्रोतुं).

INSALUBRIOUS, *a.* अनारोग्यः -ग्या -ग्यं, अनारोग्यकरः -री -रं, रोगकरः &c., रोगजनकः -का -कं, व्याधिकरः &c., अस्वास्थ्यकारकः -का -कं, अक्षेम्यः -म्या -म्यं, अक्षेमकरः -रा -रं, बाधकः -का -कं.

INSALUBRITY, *s.* अनारोग्यं, रोगजनकत्वं, व्याधिजनकत्वं, अक्षेम्यता.

INSALUTARY, *a.* अहितः -ता -तं, अक्षेमकरः -रा -रं, अक्षेमङ्करः -री -रं, अक्षेम्यः -म्या -म्यं, अहितकरः -री -रं, अनिष्टकरः &c.

INSANABLE, *a.* अचिकित्स्यः -त्स्या -त्स्यं, अशमनीयः -या -यं. *See* INCURABLE.

INSANE, *a.* उन्मत्तः -त्ता -त्तं, उन्मादवान् -वती -वत् (त्), उन्मादः -दा -दं -दी -दिनी -दि (न्), सोन्मादः -दा -दं, उन्मदः -दा -दं, उन्मादिष्णुः -ष्णुः -ष्णु, प्रमदः -दा -दं, मत्तः -त्ता -त्तं, विक्षिप्तबुद्धिः -द्धिः -द्धि -मनस्कः -स्का -स्कं, हतबुद्धिः &c., नष्टबुद्धिः &c., भ्रष्टबुद्धिः &c., बुद्धिभ्रष्टः -ष्टा -ष्टं, नष्टमतिः -तिः -ति, विक्षिप्तमतिः &c., नष्टेन्द्रियः -या -यं, भ्रान्तचित्तः -त्ता -त्तं, विप्लुतचित्तः -त्ता -त्तं, मूढचेताः -ताः -तः (स्), हतज्ञानः -ना -नं, वातुलः -ला -लं, वातूलः -ला -लं, क्षीवः -वा -वं.

INSANELY, *adv.* उन्मत्तवत्, मत्तवत्, सोन्मादं, वातुलवत्, उन्मादेन.

INSANENESS, INSANITY, *s.* उन्मत्तता, मत्तता, सोन्मादत्वं, बुद्धिभ्रंशः, बुद्धिविक्षिप्तता, चित्तविभ्रमः, चित्तविप्लवः, बुद्धिनाशः, इन्द्रियनाशः, प्रामाद्यं, वातुलता.

INSATIABLE, INSATIATE, *a.* अतर्पणीयः -या -यं, अतर्प्यः -र्प्या -र्प्यं, अनातृप्यः -प्या -प्यं, अशक्यतृप्तिः -प्तिः -प्ति, तर्पणाशक्यः -क्या -क्यं, दुष्पूरः -रा -रं, अशमनीयः -या -यं, अतोषणीयः -या -यं, अतृप्तः -प्ता -प्तं.—(Very greedy) अतिलुभः -भा -भं, अतिलोभी -भिनी -भि (न्), लोलुपः -पा -पं, बह्वाशः -शा -शं, बहुभक्षकः -का -कं, मत्सरः -रा -रं.

INSATIABLENESS, *s.* अतर्पणीयता -त्वं, अतर्प्यत्वं, अतृप्तिः *f.*, अतिलुभता.

INSATIABLY, *adv.* अतर्पणीयं, यथा तृप्तिः or तुष्टिर् न जायते तथाप्रकारेण.

INSATISFACTION, *s.* अतुष्टिः *f.*, असन्तोषः, अपरितोषः, अतृप्तिः *f.*, असमाधानं.

To INSCRIBE, *v. a.* अभिलिख् (c. 6. -लिखति -लेखितुं), लिख्, पत्रे or लेख्ये समृ in caus. (-सर्पयति -यितुं) or निविश् (c. 10. -वेशयति -यितुं) or आरुह् in caus. (-रोपयति -यितुं) or न्यस् (c. 4. -अस्यति -असितुं), अक्षराणि पत्रे निविश् or समृ or न्यस्, पत्रान्तर्गतं -तां -तं कृ, अन्तर्गतं -तां -तं कृ.—(Mark with letters) वर्णाङ्कितं -तां -तं कृ, वर्णैर् अङ्क् (c. 10. अङ्कयति -यितुं), अक्षराङ्कितं -तां -तं कृ.—(Dedicate a book) नामलिखनपूर्व्वं or नामाङ्कनपूर्व्वं ग्रन्थं समृ in caus., or निविद् (c. 10. -वेदयति -यितुं).

INSCRIBED, *p. p.* अभिलिखितः -ता -तं, लिखितः -ता -तं, न्यस्ताक्षरः -रा -रं, निवेशिताक्षरः -रा -रं, समर्पिताक्षरः -रा -रं, लेख्यारूढः -ढा -ढं, लेख्यारोपितः -ता -तं, पत्रनिवेशितः -ता -तं, पत्रान्तर्गतः -ता -तं, अङ्कितः -ता -तं.

INSCRIPTION, *s.* (Writing) अभिलेखनं, अभिलिखितं, लिखितं, लिखनं, लेखनं, लेखः -खा, लेख्यं, लिपिः *f.*, लिपिका.—(Writing on a stone) पाषाणलेखः, शिलालेखः, अङ्कितलेखः, मुद्रितलेखः.—(Dedication of a book) नामलिखनपूर्व्वं ग्रन्थसमर्पणं, नामाङ्कनपूर्व्वं ग्रन्थनिवेदनं.

INSCRUTABLE, *a.* अतर्क्यः -र्क्या -र्क्यं, दुर्ज्ञेयः -या -यं, बोधागम्यः -म्या -म्यं, बुद्ध्यतीतः -ता -तं, अबोधगम्यः -म्या -म्यं, अप्रतर्क्यः -र्क्या -र्क्यं, अज्ञेयः -या -यं, अलक्ष्यः -क्ष्या -क्ष्यं, दुर्लक्ष्यः -क्ष्या -क्ष्यं, अचिन्त्यः -न्त्या -न्त्यं, अचिन्तनीयः -या -यं, अनुपलभ्यः -भ्या -भ्यं, इन्द्रियागोचरः -रा -रं, गहनः -ना -नं, परमगहनः -ना -नं, अगाधः -धा -धं; 'whose ways are inscrutable,' अनुपलक्ष्यवर्त्मा -र्त्मा -र्त्म (न्).

INSCRUTABLY, *adv.* परमगहनं, दुर्ज्ञेयं, अचिन्तनीयं, अतर्क्यप्रकारेण.

Digitized by Google

INS

To INSCULP, *v. a.* तक्ष् (c. 1. तक्षति -क्षितुं), उपस्कृ, मुद्रीकृ, तक्षणं कृ.

INSECT, *s.* कीटः -टकः, कृमिः *m.*, क्रिमिः *m.*, नीलङ्गुः *m.*, नीलाङ्गुः, सर्पः -र्पी -र्पिणी.

INSECTILE, *a.* कीटजातीयः -या -यं, कीटधर्म्मी -र्म्मी -र्म्मि (न्).

INSECTIVOROUS, *a.* कीटभोजी -जिनी -जि (न्), कीटभक्षकः -का -कं, कीटाशी &c.

INSECURE, *a.* सशङ्कः -ङ्का -ङ्कं, शङ्कनीयः -या -यं, शंक्यः -क्या -क्यं, शङ्कान्वितः -ता -तं, सभयः -या -यं, संशयापन्नः -न्ना -न्नं, शङ्कापन्नः -न्ना -न्नं, संशयस्थः -स्था -स्थं, संशयात्मकः -का -कं, भययुक्तः -क्ता -क्तं, शङ्कास्पदं.

INSECURITY, *s.* सभयता, सशङ्कता -त्वं, शङ्कनीयता, संशयापन्नता, भयशङ्का, भयसंशयः, भयं, शङ्का, संशयः, अक्षेमः -मं.

INSENSATE, *a.* निर्बोधः -धा -धं, निर्बुद्धिः -द्धिः -द्धि, अबुद्धिमान् -मती -मत् (त्), प्रमूढः -ढा -ढं, प्रमुग्धः -ग्धा -ग्धं, अचेतनः -ना -नं.

INSENSIBILITY, INSENSIBLENESS, *s.* (Want of corporeal sensibility) अचैतन्यं, अचेतना, इन्द्रियस्खापः, इन्द्रियसुप्तिः *f.*, सुप्तिः *f.*, स्पर्शाज्ञानं, स्पर्शानभिज्ञता, नष्टेन्द्रियता, इन्द्रियनाशः.—(Want of emotion or tenderness) रागहीनता, विकाराभावः, भावहीनता, रसहीनता, दयाहीनता, कृपाहीनता.—(Dullness, torpor) जडता, जडिमा *m.* (न्), जाड्यं, अचिन्ता, कुण्ठता.—(Loss of consciousness, fainting) चेतनाहानिः *f.*, चैतन्यहानिः *f.*, चैतन्यनाशः, नष्टचेष्टता, संज्ञाहानिः *f.*, संज्ञानाशः, चित्तवैकल्यं, मोहः, प्रमोहः, प्रलयः, मूर्च्छा -र्च्छना.

INSENSIBLE, *a.* (Imperceptible) अगोचरः -रा -रं, इन्द्रियागोचरः -रा -रं, इन्द्रियाग्राह्यः -ह्या -ह्यं, इन्द्रियाविषयः -या -यं, अतीन्द्रियः -या -यं, अलक्ष्यः -क्ष्या -क्ष्यं.—(Wanting corporeal sensibility) अचेतनः -ना -नं, विचेतनः -ना -नं, विसंज्ञः -ज्ञा -ज्ञं, नष्टेन्द्रियः -या -यं, सुप्तेन्द्रियः -या -यं, सुप्तः -प्ता -प्तं, स्पर्शानभिज्ञः -ज्ञा -ज्ञं.—(Void of emotion, feeling, or tenderness) रागहीनः -ना -नं, रसहीनः -ना -नं, दयाहीनः -ना -नं, निर्दयः -या -यं, कृपारहितः -ता -तं, अनार्द्रचित्तः -त्ता -त्तं, अद्रवचित्तः -त्ता -त्तं.—(Dull, torpid) जडः -डा -डं, कुण्ठः -ण्ठा -ण्ठं, अचिन्तः -न्ता -न्तं.—(Void of consciousness, fainted) नष्टचेतनः -ना -नं, गतचेतनः -ना -नं, चैतन्यरहितः -ता -तं, अचेतनः -ना -नं, विचेतनः -ना -नं, निश्चेतनः -ना -नं, गतचेताः -ताः -तः (स्), नष्टसंज्ञः -ज्ञा -ज्ञं, निःसंज्ञः -ज्ञा -ज्ञं, संज्ञाहीनः -ना -नं, नष्टचेष्टः -ष्टा -ष्टं, निश्चेष्टितः -ता -तं, असंज्ञः -ज्ञा -ज्ञं, गतसंज्ञः -ज्ञा -ज्ञं, मृतकल्पः -ल्पा -ल्पं, प्रमूढः -ढा -ढं, प्रमुग्धः -ग्धा -ग्धं, मोहितः -ता -तं, प्रमोहितः -ता -तं, प्रलीनः -ना -नं, मूर्च्छितः -ता -तं.

INSENSIBLY, *adv.* (Imperceptibly) इन्द्रियागोचरं, अव्यक्तं, अलक्ष्यप्रकारेण, दुर्लक्ष्यं.—(Gradually) क्रमे क्रमे, क्रमशस्, क्रमेण, शनैः, पदशस्, पदे पदे, शनैः शनैः.

INSENTIENT, *a.* अचेतनः -ना -नं, विचेतनः -ना -नं, अप्राणभृत्. *See* INSENSIBLE.

INSEPARABLE, *a.* अवियोज्यः -ज्या -ज्यं, अवियोजनीयः -या -यं, अभेद्यः -द्या -द्यं, अभेदनीयः -या -यं, अविभेद्यः -द्या -द्यं, वियोजनाशक्यः -क्या -क्यं, अविभजनीयः -या -यं, अपृथक्करणीयः -या -यं, अद्वैधीकरणीयः -या -यं, नित्यसम्बन्धी -न्धिनी -न्धि (न्), नित्यसहवर्त्ती -र्त्तिनी -र्त्ति (न्), समवायसम्बन्धी &c., समवायी &c.; 'inseparable relation,' समवायसम्बन्धः, समवायिकरणं.

INSEPARABLENESS, *s.* अवियोज्यता, अभेद्यता, अविभेद्यता, नित्यसम्बन्धः.

INSEPARABLY, *adv.* अविभेदनीयं, अवियोजनीयं, नित्यसम्बन्धेन, दृढसम्बन्धेन, समवायसम्बन्धेन, यथा वियोक्तुं न शक्यते तथाप्रकारेण.

To INSERT, *v. a.* निविश् (c. 10. -वेशयति -यितुं), प्रविश, आविश, समाविश्, अन्तर्गतं -तां -तं कृ, अन्तरस्थं -स्थां -स्थं कृ, अन्तःस्थितं -तां -तं कृ, अन्तः स्था in caus. (स्थापयति -यितुं), निधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं); 'insert in writing,' अभिलिख् (c. 6. -लिखति -लेखितुं), पत्रे or लेख्ये समृ in caus. (-सर्पयति -यितुं) or आरुह् in caus. (-रोपयति -यितुं).

INSERTED, *p. p.* निवेशितः -ता -तं, प्रवेशितः -ता -तं, समावेशितः -ता -तं, निविष्टः -ष्टा -ष्टं, अन्तर्गतः -ता -तं, अन्तरस्थः -स्था -स्थं, निहितः -ता -तं, प्रत्याकलितः -ता -तं; 'in writing,' अभिलिखितः -ता -तं, लेख्यारूढः -ढा -ढं, लेख्यारोपितः -ता -तं.

INSERTION, *s.* निवेशः -शनं, प्रवेशः -शनं, आवेशनं, समावेशनं, अन्तःस्थापनं, निधानं, आरोपणं, समर्पणं; 'in writing,' अभिलिखनं, लेख्यारोपणं, लेख्यसमर्पणं.

To INSHRINE, *v. a.* *See To* ENSHRINE.

INSIDE, *s.* (Interior of any thing) अभ्यन्तरं, अन्तरं, गर्भः, उदरं, क्रोडं, अन्तःभागः, अभ्यन्तरभागः, विलं, विवरं, कुहरं; 'the inside of a house,' गृहाभ्यन्तरं, अन्तर्गृहं, अन्तर्भवनं, भवनोदरं; 'the inside of a boiler,' स्थालीविलं; 'the inside of a tree,' तरुकोटरः -रं, तरुक्रोडं.

INSIDE, *adv.* अभ्यन्तरे, अन्तर्, अन्तरे; 'inside the house,' गृहाभ्यन्तरे.

INSIDIOUS, *a.* छली -लिनी -लि (न्), छलनापरः -रा -रं, कपटी -टिनी -टि (न्), कापटिकः -की -कं, मायी -यिनी -यि (न्), बहुमायः -या -यं, भूरिमायः -या -यं, मायान्वितः -ता -तं, मायाकरः -री -रं, मायापटुः -टुः -टु, कौटिकः -की -कं, सव्याजः -जा -जं, छाद्मिकः -की -कं, प्रतारकः -का -कं, उपजापकः -का -कं, वञ्चकः -का -कं, मोही -हिनी -हि (न्), प्रलोभकः -का -कं.

INSIDIOUSLY, *adv.* छलेन, सकपटं, समायं, मायया, सव्याजं, उपजापकवत्, प्रलोभनार्थं, सकूटं, छद्मपूर्व्वं, वञ्चनार्थं, कितववत्, धूर्त्तवत्.

INSIDIOUSNESS, *s.* सकपटत्वं, कापट्यं, कूटता, सकूटता, सव्याजता, कापटिकत्वं, वञ्चकत्वं, कौटिकत्वं, छाद्मिकत्वं, उपजापः.

INSIGHT, *s.* अभिनिवेशः, निवेशः, प्रवेशः, परिज्ञानं, अभिज्ञानं, ज्ञानं, परिचयः, निरीक्षणं, अवेक्षणं, आलोचना.

INSIGNIA, *s.* चिह्नं, लक्षणं, लिङ्गं, व्यञ्जनं, उपकरणं; 'insignia of royalty,' राजलक्षणं, राजचिह्नं, नृपलक्ष्म *n.* (न्); these are 'the parasol,' छत्रं, and 'the fan,' चामरं; 'bearing of royal insignia,' प्रक्रिया, अधिकारः.

INSIGNIFICANCE, INSIGNIFICANCY, *s.* (Want of meaning) अनर्थकत्वं, निरर्थकत्वं, आनर्थकं, अर्थहीनता, अर्थशून्यता, अर्थाभावः, अनर्थवत्त्वं.—(Unimportance) लघुता, लाघवं, लघिमा *m.* (न्), प्रभावहीनता, अल्पप्रभावत्वं, अल्पत्वं, अगुरुता, अगौरवं, गौरवहीनता.—(Meanness) लाघवं, लघुवृत्तिता, क्षुद्रता, कदर्य्यत्वं, तुच्छत्वं, अपकृष्टता, अपकर्षः, कुत्सितत्वं, दीनता, निःसत्त्वं, सत्त्वहीनता, क्षुल्लकत्वं.

INSIGNIFICANT, *a.* (Void of meaning) अनर्थकः -का -कं, निरर्थकः -का -कं, निरर्थः -र्था -र्थं, अर्थहीनः -ना -नं, अर्थशून्यः -न्या -न्यं, अर्थावाचकः -का -कं, अवाचकः -का -कं.—(Unimportant) लघुः -घुः -घ्वी -घु, अगुरुः -रुः -र्व्वी -रु, अल्पप्रभावः -वा -वं, प्रभावहीनः -ना -नं, गौरवहीनः -ना -नं, अल्पः -ल्पा -ल्पं, स्वल्पः -ल्पा -ल्पं, अकिञ्चित्करः -री -रं.—(Mean) क्षुद्रः -द्रा -द्रं, कदर्य्यः -र्य्या -र्य्यं, लघुवृत्तिः -त्तिः -त्ति, तुच्छः -च्छा -च्छं, अपकृष्टः -ष्टा -ष्टं, कुत्सितः -ता -तं, निःसत्त्वः -त्त्वा -त्त्वं, सत्त्वहीनः -ना -नं, तृणप्रायः -या -यं, अल्पेष्टकीर्त्तिः -र्त्तिः -र्त्ति, किम्वान् -म्वती -म्वत् (त्); 'insignificant person,' क्षुद्रजनः, अजनः.

Digitized by Google

INSIGNIFICANTLY, *adv.* (Without meaning) सर्थं विना, अनर्थकं, निरर्थकं.—(Without importance) लघु, अगुरु, अगौरवेण, लाघवेन, अल्पप्रभावेण.

INSINCERE, *a.* असत्यः -त्या -त्यं, निःसत्यः -त्या -त्यं, असरलः -ला -लं, कृत्रिमः -मा -मं, कल्पितः -ता -तं, काल्पनिकः -की -कं, कृतकः -का -कं, कूटार्थः -र्था -र्थं, मिथ्यार्थकः -का -कं, मृषार्थकः -का -कं, कपटी -टिनी -टि (न्), कापटिकः -की -कं, छाद्मिकः -की -कं, अनृजुः -जुः -जु, जिह्मः -ह्मा -ह्मं, वक्रः -क्रा -क्रं, कुटिलः -ला -लं, मायी -यिनी -यि (न्), मायिकः -की -कं, अयथार्थः -र्था -र्थं, अनृतः -ता -तं, अलीकः -का -कं, वितथः -था -थं, अतात्त्विकः -की -कं, असात्त्विकः -की -कं, अशुद्धः -द्धा -द्धं, अनिर्म्मलः -ला -लं, मिथ्या or मृषा in comp.

INSINCERELY, *adv.* असरलं, असत्यं, निःसत्यं, कृत्रिमं, अनृतं, अयथार्थं, मायया, समायं, अशुद्धं, मिथ्या, मृषा.

INSINCERITY, *s.* निःसत्यता, असत्यता, असारल्यं, असरलता, कृत्रिमता, काल्पनिकत्वं, कूटार्थत्वं, कापट्यं, सकपटत्वं, कपटता, अनृजुता, जिह्मता, वक्रता, अनृतत्वं; कुटिलता, माया, कौटिल्यं *m.*, मायिकत्वं, कुहना, छद्म *n.* (न्), छाद्मिकत्वं, छद्मवेशः, दम्भः, दाम्भिकत्वं, कुहकवृत्तिः *f.*, अयथार्थता, अलीकता, वितथता, अपह्नवः, निह्नवः.

To INSINUATE, *v. a.* (Introduce gently) शनैः शनैः or क्रमे क्रमे प्रविश् (c. 10. -वेशयति -यितुं) or निविश् or आविश्.—(Work one's self into favor by gentle means) शनैः शनैः सान्त्वादिना or लालनादिकर्म्मणा परानुग्रहं प्राप् (c. 5. -आप्नोति -आप्तुं) or सम्पद् (c. 10. -पादयति -यितुं), परानुग्रहसम्पादनार्थं सामादिना लल् (c. 10. लालयति -यितुं) or सान्त्व् (c. 10. सान्त्वयति -यितुं) or आराध् (c. 10. -राधयति -यितुं) or अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), मन्दं मन्दं लालनाद्युपायैः परप्रीतिं गम् (c. 1. गच्छति, गन्तुं) or अधिगम्.—(Hint by oblique allusion) वक्रोक्त्या उद्दिश् (c. 6. -दिशति -देष्टुं) or सूच् (c. 10. सूचयति -यितुं) or उपन्यस् (c. 4. -अस्यति -असितुं) वक्रोक्तिं कृ, छेकोक्तिं कृ, छेकोक्त्या सूच्, सङ्केतं कृ अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपक्षिप्.

To INSINUATE, *v. n.* (Creep in) मन्दं मन्दं निविश् (c. 6. -विशति -वेष्टुं) or प्रविश् or सृप् (c. 1. सर्पति, सप्तुं) or उपसृप् or आगम् (c. 1. -गच्छति -गन्तुं) or अन्तर्गम्.

INSINUATED, *p. p.* (Introduced gently) शनैः शनैः or मन्दं मन्दं निवेशितः -ता -तं or प्रवेशितः -ता -तं.—(Hinted) वक्रोक्त्या सूचितः -ता -तं or उद्दिष्टः -ष्टा -ष्टं, अवक्षिप्तः -प्ता -प्तं, उपक्षिप्तः -प्ता -प्तं.

INSINUATING, INSINUATIVE, *a.* (Stealing gradually on the affections) शनैः शनैः परानुग्रहसम्पादकः -का -कं or परानुरागोत्पादकः -का -कं, लाली -लिनी -लि (न्), लालनशीलः -ला -लं,—(Using oblique allusion) वक्रोक्त्या सूचकः -का -कं, अवक्षेपकः -का -कं, निह्नुवानः -ना -नं.

INSINUATION, *s.* (Act of stealing on the affections) शनैः शनैः सान्त्वादिना or लालनादिना परानुग्रहसम्पादनं or परानुरागसम्प्राप्तिः *f.*, लालनं, सान्त्वनं -ना, सामादिना प्रीतिकरणं.—(Oblique allusion, hint) वक्रोक्तिः *f.*, छेकोक्तिः *f.*, व्यंग्योक्तिः *f.*, व्यङ्ग्यः, वक्रभणितं, वक्रवाक्यं, वक्रसूचितं, निह्नुतिः *f.*, निह्नवः, अवक्षेपः, पर्य्यायोक्तिः *f.*—(Creeping in gradually) मन्दं मन्दम् उपसर्पणं or अभ्यन्तरनिवेशः.

INSIPID, *a.* विरसः -सा -सं, अरसः -सा -सं, नीरसः -सा -सं, अरसिकः -का -कं, निरसः -सा -सं, रसहीनः -ना -नं, अलवणः -णा -णं, लवणहीनः -ना -नं, विस्वादः -दा -दं, निःस्वादुः -दुः -दु, स्वादहीनः -ना -नं, अस्वादुः -दुः -दु, असारः -रा -रं, निस्सारः -रा -रं, सारहीनः -ना -नं, म्लगुः -ग्वी -ग्वु, निःसत्त्वः -त्त्वा -त्त्वं, सत्त्वहीनः -ना -नं, निस्तेजाः -जाः -जः (स्).

INSIPIDITY, INSIPIDNESS, *s.* विरसता -त्वं, वैरस्यं, अरसता, आरस्यं, अरसिकत्वं, नीरसता, निरसः, रसहीनता, अलवणता, अलावण्यं, आलवण्यं, लवणहीनता, अस्वादुता, विस्वादत्वं, असारता -त्वं, सारहीनता, म्लगुता.

INSIPIDLY, *adv.* विरसं, वैरस्येन, रसादूते, रसं विना, विस्वादं.

To INSIST, *v. n.* (Insist upon, urge with firmness) निर्बन्धं कृ, अतिनिर्बन्धं कृ, आग्रहं कृ; धैर्यं or स्थैर्य्यम् अवलम्ब् (c. 1. -लम्बते -म्बितुं), अतिनिर्बन्धेन पर्य्यवस्था (c. 1. -तिष्ठति -स्थातुं); 'to insist on a thing's being done,' इदम् अवश्यं करणीयम् इति दृढोक्त्या वद् (c. 1. वदति -दितुं) or इति निर्बन्धेन वद्.

INSITIENCY, *s.* अतृष्णा, अतृषा, तृष्णाभावः, अपिपासा, पिपासाभावः.

To INSNARE, *v. a.* पाशे or उन्माथे or वागुरायां पत् (c. 10. पातयति -यितुं), जाले पातयित्वा बन्ध् (c. 9. बध्नाति, बन्द्धुं), जालबद्धं -द्धां -द्धं कृ, प्रलुभ् (c. 10. -लोभयति -यितुं).

INSNARED, *p. p.* उन्माथपातितः -ता -तं, पाशबद्धः -द्धा -द्धं, जालबद्धः &c.

INSOBRIETY, *s.* अतिपानं, मद्यपानासक्तिः *f.*, मत्तता, उन्मत्तता.

INSOCIABLE, *a.* संलापविमुखः -खी -खं, सम्भाषणविमुखः -खी -खं, संलापपराङ्मुखः &c., असंलापी -पिनी -पि (न्), अनालापी &c., असंलापशीलः -ला -लं.

To INSOLATE, *v. a.* सूर्य्यैर्व्याप्तं -प्तां कृ, सूर्य्यतेजोव्याप्तं -प्तां कृ, सूर्य्यैकिरणव्याप्तं -प्तां कृ, सूर्य्यैर्व्याप्यं -प्यां कृ.

INSOLENCE, INSOLENCY, *s.* धर्षः -र्षणं, धृष्टता, धार्ष्ट्यं, दर्पः, प्रगल्भता प्रागल्भ्यं, उद्धतिः *f.*, औद्धत्यं, अवहेला -लनं, अवलेपः, अवलिप्तता, सावलेपत्वं, गर्व्वः, उन्मादः, प्रतिभानं, वैयात्यं, निर्लज्जत्वं, अविनयः, उन्माथः, उत्सिक्तता, उत्सेकः.

INSOLENT, *a.* धृष्टः -ष्टा -ष्टं, धर्षितः -ता -तं, प्रधृष्टः -ष्टा -ष्टं, धर्षी -र्षिणी -र्षि (न्), प्रधर्षितः -ता -तं, दृप्तः -प्ता -प्तं, सदर्पः -र्पा -र्पं, प्रगल्भः -ल्भा -ल्भं, उद्धतः -ता -तं, मदोद्धतः -ता -तं, गर्व्वी -र्व्विणी -र्व्वि (न्), गर्व्वितः -ता -तं, अवलिप्तः -प्ता -प्तं, सावलेपः -पा -पं, सावहेलः -ला -लं, उत्सिक्तः -क्ता -क्तं, उन्मत्तः -त्ता -त्तं, अविनीतः -ता -तं, अविनयः -या -यं, प्रतिभामुखः -खी -खं, प्रतिभानवान् -वती -वत् (त्), प्रतिभावान् &c., प्रतिभान्वितः -ता -तं, वियातः -ता -तं, निर्लज्जः -ज्जा -ज्जं, लज्जाहीनः -ना -नं, मदोदग्रः -ग्रा -ग्रं.

INSOLENTLY, *adv.* धृष्टवत्, धर्षेण, सधर्षं, सदर्पं, दर्पेण, प्रगल्भं, प्रगल्भवत्, प्रागल्भ्येन, सावलेपं, सावहेलं, अविनयेन, प्रसह्य, अभिषह्य, प्रमथ्य.

INSOLIDITY, *s.* अघनता -त्वं, अकाठिन्यं, अदृढता, अन्तःशून्यता.

INSOLUBILITY, INSOLVABLENESS, *s.* (Indissolvable) अद्राव्यता, अद्रवणीयता, अगलनीयता, द्रावणाशक्यता, अविलयनीयता.

INSOLUBLE, INSOLVABLE, *a.* (Indissolvable) अद्राव्यः -व्या -व्यं, अद्रवणीयः -या -यं, अभेद्यः -द्या -द्यं, अगलनीयः -या -यं.—(Not to be solved) अपरिशोधनीयः -या -यं, अव्याख्येयः -या -यं.

INSOLVENCY, *s.* परिक्षीणता, ऋणशोधनाशक्तिः *f.*, ऋणमोचनाशक्तिः *f.*, ऋणमोक्षणासमर्थ्यं, ऋणापकरणाशक्तिः *f.*, ऋणशोधनाक्षमता, निर्धनता.

INSOLVENT, *a.* परिक्षीणः -णा -णं, ऋणशोधनाक्षमः -मा -मं, ऋणशोधनाशक्तः -क्ता -क्तं, ऋणमोचनाशक्तः -क्ता -क्तं, ऋणापकरणाशक्तः -क्ता -क्तं, ऋणापकरणासमर्थः -र्था -र्थं, ऋणपरिशोधनाक्षमः -मा -मं, निर्धनः -ना -नं, गतविभवः -वा -वं.

IN SO MUCH THAT, *adv.* (To such a degree) एतत्पर्य्यन्तं, एतावत्पर्य्यन्तं, एतावत्, एतदवधि, एतावदवधि, यथा तथा.

To INSPECT, *v. a.* निरीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्ष्, अवेक्ष्, वीक्ष्,

Digitized by Google

अभिवीक्ष्, समीक्ष्, निरूप् (c. 10. -रूपयति -यितुं), दृश् (c. 1. पश्यति, द्रष्टुं), अनुदृश्, परिदृश्, अभिदृश्, प्रतिदृश्, सन्दृश्, अनुसन्धा (c. 3. -दधाति -धातुं), आलोच् (c. 10. -लोचयति -यितुं), आलोक् (c. 10. -लोकयति -यितुं), कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, कार्य्यावेक्षणं कृ.

INSPECTED, *p. p.* निरीक्षितः -ता -तं, अवेक्षितः -ता -तं, निरूपितः -ता -तं, परीक्षितः -ता -तं, आलोचितः -ता -तं, समीक्षितः -ता -तं.

INSPECTION, *s.* (Looking into, examination) निरीक्षणं, निरीक्षा, परीक्षा -क्षणं, अवेक्षणं, अवेक्षा, समीक्षा -क्षणं, प्रसमीक्षा, वीक्षणं, संवीक्षणं, निरूपणं, अनुसन्धानं, आलोचनं -ना, आलोकनं, दर्शनं, सन्दर्शनं, कार्य्यदर्शनं, कार्य्येक्षणं, कार्य्यावेक्षणं, अनुसन्धानं.—(Superintendence) अध्यक्षता -त्वं, कार्य्याधीशता, अधिकारः, अधिकर्म्म *n.* (न्).

INSPECTOR, *s.* (One who looks into, examines) निरीक्षकः, निरीक्षिता *m.* (तृ), अवेक्षकः, अवेक्षिता *m.*, परीक्षकः, समीक्षकः, निरूपकः, निरूपयिता *m.* (तृ), अनुसन्धाता *m.* (तृ), द्रष्टा *m.* (ष्टृ), उपद्रष्टा.—(Superintendent of affairs) अध्यक्षः, कार्य्याध्यक्षः, कार्य्यद्रष्टा *m.* (ष्टृ), कार्य्याधीशः, कार्य्यावेक्षिता *m.* (तृ), कार्य्येक्षिता *m.*, अधिकारी *m.* (न्), कर्म्माधिकारी *m.*, अधिकर्म्मिकः; 'inspector of morals,' धर्म्माध्यक्षः, व्यवहारद्रष्टा *m.* (ष्टृ); 'of the coinage,' रूप्याध्यक्षः; 'of a district,' गोपः.

INSPECTORSHIP, *s.* अध्यक्षता -त्वं, कार्य्याध्यक्षत्वं, कार्य्याधीशता, प्रभुत्वं.

INSPERSION, *s.* निषेकः, निषेचनं, अभिषेकः, अभिषिञ्चनं, प्रोक्षणं, अभिप्रोक्षणं, अभ्युक्षणं, समुक्षणं.

INSPIRATION, *s.* (Breath inspired) श्वासः, श्वसनं, श्वसितं, प्राणः, निश्वासः, उच्छ्वासः, आनः, आहरः.—(Act of drawing air into the lungs) श्वासग्रहणं, प्राणग्रहणं, श्वासादानं, प्राणादानं, श्वसनं, निश्वसनं, निश्वासग्रहणं; 'inspiration and expiration,' श्वासप्रश्वासं, श्वासनिःश्वासं.—(Breathing into any thing) श्वासपूरणं, प्राणपूरणं, श्वासेन पूरणं, श्वासप्रक्षेपणं.—(Infusion) प्रक्षेपः -पणं, निक्षेपः.—(Supernatural infusion into the mind) ईश्वरप्रेरणा, ईश्वरसञ्चारणं, ईश्वरसूचना, ईश्वरोपदेशः, ईश्वरप्रबोधः, ईश्वरात्मावेशः, ईश्वरात्मव्याप्तिः *f.*, ईश्वरप्रयुक्तज्ञानं, दैवज्ञानं, गोत्रं; 'poetical inspiration,' प्राणः.

To INSPIRE, *v. a.* (Breathe into) श्वासेन पॄ (c. 10. पूरयति -यितुं), श्वासपूरितं -तां -तं कृ.—(Draw into the lungs) श्वासग्रहणं कृ, श्वासादानं कृ, श्वस् (c. 2. श्वसिति -तुं), निश्वस्, उरःस्थानं श्वासेन पॄ, श्वासमार्गेण प्राणम् आकृष् (c. 1. -कर्षति -क्रष्टुं); 'to inspire and expire,' श्वासप्रश्वासं कृ, श्वासनिःश्वासं कृ.—(Infuse into the mind, suggest) चित्ते निविश् (c. 10. -वेशयति -यितुं), प्रबुध् (c. 10. -बोधयति -यितुं), उपन्यस् (c. 4. -अस्यति -असितुं), उपनिधा (c. 3. -दधाति -धत्ते -धातुं); 'inspire with fear,' भयम् उपनिधा or जन् (c. 10 जनयति -यितुं) or उत्पद् (c. 10. -पादयति -यितुं), सभयं -यां कृ.—(Inspire with courage, incite) आश्वस् (c. 10. -श्वासयति -यितुं), समाश्वस्, उच्छ्वस्, विश्वस्, उत्तिज् (c. 10. -तेजयति -यितुं), प्रोत्सह्, (c. 10. -साहयति -यितुं), समुत्सह्, प्रेर् (c. 10. -ईरयति -यितुं), नियुज् (c. 10. -योजयति -यितुं), प्रयुज्, प्रवृत् (c. 10. -वर्त्तयति -यितुं), तेजः or विश्वासं कृ or जन् or उत्पद्.—(Inspire supernaturally) ईश्वरप्रेरितं -तां कृ, ईश्वरोपदिष्टं -ष्टां कृ.

INSPIRED, *p. p.* (Breathed) श्वसितः -ता -तं, निश्वसितः -ता -तं, उच्छ्वसितः -ता -तं.—(Infused) व्याप्तः -प्ता -प्तं, भावितः -ता -तं, निवेशितः -ता -तं.—(Supernaturally inspired) ईश्वरप्रेरितः -ता -तं, ईश्वरोपदिष्टः -ष्टा -ष्टं, ईश्वरसूचितः -ता -तं, ईश्वरसञ्चारितः -ता -तं, ईश्वरप्रबोधितः -ता -तं, ईश्वरात्मव्याप्तः -प्ता -प्तं.—(Inspired with courage) आश्वासितः -ता -तं, जातविश्वासः -सा -सं, उत्तेजितः -ता -तं; 'inspired with,' is often expressed by जात in comp.; as, 'inspired with fear,' जातभयः -या -यं.

To INSPIRIT, *v. a.* आश्वस् (c. 10. -श्वासयति -यितुं), समाश्वस्, विश्वस्, उत्तिज् (c. 10. -तेजयति -यितुं), तेजः or विश्वासं or समाश्वासं कृ or दा or जन् (c. 10. जनयति -यितुं) or उत्पद् (c. 10. -पादयति -यितुं), प्रोत्सह् (c. 10. -साहयति -यितुं), उत्सह्, हृष् (c. 10. हर्षयति -यितुं), प्रहृष्, उल्लस् (c. 10. -लासयति -यितुं), जीव् (c. 10. जीवयति -यितुं).

INSPIRITED, *p. p.* आश्वासितः -ता -तं, समाश्वासितः -ता -तं, उच्छ्वसितः -ता -तं, उत्तेजितः -ता -तं, प्रोत्साहितः -ता -तं, उत्साहितः -ता -तं, जातोत्साहः -हा -हं, जाततेजाः -जाः -जः (स्).

INSPIRITING, *a.* आश्वासकः -सिका -कं, उत्तेजकः -का -कं, प्रोत्साहकः -का -कं, उत्साहजनकः -का -कं, उत्साहकारकः -का -कं, तेजस्करः -री -रं, तेजोवर्धकः -का -कं, हर्षकः -का -कं.

To INSPISSATE, *v. a.* घनीकृ, स्थूलीकृ, सान्द्रीकृ, स्थव (nom. स्थवयति -यितुं).

INSPISSATE, INSPISSATED, *a.* or *p. p.* घनः -ना -नं, घनीभूतः -ता -तं, स्थूलः -ला -लं, स्थूलीभूतः -ता -तं, सान्द्रः -न्द्रा -न्द्रं, स्त्यानः -ना -नं, निविडः -डा -डं.

INSPISSATION, *s.* घनता -त्वं, घनीकरणं, स्थूलता, स्थूलीकरणं, सान्द्रता, सान्द्रीभावः, नैविड्यं, गाढता.

INSTABILITY, *s.* अस्थिरता, अस्थैर्य्यं, अधैर्य्यं, अधृतिः *f.*, अधीरता, अस्थायित्वं, अनवस्थितिः *f.*, अनवस्था, चञ्चलता, चाञ्चल्यं, चापल्यं.

INSTABLE, *a.* अस्थिरः -रा -रं, अधीरः -रा -रं. *See* UNSTABLE.

To INSTALL, *v. a.* अभिषिच् (c. 6. -षिञ्चति -षेक्तुं), with loc. c. of the office in which one is installed, अभिषेकादिसंस्कारेण नवाधिकारं प्रविश् (c. 10. -वेशयति -यितुं), संस्कारपूर्व्वं नवाधिकारप्रवेशनं कृ, यथाविधि प्रतिष्ठा in caus. (-ष्ठापयति -यितुं) or अधिकारारूढं कृ, अभिमन्त्र् (c. 10. -मन्त्रयति -यितुं), उपनिमन्त्र्, पदस्थं कृ.

INSTALLATION, *s.* अभिषेकः, अभिषेचनं, अभिषेकादिसंस्कारेण नवाधिकारप्रवेशः, संस्कारपूर्व्वं नवाधिकारप्रवेशनं, अधिकारप्रवेशसंस्कारः, प्रतिष्ठा -ष्ठापनं, संस्कारः, अधिकारस्थापनं, अधिकारप्रतिष्ठापनं, पदस्थापनं.

INSTALLED, *p. p.* अभिषिक्तः -क्ता -क्तं, कृताभिषेकः -का -कं, प्राप्ताभिषेकः -का -कं, कृतसंस्कारः -रा -रं, प्राप्तसंस्कारः -रा -रं, संस्कारपूर्व्वं नवाधिकारप्रवेशितः -ता -तं or नवाधिकारप्रतिष्ठापितः -ता -तं or नवपदप्रतिष्ठापितः -ता -तं, प्रतिष्ठितः -ता -तं, प्रतिष्ठापितः -ता -तं, कृतप्रतिष्ठः -ष्ठा -ष्ठं, लब्धप्रतिष्ठः -ष्ठा -ष्ठं, अधिकारस्थः -स्था -स्थं, पदारूढः -ढा -ढं, अधिकारारूढः -ढा -ढं, अभिसंस्कृतः -ता -तं.

INSTALMENT, *s.* (Act of installing). *See* INSTALLATION. (Part of a large sum of money to be paid) कालान्तरेण देयस्य बहुधनस्य भागः or विभागः or अंशः, ऋणभागः, ऋणविभागः; 'by instalments,' भागशस्, विभागशस्, विभागतस्, शनैः.

INSTANCE, *s.* (Urgency, urgent solicitation) निर्बन्धः, प्रार्थनं -ना, निर्बन्धेन प्रार्थनं, आग्रहः, प्रेरणा.—(Example) दृष्टान्तः, निदर्शनं, उदाहरणं, उदाहारः, उपोद्घातः, प्रतीकं, लक्ष्यं; 'for instance,' दृष्टान्तरूपेण, दृष्टान्ततस्, यथा, तथाहि, तथा.—(Case) स्थलं, पदं.—(Occasion) प्रस्तावः, समयः, वारः, स्थानं; 'in the first instance,' प्रथमसमये, प्रथमं -मतस्, अग्रे.

To INSTANCE, *v. n.* दृष्टान्तं कृ, दृष्टान्तीकृ, दृष्टान्तं दा, दृष्टान्त (nom. दृष्टान्तयति -यितुं), दृष्टान्तक्रमेण कथ् (c. 10. कथयति -यितुं).

INSTANT, *a.* (Urgent) निर्बन्धशीलः -ला -लं, आग्रही -हिणी -हि (न्), आग्रहशीलः -ला -लं, अतियाचकः -का -कं, अतिप्रार्थकः -का -कं.—

Digitized by Google

IRRECONCILABLENESS, *s.* असङ्गतिः *f.*, परस्परविरोधः, अन्योन्यविपरीतता.

IRRECOVERABLE, *a.* असमाहार्यः-र्य्यी-र्य्यं, अपुनःप्राप्यः -प्या -प्यं, पुनरप्राप्यः -प्या -प्यं, अपुनर्लभ्यः -भ्या -भ्यं, पुनरलभ्यः -भ्या -भ्यं, अपुनरादेयः -या -यं, अनावाप्यः -प्या -प्यं, अनुद्धरणीयः -या -यं.

IRRECOVERABLY, *adv.* असमाहार्य्यं, अनुद्धरणीयं, यथा उद्धर्तुं न शक्यते तथा.

IRREFRAGABLE, *a.* अखण्डनीयः -या -यं, अखण्डयः -ण्ड्या -ण्ड्यं, अप्रत्याख्येयः -या -यं, अबाध्यः -ध्या -ध्यं, अविवदनीयः -या -यं, असन्दिग्धः -ग्धा -ग्धं, सुनिश्चितः -ता -तं, वज्रप्रमाणः -णा -णं, दृढप्रमाणः -णा -णं.

IRREFRAGABLENESS, *s.* अखण्डनीयता, अखण्डयता, अबाध्यत्वं.

IRREFRAGABLY, *adv.* अखण्डनीयं, यथा खण्डनं कर्तुं न शक्यते तथा.

IRREFUTABLE, *a.* अखण्डनीयः -या -यं, अखण्डितव्यः-व्या-व्यं, अशक्यखण्डनः -ना -नं, खण्डनाशक्यः -क्या -क्यं, अनिरसनीयः -या -यं.

IRREGULAR, *a.* विधिविरुद्धः -द्धा -द्धं, विधिभ्रष्टकः -का -कं, विधिहीनः -ना -नं, अविधिः -धिः -धि, अवैधः -धी -धं, अवैधिकः -की -कं, विधिघ्नः -घ्नी -घ्नं, नियमविरुद्धः -द्धा -द्धं, अयथाविधिः -धिः -धि, शास्त्रविरुद्धः -द्धा -द्धं, उत्सूत्रः -त्रा -त्रं, विसूत्रः -त्रा -त्रं.—(Immethodical) अक्रमकः -का -कं -मिकः -का -कं, क्रमविरुद्धः -द्धा -द्धं, क्रमहीनः -ना -नं, क्रमशून्यः -न्या -न्यं, क्रमरहितः -ता -तं, क्रमबाह्यः -ह्या -ह्यं, अव्यवस्थितः -ता -तं, असंस्थितः -ता -तं, अपर्य्यायः -या -यं, उच्छृङ्खलः -ला -लं.—(In conduct) व्यभिचारी -रिणी -रि (न्), अमर्य्यादः -दा -दं, उत्क्रान्तमर्य्यादः -दा -दं. धर्म्मरोधी -धिनी -धि (न्), धर्म्मविरुद्धः -द्धा -द्धं, विपथगामी -मिनी -मि (न्), अपथगामी &c., अपथवर्त्ती -र्त्तिनी -र्त्ति (न्), अन्यथाचारी &c., आचारवर्जितः -ता -तं, कुचरितः -ता -तं.—(In grammar, to be excepted) वर्ज्जनीयः -या -यं, निपातितः -ता -तं, निपातनीयः -या -यं.—(Uneven, unequal) विषमः -मा -मं, असमः -मा -मं; 'irregular fever,' विषमज्वरः.—(In shape) विरूपः -पा -पी -पं.

IRREGULARITY, *s.* अविधिः *m.*, अविधानं, अविधिता, विधिविरोधः, विधिभङ्गः, अवैधत्वं, उत्सूत्रता, विसूत्रता, शास्त्रविरोधः, नियमविरोधः, अनियमः, अक्रमः, उत्क्रमः, व्यतिक्रमः, क्रमविरोधः, अव्यवस्था, अपरिपाटिः *f.*—(In conduct) व्यभिचारः, विपथगमनं, कुपथगमनं, अपथः, कुपथः, अधर्म्मः -र्म्मत्वं, अनाचारः.—(In grammar, exception) निपातः -तनं, वर्ज्जनं, निषेधः.—(Unevenness) विषमता, वैषम्यं, विषमं, असमता; 'irregularity in diet,' कुपथ्यं, अपथ्यं.

IRREGULARLY, *adv.* अविधितस्, अविधानतस्, अविधिवत्, विधिविरुद्धं, विधिविरोधेन, नियमविरुद्धं, अनियमतस्, अयथाविधि, अक्रमेण, क्रमविरुद्धं, विसूत्रं, अव्यवस्थितं, अयथाशास्त्रं.

IRRELATIVE, *a.* असम्बन्धी -न्धिनी -न्धि (न्), निःसम्बन्धः -न्धा -न्धं, सम्बन्धहीनः -ना -नं, असङ्गः -ङ्गा -ङ्गं, निःसङ्गः -ङ्गा -ङ्गं, अविषयकः -का -कं, अनानुषङ्गिकः -की -कं.

IRRELEVANCY, *s.* अप्रासङ्गिकत्वं, अप्रस्तुतता, अप्रसङ्गः, अविषयत्वं, निर्विषयता, अनन्वयः, अन्वयाभावः, असम्बन्धः, असम्पर्कः, असङ्गतत्वं, अप्रयुक्तिः *f.*

IRRELEVANT, *a.* अप्रासङ्गिकः -की -कं, अप्रस्तुतः -ता -तं, निर्विषयः -या -यं, अनन्वितः -ता -तं, असम्बन्धी -न्धिनी -न्धि (न्), अप्रसक्तः -क्ता -क्तं, प्रसङ्गबाह्यः -ह्या -ह्यं, प्रस्तुतवहिर्भूतः -ता -तं, असङ्गतः -ता -तं, अप्रकृतः -ता -तं, अप्राकरणिकः -की -कं, असम्पर्कीयः -या -यं, अनुपपन्नः -न्ना -न्नं, अप्रयुक्तः -क्ता -क्तं, अयौक्तिकः -की -कं.

IRRELEVANTLY, *adv.* अप्रस्तुतं, निर्विषयं, प्रस्तुतवहिस्, असम्बद्धं, असम्बन्धेन, असङ्गतं, अप्रयुक्तं, असम्पर्केण, अप्रसक्तं.

IRRELIGION, *s.* अधर्म्मः -र्म्मत्वं, वैधर्म्यं, निर्धर्म्मत्वं, धर्म्मलोपः, धर्म्महीनता, अपूजा, अभक्तिः *f.*, भक्तिहीनता, अभक्तत्वं, देवनिन्दा, अपुण्यत्वं, दुष्टता, पापिष्ठत्वं, सपापत्वं, दुष्कृतं.

IRRELIGIOUS, *a.* अधर्म्मी -र्म्मिणी -र्म्मि (न्), अधार्म्मिकः -की -कं, निर्धर्म्मः -र्म्मा -र्म्मं, अधर्म्मिष्ठः -ष्ठा -ष्ठं, धर्म्महीनः -ना -नं, त्यक्तधर्म्मा -र्म्मा -र्म्मं (न्), अपूजकः -का -कं, अभक्तः -क्ता -क्तं, भक्तिहीनः -ना -नं, देवनिन्दकः -का -कं, दुष्टः-ष्टा-ष्टं, अपुण्यः-ण्या -ण्यं, असाधुः-ध्वी -धु, पापी-पिनी-पि(न्),

IRRELIGIOUSLY, *adv.* अधर्म्मतस्, अधर्म्मेण, अधार्म्मिकवत्, अपुण्यवत्, पापिष्ठं.

IRREMEABLE, *a.* अपुनरागम्यः-म्या-म्यं, अप्रत्यागम्यः &c., अपरावर्त्यः-र्त्या-र्त्यं.

IRREMEDIABLE, *a.* अप्रतिकार्य्यः -र्य्या -र्य्यं, अशक्यप्रतीकारः -रा -रं, अप्रतिकारः-रा-रं, अविद्यमानप्रतीकारः-रा-रं, निरुपायः-या-यं, अनुपायः-या-यं, निरुपायी -यिनी -यि (न्), उपायहीनः -ना -नं, उपायातीतः -ता -तं, अशक्योपायः -या -यं, अचिकित्स्यः -त्स्या -त्स्यं, अचिकित्सनीयः -या -यं, चिकित्सितुम् अशक्यः-क्या-क्यं, असमाधेयः-या-यं, अप्रतिसमाधेयः-या-यं.

IRREMEDIABLENESS, *s.* निरुपायत्वं, अप्रतिकार्य्यत्वं, प्रतीकारहीनता, असमाधेयता.

IRREMEDIABLY, *adv.* निरुपायं, यथा प्रतिकर्तुं न शक्यते तथाप्रकारेण, यथा उपायो न विद्यते तथा.

IRREMISSIBLE, *a.* अक्षन्तव्यः -व्या -व्यं, अमोचनीयः -या -यं, क्षमानर्हः-र्हा-र्हं.

IRREMOVABLE, *a.* अनपादेयः -या -यं, अनपहरणीयः -या -यं, अपरिहार्य्यः -र्य्या -र्य्यं, अनिःसारणीयः -या -यं, अनपनेतव्यः -व्या -व्यं, अचलः -ला -लं, स्थिरः -रा -रं.

IRREPARABLE, *a.* असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, असन्धेयः -या -यं, असमाधेयः -या -यं, अप्रतिसमाधेयः -या -यं, अप्रतिकार्य्यः -र्य्या -र्य्यं, अप्रतिकारः -रा -रं, अशक्यप्रतीकारः -रा -रं, अचिकित्सनीयः -या -यं, अनुड्डाय्यः -य्या -य्यं, अनुद्धरणीयः -या -यं.

IRREPARABLENESS, *s.* असाध्यता, अप्रतिकार्य्यत्वं, असमाधेयता, अनुड्डाय्यत्वं,

IRREPARABLY, *adv.* असाधनीयं, यथा प्रतिकारो न विद्यते तथा, अचिकित्सनीयं, अप्रतिसमाधेयं.

IRREPREHENSIBLE, *a.* अनिन्द्यः -न्द्या -न्द्यं, अनिन्दनीयः -या -यं, निर्दोषः -षा -षं, दोषशून्यः -न्या -न्यं, अगर्ह्यः -र्ह्या -र्ह्यं, अविगर्ह्यः -र्ह्या -र्ह्यं.

IRREPREHENSIBLENESS, *s.* अनिन्द्यता, अनिन्दनीयता, दोषशून्यता, निर्दोषत्वं.

IRREPREHENSIBLY, *adv.* अनिन्दनीयं, निरपराधं, अनपराधेन, दोषं विना.

IRREPRESSIBLE, *a.* अनिग्रहीतव्यः -व्या -व्यं, दुर्निग्रहः -ह्या -ह्यं, अनियन्तव्यः -व्या -व्यं, अनिवार्य्यः -र्य्या -र्य्यं, असंहरणीयः -या -यं, अयन्त्रणीयः -या -यं.

IRREPROACHABLE, *a.* अनिन्द्यः -न्द्या -न्द्यं, अनिन्दनीयः -या -यं, अनिन्दितः -ता -तं, अगर्ह्यः -र्ह्या -र्ह्यं, अविगर्ह्यः &c., अविगर्हितः -ता -तं, अपरिवाद्यः -द्या -द्यं, अनपवाद्यः -द्या -द्यं, अनवद्यः -द्या -द्यं, निरवद्यः -द्या -द्यं, निर्दोषः -षा -षं, निरपराधः -धा -धं, अपरिभाषणीयः -या -यं, अकुत्सितः -ता -तं, अनवगीतः -ता -तं, निष्कलङ्कः -ङ्का -ङ्कं, अदूष्यः -ष्या -ष्यं, अवाच्यः -च्या -च्यं, निर्वाच्यः -च्या -च्यं, अवचनीयः -या -यं, अदुर्वृत्तः -त्ता -त्तं.

IRREPROACHABLENESS, *s.* अनिन्द्यता, अनिन्दनीयता, अगर्ह्यत्वं, अपरिवाद्यता.

IRREPROACHABLY, *adv.* अनिन्दनीयं, अनिन्दितं, अगर्हणीयं, अविगर्हितं.

IRRESISTIBLE, *a.* अप्रतिकार्य्यः -र्य्या -र्य्यं, अप्रतीकार्य्यः &c., अनिवार्य्यः

Digitized by Google

-र्यी -र्यं, अनिवारणीयः -या -यं, अनिवारः -रा -रं, दुर्निवारः -रा -रं, अवार्यः -र्यी -र्यं, निर्वार्यः -र्यी -र्यं, अनवग्रहः -हा -हं, दुर्निग्रहः -ड्ढा -ड्ढं, असंहार्यः -र्यी -र्यं, दुर्धरः -रा -रं, निर्धारणीयः -या -यं, निर्धार्यः -र्यी -र्यं, अबाध्यः -ध्या -ध्यं, अबाधनीयः -या -यं, अनतिक्रमणीयः -या -यं, अप्रतिहतः -ता -तं, अप्रतिद्वन्द्वः -न्द्वा -न्द्वं, सर्वदमनः -ना -नं.

Irresistibleness, *s.* अप्रतिकार्यत्वं, अनिवार्यता, अनिवारणीयता, अवारणीयत्वं, दुर्निग्रहत्वं, अबाध्यत्वं.

Irresistibly, *adv.* अनिवारणीयं, अवारणीयं, अप्रतिकार्यं, दुर्निग्रहं, यथा निवारयितुं न शक्यते तथाप्रकारेण.

Irresolute, *a.* अस्थिरमतिः -तिः -ति, अस्थिरचित्तः -त्ता -त्तं, अस्थिरबुद्धिः -द्धिः -द्धि, अस्थिरमनस्कः -स्का -स्कं, चञ्चलबुद्धिः -द्धिः -द्धि, चञ्चलवृत्तिः -त्तिः -त्ति, चलचित्तः -त्ता -त्तं, विकल्पशीलः -ला -लं, विकल्पयन् -यन्ती -यत् (त्), संशयात्मा -त्मा -त्म (न्), सन्दिग्धमतिः -तिः -ति, संशयापन्नमानसः -सा -सं, चपलात्मकः -का -कं, अधीरः -रा -रं, अदृढमनस्कः -स्का -स्कं, अनवस्थितः -ता -तं, धैर्यहीनः -ना -नं, तरलः -ला -लं.

Irresolutely, *adv.* अस्थिरं, अधीरं, स्थैर्यपूर्वं, धैर्यपूर्वं, अधैर्येण, अस्थैर्येण, अस्थिरचेतसा, चञ्चलबुद्धा, विकल्पशीलत्वात्, चञ्चलं, चपलवत्.

Irresolution, *s.* अस्थैर्यं, अस्थिरता, अधैर्यं, अधीरता, चित्तास्थैर्यं, विकल्पशीलता, बुद्धिचाञ्चल्यं, चञ्चलबुद्धिः *f.*, अस्थिरबुद्धिः *f.*, चलचित्तता, चञ्चलत्वं, अदृढता, अधृतिः *f.*, अधारणा, चपलता, चापल्यं, अनवस्थितिः *f.*

Irrespective, *a.* निरपेक्षः -क्षा -क्षं, अनपेक्षः -क्षा -क्षं, अपेक्षाहीनः -ना -नं, निर्व्यपेक्षः -क्षा -क्षं, अप्रतीक्षकः -का -कं.

Irrespectively, *adv.* निरपेक्षं, अनपेक्षं, अनपेक्ष्य, अप्रतीक्ष्य, अनुद्दिश्य.

Irresponsibility, *s.* अनुयोगानधीनता, अपृच्छाधीनता, प्रश्नायोग्यत्वं, अननुयोज्यता.

Irresponsible, *a.* अननुयोगाधीनः -ना -नं, अनुयोगानधीनः -ना -नं, अपृच्छाधीनः -ना -नं, अप्रश्नयोग्यः -ग्या -ग्यं, पृच्छानर्हः -र्हा -र्हं, अननुयोज्यः -ज्या -ज्यं, अननुयोक्तव्यः -व्या -व्यं.

Irrestrainable, *a.* अनिवार्यः -र्यी -र्यं, अनिग्रहीतव्यः -व्या -व्यं, दुर्निग्रहः -हा -हं, अनिवर्त्तयितव्यः -व्या -व्यं, अनिवर्त्तनीयः -या -यं.

Irretrievable, *a.* अपुनःप्राप्यः -प्या -प्यं, पुनरप्राप्यः -प्या -प्यं, अपुनर्लभ्यः -भ्या -भ्यं, पुनरलभ्यः -भ्या -भ्यं, अनुद्धरणीयः -या -यं, अनुद्धार्यः -र्यी -र्यं, असमाहार्यः -र्यी -र्यं, अप्रतिसमाधेयः -या -यं.

Irretrievableness, *s.* अपुनःप्राप्यता, अनुद्धरणीयता, अप्रतिसमाधेयत्वं.

Irretrievably, *adv.* अनुद्धरणीयं, यथा प्रतिसमाधातुं न शक्यते तथा.

Irreverence, *s.* अपूजा, अपमानं, अवमानं, अनादरः, अवज्ञानं, अवज्ञा, असम्मानं, परिभवः, परिभूतिः *f.*, परिभावः, अवधीरणं, उपेक्षा, अमर्य्यादा,

Irreverent, *a.* अपूजकः -का -कं, अपमानी -निनी -नि (न्), अवमानी &c., अपमानकारी &c., अवज्ञाकारी &c., अनादरकारी &c., परिभावी -विनी -वि (न्), अनादरी -रिणी -रि (न्), अनादरबुद्धिः -द्धिः -द्धि.

Irreverently, *adv.* अपूजया, अपूजापूर्वं, सावमानं, सावज्ञानं, अनादरेण.

Irreversible, *a.* अपरावर्त्यः -र्त्यी -र्त्यं, अपरावर्त्तनीयः -या -यं, अनिवर्त्यः -र्त्यी -र्त्यं, अनिवर्त्तनीयः -या -यं, परावर्त्तनाशकः -का -कं, परावर्त्तानर्हः -र्हा -र्हं, अलोप्यः -प्या -प्यं, अलोपनीयः -या -यं, अखण्डनीयः -या -यं, अखण्ड्यः -ण्ड्या -ण्ड्यं.

Irreversibleness, *s.* अपरावर्त्यत्वं, अपरावर्त्तनीयता, अलोप्यता, अखण्ड्यत्वं.

Irreversibly, *adv.* अपरावर्त्तनीयं, यथा परावर्त्तितुं न शक्यते तथा.

Irrevocable, *a.* अपरावर्त्यः -र्त्यी -र्त्यं, अविकार्यः -र्यी -र्यं, अनन्यथाकरणीयः -या -यं.

Irrevocably, *adv.* अपरावर्त्तनीयं, अपरिवर्त्तनीयं, अनन्यथाकरणीयं.

To irrigate, *v. a.* सिच् (c. 6. सिञ्चति, सेक्तुं), अभिषिच्, अवसिच्, जलेन स्रु (c. 10. स्रावयति -यितुं) or क्लिद् (c. 10. क्लेदयति -यितुं) or अभ्युक्ष् (c. 1. -उक्षति -क्षितुं) or प्रोक्ष्, अभिवृष् (c. 1. -वर्षति -र्षितुं), प्रणालिकासिञ्चनं कृ.

Irrigated, *p. p.* सिक्तः -क्ता -क्तं, जलसिक्तः &c., सलिलसिक्तः &c., जलस्रावितः -ता -तं, समुक्षितः -ता -तं.

Irrigation, *s.* सेकः, सेचनं, सिञ्चनं, निषेकः, अवसेकः, अवसेचनं, जलस्रावनं, क्लेदनं, अभ्युक्षणं, प्रोक्षणं, प्रणालिकासिञ्चनं.

Irriguous, *a.* जलसिक्तः -क्ता -क्तं, सिक्तः -क्ता -क्तं, जलाढ्यः -ढ्या -ढ्यं, अनूपः -पा -पं, बहूदकः -का -कं, सजलः -ला -लं, आर्द्रः -र्द्रा -र्द्रं, समुन्नः -न्ना -न्नं.

Irrision, *s.* उपहासः, अवहासः, अपहासः, परिहासः, हास्यं, अवहेला.

Irritability, *s.* शीघ्रकोपित्वं, कोपशीलता, क्रोधशीलता, सुक्रोधनीयता, चण्डस्वभावः, उच्चण्डता, सुखोत्तापनीयत्वं.

Irritable, *a.* (Easily made angry) शीघ्रकोपी -पिनी -पि (न्), सुलभकोपः -पा -पं, सुलभक्रोधः -धा -धं, शीघ्रक्रोधी &c., सुलभमन्युः -न्युः -न्यु, सुक्रोधनीयः -या -यं, सुप्रकोपणीयः -या -यं, कोपशीलः -ला -लं, क्रोधशीलः -ला -लं, सन्तापशीलः -ला -लं, कोपिष्ठः -ष्ठा -ष्ठं, क्रोधिष्ठः -ष्ठा -ष्ठं, चण्डस्वभावः -वा -वं, पित्तस्वभावः -वा -वं, पित्तवेगी -गिनी -गि (न्), उच्चण्डः -ण्डा -ण्डं, उष्णस्वभावः -वा -वं.—(Easily excited) शीघ्रोत्तेजनीयः -या -यं, सुखोत्तापनीयः -या -यं.

To irritate, *v. a.* कुप् (c. 10. कोपयति -यितुं), प्रकुप्, सङ्कुप्, क्रुध् (c. 10. क्रोधयति -यितुं), कोपं जन् (c. 10. जनयति -यितुं), क्रोधं जन्.—(Excite) उत्तप् (c. 10. -तापयति -यितुं), सन्तप्, उत्तिज् (c. 10. -तेजयति -यितुं).

Irritated, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः -ता -तं, कुपितः -ता -तं, जातकोपः -पा -पं, जातक्रोधः -धा -धं, जातामर्षः -र्षा -र्षं, उपजातक्रोधः -धा -धं, इद्धमन्युः -न्युः -न्यु.—(Excited) उत्तेजितः -ता -तं, समुत्तेजितः -ता -तं, उत्तापितः -ता -तं, उत्तप्तः -प्ता -प्तं.

Irritating, *part.* or *a.* कोपजनकः -का -कं, क्रोधजनकः -का -कं, उत्तापकः -का -कं, सन्तापकः -का -कं, चित्तोत्तापकारी -रिणी -रि (न्).

Irritation, *s.* (The act) प्रकोपः -पणं, क्रोधकरणं, कोपकरणं.—(State) कोपः, क्रोधः, अमर्षः, विमर्षः, मन्युः *m.*, क्रोधावेशः, क्रुद्धता, रागावेशः.—(Excitement) उत्तापः, उत्तप्तता, सन्तापः, सन्तप्तता, उत्तेजनं, समुत्तेजनं, दाहः; 'irritation of the throat,' काशः, क्षवथुः *m.*

Irritative, *a.* उत्तापकः -का -कं, सन्तापकः -का -कं, दाहजनकः -का -कं,

Irruption, *s.* अवस्कन्दः -न्दनं, उपद्रवः, अभिद्रवः, उपप्लवः, विप्लवः, अभिक्रमः -मणं, आक्रमः, अभिमर्दः, अभिग्रहः, अवलुम्पनं; 'to make an irruption,' अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), समवस्कन्द्, आस्कन्द्, उपद्रु (c. 1. -द्रवति -द्रोतुं), अभिद्रु, समाद्रु, अभिधाव् (c. 1. -धावति -वितुं).

Ischuretic, *a.* मूत्रावरोधघ्नः -घ्नी -घ्नं, मूत्रावष्टम्भनाशकः -का -कं.

Ischury, *s.* मूत्रावरोधः, मूत्रावष्टम्भः, मूत्रकृच्छ्रं, विष्टम्भः, मूत्रानुबन्धः, विबन्धः, आनाहः.

Isinglass, *s.* अभ्रं -भ्रकं, मत्स्यान्त्रनिर्म्मितम् अतिसंलग्नभावं श्यानद्रव्यं.

Island, *s.* द्वीपः -पं, अन्तरीपं, उपद्वीपं, पयोगडं; 'one of alluvial formation,' पुलिनं.

Island, *a.* द्वीप्यः -प्या -प्यं, द्वैप्यः -प्यी -प्यं, द्वैपः -पी -पं, द्वीपसम्बन्धी -न्धिनी -न्धि (न्), द्वीपस्थः -स्था -स्थं.

Islander, *s.* द्वीपवासी *m.* (न्), द्वीपनिवासी *m.*, द्वीपी *m.* (न्), द्वीपस्थः, द्वीपवासः, द्वैपः, द्वीप्यः.

Isle, *s.* द्वीपः -पं, अन्तरीपं. *See* Island.

Islet, *s.* क्षुद्रद्वीपः -पं, अल्पद्वीपः -पं, उपद्वीपः -पं.

Isochronal, isochronous, *a.* समकालिकः -की -कं, समसंख्यकालः -ला -लं.

Digitized by Google

To ISOLATE, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विश्लिष् (c. 7. -श्लिनक्ति -श्लेष्टुं), अवश्लिष्, अन्यभेदं कृ, अन्यविभेदं कृ, अन्यवियोगं कृ, परविश्लेषं कृ, पृथक् स्था in caus. (स्थापयति -यितुं). *See To* INSULATE.

ISOLATED, *p. p.* असङ्गः -ङ्गा -ङ्गं, निःसङ्गः -ङ्गा -ङ्गं, गतसङ्गः -ङ्गा -ङ्गं, वियुक्तः -क्ता -क्तं, विभिन्नः -न्ना -न्नं, परविभिन्नः -न्ना -न्नं, अन्यविश्लिष्टः -ष्टा -ष्टं, व्यासक्तः -क्ता -क्तं, अनन्यसंसक्तः -क्ता -क्तं, अन्यासक्तः -क्ता -क्तं, पृथक्स्थितः -ता -तं, स्वतन्त्रः -त्रा -त्रं. *See* INSULATED.

ISOLATION, *s.* असङ्गः, परवियोगः, परविभेदः, विच्छेदः, अवच्छेदः, व्यासङ्गः, विभिन्नता, पृथक्त्वं. *See* INSULATION.

ISOSCELES, *a.* समद्विभुजः -जा -जं, समद्विबाहुः -हुः -हु, समद्विपार्श्वः -र्श्वा -र्श्वं; 'isosceles triangle,' समद्विबाहुकत्रिभुजः, तुल्यद्विबाहुकत्रिभुजः द्विसमत्रिभुजः -जा; 'angles at the base of an isosceles triangle,' तुल्यद्विबाहुकत्रिभुजस्य भूलग्नकोणौ *m.* du.

ISSUE, *s.* (Egress) निःसरणं, निस्सरणं, निर्गमः, निर्गतिः *f.*, निर्यायणं, निष्क्रमणं, विनिर्गमः, बहिर्गमनं, बहिस्सरणं, निःसारः -रणं, अपसारः, अपसरणं, प्रवहः.—(Event, consequence, last result) गतिः *f.*, उद्भूतं, अनुवृत्तं, संवृत्तं, उत्पन्नं, फलं, फलमुत्तरं, परिणामः, शेषः, अन्तः, सिद्धिः *f.*, प्रयुक्तिः *f.*, अन्वयः, निष्पन्नं; 'happy issue,' सन्नतिः *f.*, शुभगतिः *f.*, शुभफलं; 'expectation of a favourable issue,' शुभफलाकांक्षा.—(Progeny) प्रजा, अपत्यं, सन्तानं, सन्ततिः *f.*, अन्वयः, तनुः *m.*—(Flux) आमातिसारः, रक्तातिसारः, रक्तशुद्धिः *f.*—(Ulcer, fontanel) कृत्रिमव्रणः.

To ISSUE, *v. n.* (Flow out) प्रसु (c. 1. -सवति -सोतुं), निःसु, सु.—(Pass out, go out) निःसृ (c. 1. -सरति -सर्तुं), विनिःसृ, निर्गम् (c. 1. -गच्छति -गन्तुं), विनिर्गम्, निर्या (c. 2. -याति -तुं), विनिर्या, निष्क्रम् (c. 1. -क्रामति -क्रमितुं), विनिष्क्रम्, अभिनिष्क्रम्, निश्चर् (c. 1 -चरति -रितुं), विनिश्चर्, निरि (c. 2. -एति -तुं), बहिर्गम्.—(Proceed, arise) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् (c. 4. जायते, जनितुं), प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रभू.—(Close, end) निष्पद्, विगम्, समाप् in pass. (-आप्यते), निवृत्, अपया.

To ISSUE, *v. a.* (Send out) निःसृ (c. 10. -सारयति -यितुं), प्रचल् (c. 10. -चालयति -यितुं), प्रचर् (c. 10. -चारयति -यितुं), प्रचलीकृ.—(Make public) प्रकाश् (c. 10. -काशयति -यितुं), ख्या in caus. (ख्यापयति -यितुं), घुष् (c. 10. घोषयति -यितुं), विघुष्, प्रसिद्धीकृ.

ISSUED, *p. p.* निःसृतः -ता -तं, निर्गतः -ता -तं, प्रसुतः -ता -तं, उत्पन्नः -न्ना -न्नं.

ISSUELESS, *s.* असन्तानः -ना -नं, अनपत्यः -त्या -त्यं, अप्रजः -जा -जं, अप्रसुतः -ता -तं, निःसन्तानः -ना -नं, निरन्वयः -या -यं, निर्वंशः -शा -शं.

ISTHMUS, *s.* संयोगभूमिः *f.*, योगभूमिः *f.*, सम्बन्धभूमिः *f.*

IT, *pron.* तद्, एतद्, इदं. Sometimes 'it' is not expressed, but is inherent in the verb; as, 'it is well ascertained that the figure of the earth is globular,' पृथिवी गोलाकारा भवति इति सुनिश्चितं.

ITALIAN, *a.* इटालिदेशसम्बन्धी -न्धिनी -न्धि (न्), इटालिदेशजः -जा -जं, इटालिदेशीयः -या -यं, इटालिदेशस्थः -स्था -स्थं.

ITALICS, *s. pl.* इटालिक्संज्ञको मुद्राक्षरविशेषः.

ITCH, *s.* (The disease) कण्डूः *f.*, कण्डुः *f.*, खर्ज्जूः *f.*, कच्छूः *f.*, कच्छुः *f.*, सुकण्डुः *f.*, सूकण्डुः *f.*, खसः, पाम *n.* -मा *f.* (न्), कण्डूतिः *f.*—(An itching) कण्डूतिः *f.*, कण्डूयनं, कण्डूया.—(Eager desire) अतिस्पृहा, अतिशयेच्छा, अत्यभिलाषः.

To ITCH, *v. n.* कण्डू (nom. कण्डूयति -ते), कण्डूयां कृ, कण्डूतिं कृ, स्पन्द् (c. 1. स्पन्दते -न्दितुं), स्फुर् (c. 6. स्फुरति -रितुं), कण्डूलः -ला -लं भू.—(Desire eagerly) अतिशयेन इष् (c. 6. इच्छति, एषितुं) or अभिलष् (c. 1. -लषति -षितुं), गृध् (c. 4. गृध्यति, गर्धितुं).

ITCHY, *a.* कण्डूलः -ला -लं, कच्छुरः -रा -रं, कण्डुरोगी -गिणी -गि (न्), पामनः -ना -नं.

ITEM, *adv.* (Also) अपरञ्च, अपिच, अथच, चैव, पुनरपि.

ITEM, *s.* (Article, separate particular) पदं, विषयः, प्रकरणं, अधिकरणं.

To ITERATE, *v. a.* (Utter again) पुनर् वद् (c. 1. वदति -दितुं), मुहुर् वद्, अनुवद्, पुनरुक्तिं कृ.—(Do again) पुनः कृ, मुहुः कृ, पुनःपुनः कृ.

ITERATION, *s.* पुनरुक्तिः *f.*, पौनरुक्त्यं, पुनर्वचनं, अनुवादः, मुहुर्भाषा.—(Doing again) पुनःकरणं, पुनरावृत्तिः *f.*, द्विरावृत्तिः *f.*

ITERATIVE, *a.* पुनर्वादी -दिनी -दि (न्), पुनःकारी -रिणी -रि (न्).

ITINERANT, *a.* भ्रमानः -ना -नं, पर्यटनकारी -रिणी -रि (न्), अध्वगः -गा -गं -गामी -मिनी -मि (न्), भ्रमणकारी &c., परिभ्रमी -मिणी -मि (न्), अवनिचरः -रा -रं, यात्रिकः -की -कं, चक्राटः -टा -टं.

ITINERARY, *s.* मार्गवृत्तान्तपुस्तकं, मार्गक्रमणलेखः, प्रवासवृत्तान्तलेखः.

To ITINERATE, *v. n.* देशभ्रमणं कृ, देशपर्यटनं कृ, परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं), पर्यट् (c. 1. -अटति -टितुं).

ITS, *pron.* तदीयः -या -यं, तस्य gen. c. (तद्), अस्य gen. c. (इदं).

ITSELF, *pron.* तद् एतद्, स्वयं.

IVORY, *s.* हस्तिदन्तः, करिदन्तः, गजदन्तः, दन्तिदन्तः -न्ती.

IVORY, *a.* दान्तः -न्ती -न्तं, हस्तिदन्ती -न्तिनी -न्ति (न्), हस्तिदन्तनिर्म्मितः -ता -तं, दन्तिदन्तमयः -यी -यं.

IVY, *s.* वृक्षगृहादिरोही लताविशेषः, तरुरुहा, तरुरोहिणी.

J.

To JABBER, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), उपजल्प्, त्वरितं वद् (c. 1 वदति -दितुं), अव्यक्तं or अस्पष्टं वद्, वद् in freq. (वावद्यते), प्रलप् (c. 1. -लपति -पि˚), चटचट (nom. चटचटायते), अनर्थकवचनं कृ.

JABBERER, *s.* जल्पकः, जल्पाकः, जल्पी *m.* (न्), उपजल्पी *m.*, वाचालः, वाचाटः, वावदूकः, बहुभाषी *m.* (न्), अस्पष्टवक्ता *m.* (तृ).

JABBERING, *s.* जल्पः -ल्पनं, प्रजल्पः, जल्पितं, वावदूकता, प्रलापः, विप्रलापः, प्रलपितं, त्वरितवचनं, अस्पष्टवचनं, अव्यक्तवचनं, निरर्थकवचनं.

JACK, *s.* (Instrument for pulling off boots) पादुकानिष्कर्षणयन्त्रं.—(Instrument for turning a spit) यन्त्रं यद्द्वारेण पाकशूलः परिवर्त्तते.—(A fish) जलसूचिः *m.*—(Coat of mail) कवचः -चं, तनुत्रं.—(Horse, wooden frame) मञ्चः, वृक्षः, उपस्तम्भः, आधारः.—(Male of certain animals) expressed by पुं prefixed.—(Flag at the end of a bow-sprit) नौकाग्रवहिःप्रलम्बो ध्वजपटः.—(Bread-fruit tree) पनसः, पनसनालिका, कण्टकिफलः.

JACK-A-LANTERN, *s.* पिशाचदीपिका, भूतदीपिका, मिथ्यादीप्तिः *f.*

JACKAL, *s.* शृगालः, सृगालः, जम्बुकः, जम्बूकः, गोमायुः *m.*, वक्रकः, क्रोष्टा *m.* (ष्टृ), गोमी *m.* (न्), क्रव्या *m.* (न्), भूरिमायः, घोरराक्षसः, हूरवः, श्वभीरुः *m.*, फेरुः, फेरण्डः, फेरवः.—(Female) शृगाली, क्रोष्ट्री, शिवा.

JACKANAPES, *s.* वानरवृत्तिः *m.*, कपिस्वभावः, मर्कटशीलः, वानरचरित्रः.

JACKASS, *s.* गर्द्दभः, रासभः, खरः, धूसरः, चक्रीवान् *m.* (न्), बालेयः.

JACK-BOOTS, *s. pl.* चर्म्मनिर्म्मितं जङ्घोत्तरीयं or जङ्घात्राणं, बृहत्पादुका.

JACK-DAW, *s.* काकजातीयः पक्षिभेदः, काकविशेषः, काकः, वायसः.

JACKET, *s.* कञ्चुकः, कञ्चुलिका, निचोलः -लकः, चोलः -लकः, निचुलः, अङ्गिका, कूर्पासकः.

JACK-KETCH, *s.* घातुकपुरुषः, दण्डपाशिकः, मृतपाः *m.*, उद्बन्धकः.

JACK-PUDDING, *s.* भण्डः, भाण्डः, वैहासिकः, परिहासवेदी *m.* (न्), विदूषकः.

Digitized by Google

JACOBIN, *s.* हीनवर्णपक्षपाती *m.* (न्), राजद्रोही *m.* (न्), राजयुध्वा *m.* (न्).

JACOB'S-STAFF, *s.* (Pilgrim's staff) कार्पेटिकदण्डः, कार्पेटिकयष्टिः *m. f.*—(A staff concealing a weapon) कूटायुधं, कूटास्त्रं, अन्तर्गुप्तनिशितास्त्रो बहिःकाष्ठमयो दण्डः.

JADE, *s.* (Sorry horse) कदश्वः, अश्वतरः, अश्वकः.—(A name of reproach for a woman) बन्धकी, कुलटा, भ्रष्टा, पापीयसी. *See* JADISH.

To JADE, *v. a.* खिद् (c. 10. खेदयति -यितुं), आयस् (c. 10. -यासयति -यितुं), श्रम् (c. 10. श्रमयति -यितुं), क्लम् (c. 10. क्लमयति -यितुं), सद् (c. 10. सादयति -यितुं), अवसद्, क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), तप् (c. 10. तापयति -यितुं), कृष् (c. 10. कर्षयति -यितुं), कष्टं कृ.

To JADE, *v. n.* (Become weary) खिद् in pass. (खिद्यते), आयस् (c. 4. -यस्यति -यसितुं), श्रम् (c. 4. श्राम्यति, श्रमितुं), क्लम् (c. 4. क्लाम्यति, क्लमितुं), सद् (c. 1. सीदति, सत्तुं), अवसद्, कष्ट (nom. कष्टायते).

JADED, *p. p.* खिन्नः -न्ना -न्नं, खेदितः -ता -तं, आन्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, श्रमार्तः -र्ता -र्तं, क्लिष्टः -ष्टा -ष्टं, ग्लानः -ना -नं.

JADISH, *a.* (Bad) दुष्टः -ष्टा -ष्टं, पापीयान् -यसी -यः (स्), कुत्सितः -ता -तं, कु or कद् or दुर् prefixed.—(Unchaste, applied to a woman) बन्धकी, असती, असाध्वी, व्यभिचारिणी, पुंश्चली, भ्रष्टा, धर्षिणी, अविनीता, कामगा.

JAG, JAGG, *s.* (Notch) छेदः, अवच्छेदः, विच्छेदः, भङ्गः, दन्तः, क्रकचदन्तरूपो भङ्गः or छेदः.

To JAGG, *v. a.* जर्जरीकृ, क्रकचदन्तरूपेण छिद् (c. 7. छिनत्ति, छेत्तुं) or विच्छिद् or अवच्छिद्, छेदं कृ, अवच्छेदं कृ, क्रकचरूपेण भङ्गुरं -रां -रं कृ, or भङ्गुरीकृ or जर्जरं -रां -रं कृ, जर्जरीकं -कां -कं कृ.

JAGGED, *p. p. a.* जर्जरः -रा -रं, जर्जरीकः -का -कं, क्रकचदन्तरूपेण विच्छिन्नः -न्ना -न्नं or दन्तुरः -रा -रं or दन्ती -न्तिनी -न्ति (न्), अनुक्रकचः -चा -चं, क्रकचधाराकारः -रा -रं, भङ्गुरः -रा -रं, विषमधारः -रा -रं.

JAGGEDNESS, *s.* जर्जरता, जर्जरीकता, दन्तुरत्वं, भङ्गुरत्वं.

JAGGY, *a.* दन्तुरः -रा -रं, अनुक्रकचः -चा -चं. *See* JAGGED.

JAIL, *s.* कारा, कारागारं, कारागृहं, कारावेश्म *n.* (न्), बन्धनागारं, बन्धनालयः, बन्धनगृहं, बन्धनस्थानं, निरोधस्थानं, वन्दिशाला, गुप्तिः *f.*, चारः.

JAILER, *s.* कारारक्षकः, कारागृहाध्यक्षः, कारागाराधिपतिः *m.*, बन्धनालयरक्षकः, गुप्तिपालकः, वन्दिपालः.

JAKES, *s.* शौचकूपः, पायुक्षालनवेश्म *n.* (न्), अवस्करस्थानं.

JAM, *s.* मिष्टफलं, मिष्टान्नं, खाद्यन्नं, सन्धितफलं, सन्धितं.

To JAM, *v. a.* सम्पीड् (c. 10. -पीडयति -यितुं), सम्मृद् (c. 9. -मृद्नाति -मर्द्दितुं), सन्नाध् (c. 1. -नाधते -धितुं), सङ्कुलीकृ, सङ्कटीकृ.

JAMB, *s.* उपस्तम्भः, अवष्टम्भः -म्भनं, स्तम्भः, गृहस्तम्भः, आधारः.

JAMMED, *p. p.* सम्पीडितः -ता -तं, सम्मर्द्दितः -ता -तं, सन्नाधः -धा -धं, सङ्कुलः -ला -लं, सङ्कटः -टा -टं, चूर्णितः -ता -तं.

To JANGLE, *v. n.* वाग्युद्धं कृ, वाक्कलहं कृ, विवद् (c. 1. -वदते -दितुं), विप्रलापं कृ, व्यवक्रोशनं कृ, विरोधोक्तिं कृ, कलह (nom. कलहायते).

JANGLE, *s.* (Wrangling) वाग्युद्धं, वाक्कलहः, विप्रलापः, व्यवक्रोशनं.—(Discordant sound) झम्झा -म्झनं.

JANGLER, *s.* वाक्कलहकारी *m.* (न्), वाग्युद्धप्रियः, व्यवक्रोशनप्रियः.

JANGLING, *s.* (Wrangling) वाक्कलहः, व्यवक्रोशनं, विवादः.—(Discordant sound) झम्झा -म्झनं, झः, कर्कशस्वनः.

JANITOR, *s.* द्वारपालः, द्वाररक्षकः, द्वारस्थः, प्रतिहारः, प्रतीहारः.

JANTILY, *adv.* चपलं, चापल्येन, चपलशीलत्वात्, लघु, स्वभावलाघवात्.

JANTINESS, *s.* चापल्यं, चपलशीलता, लघुता, स्वभावलाघवं.

JANTY, *a.* चपलः -ला -लं, चपलशीलः -ला -लं, लघुस्वभावः -वा -वं.

JANUARY, *s.* पौषमासः, पौषः, माघः, उत्तरपौषः, पूर्वमाघः, पुष्यः, तैषः, तिष्यः -ष्यकः, प्रथममासः.

JAPAN, *s.* जापान्नामा चित्रकुक्कुभविशेषः.

To JAR, *v. n.* (Make a grating sound) कर्कशशब्दं कृ, झम्झा (nom. झम्झायते), परस्परघर्षणजं झम्झाशब्दं कृ.—(Clash) सङ्घट्ट (c. 1. -घट्टते -ट्टितुं), परस्परसमाघातं कृ, परस्परसङ्घट्टनं कृ.—(Quarrel) विवद् (c. 1. -वदते -दितुं), कलह (nom. कलहायते).

JAR, *s.* (Grating sound) कर्कशशब्दः, परस्परघर्षणजः कटुशब्दः, परस्परसङ्घट्टनजो झम्झाशब्दः, झम्झनं.—(Clash) सङ्घट्टः -ट्टनं, समाघातः, परस्परसमाघातः, परस्परविरोधः.—(An earthen vessel) घटः, कुम्भः, कलशः -शी -शं, मणिकं, अलिञ्जरः, आलुः *f.*, कर्करी, कुण्डी, मृन्मयपात्रं, मृद्भाण्डं, मृण्मयपात्रं, उदपात्रं, जलपात्रं.—(Bottom of a jar) सूर्य्यग्रहः.—(A little open, half open, said of a door) ईषद्घाटितः -ता -तं, अर्द्धोद्घाटितः -ता -तं.

JARGON, *s.* अनर्थकभाषा, असम्बद्धभाषा, पिशाचभाषा, राक्षसी भाषा, मिश्रितभाषा.

JARRING, *part.* or *a.* परस्परपराहतः -ता -तं, परस्परविरोधी -धिनी -धि (न्), अन्योन्यविरुद्धः -द्धा -द्धं.—(Making a harsh sound) कर्कशशब्दकारी -रिणी -रि (न्).

JASMIN, *s.* कुन्दः -न्दं, जाती -तिः *f.*, झाटी -टा, जातीकुसुमं, मालती, यूथी, यूथिका, स्वर्णयूथी, मल्लिका, जीवनी, सुगन्धः, माधुरं, सुमनाः *f.* (स्), मकरन्दः, मुन्नरः; 'double jasmin,' शिशुगन्धा; 'relating to the jasmin,' कौन्दः-न्दी-न्दं; 'the jasmin creeper,' कौन्दी लता.

JASPER, *s.* सूर्य्यकान्तः, जास्पराख्यो मणिविशेषः.

JAUNDICE, *s.* पाण्डुः *m.*, पाण्डुरोगः, पाण्डुरः, पाण्डुकः, कामला -लः, कुम्भकामला, हलीमकं; 'incipient jaundice,' पाण्डुच्छाया.

JAUNDICED, *a.* (Having the jaundice) पाण्डुरोगी -गिणी -गि (न्), पाण्डुरोगग्रस्तः -स्ता -स्तं.—(Prejudiced) साचीकृतः -ता -तं, वक्रदृष्टिः -ष्टिः -ष्टि.

To JAUNT, *v. n.* परिभ्रमणं कृ, पर्य्यटनं कृ, विहारं कृ, विहारार्थम् इतस्ततः परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं), विह (c. 1. -हरति -हर्त्तुं), विहारार्थं पर्य्यट् (c. 1. -अटति -टितुं).

JAUNT, *s.* विहारः, विहरणं, भ्रमणं, विहारार्थं परिभ्रमणं or पर्य्यटनं.

JAUNTINESS, *s.* *See* JANTINESS.

JAVELIN, *s.* शल्यं, शलाका, शङ्कुः *m.*, प्रासः, क्षिपणिः *m.*, शक्तिः *f.*, पाणिमुक्तं, करमुक्तं, मुक्तकं, मुक्तामुक्तं, शूलः -लं, अस्त्रं, दूरवेधी *m.* (न्), कासूतरी.

JAW, *s.* हनुः *m. f.*, हनूः *f.*; 'the lower jaw,' पीचं, कुम्भः, चिबुकं, चिबुः *m.*; 'big-jawed,' महाहनुः -नुः -नु; 'locked jaw,' हनुग्रहः, हनुस्तम्भः; 'jaw-tooth,' दाढा, दंष्ट्रा.—(Mouth) मुखं, वक्त्रं; 'jaws of death,' मृत्युवक्त्रं.—(Scolding, abuse) आक्रोशः, क्रुष्टं, तर्ज्जनं, वाक्पारुष्यं, भर्त्सनं.

To JAW, *v. n.* (Scold) आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), तर्ज् (c. 10. तर्जयति -यितुं).

JAW-BONE, *s.* हन्वस्थि *n.*, चिबुकास्थि *n.*, पीचास्थि *n.*

JAWED, *a.* हनुमान् -मती -मत् (त्), हनूमान् &c., हनुविशिष्टः -ष्टा -ष्टं.

JAY, *s.* चाषः, चासः, मणिकण्ठः, नीलकण्ठः, किकिः *m.*, किकिदिविः *m.*, किकीदिवः, किकीदीविः *m.*, चालः.

JEALOUS, *a.* (Apprehensive of rivalship, uneasy at another's success) मत्सरी -रिणी -रि (न्), मत्सरः -रा -रं, समत्सरः -रा -रं,

Digitized by Google

परगुणमत्सरः -रा -रं, परोत्कर्षद्वेषी -षिणी -षि (न्), परोत्कर्षासहनः -ना -नं, परोत्कर्षासूयकः -का -कं, परोत्कर्षशङ्की -ङ्किनी -ङ्कि (न्), अन्यशुभाशङ्की -ङ्किनी -ङ्कि (न्), परप्रशंसासहनः -ना -नं, परशुभामर्षणः -णा -णं, ईर्ष्यी -र्ष्यिणी -र्ष्यि (न्) सेर्ष्यः -र्ष्या -र्ष्यं, असूयकः -का -कं, साभ्यसूयः -या -यं, कृतेर्ष्यः -र्ष्या -र्ष्यं, स्पर्धी -र्धिनी -र्धि (न्), वक्रदृष्टिः -ष्टिः -ष्टि. —(Suspicious in love) प्रेमविपर्य्यासशङ्की &c., प्रेमसंशयी -यिनी -यि (न्), प्रेमशङ्की &c., प्रेमव्यत्ययाशङ्की, प्रीतिविपर्य्ययाशङ्की &c.; 'a husband of a wife,' परपुरुषाशङ्की, परपुरुषशङ्कितः, जारशङ्कितः; 'a wife of a husband,' परस्त्रीशङ्किता, परस्त्रीशङ्किनी.—(Suspiciously fearful) शङ्काशीलः -ला -लं, शङ्कास्वभावः -वा -वं.—(Careful for the honour of) अभिमानी -निनी -नि (न्), कृताभिमानः -ना -नं, कृतादरः -रा -रं, साभिमानः -ना -नं, आदृतः -ता -तं.

Jealously, *adv.* समत्सरं, मात्सर्य्येण, सेर्ष्यं, असूयया, सासूयं, साभ्यसूयं, परोत्कर्षासूयया, परोत्कर्षशङ्कया, प्रेमविपर्य्यासशङ्कया, शङ्काशीलवत्, वक्रदृष्ट्या, स्पर्धया.

Jealousy, jealousness, *s.* मात्सर्य्यं, मत्सरः -रता, ईर्ष्या, असूया, स्पर्धा, परगुणमात्सर्य्यं, परोत्कर्षासहिष्णुता, परोत्कर्षद्वेषः, परोत्कर्षासूया, परोत्कर्षशङ्का, परप्रशंसासहनं, परशुभाशङ्का, अन्यशुभद्वेषः, सापत्न्यं, सापत्नभावः, दृष्टिवक्रता. —(Suspiciousness in love) प्रेमशङ्का, प्रीतिशङ्का, प्रेमसंशयः, प्रेमविपर्यासशङ्का, प्रेमव्यत्ययशङ्का, प्रीतिव्यत्यासशङ्का; 'of a husband respecting a wife,' परपुरुषशङ्का, व्यभिचारशङ्का, अन्यपुरुषाशङ्का, जारशङ्का; 'of a wife respecting a husband,' परस्त्रीशङ्का.—(Suspicious fear) शङ्का, शङ्काशीलता.—(Concern for the honour of) अभिमानचिन्ता.

To jeer, *v. a.* अवहस् (c. 1. -हसति -सितुं), अपहस्, अवहासभूमिं कृ, अपहासास्पदीकृ, अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ, गर्ह् (c. 1. गर्हते -र्हितुं), अवगर्ह्, भर्त्स् (c. 10. भर्त्सयते -ति -यितुं).

Jeer, *s.* उपहासः, अवहासः, अपहासः, परिहासः, क्षेपः, अवक्षेपः, अवज्ञा, अवमानं, अवहेला, व्यञ्जनं -ना, व्यंग्यः.

Jeerer, *s.* उपहासकः, परिहासकर्त्ता *m.* (र्त्तृ), क्षेपकः, अवक्षेपकः.

Jeeringly, *adv.* उपहासेन, सोपहासं, परिहासेन, सावक्षेपं, हास्यपूर्व्वं.

Jejune, *a.* रूक्षः -क्षा -क्षं, रूक्षः -क्षा -क्षं, नीरसः -सा -सं, विरसः -सा -सं, रसहीनः -ना -नं, शुष्कः -ष्का -ष्कं, शून्यः -न्या -न्यं, निःसारः -रा -रं, निःसत्त्वः -त्त्वा -त्त्वं.

Jejuneness, *s.* रूक्षता, रौक्ष्यं, नीरसता, विरसता, रसाभावः, शुष्कता, शून्यता, सारहीनता, सत्त्वहीनता.

Jelly, *s.* (Of animal substance) मांसघननिष्क्वाथः, क्वथितमांसनिर्म्मितो घनीभूतः स्वच्छरसः, मांसस्य श्यानरसः or घनरसः.—(Of fruit) फलानां शर्करादिना सह निष्क्वथितानां घनरसः, फलपाकः.—(Glutinous substance) श्यानद्रव्यं, सान्द्रद्रव्यं.

Jennet, *s.* *See* Genet.

To jeopard, *v. a.* संशयस्थं -स्थां कृ, संशयितं -तां कृ, सन्देहस्थं -स्थां कृ, शङ्कास्थं -स्थां कृ, संशयापन्नं -न्नां कृ, सन्देहदोलस्थं -स्थां कृ, भयस्थं -स्थां कृ, शङ्कास्पदीकृ; 'one who jeopards his life,' संशयितजीवितः.

Jeoparded, *p. p.* संशयितः -ता -तं, संशयङ्गमितः -ता -तं, शङ्कास्पदीकृतः -ता -तं.

Jeopardous, *a.* सांशयिकः -की -कं, सन्दिग्धः -ग्धा -ग्धं, भयाक्रान्तः -न्ता -न्तं.

Jeopardy, *s.* (Hazard) संशयः, शङ्का, सन्देहः, भयं, विकल्पः, आतङ्कः, भयहेतुः *m.*; 'any thing exposed to jeopardy,' भयस्थानं, संशयस्थानं, शङ्कास्पदं; 'jeopardy of life,' जीवितसंशयः, प्राणसन्देहः, प्राणनाशसंशयः, प्राणबाधः; 'brought into jeopardy,' संशयितः -ता -तं; 'to be in jeopardy,' संशयस्थः -स्था -स्थं भू, शङ्कास्पदीभू.

To jerk, *v. a.* (Give a sharp or sudden twitch or push) लघुप्रहारं कृ, लघ्वाघातं कृ, आकस्मिकप्रहारं कृ, लघुप्रहारेण तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं).—(Throw with a sharp sudden motion, or by stopping the arm half way) लघुप्रहारेण or आकस्मिकप्रहारेण क्षिप् (c. 6. क्षिपति, क्षेप्तुं), बाहुवेगम् अर्द्धेन स्तम्भयित्वा क्षिप्, अकस्मात् क्षिप्.

Jerk, *s.* लघुप्रहारः, लघ्वाघातः, आकस्मिकप्रहारः, लघुक्षेपः, आकस्मिकक्षेपः, लघुप्रहारेण क्षेपः, बाहुवेगस्तम्भनपूर्व्वः क्षेपः.

Jerkin, *s.* कञ्चुकः, कञ्चुलिका, अङ्किका, कूर्पासकः, क्षुद्रनिचोलः.

Jessamine, *s.* *See* Jasmin.

Jest, *s.* हास्यं, परिहासः, परीहासः, हासिका, नर्म्म (न्), परिहासवाक्यं, परिहासोक्तिः *f.*, विनोदोक्तिः *f.*, विनोदभाषणं, श्लेषः, लालिका, ठट्ठरी, व्याहारः.—(Object of laughter) उपहासस्थानं, उपहासास्पदं, हास्यास्पदं, उपहासपात्रं, विनोदास्पदं.—(Fun) खेला, क्रीडा, कौतुकं, केलिः *m. f.*; 'in jest,' परिहासेन.

To jest, *v. n.* हस् (c. 1. हसति -सितुं), विहस्, प्रहस्, सम्प्रहस् संविहस्, परिहासं कृ, विनोदं कृ, परिहासवाक्यं वद् (c. 1. वदति -दितुं), विनोदवाक्यं वद्, भण्ड् (c. 1. भण्डते -ण्डितुं), क्रीड् (c. 1. क्रीडति -ते -डितुं), प्रक्रीड्, विक्रीड्, परिक्रीड्, विलस् (c. 1. -लसति -सितुं), खेला (nom. खेलायति); 'speak in jest,' परिहासेन वद्.

Jester, *s.* परिहासकारी *m.* (न्), परिहासवेदी *m.* (न्), हास्यकारी *m.*, विनोदकारी *m.*, विनोदभाषी *m.* (न्), वैहासिकः, विदूषकः.—(Buffoon) भण्डः, वैहासिकः, चाटुपटुः *m.*, चाटुवटुः *m.*, रवणः, नटः, क्रीडामृगः.—(Companion of a king) नर्म्मसचिवः, विदूषकः, नर्म्मदः, राजविनोदी *m.* (न्).

Jesting, *s.* परिहासकरणं, नर्म्मकरणं, नर्म्मद्युतिः *f.*, विनोदः, भाण्डं.

Jestingly, *adv.* परिहासेन, हास्येन, परिहासमात्रेण, विनोदेन, विनोदार्थं.

Jet, *s.* (Spouting of water) जलोत्क्षेपः, जलोत्सेकः.—(Black stone) कृष्णप्रस्तरः, कृष्णवर्णः प्रस्तरविशेषः.

Jet-black, *s.* घनकृष्णः -ष्णा -ष्णं, सुकृष्णः -ष्णा -ष्णं, अतिकृष्णः -ष्णा -ष्णं.

Jetsam, jetson, jettison, *s.* नौव्यसनकाले नौकालघुकरणार्थं समुद्रमध्ये क्षिप्तद्रव्याणि.

Jetty, *s.* भूमिविहितः समुद्रस्यसेतुः, काष्ठस्तम्भनिर्म्मितः, क्षुद्रसेतुः.

Jetty, *a.* (Black as jet) कृष्णवर्णः -र्णा -र्णं, कृष्णप्रस्तरसवर्णः -र्णा -र्णं.

Jew, *s.* यिहुदीयः, यिहुदीयदेशजः, यिहुदीयदेशवासी *m.* (न्).

Jewel, *s.* (Precious stone) मणिः *m. f.*, मणी, रत्नं, प्रस्तरः, मणिरत्नं, चारुशिला; 'jewel in a snake's head,' फणमणिः; 'necklace of jewels,' मणिमाला, रत्नावलिः *f.*; 'having jewels in the ears,' मणिकर्णः -र्णा -र्णं.—(A term of endearment) रत्नं; 'a jewel of a woman,' स्त्रीरत्नं.

Jewel-house, jewel-office, *s.* मणिशाला, रत्नशाला, राजकीयरत्नागारं.

Jewel-mine, *s.* रत्नाकरः, रत्नखनिः *f.*, मणिभूमिः *f.*, रत्नभूमिः.

Jewelled, *p. p.* or *a.* रत्नवान् -वती -वत् (त्), मणिमान् -मती -मत् (त्), मणिखचितः -ता -तं, रत्नमयः -यी -यं, मणिमयः -यी -यं, मणिशः -शा -शं.

Jeweller, *s.* मणिकारः, रत्नकारः -रकः, रत्नजीवी *m.* (न्), वैकटिकः; 'jeweller's shop,' रत्नशाला.

Jewelry, *s.* रत्नानि *n. pl.*, रत्नादि भूषणं or अलङ्कारः, कोशः, कोषः.

Jewess, *s.* यिहुदीया, यिहुदीया स्त्री, यिहुदीयदेशजा.

Jewish, *a.* यिहुदीयः -या -यं, यिहुदीयदेशसम्बन्धी -न्धिनी -न्धि (न्), यिहुदीयधर्म्मी -र्म्मी -र्म्मि (न्).

Digitized by Google

JEW'S HARP, *s.* मुखवाद्यं, वक्त्रतालः -लं.

JIB, *s.* नौकाग्रस्थवसनं, अग्रस्थवसनं, नौकाग्रवहिःस्थं वातवसनं.

JIFFY, *s.* निमेषः, क्षणः, पलं; 'in a jiffy,' निमेषमात्रेण, एकपदे, सपदि.

JIG, *s.* लघुनृत्यं, लघुनर्त्तनं, लघुतालसहितो नृत्यविशेषः.

To JIG, *v. n.* पूर्व्वोक्तप्रकारेण नृत् (c. 4. नृत्यति, नर्त्तितुं), लघु नृत्.

JILT, *s.* प्रतारिका, वञ्चिका, विप्रलम्भिका, सङ्केतलंघिनी, सङ्केतितान्यगामिनी, चपला, चपलशीला, एकपुरुषम् आश्वासयित्वा अन्यं गच्छति or गृह्णाति या स्त्री, प्रेमसिद्धाशां जनयित्वा खण्डयति या स्त्री.

To JILT, *v. a.* or *n.* प्रेमविषये एकपुरुषम् आश्वासयित्वा अन्यं गम् (c. 1. गच्छति, गन्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्रेमसिद्धाशां जनयित्वा खण्ड् (c. 10. खण्डयति -यितुं), सङ्केतं लंघ् (c. 10. लंघयति -यितुं), प्रेमविषये वञ्च् (c. 10. वञ्चयते -ति -यितुं) or प्रतॄ (c. 10. -तारयति -यितुं) or विप्रलभ् (c. 1. -लभते -लब्धुं).

JILTED, *p. p.* खण्डितः -ता -तं, खण्डितप्रेमसिद्धाशः -शा -शं.

To JINGLE, *v. n.* शिञ्ज् (c. 2. शिंक्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), क्वणक्वण (nom. क्वणक्वणायते), किङ्किण (nom. किङ्किणायते), क्वण्क्वणं कृ, विरु (c. 2. -रौति -रवितुं).

JINGLE, *s.* शिञ्जा -ञ्जः, शिञ्जितं, आशिञ्जितं, क्वण्क्वणं, क्वण्क्वा, क्वणात्कारः, क्वङ्कारः, क्वं, क्वणनं, क्वणितं, किङ्किणिशब्दः, क्वणक्वणशब्दः.

JINGLING, *part.* or *a.* शिञ्जी -ञ्जिनी -ञ्जि (न्), क्वण्क्वणकारी -रिणी -रि (न्), क्वणन् -णन्ती -णत् (त्), क्वणितः -ता -तं.

JOB, *s.* (Piece of work) कर्म्म *n.* (न्), कार्य्यं, कृत्यं, क्रिया, व्यापारः.—(Mean business) क्षुद्रकर्म्म *n.*, नीचकर्म्म *n.*, अधमक्रिया.—(Work done for private profit or ends) स्वार्थप्रयुक्तं कर्म्म, स्ववृद्ध्यर्थं कर्म्म, स्वार्थमात्रापेक्षकं कर्म्म, स्वार्थमात्रोद्देशकं कर्म्म or कार्य्यं, स्वार्थकर्म्म *n.*

To JOB, *v. n.* क्षुद्रकर्म्म कृ, नीचकर्म्म कृ, स्वार्थप्रयुक्तं कर्म्म कृ, स्वार्थमात्रमपेक्ष्य or स्वार्थमात्रमुद्दिश्य कार्य्यं कृ.—(Buy and sell as a broker) परार्थं क्रयविक्रयं कृ or पण् (c. 1. पणते -णितुं, पणायति -यितुं), पणायां कृ,—(Deal in, hire) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), प्रयोगं कृ.

JOBBER, *s.* (One who does small jobs) क्षुद्रकर्म्मकारी *m.* (न्), नीचकर्म्मकृत्, तुच्छकर्म्मैव्यवसायी *m.* (न्), अल्पकर्म्मव्यापारी *m.*—(Broker) परार्थं क्रयविक्रयकारी *m.* or क्रयविक्रयप्रयोजकः, घटकः.—(One who does a work for his own ends) स्वार्थप्रयुक्तकर्म्मैव्यवसायी *m.*, स्वार्थप्रवर्त्तकः, स्ववृद्ध्यर्थं कार्य्यव्यापारी.—(Dealer) क्रयविक्रयिकः, पणिकः, विपणी *m.* (न्).

JOBBING, *s.* क्षुद्रकर्म्मैव्यवसायः, नीचकर्म्मप्रवृत्तिः *f.*, स्वार्थप्रयुक्तकार्य्यप्रवृत्तिः *f.*, स्वार्थप्रवर्त्तनं, स्ववृद्धिप्रवर्त्तनं.

JOB-HORSE, *s.* पण्याश्वः, प्रयोज्यवाजी *m.* (न्), भाटकीयवाजी *m.*, अश्वकः.

JOCKEY, *s.* अश्वविद् *m.*, अश्वशिक्षकः, अश्वप्रेरकः, अश्वारूढः, अश्वशिक्षाजीवी *m.* (न्), अश्वोपजीवी *m.* (न्), अश्वज्ञः, हयज्ञः, अश्वविद्याविशारदः, हयविद्याविशारदः, अश्वकोविदः.

To JOCKEY, *v. a.* अश्वशिक्षकवत् प्रतॄ (c. 10. -तारयति -यितुं) or वञ्च् (c. 10. वञ्चयते -ति -यितुं) or प्रलभ् (c. 1. -लभते -लब्धुं).

JOCKEYISM, JOCKEYSHIP, *s.* अश्वविद्या, अश्वारोहणविद्या, अश्वशिक्षा.

JOCOSE, *a.* परिहासशीलः -ला -लं, परिहासकः -का -कं, प्रहासी -सिनी -सि (न्), रसिकः -का -कं, रसी -सिनी -सि (न्), सरसः -सा -सं, कौतुकी -किनी -कि (न्), सकौतुकः -का -कं, विनोदी -दिनी -दि (न्). *See* JOCULAR.

JOCOSELY, *adv.* परिहासेन, प्रहासेन, सरसं, सकौतुकं, रसिकवत्.

JOCOSENESS, *s.* परिहासशीलता, प्रहासः, रसिकत्वं, सरसता, कौतुकं.

JOCULAR, *a.* परिहासकः -का -कं, रसिकः -का -कं, विनोदी -दिनी -दि (न्), विनोदकारी -रिणी -रि (न्), हास्यकारी &c., विनोदात्मकः -का -कं, हास्यावहः -हा -हं. *See* JOCOSE.

JOCULARITY, *s.* परिहासकत्वं, प्रहसनं, प्रहसितं, हासिका, रसिकता, विनोदः, कौतुकं, उल्लसता, हर्षः, उत्सवः.

JOCULARLY, *adv.* परिहासेन, सकौतुकं, विनोदार्थं, हर्षेण, हृष्टवत्.

JOCUND, *a.* प्रमोदी -दिनी -दि (न्), उल्लसः -सा -सं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, आनन्दी -न्दिनी -न्दि (न्), आनन्दवृत्तिः -त्तिः -त्ति.

JOCUNDITY, *s.* उल्लसता, प्रहर्षः, आनन्दः, मुदा, हृष्टचित्तत्वं.

JOCUNDLY, *adv.* हर्षेण, सहर्षं, प्रमोदेन, सानन्दं, उल्लासेन, हृष्टवत्.

To JOG, *v. a.* अरत्निना तड् (c. 10. ताडयति -यितुं) or चल् (c. 10. चालयति -यितुं), ईषत् तड् or चल्, इङ्गितं कृ.

To JOG, *v. n.* (Jog on slowly) शनैः शनैः or मन्दं मन्दं or क्रमे क्रमे चल् (c. 1. चलति -लितुं) or चर् (c. 1. चरति -रितुं) or सृ (c. 1. सरति, सर्त्तुं).

JOG, JOGGING, *s.* चालनं, ईषच्चालनं, ईषत्क्षोभः, ईषदाघातः, ईषत्प्रहारः, ईषत्ताडनं, इङ्गितं.

To JOGGLE, JOGGLING. *See* JOG, JOGGING.

To JOIN, *v. a.* युज् (c. 7. युनक्ति, युंक्ते, योक्तुं, c. 10. योजयति -यितुं), संयुज्, आयुज्, समायुज्, सन्धा (c. 3. -दधाति -धातुं), उपसन्धा, सन्धन् (c. 9. -धत्ते -धन्तुं), संश्लिष् (c. 10. -श्लेषयति -यितुं), श्लिष्, संहन् (c. 2. -हन्ति -न्तुं), सङ्गम् (c. 10. -गमयति -यितुं), संलग्नीकृ, एकीकृ, एकत्र कृ.—(Tie together) ग्रन्थ् (c. 9. ग्रथ्नाति, ग्रन्थितुं), योक्त्र (nom. योक्त्रयति -यितुं).

To JOIN, *v. n.* (Be in contact, unite) संयुज् in pass. (-युज्यते), समायुज्, सन्धा in pass. (-धीयते), संश्लिष् in pass. (-श्लिष्यते), संहन् in pass. (-हन्यते), सङ्गम् (c. 1. -गच्छति -गन्तुं), समे (समैति -तुं, rt. इ), संलग्नीभू, एकीभू, संसक्तीभू, एकत्र भू, सम्मिल् (c. 6. -मिलति-मेलितुं).

JOINED, *p. p.* युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, संयोजितः -ता -तं, समायुक्तः -क्ता -क्तं, संयुतः -ता -तं, योजितः -ता -तं, समायुतः -ता -तं, युतः -ता -तं, संश्लिष्टः -ष्टा -ष्टं, श्लिष्टः -ष्टा -ष्टं, संहतः -ता -तं, अभिसंहतः -ता -तं, संसक्तः -क्ता -क्तं, समासक्तः -क्ता -क्तं, सङ्गतः -ता -तं, बद्धः -द्धा -द्धं, बद्धः -द्धा -द्धं, लग्नः -ग्ना -ग्नं, संलग्नः -ग्ना -ग्नं, विलग्नः -ग्ना -ग्नं, संहितः -ता -तं, सन्धितः -ता -तं, उपाहितः -ता -तं, सङ्गतः -ता -तं, समितः -ता -तं, मिलितः -ता -तं, एकीकृतः -ता -तं, घटितः -ता -तं; 'with joined hands,' संश्लिष्टाभ्यां पाणिभ्यां, बद्धाञ्जलिः -लिः -लि, अवहिताञ्जलिः -लिः -लि, अभिगृहीतपाणिः -णिः -णि.

JOINER, *s.* सूत्रधारः, काष्ठतक्षकः, तक्षकः, तक्षा *m.* (न्), त्वष्टा *m.* (ष्टृ).

JOINERY, *s.* काष्ठतक्षणं, त्वष्टिः *f.*, तक्षणं, सूत्रधारकर्म्म *n.* (न्), तक्षकक्रिया.

JOINING, *s.* संयोगः, योगः, सन्धानं, सन्धिः *m.*, श्लेषः, संश्लेषः, संघातः, सङ्गः, सङ्गमः, समागमः, समासक्तिः *f.*, संसक्तिः.

JOINT, *s.* (Of the body) सन्धिः *m.*, ग्रन्थिः *m.*, अस्थिसन्धिः *m.*, अस्थिग्रन्थिः *m.*, परग्रन्थिः *m.*, पर्व्व *n.* (न्), अस्थिपर्व्व *n.*, मर्म्म *n.* (न्), काण्डः -ण्डं, जीवस्थानं, अरुस् ind.; 'the knee-joint,' जानुसन्धिः *m.*, जङ्घोरुसन्धिः; 'the thigh-joint,' ऊरुपर्व्व *n.*; 'the thumb-joint,' अङ्गुष्ठपर्व्व *n.*; 'of the neck,' ग्रीवासन्धिः *m.*, सन्धिः; 'of the shoulder,' विरु *n.*; 'to put out of joint,' विसन्धीकृ.—(Knot of a plant) ग्रन्थिः *m.*, पर्व्व *n.* (न्).

JOINT, *a.* (Shared by two or more) संविभक्तः -क्ता -क्तं, अविभक्तः -क्ता -क्तं, संज्ञितः -ता -तं, साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, अनेकस्वामिकः -का -कं, usually expressed by सह in comp.; as, 'joint proprietor,' सहस्वामी *m.* (न्), सहाधिकारी *m.* (न्); 'joint

Digitized by Google

possessor,' सहभोजी *m.* (न्); 'joint-heir,' समाधिकारी.—(United in the same office) एकाधिकारी *m.* (न्), एककार्य्यकारी *m.* (न्), सङ्गितीयः -या -यं.—(Combined) सङ्घातवान् -वती -वत् (त्), सम्भूयकारी -रिणी -रि (न्).

To JOINT, *v. a.* (Form with joints) सन्धिविशिष्टं -ष्टां कृ, ग्रन्थियुक्तं -क्तां कृ.—(Divide in the joints) सन्धिभेदं कृ, सन्धिभङ्गं कृ.

JOINTED, *p. p.* or *a.* (Formed with joints) ग्रन्थिलः -ला -लं, ग्रन्थिमान् -मती -मत् (त्), सन्धिविशिष्टः -ष्टा -ष्टं, सन्धियुक्तः -क्ता -क्तं.—(Divided in the joints) भिन्नसन्धिः -न्धिः -न्धि, विसन्धितः -ता -तं.

JOINT-HEIR, *s.* समांशी *m.* (न्), समभागी *m.* (न्), समाधिकारी *m.* (न्), समांशहारी *m.* (न्), भागी *m.* (न्), संविभागी, भागहरः, समभागहारी *m.*, भागधेयः, सहाधिकारी *m.* *See* COHEIR.

JOINTLY, *adv.* संयोगतस्, योगतस्, सहितं, समं, सह, सम्भूय, एकचित्तीभूय, अपृथक्, युगपत्, साद्धं.

JOINTURE, *s.* विधवाधनं, स्त्रीधनं, स्त्रीवृत्तिः *f.*, भर्त्रदत्तं, स्वामिदत्तं.

JOIST, *s.* गृहतलालम्बी दीर्घदारुः, हर्म्यतलोन्नम्भकं दीर्घकाष्ठं.

JOKE, *s.* परिहासः, हास्यं, हासिका, परिहासवाक्यं, परिहासोक्तिः *f.*, रसः, रसिकवाक्यं, नर्म्म *n.* (न्), विनोदः, विनोदोक्तिः *f.*, लालिका, श्लेषः, टट्टरी, व्याहारः, प्रपञ्चः, कौतुकं; 'in joke,' परिहासेन; 'jokes to the bridegroom,' जम्बूलः.

To JOKE, *v. a.* हस् (c. 1. हसति -सितुं), प्रहस्, विहस्, संविहस्, व्यतिहस्, सम्प्रहस्, परिहस्, परिहासं कृ, हास्यं कृ, परिहासवाक्यं वद् (c. 1. वदति -दितुं), विनोदं कृ, विनोदवाक्यं वद्, भण्ड् (c. 1. भण्डते -डितुं), विलस् (c. 1. -लसति -सितुं), खेला (nom. खेलायति), नर्म्म कृ; 'speak in joke,' परिहासेन वद्.

JOKER, *s.* परिहासवेदी *m.* (न्), परिहासकः, हास्यकारी *m.* (न्), विनोदभाषी *m.* (न्), वैहासिकः, विदूषकः, विलासी *m.* (न्).

JOLE, *s.* गण्डः -ण्डं, कपोलः, गण्डस्थलः -ली; 'cheek by jole,' गण्डागण्डि.

JOLLITY, JOLLINESS, *s.* उत्सवकरणं, उत्सवः, समुत्सवः, उल्लसता, उल्लासः, आनन्दः, आह्लादः, हर्षः, प्रहर्षः, प्रमोदः, प्रहसनं, प्रहासः, प्रहसितं, प्रहृष्टता, प्रफुल्लता, सानन्दता, आमोदः, मुदा.

JOLLY, *a.* उत्सवकारी -रिणी -रि (न्), सोत्सवः -वा -वं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, आनन्दी -न्दिनी -न्दि (न्), सानन्दः -न्दा -न्दं, हृष्टहृदयः -या -यं, हर्षणः -णा -णं, उल्लसः -सा -सं, उल्लसितः -ता -तं, उल्लासी -सिनी -सि (न्), प्रहासी -सिनी -सि (न्), प्रमोदी -दिनी -दि (न्), मुदितः -ता -तं, प्रफुल्लः -ल्ला -ल्लं, हासी &c., परिहासशीलः -ला -लं, विलासी -सिनी -सि (न्), कृतकौतुकः -का -कं, सुमनाः -नाः -नः (स्).

JOLLY-BOAT, *s.* बृहन्नौकासम्बन्धिनी क्षुद्रनौका.

To JOLT, *v. a.* क्षुभ् (c. 10. क्षोभयति -यितुं), क्षोभं कृ, विषमभूमिगमनप्रयुक्तं क्षोभं कृ, आकस्मिकक्षोभं कृ.

To JOLT, *v. n.* विषमभूमिगमनत्वात् क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं).

JOLT, *s.* क्षोभः, रथक्षोभः, विषमभूमिगमनप्रयुक्तः क्षोभः, आकस्मिकक्षोभः.

JOLTED, *p.p.* क्षुब्धः -ब्धा -ब्धं, विक्षुब्धः -ब्धा -ब्धं, क्षोभितः -ता -तं.

JOLTHEAD, *s.* स्थूलबुद्धिः *m.*, मन्दबुद्धिः *m.*, मूर्खः, वटुकः.

JONQUIL, *s.* उत्पलजातीयो नानावर्णः पुष्पभेदः.

To JOSTLE, *v. a.* जनसम्मर्दे स्कन्धेन ताडयित्वा क्षुभ् (c. 10. क्षोभयति -यितुं) or निरस् (c. 4. -अस्यति -असितुं) or निःसृ (c. 10. -सारयति -यितुं) or निराकृ or सञ्चाध् (c. 1. -बाधते -धितुं).

JOSTLING, *s.* जनसम्मर्दे परस्परसंक्षोभः or परस्परसमाघातः, परस्परबाधनं, परस्परसम्मर्दः, स्कन्धताडनं, प्रतिघातः.

JOT, *s.* लवः, लवमात्रं, कणमात्रं, बिन्दुमात्रं, लवलेशः, लेशः, अणुः *m.*, परमाणुः *m.*, कणिका, रजःकणः, तिलमात्रं.

To JOT, *v. a.* स्मरणार्थं किञ्चिद् लिख् (c. 6. लिखति, लेखितुं) or अभिलिख्.

JOTTING, *s.* स्मरणार्थं किञ्चिल्लिखनं, स्मरणार्थलिखितं.

JOURNAL, *a.* (Diary) दिनवृत्तपत्रं, दिनव्यवहारलेख्यं, आह्निकव्यवहारपुस्तकं, दिनचर्य्यालेखः, दैनिकवृत्तान्तपुस्तकं, दिनचरित्रलेखः, आह्निकपत्रकं, दैनिकपत्रकं, पञ्जिका, पञ्जिः -ञ्जी *f.*, पदपञ्जिका.—(Newspaper published daily) प्रतिदिनं प्रकाशीकृतं समाचारपत्रं, वार्त्तापत्रं, वार्त्तिकपत्रं.

JOURNALIST, *s.* आह्निकपत्रलेखकः, दैनिकपत्रलिक् *m.* (ख्).—(Conductor of a newspaper) समाचारपत्रप्रकाशकः, वार्त्तापत्रलेखकः.

JOURNEY, *s.* अध्वा *m.* (न्), अध्वगमनं, मार्गः, मार्गगमनं, मार्गक्रमणं, यात्रा, यात्राकरणं, यानं, प्रयाणं, प्रस्थानं, प्रस्थितिः *f.*, व्रज्या, भ्रमणं, देशभ्रमणं, पर्यटनं, प्रवासः, प्रवासगमनं; 'a long journey,' दीर्घाध्वा *m.* -ध्व *n.* (न्); 'a day's journey,' एकाहगमः -मनं; 'to return from a journey,' प्रवासाद् आगम् (c. 1. -गच्छति -गन्तुं); 'a pleasant journey to you,' शिवास् ते पन्थानः सन्तु.

To JOURNEY, *v. n.* अध्वना or मार्गेण गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं), मार्गगमनं कृ, अध्वगमनं कृ, यात्रां कृ, देशभ्रमणं कृ, देशाद्देशं भ्रम् (c. 4. भाम्यति, भमितुं) or परिभ्रम् or पर्यट् (c. 1. अटति -टितुं).

JOURNEYER, *s.* अध्वगः -गामी *m.* (न्), अध्वनीनः, अध्वन्यः, यात्रिकः, यायी *m.* (न्), पथिकः, सारणिकः, पादविकः.

JOURNEYING, *s.* अध्वगमनं, मार्गगमनं, यात्राकरणं, देशभ्रमणं.

JOURNEYMAN, *s.* वेतनार्थं कर्म्मकारः or कर्म्मकरः or शिल्पकारः or शिल्पकर्म्मकरः, हस्तकर्म्मकारः, वैतनिकः, वेतनार्थी *m.* (न्), व्रातीनः.

JOURNEY-WORK, *s.* शिल्पकर्म्म *n.* (न्), हस्तकर्म्म *n.*, वैतनिककर्म्म *n.*, शिल्पं.

JOVE, *s.* (The god). *See* INDRA.

JOVIAL, *a.* उत्सवकारी -रिणी -रि (न्), नित्योत्सवी -विनी -वि (न्), सदोत्सवी &c., कृतोत्सवः -वा -वं, उल्लासी -सिनी -सि (न्), सदानन्दी -न्दिनी -न्दि (न्), प्रहृष्टः -ष्टा -ष्टं, परिहासशीलः -ला -लं, सदाप्रमोदी -दिनी -दि (न्), उत्सवप्रियः -या -यं.

JOVIALLY, *adv.* सोत्सवं, महोत्सवेन, सदानन्दपूर्द्धं, उल्लसवत्, प्रहृष्टवत्.

JOVIALITY, JOVIALNESS. *s.* उत्सवकरणं, नित्योत्सवः, सदानन्दः, नित्यानन्दः, उल्लसता, नित्योल्लासः, हर्षः, प्रहर्षः, आह्लादः, प्रहसनं, हास्यं, प्रहासः, प्रहृष्टता.

JOWL, *s.* (Cheek) गण्डः, कपोलः. *See* JOLE.

JOWLER, *s.* मृगव्यकुक्कुरः, मृगव्यश्वा *m.* (न्), मृगदंशकः.

JOY, *s.* आनन्दः, हर्षः, आह्लादः, प्रह्लादः, प्रमोदः, आमोदः, नन्दः, ह्लादः -दनं, मोदः, मुदा, मुद् *f.*, हृष्टिः *f.*, हृष्टता, प्रहर्षः, प्रहृष्टता, मदः, प्रमदः, मादः, तुष्टिः *f.*, तोषः, परितोषः, सन्तोषः, सन्तुष्टिः *f.*, विलासः, उल्लासः, उल्लसता -त्वं, प्रफुल्लता, प्रीतिः *f.*, प्रीतता, सुखं, सौख्यं, चित्तप्रसन्नता, शर्म्म *n.* (न्), नन्द्युः *m.*, धन्यता, आनन्द्युः *m.*, उत्सवः, रभसः, उत्साहः.—(The cause of joy) नन्दनः -ना -नं, आनन्ददः -दा -दं; 'joy and sorrow,' हर्षोद्वेगं.

To JOY, *v. n.* नन्द् (c. 1. नन्दति -न्दितुं), आनन्द्, हृष् (c. 4. हृष्यति, हर्षितुं), ह्लाद् (c. 1. ह्लादते -दितुं), उल्लस् (c. 1. -लसति -सितुं), रम् (c. 4. रमते, रन्तुं), तुष् (c. 4. तुष्यति, तोष्टुं), मद् (c. 4. माद्यति, मदितुं).

To JOY, *v. a.* (Cause joy) नन्द् (c. 10. नन्दयति -यितुं), हृष् (c. 10. हर्षयति -यितुं), प्रहृष्.—(Give one joy, congratulate) अभिनन्द्, अभिवन्द् (c. 1. -वन्दते -न्दितुं), धन्यवादं कृ. *See To* CONGRATULATE.

JOYFUL, *a.* आनन्दी -न्दिनी -न्दि (न्), आनन्दितः -ता -तं, सानन्दः -न्दा

Digitized by Google

-न्दं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टमानसः -सा -सं, हृष्टहृदयः -या -यं, प्रहर्षितः -ता -तं, हर्षितः -ता -तं, प्रहर्षणः -णा -णं, हर्षमाणः -णा -णं, हर्षणः -णा -णं, आह्लादी -दिनी -दि (न्), ह्लादी &c.. प्रह्लादितः -ता -तं, आह्लादितः -ता -तं, ह्लादितः -ता -तं, प्रमोदी -दिनी -दि (न्), प्रमुदितः -ता -तं, मुदितः -ता -तं, मुदान्वितः -ता -तं, हर्षान्वितः -ता -तं, प्रमुद् *m. f. n.*, प्रफुल्लः -ल्ला -ल्लं, हर्षयुक्तः -क्ता -क्तं, तुष्टः -ष्टा -ष्टं, परितुष्टः -ष्टा -ष्टं, उल्लसः -सा -सं, उल्लासी -सिनी -सि (न्), उल्लसितः -ता -तं, प्रीतः -ता -तं, प्रह्वन्नः -न्ना -न्नं, आनन्दमयः -यी -यं, हर्षाक्रान्तः -न्ता -न्तं, हर्षाविष्टः -ष्टा -ष्टं, सुखी -खिनी -खि (न्), मत्तः -त्ता -त्तं, विशोकः -का -कं.—(Causing joy) हर्षकः -का -कं, हर्षदः -दा -दं, हर्षावहः -हा -हं, आनन्ददः -दा -दं, आनन्दकरः -री -रं, मोदकः -का -कं, सुभगः -गा -गं.

JOYFULLY, *adv.* सानन्दं, सहर्षं, साह्लादं, हर्षेण, प्रहर्षेण, प्रह्लादेन, प्रमोदेन, सामोदं, उल्लासेन, सोल्लासं, आनन्दपूर्वं, हृष्टमनसा, हृष्टवत्, सन्तोषेण.

JOYFULNESS, *s.* सानन्दत्वं, हृष्टता, प्रहृष्टता, प्रफुल्लता, आनन्दः. *See* JOY.

JOYLESS, *a.* निरानन्दः -न्दा -न्दं, आनन्दहीनः -ना -नं, आनन्दशून्यः -न्या -न्यं, अहर्षः -र्षा -र्षं, अहृष्टः -ष्टा -ष्टं, अहर्षितः -ता -तं, हर्षहीनः -ना -नं, आह्लादहीनः -ना -नं, निराह्लादः -दा -दं, अनाह्लादी -दिनी -दि (न्), असुखी -खिनी -खि (न्), असुखः -खा -खं.—(Giving no joy) असुखदः -दा -दं, असुखावहः -हा -हं, अनानन्ददः -दा -दं, अहर्षदः -दा -दं.

JOYLESSNESS, *s.* निरानन्दत्वं, आनन्दहीनता, निराह्लादत्वं, हर्षशून्यता.

JOYOUS, *a.* आनन्दी -न्दिनी -न्दि (न्), सानन्दः -न्दा -न्दं, प्रहृष्टः -ष्टा -ष्टं, आनन्दवृत्तिः -त्तिः -त्ति, प्रसन्नचित्तः -त्ता -त्तं, उल्लासी -सिनी -सि (न्). *See* JOYFUL.

JOYOUSLY, *adv.* सानन्दं, सहर्षं, साह्लादं, हृष्टचेतसा, प्रसन्नमनसा.

JOYOUSNESS, *s.* हृष्टता, प्रहृष्टता, सानन्दत्वं, चित्तप्रसन्नता, प्रफुल्लता.

JUBILANT, *a.* जयशब्दकारी -रिणी -रि (न्), जयशब्दोच्चारी -रिणी -रि (न्), जयध्वनिकारी &c., जयप्रशंसाकारी &c., जयशब्दघोषी -षिणी -षि (न्).

JUBILEE, *s.* महोत्सवः, महोत्सवकालः, समुत्सवः, उत्सवः, उत्सवकालः.

JUCUNDITY, *s.* रम्यता, रमणीयता, प्रियता, नन्दकत्वं, कान्तत्वं.

JUDAIC, JUDAICAL, *a.* यिहुदीयः -या -यं, यिहुदीयव्यवहारः -रा -रं.

JUDGE, *s.* (Officer who hears and determines causes) धर्म्माध्यक्षः, धर्म्माधिकारी *m.* (न्), न्यायाधीशः, न्यायाधिपतिः *m.*, प्राड्विवाकः, विचारकर्त्ता *m.* (र्त्तृ), विचारकः, दण्डनायकः, व्यवहर्त्ता *m.* (र्त्तृ), अक्षदर्शकः, आक्षपाटिकः, स्थेयः, आधिकरणिकः, निर्णेता *m.* (तृ), निर्णयकारः.—(One who has skill to decide on the merits of any thing, a connoisseur) गुणग्राही *m.* (न्), गुणग्राहकः, गुणज्ञः, अभिज्ञः, विज्ञः, ज्ञानी *m.* (न्), परीक्षकः, तद्विद् *m.*, रसज्ञः, विवेकी *m.* (न्), विवेचकः, विवेकदृश्वा *m.* (न्), परिच्छेदकः.

To JUDGE, *v. n.* (Form an opinion, determine) विचर् (c. 10. -चारयति -यितुं), विचारं कृ, निर्णी (c. 1. -र्णयति -र्णेतुं), निर्णेयं कृ, निश्चि (c. 5. -चिनोति -चेतुं), निश्चयं कृ, निधृ (c. 10. -धारयति -यितुं), अवधृ, निर्धारणं कृ.—(Weigh, consider, deliberate) मनसा विचर्, वितर्क् (c. 10. -तर्कयति -यितुं), वितर्कं कृ, विमृश् (c. 6. -मृशति -ष्टुं), विगण् (c. 10. -गणयति -यितुं), विकॢप् (c. 10. -कल्पयति -यितुं), समर्थ् (nom. समर्थयति -यितुं), समर्थनां कृ, मनसा विवेचनं कृ.—(Discriminate) विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), परिच्छिद् (c. 7. -च्छिनत्ति -च्छेत्तुं), विविच् (c. 7. -विनक्ति -वेक्तुं, c. 10. -वेचयति -यितुं), विभू (c. 10. -भावयति -यितुं), विचर्, विवेकं कृ, परिच्छेदं कृ.—(Examine) परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ.—(Determine causes judicially, pass sentence) विचर्, विचारं कृ, निर्णी, निर्णेयं कृ, प्रणयनं कृ, व्यवहारदर्शनं कृ, तीर् (c. 10. तीरयति -यितुं), न्यायं कृ.

To JUDGE, *v. a.* (Examine, bring under investigation) परीक्ष् (c. 1. -ईक्षते -क्षितुं), अनुसन्धा (c. 3. -दधाति -धातुं), अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), परीक्षितं -तां कृ.—(Judicially) विचर् (c. 10. -चारयति -यितुं), निर्णी (c. 1. -र्णयति -र्णेतुं), तीर् (c. 10. तीरयति -यितुं), विचारणं कृ, निर्णेयं कृ.—(Censure, impute fault) निन्द् (c. 1. निन्दति -न्दितुं), दोषीकृ, दोषारोपणं कृ, अपवद् (c. 1. -वदति -दितुं), दोषप्रसङ्गं कृ.—(Consider, reckon) तर्क् (c. 10. तर्कयति -यितुं), मन् (c. 4. मन्यते, मन्तुं).

JUDGESHIP, *s.* धर्म्माध्यक्षत्वं, न्यायाधीशत्वं, धर्म्माधिकारः -रिता.

To LITIGATE, *v. a.* विवादास्पदीकृ, व्यवहारास्पदीकृ, वादग्रस्तं -स्तां कृ.

LITIGATED, *p. p.* विवादास्पदीकृतः -ता -तं, विवादास्पदीभूतः -ता -तं, विवादानुगतः -ता -तं, वादानुगतः -ता -तं, वादग्रस्तः -स्ता -स्तं, विवादग्रस्तः -स्ता -स्तं.

LITIGATION, *s.* विवादः, विवादकरणं, वादः, वादकरणं, व्यवहारः, व्यवहारकरणं, रिक्कं; 'under litigation,' विवादास्पदीभूतः -ता -तं, वादग्रस्तः -स्ता -स्तं. *See* LITIGATED.

LITIGIOUS, *a.* विवादी -दिनी -दि (न्), विवादशीलः -ला -लं, विवादप्रियः -या -यं, विवादार्थी -र्थिनी &c., वादप्रियः -या -यं, विवादप्रवणः -णा -णं, विवादबुद्धिः -द्धिः -द्धि, विवादासक्तः -क्ता -क्तं, विवादरतः -ता -तं.

LITIGIOUSNESS, *s.* विवादशीलता, विवादार्थित्वं, विवादासक्तिः *f.*, विवादबुद्धिः *f.*

LITTER, *s.* (Bed borne on the shoulders) शिविका, याप्ययानं, डयनं, डलकं, प्रवहणं, इत्या, शिरस्का.—(Bed of straw) तृणशय्या, तृणशयनं, तृणसंस्तरः, तृणास्तरणं.—(Brood of young animals) शावकगणः, यः शावकगण एकवारे जायते, शावकसमूहः; 'of pigs,' शूकरशावकगणः.—(Shreds scattered about) इतस्ततो विकीर्णा वस्त्रखण्डाः.—(Confusion of things scattered about) द्रव्यविक्षिप्तता, द्रव्यविकीर्णता, द्रव्यव्यस्तता, द्रव्यसङ्करः, साङ्कर्य्यं, अस्तव्यस्तता.

To LITTER, *v. a.* (Bring forth a number of young ones) शावकगणं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् (c. 10. जनयति -यितुं) or प्रजन् (c. 4. -जायते -जनितुं) or उत्पद् (c. 10. -पादयति

Digitized by Google

-यितुं), प्रसवं कृ.—(Cover with straw) तृणावृतं -तां कृ, तृणास्तीर्णं -र्णां कृ, तृणास्तृतं -तां कृ, सतृणं -णां कृ, तृणास्तरणं कृ.—(Scatter about confusedly) इतस्ततो विकृ (c. 6. -किरति -करितुं -रीतुं) or व्याकृ or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अस्तव्यस्तीकृ.

Littered, *p. p.* (Covered with straw) तृणावृतः -ता -तं, तृणास्तीर्णः -र्णा -र्णं, तृणास्तृतः -ता -तं.—(Scattered about) इतस्ततो विकीर्णः -र्णा -र्णं or व्याकीर्णः -र्णा -र्णं, अस्तव्यस्तः -स्ता -स्तं, बहुधा विक्षिप्तः -प्ता -प्तं, बहुधास्तीर्णः -र्णा -र्णं.

Little, *a.* (Small in size or extent, not great) अल्पः -ल्पा -ल्पं, क्षुद्रः -द्रा -द्रं, अल्पकः -का -कं, क्षुद्रकः -का -कं, अल्पपरिमाणः -णा -णं, क्षुद्रपरिमाणः -णा -णं, सूक्ष्मः -क्ष्मा -क्ष्मं, तनुः -नुः -नु, स्तोकः -का -कं, लघुः -घुः -घु, लघुपरिमाणः -णा -णं, ह्रस्वः -स्वा -स्वं, क्षुल्लकः -का -कं, श्लक्ष्णः -क्ष्णा -क्ष्णं, कृशः -शा -शं, दभ्रः -भ्रा -भ्रं, कणीकः -का -कं, अणुकः -का -कं, अणुः -णुः -णु, कणः, लेशः, लवः, मात्रा *f.*, त्रुटिः -टी *f.*—(Small in body) अल्पतनुः -नुः -नु, अल्पशरीरः -रा -रं, क्षुद्रतनुः &c., ह्रस्वशरीरः -रा -रं, स्तोककायः -या -यं, अल्पमूर्त्तिः -र्त्तिः -र्त्ति.—(Small in quantity, not much) अल्पः -ल्पा -ल्पं, अल्पमात्रः -त्रा -त्रं, स्तोकः -का -कं, अबहुः -हुः -ह्वी -हु, अबहुलः -ला -लं, अप्रचुरः -रा -रं, ईषत् in comp.—(Very little) अत्यल्पः -ल्पा -ल्पं, अल्पाल्पः -ल्पा -ल्पं, अल्पीयान् -यसी -यः (स्), अल्पिष्ठः -ष्ठा -ष्ठं, कणीयान् &c., अणीयान् &c., क्षोदीयान् &c., क्षोदिष्ठः &c.; 'not a little,' अनल्पः -ल्पा -ल्पं; 'little finger,' कनिष्ठाङ्गुलिः -ली *f.*; 'a little wealth,' अल्पधनं, अर्थलेशः; 'having little wealth,' अल्पधनः -ना -नं; 'of little merit,' ईषद्गुणः -णा -णं; 'a little hot,' ईषदुष्णः -ष्णा -ष्णं; 'a little animal,' क्षुद्रजन्तुः *m.*; 'of little weight,' अल्पप्रभावः -वा -वं, अल्पप्रमाणः -णा -णं; 'for a little while,' किञ्चित्कालं, कियत्कालं.

Little, *s.* (Small quantity) अल्पभागः, अल्पांशः, किञ्चित्, अल्पं, स्तोकं, ईषत् ind., अल्पिका, अल्पमात्रं, मात्रा, किञ्चिद्भागः, किञ्चन, सत्रं, अबहुभागः, अबाहुल्यं, अप्राचुर्यं; 'little or much,' स्तोकं प्रचुरं वा; 'by little and little,' अल्पशस्, अल्पात्, स्तोकशस्; 'desiring little,' अल्पाकांक्षी -क्षिणी -क्षि (न्); 'doing little,' ईषत्करः -री -रं.

Little, *adv.* ईषत्, कियत्, स्तोकं, मनाक्, अल्पमात्रं, अबहु, अभूशं, अभूरि, तावत्; 'a little distance, a little way,' कियद्दूरं, ईषद्दूरं, नातिदूरं -रे, कियत्पर्य्यन्तं; 'a little less,' किञ्चिन्यूनः -ना -नं, ईषदूनः -ना -नं; 'little drunk,' ईषत्पानः -ना -नं, ईषत्पीतः -ता -तं; 'little-minded,' कृपणबुद्धिः -द्धिः -द्धि, कृपणधीः -धीः -धि.

Littleness, *s.* अल्पता -त्वं, क्षुद्रता -त्वं, सूक्ष्मता, सौक्ष्म्यं, तनुता, स्तोकता, लघुता, लाघवं, लघिमा *m.* (न्), ह्रस्वता.—(Of body) अल्पशरीरता, शरीरह्रस्वता, शरीरक्षुद्रता.—(Meanness) कृपणता, कार्पण्यं, तुच्छत्वं, दीनता, कदर्य्यता, अपकृष्टता; 'of mind,' बुद्धिकार्पण्यं.

Littoral, *a.* तीरस्थः -स्था -स्थं, तटस्थः -स्था -स्थं, तीरसम्बन्धी -न्धिनी &c.

Liturgical, *a.* समाजप्रार्थनापद्धतिसम्बन्धी -न्धिनी -न्धि (न्), प्रार्थनपद्धतिविषयः -या -यं, प्रार्थनाविधिसम्बन्धी &c.

Liturgy, *s.* खृीष्टीयसमाजप्रार्थनापद्धतिः *f.*, प्रार्थनापद्धतिः, सामाजिकप्रार्थनापद्धतिः, सामाजिकभक्तिमार्गः, प्रार्थनामार्गः, खृीष्टीयप्रार्थनाविधिः *m.*

To live, *v. n.* (Have the vital principle) जीव् (c. 1. जीवति -वितुं), प्राण् (c. 2. प्राणिति -तुं, rt. अन्), श्वस् (c. 2. श्वसिति -तुं), श्वासप्रश्वासं कृ.—(Exist, be in existence) वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत्, विद् in pass. (विद्यते), भू in pass. (भ्रियते -र्त्ति); 'as long as you live,' यावद् धरिष्यसे, यावन्ते प्राणा धरिष्यन्ति, यावज्जीवं.—(Pass life or time) जीवनं or कालं वृत् (c. 10. वर्त्तयति -यितुं) or वह् (c. 10. वाहयति -यितुं) or निर्वह् or गम् (c. 10. गमयति -यितुं) or नी (c. 1. नयति, नेतुं), कालनिर्वाहं कृ, जीवनिर्वाहं कृ.—(Dwell, remain) वस् (c. 1. वसति, वस्तुं), निवस्, अधिवस्, स्था (c. 1. तिष्ठति, स्थातुं), अधिष्ठा, वृत् आस् (c. 2. आस्ते -सितुं), वासं कृ.—(Subsist) उपजीव्, उपजीवनं कृ, निर्वह् (c. 1. -वहति -वोढुं), निर्वाहं कृ, शरीरयात्रां कृ, प्राणयात्रां कृ, प्राणधारणं कृ, उदरनिर्वाहं कृ.

Live, *a.* जीवी -विनी -वि (न्), जीवन् -वन्ती -वत् (त्). *See* Living, *part.*

Livelihood, *s.* जीविका, उपजीविका, उपजीवनं, उपजीव्यं, आजीवः -वनं, प्रजीवनं, जीवनं, जीवनोपायः, उपजीवनोपायः, वृत्तिः *f.*, वर्त्तनं, वार्त्ता, वृत्तिता, वृत्त्युपायः, जीवनवृत्तिः *f.*, जीवनसाधनं, जीवसाधनं, उपजीवनसाधनं, जीवनार्थः, शरीरयात्रा, प्राणयात्रा; 'bare livelihood,' ग्रासाच्छादनं, अन्नाच्छादनं, अशनाच्छादनं -ने *n. du.*, अन्नोदकं, दिननिर्वाहः, दिनचर्य्या; 'obtaining a livelihood,' जीविकाप्राप्तः -प्ता -प्तं.

Liveliness, *s.* तेजस् *n.*, तेजस्विता, तेजोवत्त्वं, उल्लसता, उल्लासः, प्रफुल्लता, प्रहृष्टता, प्रहर्षः, सानन्दता, सत्त्वं, तीव्रता, सजीवत्वं, लघुता, लाघवं, क्षिप्रत्वं; 'of countenance,' वदनप्रफुल्लता, मुखश्रीः *f.*

Livelong, *a.* दीर्घकालीनः -ना -नं, दीर्घकालिकः -की -कं, चिरकालीनः &c.

Lively, *a.* तेजोवान् -वती -वत् (त्), तेजस्वी -स्विनी -स्वि (न्), उल्लसः -सा -सं, उल्लासी -सिनी &c., प्रफुल्लः -ल्ला -ल्लं, प्रहृष्टः -ष्टा -ष्टं, आनन्दी -न्दिनी &c., सानन्दः -न्दा -न्दं, उल्लासवृत्तिः -त्तिः -त्ति, आनन्दवृत्तिः &c., सत्त्वपूर्णः -र्णा -र्णं, तीव्रः -व्रा -व्रं, तीक्ष्णः -क्ष्णा -क्ष्णं, बहुसत्त्वः -त्त्वा -त्त्वं, ससत्त्वः &c.—(In countenance) प्रफुल्लवदनः -ना -नं, हास्यमुखः -खी -खं, सुहसाननः -ना -नं, हास्यवदनः &c., प्रसन्नमुखः &c.—(Energetic) तीक्ष्णकर्म्मा -र्म्मी -र्म्म (न्), उद्योगशीलः -ला -लं, उत्साहशीलः -ला -लं.

Lively, livelily, *adv.* तेजसा, तेजोपूर्वं, उल्लासेन, उल्लसवत्, प्रफुल्लवत्.

Liver, *s.* (One who lives) जीवी *m.* (न्), उपजीवी *m.*, जीवकः. *See* Living, *part.* (The organ which secretes the bile) यकृत्, कालखण्डं, कालकं, कालिका, कालेयं, कालखञ्जनं, पित्ताशयः, पित्ताधारः; 'enlargement of the liver,' यकृदुल्लः.

Liver-color, *a.* यकृद्वर्णः -र्णा -र्णं, कालेयः -यी -यं, नीलरक्तः -क्ता -क्तं.

Livery, *s.* (Particular dress) वेषः, वेशः, कुलवेशः, कुलवेषः, कुलचिह्नं.—(Of a servant) सेवकवेषः, भृत्यवेशः, परिचरवेषः, कुलसेवकवेषः.—(Keeping a horse at a certain rate) निरूपितमूल्यमपेक्ष्य अश्वपोषणं or अश्वपालनं.

Livery-man, *s.* कुलवेशधारी *m.* (न्), कुलवेशभृत् *m.*—(Freeman) पौरवेशः, पौरलिङ्गी *m.* (न्), पौरलिङ्गधारी *m.* (न्).

Livery-stable, *s.* अश्वपोषणशाला, अश्वपालनशाला, अश्वशाला.

Live-stock, *s.* जीवधनं, जीवत् *n.*

Livid, *a.* नीलः -ला -लं, नीलवर्णः -र्णा -र्णं, नीलकृष्णः -ष्णा -ष्णं, कृष्णवर्णः -र्णा -र्णं, सीसकवर्णः &c., कालः -ला -लं, कालिकः -की -कं.

Lividity, lividness, *s.* नीलता, नीलवर्णः, नीलिमा *m.* (न्), कृष्णता, कृष्णिमा *m.*, सीसकवर्णः.

Living, *part.* or *a.* (Having life) जीवी -विनी -वि (न्), जीवन् -वन्ती -वत् (त्), सजीवः -वा -वं, जीवितः -ता -तं, जीवभूतः -ता -तं, जीवन्तः -न्ती -न्तं, प्राणी -णिनी -णि (न्), प्राणन् -णन्ती -णत् (त्), प्राणभृत् *m. f. n.*, प्राणधारी -रिणी &c., प्राणमयः -यी -यं, सप्राणः -णा -णं, चेतनः -ना -नं, चेतनावान् -वती -वत् (त्), सचेष्टः -ष्टा -ष्टं, चेष्टितः -ता -तं; 'a living being,' जन्तुः *m.*, प्राणी *m.* (न्), प्राणभृत् *m.*,

Digitized by Google

जन्मी *m.*, शरीरी *m.*, देही *m.*, चेतनः, भृतं, सत्त्वं; 'living creatures,' प्राणिनः *m. pl.*, जीवनाः *m. pl.*, चेतनाः *m. pl.*; 'the land of the living,' जीवलोकः.—(Existent) वर्त्तमानः -ना -नं, म्रियमाणः -णा -णं, विद्यमानः -ना -नं, वर्त्तिष्णुः -ष्णुः -ष्णु, वर्त्ती -र्त्तिनी &c.—(Subsisting) उपजीवी -विनी &c., उपजीवकः -का -कं, आजीवी -विनी &c., आजीवः -वा -वं; 'living by agriculture,' कृष्युपजीवी &c.; 'living by learning,' विद्योपजीवी -विनी &c.; 'living by arms,' शस्त्रोपजीवी &c., शस्त्राजीवः -वा -वं; 'living virtuously,' सद्वर्त्ती -र्त्तिनी &c., सद्वृत्तिः -त्तिः -त्ति, सद्वृत्तः -त्ता -त्तं, सद्व्यवहारः -रा -रं; 'living wickedly,' असद्वृत्तिः &c., कुवृत्तिः &c., कुवर्त्ती -र्त्तिनी &c.; 'a living sacrifice,' जीवोपहारः; 'a living death,' जीवितमरणं.

LIVING, *s.* (The act) जीवनं, प्राणधारणं, वर्त्तनं, वृत्तिः *f.*, वासः, निवासः.—(Subsistence, means of subsistence) उपजीविका, जीविका, उपजीवनं, उपजीव्यं, आजीवः -वनं, जीवनोपायः, उपजीवनोपायः, वृत्त्युपायः, वृत्तिः, वर्त्तनं, जीवसाधनं, प्राणयात्रा, यात्रा, शरीरयात्रा, प्राणस्थितिः *f.*, निर्वाहः, जीवनिर्वाहः, प्राणनिर्वाहः, उदरनिर्वाहः; 'living by learning,' विद्योपजीवनं; 'living by husbandry,' कृष्युपजीवनं; 'having a living,' वृत्तिमान् -मती -मत् (त्); 'good living,' सुभोजनं, मिष्टभोजनं, परमान्नभोजनं, उत्तमान्नभोजनं, आप्यायनं; 'poor living,' कुभोजनं, कदन्नभोजनं.—(Benefice) धर्म्मदायः, धर्म्माध्यापकवृत्तिः *f.*, धर्म्मशिक्षकवृत्तिः.

LIXIVIAL, LIXIVIOUS, *a.* क्षारासुसंसृष्टः -ष्टा -ष्टं, क्षारव्याप्तः -प्ता -प्तं, क्षारविशिष्टः -ष्टा -ष्टं, क्षाराक्तः -क्ता -क्तं, लवणाक्तः &c.

LIXIVIUM, *s.* क्षारासु *n.*, क्षारजलं, क्षारसंसृष्टजलं, क्षारितजलं,

LIZARD, *s.* सरटः, सरटुः *m.*, सरट् *m.*, कृकलासः, कृकवाकुः *m.*, कृकुलासः, कृकलाशः, गोधा -धिका, प्रतिसूर्य्यः -र्य्यकः, पल्लिः -ल्लिका, लक्लिका, शरण्डः, बहुरूपः, अग्रजः, क्रकचपाद् *m.*, शुष्काङ्गी, वेदारः, विदारुः *m.*, साञ्जनः, साशयन्दकः, वृक्षशः; 'house-lizard,' गृहगोधा -धिका, गृहगोलिका, गृहालिका, मुसली, मुषली, मुशली, टट्टनी, ज्येष्ठा -ष्ठी.

Lo! *exclam.* पश्य, पश्यत, प्रेक्षस्व.

LOAD, *s.* भारः, धुरा, धूः *f.* (धुर्), स्थौरं, पर्य्याहारः; 'a heavy load,' सुभारः, अतिभारः, दुर्भारः, गुरुभारः.—(Encumbrance, any thing grievous) बाधा, पीडा, कष्टं; 'bearing a load,' भारवाहनः -ना -नं, भारवाही -हिनी -हि (न्), भारवाहिकः -की -कं, भारसहः -हा -हं, धुरन्धरः -रा -रं, धुर्वहः -हा -हं, भारहरः -रा -रं, भारहारिकः -की -कं; 'the act of bearing a load,' भारवहनं, भारोद्वहनं, भारोद्धरणं.

To LOAD, *v. a.* भारं न्यस् (c. 4. -अस्यति -असितुं) or निविश् (c. 10. -वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं) or आरुह् in caus. (-रोपयति -यितुं) or स्था in caus. (स्थापयति -यितुं), भारवन्तं -वतीं -वत् कृ, भाराक्रान्तं -न्तां -न्तं कृ, सभारं -रां कृ, भारेण पीड् (c. 10. पीडयति -यितुं), भारग्रस्तं -स्तां कृ.—(With powder) आग्नेयचूर्णं निविश्, चूर्णगर्भं -र्भां कृ, आग्नेयचूर्णेन पॄ (c. 10. पूरयति -यितुं).

LOADED, *p. p.* भारवान् -वती -वत् (त्), भारी -रिणी -रि (न्), सभारः -रा -रं, भाराक्रान्तः -न्ता -न्तं, भारग्रस्तः -स्ता -स्तं, अर्पितभारः -रा -रं, निवेशितभारः -रा -रं, आरोपितभारः -रा -रं, धुरीणः -णा -णं, गर्भः -र्भा -र्भं in comp.; 'loaded with powder,' चूर्णगर्भः -र्भा -र्भं, आग्नेयचूर्णपूरितः -ता -तं, दाह्यचूर्णपूर्णः -र्णा -र्णं; 'heavily loaded,' सुभरः -रा -रं, सुभारवान् &c., सुभारी &c., अतिभारी &c.

LOADER, *s.* भारकर्त्री *m.* (र्त्तृ), भारदाता *m.* (तृ), भारारोपकः.

LOADING, *s.* (The act) भारार्पणं, भारारोपणं.—(Cargo) भारः.

LOADSTONE, *s.* लोहचुम्बकः, चुम्बकः, चुम्बकप्रस्तरः, चुम्बकमणिः *m.*, लोहकान्तः -न्तं, अयस्कान्तः, आकर्षः -र्षकः, आकर्षकप्रस्तरः, महालोहं, कृष्णलोहं, द्रावकः, भामरः, वैक्रान्तं.

LOAF, *s.* अपूपः, पूपः, पिष्टकः, उण्डेरकः, ओकुलः, पोलिका, करम्भः -म्भकः.—(A mass) पिण्डः.

LOAM, *s.* चिक्कणमृत्तिका, स्निग्धमृत्तिका, पङ्कवालुकायुक्तो मृत्तिकाविशेषः, पङ्किलमृत्तिका, पङ्कः, चिकिलः.

LOAMY, *a.* चिक्कणः -णा -णं, चिक्कणमृत्तिकामयः -यी -यं.

LOAN, *s.* (Of money) ऋणं, ऋणदानं, धनप्रयोगः, प्रयोगः, कुसीदं, कलान्तिः *f.* -न्तिका, निरूपितकालपर्य्यन्तं धनप्रयोगः.—(Temporary use of any thing) निरूपितकालपर्य्यन्तं द्रव्यप्रयोजनं or द्रव्यप्रयोगः.—(Something to be given back) प्रतिदेयं.

LOATH, *a.* अनिच्छुः -च्छुः -च्छु, अनिच्छुकः -का -कं, अनिच्छन् -च्छन्ती -च्छत् (त्), विरक्तः -क्ता -क्तं, विमुखः -खा -खं, पराङ्मुखः -खा -खं, विमतः -ता -तं, असम्मतः -ता -तं, अकामः -मा -मं, निष्कामः -मा -मं, निस्स्पृहः -हा -हं.

To LOATHE, *v. a.* अत्यन्तं द्विष् (c. 2. द्वेष्टि -ष्टुं) or प्रद्विष्, अतिद्वेषं कृ. गर्ह् (c. 1. गर्हते -र्हितुं), बाध् in des. (बीभत्सते -त्सितुं), घृण् (c. 1. घृणते -णितुं), घृणां कृ, बीभत्सं कृ.

LOATHED, *p. p.* अतिद्विष्टः -ष्टा -ष्टं, गर्हितः -ता -तं, घृणितः -ता -तं.

LOATHFUL, *a.* अतिद्वेषी -षिणी -षि (न्), घृणाकारी -रिणी &c., बीभत्सकारी &c., बीभत्सः -त्सा -त्सं, बीभत्सजनकः -का -कं.

LOATHING, *s.* बीभत्सः -त्सं, घृणा, गर्हा -र्हणं, अतिद्वेषः -षणं, अत्यन्तद्वेषः, विकृतं, वैकृतं -त्यं, कुत्सा, विरक्तिः *f.*, निर्वेदः, न्यक्कारः.

LOATHINGLY, *adv.* सबीभत्सं, बीभत्सपूर्व्वं, अतिद्वेषेण, घृणापूर्व्वं, कुत्सापूर्व्वं.

LOATHSOME, *a.* बीभत्सजनकः -का -कं, घृणाजनकः -का -कं, घृणोत्पादकः -का -कं, अतिगर्हितः -ता -तं, गर्हितः -ता -तं, गर्हणीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, कुत्सितः -ता -तं, घृणार्हः -र्हा -र्हं, द्वेष्यः -ष्या -ष्यं, अतिद्वेषणीयः -या -यं, विरक्तिजनकः &c.

LOATHSOMELY, *adv.* गर्हितं, गर्हणीयं, अतिद्वेषणीयं, गर्ह्यप्रकारेण.

LOATHSOMENESS, *s.* गर्ह्यता, गर्हणीयता, कुत्सितत्वं, कौत्सितयं, घृणाजनकत्वं, घृणार्हता, बीभत्सजनकता, द्वेष्यता.

LOB, LOB-COCK, *s.* स्थूलशरीरः, स्थूलकायः, स्थूलबुद्धिः *m.*, स्थूलजनः.

LOBBY, *s.* सभोपशाला, सभोपगृहं, उपशाला, बाह्यशाला, गमनागमनशाला.

LOBE, *s.* (Of the ear) कर्णलतिका, पालिका, कर्णपालिः *f.* -ली -लिका.—(Of the lungs) फुप्फुसभागः, फुप्फुसलतिका.—(Of the liver) यकृद्भागः, यकृदंशः.—(Part, division) अंशः, भागः.

LOBED, *a.* पालिकाविशिष्टः -ष्टा -ष्टं, भागी गिनी -गि (न्).

LOBSTER, *s.* कर्कटजातीयो दीर्घनखविशिष्टो मत्स्यभेदः.

LOCAL, *a.* दैशिकः -की -कं, देश्यः -श्या -श्यं, देशी -शिनी -शि (न्), देशीयः -या -यं, स्थानिकः -की -कं, स्थानीयः -या -यं, ऐहस्थानिकः -की -कं, ऐहदेशिकः -की -कं, देश or स्थान in comp.; as, 'local usage,' देशव्यवहारः, देशाचारः; 'local law,' देशधर्म्मः.—(Relating to a place) देशसम्बन्धी -न्धिनी &c., स्थानसम्बन्धी -न्धिनी &c.—(Limited to a particular place) एकदेशिकः -का -कं, एकदेशीयः -या -यं, एकदेशी -शिनी &c., एकस्थानिकः -की -कं, विशेषदेशीयः -या -यं, विशेषस्थानिकः -की -कं.

LOCALITY, *s.* स्थानं, देशः, प्रदेशः, स्थलं, आस्पदं, स्थानता, देशता, देशसम्बन्धः, स्थानसम्बन्धः, स्थितिः *f.*

LOCALLY, *adv.* स्थानविषये, स्थानतस्, स्थानमुद्दिश्य, देशमुद्दिश्य, देशे.

Digitized by Google

To LOCATE, *v. a.* स्था in caus. (स्थापयति -यितुं), अवस्था, प्रतिष्ठा, विन्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), रुह् in caus. (रोपयति -यितुं), स्थापनं कृ.

LOCATED, *p. p.* स्थापितः -ता -तं, प्रतिष्ठापितः -ता -तं, अवस्थितः -ता -तं, निवेशितः -ता -तं, विनिवेशितः -ता -तं, रोपितः -ता -तं.

LOCATION, *s.* (Act of placing) स्थापनं, प्रतिष्ठापनं, निवेशनं, रोपणं, विन्यासः.—(Situation) स्थानं, अवस्थानं, अवस्थितिः *f.*, प्रतिष्ठा, प्रतिष्ठानं, स्थितिः *f.*, आधिकारण्यं, आधिकरण्यं.—(In grammar) अधिकरणं, आधिकारण्यं.

LOCATIVE, *s.* (Case in grammar) अधिकरणं, सप्तमी विभक्तिः.

LOCH, *s.* *See* LAKE.

LOCK, *s.* (Instrument for fastening doors, &c.) तालयन्त्रं, तालकं, तालः, अर्गलं, वितर्दिः, द्वारयन्त्रं, द्वारकीलः.—(Of a gun) चूर्णोज्ज्वलनयन्त्रं, अग्निदयन्त्रं, अग्निजनकयन्त्रं.—(Of hair) अलकः, केशपाशः -शी, जटा, शिरोरुहः, काकपक्षः; 'clotted lock of an ascetic,' जटा, सटा, शटा; 'lock left on the crown or sides of the head at tonsure,' चूडा, शिखा, शिखण्डिः -ण्डकः, शिखण्डिका, शिखाण्डकः, काकपक्षः, केशपाशी.—(In a river or canal) जलस्तम्भनी, जलप्रतिबन्धकं, जलबन्धनी, जलबन्धनयन्त्रं, महायन्त्रं.—(Hug) आलिङ्गनं, गाढालिङ्गनं, सङ्गसङ्गः.

To LOCK, *v. a.* (Fasten with a lock) तालयन्त्रेण बन्ध् (c. 9. बध्नाति बन्द्धुं), कील् (c. 10. कीलयति -यितुं), तालकेन or अर्गलेन बन्ध्, तालबद्धं -द्धां कृ; 'lock a door,' द्वारं बन्ध् or रुध् (c. 7. रुणद्धि, रोद्धुं), द्वाररोधं कृ.—(Close) पिधा (c. 3. -दधाति -धातुं), अपिधा, बन्ध्.—(Confine) रुध्, निरुध्.—(Embrace closely) गाढम् आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), गाढालिङ्गनं कृ.

To LOCK, *v. n.* (Be fastened) तालकेन बन्ध् in pass. (बध्यते) or बद्धीभू.—(Unite by mutual embrace) परस्पराश्लेषेण or परस्परालिङ्गनेन संलग्नीभू or सबद्धीभू, परस्परं संश्लिष्टः -ष्टा -ष्टं भू.

LOCKED, *p. p.* (Fastened by a lock) तालयन्त्रेण बद्धः -द्धा -द्धं, तालकबद्धः -द्धा -द्धं, अर्गलबद्धः &c., कीलितः -ता -तं.—(Confined) रुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं.—(Closely embraced) गाढालिङ्गितः -ता -तं, गाढाश्लिष्टः -ष्टा -ष्टं.

LOCKED-JAW, LOCK-JAW, *s.* हनुस्तम्भः, हनुग्रहः.

LOCKER, *s.* तालकयुक्तं कोष्ठकं, कोष्ठः, सम्पुटः -टकः, भाजनं.

LOCKET, *s.* (Clasp, catch) कुडुपः.—(Ornament) स्मरणकेशाधारः.

LOCKSMITH, *s.* तालककारः, तालककृत् *m.*, तालयन्त्रकारी *m.* (न्).

LOCOMOTION, *s.* (Act of moving from place to place) स्थानान्तरगमनं, स्थलान्तरगमनं, स्थानात् स्थानं गमनं, गमनागमनं, इतस्ततो गमनं or चलनं, स्थानान्तरकरणं, स्थलान्तरकरणं, स्थानान्तरं, स्थलान्तरं, वीक्षा.—(Power of moving from place to place) स्थानान्तरगमनशक्तिः *f.*, चलनशक्तिः *f.*, गमनागमनशक्तिः *f.*

LOCOMOTIVE, *a.* जङ्गमः -मा -मं, चलः -ला -लं, चलनः -ना -नं, चलनशीलः -ला -लं, चलनधर्म्मकः -का -कं, चलनशक्तिकः -का -कं, चरः -रा -री -रं, चरिष्णुः -ष्णुः -ष्णु, सृत्वरः -रा -रं, गामुकः -का -कं, गतिमान् -मती -मत् (त्), गत्वरः -री -रं, गमनशक्तिविशिष्टः -ष्टा -ष्टं, पादुकः -का -कं.

LOCUM-TENENS, *s.* प्रतिनिधिः *m.*, प्रतिपुरुषः, प्रतिहस्तकः.

LOCUS, *s.* (In astronomy or geometry) निधिः *m.*

LOCUST, *s.* शलभः, शरभः, शकुनिका, शिरिः *m.*, पतङ्गः, शूककीटः.

LOCUTION, *s.* उक्तिः *f.*, वाक्यं, उक्तं, वाक् *f.* (च्), वाग्व्यापारः.

LODE, *s.* (Metallic vein) धातुरेखा, धातुपङ्क्तिः -क्तीः *f.*

LODESTONE, *s.* *See* LOADSTONE.

LODH, *s.* (Tree, the bark of which is used in dyeing) लोधः, लोध्रः, पट्टिका, पट्टी, क्रमुकः, लाक्षाप्रसादनः, गालवः, शावरः, तिरीटः, तिल्वः, माञ्जनः.

To LODGE, *v. a.* (Furnish with a temporary habitation) वस् (c. 10. वासयति -यितुं), निवस्, वासस्थानं दा, आश्रयं दा, निरूपितकालपर्य्यन्तं वस्.—(Fix, set, place) स्था in caus. (स्थापयति -यितुं), न्यस् (c. 4. -अस्यति -असितुं), निधा (c. 3. -दधाति -धातुं), प्रणिधा, प्रतिनिधा, निविश् (c. 10. -वेशयति -यितुं), ऋ in caus. (अर्पयति -यितुं), रुह् in caus. (रोपयति -यितुं).

To LODGE, *v. n.* (Reside temporarily) वस् (c. 1. वसति, वस्तुं), निवस्, आवस्, प्रतिवस्, समावस्, सन्निवस्, आश्रि (c. 1. -श्रयति -ते -यितुं), वासं कृ, निवासं कृ, आश्रयं कृ, निरूपितकालपर्य्यन्तं वस्; 'having lodged,' उषित्वा, उष्ट्वा, उष्य; 'having lodged for a night,' रात्रिम् एकाम् उषित्वा.—(Rest, remain) स्था (c. 1. तिष्ठति, स्थातुं), वृत् (c. 1. वर्त्तते -र्त्तितुं), निली (c. 4. -लीयते -लेतुं), संली.—(Become fixed, adhere) अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं or pass. -बध्यते), लग् (c. 1. लगति -गितुं).

LODGE, *s.* उद्यानगृहं, उद्यानस्थगृहं, उपगृहं, उटजः, कुटीरः.

LODGED, *p. p.* वासितः -ता -तं, कृतावासः -सा -सं.—(Placed, fixed, deposited) स्थापितः -ता -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रणिहितः -ता -तं, अर्पितः -ता -तं, निवेशितः -ता -तं, निविष्टः -ष्टा -ष्टं, निष्ठितः -ता -तं, निरूढः -ढा -ढं.

LODGER, *s.* (One who lies or boards in another's house at a settled rate) निरूपितमूल्येन परगृहे निवासी *m.* (न्) or भोजनशयनादिकर्त्ता *m.* (र्तृ), निरूपितकालपर्य्यन्तं परगृहे वासी *m.* or वासकृत् *m.*

LODGING, *s.* वासः, निवासः, वासस्थानं, आवासः, आवासस्थानं, वसतिः *f.*, निवसतिः *f.*, निवेशनं, निकेतः -तनं, आयतनं, निलयः -यनं, आलयः, अवस्थानं, आवसथः, आश्रयः, संश्रयः, कृतावासः, वेश्म *n.* (न्); 'he asked a lodging,' आवासं प्रार्थितवान्.

LODGMENT, *s.* (The act) स्थापनं, संस्थापनं -ना, निवेशनं, वासः -सनं.—(The state) स्थितिः *f.*, अवस्थितिः *f.*, संस्थितिः *f.*—(Encampment) निवेशनं, समावासः.

LOFT, *s.* उपरिकोष्ठः, उपरिस्थकोष्ठः, उपरिस्थः प्रकोष्ठः, अट्टः -ट्टालः.

LOFTILY, *adv.* (Haughtily) सदर्पं, सगर्व्वं, साटोपं, सावहेलं, सावलेपं, दर्पेण, गर्व्वेण, उद्धतं, औद्धत्येन.—(On high) उच्चैस्, उच्चकैस्, ऊर्द्ध्वं.

LOFTINESS, *s.* (Height) उच्चत्वं -ता, उन्नतिः *f.*, समुन्नतिः *f.*, उत्कर्षः, उत्कृष्टता, तुङ्गता, उत्तुङ्गता, उच्छ्रयः, समुच्छ्रयः, उच्छ्रितिः *f.*, उत्सेधः, समुत्सेधः, उन्नम्रता, ऊर्द्ध्वत्वं-ता, प्रोच्चता, प्रांशुता, औत्कर्षं.—(Haughtiness) उद्धतिः *f.*, औद्धत्यं, चित्तसमुन्नतिः *f.*, चित्तोन्नतिः *f.*, साटोपत्वं, साटोपः, अभिमानं -नित्ता, अवहेला, अवलेपः, अवलिप्तता, सावलेपत्वं, दर्पः, दृप्तता, गर्व्वः, शौटीर्य्यं, शौण्डीर्य्यं, प्रौढता, प्रगल्भता.

LOFTY, *a.* (High) उच्चः -च्चा -च्चं, अत्युच्चः &c., प्रांशुः -शुः -शु, तुङ्गः -ङ्गा -ङ्गं, उत्तुङ्गः -ङ्गा -ङ्गं, उन्नतः -ता -तं, समुन्नतः -ता -तं, उच्छ्रितः -ता -तं, समुच्छ्रितः -ता -तं, अभ्युच्छ्रितः -ता -तं, उन्नसः -सा -सं, उदयः -या -यं, ऊर्द्ध्वः -र्द्ध्वा -र्द्ध्वं, उत्कृष्टः -ष्टा -ष्टं, सोच्छ्रायः -या -यं, उन्नतः -ता -तं, उत्तालः -ला -लं, करालः -ला -लं, विलङ्घिताकाशः -शा -शं.—(Haughty) उद्धतः -ता -तं, समुद्धतः -ता -तं, गर्व्वोद्धतः -ता -तं, दर्पोद्धतः -ता -तं, दृप्तः -प्ता -प्तं, उन्नतचेताः -ताः -तः (स्), उन्नद्धचेताः &c., उत्सिक्तः -क्ता -क्तं, गर्व्वी -र्व्विणी -र्व्वि (न्), गर्व्वितः -ता -तं, साटोपः -पा -पं, अवलिप्तः -प्ता

Digitized by Google

-मं, सावहेलः -ला -लं, ऊर्द्धदृष्टिः -ष्टिः -ष्टि, मदोद्धतः -ता -तं, मदोदग्रः -ग्रा -ग्रं, शौटीरः -रा -रं, शौण्डीरः -रा -रं, प्रौढः -ढा -ढं.

Log, *s.* (Shapeless or bulky piece of wood) स्थूलकाष्ठं, स्थूलदारु: *m.*, काष्ठखण्डः -ण्डं, बृहत्काष्ठं, दारुखण्डः, बृहद्दारुखण्डः, काष्ठं.—(Machine for measuring the velocity of a ship) नौकागतिमापकयन्त्रं, परिमापककाष्ठं.

Log-book, *s.* नौकागतिविषयकं दैनिकविवरणपुस्तकं.

Logarithm, *s.* घातप्रमापकः, घातप्रमापकसंख्या, लाग्रतमाख्यसंख्या, परिकर्म्म *n.* (न्).

Logarithmic, *a.* घातप्रमापकसम्बन्धी -न्धिनी -न्धि (न्).

Loggerhead, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, मूढः, मूर्खः, जडः, जडबुद्धिः *m.*, जडमतिः *m.*, वर्ब्बरः, वटुकः.

Loggerheaded, *a.* स्थूलबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, जडबुद्धिः.

Logic, *s.* तर्कः, तर्कविद्या, तर्कशास्त्रं, न्यायः, न्यायविद्या, न्यायशास्त्रं, विचारविद्या, व्यूहः, प्रोहः, अभ्यूहः, निरूहः, ऊहः, वैशेषिकं, आन्वीक्षिकी, अनुमानोक्तिः *f.*, ध्रुवः. The न्याय school was instituted by the sage Gautama, the branch of it called वैशेषिकं was founded by Kaṇáda. The following are some of the terms of logic; 'universal pervadence or extension,' व्याप्तिः *f.*, अभिव्याप्तिः; 'extreme extension or conclusion unwarranted by the premises,' अतिव्याप्तिः; 'individual or particular extension,' अव्याप्तिः *f.*, अव्याप्यवृत्तिः *f.*; sign of the existence of an inherent property,' व्याप्तिलक्षणं; 'subject of an inference,' व्याप्यं. Other terms are उपलप्रक्षेपः, उत्थाप्याकांक्षा, प्रवृत्तिनिमित्तं, कैमर्थ्यं, व्याप्यकोटिः *f.*, सिद्धसाधनदोषः.

Logical, *a.* (Pertaining to logic) तार्किकः -की -कं, न्यायी -यिनी -यि (न्), नैयायिकः -की -कं, तर्कसम्बन्धी -न्धिनी &c., तर्कविद्यासम्बन्धी &c., तर्कविद्याविषयः -या -यं, तर्कशास्त्रविषयः &c., प्रोहः -हा -हं, ऊही -हिनी &c., यौक्तिकः -की -कं; 'logical conclusion,' विनिगमः, निगमनं.—(According to the rules of logic) तर्कशास्त्रसिद्धः -द्धा -द्धं, न्यायशास्त्रसिद्धः &c., युक्तिसिद्धः &c., तर्कानुसारी -रिणी &c., न्यायानुसारी &c., न्यायशास्त्रानुसारी &c., तर्कशास्त्रसम्मतः -ता -तं, न्यायशास्त्रसम्मतः -ता -तं, तर्कशास्त्रानुयायी -यिनी &c.

Logically, *adv.* न्यायतस्, यथान्यायं, तर्कानुसारेण, न्यायानुसारेण, तर्कशास्त्रानुसारेण, तर्कशास्त्रानुरूपेण, न्यायशास्त्रवत्.

Logician, *s.* तर्की *m.* (न्), तार्किकः, नैयायिकः, न्यायविद् *m.*, तर्कशास्त्रज्ञः, न्यायशास्त्रज्ञः, न्यायशास्त्रपण्डितः, न्यायशास्त्रवेत्ता *m.* (त्र्), तर्कशास्त्री *m.*, (न्), न्यायशास्त्री *m.*, सांवादिकः, ऊही *m.*; 'versed in the system of Gautama,' आक्षपादः, अक्षपादः; 'in that of Kaṇáda,' वैशेषिकः.

Logomachy, *s.* वाग्युद्धं, वाक्कलहः -हं.—(Dispute about words) शब्दवादः, शब्दविवादः, शब्दयुद्धं.

Logwood, *s.* (A kind of wood used in dyeing) पतङ्गः.

Loin, *s.* श्रोणिः -णी *f.*, कटिः -टी *f.*, कटिदेशः, श्रोणिदेशः, श्रोणिफलकं, श्रोणितटं, कटीतटं, कटितटं, नितम्बः, जघनं, ककुभती, कलत्रं, प्रोथः, कटः, कटिशीर्षकं; 'girding the loins,' कटिबन्धनं; 'having the loins girded,' बद्धकटिः -टिः -टि; 'the cavities of the loins,' कुकुन्दरे *n.* du., ककुन्दरे *n.* du., कटीरे *n.* du., कटीरः, कटः; 'girdle worn round the loins,' कटिसूत्रं, कटिशृङ्खला, श्रोणिविसं; 'sprung from one's loins,' अङ्गजः -जा -जं, अङ्गजातः -ता -तं.

To loiter, *v. n.* विलस् (c. 1. -लसते -सितुं), मन्द् (nom. मन्दायते), विलम्बनं कृ, विलम्बं कृ, कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), कालक्षेपं कृ, अवस्था (c. 1. -तिष्ठति -स्थातुं), चिर (nom. चिरयति, चिरायति), चिरं or चिरकालं स्था or अवस्था, मन्दं मन्दं चल् (c. 1. चलति -लितुं) or चर् (c. 1. चरति -रितुं), विलम्बेन गम् (c. 1. गच्छति, गन्तुं).

Loiterer, *s.* विलम्बी *m.* (न्), विलम्बकारी *m.*, विलम्बगतिः *m.*, विलम्बगामी *m.* (न्), मन्दगामी *m.*, मन्दगतिः *m.*, कालक्षेपकः.

Loitering, *part.* मन्दायमानः -ना -नं, मन्दयमानः -ना -नं, विलम्बी -म्बिनी -म्बि (न्), विलम्बगामी -मिनी &c., चिरायमाणः -णा -णं.

Loitering, *s.* विलम्बनं, विलम्बगमनं, मन्दगमनं, कालक्षेपः.

To loll, *v. n.* (Recline lazily) आलस्येन शी (c. 2. शेते, शयितुं) or अवलम्ब् (c. 1. -लम्बते -म्बितुं) or संविश् (c. 6. -विशति -वेष्टुं), सुखेन शी or अवलम्ब्.—(Loll the tongue) जिह्वां लल् or लड् (c. 1. ललति, लडति, c. 10. लालयति, लडयति -यितुं), जिह्वाललनं कृ, जिह्वां बहिष्कृ; 'one who lolls the tongue,' ललजिह्वः -ह्वा -ह्वं.

Lolling, *s.* (Of the tongue) ललनं, जिह्वाललनं.—(Lolling and languishing as indicative of passion) लालित्यं, ललितं, लालनं.

Lone, lonely, *a.* (Solitary, unfrequented) निर्जनः -ना -नं, विजनः -ना -नं, विलोकः -की -कं, निर्मनुजः -जा -जं, निर्मनुष्यः -ष्या -ष्यं, एकान्तः -न्ता -न्तं, विविक्तः -क्ता -क्तं, निभृतः -ता -तं, जनानाकीर्णः -र्णा -र्णं, जनैरनाकीर्णः &c., निःशलाकः -का -कं, निश्शलाकः &c., न्यूनसञ्चारः -रा -रं, हीनसञ्चारः -रा -रं; 'a lonely place,' निर्जनस्थानं.—(Single, standing by itself) एकाकी -किनी -कि (न्), एकः -का -कं, असहायः -या -यं, असङ्गः -ङ्गा -ङ्गं, केवलः -ला -लं, केवली -लिनी &c.—(Fond of solitude) विविक्तप्रियः -या -यं, विविक्तसेवी -विनी &c., एकान्तप्रियः -या -यं, एकान्तसेवी &c.

Loneliness, *s.* (Solitude, retirement) निर्जनता, विजनता, विविक्तता, विविक्तं, निर्मनुष्यता, निभृतता, एकान्तत्वं, निःशलाकता, सञ्चारहीनता, सञ्चारन्यूनता, एकाकिता -त्वं, असहायता, असङ्गता.—(Love of retirement) विविक्तसेवा, विविक्तप्रीतिः *f.*, विविक्तरुचिः *f.*, एकान्तप्रीतिः *f.*

Lonesome, *a.* निर्जनः -ना -नं, विजनः -ना -नं, दारुणः -णा -णं, निरानन्दः -न्दा -न्दं; 'a lonesome road,' प्रान्तरं.

Lonesomeness, *s.* निर्जनता, विजनता, विविक्तिता, निरानन्दता, दारुणता.

Long, *a.* (In time or space) दीर्घः -र्घा -र्घं, द्राघिमवान् -वती -वत् (त्), आयतः -ता -तं, आयामी -मिनी -मि (न्), आयामवान् -वती &c., व्यायतः -ता -तं, आयतिमान् -मती &c., लम्बः -म्बा -म्बं, चिर in comp., this last is restricted to time. (Long in extent or size) दीर्घपरिमाणः -णा -णं, दीर्घाकारः -रा -रं, दीर्घाकृतिः -तिः -ति, दीर्घतनुः -नुः -नु.—(Extended) आयतः -ता -तं, समायतः -ता -तं, आयामितः -ता -तं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, प्रसृतः -ता -तं.—(Tedious, dilatory) दीर्घसूत्रः -त्रा -त्रं, चिरकारी -रिणी &c., चिरक्रियः -या -यं, विलम्बकारी &c., विलम्बी -म्बिनी &c., दीर्घसूत्री -त्रिणी &c., प्रलम्बः -म्बा -म्बं.—(Continuing for a long time) दीर्घकालीनः -ना -नं, चिरकालीनः -ना -नं, दीर्घकालिकः -की -कं, चिरकालिकः &c., चिरस्थः -स्था -स्थं, चिरस्थायी -यिनी &c., चिरस्थितः -ता -तं, चिरन्तनः -नी -नं, चिरालः -ली -लं, दीर्घकालस्थायी -यिनी &c., चिरकालस्थायी -यिनी &c.—(Long, in the sense of distant) दूरः -रा -रं, विदूरः -रा -रं; 'going a long way,' दूरगः -गा -गं; 'a long way off,' दूरस्थः -स्था -स्थं, दूरस्थायी -यिनी &c.—(Extended to any measure) expressed by परिमाणः -णा -णं or परिमितः -ता -तं or मितः -ता -तं in comp.; as, 'a line an inch long,' अङ्गुलपरिमाणा or अङ्गुलपरिमिता or

Digitized by Google

अङ्गुलमिता रेखा; 'four fingers long,' चतुरङ्गुलः -ली -लं, चतुरङ्गुलपरिमितः -ता -तं.—(A long period) दीर्घकालः, चिरकालः, बहुकालः, अनेककालः, आयतायतिः *f.*; 'for a long time,' दीर्घकालं, चिरकालं, बहुकालं -लात्, अनेककालं, चिरं -रेण -रात् -राय, चिरदिवसं, चिररात्रं -त्राय, दीर्घरात्रं; 'long absent,' चिरगतः -ता -तं, चिरप्रवासी -सिनी &c.; 'long ill,' दीर्घरोगी -गिणी &c., दीर्घामयः -या -यं, चिररोगी &c.; 'long sought for,' चिरचेष्टितः -ता -तं; 'cherished for a long time,' चिरकालपालितः -ता -तं, चिरपालितः &c.; 'accumulated after a long time,' चिरकालोपार्जितः -ता -तं, चिरलभः -भा -भं; 'living long,' दीर्घजीवी -विनी &c., चिरजीवी &c.; 'a long life,' दीर्घजीवः; 'long since abandoned,' चिरोज्झितः -ता -तं, 'for a short time,' अल्पकालं, अल्पमात्रं, कियत्कालं, 'lasting for a short time,' क्षणस्थायी -यिनी &c., 'the long run,' आयतिः *f.*, 'long-haired,' दीर्घकेशः -शी -शं; 'long-leaved,' दीर्घपत्रः -त्रा -त्रं, दीर्घपर्णः -र्णी -र्णं; 'long-tongued,' दीर्घजिह्वः -ह्वा -ह्वं, दीर्घरसनः -ना -नं, 'having a long line of ancestors,' दीर्घवंशः -शा -शं, 'a long journey,' दीर्घवर्त्म *n.* (न्), दीर्घाध्व *n.* (न्), 'a long vowel,' दीर्घस्वरः, 'the long sound of vowels,' प्लवः, प्लुतः -तं, 'long syllable,' दीर्घाक्षरं, हारः.

Long, *adv.* (To a great extent in space) दूरं, विदरं, दूरतस्, दूरपर्य्यन्तं, दीर्घपर्य्यन्तं, दीर्घपरिमाणं -णेन.—(To a great extent in time, for a long period) दीर्घकालं, चिरकालं -लात्, बहुकालं -लात्, अनेककालं, चिरं -रेण -राय -रात् -रस्य -रे, चिरदिवसं, चिररात्रं -त्राय, दीर्घरात्रं -त्राय, बहुकालपर्य्यन्तं, दीर्घकालपर्य्यन्तं; 'very long,' सुचिरं -रेण -रात्; 'how long?' कियत्कालं, कियन्तं कालं, कियता कालेन, कियत्कालपर्य्यन्तं, कियत्कालं यावत्, कतिकालं; 'how long!' कियच्चिरं -रेण -रात्; 'ere long,' अचिरेण -रात्; 'long ago,' प्रागेव, प्राक्काले, पूर्वं, पूर्वकाले, अतीतदीर्घकाले, गतदीर्घकाले, व्यवहितपूर्वकाले; 'not long ago,' अव्यवहितपूर्वकाले; 'as long,' यत्कालं, यावत्कालं, यत्क्षणं; 'so long,' तत्कालं, तावत्कालं, तत्क्षणं.—(Through the whole extent or duration of) पर्य्यन्तं affixed, आ prefixed, यावत्; as, 'the whole year long,' वर्षपर्य्यन्तं, आवर्षान्तात्; 'whole life, as long as one lives,' यावज्जीवं, आमरणात्, मरणं यावत्; 'long-absent, long-ill, long-sought, &c.' *See* under Long, *a.*

To Long, *v. n.* (Desire eagerly) अत्यन्तम् अभिलष् (c. 1. -लषति, c. 4. -ल्यति -लषितुं) or वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं) or अभिवाञ्छ् or कांक्ष् (c. 1. कांक्षति -क्षितुं) or आकांक्ष् or अभिकांक्ष् or अनुकांक्ष्, अतिशयेन स्पृह् (c. 10. स्पृहयति -यितुं) or इष् (c. 6. इच्छति, एषितुं) or आप् in des. (ईप्सति -प्सितुं) or अभ्याप् or पर्याप् or लभ् in des. (लिप्सते -प्सितुं) or अभिलभ् or अभिरुच् (c. 10. -रोचयति -यितुं) or काम् (c. 10. कामयते -यितुं) or ईह् (c. 1. ईहते -हितुं) or समीह्, लुभ् (c. 4. लुभ्यति, लोभितुं), गृध् (c. 4. गृध्यति, गर्धितुं), भुज् in des. (बुभुक्षति -ते -क्षितुं), तृष् (c. 4. तृष्यति, तर्षितुं), आशंस् (c. 1. -शंसते -सितुं), आशास् (c. 2. -शास्ते, c. 1. -शासते -सितुं), अभिध्यानं कृ.—(As a pregnant woman) दोहदं कृ, दोहदवती भू, दौहृदिनी भू.

Longanimity, *s.* सहनशीलता, चिरसहिष्णुता, क्षमा, क्षान्तिः *f.*

Long-armed, *a.* दीर्घबाहुः -हुः -हु, दीर्घभुजः -जा -जं, लम्बहस्तः -स्ता -स्तं.

Long-bellied, *a.* लम्बोदरः -रा -रं, लम्बजठरः -रा -रं, दीर्घोदरः -रा -रं.

Long-boat, *s.* दीर्घनौका, वृहन्नौका, महानौका, उपनौका.

Long-concealed, *a.* चिरगुप्तः -प्ता -प्तं, चिरकालप्रच्छन्नः -न्ना -न्नं.

Long-continued, *a.* चिरस्थितः -ता -तं, चिरकालस्थायी -यिनी -यि (न्).

Long-eared, *a.* लम्बकर्णः -र्णी -र्णं, दीर्घकर्णः -र्णी -र्णं, आयतकर्णः -र्णी -र्णं.

Long-eyed, *a.* आयताक्षः -क्षी -क्षं, आयतनेत्रः -त्री -त्रं, दीर्घनयनः -नी -नं.

Long-faced, *a.* दीर्घमुखः -खी -खं, दीर्घवक्त्रः -क्त्रा -क्त्रं, दीर्घाननः -ना -नं,

Long-forgotten, *a.* चिरविस्मृतः -ता -तं, चिरकालविस्मृतः -ता -तं.

Long-headed, *a.* विदग्धमतिः -तिः -ति, उत्पन्नमतिः &c., निपुणमतिः &c., सूक्ष्मबुद्धिः -द्धिः -द्धि, दीर्घसन्धानी -निनी -नि (न्).

Long-lasting, *a.* चिरस्थायी -यिनी -यि (न्), चिरकालस्थायी &c., चिरस्थः -स्था -स्थं, चिरकालीनः -ना -नं, चिरकालिकः -की -कं, दीर्घकालिकः -की -कं.

Long-legged, *a.* दीर्घजङ्घः -ङ्घा -ङ्घं, दीर्घपादः -दा -दं, आयतजङ्घः &c., ऊर्ध्वजानुः -नुः -नु, ऊर्ध्वज्ञुः -ज्ञा -ज्ञं, ऊर्ध्वज्ञुः -ज्ञुः -ज्ञु, दीर्घसक्थः -क्था -क्थं.

Long-lived, *a.* दीर्घजीवी -विनी -वि (न्), चिरजीवी &c., चिरञ्जीवी &c., चिरजीवकः -का -कं, दीर्घायुः -युः -यु or दीर्घायूः -यूः -युः (स्), चिरायुः &c., दीर्घायुष्यः -ष्या -ष्यं, चिरायुष्यः &c., आयुषः -षी -षं, जीवथः -था -थं, जैवातृकः -का -कं, आयुष्मान् -ष्मती -ष्मत् (त्); this last is generally used in addressing a king or superior in the voc. c.; as, 'O long-lived one,' आयुष्मन्.

Long-lost, *a.* चिरगतः -ता -तं, चिरभ्रष्टः -ष्टा -ष्टं, चिरकालगतः -ता -तं.

Long-necked, *a.* दीर्घग्रीवः -वा -वं, आयतग्रीवः &c., दीर्घकण्ठः -ण्ठा -ण्ठं.

Long-pepper, *s.* पिप्पली -लिः *f.*, शौण्डी, कोला, उषणा, कृष्णा, उपकुल्या, मागधी, वैदेही, चपला, कणा, वशिरः, वसिरः, श्रेयसी, करिपिप्पली, कपिवल्ली, कोलवल्ली, चव्यं -व्या, चवी, चविका -कं.—(Its root) पिप्पलीमूलं, ग्रन्थिकं, चटिकाशिरस् *n.*

Long-sighted, *a.* दीर्घदर्शी -र्शिनी -र्शि (न्), दीर्घदृष्टिः -ष्टिः -ष्टि, दूरदर्शी &c., दूरदृष्टिः -ष्टिः -ष्टि.

Long-sightedness, *s.* दीर्घदृष्टिः *f.*, दीर्घदर्शनं, दूरदृष्टिः *f.*, दूरदर्शनं.

Long-sufferance, long-suffering, *s.* सहनशीलता, सहिष्णुता, चिरसहिष्णुता -त्वं, चिरसहनं, बहुक्षमता, क्षमा, क्षान्तिः *f.*, सहनं, तितिक्षा, अपकारे -पि चित्तस्याविकारः.

Long-suffering, *a.* सहनशीलः -ला -लं, सहिष्णुः -ष्णुः -ष्णु, चिरसहिष्णुः -ष्णुः -ष्णु, बहुक्षमः -मा -मं, बहुसहः -हा -हं, सर्वंसहः -हा -हं, क्षमावान् -वती -वत् (त्), क्षान्तः -न्ता -न्तं, क्षमी -मिणी -मि (न्), तितिक्षुः -क्षुः -क्षु.

Long-winded, *a.* दीर्घसूत्रः -त्रा -त्रं -त्री -त्रिणी -त्रि (न्), कष्टजनकः -का -कं.

Longer, *a.* दीर्घतरः -रा -रं, द्राघीयान् -यसी -यः (स्); 'for a longer period,' दीर्घतरकालं, बहुतरकालं; 'why do you delay any longer?' किम् अतःपरं विलम्बसे.

Longest, *a.* दीर्घतमः -मा -मं, द्राघिष्ठः -ष्ठा -ष्ठं; 'for the longest period,' दीर्घतमकालं, सुदीर्घकालं.

Longeval, longevous, *s.* दीर्घजीवी -विनी -वि (न्), चिरजीवी &c. *See* Long-lived.

Longevity, *s.* दीर्घजीवः, चिरजीवित्वं, दीर्घजीवित्वं, चिरञ्जीवित्वं, दीर्घायुष्यं, चिरायुष्यं, चिरायुस् *n.*, दीर्घायुस् *n.*, आयुस् *n.*; 'conducive to longevity,' आयुष्यः -ष्या -ष्यं.

Longimanous, *a.* दीर्घहस्तः -स्ता -स्तं, दीर्घपाणिः -णिः -णि, लम्बहस्तः &c.

Longimetry, *s.* दूरत्वमितिः *f.*, दूरत्वमापनं, दैर्घ्यमानं, दैर्घ्यमापनं.

Longing, *s.* अत्यभिलाषः, अतिस्पृहा, अत्यन्तवाञ्छा, अतीच्छा, अतिशयेच्छा, अतिकांक्षा, अत्याकांक्षा, लालसा, उत्कण्ठा, कौतूहलं, औत्सुक्यं, कामः, तृष्णा, अतिलिप्सा, इच्छा, आशा, कांक्षा, अभिकांक्षा, नितान्तस्पृहा; 'longing of a pregnant woman,' दोहदं.

Digitized by Google

Longing, *part.* or *a.* (Eagerly desirous) अत्यभिलाषी -षिणी -षि (न्), अत्याकांक्षी -क्षिणी &c., आकांक्षन् -क्षन्ती -क्षत् (न्), अतीच्छः -च्छा -च्छं, अतिलिप्सुः -प्सुः -प्सु, कुतूहली -लिनी &c., उत्सुकः -का -कं, उत्कः -त्का -त्कं, उत्कण्ठितः -ता -तं, कक्षः -क्षा -क्षं, लालसी -सिनी &c., स्पृहयालुः -लुः -लु; 'a longing woman,' दोहदवती, दौहदिनी, दोहदान्विता.

Longitude, *s.* द्राघिमा *m.* (न्), ध्रुवकः.—(Position to east or west) रेखान्तरं, रेखांशः; 'of a country,' देशान्तरं.—(Of the earth) रेखांशाः, रेखापरिधिः *m.*, रेखागणः, रेखासमूहः.—(Of any point or object in the heavens) भोगः; 'of the sun,' रविभोगः; 'of a planet reckoned from the vernal equinoctial point,' सायनं.—(Meridian or circle of longitude) याम्योत्तरवृत्तं, रेखावृत्तं, रेखांशवृत्तं.

Longitudinal, *a.* अन्वायतनः -ना -नं, अनुदैर्घ्यः -र्घ्या -र्घ्यं, अनुद्राघिमा -मा -म (न्), आयतः -ता -तं, आयतनानुसारी -रिणी -रि (न्), अन्वायतिः -तिः -ति.

Loobily, *adv.* स्थूलजनवत्, असभ्यजनवत्, ग्राम्यजनवत्, वृषलवत्.

Looby, *s.* स्थूलजनः, ग्राम्यजनः, असभ्यजनः, स्थूलबुद्धिः *m.*, वृषलः.

To look, *v. a.* (Direct the eye, look at) दृश् (c. 1. पश्यति, द्रष्टुं) अनुदृश्, प्रतिदृश्, अभिदृश्, परिदृश्, सन्दृश्, ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, वीक्ष्, अभिवीक्ष्, प्रेक्ष्, अभिप्रेक्ष्, सम्प्रेक्ष्, अवेक्ष्, अन्वीक्ष्, निरीक्ष्, उदीक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), समालोक्, अवलोक्, विलोक्, आलोच् (c. 10. -लोचयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), निर्वर्ण् (c. 10. -वर्णयति -यितुं), लक्ष् (c. 10. लक्षयति -ते -यितुं), आलक्ष्, समालक्ष्, उपलक्ष्, संलक्ष्, दृष्टिं कृ, विलोकनं कृ, अवलोकनं कृ.—(Look about) समन्तात् or समन्ततस् or इतस्ततो दृश्.—(Look after, search for) अन्विष् (c. 4. -इष्यति -एषितुं), निरूप्, अवेक्ष्, परीक्ष्.—(Look after, take care of) पाल् (c. 10. पालयति -यितुं), रक्ष् (c. 1. रक्षति -क्षितुं), गुप् (c. 1. गोपायति, गोपितुं), अवेक्ष्.—(Look at, consider) अवेक्ष्, समीक्ष्, आलोक्, आलोच्, आलक्ष्, निरूप्, मन् (c. 4. मन्यते, मन्तुं), अवेक्षां कृ.—(Look down) अवलोक्, अधो दृश्.—(Look down on, despise) अवमन्, उपेक्ष्, उपप्रेक्ष्.—(Look for, expect) प्रतीक्ष्, अपेक्ष्, व्यपेक्ष्, सम्प्रतीक्ष्, उदीक्ष्, निरीक्ष्, प्रतिपाल्, उद्दृश्.—(Look into) निरीक्ष्, परीक्ष्, निरूप्; 'look into affairs,' कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, कार्य्यावेक्षणं कृ.—(Look on, regard) अवेक्ष्, अपेक्ष्, प्रतीक्ष्, आलोक्, निरूप्, मन्, दृश्.—(Look on, be a spectator) प्रेक्ष्, दृश्, मिष् (c. 6. मिषति, मेषितुं), प्रेक्षकः -का -कं भू.—(Look over) परीक्ष्, अनुसन्धा (c. 3. -दधाति -धातुं), निरूप्.—(Look out, be on the watch) अवधा, सावधानः -ना -नं भू, सावहितः -ता -तं भू, अवधानं कृ.—(Look up) उदीक्ष्, उद्वीक्ष्, उद्दृश्, ऊर्द्धं दृश्, उन्मुखीभू; 'to look up to heaven,' नभोदृष्टिः -ष्टिः -ष्टि भू.—(Look up to, esteem) सम्मन्, प्रतिमन्, मन्.—(Seem, appear) प्रतिभा (c. 2. -भाति -तुं), सम्प्रभा, आभा, निर्भा, दृश् in pass. (दृश्यते), लक्ष् in pass. (लक्ष्यते); 'to look well,' शुभ् (c. 1. शोभते -भितुं); 'he looks astonished,' विस्मित इव प्रतिभाति; 'look, look ye!' पश्य, पश्यत.

Look, *s.* दृष्टिः *f.*, दर्शनं, ईक्षणं, प्रेक्षणं -णा, प्रेक्षितं, वीक्षणं, वीक्षितं, आलोकनं, अवलोकनं, विलोकनं, दृष्टिपातः, दृष्टिनिपातः; 'a look of displeasure,' अदृष्टिः *f.*; 'side-look,' कटाक्षः, अर्द्धवीक्षणं, अर्द्धदृष्टिः *f.*, अपाङ्गदृष्टिः *f.*, अपाङ्गदर्शनं.—(Air, appearance) रूपं, आकारः, आकृतिः *f.*, दर्शनं, रीतिः *f.*, चर्य्या, प्रतिभा, आभा, छाया.

—(Cast of countenance) वदनाकारः, मुखच्छाया, मुखं, वदनं.

Looked, *p. p.* दृष्टः -ष्टा -ष्टं, आलोकितः -ता -तं, ईक्षितः -ता -तं, दत्तदृष्टिः -ष्टिः -ष्टि; 'to be looked for,' अपेक्षणीयः -या -यं; 'having looked,' दृष्ट्वा, अवलोक्य, वीक्ष्य, निर्वर्ण्य, निरूप्य.

Looker, *s.* द्रष्टा *m.* (ष्टृ), दर्शी *m.* (न्), वीक्षकः, आलोचकः, विलोकनकृत्, अवलोकनकृत्.—(Looker on) प्रेक्षकः, प्रेक्षणिकः, प्रेक्षमाणः.

Looking, *part.* पश्यन् -श्यन्ती -श्यत् (न्), ईक्षमाणः -णा -णं, प्रेक्षमाणः -णा -णं, दर्शी -र्शिनी -र्शि (न्), दृष्टि in comp.; as, 'looking in all directions,' इतस्ततो दत्तदृष्टिः -ष्टिः -ष्टि; 'looking up,' ऊर्द्धदृष्टिः -ष्टिः -ष्टि, उन्मुखः -खा -खं; 'looking up to heaven,' नभोदृष्टिः -ष्टिः -ष्टि.—(Looking well, good-looking) सुदर्शनः -ना -नं, शुभदर्शनः -ना -नं, सुदृश्यः -श्या -श्यं, दर्शनीयः -या -यं, दृश्यः -श्या -श्यं, शुभाननः -ना -नी -नं, सुरूपः -पी -पं.

Looking, *s.* (Act of directing the eye) दर्शनं, दृष्टिः *f.*, दृष्टिपातः, ईक्षणं, वीक्षणं, प्रेक्षणं -णा, प्रेक्षा, आलोकः -कनं, आलोचनं, विलोकनं, अवलोकनं, सन्दर्शनं, निरूपणं, निर्वर्णनं, निध्यानं.—(Search) अन्वेषणं, संवीक्षणं, अनुसन्धानं.—(Looking for) अपेक्षा, प्रतीक्षा, व्यपेक्षा.

Looking-glass, *s.* दर्पणः -णं, आदर्शः, दर्शनं, आत्मदर्शः, प्रतिविम्बातः, सम्मुखी *m.* (न्), मुकुरः, मकुरः, मङ्कुरः, कर्मरः, मण्डलकं; 'surface of a looking-glass,' आदर्शतलं.

Looking-glass maker, *s.* दर्पणकारः, दर्पणकृत्, दर्पणविक्रयी *m.* (न्).

Look-out, *s.* सुसमीक्षा, इतस्ततः समीक्षा, अवेक्षा, अवधानं, सावधानता.

Loom, *s.* वेमा *m.* -म *n.* (न्), वेमः, वायदण्डः, वापदण्डः, वाणदण्डः, सूत्रयन्त्रं, आवापनं, तन्त्रं, तन्त्रयन्त्रं, कृविः *m.*

To loom, *v. n.* समुद्रमध्ये सुदूरस्थितत्वाद् अस्पष्टाकारः -रा -रं or अतिस्थूलाकारः -रा -रं भू or विद् in pass. (विद्यते) or अस्पष्टरूपेण दृश् in pass. (दृश्यते).

Loon, *s.* कापुरुषः, दुर्जनः, धूर्त्तः, लटकः, कितवः, तुच्छजनः.

Loop, *s.* (A folding, noose) पाशः, शिक्यं -क्या, काचः, पुटः, व्यावर्त्तनं.—(Opening, aperture) छिद्रं, रन्ध्रं; 'suspended in a loop,' काचितः -ता -तं, शिक्यितः -ता -तं.

Loop-hole, *s.* (Small opening in a wall, &c.) गवाक्षः -क्षं, जालं, वातायनं, रन्ध्रं, छिद्रं, प्रच्छन्नं.—(Means of escape) निर्गमः, निर्गतिः *f.*, निर्गमोपायः, निर्गमद्वारं, पलायनं, अपक्रमः, उत्तरणं, मुक्तिः *f.*, मोक्षः.

To loose, loosen, *v. a.* (Relax) शिथिलीकृ, शिथिल (nom. शिथिलयति -ते -यितुं), श्लथ् (c. 10. श्लथयति -यितुं), अथ् (c. 1. अथति, c. 10. अथयति, आथयति -यितुं), अन्थ् (c. 9. अन्थ्नाति, अन्थितुं), श्लथीकृ, प्रश्लथीकृ, संस् (c. 10. संसयति -यितुं), विसंस्, विगल् (c. 10. -गलयति -यितुं), विसस्तीकृ.—(Set free) मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), अवमुच्, प्रमुच्, विमुच्, प्रविमुच्, निर्मुच्, उन्मुच्; मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्.—(Untie, unbind, unfasten) उद्ग्रन्थ् (c. 9. -ग्रन्थ्नाति, c. 1. -ग्रन्थति -न्थितुं), समुद्ग्रन्थ्, उन्मुच्, अवमुच्, वियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), विसन्धा (c. 3. -दधाति -धातुं), विसन्धीकृ, विपाश् (nom. -पाशयति -यितुं), उत्सूत्रीकृ.

To loose, loosen, *v. n.* (Become loose) शिथिलीभू, शिथिल (nom. शिथिलायते), श्लथ (nom. श्लथायते -ति), अथ (nom. अथायते), अन्थ् (c. 1. अन्थते -न्थितुं), श्लथीभू, संस् (c. 1. संसते -सितुं), स्रस्तीभू.—(Loose a ship) नौकां मुच् (c. 6. मुञ्चति, मोक्तुं) or चल् (c. 10. चालयति -यितुं).

Loose, *a.* (Not tight, lax) शिथिलः -ला -लं, श्लथः -था -थं, प्रश्लथः -था -थं, स्रस्तः -स्ता -स्तं, विस्रस्तः -स्ता -स्तं, विगलितः -ता -तं, चलितः

Digitized by Google

-ता -तं, अदृढः -ढा -ढं.—(Untied, unfastened) अबद्धः -द्धा -द्धं, मुक्तः -क्ता -क्तं, प्रमुक्तः &c., उद्ग्रन्थितः -ता -तं, उद्ग्रथितः -ता -तं, असन्धितः -ता -तं, विगलितः -ता -तं, बन्धनरहितः -ता -तं, बन्धनशून्यः -न्या -न्यं, अनिगृहीतः -ता -तं, उच्छ्वसितः -ता -तं, उद्दामः -मा -मं, उत्सूत्रः -त्रा -त्रं, उन्नद्धः -द्धा -द्धं.—(Free) मुक्तः -क्ता -क्तं, विमुक्तः -क्ता -क्तं.—(Not close or compact) विरलः -ला -लं, असंहतः -ता -तं, अदृढसन्धिः -न्धिः -न्धि, शिथिलसन्धिः &c.—(Not concise, rambling) असंक्षिप्तः -प्ता -प्तं, विस्तीर्णः -र्णा -र्णं.—(Indeterminate) अनियतः -ता -तं, अव्यवस्थितः -ता -तं, अनिर्णीतः -ता -तं, अपरिमितः -ता -तं, सन्दिग्धः -ग्धा -ग्धं.—(Unconnected) असम्बद्धः -द्धा -द्धं, निःसम्बन्धः -न्धा -न्धं, अबद्धः &c.—(Not rigid) अनियतः -ता -तं, अस्थिरः -रा -रं, अधीरः -रा -रं, अव्यवस्थितः -ता -तं.—(Dissolute) अनवस्थः -स्था -स्थं, व्यभिचारी -रिणी -रि (न्), दुराचारः -रा -रं, दुर्वृत्तः -त्ता -त्तं, अवशः -शा -शं, व्यसनी -निनी &c.; 'loose conduct,' व्यभिचारः; 'a loose man,' लम्पटः; 'a loose woman,' पुंश्चली, बन्धकी, भ्रष्टा, व्यभिचारिणी. *See* LAX. (To let loose) मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. सर्ज्जयति -यितुं), बन्धनाद् मुच्. *See To* LOOSE. (To break loose) बन्धनानि भिद् (c. 7. भिनत्ति, भेत्तुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), पलाय् (c. 1. पलायते -यितुं, rt. इ), मुक्तबन्धनः -ना -नं भू, बन्धनाद् भ्रंश् (c. 4. भ्रश्यति, भंशितुं), परिभ्रंश्, विभ्रंश्; 'broken loose,' प्रभ्रष्टः -ष्टा -ष्टं, बन्धनात्प्रभ्रष्टः &c., परिभ्रष्टः &c.

LOOSED, LOOSENED, *p. p.* शिथिलीकृतः -ता -तं, शिथिलितः -ता -तं, श्रन्थितः -ता -तं, स्रस्तः -स्ता -स्तं, विस्रस्तः &c., विगलितः -ता -तं, मुक्तः -क्ता -क्तं, विमुक्तः -क्ता -क्तं, मोचितः -ता -तं, विमोचितः -ता -तं, मोक्षितः -ता -तं, वीतः -ता -तं, मुक्तबन्धनः -ना -नं, बन्धनमुक्तः -क्ता -क्तं, छिन्नबन्धनः -ना -नं.

LOOSELY, *adv.* (Not firmly) शिथिलं, शैथिल्येन, सशैथिल्यं, अदृढं.—(Not closely) असंहतं, विरलं.—(Unconnectedly) असम्बद्धं, असम्बन्धेन.—(Not rigidly) अनियतं.—(Dissolutely) सव्यभिचारं, लम्पटवत्, दुर्वृत्तवत्.

LOOSENESS, *s.* (State of being loose or not tight) शिथिलता -त्वं, शैथिल्यं, श्लथता, प्रश्रथः, श्रन्थः, स्रंसः, विस्रंसः, स्रस्तता, विस्रस्तता, अदृढता, अधृतिः.—(Looseness of texture) विरलता, वैरल्यं, असंहतत्वं.—(Of morals or conduct) व्यभिचारः, अनवस्थितिः *f.*, अनवस्थता, व्यसनिता, लम्पटता, लाम्पट्यं, दुर्वृत्तता. *See* LAXITY, (Of bowels) मृदुकोष्ठत्वं, कोष्ठमृदुता, रेकः, रेचना -नं.

LOOSENING, LOOSING, *s.* शिथिलीकरणं, मोचनं, विमोचनं, मोक्षणं, विमोक्षणं, श्रन्थनं, श्रथनं, मुक्तिः *f.*

To LOP, *v. a.* छिद् (c. 7. छिनत्ति, छेत्तुं), अवछिद्, अवकृत् (c. 6. -कृन्तति -कर्त्तितुं), निकृत्, लू (c. 9. लुनाति, लवितुं), लुप् (c. 6. लुम्पति, लोप्तुं).

LOPPED, *p.p.* अवछिन्नः -न्ना -न्नं, लूनः -ना -नं, लुप्तः -प्ता -प्तं, कर्त्तितः -ता -तं.

LOPPER, *s.* छेत्ता *m.* (त्तृ), अवछेत्ता *m.*, छेदकः, छिद् in comp., लोपनकृत्.

LOPSIDED, *a.* एकपार्श्वे पतनशीलः -ला -लं or पतयालुः -लुः -लु.

LOQUACIOUS, *a.* वावदूकः -का -कं, वाचालः -ला -लं, बहुभाषी -षिणी -षि (न्), बहुवादी -दिनी &c., वाग्मी -ग्मिनी &c., जल्पकः -का -कं, जल्पाकः -का -कं, गदयित्नुः -त्नुः -त्नु, वाचोयुक्तिपटुः -टुः -टु, मुखरः -रं, वक्ता -क्त्री -क्तृ (क्तृ), अतिवक्ता &c.

LOQUACIOUSNESS, LOQUACITY, *s.* वावदूकता, वाचालता, बहुभाषित्वं, वाचणं, अतिशयोक्तिः *f.*, अतिवादः, जल्पः -ल्पकता, जल्पितं,

गदयित्नुता, वाग्मित्वं, अत्यालापः, बहुवादित्वं, मुखरता, मौखर्य्यं.

LORD, *s.* ईश्वरः, ईशः, पतिः *m.*, स्वामी *m.* (न्), प्रभुः *m.*, नाथः, राजा *m.* (न्), अधीशः, अधिपतिः *m.*, अधिपः, अधीश्वरः, भर्त्ता *m.* (र्त्तृ), भगवान् *m.* (त्), इन्द्र in comp.; 'supreme lord,' अधिराजः, सर्व्वेश्वरः, सर्व्वस्वामी *m.*, अधिनाथः; 'lord of men,' नरेश्वरः, नराधिपः, नरेशः, नृपतिः *m.*, नरपतिः, नरेन्द्रः; 'lord of earth,' भूपतिः *m.*, भूमिपतिः *m.*, महीपतिः *m.*, पृथिवीपतिः, क्षितिपतिः; 'lord of heaven,' स्वर्गपतिः *m.*, स्वर्गराजः, स्वर्गभर्त्ता *m.* (र्त्तृ), नाकनाथः; 'lord of beasts,' मृगेन्द्रः; 'my lord,' स्वामिन् voc. c.—(Husband) पतिः *m.*, भर्त्ता *m.*, स्वामी *m.*; 'lord of life,' जीवितेशः, प्राणेशः, प्राणनाथः, प्राणाधिनाथः.—(The Supreme Being) परमेश्वरः, परेश्वरः, ईश्वरः, भगवान्, प्रभुः *m.*; 'to be lord of,' ईश् (c. 2. ईष्टे, ईशितुं), प्रभू (c. 1. -भवति -वितुं).

To LORD, *v. n.* दर्पेण or धर्षेण or धर्षपूर्व्वम् आधिपत्यं कृ or ईश् (c. 2. ईष्टे, ईशितुं) or शास् (c. 2. शास्ति -सितुं).

LORDLINESS, *s.* (Imperiousness) धृष्टता, धर्षः, दर्पः, ऐश्वर्य्यदर्पः, अवलिप्तता, उत्सिक्तता, अवहेला, गर्व्वः, प्रगल्भा, प्रागल्भ्यं.

LORDLY, LORDLIKE, *a.* ईश्वरीयः -या -यं, ऐश्वरः -री -रं, ऐशः -शी -शं, ऐशिकः -की -कं, ईश्वरयोग्यः -ग्या -ग्यं, स्वामियोग्यः &c., प्रभुयोग्यः &c., राजकीयः -या -यं, ईश्वरार्हः -र्हा -र्हं, ईश्वरसदृशः -शी -शं, ईश्वरोचितः -ता -तं, ईश्वर in comp.; as, 'lordly nature,' ईश्वरभावः.—(Imperious) धृष्टः -ष्टा -ष्टं, धर्षी -र्षिणी -र्षि (न्), दृप्तः -प्ता -प्तं, गर्व्वितः -ता -तं, उद्धतः -ता -तं, अवलिप्तः -प्ता -प्तं, ऐश्वर्य्यदृप्तः &c.

LORDLY, *adv.* धर्षेण, ऐश्वर्य्यदर्पेण, ऐश्वर्य्यदृप्तवत्, सावहेलं, सधर्षं.

LORDSHIP, *s.* ऐश्वर्य्यं, ईशत्वं, आधिपत्यं, अधिपतित्वं, प्रभुत्वं, स्वामित्वं, पतित्वं, स्वाम्यं, राजत्वं, राज्यं, अधिकारः, अधिकारित्वं.—(Title) भवान् *m.* (त्), अत्रभवान्, तत्रभवान्, भगवान्, स्वामी *m.* (न्), प्रभुः.

LORD'S SUPPER, *s.* ख्रीष्टमृत्युस्मरणार्थकं भोजनं, ख्रीष्टमरणोद्देशकं भोजनं.

LORE, *s.* पाण्डित्यं, विद्या, ज्ञानं, व्युत्पत्तिः *f.*, वैदुष्यं, विद्वत्ता.

LORN, *a.* निःशरणः -णा -णं, अशरणः -णा -णं. *See* FORLORN, *a.*

LORY, *s.* शुकः, कीरः, रक्तपर्णः शुकजातीयः पक्षिभेदः.

To LOSE, *v. a.* (Be separated or parted from a thing) हा in pass. (हीयते), प्रहा, विप्रहा, परिहा, विहा with instr. or sometimes with abl. c., भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), परिभ्रंश्, विभ्रंश्, प्रभ्रंश् with abl. c., च्यु (c. 1. च्यवते, च्योतुं), प्रच्यु, विच्यु with abl. c., वियुज् in pass. (-युज्यते) with instr. c., अपवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl. of the person; 'he loses his life,' प्राणैः or प्राणेभ्यो हीयते; 'he loses his kingdom,' राज्याद् भ्रश्यति or च्यवते, तस्माद् राज्यम् अपवर्त्तते; 'he loses his friends,' सुहृज्जनैर् वियुज्यते.—(Let go, drop) हा (c. 3. जहाति, हातुं, or caus. हापयति -यितुं), विहा, अपहा, त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, हृ (c. 10. हारयति -यितुं), अपहृ; 'he lost his life,' प्राणान् जहौ; 'he loses his son,' पुत्रं जहाति; 'he loses his money,' धनं हारयति.—(Ruin, destroy, waste) नश् (c. 10. नाशयति -यितुं), विनश्, प्रणश्, क्षि (c. 5. क्षिणोति, क्षेतुं, c. 10. क्षययति, क्षपयति -यितुं), ध्वंस् (c. 10. ध्वंसयति -यितुं), विध्वंस्, प्रध्वंस्, व्ययीकृ, अपचि (c. 5. -चिनोति -चेतुं), क्षिप् (c. 6. क्षिपति, क्षेप्तुं); 'he loses his wealth,' अर्थं नाशयति; 'he loses his time,' कालं क्षिपति, कालक्षेपं or कालहरणं करोति.—(Forfeit) दण्ड् in pass. (दण्ड्यते), भ्रंश् or च्यु with abl. c., वञ्च् in pass. (वञ्च्यते) with instr. c.; 'he loses his office,' स्वाधिकाराद् भ्रश्यति; 'he loses his reward,' फलाद् भ्रश्यति or

Digitized by Google

फलेन वञ्च्यते.—(Not to win, be defeated) पराजितः -ता -तं भू, जि in pass. (जीयते), पराजि; 'he loses the battle,' रणे जीयते. —(Lose the game) अक्षवत्यां जि or पराजि in pass., द्यूतक्रीडायां जि in pass., विदिव् (c. 4. -दीव्यति -देवितुं), पराजितः -ता -तं भू.—(Lose the way) पथात् or मार्गात् or पथो भ्रंश् or प्रभ्रंश् or च्यु or विच्यु or विचल् (c. 1. -चलति -लितुं), पथभ्रष्टः -ष्टा -ष्टं भू, वर्त्मवर्जितः -ता -तं भू.—(Lose one's wits) मुह् (c. 4. मुह्यति, मोहितुं), बुद्धिं हा, बुद्धिहीनः -ना -नं भू.—(Lose one's consciousness, lose one's self) चेतनां or चैतन्यं हा, नष्टचेतनः -ना -नं भू, मुह्ये (c. 1. मूर्च्छति -र्छितुं), भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), भ्रान्तबुद्धिः -द्धिः -द्धि भू.

To LOSE, *v. n.* (Be defeated) जि in pass. (जीयते), पराजि, पराजितः -ता -तं भू.—(Decline, fail) क्षि in pass. (क्षीयते), परिक्षि, परिहा in pass. (-हीयते), ध्वंस् (c. 1. ध्वंसते -सितुं).

LOSER, *s.* क्षतिप्रापकः, हानिप्रापकः, अपायप्रापकः, अनुभूतक्षयः, प्राप्तापायः, प्राप्तक्षयः, लब्धापायः, लब्धहानिः *m.*, अपायप्राप्तः, पराजितः.

LOSS, *s.* क्षयः, हानिः *f.*, अपायः, क्षतिः *f.*, अपचयः, नाशः, अपचितिः *f.*, उपक्षयः, परिक्षयः, संक्षयः, क्षिया, व्ययः, ध्वंसः, प्रध्वंसः, परिध्वंसः, भंशः, अपहारः, हारः, हरणं, अत्ययः, च्युतिः *f.*, त्यागः, परित्यागः, विनाशः, प्रणाशः, भेदः, अलाभः, वियोगः, व्यसनं, दूषणं, प्रहीणः.—(Ruin, destruction) नाशः, विनाशः, क्षयः.—(Defeat) पराजयः, पराभवः, अपजयः, बलव्यसनं, भङ्गः.—(Profit and loss) लाभालाभौ *m.* du., लाभालाभं.—(Loss of caste) जातिभंशः.—(Loss of time) कालक्षेपः, कालहरणं, कालव्ययः; 'without loss of time,' अकालक्षेपं.—(To be at a loss) मुह् (c. 4. मुह्यति, मोहितुं); 'at a loss,' भ्रान्तबुद्धिः -द्धिः -द्धि, मोहितः -ता -तं, विमूढः -ढा -ढं; 'at a loss how to act,' इतिकर्त्तव्यतामूढः -ढा -ढं.

LOST, *p. p.* or *a.* नष्टः -ष्टा -ष्टं, प्रणष्टः -ष्टा -ष्टं, विनष्टः -ष्टा -ष्टं, हारितः -ता -तं, भ्रष्टः -ष्टा -ष्टं, विभ्रष्टः -ष्टा -ष्टं, च्युतः -ता -तं, परिच्युतः -ता -तं, गतः -ता -तं, विगतः -ता -तं, वीतः -ता -तं, क्षीणः -णा -णं, परिक्षीणः -णा -णं, अपचितः -ता -तं, अन्तरितः -ता -तं, लुप्तः -प्ता -प्तं, विलुप्तः -प्ता -प्तं, हीनः -ना -नं, प्रहीणः -णा -णं, त्यक्तः -क्ता -क्तं, ध्वंसितः -ता -तं, ध्वस्तः -स्ता -स्तं; 'one who has lost his kingdom,' राज्यभ्रष्टः,भ्रष्टराज्यः,राज्यच्युतः, राज्यात्प्रभ्रष्टः; 'one who has lost his office,' च्युताधिकारः; 'one who has lost his wealth,' गतविभवः -वा -वं, नष्टार्थः -र्था -र्थं, अर्थहीनः -ना -नं; 'one who has lost desire,' विगतस्पृहः -हा -हं, वीतकामः -मा -मं; 'one who has lost life,' त्यक्तजीवनः -ना -नं, प्रहीणजीवितः; 'one who has lost the road,' पथभ्रष्टः -ष्टा -ष्टं, मार्गप्रभ्रष्टः -ष्टा -ष्टं, वर्त्मवर्जितः -ता -तं, त्यक्तमार्गः -र्गा -र्गं; 'one who has lost an eye,' एकाक्षिविकलः -ला -लं; 'one who has lost every thing,' हृतसर्व्वस्वः -स्वा -स्वं, परिच्युतः -ता -तं, परिक्षीणः -णा -णं; 'lost to shame,' लज्जाहीनः -ना -नं, त्यक्तलज्जः -ज्जा -ज्जं, निरस्तलज्जः &c., लज्जोज्झितः -ता -तं, निर्लज्जः -ज्जा -ज्जं; 'lost in thought,' ध्याननिष्टः -ष्टा -ष्टं, चिन्ताकुलः -ला -लं, चिन्तापरः -रा -रं; 'relating to any thing lost,' नाष्टिकः -की -कं; 'it is lost,' हार्य्यते, अपचीयते.—(Bewildered) मोहितः -ता -तं, विमूढः -ढा -ढं, भ्रान्तबुद्धिः -द्धिः -द्धि, भ्रमयुक्तः -क्ता -क्तं.

LOT, *s.* (Destiny, state assigned by fate) भाग्यं, भागधेयं, दैवदशा, दैवस्थितिः *f.*, दैवयोगः, दैवं, दैविकं, दैवगतिः *f.*, भवितव्यता, भोगः, भोग्यं, भोक्तृत्वं.—(Share, portion) अंशः, भागः, विभागः, भाज्यं, भाजितं, उद्धारः.—(Die used in determining a person's portion) गुटिका, शकुनः; 'to cast lots,' गुटिकाः पत् (c. 10. पातयति -यितुं); 'casting lots,' गुटिकापातः, पाटः -टकः.

LOTH, *a.* अनिच्छुः -च्छुः -च्छु. *See* LOATH.

LOTION, *s.* औषधीयजलं, धावनौषधं, प्रक्षालनौषधं, धावनं -नी.

LOTTERY, *s.* गुटिकापातः, पाटकः, गुटिकापातपूर्व्वो विभागकल्पना.

LOTUS, LOTOS, *s.* (Flower) पद्मः -द्मं, कमलं, उत्पलं, कुमुदं, कुमुद् *n.*, नलिनं, कुवलयं, अरविन्दं, महोत्पलं, पङ्कजं, पङ्केरुहं, सरसिजं, सरसीरुहं, सरोजं, सरोरुहं, जलेजातं,अम्भोजं, वार्य्युद्भवं, अम्बुजं, अम्भोरुहं, पुण्डरीकं, मृणाली *m.* (न्), शतपत्रं, सहस्रपत्रं, कुशेशयं, इन्दिरालयं, तामरसं, पुष्करं, सारसं, रमाप्रियं, विसप्रसूनं, कुवलं, कुवं, कुटपं, पुटकं, श्रीपर्णः, श्रीकरं, श्रग्वाहं. Other varieties, red, white, and blue, are हल्लकं, रक्तसन्ध्यकं, रक्तसरोरुहं, रक्तकमलं, रक्तोत्पलं, कोकनदं, सिताम्भोजं, कह्लारं, सौगन्धिकं, इन्दीवरं, इन्दीवारं, कैरवं, नीलाम्बुजन्म *n.* (न्), नीलोत्पलं, नीलकमलं, भूय्यैकमलं, स्थलकमलं, स्थलपद्मं.—(The plant as distinguished from the flower) पद्मिनी, कमलिनी, नलिनी, कुमुदिनी; 'stalk of a lotus,' नालः-ला-ली -लं, पद्मनालं, नाडिः -डी *f.*, पद्मिनी, कुमुद्वती, नलिनी, पद्मतन्तुः *m.*; 'fibres or film attached to the stalk,' मृणालः -लं, विसं, विशं, विषं, नलिनीरुहः; 'root,' शालूकं, शालुकं, शिफाकन्दः -न्दं, करहाटः; 'seed,' कमलाक्षः, पद्माक्षः, पद्मबीजं; 'seed-vessel or pericarp,' बीजकोशः, कर्णिका, कर्णिकारः, वराटकः; 'filament,' केशरः, केसरः, किञ्जल्कः, किञ्जलः, किञ्जं; 'petal,' पद्मछदः, कमलछदः, पद्मान्तरः; 'new leaf,' संवर्त्तिः *f.*, संवर्त्तिका, नवदलं, नवपत्रं; 'abounding with lotuses,' कुमुद्वान् -द्वती -द्वत् (त्), कुमुदिकः -की -कं; 'place abounding with lotuses,' कुमुदिनी, कुमुद्वती, कुमुदाकरः, कुमुदवनं, कुमुदावासः, कुमुदवती, पद्मिनी, पद्माकरः, पद्मिनीखण्डं, पद्मखण्डं, कमलिनी, कमलाकरः, नलिनी, कुवलयिनी, अरविन्दिनी, पुष्करिणी; 'an assemblage or quantity of lotus flowers,' पद्मिनी, नलिनी, विसिनी, मृणालिनी, कमलिनी, उत्पलिनी, कुमुद्वती, पुटकिनी, पद्मखण्डं, घण्टः -ण्डं, शण्डं; 'lotus-like,' उत्पलाभः -भा -भं; 'lotus-shaped,' पद्माकारः -रा -रं; 'lotus-eyed,' उत्पलचक्षूः -क्षूः -क्षुः (स्); 'smelling like the lotus,' पद्मगन्धः -न्धा -न्धं, उत्पलगन्धिः -न्धि -न्धि.

LOUD, *a.* महास्वनः -ना -नं, महाध्वनिकः -का -कं, उच्चः -च्चा -च्चं, उच्चैःस्वरकः -का -कं, महास्वरकः -का -कं, महाध्वनिकरः -री -रं, महाशब्दकः -का -कं, महाशब्दी -ब्दिनी -ब्दि (न्), महाशब्दकारः -रा -रं, अतिशब्दनः -ना -नं, अतिशब्दवान् -वती -वत् (त्), महास्वनवान् &c., स्वनवान् &c., शब्दनः -ना -नं, महानादी -दिनी -दि (न्), तुमुलः -ला -लं, तुमुलकारी -रिणी &c., उन्नादः -दा -दं.—(Clamorous) घोषणः -णा -णं, घोषकरः -री -रं, बहुघोषः -षा -षं, महाघोषः -षा -षं; 'a loud sound or noise,' उच्चैःस्वरः, उच्चस्वरः, महाशब्दः, महास्वनः, महाघोषः, उच्चैर्घुष्टं, प्रणादः; 'loud speaking,' उच्चभाषणं; 'louder,' उच्चैस्तरः -रा -रं; 'loudest,' उच्चैस्तमः -मा -मं.

LOUD, LOUDLY, *adv.* उच्चैस्, उच्चकैस्, प्रोच्चैस्, उच्चैस्तमाम्, उच्चैःस्वरेण, उच्चशब्देन, महास्वरेण, महाशब्देन, अतिशब्देन, महाशब्दपूर्व्वं, स्वनवत्, उच्चैःकारं; 'speaking loud,' उच्चभाषी -षिणी -षि (न्); 'crying loud,' उच्चरावी -विणी &c.

LOUDNESS, *s.* उच्चता -त्वं, महाशब्दकारित्वं, महाशब्दकत्वं, शब्दमहत्त्वं, महाशब्दः, उच्चस्वरः, महाध्वनिः *m.*, उन्नादता.

LOUD-VOICED, *a.* उच्चस्वरः -रा -रं, उच्चस्वरवान् -वती -वत् (त्).

To LOUNGE, *v. a.* आलस्यं कृ, अलसीभू, आलस्यात् कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or कालक्षेपं कृ or कालहरणं कृ or कालव्ययं कृ, उदास् (c. 2. -आस्ते -आसितुं), निर्व्यापारत्वात् सुखेन शी (c. 2. शेते, शयितुं).

Digitized by Google

Lounger, *s.* अलसजनः, आलस्यकारी *m.* (न्), मुखनिरीक्षकः, लालाटिकः, कालक्षेपकः, अव्यापारी *m.* (न्), कार्य्यपुटः, उदासीनः, निर्व्यापारत्वात् सुखशायी *m.* (न्); 'woman with a lounging gait,' मन्थरगमना.

Louse, *s.* यूकः -का, केशकीटः, केशटः, षट्पदः -दी, आपालिः *m.*, रोमविध्वंशः, वारकीरः; 'egg of a louse,' लिक्षा.

To louse, *v. a.* निर्यूकीकृ, यूक (nom. यूकयति -यितुं), यूकवर्जितं -तां कृ.

Lousiness, *s.* सयूकत्वं -ता, बहुयूकता, यूकपूर्णता, यूकबाहुल्यं.

Lousy, *a.* युकालः -ला -लं, सयूकः -का -कं, बहुयूकः -का -कं, यूकपूर्णः -र्णा -र्णं, यूकसेवितः -ता -तं, यूकोपद्रुतः -ता -तं, यूकी -किनी -कि (न्).

Lout, *s.* ग्राम्यजनः, वृषलः, स्थूलजनः, स्थूलबुद्धिः *m.*, मूढजनः.

Loutish, *a.* स्थूलबुद्धिः -द्धिः -द्धि, स्थूलस्वभावः -वा -वं, ग्राम्यबुद्धिः &c., स्थूलः -ला -लं, ग्राम्यः -म्या -म्यं, ग्रामिकः -की -कं, अशिष्टः -ष्टा -ष्टं, असभ्यः -भ्या -भ्यं.

Loutishly, *adv.* स्थूलजनवत्, ग्राम्यजनवत्, वृषलवत्, बुद्धिस्थौल्यात्.

Loutishness, *s.* स्थूलता -त्वं, स्थौल्यं, बुद्धिस्थूलता, ग्राम्यता, अशिष्टता.

Louver, *s.* धूमरन्ध्रं, धूमनिर्गमः, धूमायनं, वातायनं, छिद्रं.

Lovable, *a.* स्नेहार्हः -र्हा -र्हं, प्रियगुणकः -का -कं, प्रियगुणविशिष्टः -ष्टा -ष्टं, स्नेहोत्पादकशीलः -ला -लं, प्रीत्युत्पादकशीलः -ला -लं, प्रियः -या -यं.

Lovage, *s.* अजमोदा, यवानी -निका, यमानी -निका, इन्दुलेखा, भूतीकं.

To love, *v. a.* (Have affection for) प्रेम कृ, प्री (c. 4. प्रीयते, प्रेतुं), स्नेहं कृ, प्रीतिं कृ, स्निह् (c. 4. स्निह्यति, स्नेहितुं), कम् (c. 10. कामयते -ति -यितुं), दय् (c. 1. दयते -यितुं), अनुरञ्ज् (c. 4. -रज्यते), अनुरागं कृ, अनुरक्तः -क्ता -क्तं भू, अनुरागवान् -वती भू, अनुरुध् (c. 4. -रुध्यते -रोद्धुं), भज् (c. 1. भजते, भक्तुं); 'he loves God,' ईश्वरे प्रेम करोति, ईश्वरभक्तिं करोति; 'they love him,' तस्मिन् प्रीयन्ते; 'he loves his brother more than me,' मत्तो ऽधिकं भ्रातरि प्रीयते or स्नेहं करोति; 'I love my son,' पुत्रेण सह मम महान् स्नेहः; 'she loves him,' तस्मिन् अनुरागवती भवति; 'he loves his wife,' भार्य्यायाम् अनुरज्यते or अनुरक्तो ऽस्ति; 'they love the king,' राजानम् अनुरुध्यन्ते; 'women love everybody,' सर्व्वे स्त्रीणां प्रियाः.

To love, *v. n.* (Delight in) आनन्द् (c. 1. -नन्दति -न्दितुं), अभिनन्द्, हृष् (c. 4. हृष्यति, हर्षितुं), प्री (c. 4. प्रीयते, प्रेतुं), तुष् (c. 4. तुष्यति, तोष्टुं), रुच् (c. 1. रोचते -चितुं).

Love, *s.* (Fondness, affection) प्रीतिः *f.*, प्रेम *n.* (न्), स्नेहः, अनुरागः, अनुरक्तिः *f.*, प्रणयः, वात्सल्यं, वत्सलता, रागः, हार्द्दं, प्रश्रयः, अनुरोधः, रुचिः *f.*, अभिरुचिः *f.*, सन्तोषः, प्रेमभावः, प्रीतिभावः, स्नेहभावः; 'love for God,' ईश्वरभक्तिः *f.*; 'undivided love,' अनन्यभक्तिः.—(Love of the sexes, passion) प्रेम *n.*, स्त्रीपुरुषप्रेम, शृङ्गारः, शृङ्गारभावः, कामः, कामिता, मदनः, मन्मथः, रागः, अनुरागः, रतिः *f.*, रमः, बन्धिनं, कैशिकः, उज्ज्वलः, शुचिः *m.*—(Cupid) कामः, मन्मथः, मदनः, कन्दर्पः, स्मरः, मनसिजः, मनसिशयः, चित्तभूः *m.*, चेतोभूः, चित्तजन्मा *m.* (न्), सङ्कल्पजः, अनङ्गः, शमान्तकः, जराभीरुः *m.* *See* Kámadeva. 'In love, under the influence of love,' कामार्त्तः -र्त्ता -र्त्तं, कामातुरः -रा -रं, मदनावस्थः -स्था -स्थं, मदनवशः -शा -शं, जातमन्मथः -था -थं, जातकामः -मा -मं, स्मराकुलः -ला -लं, कामासक्तः -क्ता -क्तं, काममोहितः -ता -तं, कामबद्धः -द्धा -द्धं, शृङ्गारी -रिणी -रि (न्), शृङ्गारितः -ता -तं; 'to fall in love with, be in love with,' अनुरागवान् -वती भू with loc. or gen. of the person, जातानुरागः -गा भू, मोहितः -ता -तं भू; 'to make love,' विवाहार्थं प्रेम कृ, विवाहहेतुकस्नेहं कृ, विवाहार्थं चित्ताराधनं कृ.—(Delight in) रुचिः *f.*, अभिरुचिः *f.*, अनुरागः, प्रीतिः, आसक्तिः *f.*; 'love of life,' जीविताशा.—(Airs or gestures of love) हावः, भावः, ललितं, विलासः, विभ्रमः.

Love-broker, *s.* घटकः, प्रेमघटकः, मदनदूतः -तो *f.*, दूतिका *f.*

Loved, *p. p.* प्रीतः -ता -तं, दयितः -ता -तं, स्निग्धः -ग्धा -ग्धं, प्रियः -या -यं, हृद्यः -द्या -द्यं, हृदयप्रियः -या -यं, इष्टः -ष्टा -ष्टं, मनीषितः -ता -तं, सुभगः -गा -गं.

Love-knot, *s.* प्रेमग्रन्थिः *m.*, प्रीतिग्रन्थिः *m.*, शृङ्गारग्रन्थिः *m.*

Love-letter, *s.* मदनलेखः, अनङ्गलेखः, मन्मथलेखः, शृङ्गारपत्रं, प्रेमपत्रं, अनङ्गपत्रं, प्रीतिपत्रं.

Loveliness, *s.* कान्तता, कान्तिः *f.*, सौन्दर्य्यं, सुन्दरता, अतिसौन्दर्य्यं, लावण्यं, रूपलावण्यं, चारुता, सौम्यता, लालित्यं, वामता, मुग्धता, कमनीयता, अभिरामता, दीप्तिः *f.*, शोभा, रमणीयता, मनोहरत्वं -ता, रम्यता, सुभगता, सश्रीकता.

Lovely, *a.* कान्तः -न्ता -न्तं, सुन्दरः -रा -री -रं, अतिसुन्दरः &c., लावण्यवान् -वती -वत् (त्), सुरूपः -पी -पं, सुरूपवान् &c., चारुः -रुः -रुः, चारुमान् -मती &c., ललितः -ता -तं, सौम्यः -म्या -म्यं, मुग्धः -ग्धा -ग्धं, वामः -मा -मं, मनोरमः -मा -मं, मनोहरः -रा -रं, रम्यः -म्या -म्यं, रमणीयः -या -यं, कमनीयः -या -यं, सुभगः -गा -गं, मनोज्ञः -ज्ञा -ज्ञं, अभिरामः -मा -मं.

Lovely-faced, *a.* सुमुखानः -ना -नं, चारुमुखः -खी -खं, सुमुखः &c.

Love-match, *s.* प्रीतिविवाहः, प्रेमविवाहः, प्रीतिसम्बन्धः, प्रेमसम्बन्धः.

Love-quarrel, *s.* प्रीतिकलहः, प्रेमकलहः, प्रणयकोपः.

Lover, *s.* प्रणयी *m.* (न्), प्रियः, कान्तः, नायकः, रमणः, रमकः, रमः, दयितः, वल्लभः, कामी *m.* (न्), हृदयेशः, प्राणेशः, जीवितेशः, प्राणपतिः *m.*, प्रियतमः, बन्धुः *m.*, इष्टः; 'lover of knowledge,' विद्यानुरागी *m.* (न्), ज्ञानेप्सुः *m.*

Love-shaft, *s.* मदनशरः, स्मरशरः, कामशरः, कन्दर्पबाणः, मदनेषुः *m.* The god of love is fabled by the Hindús as having five arrows, each tipped with the blossom of a flower. *See* Kámadeva.

Love-sick, *a.* कामरोगी -गिणी -गि (न्), मदनरोगी &c., कामातुरः -रा -रं, कामार्त्तः -र्त्ता -र्त्तं, कामपीडितः -ता -तं, मदनपीडितः &c., कामविह्वलः -ला -लं.

Love-song, *s.* मदनगीतं, प्रेमगीतं, शृङ्गारगीतं, शृङ्गारगानं.

Love-tale, *s.* कामकथा, शृङ्गारकथा, मदनकथा प्रेमकथा, शृङ्गारव्याख्यानं, प्रेमव्याख्यानं.

Love-token, *s.* प्रीतिलक्षणं, प्रेमलक्षणं, प्रीतिदानं, प्रेमस्मारकं.

Love-trick, *s.* प्रेमक्रीडा, अनङ्गक्रीडा, हावः, भावः, ललितं, विलासः.

Loving, *a.* प्रणयी -यिनी -यि (न्), प्रणयवान् -वती -वत् (त्), कामी -मिनी &c., स्नेही -हिनी &c., अनुरक्तः -क्ता -क्तं, अनुरागवान् -वती &c., प्रकामः -मा -मं, प्रीतिमान् -मती &c., वात्सलः -ला -लं, प्रीतियुक्तः -क्ता -क्तं.—(Delighting in, attached to) अनुरागी -गिणी &c., आनन्दी -न्दिनी &c., प्रमोदी -दिनी &c., मोदी &c., प्रियः -या -यं, आसक्तः -क्ता -क्तं, सेवी -विनी &c., रतः -ता -तं, निरतः -ता -तं.

Loving-kindness, *s.* कृपा, दया, कारुण्यं, वात्सल्यं, करुणार्द्रता, अनुकम्पा, प्रसादः, अनुग्रहः, स्नेहः, हितेच्छा.

Lovingly, *adv.* सप्रणयं, प्रणयेन, सानुरागं, स्नेहेन, सस्नेहं, प्रीतिपूर्व्वं, प्रीत्या, वात्सल्येन, सवात्सल्यं.

Low, *a.* (Not high) नीचः -चा -चं, नीचकः -का -कं, नीचस्थः -स्था -स्थं, निम्नः -म्ना -म्नं, अधरः -रा -रं, अनुच्चः -च्चा -च्चं, अनुत्तुङ्गः -ङ्गा -ङ्गं,

Digitized by Google

अधःस्थः -स्था -स्थं, अधस्तनः -नी -नं; 'low ground,' निम्नभूमिः *f.*—(Short, low in stature) ह्रस्वः -स्वा -स्वं, नीचः -चा -चं, न्यङ्, नीची, न्यक् (च्), ह्रस्वतनुः -नुः -नु, अल्पतनुः -नुः -नु.—(Not loud) नीचस्वरः -रा -रं, नीचशब्दकः -का -कं, नीचः -चा -चं, नीचकः -का -कं.—(Deep or grave in sound) मन्दः -न्दा -न्दं, मन्द्रः -न्द्रा -न्द्रं, आमन्द्रः -न्द्रा -न्द्रं, मन्थरः -रा -रं, धीरः -रा -रं, गम्भीरः -रा -रं, गभीरः -रा -रं.—(Mean, inferior, base) अधमः -मा -मं, अवरः -रा -रं, नीचः -चा -चं, नीचकः -का -कं, हीनः -ना -नं, निकृष्टः -ष्टा -ष्टं, अपकृष्टः -ष्टा -ष्टं, अवमः -मा -मं, जघन्यः -न्या -न्यं, जघन्यवृत्तिः -त्तिः -त्ति, प्रतिकृष्टः -ष्टा -ष्टं, खलः -ला -लं, क्षुद्रः -द्रा -द्रं, दुष्टः -ष्टा -ष्टं, दुर्वृत्तः -त्ता -त्तं, वार्षलः -ली -लं, प्राकृतः -ती -तं, न्यङ्, नीची, न्यक् (च्), कृपणः -णा -णं, अर्व्वा -र्व्वती -र्व्वत् (न्), अरमः -मा -मं, अणकः -का -कं, अनकः -का -कं, आणकः -का -कं, इतरः -रा -रं, अनार्य्यः -र्य्या -र्य्यं, रेफः -फा -फं, रेपः -पा -पं, रेफाः -फाः -फः (स्), रेपाः &c., याप्यः -प्या -प्यं, खेटः -टा -टं, अवद्यः -द्या -द्यं, खुल्लः -ल्ला -ल्लं, खुल्लकः -का -कं, कुपूयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, अश्लीलः -ला -लं; 'a low man,' प्राकृतजनः, निहीनजनः, पृथग्जनः, इतरजनः, अपसदः, दुर्वृत्तः, अधमाचारः, दुराचारः, पामरः, जाल्मः, विवर्णः; 'low language,' अश्लीलं, खलोक्तिः *f.*, अश्लीलाक्षेपः.—(Of low rank or birth) हीनजातिः -तिः -ति, न्यग्जातिः -तिः -ति, नीचजातिः -तिः -ति, अन्त्यजातीयः -या -यं, हीनजन्मा -न्मा -न्म (न्), दुष्कुलीनः -ना -नं, अकुलीनः -ना -नं, नीचकुलजातः -ता -तं, हीनकुलः -ला -लं.—(Depressed, dejected) विषण्णः -ण्णा -ण्णं, विषादी -दिनी &c., अवसन्नः -न्ना -न्नं, दीनमनस्कः -स्का -स्कं, विमनाः -नाः -नः (स्), दुर्मनाः &c., विमनस्कः -स्का -स्कं, क्लान्तः -न्ता -न्तं, खिन्नः -न्ना -न्नं, उद्विग्नः -ग्ना -ग्नं, ग्लानः -ना -नं.—(Moderate) परिमितः -ता -तं, अल्पः -ल्पा -ल्पं, स्वल्पः -ल्पा -ल्पं.—(In price) अल्पमूल्यः -ल्या -ल्यं.—(Not rich, not nourishing, as diet) निस्सत्त्वः -त्त्वा -त्त्वं, कर्शकः -का -कं, कृशकारी -रिणी &c., अपोषकः -का -कं, अपौष्टिकः -की -कं.

Low, *adv.* नीचैस्, नीचकैस्, नीचे, अधस्, अनुच्चं, नीच in comp.; as, 'going low,' नीचगः -गा -गं.—(In a low tone) नीचस्वरेण.

To LOW, *v. n.* (As cattle) हम्भारवं कृ, हम्भ (nom. हम्भायते), रम्भ् (c. 1. रम्भते -म्भितुं), रेभ् (c. 1. रेभते -भितुं), गज् (c. 1. गजति -जितुं), नद् (c. 1. नदति -दितुं), नर्द् (c. 1. नर्दति -र्दितुं), गर्ज् (c. 1. गर्जति -र्जितुं).

Low-born, *a.* हीनजातिः -तिः -ति, न्यग्जातिः &c., नीचकुलजातः -ता -तं, हीनकुलप्रसूतः -ता -तं, अनुच्चकुलजातः -ता -तं, हीनजन्मा -न्मा -न्म (न्), अन्त्यजातीयः -या -यं, अधमवंशोद्भवः -वा -वं, अवरवर्णजः -जा -जं, अधमवंशीयः -या -यं, अधमजातीयः -या -यं, अवरजः -जा -जं.

Lower, *a.* (Less high) अधरः -रा -रं, अधरस्थः -स्था -स्थं, अधःस्थः -स्था -स्थं, अधोभवः -वा -वं, अधस्तनः -नी -नं, नीचस्थः -स्था -स्थं, अधमः -मा -मं, अवाङ् -वाची -वाक् (च्), अवाचीनः -ना -नं, अवमः -मा -मं, जघन्यः -न्या -न्यं, अपकृष्टः -ष्टा -ष्टं, अधस् in comp.; as, 'the lower part,' अधोभागः; 'lower part of the body,' अधःकायः; 'the lower region,' अधोलोकः, अधोभुवनं, अवाची; 'lower garment,' अधोंशुकं, अन्तरीयं, उपसंव्यानं, परिधानं; 'the lower line,' अधःस्थपंक्तिः *f.*, अधरपंक्तिः; 'the lower classes,' अन्त्यजातीयाः *m. pl.*, अधमजातीयाः *m. pl.*, हीनजातीयाः *m. pl.*, अवरवर्णाः *m. pl.*

To LOWER, *v. a.* (Cause to descend, let down) अधःकृ, अधःपत् (c. 10. -पातयति -यितुं), अवपत्, अवतॄ (c. 10. -तारयति -यितुं), नीचीकृ.—(Abase, humble) अपकृष् (c. 1. -कर्षति -क्रष्टुं), नम् (c. 10. नमयति -यितुं), अवनम्, नम्रीकृ, भ्रंश् (c. 10. भ्रंशयति -यितुं), दर्पं or गर्व्वं भञ्ज् (c. 7. भनक्ति, भंक्तुं), गौरवं हृ (c. 1. हरति, हर्त्तुं), तिरोभू (c. 10. -भावयति -यितुं), पत्.—(Diminish) न्यूनीकृ, अल्पीकृ, ऊन् (c. 10. ऊनयति -यितुं), न्यून्, कन् (nom. कनयति -यितुं), ह्रस् (c. 10. ह्रासयति -यितुं), लघ (nom. लघयति -यितुं).

To LOWER, *v. n.* (Grow less, sink) न्यूनीभू, पत् (c. 1. पतति -तितुं), नम्रीभू.

To LOWER, *v. n.* (Be dark and gloomy, be clouded) मेघावृतः -ता -तं भू, मेघाच्छन्नः -न्ना -न्नं भू, मेघ (nom. मेघायते), अभ्र (nom. अभ्रायते), तमोवृतः -ता -तं भू, मलिनीभू, कलुषीभू.—(Frown, look black) भ्रूभङ्गं कृ, भ्रूसङ्कोचनं कृ, मलिनमुखः -खी -खं भू.

Lower, *s.* (Gloominess, cloudiness) साभ्रता, मेघाच्छन्नता, मेघतिमिरं, तमोवृतत्वं, मेघसंहतिः *f.*, दुर्दिनं.—(Of countenance) मुखमालिन्यं, मलिनमुखत्वं.

Lowered, *p. p.* (Let down) पातितः -ता -तं, अवपातितः -ता -तं, अधःकृतः -ता -तं.—(Humbled) भग्नदर्पः -र्पा -र्पं, आत्तगर्व्वः -र्व्वा -र्व्वं, गतगौरवः -वा -वं, हृतगौरवः -वा -वं, आत्तगौरवः -वा -वं.—(Diminished) न्यूनीकृतः -ता -तं, अल्पीकृतः -ता -तं, ह्रसितः -ता -तं.

Lowering, *a.* (Gloomy, cloudy) मेघाच्छन्नः -न्ना -न्नं, तमोवृतः -ता -तं, दुर्दिनग्रस्तः -स्ता -स्तं, मलिनः -ना -नं, अभ्रियः -या -यं, मलिनमुखः -खी -खं,

Lowermost, lowest, *a.* अवरः -रा -रं, अधरः -रा -रं, अवरतमः -मा -मं, अधरतमः -मा -मं, अधमः -मा -मं, नीचः -चा -चं, नीचतमः -मा -मं, अतिनीचः -चा -चं, अधःस्थः -स्था -स्थं, अधरस्थः -स्था -स्थं, अवरस्थः -स्था -स्थं; 'at the lowest price,' अवरमूल्यमपेक्ष्य, न्यूनमूल्यमपेक्ष्य.

Lowing, *s.* (Of cattle) हम्भा, हम्भारवः, रम्भः, रम्भितं, रेभणं, गोनादः, गोरावः.

Lowing, *part.* हम्भारवविरावी -विणी -वि (न्), हम्भायमानः -ना -नं.

Lowland, *s.* निम्नभूमिः *f.*, निम्नभूः *f.*, निम्नदेशः, नीचभूमिः, नीचप्रदेशः.

Lowlander, *s.* निम्नदेशवासी *m.* (न्), नीचदेशस्थः, निम्नदेशीयः.

Lowlily. *adv.* नम्रचेतसा, नम्रं, विनम्रं, अदर्पेण, निरभिमानेन, नम्रशीलत्वात्, सविनयं, सनिर्वेदं, गर्व्वं विना, गर्व्वत्यागपूर्व्वं.

Lowliness, *s.* नम्रता, बुद्धिनम्रता, विनम्रता, विनयः, विनतिः *f.*, नम्रशीलता, गर्वहीनता, दर्पशून्यता, दम्भहीनता, निरभिमानं, अनभिमानं, अनहङ्कारः, अगर्व्वः, दीनता, निर्वेदः, दैन्यं, आनतिः *f.*, सन्नतिः *f.*, अपकर्षः, अपकृष्टता, नम्रवृत्तिः *f.*

Lowly, *a.* नम्रः -म्रा -म्रं, नम्रबुद्धिः -द्धिः -द्धि, नम्रशीलः -ला -लं, नम्रवृत्तिः -त्तिः -त्ति, नम्रमनाः -नाः -नः (स्), नम्रमनस्कः -स्का -स्कं, विनतचेताः -ताः -तः (स्), विनतः -ता -तं, विनयी -यिनी -यि (न्), सविनयः -या -यं, निरभिमानः -ना -नं, अनभिमानी -निनी &c., अनहङ्कारः -रा -रं -री -रिणी &c., निरहङ्कारः -रा -रं, निरहम्मानी -निनी &c., अभिमानहीनः -ना -नं, अगर्व्वः -र्व्वा -र्व्वं, वीतगर्व्वः -र्व्वा -र्व्वं, गर्व्वरहितः -ता -तं, वीतदम्भः -म्भा -म्भं, दर्पहीनः &c., निर्विण्णः -ण्णा -ण्णं, अनुद्धतः -ता -तं, अपकृष्टः -ष्टा -ष्टं, अप्रगल्भः -ल्भा -ल्भं, अप्रौढः -ढा -ढं, नीचः -चा -चं.

Lowly, *adv.* सविनयं, अनुद्धतं, सापकर्षं, नम्रवत्. *See* Lowlily.

Low-minded, *a.* दुष्टचेताः -ताः -तः (स्), खलात्मा -त्मा -त्म (न्), दुरात्मा &c.

Lowness, *s.* नीचता, निम्नता, अनुच्चता, अतुङ्गता; 'lowness of ground,' भूमिनिम्नता.—(Meanness) नीचता, अधमता, अपकृष्टता, निकृष्टता, अपकर्षः, जघन्यता, हीनता, खलता, क्षुद्रता, दुष्टता, कृपणता, कार्पण्यं, दुर्वृत्तता, अनार्य्यता, अनुत्कर्षः.—(Of spirits) विषादः, विषण्णता, अवसादः, अवसन्नता, उद्वेगः, निर्विण्णता, क्लान्तिः *f.*, ग्लानिः *f.*, म्लानिः, दीनता, वैमनस्यं, विमनस्कता, दौर्मनस्यं, दुर्मनस्कता.—(Of sound) नीचता, मन्दता, मन्द्रता, गम्भीरता, गाम्भीर्य्यं.—(Of price) मूल्यन्यूनता, अल्पमूल्यत्वं.

Digitized by Google

Low-priced, *a.* अल्पमूल्यः -ल्या -ल्यं, न्यूनमूल्यः &c., सुमूल्यः &c.

Low-spirited, *a.* विषादी -दिनी -दि (न्), विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, उद्विग्नमनाः -नाः -नः (स्), दुर्मनाः &c., क्लान्तमनाः &c., अन्तर्मनाः &c., दीनमनाः &c., विमनाः &c., दुर्मनस्कः -स्का -स्कं, विमनस्कः &c. उद्विग्नमनस्कः &c., दीनचेतनः -ना -नं, उदासवृत्तिः -त्तिः -त्ति.

Loyal, *a.* भक्तः -क्ता -क्तं, दृढभक्तिः -क्तिः -क्ति, भक्तिमान् -मती -मत् (त्), भक्तियुक्तः -क्ता -क्तं, सानुरागः -गा -गं, अनुरक्तः -क्ता -क्तं; 'to a sovereign or superior,' राजभक्तः &c., प्रभुभक्तः &c., राजानुरक्तः &c., राजसेवी -विनी &c., राजभक्तिनिष्ठः -ष्ठा -ष्ठं, स्वामिभक्तः &c., राजाज्ञावर्त्ती -र्त्तिनी &c., राजासक्तः -क्ता -क्तं, प्रजाधर्म्मनिष्ठः -ष्ठा -ष्ठं, प्रजाधर्म्मपरायणः -णा -णं, प्रजाधर्म्मतत्परः -रा -रं.—(As a wife) पतिव्रता, साध्वी, सती, सुचरित्रा, एकपत्नी, स्वीया.—(As a husband) स्वदारनिरतः, स्वदारैकतानः, अनन्यनारीसामान्यः, अनुकूलः.

Loyalist, *s.* *See* Loyal.

Loyally, *adv.* दृढभक्त्या, राजभक्त्या, राजभक्तवत्, राजभक्तिपूर्व्वं, सानुरागं, राजानुरक्तवत्, स्वराजनिष्ठापूर्व्वं.

Loyalty, *s.* भक्तिः *f.*, राजभक्तिः *f.*, प्रभुभक्तिः, स्वामिभक्तिः, राजभक्तता, दृढा भक्तिः, राजानुरागः, राजानुरक्तिः *f.*, स्वराजासक्तिः *f.*, स्वराजनिष्ठा, प्रजाधर्म्मनिष्ठा, प्रजाधर्म्मतात्पर्य्यं; 'test of loyalty,' उपधा.—(In a wife) पातिव्रत्यं, साध्वीत्वं, सतीत्वं.—(In a husband) स्वदारनिरतिः *f.*, स्वदारनिष्ठा, अनुकूलता.

Lozenge, *s.* (A quadrangular figure having two acute and two obtuse angles) चतुष्कोणविशेषो यस्य द्विकोणाव् अन्तर्लग्नौ द्विकोणौ बहिर्लग्नौ.—(Sweetmeat) पदकं, मोदकं, लड्डुकं.

Lubber, *s.* स्थूलजनः, स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, अलसजनः, स्थूलशरीरः; 'land-lubber,' स्थलवासी *m.* (न्), स्थलचरः.

Lubberly, *a.* स्थूलः -ला -लं, स्थूलस्वभावः -वा -वं, अदक्षः -क्षा -क्षं.—(Relating to dry land) स्थलीयः -या -यं.

Lubberly, *adv.* सस्थौल्यं, स्थूलजनवत्, अदक्षं, अदक्षवत्.

Lubric, *a.* चिक्कणः -णा -णं, स्निग्धः -ग्धा -ग्धं, मेदुरः -रा -रं.

To lubricate, *v. a.* अभ्यञ्ज् (c. 7. -अनक्ति -अंक्तुं), स्नेहेन अञ्ज्, स्नेहाक्तं -क्तां कृ, स्निग्धीकृ, चिक्कणीकृ, श्लक्ष्ण (nom. श्लक्ष्णयति -यितुं).

Lubricated, *p. p.* अभ्यक्तः -क्ता -क्तं, स्नेहाक्तः -क्ता -क्तं, व्याधारितः -ता -तं.

Lubrication, *s.* अभ्यञ्जनं, स्नेहाभ्यञ्जनं, स्निग्धीकरणं, चिक्कणीकरणं.

Lubricity, *s.* स्निग्धता, स्नैग्ध्यं, स्नेहः -हनं, चिक्कणता, मेदुरता.

Lubricous, *a.* स्निग्धः -ग्धा -ग्धं, स्नेही -हिनी -हि (न्), चिक्कणः -णा -णं, चिक्किणः -णा -णं, मेदुरः -रा -रं.

Lucent, *a.* द्योती -तिनी -ति (न्), प्रकाशमानः -ना -नं, द्योतमानः &c.

Lucid, *a.* (Bright) दीप्तिमान् -मती -मत् (त्), तेजोमयः -यी -यं, तैजसः -सी -सं, उज्ज्वलः -ला -लं, तेजस्वी -स्विनी -स्वि (न्), कान्तिमान् &c., शोभनः -ना -नं, सुप्रभः -भा -भं.—(Pellucid) स्वच्छः -च्छा -च्छं, निर्मलः -ला -लं, विमलः -ला -लं, अमलः -ला -लं, विशदः -दा -दं, प्रसन्नः -न्ना -न्नं, शुद्धः -द्धा -द्धं.—(Perspicuous) स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्थी -र्थं, प्रसन्नः -न्ना -न्नं, व्यक्तः -क्ता -क्तं, भिन्नार्थः -र्थी -र्थं.

Lucidly, *adv.* स्पष्टं, सुस्पष्टं, व्यक्तं, सुव्यक्तं, स्पष्टार्थं, भिन्नार्थं, विशदं.

Lucidness, *s.* (Brightness) दीप्तिः *f.*, कान्तिः *f.*, तेजस् *n.*, उज्ज्वलता, रुचिः *f.*, द्युतिः *f.*, दीप्तिमत्त्वं.—(Clearness) स्पष्टता, सुस्पष्टता, व्यक्तता, प्रसादः, स्पष्टार्थत्वं, वैशद्यं, स्वच्छता.

Lucifer, *s.* (Planet Venus) शुक्रः, उशनाः *m.* (स्), भार्गवः.

Lucifer-match, *s.* शलाका, ज्वलनशलाका, अग्निदशलाका, ज्वलतृणं, ज्वलनतृणं, अग्निदतृणं, अग्निदं.

Luciferous, lucific, *a.* अग्निदः -दा -दं, प्रकाशजनकः -का -कं, प्रकाशकः -का -कं, दीप्तिकरः -रा -रं, प्रकाशोत्पादकः -का -कं.

Luciform, *a.* तेजोगुणकः -का -कं, प्रकाशगुणकः -का -कं, तेजोमयः -यी -यं.

Luck, *s.* दैवं, भाग्यं, भागः, भागधेयं, दैवयोगः, दैवगतिः *f.*, दैवदशा, दैविकं; दिष्टं, अदृष्टं, नियतिः *f.*, विधिः *m.*, कालनियोगः, भवितव्यता, रिष्टं, सङ्गतिः *f.*; 'good luck,' सौभाग्यं, सुभाग्यं, कुशलं -लता, कौशल्यं, शुभं, कल्याणं, भद्रं, मङ्गलं, माङ्गल्यं, पुण्योदयः, शर्म्म *n.* (न्), सन्नतिः *f.*, सम्पत्तिः *f.*, सम्पद् *f.*, अयः, श्रीः *f.*, लक्ष्मीः *f.*; 'bad luck,' दौर्भाग्यं, दुर्भाग्यं, दुर्दैवं, विपत्तिः *f.*, दुर्गतिः *f.*, अशुभं, अमङ्गलं; 'good luck to you,' दिष्ट्या, दिष्ट्या वर्धसे; 'good and ill luck,' शुभाशुभं, भद्राभद्रं, मङ्गलामङ्गलं.

Luckily, *adv.* सौभाग्येन -ग्यात्, सुभाग्येन -ग्यात्, दैववशात्, भाग्यवशात्, कल्याणात्, कौशल्यात्, माङ्गल्येन, शुभदैवात्, दिष्ट्या, श्रिया, सुभगं.

Luckiness, *s.* सौभाग्यं, सुभाग्यवत्त्वं, धन्यता, कल्याणता, माङ्गल्यं, पुण्यवत्त्वं, कौशल्यं, मङ्गलं.

Luckless, *a.* दुर्भाग्यः -ग्या -ग्यं, मन्दभाग्यः &c., मन्दभागी -गिनी -गि (न्), अभाग्यः -ग्या -ग्यं, अभागी -गिनी &c., भाग्यहीनः -ना -नं, हीनभाग्यः -ग्या -ग्यं, दुर्भगः -गा -गं, निर्दैवः -वा -वं, दैवहीनः -ना -नं, अधन्यः -न्या -न्यं, विपन्नः -न्ना -न्नं.

Lucklessly, *adv.* दुर्भाग्येन -ग्यात्, दुर्दैवात्, दौर्भाग्यवशात्, दुर्दैववशात्.

Lucky, *a.* सौभाग्यवान् -वती -वत् (त्), भाग्यवान् &c., धन्यः -न्या -न्यं, मङ्गलः -ला -लं, कल्याणः -णा -णं -णी -णिनी -णि (न्), शर्म्मवान् &c., पुण्यवान् &c., श्रीमान् &c., कुशलः -ला -लं, शुभः -भा -भं, भद्रः -द्रा -द्रं, सुभद्रः -द्रा -द्रं, शुभंयुः -युः -यु, अयवान् &c., सुभगः -गा -गं, शिवः -वा -वं, श्रीयुक्तः -क्ता -क्तं, लक्ष्मीवान् &c., भाग्यशाली -लिनी &c., सभाग्यः -ग्या -ग्यं; 'lucky moment,' शुभलग्नः, लग्नवेला.

Lucrative, *a.* लाभकरः -रा -रं, लाभदः -दा -दं, लाभकृत् *m. f. n.*, लाभदायकः -का -कं, सफलः -ला -लं, फलदः -दा -दं, अर्थदः -दा -दं, अर्थकरः -री -रं, लाभजनकः -का -कं, फलोत्पादकः -का -कं, फलावहः -हा -हं, हितावहः -हा -हं.

Lucratively, *adv.* सफलं, साफल्येन, सलाभं, लाभपूर्व्वं, सार्थं.

Lucrativeness, *s.* साफल्यं, सफलता -त्वं, सलाभत्वं, सार्थता, फलदता.

Lucre, *s.* लाभः, अर्थः, वृद्धिः *f.*, धनलाभः, प्राप्तिः *f.*, फलं, धनोपार्ज्जनं, अर्थलब्धिः *f.*, अर्ज्जनं, योगक्षेमः, लभ्यं, लभ्यांशः, प्राप्तव्यांशः, आयः, फलोदयः.

To lucubrate, *v. n.* निशाध्ययनं कृ, रात्र्यध्ययनं कृ, निशाभ्यासं कृ, रात्रौ or निशि विद्याभ्यासं कृ or विद्यासेवां कृ.

Lucubration, *s.* (Nocturnal study) निशाध्ययनं, रात्र्यध्ययनं, निशाभ्यासः.—(That which is composed by night) निशाभ्यासेन रचितो ग्रन्थः.

Luculent, *a.* प्रसन्नः -न्ना -न्नं, विशदः -दा -दं, स्वच्छः -च्छा -च्छं, स्पष्टः -ष्टा -ष्टं, निर्मलः -ला -लं, सुप्रभः -भा -भं, तेजोमयः -यी -यं.

Ludicrous, *a.* हास्यजनकः -का -कं, हास्यकरः -रा -रं, हास्यः -स्या -स्यं, अवहास्यः &c., उपहास्यः &c., हास्योत्पादकः -का -कं, हासोत्पादकः -का -कं, हासकरः -रा -रं, परिहासकरः -रा -रं, असङ्गतः -ता -तं, कौतुकजनकः -का -कं.

Ludicrously, *adv.* असङ्गतं, हास्यप्रकारेण, यथा हासो जायते तथा.

Ludicrousness, *s.* हास्यता, हास्यजनकता, उपहास्यता, हास्योत्पादकत्वं, असङ्गतत्वं, कौतुकजनकत्वं, अवहास्यत्वं.

Lues venerea, *s.* उपदंशः; 'afflicted with it,' उपदंशी -शिनी (न्).

To luff, *v. a.* प्रतिवातं नौकां परिवृत् (c. 10. -वर्त्तयति -यितुं).

To lug, *v. a.* (Drag with force) बलेन कृष् (c. 1. कर्षति, c. 6.

Digitized by Google

कृषति, क्रष्टुं, कर्ष्टुं), बलात् or प्रसभम् आकृष् or अपकृष् or हृ (c. 1. हरति, हर्त्तुं) or अपहृ.

Luggage, *s.* परिच्छदः, पथिकपरिच्छदः, यात्रिकसामग्री, सामग्र्यं, यात्रिकभाण्डानि *n. pl.*, वस्त्रभाण्डानि *n. pl.*, वस्त्रपात्राणि *n. pl.*

Lugger, *s.* त्रिकूपकविशिष्टा दीर्घवातवसना क्षुद्रनौका.

Lugubrious, *a.* शोकसूचकः -का -कं, शोकात्मकः -का -कं, शोकमयः -यी -यं, दुःखबोधकः -का -कं, कारुणिकः -की -कं, खेदसूचकः -का -कं, शोकी -किनी -कि (न्).

Lukewarm, *a.* ईषदुष्णः -ष्णा -ष्णं, कवोष्णः -ष्णा -ष्णं, मन्दोष्णः &c., कदुष्णः &c., कोष्णः &c., अनुष्णः &c., ईषत्तप्तः -प्ता -प्तं.—(Not zealous) मन्दोत्साहः -हा -हं, मन्दोद्योगः -गा -गं, निरुत्सुकः -का -कं, अतीक्ष्णः -क्ष्णा -क्ष्णं, अव्ययः -या -यं, ईषच्चण्डः -ण्डा -ण्डं, उदासीनः -ना -नं.

Lukewarmly, *a.* ईषदुष्णं, ईषत्तापेन, कवोष्णं, अनुत्तापेन, मन्दोद्योगेन.

Lukewarmness, *s.* कवोष्णता, मन्दोष्णता, कोष्णता -त्वं, ईषदुष्णता, कदुष्णत्वं, अनुष्णत्वं, ईषत्तापः, ईषत्तप्तता.—(Want of zeal) मन्दोत्साहः, मन्दोद्योगः, ईषच्चण्डता, ईषदुत्तापः, अनौत्सुक्यं, अतीक्ष्णता, उदासीनता.

To lull, *v. a.* (Compose to sleep) स्वप् (c. 10. स्वापयति -यितुं), संस्वप्, सम्प्रस्वप्.—(Quiet, soothe) शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, उपसान्त्व्, लल् (c. 10. लालयति -यितुं), प्रसद् (c. 10. -सादयति -यितुं), प्रसन्नीकृ.

To lull, *v. n.* (Subside, become calm) शम् (c. 4. शाम्यति, शमितुं), प्रशम्, उपशम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विरम् (c. 1. -रमति -रन्तुं), विगम् (c. 1. -गच्छति -गन्तुं), प्रसद् (c. 1. -सीदति -सत्तुं), सम्प्रसद्, विश्रम् (c. 4. -श्राम्यति -श्रमितुं), निर्वा (c. 2. -वाति -तुं), निर्वातीभू, विगतवातीभू, निर्वेगीभू, निवृत्तवायुः -युः -यु भू.

Lull, *s.* (Temporary quiet after storm) शान्तिः *f.*, वायुशान्तिः, निवृत्तिः *f.*, वायुनिवृत्तिः *f.*, निर्वातः, विरामः, विरतिः *f.*, वायुविरामः, विश्रामः, निर्वृतिः *f.*, शमः, उपशमः, विच्छेदः, वायुशमः, वातविच्छेदः, वायुस्थैर्य्यं.

Lullaby, *s.* बालकस्वापकरणार्थकं गीतं, बालस्वापकगीतं, लालनगीतं, शान्तिकगीतं, बालसान्त्वनगीतं, शिशुशमकगीतं.

Lulled, *p. p.* (Put to sleep) स्वापितः -ता -तं.—(Quieted) शमितः -ता -तं, शान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, प्रसादितः -ता -तं, उपगूढः -ढा -ढं.

Luller, *s.* शमकः, शान्तिकरः, शान्तिदः, सान्त्वनकृत्, लाली *m.* (न्).

Lumbago, *s.* गृध्रसी, ग्रध्रसी, कटिवातः, श्रोणिवातः, कटिवेदना.

Lumbal, lumbar, *a.* कटिसम्बन्धी -न्धिनी -न्धि (न्), श्रोणिसम्बन्धी &c.

Lumber, *s.* निरर्थकद्रव्यं, अनर्थकद्रव्यं, बाधकद्रव्यं, क्लेशकद्रव्यं, बाधकं, भारः, अतिभारः.

To lumber, *v. a.* निरर्थकद्रव्यैः पॄ (c. 10. पूरयति -यितुं), निरर्थकद्रव्याणि इतस्ततो विकॄ (c. 6. -किरति -करितुं -रीतुं) or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Lumber-room, *s.* निरर्थकद्रव्यकोष्ठः, बाधकद्रव्यकोष्ठकं.

Luminary, *s.* ज्योतिस् *n.*, ज्योतिष्मान् *m.* (त्), भास्वान् *m.* (त्), प्रतिभावान् *m.* (त्), खद्योतनः, भास्करः, प्रभाकरः, खोल्कः, गगणेचरः, खेचरः, खचरः, प्रकाशकपदार्थः, प्रकाशयुक्तपदार्थः, तेजोराशिः *m.*

Luminous, *a.* तेजोमयः -यी -यं, दीप्तिमान् -मती -मत् (त्), प्रदीप्तिमान् &c., प्रभावान् &c., भास्वान् &c., भानुमान् &c., प्रकाशयुक्तः -क्ता -क्तं, विशदः -दा -दं.—(Shining by its own light) स्वप्रकाशः -शा -शं; 'the sun is a luminous body,' सूर्य्यः स्वप्रकाशः.

Luminously, *adv.* तेजसा, दीप्त्या, प्रभया, स्वप्रकाशेन, विशदं.

Lump, *s.* पिण्डः -ण्डं, स्थूलं, घनः, स्थूलभागः, स्थूलांशः, गण्डः, गण्डका, शर्करा, घनौघः.—(Collection, heap) राशिः *m.*, ओघः, सङ्घः, पूगः, स्तोमः, पुञ्जः, वृन्दं, समूहः, सञ्चयः, सञ्चयः, स्तूपः, उत्करः.—(Gross) साकल्यं, समुदायः, समासः; 'a lump of flesh,' मांसपिण्डः, लोचकः; 'of earth,' मृत्पिण्डः; 'having lumps in the neck,' गण्डमाली -लिनी -लि (न्); 'in the lump,' साकल्येन.

To lump, *v. a.* पिण्डीकृ, पिण्ड् (c. 1. पिण्डते, c. 10. पिण्डयति -यितुं), एकपिण्डीकृ, राशीकृ, एकराशीकृ, ओघीकृ, एकौघीकृ, घनीकृ, स्थूलीकृ, वृन्दीकृ, पुञ्जीकृ, पूगीकृ, एकत्रीकृ.

Lumped, *p. p.* पिण्डीकृतः -ता -तं, पिण्डीभूतः -ता -तं, पिण्डितः -ता -तं.

Lumpish, *a.* स्थूलः -ला -लं, स्थूलस्वभावः -वा -वं, स्थूलबुद्धिः -द्धिः -द्धि.

Lumpishly, *adv.* स्थूलवत्, स्थौल्येन, सस्थौल्यं, स्थूलजनवत्, बुद्धिस्थौल्यात्.

Lumpishness, *s.* स्थूलता, स्थौल्यं, स्वभावस्थूलता, बुद्धिस्थौल्यं.

Lumpy, *a.* पिण्डी -ण्डिनी -ण्डि (न्), पिण्डितः -ता -तं, सपिण्डः -ण्डा -ण्डं, पिण्डलः -ला -लं, पिण्डीभूतः -ता -तं, पिण्डमयः -यी -यं, पिण्डपूर्णः -र्णा -र्णं.

Lunacy, *s.* उन्मत्तता, उन्मादः, उन्मादवायुः *m.*, बुद्धिभ्रमः, मतिभ्रमः, बुद्धिभ्रंशः, चित्तविभ्रमः, चित्तविप्लवः, बुद्धिविक्षेपः, बुद्धिक्षिप्तता, मदः, प्रामाद्यं, अपस्मारः.

Lunar, lunary, *a.* चान्द्रः -न्द्री -न्द्रं, चान्द्रिकः -की -कं, चान्द्रमसः -सी -सं, चन्द्रसम्बन्धी -न्धिनी -न्धि (न्), सौम्यः -म्या -म्यं, सौमिकः -की -कं, ऐन्दवः -वी -वं; 'lunar month,' चान्द्रमासः; 'lunar asterism or mansion,' नक्षत्रं, दाक्षायिणी; 'the twenty-seven lunar asterisms collectively,' दाक्षायिण्यः *f. pl.*, नक्षत्रचक्रं; 'lunar day,' तिथिः *m. f.* Of these lunar days there are fourteen for the waxing, and fourteen for the waning moon; the first lunar day is called प्रतिपद् *f.*, पक्षतिः -तीं *f.*; the day of new moon is called अमावसी, अमावस्या, अमा; 'the day of full moon,' पूर्णिमा, पौर्णिमा, पौर्णमासी, पूर्णेन्दुः *m.* The eleventh तिथि of each शुक्लपक्षः or waxing, and कृष्णपक्षः or waning moon, is regarded as sacred to Vishnu; and the following are the names given by Major Candy for the two एकादशी of each month: चैत्रः, 1. कामदा, 2. पापमोचनी; वैशाखः, 1. मोहिनी, 2. वरूथिनी; ज्येष्ठः, 1. निर्जला, 2. अपरा; आषाढः, 1. शयनी, 2. योगिनी; श्रावणः, 1. पुत्रदा, 2. कामिका; भाद्रः, 1. परिवर्त्तिनी, 2. अजा; आश्विनः, 1. पाशाङ्कुशा, 2. इन्दिरा; कार्त्तिकः, 1. बोधिनी, 2. रमा; मार्गशीर्षः, 1. मोक्षदा, 2. फलदा; पौषः, 1. प्रजावर्धिनी, 2. सफला; माघः, 1. जयदा, 2. षट्तिला; फाल्गुनः, 1. आमलकी, 2. विजया. The एकादशी of the शुक्लपक्षः of the months आषाढः and कार्त्तिकः are both particularly sacred. On the first, or शयनैकादशी, Vishnu goes to sleep, and on the second awakes. (Difference of solar and lunar days) क्षयतिथिः *f.*; 'inauspicious lunar day,' घाततिथिः *f.*, दग्धतिथिः *f.*; 'observance of the fasts and rites of the several lunar days,' तिथिपालनं; 'lunar eclipse,' चन्द्रग्रहणं; 'lunar measurement,' चान्द्रमानं; 'the lunar dynasty,' सोमवंशः.—(Resembling the moon). *See* Uniform.

Lunated, *a.* अर्द्धचन्द्राकारः -रा -रं, अर्द्धचन्द्राकृतिः -तिः -ति.

Lunatic, *a.* उन्मत्तः -त्ता -त्तं, उन्मादी -दिनी -दि (न्), उन्मादवान् -वती -वत् (त्), सोन्मादः -दा -दं, उन्मदः -दा -दं, विक्षिप्तः -प्ता -प्तं, विक्षिप्तबुद्धिः -द्धिः -द्धि, विक्षिप्तमनाः -नाः -नः (स्), हतबुद्धिः &c., भ्रष्टबुद्धिः &c., बुद्धिभ्रष्टः -ष्टा -ष्टं, नष्टेन्द्रियः -या -यं, वातुलः -ला -लं, अपस्मारी -रिणी &c.

Digitized by Google

Lunation, *s.* चन्द्रपरिवर्त्तनं, चन्द्रावृत्तिः *f.*, चन्द्रपरिवृत्तिः *f.*

Lunch, luncheon, *s.* उपाहारः, अल्पाहारः, लघ्वाहारः, लघुभोजनं, अल्पभोजनं, अर्द्धभोजनं, अर्द्धाहारः, अर्द्धाशनं, अर्द्धशनं, ग्रासः, ग्रासपरिमिताहारः.

Lune, *s.* (In geometry) चन्द्रखण्डं.—(Leash). *See* the word.

Lungs, *s.* फुप्फुसः, पुप्फुसः, पुस्फुसः, फुस्फुसः, रक्तफेनजः.

Luniform, *a.* चन्द्राकारः -रा -रं, चन्द्राकृतिः -तिः -ति, चन्द्ररूपः -पा -पं.

Lupine, *s.* द्विदलं, कलायः, शमीधान्यं, त्रिपुटः, सतीलकः.

Lurch, *s.* अकस्माद् एकपार्श्वे नौकापरिवर्त्तनं or नौकापरिवृत्तिः *f.*—(To leave a person in the lurch) दुर्दशाग्रस्तं कञ्चिज्जनं त्यज् (c. 1. त्यजति, त्यक्तुं) or परित्यज्.

To lurch, *v. n.* (Roll suddenly on one side) नाविकभाषायाम् ऊर्मिप्रलोठनाद् एकपार्श्वे अकस्माद् परिवृत् (c. 1. -वर्त्तते -र्त्तितुं).

Lurcher, *s.* (Poacher) कौटिकः, कौटिलिकः, कूटोपायेन वनपक्षिग्राहकः.—(Dog) कौटिकश्वा *m.* (न्), कौटिककुक्कुरः.

Lure, *s.* (For hawks) श्येनामिषं.—(Any thing which entices, allurement) प्रलोभनं, विलोभनं, आकर्षणं, आकृष्टिः *f.*, आमिषं, लोभः, आमिषदर्शनं.

To lure, *v. n.* (Call hawks by holding out a bait) आमिषदर्शनेन श्येनादीन् आकृष् (c. 1. -कर्षति -क्रष्टुं), आमिषं दर्शयित्वा श्येनान् आह्वे (c. 1. -ह्वयति -ह्वातुं) or श्येनाह्वानं कृ.—(Allure) प्रलुभ् (c. 10. -लोभयति -यितुं), लुभ्, आकृष्, मुह् (c. 10. मोहयति -यितुं), लल् (c. 10. लालयति -यितुं).

Lured, *p. p.* आकृष्टः -ष्टा -ष्टं, प्रलोभितः -ता -तं, लालितः -ता -तं.

Lurid, *a.* मलिनमुखः -खा -खी -खं, मलिनप्रभः -भा -भं, मलिनः -ना -नं, मलिनतेजाः -जाः -जः (स्), तमोवृतः -ता -तं, उग्रदर्शनः -ना -नं, घोररूपः -पा -पं, दुर्दिनग्रस्तः -स्ता -स्तं.

To lurk, *v. n.* निभृते or निभृतं or सुनिभृतं or प्रच्छन्नं स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), गुप्तः -प्ता -प्तं वृत् or भू, गुप् in pass. (गुप्यते).

Lurker, *s.* निभृतवर्त्ती *m.* (न्), प्रच्छन्नस्थायी *m.* (न्), निभृते स्थायी *m.*

Lurking-place, *s.* गुप्तिः *f.*, गुप्तिस्थानं, गोपनस्थानं, निभृतस्थानं, गूढस्थानं.

Luscious, *a.* अतिमधुरः -रा -रं, अतिमिष्टः -ष्टा -ष्टं, अतिस्वादुः -दुः -दुः -द

पङ्कवासी -सिनी &c., पङ्कजः -जा -जं.—(Pertaining to it) पङ्किलः -ला -लं, पङ्की -ङ्किनी &c., काईमः -मी -मं.—(Of the colour of mud) पङ्कवर्णः -र्णा -र्णं.

Lute, *s.* वीणा, वल्लकी, विपञ्ची -ञ्चिका, तन्त्री *m.* (न्), रुद्री, षट्कर्णः, सारङ्गी, शारङ्गी, पिनाकी; 'with seven strings,' परिवादिनी; 'the wire of a lute,' तन्त्री, तन्त्रं; 'the neck,' वीणादण्डः, प्रवालः; 'a piece of wood under the neck called the belly,' कक्कुभः, प्रसेवकः; 'the tie,' उपनाहः, वीणानुबन्धः, निबन्धनं; 'the whole body of the lute, comprising the gourd, neck, and belly,' कोलम्बकः; 'the quill or bow,' कोणः, परिवादः, शारिका, रणः.

To lute, *v. a.* पङ्केन लिप् (c. 6. लिम्पति, लेप्तुं), पङ्कलेपेन संलग्नीकृ.

Luter, lutist, *a.* वीणावादः -दकः. *See* Lutanist.

Lute-string, *s.* वीणातन्त्रं, तन्त्री, वीणातारः -रा.

Lutulent, *a.* पङ्किलः -ला -लं, पङ्की -ङ्किनी -ङ्कि (न्), काईमः -मी -मं.

To luxate, *v. a.* विसन्धीकृ, सन्धित्रोटनं कृ, अस्थिसन्धिं or अस्थिग्रन्थिं त्रुट् (c. 10. त्रोटयते -यितुं) or विसन्धा (c. 3. -दधाति -धातुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं), सन्धिभङ्गं कृ, सन्धिविश्लेषं कृ, सन्धिच्युतिं कृ.

Luxated, *p. p.* विसन्धितः -ता -तं, त्रुटितसन्धिः -न्धिः -न्धि, च्युतसन्धिः &c., सन्धिच्युतः -ता -तं, सन्धिविश्लिष्टः -ष्टा -ष्टं, स्थानभ्रष्टः -ष्टा -ष्टं.

Luxation, *s.* सन्धित्रोटनं, सन्धिविश्लेषः, सन्धिच्युतिः *f.*, विसन्धीकरणं.

Luxuriance, luxuriancy, *s.* अतिवृद्धिः *f.*, अधिकवृद्धिः *f.*, अतिवर्धनं, अत्यन्तवर्धनं, नितान्तवृद्धिः *f.*, वृद्धिबाहुल्यं, समृद्धिः *f.*, सामृद्धं, वृद्ध्याधिक्यं, अतिस्फीतिः *f.*, अतिस्फातिः *f.*, उद्रेकः, उत्सेकः, आप्यायनं.

Luxuriant, *a.* अतिवर्धिष्णुः -ष्णुः -ष्णु, अतिवर्धमानः -ना -नं, अतिवर्धितः -ता -तं, अतिवर्धी -र्धिनी -र्धि (न्), अतिवर्धनः -नी -नं, अतिस्फीतः -ता -तं, अतिपीनः -ना -नं, अतिसमृद्धः -द्धा -द्धं, अतिपुष्कलः -ला -लं, अतिबहुलः -ला -लं, अतिप्रचुरः -रा -रं, उत्सिक्तः -क्ता -क्तं, उद्रिक्तः -क्ता -क्तं, अतिरिक्तः -क्ता -क्तं.

Luxuriantly, *adv.* अतिवृद्धा, अतिवृद्धिपूर्व्वं, बाहुल्येन, अतिबहुलं, अतिबहुशस्, अतिप्रचुरं, अतिप्राचुर्य्येण, अतिपुष्कलं, अतिरिक्तं, उद्रेकेण.

To luxuriate, *v. n.* (Grow exuberantly) अत्यन्तं वृध् (c. 1. वर्धते -र्धितुं) or ऋध् (c. 5. ऋध्नोति, c. 4. ऋध्यति, अर्धितुं) or समृध् or प्यै (c. 1. प्यायते, प्यातुं) or आप्यै or स्फाय् (c. 1. स्फायते -यितुं), अतिबहुलीभू, अतिप्रचुरीभू, अतिवृद्धिम् इ (c. 2. एति -तुं), अतिस्फीतिम् इ.—(Live or feed luxuriously) अतिविलासेन or अतिसुखेन or सुखोपभोगेन वृत् (c. 1. वर्त्तते -र्त्तितुं) or चर् (c. 1. चरति -रितुं) or विह् (c. 1. -हरति -र्हर्तुं) or भम् (c. 4. भाम्यति, भमितुं).

Luxurious, *a.* (Contributing to luxury, furnished with luxuries) सुखभोगवान् -वती -वत् (त्), सुखभोगकरः -रा -रं, सुखभोगावहः -हा -हं, अतिसुखावहः -हा -हं, अतिसुखी -खिनी -खि (न्), सुखभोगसाधकः -का -कं, सुखभोगमयः -यी -यं, अतिसुखमयः &c., सुखोपभोगदः -दा -दं, सविलासः -सा -सं, विलासी -सिनी &c., विलासमयः &c., विलासयुक्तः -क्ता -क्तं, विलासमुखमयः &c.—(Indulging in luxury) विलासी -सिनी &c., विलासासक्तः -क्ता -क्तं, भोगासक्तः -क्ता -क्तं, सुखभोगासक्तः &c., सुखभोगपरायणः -णा -णं, विषयासक्तः -क्ता -क्तं, विषयोपभोगव्ययः -या -यं, वैषयिकः -की -कं, देहम्भरः -रा -रं, आत्मम्भरिः -रिः -रि, विषयोपसेवी -विनी &c., सुखसेवी &c.

Luxuriously, *adv.* विलासेन, सुखेन, अतिसुखेन, अतिविलासपूर्व्वं, सविलासं, सुखोपभोगेन, सुखोपभोगपूर्व्वं, सुखासक्तवत्, परमान्नोपभोगेन.

Luxuriousness, *s.* विलासित्वं -ता, सविलासत्वं, सुखोपभोगः, सुखभोगः, अतिसुखिता, सुखासक्तिः *f.*, सुखभोगासक्तिः *f.*, भोगासक्तिः *f.*, विषयभोगासक्तिः *f.*, विषयभोगः, विषयसेवा, विषयोपसेवा, सुखसेवा, सुखास्वादः.

Luxury, *s.* विलासः, विलासित्वं -ता. *See* Luxuriousness. (That which gratifies the senses or appetite) सुखं, सुखसाधनं, भोगः, भोगसाधनं, सौख्यं, सुखसाहित्यं, विषयसुखं, विषयसुखसाहित्यं, आमिषं, आमिषं.—(Dainty) स्वाद्वन्नं, परमान्नं, विशिष्टान्नं, उत्तमान्नं, मिष्टान्नं, भोजनविशेषः, विशिष्टभोजनं, विशिष्टामिषं.

Lye, *s.* क्षारोदकं, क्षारजलं, क्षारितजलं, क्षारसंसृष्टं जलं.

Lying, *part.* (Reclining) शायी -यिनी -यि (न्), शयः -या -यं, शयानः -ना -नं, शयितः -ता -तं, पतन् -तन्ती -तत् (त्), पतितः -ता -तं, संविष्टः -ष्टा -ष्टं, उपविष्टः -ष्टा -ष्टं; 'lying on a bed,' शयने संविष्टः -ष्टा -ष्टं; 'lying prostrate,' अपमूर्द्धशयः -या -यं, क्षिप्तदेहः -हा -हं; 'lying with the face upwards,' उत्तानशयः -या -यं.—(Act of lying) शयनं, पतनं, संवेशः.—(Lying in) प्रसवकालः, प्रसवावस्था, सूतिकालः, प्रसूतिकालः; 'lying-in chamber,' सूतिकागृहं, सूतिगृहं, सूतिकाभवनं, सूतिगृहं, सूतीगृहं, अरिष्टशय्या, अरिष्टं, गर्भः, अपवरकः.

Lying, *s.* (Telling falsehood) मृषावादः, मिथ्यावादः, मिथ्याभाषणं, मिथ्याकथनं, असत्यभाषणं, मृषाभाषिता -षणं, मृषाभिधानं, मिथ्योक्तिः *f.*, असत्योक्तिः *f.*, अनृतवादः.

Lying, *part.* or *a.* (Addicted to falsehood) मिथ्यावादी -दिनी -दि (न्), मृषावादी &c., असत्यवादी &c., अनृतवादी &c., असत्यभाषी -षिणी &c., अनृतभाषी &c., अनृतवाक् *m. f. n.* (च्), असत्यः -त्या -त्यं, निःसत्यः -त्या -त्यं.

Lymph, *s.* मेदस् *n.*, वसा, चर्म्माम्भस् *n.*, त्वगम्भस् *n.*, त्वगुदकं, चर्म्मोदकं, चर्म्मसारः, त्वक्सारः, असृक्करः, उदकधातुः *m.*

Lymphate, lymphated, *a.* उन्मत्तः -त्ता -त्तं, वातुलः -ला -लं.

Lymphatic, *s.* मेदोवहं, मेदोवाहिनी, चर्म्माम्भोवाहिनी, त्वक्सारवाहिनी, शरीरान्तर्गतजलवाहिनी.

Lynx, *s.* वनविडालः, वनमार्जारः, सूक्ष्मदृष्टिः क्षुद्रव्याघ्रविशेषः.

Lyre, *s.* वल्लकी, वीणा, विपञ्ची -ञ्चिका, तन्त्री. *See* lute.

Lyric, lyrical, *a.* वैणिकः -की -कं, वीणावादनसहितः -ता -तं.

Lyrist, *s.* वल्लकीवादकः, वल्लकीपाणिः *m.*, वैणिकः.

Lythrum, *s.* (A plant) अग्निज्वाला, सुभिक्षा, धातकी, धातृपुष्पिका.

M

Macaroon, *s.* बादाम्निर्म्मितो मिष्टपिष्टकविशेषः.

Macaw, macao, *s.* शुकः, कीरः, वक्रचञ्चुः *m.*, वक्रतुण्डः.

Mace, *s.* (Club, ensign of authority) वेत्रं, गदा, यष्टिः *m. f.*, यष्टिकः, दण्डः -ण्डं, मुषलः, मुसलः, लगुडः, लगुरः, मुद्गरः, वातङ्गिः *m.*—(The spice) जातीकोशं, जातिकोशं, जातीकोषं, जातिकोषं, जातिः -ती *f.*, जातिफलं, जातीफलं, फलं, जातीपत्री, जातिपत्रं, जातिपुष्पं, गुडत्वचं, राजभोग्यं.

Mace-bearer, *s.* वेत्रधरः, वेत्रधारी *m.* (न्), वेत्री *m.* (न्), वेत्रपाणिः *m.*, गदाधरः, गदी *m.* (न्), गदापाणिः *m.*, गदाहस्तः, दण्डधरः, दण्डी *m.* (न्), दण्डहस्तः लगुडहस्तः, दण्डधारी *m.*, दण्डिकः, दण्डभृत् *m.*, यष्टिग्रहः, याष्टीकः.

To macerate, *v. a.* (Make lean, waste) क्रश् (nom. क्रशयति -यितुं), कृशीकृ, परिकृशीकृ, क्षि in caus. (क्षपयति -यितुं), क्षीणं -णां -णं कृ, क्षीणीकृ, ग्लै in caus. (ग्लपयति -यितुं), मांसक्षयं कृ.—(Steep) जलसेकेन or जलप्लावनेन कोमलीकृ, चिरकालं जलेन समाप्लु (c. 10. -प्लावयति -यितुं) or जलसमाप्लुतं -तां कृ or जलसिक्तं -क्तां कृ or आर्द्रीकृ; 'macerate indigo,' नीलसन्धानं कृ, नीलपाचनं कृ.

Digitized by Google

MACERATED, *p.p.* (Made lean) कृशीकृतः -ता -तं, परिकृशः -शा -शं, क्षीणः -णा -णं.—(Steeped) जलसेकेन कोमलीकृतः -ता -तं or मृदूकृतः -ता -तं.

MACERATION, *s.* (Making thin, mortification) कृशीकरणं, क्षीणकरणं, कर्शनं, क्लेशकरणं, क्लेशदानं, मांसक्षयः, मांसशोषणं, शरीरपाकः, शरीरशोषः, कायक्लेशः, क्लेशः, कायकृच्छ्रं.—(Steeping) जलसेकेन कोमलीकरणं, आर्द्रीकरणं; 'of indigo,' नीलसन्धानं, नीलपाचनं.

To MACHINATE, *v. a.* परिकॢप् (c. 10. -कल्पयति -यितुं), उपायं कॢप् or घट् (c. 1. घटते -टितुं) or विधा (c. 3. -दधाति -धातुं) or अनुसन्धा or संविधा, मन्त्र् (c. 10. मन्त्रयति -यितुं), सम्प्रधृ (c. 10. -धारयति -यितुं), कल्पनां कृ, परिकल्पनां कृ, अनुसन्धानं कृ.—(Plot) द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं), कपटप्रबन्धं कृ, कपटप्रबन्धेन द्रोहं कृ.

MACHINATION, *s.* कल्पना, परिकल्पना -नं, कूटिः *f.*, मन्त्रणा, कुकल्पना, कुमन्त्रणा, कुयुक्तिः *f.*, कुप्रयुक्तिः *f.*, कुसृष्टिः *f.*, कुसङ्कल्पः, कपटप्रयोगः, कपटप्रबन्धः, घटनं -ना, कुघटना, विधानं, संविधानं, अनुसन्धानं, दुष्टकार्य्यसाधनार्थम् उपायचिन्तनं, द्रोहचिन्तनं; 'against the king,' राजद्रोहः, राजशरीराभिद्रोहः.

MACHINATOR, *s.* परिकल्पकः, परिकल्पनाकृत् *m.*, कुमन्त्रणाकृत्, कुकल्पनाकारी *m.* (न्), घटकः, उपायचिन्तकः, द्रोहचिन्तकः.

MACHINE, *s.* यन्त्रं, उपकरणं, विलासः, साधनं, साधनयन्त्रं.

MACHINERY, (Collective mechanism) यन्त्रसाहित्यं, यन्त्रशक्तिसाहित्यं, यान्त्रं, यान्त्रिकं, यन्त्रत्वं.—(Machines in general) यन्त्रसाम्यं, यन्त्रसमूहः, यन्त्रसमुदायः, यान्त्रं, यन्त्रविद्या.

MACHINIST, *s.* यन्त्रकारः -रकः, यन्त्रकृत् *m.*, यन्त्रनिर्म्माणशिल्पज्ञः. यन्त्रविद्यानिपुणः, यन्त्रविद्, कलाज्ञः.

MACILENCY, *s.* कृशता, कार्श्यं, कृशाङ्गता, क्षीणता, क्षामता, मांसक्षीणता,

MACILENT, *a.* कृशः -शा -शं, क्षीणः -णा -णं, क्षीणमांसः -सा -सं.

MACROCOSM, *s.* जगत्सृष्टिं, जगत्कृत्त्वं, विश्वजगत् *n.*, विश्वं, त्रिभुवनं.

MACROLOGY, *s.* दीर्घसूत्रता, अतिविस्तीर्णवाक्यं, अतिविस्तरः.

MACTATION, *s.* उपहारार्थं घातनं or निहननं or प्रमापणं, विशसनं.

MACULA, *s.* कलङ्कः, लाञ्छनं, चिह्नं, विन्दुः *m.*, कलुषं, अङ्कः.

To MACULATE, *v. a.* कलङ्क (nom. कलङ्कयति -यितुं), मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), चिह्न (nom. चिह्नयति -यितुं). लाञ्छ् (c. 1. लाञ्छति -ञ्छितुं).

MACULATE, MACULATED, *a.* कलङ्कितः -ता -तं, कलङ्की -ङ्किनी -ङ्कि (न्), कलुषितः -ता -तं, लाञ्छितः -ता -तं, चिह्नितः -ता -तं.

MAD, *a.* उन्मत्तः -त्ता -त्तं, उन्मादः -दा -दं, उन्मादवान् -वती -वत् (त्), उन्मादी -दिनी -दि (न्), सोन्मादः -दा -दं, उन्मदः -दा -दं, उन्मदिष्णुः -ष्णुः -ष्णु, मत्तः -त्ता -त्तं, वातुलः -ला -लं, वातूलः -ला -लं, प्रमदः -दा -दं, मून्मदः -दा -दं, मून्मादः -दा -दं, हतबुद्धिः -द्धिः -द्धि, नष्टबुद्धिः &c., विक्षिप्तबुद्धिः &c., भ्रष्टबुद्धिः &c., बुद्धिभ्रष्टः -ष्टा -ष्टं, हतज्ञानः -ना -नं, विप्लुतचित्तः -त्ता -त्तं, भ्रान्तचित्तः -त्ता -त्तं, विक्षिप्तमतिः -तिः -ति, विक्षिप्तः -प्ता -प्तं, मूढचेताः -ताः -तः (स्), नष्टेन्द्रियः -या -यं.—(Proceeding from madness) उन्मादप्रयुक्तः -क्ता -क्तं, उन्मादसूचकः -का -कं, बुद्धिभंशसूचकः -का -कं.—(Furious) मदोत्कटः -टा -टं, मदोद्यः -द्या -द्यं, कोपाकुलः -ला -लं, संरब्धः -ब्धा -ब्धं; 'a mad dog,' अलर्कः, अलकः; 'a mad fellow,' प्रमदजनः; 'to go mad,' उन्मद् (c. 4. -माद्यति -मदितुं), उन्मत्तीभू; 'drive mad,' उन्मद् (c. 10. -मादयति -यितुं).

MADAM, *s.* आर्य्या, आर्य्यिका, आर्य्यका, भवती, भाविनी.—(As a complimentary title) आर्य्ये voc. c., भवति voc. c.

MAD-BRAIN, MAD-BRAINED, *a.* विक्षिप्तबुद्धिः -द्धिः -द्धि, विप्लुतबुद्धिः &c.

MAD-CAP, *s.* प्रमदजनः, उन्मत्तजनः, साहसिकः, साहसकर्म्मी *m.* (न्).

To MADDEN, *v. a.* उन्मद् (c. 10. -मादयति -यितुं), मद्, उन्मत्तीकृ, मत्तीकृ.

To MADDEN, *v. n.* उन्मद् (c. 4. -माद्यति -मदितुं), उन्मत्तीभू, मत्तीभू, मद्.

MADDENED, *p. p.* उन्मादितः -ता -तं, उन्मत्तीकृतः -ता -तं, संरब्धः -ब्धा -ब्धं.

MADDENING, *a.* उन्मादकः -का -कं, उन्मादजनकः -का -कं, उन्मादन -ना -नं.

MADDER, *s.* (The plant) मञ्जिष्ठा, विकसा, विकषा, मण्डूकपर्णी, ताम्रवल्ली, योजनवल्ली, योजनपर्णी, भण्डीरी, भण्डिरी, भण्डी, जिङ्गी, समङ्गा, कालमेषिका, चित्राङ्गी, कालमक्षिका.

MADE, *p. p.* कृतः -ता -तं, निर्म्मितः -ता -तं, कल्पितः -ता -तं, प्रकल्पितः -ता -तं, रचितः -ता -तं, विरचितः -ता -तं, घटितः -ता -तं, विहितः -ता -तं; 'made of,' मयः -यी -यं, निर्म्मितः -ता -तं, घटितः -ता -तं in comp.; as, 'made of wood,' काष्ठमयः -यी -यं, काष्ठघटितः -ता -तं, काष्ठनिर्म्मितः -ता -तं; 'made known,' निवेदितः -ता -तं, आवेदितः -ता -तं, सूचितः -ता -तं, आख्यातः -ता -तं, ज्ञापितः -ता -तं, विज्ञापितः -ता -तं; 'made ready,' सज्जीकृतः -ता -तं; 'made favorable,' प्रसादीकृतः -ता -तं; 'made up, as the mind,' स्थिरीकृतः -ता -तं, स्थिरः -रा -रं; 'made up, reconciled,' सन्धितः -ता -तं, शान्तविवादः -दा -दं; 'made up, settled,' सिद्धः -द्धा -द्धं, साधितः -ता -तं, निष्पन्नः -न्ना -न्नं; 'made over,' सङ्क्रामितः -ता -तं, सञ्चारितः -ता -तं, प्रतिपादितः -ता -तं; 'made light of,' लघूकृतः -ता -तं; 'made good,' साधितः -ता -तं; 'made to do any thing,' expressed by the caus. pass. part.; as, 'made to pay,' दापितः -ता -तं; 'made to go,' गमितः -ता -तं; 'made to know,' ज्ञापितः -ता -तं; 'one who has made an agreement,' कृतसङ्केतः -ता -तं.

MADEFACTION, *s.* आर्द्रीकरणं, क्लेदनं, संक्लेदनं, समुन्दनं, क्लिन्नीकरणं.

To MADEFY, *v. a.* आर्द्रीकृ, क्लिद् (c. 10. क्लेदयति -यितुं), संक्लिद्, परिक्लिद्.

MADHOUSE, *s.* उन्मत्तालयः, उन्मत्तपालनगृहं, उन्मत्तस्थानं.

MADLY, *adv.* उन्मत्तवत्, सोन्मादं, मत्तवत्, वातुलवत्, चित्तविभ्रमात्, चित्तविप्लवात्, उन्मादेन, प्रामाद्यात्, प्रमदजनवत्.

MADMAN, *s.* उन्मत्तजनः, मत्तजनः, प्रमदजनः, उन्मादकः, वातुलः.

MADNESS, *s.* उन्मत्तता, उन्मादः, सोन्मादता, मत्तता, वातुलता, विक्षिप्तता, बुद्धिविक्षिप्तता, बुद्धिविक्षेपः, बुद्धिभ्रमः, मतिभ्रमः, चित्तविभ्रमः, चित्तविप्लवः, बुद्धिनाशः, बुद्धिभंशः, मतिभंशः, मदः, प्रमदता, प्रामाद्यं, उन्मादवायुः *m.*

MÆNORRHAGIA, *s.* (A disease) योन्यर्शस् *n.*, प्रदरः, प्रदरामयः.

MAGAZINE, *s.* (Storehouse) भाण्डागारं, भाण्डगृहं, कोषागारं.—(Of arms, ammunition, &c.) युद्धद्रव्यागारं, शस्त्रागारं, अस्त्रागारं, युद्धभाण्डागारं, आयुधागारं.—(A miscellany published periodically) काले काले प्रकाशितो नानाविषयसङ्ग्रहः or नानावस्तुविषयको ग्रन्थः.

MAGGOT, *s.* कीटः, कृमिः *m.*, अलिः *m.*, कीटाण्डजं.

MAGGOTY, *s.* कीटपूर्णः -र्णा -र्णं, कृमिपूर्णः -र्णा -र्णं, कृमिमयः -यी -यं.

MAGI, MAGIANS, *s. pl.* पूर्व्वदेशीयपण्डिताः *m. pl.*, प्राग्देशीयविद्वज्जनाः.

MAGIC, *s.* अभिचारः, अभिचारविद्या, माया, मायाविद्या, योगः, सम्प्रयोगः, वशक्रिया, मूलकर्म्म *n.* (न्), चित्रकर्म्म *n.*, जालं, जालकर्म्म *n.*, इन्द्रजालं, अभिमन्त्रणं, कार्म्मणं, कार्म्मणत्वं, पिशाचविद्या, कुविद्या, मोहः, कुहकः, कुसृतिः *f.*, संवदनं -ना, मन्त्रः, मन्त्रमोहनं.

MAGIC, MAGICAL, *a.* आभिचारिकः -की -कं, अभिचारिकः -की -कं, अभिचारी -रिणी -रि (न्), मायामयः -यी -यं, मायी -यिनी -यि (न्), मायावी -विनी &c., मायिकः -की -कं, ऐन्द्रजालिकः -की -कं, मोही -हिनी &c., कौसृतिकः -की -कं.

MAGICALLY, *adv.* अभिचारेण, अभिचारविद्यानुसारात्, मायया, सेन्द्रजालं.

Digitized by Google

MAGICIAN, *s.* अभिचारविद् *m.*, अभिचारविद्याज्ञः, मायाकारः, मायाकृत् *m.*, मायी *m.* (न्), मायिकः, मायावी *m.* (न्), मायाजीवी *m.* (न्), पिशाचविद्याज्ञः, अभिचारी *m.* (न्), चित्रकर्म्मविद् *m.*, मूलकर्म्मविद् *m.*, इन्द्रजालिकः, ऐन्द्रजालिकः, इन्द्रियमोही *m.* (न्), कुहकः, कुहककारः, कुहकजीवी *m.*, योगी *m.* (न्), योगेश्वरः, सम्प्रयोगी *m.*, कौसृतिकः, सिद्धः, चित्रकर्म्मी *m.* (न्).

MAGISTERIAL, *a.* (Pertaining to a magistrate or magistracy) धर्म्माधिकारसम्बन्धी -न्धिनी &c., धर्म्माध्यक्षसम्बन्धी &c., दण्डनीतिसम्बन्धी &c., आधिकारिकः -की -कं, वैनयिकः -की -कं.—(Pertaining to a master) प्रभुसम्बन्धी &c., स्वामिसम्बन्धी &c., प्रभुत्वविशिष्टः -ष्टा -ष्टं, आधिकारिकः -की -कं.—(Imperious) आज्ञापकः -का -कं, आदेशकः -का -कं, धृष्टः -ष्टा -ष्टं, शासनरूपः -पा -पं.

MAGISTERIALLY, *adv.* धर्म्माध्यक्षवत्, दण्डनायकवत्, अधिकारेण, शासनरूपेण.

MAGISTRACY, *s.* (Office of a magistrate) धर्म्माधिकारः -रित्वं, धर्म्माधिकरणं, धर्म्माधिपत्यं, धर्म्माध्यक्षता, न्यायाधिकारः, न्यायाधीशता.—(Body of magistrates) धर्म्माधिकारिणः *m. pl*, धर्म्माधिकारिगणः, धर्म्माध्यक्षगणः, धर्म्माध्यक्षसमूहः, न्यायाधीशगणः, न्यायाधीशमण्डलं.

MAGISTRATE, *s.* धर्म्माध्यक्षः, धर्म्माधिकारी *m.* (न्), न्यायाध्यक्षः, न्यायाधीशः, न्यायाधिपतिः *m.*, दण्डनायकः, प्राड्विवाकः, दण्डप्रणेता *m.* (तृ), नीतिशास्ता *m.* (स्तृ), विचारकर्त्ता *m.* (र्तृ), अक्षदर्शकः, आक्षपाटिकः.

MAGNANIMITY, *s.* माहात्म्यं, महात्मता -त्वं, माहात्म्यिकता, मनोमहत्त्वं, मतिमहत्त्वं, मनोमहिमा *m.* (न्), औदार्य्यं, उदारता, चित्तोदारता, उदारचित्तता, महेच्छा, महानुभावः, महाशयत्वं, मनःप्रौढता, महापुरुषत्वं, शौर्य्यं, वीरत्वं, प्रभावः, महिमा *m.*

MAGNANIMOUS, *a.* महात्मा -त्मा -त्म (न्), महामनाः -नाः -नः (स्), महामनस्कः -स्का -स्कं, माहात्मिकः -की -कं, महामतिः -तिः -ति, उदारचेताः -ताः -तः (स्), उदारमतिः -तिः -ति, उदारः -रा -रं, महानुभावः -वा -वं, महाशयः -या -यं, महेच्छः -च्छा -च्छं, उन्नतमनाः &c., शूरः -रा -रं.—(Proceeding from magnanimity) माहात्म्यपूर्व्वः -र्व्वा -र्व्वं, औदार्य्यपुरःसरः -रा -रं, माहात्म्ययोग्यः -ग्या -ग्यं.

MAGNANIMOUSLY, *adv.* औदार्य्येण, उदारवत्, माहात्म्येन, समाहात्म्यं, मनोमहत्त्वात्, मनोमहिम्ना, महानुभावात्, उदारचित्तत्वात्, महेच्छया, शूरवत्, महाशयवत्, उदारचेतसा.

MAGNATE, *s.* उत्कृष्टपदस्थः, उच्चपदस्थः, महाकुलीनः, राजन्यः.

MAGNESIA, *s.* अग्निपित्तनाशकं शुक्लचूर्णं or चूर्णाकारं मृत्तिकाभस्म *n.* (न्).

MAGNET, *s.* लोहचुम्बकः, लोहकान्तः -न्तं, अयस्कान्तः, चुम्बकः, चुम्बकप्रस्तरः, चुम्बकमणिः *m.*, अयस्कान्तमणिः *m.*, अयस्कान्तमणिशलाका, आकर्षः -र्षकः, आकर्षकमणिः *m.*, वैक्रान्तं, लौहाकर्षकप्रस्तरः.

MAGNETIC, MAGNETICAL, *a.* आकर्षिकः -का -कं, आकर्षकः &c., आकर्षणगुणः -णा -णं, आकर्षणधर्म्मकः -का -कं, लोहचुम्बनशीलः -ला -लं, लोहचुम्बनधर्म्मकः -का -कं, लोहचुम्बकसम्बन्धी -न्धिनी -न्धि (न्), लोहचुम्बकविषयः -या -यं; 'magnetic attraction,' आकर्षः.

MAGNETICALLY, *adv.* आकर्षणशक्तिद्वारेण, आकर्षणपूर्व्वं, लोहचुम्बनशक्त्या.

MAGNETISM, *s.* आकर्षणशक्तिः *f.*, लोहचुम्बनशक्तिः *f.*, लोहचुम्बनधर्म्मः, लोहचुम्बकगुणः, अयस्कान्तगुणः, अयस्कान्तमणिधर्म्मः.

To MAGNETIZE, *v. a.* आकर्षणशक्तिं or लोहचुम्बनशक्तिं दा (c. 3. ददाति, दातुं).

MAGNIFIC, MAGNIFICAL, *a.* महाप्रतापः -पा -पं. *See* MAGNIFICENT.

Mischievous, *a.* (Injurious) हिंसः -सा -सं, हिंसकः -का -कं, हिंसात्मकः -का -कं, हिंसालुः -लुः -लु, अपकारी -रिणी -रि (न्), अपकारकः -का -कं, आपकरः -री -रं, हिंसाशीलः -ला -लं, परहिंसाशीलः -ला -लं, हिंसारतः -ता -तं, क्षतिकरः -रा -रं, अनिष्टकरः -री -रं, नृशंसः -सा -सं, नृशंसवृत्तः -त्ता -त्तं, द्रोही -हिणी &c., घातुकः -का -कं, उपघातकः -का -कं, बाधकः -का -कं, अहितकारी &c., शार्वरः -री -रं, मीवरः -री -रं.—(Inclined to do harm) अपकारबुद्धिः -द्धिः -द्धि, क्षतिकरणशीलः -ला -लं, हिंसारुचिः -चिः -चि, बाधनशीलः &c., अपायशीलः &c., दूषणशीलः &c., दुष्टबुद्धिः &c., पापः -पा -पं.—(Noxious) शारुकः -का -कं, शरारुः -रुः -रु, दूषकः -का -कं, सबाधः -धा -धं, अहितः -ता -तं.—(Full of mischievous pranks) छान्दसः -सी -सं, कुचेष्टाप्रियः -या -यं, कुचेष्टितः -ता -तं, दुश्चेष्टितः -ता -तं, कितवः -वा -वं, व्यसनी -निनी &c., दुर्गुणी &c.; 'mischievous tricks,' कुचेष्टा, कुचेष्टितं, छन्दस् *n.*; 'mischievous person,' लोककण्टकः, पंक्तिदूषकः.

Mischievously, *adv.* हिंसया, सापकारं, अपकारेण, सापायं, क्षतिपूर्वं, सक्षतं, अपकारबुद्ध्या, अपकारशीलत्वात्, दुष्टबुद्ध्या, सबाधं.

Mischievousness, *s.* हिंसता, हिंसाशीलता, परिहिंसाशीलता, हिंसारुचिता, हिंसालुता, क्षतिकारिता, अपकारशीलता, अपकारः, अपकृतिः *f.*, अपकारिता, बाधकत्वं, द्रोहबुद्धित्वं, दूषकता, कैतवं, कैतवप्रयोगः.

Miscible, *a.* मिश्रणीयः -या -यं, मिश्रणयोग्यः -ग्या -ग्यं, मिश्रणार्हः -र्हा -र्हं, योजनीयः -या -यं, याव्यः -व्या -व्यं.

Miscomputation, *s.* मिथ्यागणना, असम्यग्गणनं, अन्यथागणनं, कुगणना.

To misconceive, *v. a.* or *n.* अन्यथा or मिथ्या बुध् (c. 1. बोधति -धितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or उपलभ् (c. 1. -लभते -लब्धुं) or अवगम् (c. 1. -गच्छति -गन्तुं), अन्यथार्थं ग्रह्, विपरीतार्थं ग्रह्, विपरीतबोधनं कृ, विपरीतार्थग्रहणं कृ, अर्थविपर्ययासं कृ.

Misconception, *s.* अन्यथाग्रहणं, मिथ्याग्रहणं, मिथ्यामतिः *f.*, मिथ्याबुद्धिः *f.*, विपरीतग्रहः -हणं, अन्यथाबोधः, अन्यथार्थबोधः, विपरीतबोधः, विपरीतार्थबोधः, विपरीतार्थग्रहणं, भ्रमः, भ्रान्तिः *f.*, अर्थविपर्ययासः.

Misconduct, *s.* (Ill-behaviour) दुश्चरितं, दुश्चेष्टितं, कुचेष्टितं, कुचरितं, अविनयः, अविनीतता, कुचर्या, कुचरितं, कुचेष्टितं, दुर्नीतं, दुर्नीतिः *f.*, दुर्णयः, दुराचारः, दुराचरणं, असदाचारः, असदाचरणं, कदाचारः, कुव्यवहारः, असद्व्यवहारः, कुकर्म्म *n.* (न्), कुकृत्यं, व्यभिचारः, अन्यथाचारः, अन्यथाचरणं, अपचारः, कुशीलता, अमर्य्यादा, मर्य्यादातिक्रमः.—(Ill-management) दुर्णयः -यनं, दुर्निवाहः, असन्निवाहः.

To misconduct, *v. a.* (Conduct badly) अन्यथा or अयुक्तं or दुष्टु or असम्यग् निर्वह् (c. 10. -वाहयति -यितुं) or प्रणी (c. 1. -णयति -णेतुं) or सम्प्रणी or प्रवृत् (c. 10.-वर्त्तयति -यितुं). दुर्निवाहं कृ, असन्निवाहं कृ, दुर्णयनं कृ.—(Misconduct one's self) अयुक्तं or असम्यक् चर् (c. 1. चरति -रितुं) or आचर् or वृत् (c. 1. वर्त्तते -र्त्तितुं), व्यभिचारं कृ, मर्य्यादातिक्रमं कृ.

Misconducted, *a.* दुर्विनीतः-ता -तं, दुश्चरितः-ता -तं. *See* Misbehaved.

Misconjecture, *s.* मिथ्यानुमानं, अन्यथानुमानं, मिथ्यावितर्कः.

To misconjecture, *v. n.* मिथ्या or अन्यथा अनुमा (c. 2. -माति -तुं) or तर्क् (c. 10. तर्कयति -यितुं) or वितर्क्, मिथ्यानुमानं कृ.

Misconstruction, *s.* अन्यथाग्रहणं, मिथ्याग्रहणं, विपरीतबोधनं, मिथ्याबोधनं, अयथार्थबोधनं, अन्यथाबोधनं, विपरीतग्रहणं, विपरीतार्थबोधः, अन्यथार्थबोधः, विपरीतार्थकरणं, अन्यथार्थकरणं, मिथ्यार्थव्याख्या.

To misconstrue, *v. a.* अन्यथा or मिथ्या अर्थं बुध् (c. 1. बोधति -धितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or उपलभ् (c. 1. -लभते -लब्धुं), मिथ्या अर्थं व्याख्या (c. 2. -ख्याति -तुं), विपरीतार्थं ग्रह्, विपरीतबोधनं कृ, विपरीतार्थग्रहणं कृ.

Miscreant, *a.* (Infidel) नास्तिकः.—(Vile wretch) पापीयान् *m.* (स्), पापिष्ठः, पापः, दुर्जनः, दुरात्मा *m.* (न्), दुर्वृत्तः, जाल्मः, खलः, नराधमः; 'daring miscreant,' साहसिकः.

Misdeed, *s.* कुकर्म्म *n.* (न्), दुष्कृतं, दुष्कर्म्म *n.*, अपकर्म्म *n.*, दुष्कृतिः *f.*, कुकृत्यं, अकर्म्म *n.*, कुक्रिया, पापकर्म्म *n.*, दुश्चरितं, कुचरितं, कुचेष्टितं, अपचारः.

To misdemean. *See To* misconduct, misbehave.

Misdemeanor, *s.* *See* Misconduct. (Minor offence) उपपातकं.

To misdirect, *v. a.* (Put in the wrong road) विमार्गे or विपरीतमार्गे दृश् (c. 10. दर्शयति -यितुं), विपथं प्रदृश्, अन्यथा मार्गे दृश् or उद्दिश् (c. 6. -दिशति -देष्टुं), विपरीतपथं प्रदिश्, विमार्गेप्रदर्शनं कृ.—(A letter) अन्यथा पत्रसंज्ञां लिख् (c. 6. लिखति, लेखितुं) or कृ.

Misdirection, *s.* विमार्गेप्रदर्शनं, विपरीतमार्गेदर्शनं, मिथ्योद्देशः.

Misdoer, *s.* कुकर्म्मकारी *m.* (न्), कुकर्म्मा *m.* (न्), पापकारी *m.* (न्), पापकर्त्री *m.* (र्त्तृ), पापकरः, पापकृत् *m.*, पापकर्म्मा *m.*, असत्कर्म्मा *m.*, अन्यायकारी *m.*, अन्यथाचारी *m.*, मन्दचरित्रः.

Misdoing, *s.* दुष्कृतं, कुकर्म्म *n.* (न्), पापं, अपराधः. *See* Misdeed.

To misemploy, *v. a.* कुप्रयोगं कृ, कुविनियोगं कृ, असत्प्रयोगं कृ, अन्यथा or असम्यक् प्रयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) or विनियुज्.

Misemployed *p.p.* कुप्रयुक्तः -क्ता -क्तं, कुविनियुक्तः &c., असम्यक्प्रयुक्तः &c.

Misemployment, *s.* कुप्रयोगः, कुविनियोगः, असत्प्रयोगः, असम्यक्प्रयोगः,

Digitized by Google

अन्यथाप्रयोगः, असदुपयोगः, कुव्यापारः, कुव्ययः, असद्व्ययः.

MISER, *s.* कृपणः, दृढमुष्टिः *m.*, गाढमुष्टिः, दानशत्रुः *m.*, दानविमुखः, दानपराङ्मुखः, अदानशीलः, अत्यागशीलः, खल्पव्ययी *m.* (न्), खल्पदाता *m.* (तृ), अदाता *m.*, मितम्पचः, किम्पचः, कदर्यः, मत्सरी *m.* (न्), व्ययशङ्कितः, व्ययपराङ्मुखः, अर्थपरः, धनलाभपरः.

MISERABLE, *a.* (Very unhappy) अतिदुःखी -खिनी -खि (न्), गाढदुःखान्वितः -ता -तं, अतिदुःखितः -ता -तं, अतिक्लेशी -शिनी &c., अतिक्लेशितः &c., अतिदुःखार्तः -र्ता -र्तं, अतिशोकार्तः -र्ता -र्तं, निरानन्दः -न्दा -न्दं, अतिदीनः -ना -नं, अनिर्वृत्तः -त्ता -त्तं, अनिर्वेशः -शा -शं; 'making one's self miserable,' आत्मद्रोही &c.—(Very poor or mean) अतिकृपणः -णा -णं, कृपणः -णा -णं, कुत्सितः -ता -तं, तुच्छः -च्छा -च्छं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं.—(Unfortunate) आपद्ग्रस्तः -स्ता -स्तं, विपद्ग्रस्तः &c., विपन्नः -न्ना -न्नं, आपन्नः -न्ना -न्नं, दुःखापन्नः &c., दुर्दैशाग्रस्तः &c., मन्दभाग्यः -ग्या -ग्यं, दुर्भाग्यः &c., दैवोपहतः -ता -तं, आपत्प्राप्तः -प्ता -प्तं; 'miserable wretch,' तपस्वी *m.* (न्).

MISERABLENESS, *s.* अतिदुःखिता, अतिदीनता, कृपणता, अतिकार्पण्यं.

MISERABLY, *adv.* कृपणं, अतिकृपणं, अतिकार्पण्येन, अतिदुःखितवत्.

MISERLY, *a.* कृपणः -णा -णं, कदर्यः -र्या -र्यं, दानविमुखः -खा -खं, दानपराङ्मुखः &c., दृढमुष्टिः -ष्टिः -ष्टि, गाढमुष्टिः -ष्टिः -ष्टि, अदानशीलः -ला -लं, खल्पव्ययी -यिनी -यि (न्), व्ययपराङ्मुखः -खा -खं, व्ययशङ्कितः -ता -तं, मितम्पचः -चा -चं, किम्पचः -चा -चं, किम्पचानः -ना -नं, अत्यागशीलः -ला -लं, अदाता -त्री -तृ (तृ), अनुदारः -रा -रं, मत्सरी -रिणी &c., अर्थपरः -रा -रं, धनलाभपरः -रा -रं, क्षुद्रः -द्रा -द्रं, कीकटः -टी -टं.

MISERY, *s.* (Great unhappiness, distress) अतिदुःखं, अतिशयदुःखं, दुःखं, क्लेशः, अतिक्लेशः, अतिशयक्लेशः, दुःखावस्था, दुःखदुःखं, गाढदुःखं, शोकः, गाढशोकः, दैन्यं, दीनता, अतिदीनता, विडम्बनं -ना, अनिर्वृतिः *f.*—(Extreme pain) अतिबाधा, अतिव्यथा, अतिशयतापः, परितापः, सन्तापः, अतिकृच्छ्रं, अतिवेदना.—(Calamity) दुःखं, व्यसनं, विपत्तिः *f.*, आपद् *f.*, विपद् *f.*, दुर्गतिः *f.*, दुर्दैशा, दौर्गत्यं, दुरवस्था, अपायः, अनिष्टं, अरिष्टं, निर्ऋतिः *f.*, व्यतिकरः.

MISFORTUNE, *s.* (Ill-fortune) दुर्दैवं, दुर्भाग्यं, दौर्भाग्यं, कुभाग्यं, दुर्गतिः *f.*, दौर्गत्यं, अशुभं, अकुशलं, अभद्रं, अमङ्गलं, दुरदृष्टं, दुर्जातं, अक्षीकं, अनयः, अनर्थः, आलक्ष्म्यं, निर्ऋतिः *f.*—(Calamity, disaster) आपद् *f.*, विपद्, विपत्तिः *f.*, व्यापद् *f.*, व्यसनं, अनिष्टं, अनिष्टपातः, अनिष्टापातः, अपायः, दुर्घटना, उत्पातः, अनयः, दुःखं, कष्टं, दुर्दैशा, दुरवस्था.—(Misfortune personified) अलक्ष्मीः *f.*, अवलक्ष्मीः *f.*, महामाया; 'fallen into misfortune,' आपदङ्गतः -ता -तं, विपदङ्गतः -ता -तं, आपत्प्राप्तः -प्ता -प्तं, आपन्नस्तः -स्ता -स्तं, अनयङ्गतः -ता -तं.

To MISGIVE, *v. a.* (Used in English with heart and the reciprocal pronoun, and expressed in Sanskrit by) शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, विशङ्क्, उद्विज् (c. 6. -विजते -जितुं), वेप् (c. 1. वेपते -पितुं), प्रवेप्, न विश्वस् (c. 2. -श्वसिति -तुं), न प्रती (c. 2. प्रत्येति -तुं rt. इ), सन्देहं कृ, संशयं कृ, विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं); 'my heart misgives me,' वेपते मे हृदयं, उद्विजते मे हृदयं.

MISGIVING, *s.* शङ्का, आशङ्का, सन्देहः, संशयः, विकल्पः, विकल्पितं, अविश्वासः, अप्रत्ययः, अप्रतीतिः *f.*; 'having misgivings,' साशङ्कः -ङ्का -ङ्कं, आशङ्कान्वितः -ता -तं, शङ्काशीलः -ला -लं.

MISGOTTEN, *a.* अन्यायोपार्जितः -ता -तं, अन्यायार्जितः &c., वृजिनार्जितः &c.

To MISGOVERN, *v. a.* असम्यक् पाल् (c. 10. पालयति -यितुं) or शास् (c. 2. शास्ति -सितुं), असम्यक्पालनं कृ, कुशासनं कृ, असम्यक्शासनं कृ, असत्पालनं कृ.

MISGOVERNED, *p. p.* असम्यक्पालितः -ता -तं, कुशासितः -ता -तं.

MISGOVERNMENT, MISGOVERNANCE, *s.* असम्यक्पालनं, असम्यक्शासनं, कुशासनं, कुशास्तिः *f.*, असत्पालनं, अन्यथाशासनं.

To MISGUIDE, *v. a.* विमार्गेण or उन्मार्गेण or कुमार्गेण नी (c. 1. नयति, नेतुं), विमार्गं दृश् (c. 10. दर्शयति -यितुं) or उद्दिश् (c. 6. -दिशति -देष्टुं), अन्यथा नी.

MISGUIDED, *a.* असम्यगुपदिष्टः -ष्टा -ष्टं, कुमन्त्रितः -ता -तं, कुशिक्षितः -ता -तं, दुर्विनीतः &c., सत्पथभ्रष्टः -ष्टा -ष्टं, सन्मार्गभ्रष्टः &c., मार्गभ्रष्टः &c.

MISHAP, *s.* विपद् *f.*, आपद् *f.*, विपत्तिः *f.*, दुर्गतिः *f.*, दौर्गत्यं, अनिष्टपातः, अनिष्टापातः, दुर्घटना, व्यसनं, दुर्जातं. *See* MISFORTUNE.

To MISINFER, *v. a.* मिथ्या or अन्यथा अनुमा (c. 2. -माति -तुं), मिथ्यानुमानं कृ.

To MISINFORM, *v. a.* अयथार्थं or अन्यथा in caus. (ज्ञापयति, ज्ञपयति -यितुं), मिथ्या or मृषा बुध् (c. 10. बोधयति -यितुं), असम्यग् अर्थं ख्या (c. 2. ख्याति -तुं) or आख्या.

MISINFORMED, *p. p.* मिथ्याज्ञप्तः -प्ता -प्तं, मिथ्याबोधितः &c., अयथार्थाज्ञप्तः &c.

To MISINTERPRET, *v. a.* अयथार्थं or अन्यथा व्याख्या (c. 2. -ख्याति -तुं), अन्यथार्थं व्याख्या.—(Understand in a wrong sense) अन्यथा or मिथ्या अर्थं बुध् (c. 1. बोधति -धितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), विपरीतार्थं ग्रह्, विपरीतार्थबोधनं कृ.

MISINTERPRETATION, *s.* अयथार्थव्याख्यानं, अन्यथार्थव्याख्यानं, अयथार्थबोधः, मिथ्याबोधनं, विपरीतबोधनं, अन्यथाग्रहणं.

MISINTERPRETED, *p. p.* अन्यथाव्याख्यातः -ता -तं, अन्यथाबोधितः -ता -तं.

To MISJUDGE, *v. a.* अन्यथा or मिथ्या विचर् (c. 10. -चारयति -यितुं) or विभावनं कृ.

MISJUDGEMENT, *s.* मिथ्याविचारः, अन्यथाविचारः, कुविवेचना, कुनिष्पत्तिः *f.*

MISLAID, *p. p.* स्थानभ्रष्टः -ष्टा -ष्टं, स्थानप्रभ्रष्टः -ष्टा -ष्टं, अस्थानवर्ती -र्तिनी -र्ति (न्), अस्थानः -ना -नं, नष्टः -ष्टा -ष्टं; 'a thing mislaid,' भ्रंशः, भ्रंश्मा.

To MISLAY, *v. a.* अस्थानीकृ, विस्थानीकृ, अपस्थानीकृ, अस्थाने कृ or धा (c. 3. दधाति, धातुं), अस्थाने धृ (c. 1. धरति, धर्तुं), नश् (c. 10. नाशयति -यितुं).

To MISLEAD, *v. a.* विमार्गेण or उन्मार्गेण नी (c. 1. नयति, नेतुं), विमार्गं or विपथं दृश् (c. 10. दर्शयति -यितुं) or उद्दिश् (c. 6. दिशति -देष्टुं) or प्रदिश्, अन्यथा or अयथार्थम् उपदिश् or निर्दिश् or आदिश् or शिक्ष् (c. 10. शिक्षयति -यितुं), कुशिक्षां कृ, कुनिर्देशं कृ, भ्रम् (c. 10. भ्रमयति -यितुं), भ्रान्तिं जन् (c. 10. जनयति -यितुं), विमार्गेनयनं कृ, विमार्गप्रदर्शनं कृ.

MISLED, *p. p.* भ्रान्तः -न्ता -न्तं, विमार्गगामी -मिनी -मि (न्), उन्मार्गगामी &c. सत्पथभ्रष्टः -ष्टा -ष्टं, सन्मार्गभ्रष्टः &c., उत्पथगामी &c., कुमार्गप्रवृत्तः -त्ता -त्तं, कुशिक्षितः -ता -तं, दुर्विनीतः -ता -तं.

To MISLIKE, *v. a.* *See To* DISLIKE.

To MISMANAGE, *v. a.* अन्यथा or अयुक्तं or असम्यग् निर्वह् (c. 10. -वाहयति -यितुं) or प्रणी (c. 1. -णयति -णेतुं) or सम्प्रणी or प्रवृत् (c. 10. -वर्त्तयति -यितुं) दुर्निर्वाहं कृ, असन्निर्वाहं कृ, दुर्णयनं कृ, दुर्णीतिं कृ, असन्नयनं कृ, दुराचरणं कृ.

MISMANAGED, *p. p.* दुर्णीतः -ता -तं, असम्यङ्नीतः -ता -तं, दुर्निर्वाहितः -ता -तं, कुनिर्वाहितः -ता -तं, कुप्रणीतः -ता -तं, कुप्रवर्त्तितः -ता -तं, दुर्घटितः -ता -तं, दुराचरितः -ता -तं.

MISMANAGEMENT, *s.* दर्णयः -यनं, दुर्णीतिः *f.*, कुनीतिः *f.*, कुनयनं, कुनि-

Digitized by Google

वाहः, दुर्निर्वाहः, दुर्निर्वहणं, दुर्गीतं, असन्निर्वाहः, कुप्रणयनं, कुप्रवर्त्तनं, दुराचरणं, अन्यथाचरणं, दुर्गीतृत्वं, असत्क्रिया.

To MISNAME, *v. a.* मिथ्यानाम कृ or दा, अन्यथानाम कृ. *See* MISCALL.

MISNOMER, *s.* मिथ्यानाम *n.* (न्), मिथ्याभिधानं, अन्यथानाम *n.*, अयोग्यनाम *n.*, असङ्गतनाम *n.*, अनुपयुक्तनाम *n.*, अनुपयुक्तसंज्ञा.

MISOGAMIST, *s.* विवाहद्वेषी *m.* -षिणी *f.*, उद्वाहद्वेषी &c., विवाहनिन्दकः.

MISOGAMY, *s.* विवाहद्वेषः, उद्वाहद्वेषः, विवाहनिन्दा, उद्वाहशत्रुता.

MISOGYNIST, *s.* स्त्रीद्वेषी *m.* (न्), स्त्रीद्वेष्टा *m.* (ष्टृ), स्त्रीनिन्दकः.

MISOGYNY, *s.* स्त्रीद्वेषः, स्त्रीनिन्दा, स्त्रीवैरं, स्त्रीशत्रुता.

To MISPLACE, *v. a.* अस्थानीकृ, विस्थानीकृ, अस्थाने कृ or धा (c. 3. दधाति, धातुं) or विधा, अनुपयुक्तपदे स्था in caus. (स्थापयति -यितुं), अन्यथा स्था, असम्यक् स्था or निधा (c. 3. -दधाति -धातुं) or प्रयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं).

MISPLACED, *p. p.* अस्थानः -ना -नं, अस्थानीकृतः -ता -तं, अस्थाने निहितः -ता -तं or विहितः -ता -तं, अनुपयुक्तपदे स्थापितः -ता -तं.

MISPRINT, *s.* अशुद्धं, अशुद्धिः *f.*, अशोधनं, अशुद्धमुद्रा, पुस्तकमुद्राङ्कने दोषः, मुद्राङ्कनदोषः.

To MISPRINT, *v. a.* अशुद्धमुद्रां कृ, अशुद्धमुद्राङ्कनं कृ, मुद्राङ्कनदोषं कृ, अशुद्धमुद्रया अङ्क् (c. 10. अङ्कयति -यितुं), अशुद्धमुद्रीकृ.

MISPRINTED, *p. p.* अशुद्धमुद्राङ्कितः -ता -तं, अशुद्धमुद्रीकृतः -ता -तं.

MISPRISION, *s.* अपराधगोपनं.—(Of treason) राजाभिद्रोहगोपनं.

To MISPRONOUNCE, *v. a.* अशुद्धोच्चारणं कृ, अशुद्धम् उच्चर् (c. 10. -चारयति -यितुं).

MISPRONUNCIATION, *s.* अशुद्धोच्चारणं, असदुच्चारणं, अन्यथोच्चारणं.

MISPROPORTIONED, *a.* विषमप्रमाणः -णा -णं, असमप्रमाणकः -का -कं.

MISQUOTATION, *s.* मिथ्यावतरणं, अन्यथावतरणं, अयथोद्धारः.

To MISQUOTE, *v. a.* अन्यथा or अयथार्थम् अवतॄ (c. 10. -तारयति -यितुं), अयथार्थतो वाक्यम् उद्धृ (c. 1. -हरति -हर्त्तुं), अयथार्थवाक्यम् उपन्यस् (c. 4. -अस्यति -असितुं).

MISREPORT *s.* मिथ्याकथनं, मिथ्यानिवेदनं, अन्यथानिवेदनं, अयथार्थोख्यानं, मिथ्याख्यापनं, मृषाकथा.

To MISREPORT, *v. a.* मिथ्या or अन्यथा कथ् (c. 10. कथयति -यितुं) or निविद् (c. 10. -वेदयति -यितुं), अयथार्थम् आख्या (c. 2. -ख्याति -तुं, caus. ख्यापयति -यितुं).

To MISREPRESENT, *v. a.* मिथ्या or अन्यथा or मृषा कथ् (c. 10. कथयति -यितुं) or आविद् (c. 10. -वेदयति -यितुं) or निविद्, अयथार्थतः ख्या (c. 2. -ख्याति -तुं, caus. ख्यापयति -यितुं), असम्यक् ख्या, असत्यं वर्ण् (c. 10. वर्णयति -यितुं) or विवृ (c. 5. -वृणोति -वरितुं -रीतुं), अर्थं साचीकृ or वक्रीकृ.

MISREPRESENTATION, *s.* मिथ्याकथनं, अन्यथाकथनं, अन्यथाख्यापनं, अन्यथानिवेदनं, मिथ्यानिवेदनं, अयथार्थख्यापनं, मिथ्यावादः, मृषावादः, अन्यथाविवरणं, मिथ्यावर्णनं, असत्यवर्णना, साचीकरणं, साचीकृतं, अर्थवक्रीकरणं.

MISRULE, *s.* असम्यक्पालनं, असम्यक्शासनं, कुशासनं, कुशासितिः *f.*, असत्पालनं, दुःशासनं, दुर्गीतिः *f.*

To MISS, *v. a.* (Fail of reaching, not to hit) लक्ष्यम् अभिसन्धाय अपराध् (c. 4. -राध्यति, c. 5. -राप्नोति -राद्धुं) or अपराधं कृ or भ्रान्तिं कृ, भ्रमं कृ; 'one who misses the mark in archery,' अपराद्धृषकः, लक्ष्यच्युतसायकः.—(Fail of finding, miss the way) भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), मार्गात् or पथात् भ्रंश् (c. 4. -भ्रश्यति -भ्रंशितुं) or भ्रंश्, मार्गाद् विचल् (c. 1. -चलति -लितुं), मार्गभ्रंशं कृ.—(Fail of obtaining) न प्राप् (c. 5. -आप्नोति -आप्तुं), न लभ् (c. 1. लभते, लब्धुं), न आसद् (c. 10. -सादयति -यितुं), अपराध्.—(Discover to be wanting or lost) नष्टं or स्थानभ्रष्टं किञ्चिद् ज्ञा (c. 9. जानाति ज्ञातुं), नष्टं मन् (c. 4. मन्यते, मन्तुं), नाशं or अभावं or अदर्शनं ज्ञा.—(Feel the want of, regret the absence of) उत्कण्ठ् (c. 1. -कण्ठते -ण्ठितुं), उत्सुक (nom. उत्सुकायते), उन्मनस् (nom. उन्मनायते), उत्कण्ठां कृ, उत्कलिकां कृ.—(Omit) हा (c. 3. जहाति, हातुं), अपाहा, अपहा, विहा, त्यज् (c. 1. त्यजति, त्यक्तुं), अपास् (c. 4. -अस्यति -असितुं), विसृज् (c. 6. -सृजति -स्रष्टुं), वृज् (c. 10. वर्जयति -यितुं), परिवृज्.—(Lose) हा in pass. (हीयते) with instr. or abl. c., भ्रंश् with abl. c. *See To* LOSE.

To MISS, *v. n.* अपराध् (c. 4. -राध्यति -ते -राद्धुं), भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), अपराद्धः -द्धा -द्धं भू, अपरार्धं कृ, भ्रमं कृ.—(Not to succeed, miscarry) न सिध् (c. 4. सिध्यति, सेद्धुं), न सम्पद् (c. 4. -पद्यते -पत्तुं), सिद्धिं न प्राप् (c. 5. -आप्नोति -आप्तुं) or गम् (c. 1. गच्छति, गन्तुं), असिद्धः -द्धा -द्धं भू.

MISS, *s.* (Error) भ्रमः, भ्रान्तिः *f.*, अपराधः, भंशः, दोषः, भेषः, उत्क्रमः; 'a miss is as good as a mile,' अन्तरं महदन्तरं.—(Loss, want) नाशः, हानिः *f.*, अभावः, असम्भवः, अविषयः, अदर्शनं, विरहः.—(Young girl) कुलकन्या, कुलीनकन्या, कुलकुमारी.

MISSED, *p. p.* अपराद्धः -द्धा -द्धं, कृतापराधः -धा -धं, भ्रान्तः -न्ता -न्तं.

To MIS-SEND, *v. a.* अन्यथा or वृथा प्रेर् (c. 10. प्रेरयति -यितुं) or प्रेष् (c. 10. प्रेषयति -यितुं).

MIS-SHAPED, MIS-SHAPEN, *a.* विरूपः -पा -पी -पं, अपरूपः &c., कुरूपः &c., अरूपः &c., विकृताकारः -रा -रं, विकृताङ्गः -ङ्गी -ङ्गं, विकृताकृतिः -तिः -ति, व्यङ्गः -ङ्गी -ङ्गं, व्याकारः &c.

MISSILE, *a.* क्षेपणीयः -या -यं, हस्तक्षेपणीयः &c., हस्तक्षेप्यः -प्या -प्यं, पाणिमोचनीयः -या -यं, क्षिपण्युः -ण्वी -ण्यु, दूरात् क्षेपणीयः &c., दूरवेधी -धिनी -धि (न्).

MISSILE, *s.* (Weapon) अस्त्रं, क्षिपणिः *m.*, करमुक्तं, पाणिमुक्तं, मुक्तकं, क्षेप्यायुधं.—(Circular one) चक्रं.

MISSING, *part.* or *a.* (Regretting the absence of) उत्कण्ठितः -ता -तं, उत्सुकः -का -कं, उन्मनाः -नाः -नः (स्), उत्कलितः -ता -तं.—(Lost, stray, absent from its place) नष्टः -ष्टा -ष्टं, भ्रष्टः -ष्टा -ष्टं, स्थानभ्रष्टः &c., प्रभ्रष्टः &c., स्थानप्रभ्रष्टः &c., स्थानच्युतः -ता -तं, प्रच्युतः &c., तिरोहितः -ता -तं, अदृष्टः -ष्टा -ष्टं.

MISSION, *s.* (Sending, commission) प्रेरणं, प्रेषणं, नियोजनं, प्रयोजनं; 'sending on a message,' प्रतिशासनं.—(Body of persons sent) प्रेरितसमूहः, प्रेरितजनसमूहः, प्रेरितगणः, नियुक्तजनसमूहः; 'for religious purposes,' धर्म्मप्रचारणार्थं प्रेरितजनाः *m. pl.*—(State of being sent) प्रेरितत्वं, प्रेषितत्वं, दूतत्वं, दौत्यं.

MISSIONARY, *s.* धर्म्मसन्देशहरः, धर्म्मसंवादकथकः, धर्म्मप्रचारणार्थं प्रेरितः, ख्रीष्टधर्म्मघोषणार्थं प्रेरितः.

MISSIVE, *a.* (Sent) प्रेरितः -ता -तं, प्रेषितः -ता -तं.—(Thrown) क्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं, मुक्तः -क्ता -क्तं; 'weapon,' क्षिपणिः *m.*, पाणिमुक्तं.—(Messenger) सन्देशहरः, वार्त्ताहरः, सञ्चारकः.—(Message) सन्देशः, दूत्यं, दौत्यं.

To MIS-SPEAK, *v. a.* or *n.* मिथ्या or अन्यथा वद् (c. 1. वदति -दितुं), अयथार्थं वद्.

To MIS-SPELL, *v. a.* अक्षरव्यत्ययं कृ, अक्षरव्यत्यासं कृ, अक्षरविपर्य्यासं कृ.

MIS-SPELLING, *s.* अक्षरव्यत्ययः, अक्षरव्यत्यासः, अक्षरविपर्य्यासः, अवाक्षरं.

Digitized by Google

To MIS-SPEND, *v. a.* अपात्रे or अस्थाने व्यय् (c. 1. व्ययति, c. 10. व्यययति -यितुं, rt. इ) or व्ययं कृ or विनियुज् (c. 7. -युंक्ते -योक्तुं), कुव्ययं कृ, असद्व्ययं कृ, अन्यथाव्ययं कृ, अपात्रव्ययं कृ, कुविनियोगं कृ, अयुक्तव्ययं कृ, दुर्व्ययं कृ.

MIS-SPENT, *p. p.* दुर्व्ययितः -ता -तं, कुव्ययितः -ता -तं, अन्यथाव्ययितः &c., अपव्ययितः &c., कुविनियुक्तः -क्ता -क्तं, अपचितः -ता -तं.

To MIS-STATE, *v. a.* मिथ्या or अन्यथा कथ् (c. 10. कथयति -यितुं) or ज्ञा (c. 10. ज्ञापयति, ज्ञपयति -यितुं) or विज्ञा or आविद् (c. 10. -वेदयति -यितुं), अयथार्थतः ख्या (c. 2. ख्याति -तुं) or विवृ (c. 5. -वृणोति -वरितुं -रीतुं), अर्थं साचीकृ or वक्रीकृ.

MIS-STATED, *p. p.* मिथ्याकथितः -ता -तं, मिथ्याख्यातः -ता -तं, साचीकृतः -ता -तं.

MIS-STATEMENT, *s.* मिथ्याकथनं, मिथ्यावादः, मिथ्योक्तिः *f.*, अन्यथाकथनं, अन्यथानिवेदनं, मिथ्याविज्ञप्तिः *f.*, अयथार्थविज्ञापनं, मिथ्याविवरणं, साचीकरणं, साचीकृतं.

MIST, *s.* धूमिका, धूपिका, धूलिका, शीकरः, तुषारः, खवाष्पः, मृगतृष्णा -ष्णिका -तृषा, मृगतृट् *f.* (ष्), कुज्झटिका, कुज्झटिः *f.* -टी -टिका, हिमज्झतिः *f.*, कुहेडिका, कुहेडी, कुहेलिका, कुहेली, कूहा, मेघधूमः, रुभेटिः *f.*, धूमसंहिषी.

To MISTAKE, *v. a.* (Take wrong, misunderstand) मिथ्या or अन्यथा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), विपरीतं ग्रह् or उपलभ् (c. 1. -लभते -लब्धुं), विपरीतार्थं ग्रह्, अन्यथा or मिथ्या बुध् (c. 1. बोधति -धितुं), मिथ्या ज्ञा (c. 9. जानाति, ज्ञातुं) or मन् (c. 4. मन्यते, मन्तुं).

To MISTAKE, *v. n.* (Err, make a mistake) भ्रम् (c. 4. भाम्यति, भमितुं), विभ्रम्, भ्रमं कृ, भ्रान्तिं कृ, अपराध् (c. 4. -राध्यति, c. 5. -राभ्नोति -राद्धुं), अपराधं कृ, प्रमद् (c. 4. -माद्यति -मदितुं), प्रमादं कृ, दोषं कृ, मुह् (c. 4. मुह्यति, मोहितुं), मिथ्यामतिं कृ.

MISTAKE, *s.* भ्रमः, भ्रान्तिः *f.*, मतिभ्रमः, मतिभ्रान्तिः *f.*, मिथ्यामतिः *f.*, मिथ्याबुद्धिः *f.*, विभ्रमः, मतिविभ्रमः, अपराधः, प्रमादः, दोषः, मोहः, व्यामोहः, परिभ्रमः, भामः, विकल्पः, अनवधानता, विवर्त्तः, विचिकित्सा.

MISTAKEN, *p. p.* (In error) भ्रान्तः -न्ता -न्तं, भ्रान्तिमान् -मती -मत् (त्), अपराद्धः -द्धा -द्धं, सापराधः -धा -धं, प्रमादी -दिनी -दि (न्), प्रमादवान् &c., सन्दिग्धः -ग्धा -ग्धं.—(Erroneous) अयथार्थः -र्था -र्थं, अशुद्धः -द्धा -द्धं, मिथ्या or मृषा in comp.; 'a mistaken opinion,' मिथ्यामतिः *f.*

MISTER, *s.* (Title of gentlemen) आर्य्यः or expressed by श्री prefixed.

MIS-TIMED, *a.* अकालिकः -की -कं. *See* ILL-TIMED.

MISTINESS, *s.* सशीकरता, सतुषारता, तुषाराच्छन्नता, शीकराच्छन्नता.

MISTION, *s.* मिश्रणं, सम्मिश्रणं, संसर्गः, सम्पर्कः, योगः.

To MISTLE, *v. n.* शीकर (nom. शीकरायते), शीक् (c. 1. शीकते -कितुं).

MISTLETOE, *s.* वृक्षरुहा, तरुरुहा, तरुभुक् *f.* (ज्), वृक्षादनी, वृक्षाश्रया.

To MISTRANSLATE, *v. a.* अयथार्थभाषान्तरं कृ, अन्यथा भाषान्तरं कृ.

MISTRANSLATION, *s.* अयथार्थभाषान्तरं, मिथ्याभाषान्तरं.

MISTRESS, *s.* (Opposed to servant, a woman who governs) स्वामिनी, सेव्या, अधिष्ठात्री, ईश्वरी, शासित्री, शास्त्री, अध्यक्षा, कर्त्री.—(Of a family or house) गृहिणी, गेहिनी, गृहस्वामिनी, कुटुम्बिनी, कौटुम्बिकी.—(Proprietress) स्वामिनी, ईश्वरी, अधिकारिणी.—(Female teacher) अध्यापिका, उपदेशिनी, उपदेशिका, उपदेष्ट्री, शिक्षिका, आचार्य्या.—(Woman beloved, sweetheart) प्रिया, प्रियतमा, वल्लभा, कान्ता, दयिता, कामिनी, नायिका, वनिता, प्रमदा; 'an offended mistress,' मानिनी.—(Concubine) उपस्त्री, उपपत्नी, भोग्या स्त्री, भुजिष्या, दासी, अवरुद्धा.—(Well-skilled) कुशला, निपुणा, वेत्त्री.

MISTRUST, *s.* अविश्वासः, अप्रत्ययः, अप्रतीतिः *f.*, शङ्का, आशङ्का, सन्देहः, निह्नवः, विश्वासाभावः.

To MISTRUST, *v. a.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, अभिशङ्क्, परिशङ्क्, न विश्वस् (c. 2. -श्वसिति -तुं), न प्रती (c. 2. प्रत्येति -तुं).

MISTRUSTFUL, *a.* अविश्वासी -सिनी -सि (न्), अप्रत्ययी -यिनी &c., शङ्की -ङ्किनी &c., शङ्कान्वितः -ता -तं, साशङ्कः -ङ्का -ङ्कं, शङ्काशीलः -ला -लं, आशङ्की &c., शङ्कितः -ता -तं, आशङ्कितः -ता -तं, सन्देही &c., संशयी &c.

MISTRUSTFULLY, *adv.* अविश्वासेन, शङ्कया, सशङ्कं, साशङ्कं, शङ्कापूर्व्वं.

MISTRUSTFULNESS, *s.* अविश्वासित्वं, अप्रतीतिः *f.*, सशङ्कत्वं, आशङ्का.

MISTY, *a.* सशीकरः -रा -रं, सतुषारः -रा -रं, शीकरीयः -या -यं, शीकरौघः -घा -घं, शीकरव्याप्तः -प्ता -प्तं, तुषारव्याप्तः -प्ता -प्तं, तुषारमयः -यी -यं, सधूमिकः -का -कं, धूमिकावृतः -ता -तं, शीकरावृतः -ता -तं.

To MISUNDERSTAND, *v. a.* अन्यथा ग्रह् (c. 9. गृह्णाति -ग्रहीतुं) or बुध् (c. 1. बोधति -धितुं), मिथ्या or मृषा or विपरीतम् अर्थं ग्रह् or उपलभ् (c. 1. -लभते -लब्धुं) or अवगम् (c. 1. -गच्छति -गन्तुं), विपरीतार्थं ग्रह्, अयथार्थतो ज्ञा (c. 9. जानाति, ज्ञातुं) or विज्ञा, अर्थविपर्य्यासं कृ.

MISUNDERSTANDING, *s.* (Mistake of the meaning) मिथ्याग्रहणं, अन्यथाग्रहणं, विपरीतग्रहणं, अन्यथार्थग्रहणं, विपरीतार्थग्रहणं, अन्यथाबोधः, मिथ्याबोधः, मिथ्यामतिः *f.*, मिथ्योपलब्धिः *f.*, विपरीतबुद्धिः *f.*, अयथार्थबोधः, अयथार्थग्रहणं, भ्रमः, भ्रान्तिः *f.*, मतिभ्रमः.—(Disagreement) वैमत्यं, विमतिः *f.*, मतिभेदः, असम्मतिः *f.*, विसंवादः, द्वैधं, विप्रयोगः, वैमनस्यं, मतिविपर्य्ययः.

MISUNDERSTOOD, *p. p.* मिथ्यावगतः -ता -तं, मिथ्योपलब्धः -ब्धा -ब्धं, मिथ्यामतः -ता -तं.

MISUSAGE, MISUSE, *s.* कुव्यवहारः, दुर्व्यवहारः, कुप्रयोगः, मिथ्याप्रयोगः, असत्प्रयोगः, असम्यक्प्रयोगः, अन्यथाप्रयोगः, असदुपयोगः, कुव्यापारः, असदुपभोगः, कुविनियोगः, असद्विनियोगः, असाधुविनियोगः, व्यर्थीकरणं, असदभ्यासः, अयुक्तव्यवहारः.

To MISUSE, *v. a.* अन्यथा or मिथ्या or वृथा or असम्यक् प्रयुज् (c. 7. -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं) or उपयुज् or विनियुज्, कुप्रयोगं कृ, असत्प्रयोगं कृ, अयुक्तं व्यवह् (c. 10. -हारयति -यितुं), कुव्यवहारं कृ, दुर्व्यवहारं कृ, अनुचितम् अभ्यस् (c. 4. -अस्यति -असितुं), कुव्यापारं कृ, व्यर्थीकृ, कदर्थीकृ, वृथाकृ.

MISUSED, *p. p.* कुप्रयुक्तः -क्ता -क्तं, कुविनियुक्तः &c., असम्यगुपयोजितः -ता -तं, कुव्यवहृतः -ता -तं, कुव्यवहारितः -ता -तं, मिथ्याप्रयुक्तः &c., कदर्थीकृतः &c.

MITE, *s.* (Small piece of money) कपर्दकः, कपर्दिका, काकिणी, काकिनी, वराटकः, धनलवः, धनलेशः.—(Particle of any thing) कणः, कणिका, लवः, लेशः.

MITER, *s.* धर्म्माधिपतिकिरीटः, महाधर्म्माध्यक्षमुकुटं.

MITHRIDATE, *s.* विषभञ्जनं, विषनाशनं, विषघ्नं, विषापहारकं.

MITIGABLE, *a.* शमनीयः -या -यं, प्रशमनीयः -या -यं, शाम्यः -म्या -म्यं.

MITIGANT, *a.* शमकः -का -कं, प्रशमनः -ना -नं, शान्तिकः -की -कं, शान्तिदः -दा -दं, शान्तिकरः -रा -रं, उपशायी -यिनी -यि (न्).

To MITIGATE, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, शान्तिं दा, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्, परिशान्त्व्, अभिशान्त्व्.—(Alleviate pain) दुःखं हृ (c. 1. हरति, हर्त्तुं) or शम्.—(Lighten) लघ (nom. लघयति -यितुं), लघूकृ, मृदूकृ.—(Diminish) न्यूनीकृ, अल्पीकृ, कन (nom. कनयति -यितुं).

Digitized by Google

MITIGATED, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशमितः &c., उपशान्तः &c., मृदूकृतः -ता -तं, लघूकृतः -ता -तं; 'to be mitigated,' शम् (c. 4. शाम्यति, शमितुं).

MITIGATION, *s.* शान्तिः *f.*, शमनं, प्रशमनं, उपशान्तिः, प्रशान्तिः *f.*, उपशमनं, शमः, उपशमः, मृदूकरणं, लघूकरणं, लाघवं, न्यूनीकरणं, न्यूनता, सान्त्वनं -ना; 'of a curse,' उच्चापः.

MITIGATIVE, MITIGATOR. *See* MITIGANT.

MITRE. *See* MITER, *s.*

To MIX, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, व्यामिश्र्, विमिश्र्, मिश्रीकृ, सम्मिश्रीकृ, संयुज् (c. 7. -युनक्ति -योक्तुं -योजयति -यितुं), संसृज् (c. 6. -सृजति -स्रष्टुं), सम्पृच् (c. 7. -पृणक्ति -पर्चितुं), सङ्कृ (c. 6. -किरति -करितुं -रीतुं), एकीकृ, एकत्र कृ, संसर्गं कृ, संसृष्टं -ष्टां कृ, व्यतिकरं कृ, सम्मेलनं कृ.—(Mix confusedly) सङ्करीकृ, सङ्कुलीकृ, सङ्कीर्णीकृ, सङ्कृ; 'mix ingredients,' योगं कृ, संस्कारं कृ, प्रक्षेपं कृ.

To MIX, *v. n.* मिश्रीभू, सम्मिश्रीभू, व्यामिश्रीभू, मिल् (c. 6. मिलति, मेलितुं), सम्मिल् सङ्कृ in pass. (-क्रीयते), संयुज् in pass., (-युज्यते), संसृज् in pass. (-सृज्यते), संसृष्टीभू, एकीभू, संयोगं इ (c. 2. एति -तुं), सम्पर्कम् इ, संसर्गम् इ, सङ्करीभू.

MIXABLE, *a.* मिश्रणीयः -या -यं, योजनीयः -या -यं, याव्यः -व्या -व्यं.

MIXED, *p. p.* मिश्रितः -ता -तं, सम्मिश्रितः -ता -तं, मिश्रः -श्रा -श्रं, सम्मिश्रः &c., मिश्रीकृतः -ता -तं, व्यामिश्रः -श्रा -श्रं, संयुक्तः -क्ता -क्तं, संयुतः -ता -तं, संसृष्टः -ष्टा -ष्टं, सङ्कीर्णः -र्णा -र्णं, सम्पृक्तः -क्ता -क्तं, मिलितः -ता -तं, सम्मिलितः &c., सङ्कलितः &c., संवलितः &c., सन्निपतितः &c., समवेतः &c., सङ्करीकृतः &c., एकीकृतः &c., भावितः &c., करम्बितः &c., सम्बद्धः -द्धा -द्धं, सम्पर्की -र्किणी -र्कि (न्), संसर्गी &c., कुशितः -ता -तं; 'mixed with water,' जलमिश्रितः &c., जलसंसृष्टः &c.

MIXEN, *s.* पुरीषादिराशिः *m.*; 'mixen-grown,' विड्भवः -वा -वं.

MIXER, *s.* मिश्रकः, सम्मिश्रकः, मिश्रणकृत्, संयोगकारी *m.* (न्).

MIXTURE, MIXTION, MIXING, *s.* (Act) मिश्रणं, सम्मिश्रणं, मिश्रीकरणं, संयोगः, संयोजनं, सम्मेलनं, संसर्गः, सम्पर्कः, सङ्कलनं, सङ्किरणं, एकीकरणं, सङ्करीकरणं.—(State) मिश्रता, सम्मिश्रता, मिश्रीभावः, संसृष्टता, संसर्गः, संयुक्तता, संयोगः, सम्पर्कः, सङ्कीर्णता, साङ्कर्यं.—(Mixed mass) सन्निपातः, नानाद्रव्यसमूहः, सम्मिश्रद्रव्यसमूहः, नानावस्तुसमुदायः, समूहः, सङ्घः, सङ्घटः; 'mixture with water,' जलसंसर्गः.

MIZZEN, *s.* (Sail) पश्चिमकूपकसम्बन्धि वातवसनं.

MIZZEN-MAST, *s.* पश्चिमकूपकः, नौपश्चाद्भागस्थः कूपकः.

MIZZLE, *s.* शीकरः, सीकरः, तुषारः. *See To* MISTLE, DRIZZLE.

MNEMONIC, *a.* स्मृतिसहायः -या -यं, स्मृतिप्रवर्त्तकः -का -कं, स्मृत्युपकारकः &c.

MNEMONICS, *s.* स्मरणविद्या, स्मृत्युपकरणविद्या, स्मरणशास्त्रं.

To MOAN, *v. n.* वेदनोपहतत्वाद् दीर्घनादं कृ or दीर्घरावं कृ, विलप् (c. 1. -लपति -पितुं), प्रलप्, लप्, परिदेव् (c. 1. -देवते -वितुं), क्रन्द् (c. 1. क्रन्दति -न्दितुं), आक्रन्द्, रुद् (c. 2. रोदिति -तुं), प्ररुद् क्रुश् (c. 1. क्रोशति, क्रोष्टुं), स्तन् (c. 1. स्तनति -नितुं), विस्तन्, दीर्घं निःश्वस् or निश्वस् (c. 2. -श्वसिति -तुं), दीर्घं रु (c. 2. रौति, रवितुं), दीर्घचित्कारं कृ, दीर्घनिश्वासं कृ, गम्भीरनादं कृ, गम्भीरनिश्वासं कृ, आर्त्तनादं कृ, आर्त्तरावं कृ, हाहाशब्दं कृ, हाहाकारं कृ, वाश् (c. 1. वाशते, c. 4. वाश्यते -शितुं).

MOAN, *s.* आर्त्तनादः, आर्त्तरावः, दुःखार्त्तस्य दीर्घनादः or दीर्घरावः or दीर्घचित्कारः or गम्भीरनादः, दीर्घनिश्वासः, दीर्घनिःश्वासः, विलपितं, विलपनं, विलापः, परिदेवनं -ना, परिदेवितं, स्तनितं, क्रन्दितं, क्रुष्टं, हाहाकारः.

MOANFUL, *a.* विलापकारी -रिणी -रि (न्), परिदेवी -विनी &c., परिदेवनकारी &c., दीर्घनिश्वासी &c., हाहाकारी &c.

MOANFULLY, *adv.* विलापेन, सविलपितं, सपरिदेवनं, दीर्घनिश्वासपूर्वं.

MOANING, *s.* विलपनं, परिदेवनं, आर्त्तनादः, दीर्घनिश्वसितं, स्तननं.

MOAT, *s.* परिखा, खातं, खेयं, खातकं, खातभूः *f.*, खातभूमिः *f.*, प्रतिकूपः, उपकुल्या, कुल्या, खल्लः.

MOATED, *a.* परिखावेष्टितः -ता -तं, परिखावृतः &c., परिखान्वितः &c.

MOB, *s.* अधमजनसमूहः, नीचजनसम्मर्दः, प्राकृतजनसम्मर्दः, बहुजनसमूहः, बहुजनमेलकः, जनसम्मर्दः, लोकसङ्घः, जनसङ्कुलं, जनौघं, जनता, अव्यवस्थितसभा.

To MOB, *v. a.* बहुजनाकीर्णे स्थाने वपुषा संघृष् (c. 1. -र्घर्षति -र्घर्षितुं) or सम्मृद् (c. 9. मृद्नाति -मर्दितुं) or सम्बाध् (c. 1. -बाधते -धितुं).

MOBBISH, *a.* लौकिकः -की -कं, सामान्यलोकयोग्यः -ग्या -ग्यं.

MOBILE, MOBILITY, *s.* (Mob, common people) सामान्यलोकः, साधारणलोकः, प्राकृतलोकः, असभ्यलोकः, अन्यलोकः, अधमलोकः, पृथग्जनाः *m. pl.*

MOBILITY, *s.* (Aptitude to motion) गमनयोग्यता, गतियोग्यता, गमनशीलता, चरिष्णुता, जङ्गमता, अस्थिरता, चाञ्चल्यं.

To MOCK, *v. a.* (Deride) अवहस् (c. 1. -हसति -सितुं), अपहस्, उपहस्, प्रहस्, विहस्, अवहासभूमिं कृ, अपहासास्पदं कृ, अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), गर्ह् (c. 1. गर्हते -र्हितुं), अवगर्ह्, अवगुर् (c. 6. -गुरते -रितुं), आक्षर् (c. 10. -क्षारयति -यितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), भर्त्स् (c. 10. भर्त्सयते -यितुं), तिरस्कृ, मुखरीकृ, विकत्थ् (c. 1. -कत्थते -त्थितुं), परिभू, अवज्ञां कृ, तुच्छीकृ.—(Mimic) उपहासबुद्धा परचेष्टितानुकरणं कृ or विडम्बनं कृ.—(Deceive) वञ्च् (c. 10. वञ्चयते -यितुं), प्रत् (c. 10. -तारयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), प्रलुभ् (c. 10. -लोभयति -यितुं), मुह् (c. 10. मोहयति -यितुं).

MOCK, *s.* उपहासः, अवहासः, परिहासः, हास्यं, अवक्षेपः, अवज्ञा.

MOCKED, *p. p.* (Mimicked in derision) उपहासबुद्धानुकृतः -ता -तं.—(Derided) उपहसितः -ता -तं, अवहसितः &c., अवक्षिप्तः -प्ता -प्तं, गर्हितः -ता -तं, विगर्हितः &c., तिरस्कृतः -ता -तं, अवज्ञातः &c., मुखरीकृतः &c., कृतोपहासः -सा -सं.—(Deceived) वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, मोहितः &c.

MOCKER, *s.* उपहासकः, अवहासकः, परिहासकर्त्ता *m.* (र्तृ), क्षेपकः, अवक्षेपकः, अवज्ञाकारी *m.* (न्), अवमानी *m.*, वञ्चकः.

MOCKERY, MOCKING, *s.* (Derision) उपहासः, अवहासः, अपहासः, परिहासः, परीहासः, हास्यं, तिरस्कारः, अवज्ञा, अवक्षेपः, अवमानं, अपमानं, अवहेला -लनं, अवलेपः, परिभवः, मुखरीकरणं, मौखर्यं, अवमानसूचको हासः.—(Subject of derision) उपहासास्पदं, उपहासभूमिः *f.*, अवहासस्थानं, उपहासविषयः, तिरस्कारविषयः, हास्यस्थानं, परिभवास्पदं, परिभवपदं, तिरस्कारपदं.—(Counterfeit appearance, deception, imitation) छद्म *n.* (न्), व्याजः, कपटः -टं, कूटं, वञ्चनं -ना, विडम्बनं.—(Vain effort) वृथायत्नः, वृथाप्रयत्नः, वृथोद्यमः, वृथोद्योगः, अनर्थकचेष्टा, निष्फलचेष्टा.

MOCKINGLY, *adv.* उपहासेन, सोपहासं, सावहासं, सतिरस्कारं, सावक्षेपं.

MODAL, *a.* रूपसम्बन्धी -न्धिनी -न्धि (न्), रूपविषयः -या -यं.

MODE, *s.* (Method, manner) रीतिः *f.*, मार्गः, विधिः *m.*, विधानं, प्रकारः, नियमः, वृत्तिः *f.*, ऋतिः *f.*, क्रमः, संविधानं, पर्य्यायः, मर्य्यादा, धारा, विधः in comp.; 'mode of living,' वृत्तिः *f.*; 'in this mode,' अनेन विधानेन, एवंविधं -धेन, अनेन प्रकारेण; 'mode of speaking,' वाग्व्यापारः, वाग्वृत्तिः *f.*—(Form) रूपं, आकारः, आकृतिः *f.*,

Digitized by Google

संस्कारः.—(Custom) आचारः, व्यवहारः, प्रचारः, रीतिः *f.*, नियमः, अभ्यासः, स्थितिः *f.*, आवृत्तिः *f.*, सम्प्रदायः.—(Fashionable custom) सभ्यलोकव्यवहारः, सभ्यरीतिः *f.*, शिष्टव्यवहारः, शिष्टमार्गः, सभ्यसम्प्रदायः, लोकाचारः.—(In metaphysics) विशेषवस्तुरूपं, विशेषद्रव्यरूपं, विशेषद्रव्यप्रकारः.—(In grammar) वाच्यं.—(In music) रागः *m.*, रागिणी *f.*, वर्णः. The musical modes are personified as either male or female. The male are called Rágas; the female are Ráginís, and are considered to be the wives of the Rágas. The following are some of the names for the male: भैरवः, मालवः, सारङ्गः, हिन्दोलः, वसन्तः, वसन्तदूतः, पञ्चमः, दीपकः, मेघः, नटः, नटनारायणः, कल्याणः, कामबोधः, त्रोटकः, विभासः. The following are some of the Ráginís, or female personifications: दीपिका, नटी, त्रोटकी, देशकारी, गौडी, जङ्गला, धनेश्वरी, भैरवी, रामकरी or रामकेली or रामकली, सैन्धवी, पूर्वी, भूपाली, मधुमाधवी.

Model, *s.* (Pattern, representation) प्रतिमा -मानं, प्रतिरूपं, प्रतिकृतिः, आदर्शः, उपमा -मानं, प्रतिमूर्त्तिः *f.*, संस्कारः.—(Pattern, exemplar) आदर्शः, प्रतिमा, उपमा.—(Pattern for imitation) प्रमाणं, प्रमा, प्रमाता *m.* (तृ); 'model of propriety,' न्यायाधारः.—(Mould) संस्कारः, आकारः, संस्थानं, संयानः.

To model, *v. a.* or *n.* संस्कारं कृ, संस्कृ, प्रतिमां कृ, प्रतिरूपं कृ, आदर्शं कृ.—(Shape, form) रूप् (c. 10. रूपयति -यितुं), सरूपं -पां -पं कृ.

Modeler, *s.* उपमाता *m.* (तृ), उपमानकृत् *m.*, प्रतिमानकर्त्ता *m.* (र्त्तृ).

Moderate, *a.* (Observing reasonable bounds, applied to persons) परिमिताचारी -रिणी -रि (न्), समवृत्तिः -त्तिः -त्ति, नियतवृत्तिः &c., मर्य्यादानतिक्रमी -मिणी &c., अनतिक्रान्तमर्य्यादः -दा -दं.—(Moderate in desires) अल्पाकांक्षी -क्षिणी &c., अल्पाभिलाषी &c., अलुब्धः -ब्धा -ब्धं, अलोभी &c., अल्पसन्तोषी &c., अल्पसन्तुष्टः -ष्टा -ष्टं, भोगाप्रसक्तः -क्ता -क्तं, अप्रसक्तः &c., अल्पभोगी &c., स्वल्पभोगी &c.—(Not extreme, not excessive) परिमितः -ता -तं, मितः -ता -तं, सपरिमाणः -णा -णं, समः -मा -मं, समर्य्यादः -दा -दं, नियतः -ता -तं, संयतः -ता -तं, सावधिकः -का -कं, अल्पः -ल्पा -ल्पं, स्वल्पः &c.—(In eating) मिताशनः -ना -नं, परिमिताहारः -रा -रं, स्वल्पाहारः -रा -रं,—(Middling in size) मध्यमः -मा -मं, मध्यः -ध्या -ध्यं, मध्यमपरिमाणः -णा -णं, न स्थूलो न सूक्ष्मः &c.

To moderate, *v. a.* (Temper) शम् (c. 10. शमयति -यितुं), उपशम्, प्रशम्.—(Lessen) न्यूनीकृ, अल्पीकृ, लघ् (c. 10. लघयति -यितुं), लघूकृ.—(Restrain from excess) नियम् (c. 1. -यच्छति -यन्तुं), विनियम्, संयम्, यम्, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), संग्रह (c. 1. -हरति -हर्त्तुं), प्रत्याहृ.

To moderate, *v. n.* (Abate, become less severe) शम् (c. 4. शाम्यति, शमितुं), प्रशम्, उपशम्, विगम् (c. 1. -गच्छति -गन्तुं), विरम् (c. 1. -रमति -रन्तुं), उपरम्, न्यूनीभू, ऊनीभू, अल्पीभू.

Moderated, *p. p.* (Tempered) शमितः -ता -तं, प्रशमितः -ता -तं.—(Lessened) न्यूनीकृतः -ता -तं, न्यूनीभूतः -ता -तं.—(Restrained) यतः -ता -तं, नियतः -ता -तं, निगृहीतः -ता -तं.—(Allayed) शान्तः -न्ता -न्तं, उपशान्तः &c.

Moderately, *adv.* परिमितं, नियतं, समर्य्यादं, समं, सपरिमाणं, अल्पं, स्वल्पं, अभृशं, यावत्तावत्; 'moderately warm,' ईषदुष्णः -ष्णा -ष्णं, कोष्णः &c., मन्दोष्णः &c.; 'moderately ripe,' आपक्वः -क्वा -क्वं; 'moderately distant,' नातिदूरः -रा -रं.

Moderation, *s.* (Refraining from excess) परिमिताचारत्वं, नियतवृत्तित्वं, समवृत्तिता, समता, परिमितता, मितता, क्षमा, यमः, संयमः, निग्रहः, दमः, अनतिक्रमः, मर्य्यादानतिक्रमः.—(In desires) अल्पाकांक्षा, अल्पाभिलाषः, अलोभः, अलुब्धता, अल्पसन्तुष्टता, अप्रसक्तिः *f.*, अप्रसक्तता, भोगाप्रसक्तिः *f.*—(Equanimity) क्षमा, क्षान्तिः *f.*, समचित्तत्वं, समानवृत्तिः *f.*, समभावः.

Moderator, *s.* (Restrainer) नियन्ता *m.* (न्तृ), विनियन्ता *m.*, यन्ता *m.*—(At disputations) वादमध्यस्थः, वादसभाध्यक्षः, मध्यस्थः.

Modern, *a.* इदानीन्तनः -नी -नं, अधुनातनः -नी -नं, आधुनिकः -की -कं, वर्त्तमानकालीनः -ना -नं, नूतनकालीनः &c., नूतनः -ना -नं, नवः -वा -वं, सद्यस्कालीनः -ना -नं, नव्यः -व्या -व्यं, नवीनः -ना -नं, नूत्नः -त्ना -त्नं, अर्व्वाचीनः -ना -नं, अप्राचीनः -ना -नं, अपुराणः -णा -णं, अपुरातनः -नी -नं.

Modernness, *s.* नूतनता, नवता, नव्यता, अधुनातनत्वं, सद्यस्कालीनता, वर्त्तमानकालीनता, अप्राचीनता, अपुराणता.

Moderns, *s. pl.* सद्यस्कालीनलोकः, नूतनकालीनलोकः, अधुनातनाः *m. pl.*

Modest, *a.* (Not bold, restrained by a sense of shame or propriety) विनीतः -ता -तं, विनयी -यिनी -यि (न्), लज्जाशीलः -ला -लं, लज्जावान् -वती -वत् (त्), लज्जान्वितः -ता -तं, सलज्जः -ज्जा -ज्जं, व्रीडान्वितः -ता -तं, सव्रीडः -डा -डं, व्रीडितः -ता -तं, ह्रीमान् -मती &c., त्रपावान् &c., त्रपायुक्तः -क्ता -क्तं, त्रपान्वितः &c., त्रपितः -ता -तं, सत्रपः -पा -पं, सविनयः -या -यं, विनयभाक् *m. f. n.* (ज्), अप्रगल्भः -ल्भा -ल्भं, अधृष्टः -ष्टा -ष्टं, शालीनः -ना -नं, ह्रीणः -णा -णं, संह्रीणः &c., ह्रीतः -ता -तं, ह्रीकुः -कुः -कु.—(Unassuming, humble, not proud) निर्गर्वः -र्वा -र्वं, अगर्वः &c., निर्गर्वी &c., अगर्वी &c., गर्वहीनः -ना -नं, निरहङ्कारः -रा -रं, अनहङ्कारी &c., निरभिमानः -ना -नं, अनभिमानी &c., अनुद्धतः -ता -तं, अकत्थनः -ना -नं, अविकत्थनः &c., विनम्रः -म्रा -म्रं, नम्रशीलः -ला -लं, विनतः -ता -तं, निभृतः -ता -तं, प्रसृतः -ता -तं, वश्यात्मा -त्मा -त्म (न्), वशी -शिनी &c.—(Chaste, not loose) अव्यभिचारी -रिणी &c., यतेन्द्रियः -या -यं, सद्वृत्तः -त्ता -त्तं, अलम्पटः; 'a modest wife,' साध्वी, सती, पतिव्रता.—(Moderate) परिमितः -ता -तं, मितः &c.; 'modest speech,' विनयवाक् *f.* (च्).

Modestly, *adv.* सविनयं, विनयेन, विनयपूर्व्वं, विनीतवत्, सलज्जं, सव्रीडं, सत्रपं, लज्जया, लज्जापूर्व्वं, अगर्व्वेण, अनभिमानेन, अनुद्धतं, विनम्रं.

Modesty, *s.* विनयः, विनीतता, लज्जा, ह्रीः *f.*, व्रीडा, त्रपा, ह्रणिया, ह्रीका, लज्जाशीलता, सलज्जत्वं, सत्रपता, शालीनता, अप्रगल्भता, अप्रागल्भ्यं, अधृष्टता, अधार्ष्ट्यं, मर्य्यादा, मन्दाक्षं, मन्दास्यं; 'false modesty,' मिथ्याविनयः.—(Humility) नम्रता, विनम्रता, नम्रशीलता, विनतिः *f.*, अगर्व्वः, गर्व्वहीनता, अनभिमानं, दर्पहीनता, अनुद्धतिः *f.*, अनौद्धत्यं, वश्यता.—(Chastity) अव्यभिचारः, सद्वृत्तता; 'in a wife,' साध्वीत्वं, सतीत्वं, पातिव्रत्यं.—(Moderation) परिमितता.

Modicum, *s.* अल्पांशः, अल्पभागः, अल्पमात्रं, अत्यल्पांशः, किञ्चित्, किञ्चन, किञ्चिद्भागः, अल्पिका, लेशः.

Modifiable, *a.* रूपविकारशक्यः -क्या -क्यं, रूपान्तरशक्यः &c., विकार्य्यः -र्य्या -र्य्यं, परिणामशक्यः &c., परिणामान्तरशक्यः &c., परिवर्त्तनीयः -या -यं, विवर्त्तनीयः &c.

Modification, *s.* (The act) रूपान्तरकरणं, परिणामान्तरकरणं, रूपपरिवर्त्तनं, विवर्त्तः -र्त्तनं.—(Particular or different form) रूपभेदः, रूपप्रभेदः, रूपविशेषः, रूपान्तरं.—(Diversity, variety) भेदः, प्रभेदः, विभेदः, विशेषः.—(Altered state) विकारः, विकृतिः *f.*, परिणामः, रूपान्तरं, विपरिणामः.

Modified, *p. p.* (Changed in form) विकारितः -ता -तं, विकृतः -ता

Digitized by Google

-तं, विकृतरूपः -पा -पं, परिणतरूपः &c., विपरिणामी -मिनी -मि (न्), विकृताकारः -रा -रं.—(Tempered, qualified) शमितः -ता -तं, नियमितः -ता -तं.

To MODIFY, *v. a.* (Change the form) रूपान्तरं कृ, रूपान्तरीकृ, रूपविकारं कृ, रूपपरिवर्त्तनं कृ, रूपभेदं कृ, रूपविभेदं कृ, विकृ, विकारं कृं, रूपं विकृ, अन्यरूपं -पां कृ, भिन्नरूपं -पां कृ, रूपपरिणामं कृ, परिणामान्तरं कृ रूपं परिवृत् (c. 10. -वर्त्तयति -यितुं) or विवृत्, रूपविवर्त्तनं कृ.—(Moderate) शम् (c. 10. शमयति -यितुं), उपशम्, प्रशम्.

MODISH, *a.* सभ्यव्यवहारानुसारी -रिणी -रि (न्), शिष्टरीत्यनुसारी &c., सभ्यमार्गानुयायी -यिनी &c., शिष्टमार्गानुरूपः -पा -पं, सभ्यसम्प्रदायानुसारी &c.

MODISHLY, *adv.* सभ्यव्यवहारानुसारेण, शिष्टरीत्यनुसारेण, सभ्यमार्गानुरूपेण.

To MODULATE, *v. a.* कल् (c. 10. कलयति -यितुं), स्वरलयं कृ, कलतां कृ, स्वरानुक्रमं कृ, स्वरानुपूर्व्यं कृ.—(Inflect or vary sound) स्वरभेदं कृ, स्वरविभेदं कृ, स्वरभङ्गं कृ, स्वरविभङ्गं कृ, स्वरपरिवर्त्तनं कृ.

MODULATION, *s.* कलता, लयः, स्वरलयः, कलनं, स्वरभेदः, स्वरविभेदः, स्वरभङ्गः, स्वरविभङ्गः, स्वरानुक्रमः.—(Transition from one key to another) शुद्धान्तयुक् *f.* (ञ्), स्वरपरिवर्त्तनं.—(Melody) सुस्वरानुक्रमः, स्वरमाधुर्य्यं, माधुर्य्यं, सुश्राव्यस्वरः, तालः.

MODULATOR, *s.* स्वरभेदकारी *m.* (न्), स्वरविभेदकः, लयकारी *m.*

MODULE, *s.* *See* MODEL.

MOHAMMEDAN, *a.* यावनः -नी -नं, यवनदेशीयः -या -यं, यवनधर्म्मसम्बन्धी -न्धिनी -न्धि (न्), यवनधर्म्मावलम्बी -म्बिनी &c.

MOIETY, *s.* अर्द्धं -र्द्धः, अर्द्धभागः, अर्द्धांशः; 'of an estate,' रिक्थार्द्धं.

To MOIL, *v. a.* (Make dirty) मलिन (nom. मलिनयति -यितुं), मलिनीकृ, मलेन दुष् (c. 10. दूषयति -यितुं) or लिप् (c. 6. लिम्पति, लेप्तुं).

To MOIL, *v. n.* (Toil) अतिदेहक्लेशेन आयस् (c. 4. -यस्यति -यसितुं) or श्रम् (c. 4. श्राम्यति, श्रमितुं), अतिशरीरायासं कृ, कष्टं कृ.

MOIST, *a.* आर्द्रः -र्द्रा -र्द्रं, सार्द्रः -र्द्रा -र्द्रं. ईषदार्द्रः, &c., जलार्द्रः &c., क्लिन्नः -न्ना -न्नं, ईषत्क्लिन्नः &c., सिक्तः -क्ता -क्तं, ईषत्सिक्तः &c., उन्नः -न्ना -न्नं, समुन्नः &c., सरसः -सा -सं, सद्रवः -वा -वं, रसयुक्तः -क्ता -क्तं, तिमितः -ता -तं, स्तिमितः -ता -तं, क्लेदः -दा -दं; 'to be moist,' क्लिद् (c. 4. क्लिद्यति), तिम् or स्तिम् (c. 4. तिम्यति or तीम्यति).

To MOISTEN, *v. a.* क्लिद् (c. 10. क्लेदयति -यितुं), परिक्लिद्, ईषत् क्लिद्, आर्द्रीकृ, ईषदार्द्रीकृ, सिच् (c. 6. सिञ्चति, सेक्तुं), ईषत् सिच्, जलेन सिच्, उक्ष् (c. 1. उक्षति -क्षितुं), समुक्ष्, उन्द् (c. 7. उनत्ति, उन्दितुं).

MOISTENED, *p. p.* क्लिन्नः -न्ना -न्नं, क्लेदितः -ता -तं, परिक्लिन्नः &c., परिक्लेदितः -ता -तं, आर्द्रीकृतः -ता -तं, सिक्तः -क्ता -क्तं, जलसिक्तः &c., उक्षितः -ता -तं, समुक्षितः -ता -तं, उन्नः -न्ना -न्नं, समुन्नः &c., उन्नः -न्ना -न्नं, तिमितः -ता -तं, स्तिमितः -ता -तं.

MOISTENER, MOISTENING, *s.* or *part.* क्लेदकः -का -कं, क्लेदनः -ना -नं.

MOISTENING, *s.* क्लेदनं, सेचनं, जलसेचनं, उक्षणं, उन्दनं, समुन्दनं.

MOISTNESS, *s.* आर्द्रता, सार्द्रता, ईषदार्द्रता, जलार्द्रता, क्लिन्नता, ईषत्क्लिन्नता, सिक्तता, जलसिक्तता, उन्नता, सरसत्वं.

MOISTURE, *s.* क्लेदः -दं, संक्लेदः, क्लिन्नता, आर्द्रता, तेमः, स्तेमः, तेमनं, चिक्लिदं, रसः, स्नेहः, उन्दनं, समुन्दनं; 'of the lips,' अधररसः, अधरमधु *n.*, अधरामृतं, मुखसुरं.

MOLAR, *a.* (Tooth) दाढा, चर्वणदन्तः, महादन्तः, दंष्ट्रा.

MOLASSES, *s.* इक्षुसारः, इक्षुरसक्वाथः, मधुधूलिः *f.*, क्षारः, शर्करक्षारः, रसिका, मधुरं, गुडः -डकं, रसजः, द्रवजः, सितादिः *m.*, पाणिः *f.*

MOLE, *s.* (Spot on the body) तिलः -लकः, तिलकालकः, किणः, सामुद्रं, कालकः, जटुलः.—(Mound) वप्रः -प्रं, पिण्डलः, पिण्डनः, सेतुः *m.*, चयः.—(The animal) छुछुन्दः, छुच्छुन्दरी, गन्धाश्रयः, बिलवासी जन्तुभेदः.

MOLECULE, *s.* अणुः *m.*, परमाणुः, कणः, कणिका, लवः, काकिणिका.

MOLECULISM, *s.* अणिमा *m.* (न्), अणुत्वं.

MOLE-EYED, *a.* सूक्ष्मनयनः -ना -नं, सूक्ष्मदृष्टिः -ष्टिः -ष्टि.

MOLE-HILL, *s.* कृमिशैलः, भूश्रवाः *m.* (स्), वल्मीकः -कं, कूलकः, वल्मीकूटं, मृन्निकाकूटं, वामलूरं, स्यमीकः.

To MOLEST, *v. a.* आयस् (c. 10. -यासयति -यितुं), बाध् (c. 1. बाधते -धितुं), परिबाध्, प्रबाध्, अधिबाध्, उपरुध् (c. 7. -रुणद्धि -रोद्धुं), रुध्, तप् (c. 10. तापयति -यितुं), सन्तप्, पीड् (c. 10. पीडयति -यितुं), उपपीड्, अभिपीड्, क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), व्यथ् (c. 10. व्यथयति -यितुं), अर्द् (c. 10. अर्दयति -यितुं).

MOLESTATION, *s.* क्लेशः, बाधः -धा, बाधनं, उपरोधः, पीडा, व्यथा, दुःखं, आयासः, प्रयासः, उपद्रवः, उपप्लवः; 'free from molestation,' निरुपद्रवः -वा -वं.

MOLESTED, *a.* बाधितः -ता -तं, पीडितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, क्लेशितः -ता -तं, परिक्लिष्टः -ष्टा -ष्टं, उपरुद्धः -द्धा -द्धं, व्यथितः -ता -तं, उपद्रुतः -ता -तं.

MOLLIENT, *a.* मृदुकारी -रिणी -रि (न्), स्निग्धकारी &c. *See* EMOLLIENT.

MOLLIFICATION, *s.* मृदूकरणं, स्निग्धीकरणं, शमनं, प्रशमनं, उपशमनं.

MOLLIFIED, *p. p.* मृदूकृतः -ता -तं, शमितः -ता -तं, उपशान्तः -न्ता -न्तं.

To MOLLIFY, *v. a.* मृदूकृ, स्निग्धीकृ, कोमलीकृ, शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्, अभिशान्त्व्.

MOLLUSCA, *s. pl.* कोमलशरीरविशिष्टा प्राणिजातिः.

To MOLT, *v. a.* *See To* MOULT.

MOLTEN, *a.* विलीनः -ना -नं, द्रुतधातुमयः -यी -यं, विलीनधातुमयः &c.

MOMENT, *s.* (Minute portion of time) क्षणः, विपलं, पलं, त्रुटिः *f.*, निमेषः, निमिषः, मात्रा; 'the present moment,' आपातः; 'for the present moment,' आपाततस्; 'in a moment,' क्षणात् क्षणेन, निमेषमात्रेण, क्षणमात्रेण, क्षणान्तरे, एकपदे, एकविपले; 'for a moment,' क्षणं -णेन, क्षणमात्रं, निमेषमात्रं, मुहूर्त्तं; 'at that moment,' तत्क्षणात् -णे, तत्काले, तदानीमेव; 'every moment,' प्रतिक्षणं, अनुक्षणं, क्षणे क्षणे; 'the next moment,' क्षणान्तरं; 'auspicious moment,' लग्नं. *See* INSTANT. (Importance) गुरुता -त्वं, गौरवं, प्रभावः, भारः.

MOMENTARILY, *adv.* क्षणे -णं -णात्, तत्क्षणे, प्रतिक्षणं, सद्यस्, सपदि, क्षणमात्रं, निमेषमात्रं.

MOMENTARY, *a.* क्षणिकः -का -की -कं, क्षणी -णिनी -णि (न्), क्षणभूतः -ता -तं, क्षणमात्रस्थायी -यिनी &c., क्षणस्थायी &c., अत्यल्पकालस्थायी &c., अल्पकालीनः -ना -नं, अत्यल्पकालीनः -ना -नं, अचिरः -रा -रं, अचिरस्थायी &c., साद्यस्कः -स्की -स्कं, नैमिषः -षी -षं, नैमिषिकः -की -कं, तत्क्षणिकः -की -कं, तात्कालिकः -की -कं, क्षण in comp.; as, 'a momentary obstacle,' क्षणविघ्नः; 'a momentary flash,' क्षणप्रभा.

MOMENTOUS, *a.* गुरुः -र्वी -रु, गुर्वर्थः -र्थी -र्थं, बह्वर्थः &c., महार्थः &c. गुरुप्रभावः -वा -वं, अलघुः -घुः -घु; 'a momentous affair,' गुरुकार्य्यं. *See* IMPORTANT.

MOMENTOUSNESS, *a.* गुरुता -त्वं, गौरवं, गुर्वर्थता, प्रभावः, अलघुता.

MOMENTUM, *s.* वेगः, आवेगः, संवेगः, आपातः, गतिवेगः.

MONACHAL, *a.* मठवाससम्बन्धी -न्धिनी -न्धि (न्). *See* MONASTIC.

Digitized by Google

MON

MONACHISM, *s.* मठवासः, मठाध्यासनं, वनवासः, वानप्रस्थता, अरण्यवासः, वैखानसवृत्तिः *f.*, संसारत्यागः, उदासीनता.

MONAD, MONADE, *s.* तन्मात्रं, मात्रं, अणुमात्रं, अभेद्यवस्तु *n.*, अच्छेद्यवस्तु *n.*, अदृश्यवस्तु *n.*, अखण्डनीयवस्तु.

MONARCH, *a.* राजा *m.* (न्), नृपतिः *m.*, भूपतिः *m.*, नृपः, पार्थिवः, भूपः, नरपतिः *m.*, महीपतिः *m.*, अधिपः, अधिपतिः *m.*, महाराजः, अधिराजः, ईश्वरः, अधीश्वरः; 'universal monarch,' सम्राट् *m.* (ज्), मण्डलेश्वरः, चक्रवर्त्ती *m.* (न्). *See* KING.

MONARCHAL, MONARCHIC, MONARCHICAL, *a.* (Relating or suited to a monarch) राजकीयः -या -यं, राजयोग्यः -ग्या -ग्यं, राजोचितः -ता -तं, आधिराजिकः -की -कं, राज in comp.—(Vested in a single ruler) एकराजाधीनः -ना -नं, एकराजायत्तः -त्ता -त्तं, सम्राडधीनः -ना -नं, एकराजकः -का -कं, एकप्रभुकः -का -कं.

MONARCHY, *s.* एकराजशासनं, एकराजाधिपत्यं, एकाधिपत्यं, एकराजकत्वं, एकभर्त्रृकत्वं, एकस्वामित्वं, राजत्वं, राज्यं, नृपत्वं, नरेन्द्रत्वं.

MONASTERY, *s.* मठः, आश्रमः, वानप्रस्थाश्रमः, मुनिवासः, मुनिवासस्थानं, धर्म्मशाला, पुण्यस्थानं, पुण्यालयः, पुण्यवनं.

MONASTIC, MONASTICAL, *a.* मठवाससम्बन्धी -न्धिनी -न्धि (न्), आश्रमसम्बन्धी &c., आश्रमी -मिणी &c., आश्रमिकः -की -कं, मुनिसम्बन्धी &c.

MONDAY, *s.* सोमवारः, चन्द्रवारः, इन्दुवारः, सोमवासरः.

MONETARY, *a.* मुद्रासम्बन्धी -न्धिनी -न्धि (न्), मौद्रिकः -की -कं.

MONEY, *s.* (Coin) मुद्रा, दीनारः, नाणकं, टङ्कः, टङ्ककः, निष्कः -ष्कं, कार्षापणं.—(Riches, wealth) धनं, अर्थः, वित्तं, द्रव्यं, विभवः, वैभवं, सम्पत्तिः *f.*, रिक्थं, धनसम्पत्तिः *f.*, धनबाहुल्यं, धनसमृद्धिः *f.*, धनवैपुल्यं, 'love of money,' धनलोभः, अर्थलोभः, धनाशा; 'making money,' धनार्जनं, द्रव्यार्जनं.

MONEY-BAG, *s.* कोषः, कोशः, धनकोषः, मुद्राकोषः.

MONEY-BOX, *s.* मुद्राभाण्डं, मुद्रापात्रं, धनभाण्डं, दीनारभाण्डं.

MONEY-CHANGER, *s.* मुद्रापरिवर्त्तकः, हुण्डिकापत्रसुवर्णरूप्यादिपरिवर्त्तकः, धनव्यापारी *m.* (न्), मुद्राव्यापारी.

MONEYED, *a.* धनवान् -वती -वत् (त्), धनी -निनी -नि (न्), धनिकः -का -कं, सधनः -ना -नं, धनाढ्यः -ढ्या -ढ्यं, महाधनः -ना -नं, द्रव्यवान् &c., वित्तवान् &c.

MONEY-LENDER, *s.* कुसीदिकः, कुसीदः -दा -दं, कौसीदिकः, कुसीदजीवी *m.* (न्), वार्धुषिकः, वृद्धिजीवी *m.*, निषिद्धवृत्त्युपजीवी *m.* (न्), कलोपजीवी *m.*, ऋणदाता *m.* (तृ), धनिकः, धनप्रयोगी *m.* (न्).

MONEY-LESS, *a.* धनहीनः -ना -नं, अधनः -ना -नं, निर्धनः -ना -नं, द्रव्यहीनः -ना -नं, अर्थहीनः &c., वित्तहीनः &c., क्षीणधनः &c., गतार्थः -र्था -र्थं.

MONGER, *s.* व्यापारी *m.* (न्), व्यवसायी *m.* (न्), क्रयविक्रयिकः, विक्रेता *m.* (तृ), वणिक् *m.* (ज्).

MONGREL, *a.* सङ्कीर्णजातीयः -या -यं, सङ्करजातीयः -या -यं, सङ्करजातः -ता -तं, सङ्करजः -जा -जं, विजातीयः -या -यं, सङ्कीर्णः -र्णा -र्णं.

MONITION, *s.* उपदेशः, प्रत्यादेशः, प्रबोधः -धनं, मन्त्रणं, बोधः -धनं.

MONITOR, *s.* (Warner, admonisher) मन्ता *m.* (न्तृ), अभिमन्ता *m.*, मन्त्री *m.* (न्), बोधकः, प्रबोधकः, उपदेशकः, प्रत्यादेशकः, शिक्षकः.—(In a school) उपशिक्षकः, उपगुरुः *m.*

MONITORIAL, *s.* उपशिक्षकसम्बन्धी -न्धिनी &c., उपशिक्षाससम्बन्धी &c.

MONITORY, MONITIVE, *a.* उपदेशकः -का -कं, उपदेशात्मकः -का -कं, उपदेशरूपः -पा -पं, शिक्षकः -का -कं, उद्बोधकः -का -कं, प्रबोधकः &c.

MONK, *s.* मठवासी *m.* (न्), मुनिः *m.*, सन्न्यासी *m.* (न्), योगी *m.* (न्), यती *m.* (न्), तपस्वी *m.* (न्), वैखानसः, उदासीनः, वैरागी *m.* (न्), वैरागिकः, वैराग्याश्रमी *m.*, वानप्रस्थः, संसारत्यागी *m.*, लोकत्यागी *m.*, सर्व्वसङ्गपरित्यागी *m.*

MONKEY, *s.* वानरः, कपिः *m.*, प्लवगः, प्लवङ्गः -ङ्गमः, मर्कटः, शाखामृगः, वृक्षचरः, क्रम्मी *m.* (न्), क्रम्माकः, क्रम्मारुः *m.*, वनौकाः *m.* (स्), वलिमुखः, वलीमुखः, कलिप्रियः, कीशः, हनुमान् *m.* (त्), रामदूतः; 'Female monkey,' वानरी *f.*, मर्कटी; 'monkey-like,' कापेयः -यी -यं; 'monkey-tricks,' वानरचेष्टा, मर्कटचेष्टा.—(Iron weight) लोहभारः.

MONKISH, *a.* मुनिसम्बन्धी -न्धिनी &c., मुनिसदृशः -शी -शं.

MONOCHORD, *s.* एकतन्त्री *m.* (न्), एकतारी *m.* (न्), एकतन्त्रीवाद्यं.

MONOCULAR, MONOCULOUS, *a.* एकाक्षः -क्षा -क्षं, एकलोचनः -ना -नं, एकनेत्रः -त्रा -त्रं, काणः -णा -णं, एकाक्षिविकलः -ला -लं.

MONOGAMIST, *s.* एकपत्नीकः, एकभार्य्यकः, सकृद्विवाही *m.* (न्), अपुनर्विवाही *m.*, एकस्त्रीकः.

MONOGAMY, *s.* एकपत्नीव्रतं, एकभार्य्याव्रतं, एकस्त्रीविवाहः, सकृद्विवाहः, अपुनर्विवाहः.

MONOGRAM, *s.* परस्परसंयुक्तं नामाद्याक्षरं.

MONOLOGUE, *s.* आत्मभाषणं, आत्मगतभाषणं, स्वगतभाषणं, स्वसमीपभाषणं,

MONOMACHY, *s.* द्वन्द्वयुद्धं, द्वन्द्वं, द्वन्द्वायोधनं, नियुद्धं.

MONOMANIA, *s.* एकविषयोन्मादः, एकविषयविक्षेपः, एकविषयभ्रान्तिः *f.*

MONOMANIAC, *s.* एकविषयोन्मत्तः, एकविषयविक्षिप्तः, एकविषयभ्रान्तः.

MONOPETALOUS, *a.* एकदलकः -का -कं, एकदलविशिष्टः -ष्टा -ष्टं.

MONOPOLIST, MONOPOLIZER, *s.* (One who purchases the whole of a commodity) पूर्व्वक्रेता *m.* (तृ), पूर्व्वक्रयी *m.* (न्), सर्व्वभाण्डक्रेता, एकव्यवसायी *m.*—(One who takes the whole) पूर्व्वग्राहकः, सर्व्वग्राहकः.

To MONOPOLIZE, *v. a.* (Purchase the whole of a commodity with the view of selling at higher prices) अधिकमूल्यविक्रयबुद्ध्या सर्व्वभाण्डं पूर्व्वं क्री (c. 9. क्रीणाति -णीते, क्रेतुं) or सर्व्वपण्यद्रव्याणि पूर्व्वं क्री or सर्व्वद्रव्याणां पूर्व्वक्रयं कृ.—(Take or obtain the whole) सर्व्वं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or प्राप् (c. 5. -आप्नोति -आप्तुं), साकल्यं ग्रह् or पूर्व्वं ग्रह्.—(Have the sole right of dealing) एकव्यवसायं कृ, एकव्यापारं कृ, क्रयविक्रयाधिकारम् एकतो or असामान्येन धृ (c. 10. धारयति -यितुं).

MONOPOLIZED, *p. p.* पूर्व्वगृहीतः -ता -तं, पूर्व्वक्रीतः -ता -तं, पूर्व्वप्राप्तः &c.

MONOPOLY, *s.* एकव्यवसायः, एकव्यापारः, एकव्यवहारः, एकपणायां, एकवाणिज्यं, असामान्यव्यवहारः, एकप्रयोगः, असामान्यप्रयोगः, क्रयविक्रययोर् एकाधिकारः.

MONOSYLLABIC, *a.* एकाक्षरः -रा -रं, एकाक्षरी -रिणी -रि (न्).

MONOSYLLABLE, *s.* एकाक्षरं, एकाक्षरशब्दः, एकाक्षरविशिष्टः शब्दः.

MONOTHEISM, *s.* अद्वैतं, अद्वैतवादः, केवलेश्वरवादः, केवलेश्वरमतं.

MONOTHEIST, *s.* अद्वैतवादी *m.* (न्), अद्वयवादी *m.*, केवलेश्वरवादी *m.*

MONOTONOUS, *a.* (Having but one tone) एकस्वरः -रा -रं, एकतानः -ना -नं, एकस्वनः -ना -नं, समस्वरः -रा -रं, समानस्वरः -रा -रं, अनन्यस्वरः -रा -रं.—(Always the same, tediously uniform) एकरूपः -पा -पं, एकप्रकारः -रा -रं, समरूपः -पा -पं, समानरूपः -पा -पं, समसमानः -ना -नं, एकसारः -रा -रं, निर्व्विकारः -रा -रं, निर्व्विक्रियः -या -यं, अविशेषः -षा -षं, एकरङ्गी -ङ्गिणी &c.

MONOTONOUSLY, *adv.* एकस्वरेण, समस्वरेण, एकरूपेण, समरूपेण, समसमानं, निर्व्विकारं, अविकारेण.

MONOTONY, *s.* (Sameness of tone) एकस्वरः, स्वरैक्यं, स्वराभेदः, स्वरसमता, स्वरसमानता, समानस्वरत्वं, स्वरभेदाभावः.—(Dull uniformity)

Digitized by Google

एकरूपता, समरूपता, समसमानता, समानरूपता, एकव्यापारत्वं, समव्यापारत्वं, व्यापाराभेदः, विकाराभावः, विशेषाभावः.

To MULTIPLY, *v. a.* (In Arithmetic, &c.) गुण् (c. 10. गुणयति -यितुं), हन् (c. 2. हन्ति -न्तुं, caus. घातयति -यितुं), पॄ (c. 10. पूरयति -यितुं), गुणनं कृ, घातं कृ, हननं कृ, अङ्कपूरणं कृ.—(Increase in number) बहुलीकृ, प्रचुरीकृ, वृध् (c. 10. वर्धयति -यितुं), संख्यावृद्धिं कृ.

To MULTIPLY, *v. n.* (Grow, increase in number) बहुलीभू, प्रचुरीभू, बहुतरीभू, अधिकतरीभू, वृध् (c. 1. वर्धते -धितुं), पुष्कलीभू, वर्धितसंख्यः -ख्या -ख्यं भू, अधिकसंख्यः &c. भू, भृश (nom. भृशायते).

MULTIPOTENT, *a.* बहुकार्य्यशक्तिकः -का -कं, बहुकार्य्यसमर्थः -र्था -र्थं.

MULTIPRESENCE, *s.* बहुस्थानविद्यमानता, बहुस्थलविद्यमानता.

MULTISONOUS, *a.* बहुस्वनः -ना -नं, बहुध्वनिः -निः -नि, बहुनादः -दा -दं.

MULTITUDE *s.* (A collection, number) समूहः, गणः, सङ्घः, संहतिः *f.*, सङ्घातः, ओघः, समुदायः, समवायः, वृन्दं, निवहः, सन्नयः, चयः, सञ्चयः, समुच्चयः, सङ्ग्रहः, समाजः, समजः, मण्डलं -ली, स्तोमः, निकायः, वारः, विसरः, आकरः, व्यूहः, जातं, कदम्बं -म्बकः -कं, कदम्बदः, वर्गः, पेटकं, पूगः, पुञ्जः, सङ्घः, सन्दोहः, सङ्कुलः, व्रजः, सार्थः, कुलं, ग्रामः in comp.; 'in multitudes,' सङ्घशस्.—(Crowd, throng) बहुजनसमूहः, बहुजनसम्मर्दः, बहुजनसङ्घः, लोकसङ्घः, जनसमूहः, जननिवहः, लोकनिवहः, जनौघः, जनसमागमः, बहुजनमेलकः, जनता, मानुष्यकं.—(State of being many) बहुत्वं, बाहुल्यं, अनेकत्वं, अनैक्यं; 'multitude of villages,' ग्रामता.

MULTITUDINOUS, *a.* बहुलः -ला -लं, बहुः -हुः -ह्वी -हु, बहुसंख्यकः -का -कं, अनेकः -का -कं, अनेकसंख्यकः -का -कं, पुष्कलः -ला -लं, समवायी -यिनी -यि (न्).

MULTIVIOUS, *a.* बहुमार्गः -र्गा -र्गं, बहुपथः -था -थं, प्रचुरमार्गः &c.

Digitized by Google

MULTOCULAR, *a.* बहुनेत्रः -त्रा -त्रं, बहुनयनः -ना -नं, बहुलोचनः -ना -नं.

MUM, *a.* (Silent) निःशब्दः -ब्दा -ब्दं, तूष्णीकः -का -कं, अनालापः -पा -पं.

MUM, *interj.* शान्तं, शब्दं मा कुरु, तूष्णीम्भव, निःशब्दो भव, हूम्, नीचैस्.

To MUMBLE, *v. a.* and *n.* अस्पष्टवाचा or अस्पष्टस्वरेण वद् (c. 1. वदति -दितुं), अस्पष्टोच्चारणेन or अव्यक्तोच्चारणेन वद्, अव्यक्तगिरा वद्, अस्पष्टं वद्, अव्यक्तं वद् or उच्चर् (c. 10. -चारयति -यितुं), नीचस्वरेण वद्, उपांशु वद्, जप् (c. 1. जपति -पितुं), प्रजप्.

MUMBLED, *p. p.* अस्पष्टवाचा or नीचस्वरेण उच्चारितः -ता -तं.

MUMBLINGLY, *adv.* अस्पष्टवाचा, अव्यक्तवाचा, अस्पष्टस्वरेण, नीचस्वरेण.

MUMMER, *s.* विडम्बनकृत् *m.*, छद्मवेशी *m.* (न्), दम्भवृत्तिः *m.*

MUMMERY, *s.* विडम्बनं -ना, छद्म *n.* (न्), छद्मवेशः, दम्भः, मिथ्याधर्म्मः, धर्म्मोपधा, कपटधर्म्मः, भाण्डं, भण्डता.

MUMMY, *s.* सुगन्धिद्रव्यरक्षितशवः, सिक्थादिरक्षितशवः, तिक्तौषधव्यञ्जनादिरक्षितं मृतशरीरं.

To MUMP, *v. a.* चर्व् (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं), दंश् (c. 1. दशति, दंष्टुं).

MUMPS, *s.* लालापिण्डशोथः, लालाशयशोथः, गण्डमाला, कर्णमूलं.—(Sullenness) अन्तःक्रोधः, अन्तःकोपः.

To MUNCH, *v. a.* and *n.* चर्व् (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं), शनैः सन्दंश् (c. 1. -दशति -दंष्टुं) or विदंश् or दंश्, शनैः खाद् (c. 1. खादति -दितुं) or संखाद्.

MUNDANE, *a.* लौकिकः -की -कं, ऐहलौकिकः -की -कं, सांसारिकः -की -कं, लौकः -का -कं, संसारी -रिणी -रि (न्), ऐहिकः -की -कं, इहलोकसम्बन्धी &c.; 'mundane egg,' ब्रह्माण्डं, हेमाण्डं, हिरण्यगर्भः.

MUNDANITY, *s.* लौकिकता -त्वं, ऐहलौकिकता, सांसारिकत्वं.

MUNDIVAGANT, *a.* अवनिचरः-रा-रं, लोकाटकः-का-कं, पृथिवीपर्यटकः &c.

MUNGOOSE, *s.* नकुलः, अङ्कुषः, बभ्रुः *m.*, सूचिवदनः.

MUNGREL, *s.* *See* MONGREL.

MUNICIPAL, *a.* नगरीयः -या -यं, नागरेयकः -की -कं, नगराधिकारसम्बन्धी &c., नगरसमाजसम्बन्धी -न्धिनी -न्धि (न्), नगरीयसमाजविषयः -या -यं, दैशिकः -की -कं, देशीयः -या -यं, नगर in comp.

MUNICIPALITY, *s.* ग्रामसङ्घः, नगरसङ्घः, देशविभागः, मण्डलं, चक्रं, राष्ट्रं.

MUNIFICENCE, *s.* स्थूललक्ष्यता -त्वं, अतिदानं, अतिदातृत्वं, बहुप्रदत्वं, अतिदानशीलता, अतित्यागशीलता, अतित्यागः, अतित्यागिता, वदान्यता, उदारता, औदार्य्यं, अतिसर्ज्जनं, दानवीरता, दानशूरता, दानशौण्डी, दानशौण्डता, मुक्तहस्तता.

MUNIFICENT, *a.* स्थूललक्ष्यः -क्ष्या -क्ष्यं, स्थूललक्षः -क्षा -क्षं, बहुप्रदः -दा -दं, अतिदाता -त्री -तृ (तृ), अतिदायकः -का -कं, बहुदायकः &c., वदान्यः -न्या -न्यं, अतिदानशीलः -ला -लं, अतित्यागशीलः &c., बहुत्यागी -गिनी &c., उदारः -रा -रं, दानवीरः -रा -रं, दानशूरः &c., दानशौण्डः -ण्डा -ण्डं.

MUNIFICENTLY, *adv.* स्थूललक्ष्यवत्, अतिदानेन, वदान्यवत्, सौदार्य्यं.

MUNIMENT, *s.* दुर्गं, कोटिः *f.*, कोटः, कूटः, परिकूटं, गुप्तिः *f.*, रक्षास्थानं.

MUNITION, *s.* युद्धसामग्री -ग्यं, युद्धोपकरणं, युद्धसज्जा, युद्धसाहित्यं.

MURAL, *a.* भित्तिसम्बन्धी -न्धिनी &c., प्राकारसम्बन्धी &c., प्राकारीयः-या-यं.

MURDER, *s.* हत्या, वधः, घातः, घातनं, मारणं, हननं, निहननं, प्रमापणं, अपघातः, व्यापादनं, जीवहत्या, प्राणहत्या, सूदनं, निषूदनं, हिंसा, द्वेषपूर्व्वको मनुष्यवधः, द्वेषपूर्व्वा नृहत्या.

To MURDER, *v. a.* द्वेषपूर्व्वं हन् (c. 2. हन्ति -न्तुं, c. 10. घातयति -यितुं) or व्यापद् (c. 10. -पादयति -यितुं) or मृ (c. 10. मारयति -यितुं), द्वेषबुद्धा हन् or निहन् or वध्, this last is defective and not usually found, excepting in the 3d pret. and fut., द्वेषपूर्व्वं वधं कृ or मनुष्यवधं कृ, प्राणहत्यां कृ, जीवहत्यां कृ, जीवनाशं कृ.—(Destroy) नश् (c. 10. नाशयति -यितुं), विनश्.

MURDERED, *p. p.* द्वेषपूर्व्वं हतः -ता -तं or निहतः -ता -तं or व्यापादितः &c. or घातितः &c., द्वेषबुद्धा मारितः -ता -तं or हतप्राणः &c.

MURDERER, *s.* द्वेषपूर्व्वं or द्वेषबुद्धा हन्ता *m.* (तृ) or निहन्ता *m.* or घातकः or घाती *m.* (न्) or वधकः, वधकारी *m.*, वधोद्यतः, मारकः, प्राणहन्ता *m.*, जीवहन्ता *m.*, हत्याकृत्, प्राणहत्याकृत्, आततायी *m.* (न्), नरघाती *m.*, घ्नः in comp., हा *m.* (न्) in comp.; 'of a brother,' भ्रातृहा *m.*, भ्रातृघ्नः, भ्रातृघातकः &c.; 'of one asleep,' सुप्तघातकः.

MURDEROUS, *a.* (Committing murder) घातकः -का -कं, घातुकः -का -कं, घाती -तिनी -ति (न्), वधकारी &c., प्राणघातकः &c., व्यापादकः -का -कं, प्राणान्तकः &c., जीवान्तकः &c., प्राणनाशकः &c.—(Premeditating murder, intending it) वधैषी -षिणी &c., वधोद्यतः -ता -तं, जिघांसुः -सुः -सु, वधाभिसन्धिः -न्धिः -न्धि, हिंसाबुद्धिः -द्धिः -द्धि, सन्नद्धः -द्धा -द्धं.—(Consisting in murder) मारात्मकः -का -कं, आत्ययिकः -की -कं.

MURIATE, *s.* (Of mercury) रसकर्प्पूरः, रसपुष्पं.

MURK, *s.* अन्धकारः, तमस् *n.*, तिमिरं, तमिस्रं, मेघतिमिरं, साभ्रता.

MURKY, *a.* सान्धकारः -रा -रं, सतिमिरः -रा -रं, तमस्वी -स्विनी -स्वि (न्), तमोमयः -यी -यं, तमोवृतः -ता -तं, मेघाच्छन्नः -न्ना -न्नं, साभ्रः -भ्रा -भ्रं, मलिनः -ना -नं.

MURMUR, *s.* (Low sound) कलकलः, कलः, कलरवः, कलरुतं, कलस्वरः -रं, मन्दरुतं, मन्दरावः, रुतं, रावः, गुञ्जितं, गुञ्जनं, मर्मरः, मणितं, स्तनितं, झङ्कारः, रणत्कारः, रणरणशब्दः, गर्जनं, गर्जितं, मन्द्रशब्दः, गम्भीरशब्दः, मन्द्रध्वनिः *m.*, गम्भीरध्वनिः *m.*, आमन्द्रशब्दः, नीचशब्दः; 'murmur of applause,' प्रणादः, प्रणदनं.—(Suppressed sound of complaint) अन्तर्विलापः, अन्तर्विलपितं, गूढविलापः, गूढपरिदेवनं -ना, अन्तःपरिदेवना, असन्तोषसूचकशब्दः, असन्तोषार्थकशब्दः.

To MURMUR, *v. n.* (Make a low sound) कलकलशब्दं कृ, गुञ्ज् (c. 1. गुञ्जति -ञ्जितुं), गर्ज् (c. 1. गर्जति -र्जितुं), गर्जनं कृ, गम्भीरं or मन्द्रशब्देन रु (c. 2. रौति, रवितुं) or विरु or अभिरु or स्तन् (c. 1. स्तनति -नितुं), गम्भीरस्तनितं कृ, गम्भीरशब्दं कृ, नीचशब्दं कृ, मन्द्रशब्दं कृ, आमन्द्रशब्दं कृ, घुर् (c. 6. घुरति -रितुं), रणरणशब्दं कृ.—(Mutter) जप् (c. 1. जपति -पितुं), प्रजप्, नीचस्वरेण वद् (c. 1. वदति -दितुं), नीचैर् वद्, उपांशु वद्.—(Make a sound of complaint) असन्तोषाद् विलप् (c. 1. -लपति -पितुं) or परिदेव् (c. 1. -देवते -वितुं), असन्तोषसूचकशब्दं कृ, असन्तोषार्थकशब्दं कृ, विवद् (c. 1. -वदते -दितुं).

MURMURER, *s.* असन्तुष्टत्वात् सदापरिदेवी *m.* (न्) or सदाविलापी *m.*, असन्तुष्टजनः, विवादी *m.* (न्).

MURMURING, *s.* (Low sound) गर्जनं, परिगर्जनं. *See* MURMUR.

MURMURING, *part.* (Making a low sound) गुञ्जन् -ञ्जती -ञ्जत् (त्), कलकलशब्दकारी -रिणी -रि (न्), मन्द्रशब्दकारी &c.

MURRAIN, *s.* गवादिजन्तुमारी, गवादिमारकः, मारी, महामारी.

MUSCLE, *s.* स्नायुः *m.*, स्नसा, पेशी, शिरा, मांसपेशी, मांसशिरा, मांसरज्जुः *m. f.*, वक्षसा, वहीरुः *m.*, सन्धिबन्धनं, ग्रन्थिबन्धनं; 'trapezium muscle,' मन्या, मन्याका.—(Shell-fish) शम्बुः, शम्बुकः, शम्बूकः.

MUSCULAR, MUSCULOUS, *a.* (Pertaining to a muscle) स्नायुसम्बन्धी -न्धिनी &c.; 'muscular action,' चालनं.—(Brawny, strong) मांसलः -ला -लं, स्नायुमान् -मती -मत् (त्), दृढाङ्गः -ङ्गी -ङ्गं, बलवान् &c.

MUSE, *s.* विद्यादेवी, काव्यदेवता, वाग्देवता, विद्याधिष्ठात्री, काव्याधिष्ठात्री, सरस्वती.—(Deep thought) ध्यानं, चिन्ता.

Digitized by Google

To MUSE, *v. n.* चिन् (c. 10. चिन्तयति -यितुं), ध्यै (c. 1. ध्यायति, ध्यातुं), सन्ध्यै, विमृश् (c. 6. -मृशति -मर्ष्टुं), विचर् (c. 10. -चारयति -यितुं), मन् (c. 4. मन्यते, मन्तुं), चिन्तां कृ, ध्याननिष्ठः -ष्ठा -ष्ठं भू, चिन्तापरः -रा -रं भू.

MUSEFUL, *a.* ध्याननिष्ठः -ष्ठा -ष्ठं, ध्यानपरः -रा -रं, चिन्तापरः &c.

MUSEUM, *s.* कौतुकागारं, कौतुकालयः, कौतुकसङ्ग्रहालयः, कौतुकसङ्ग्रहस्थानं, दुर्लभद्रव्यागारं, दुर्लभवस्तुसङ्ग्रहस्थानं, आश्चर्य्यपदार्थालयः.

MUSHROOM, *s.* छत्रं -त्रा, छत्राकं, छत्रकः, छत्रिका, अतिछत्रः -त्रकः, उच्छिलीन्ध्रं -न्ध्रकं, शिलीन्ध्रं -न्ध्रकं, पालघ्नः, ऊर्ध्वभृङ्गं, मक्षिपत्रं, दिलीरः.

MUSIC, *s.* (The art or science) गन्धर्वविद्या or गन्धर्ववेद्या, सुस्वरविद्या, गन्धर्ववेदः, सङ्गीतविद्या, वादनविद्या, वाद्यविद्या, सुस्वरशास्त्रं, सङ्गीतशास्त्रं, सङ्गीतव्यापारः, विज्ञानं.—(Harmony, melody) सुस्वरः, सुस्वरसङ्गः, सुस्वरता, वाद्यघोषः, कलता -त्वं, तौर्य्यं, तालः; 'vocal and instrumental music,' सङ्गीतं -तिः *f.*, गीतवादनं; 'music with singing and dancing,' तौर्य्यत्रिकं; 'set to music,' स्वरबद्धः -द्धा -द्धं; 'fond of music,' सुस्वरानन्दी -न्दिनी &c., नादलुब्धः -ब्धा -ब्धं; 'music-room,' सङ्गीतशाला. For the seven notes of music *See* GAMUT.

MUSICAL, *a.* (Belonging to music) गन्धर्वविद्यासम्बन्धी -न्धिनी -न्धि (न्), सङ्गीतविद्यासम्बन्धी &c., सुस्वरविद्यासम्बन्धी &c., सुस्वरविषयः -या -यं, सुस्वरशास्त्रसम्बन्धी &c., सौवरः -री -रं, गानीयः -या -यं.—(Harmonious, melodious) सुस्वरः -रा -रं, सुश्राव्यः -व्या -व्यं, सुस्वरयुक्तः -क्ता -क्तं.—(Fond of music) सुस्वरप्रियः -या -यं, सुस्वरानन्दी &c., वाद्यप्रियः &c., वादनशीलः -ला -लं, नादप्रियः &c., नादलुब्धः -ब्धा -ब्धं, नादासक्तः -क्ता -क्तं, वादनासक्तः &c., वाद्यश्रवणासक्तः &c.; 'musical instrument,' वादित्रं, वाद्यं, तूर्य्यं, तालितं, आतोद्यं, भाण्डं; 'playing on musical instruments,' वाद्यवादनं, भाण्डवादनं; 'musical glasses,' जलतरङ्गः.

MUSICALLY, *adv.* सुस्वरं -रेण, सुस्वरपूर्व्वं, सुस्वरविद्यानुसारेण.

MUSICIAN, *s.* (One that plays on an instrument) वादकः, वाद्यवादकः, वादित्रवादकः, भाण्डवादकः, वादनकर्त्ता *m.* (र्त्तृ), भाण्डिकः.—(Singer) गायकः, गायिकः, गायकः, गाता *m.* (तृ), गायाकारः.—(One skilled in music) वादनकुशलः, वादित्रकुशलः, सुस्वरविद्याज्ञः, सङ्गीतविद्यातत्त्वज्ञः, गान्धर्वतत्त्वज्ञः; 'celestial musician,' गन्धर्वः, names for some of these are तुम्बुरुः *m.*, विश्वावसुः, चित्ररथः; the last is their chief. *See* GANDHARBA.

MUSING, *part.* or *a.* ध्यायन् -यन्ती -यत् (त्), चिन्तयन् &c. *See* MUSEFUL.

MUSK, *s.* कस्तूरी -रिका, कस्तुरिका, कस्तूरिकाण्डजः, मृगनाभिः *m.*, मृगमदः, मृगनाभिजं -जा, मृगाण्डजा, अण्डजा, नाभिः -भी *f.*, मदः, दर्पः, मदाढ्यः, मदारः, गन्धधूलिः *f.*, गन्धचेलिका, योजनगन्धा, गन्धशेखरः, वातामोदा, मागधः, ललिता; 'musk-bag,' अण्डं, मृगाण्डं, कस्तूरमञ्जिका.

MUSK-DEER, *s.* कस्तूरीमृगः, गन्धमृगः, मृगपालिका, गन्धवाहः.

MUSKET, *s.* आग्नेयनाडिः -डी, गुलिकाप्रक्षेपणी, गुटिकाप्रक्षेपणी, गुलिकाप्रक्षेपणी सुषिरनाली; 'musket-ball,' गुलिका, गुटिका, गुलिः *f.*

MUSK-RAT, *s.* गन्धमूषिकः -का, गन्धाखुः *m.*, गन्धनकुलः, गन्धशुण्डिनी, गन्धाशुण्डिनी, गन्धसूयी, गन्धसुखी, चिक्कः, पुंवृषः.

MUSKY, *a.* कस्तूरीगन्धयुक्तः -क्ता -क्तं, कस्तूरीवासितः -ता -तं, कस्तूरीगन्धवान् -वती -वत् (त्), मृगमदसगन्धः -न्धा -न्धं, सुगन्धिः -न्धिः -न्धि.

MUSLIN, *s.* अंशुकं, सूक्ष्मांशुकं, दुकूलं, सूक्ष्मदुकूलं, सूक्ष्मवस्त्रं.

MUSQUITO, MUSKETO, *s.* मशकः, मशः, मसकः, सूक्ष्ममशकः, सूक्ष्ममक्षिका, भम्भरालिका, सूचिवदनः, रणरणः, कटुकीटः, रात्रिजागरदः, प्राचिका; 'musquito-curtain,' मशहरी, चतुष्की.

MUSSULMAN, *s.* यवनः, यावनः, यावनदेशीयः, यावनमतधारी *m.* (न्), यावनधर्म्मावलम्बी *m.* (न्).

MUST, *v. n.* (Be necessitated). Expressed by the fut. pass. part.; as, 'anger must be restrained,' कोपो नियन्तव्यः; 'I must go, or it is to be gone by me,' मया गन्तव्यं; 'I must do that,' तत् मया कर्त्तव्यं or करणीयं or कार्य्यं. The adverb अवश्यं may be added; as, तत् मया अवश्यं कर्त्तव्यं. Sometimes the verb अर्ह् (c. 1. अर्हति -र्हितुं) has the sense of 'must;' as, 'he must not receive that,' न तत् ग्रासुम् अर्हति.

MUST *s.* (Wine just pressed from the grape) नवमद्यं, नूतनमद्यं.

To MUST, *v. n.* (Grow mouldy and sour) अम्लीभू, दुर्गन्धीभू, विरसीभू.

MUSTACHE, MUSTACHIO, MUSTACHES, *s. pl.* गुम्फः, ओष्ठलोम *n.* (न्), ओष्ठलोमानि *n. pl.*, ओष्ठजं लोम *n.* or रोम, ओष्ठजलोम *n.*, श्मश्रु *n.*, पक्ष्म *n.* (न्), पक्ष्माणि *n. pl.*

MUSTARD, *s.* (Plant) सर्षपः, राजसर्षपः, सरिषपः, कटुकः, कटुस्नेहः, कदम्बकः -कं, कदम्बदः, विषटः, खञ्जना; 'black mustard,' कृष्णिका, राजिका, आसुरी, शवः, क्षुधाभिजननः, क्षुताभिजननः; 'white mustard,' सिद्धार्थः -र्थकः; 'mustard-seed,' सर्षपबीजं, तन्वभः, तन्वकः; 'oil expressed from it,' सर्षपतैलं; 'used for seasoning,' उपस्करः; 'made of mustard,' सार्षपः -पी -पं.

MUSTARD-POT, *s.* सर्षपपात्रं, सर्षपतैलपात्रं, सर्षपभाजनं, सर्षपाधारः.

To MUSTER, *v. a.* समानी (c. 1. -नयति -नेतुं), समूहीकृ, एकत्र कृ, एकत्र सङ्गम् (c. 10. -गमयति -यितुं) or समागम्, एकीकृ, समूह् (c. 1. -जहते -हितुं), समाहृ (c. 1. -हरति -हर्त्तुं), समाह्वे (c. 1. -ह्वयति -ह्वातुं), सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), सङ्ग्रहं कृ.—(Assemble or call over soldiers) सैन्यान् संख्या (c. 2. -ख्याति -तुं) or परिसंख्या or सम्परिख्या or परिगण् (c. 10. -गणयति -यितुं), सैन्यनामानि पृथक् पृथक् ख्या, सैन्यान् एकत्र समानी.

To MUSTER, *v. n.* सङ्गम् (c. 1. -गच्छति -गन्तुं), समागम्, एकत्र आगम्, समे (समेति -तुं, rt. इ), सम्मिल् (c. 6. -मिलति -मेलितं), एकत्र मिल्, समावृत् (c. 1. -वर्त्तते -र्त्तितुं), समूहीभू.

MUSTER-ROLL, *s.* सैन्यपरिसंख्या -ख्यानं, सैन्यपरिगणना, सैन्यनामावलिः *f.*, संख्या.

MUSTINESS, *s.* विरसता, वैरस्यं, पर्य्युषितत्वं, पूतिगन्धता, दुर्गन्धता.

MUSTY, *a.* विरसः -सा -सं, पर्य्युषितः -ता -तं, पूतिगन्धिकः -का -कं.

MUTABILITY, MUTABLENESS, *s.* अस्थिरता, अस्थैर्य्यं, अस्थायित्वं, अधीरता, अधृतिः *f.*, स्थैर्य्याभावः, विकारशीलता, परिणामशीलता.—(Fickleness) चञ्चलत्वं, चाञ्चल्यं, चपलता, चापल्यं, चलचित्तता, लोलता, अनवस्थितिः *f.*

MUTABLE *a.* अस्थिरः -रा -रं, अस्थायी -यिनी -यि (न्), अधीरः -रा -रं, अनवस्थः -स्था -स्थं, अनवस्थितः -ता -तं, परिणामशीलः -ला -लं, विकारशीलः &c., परिणामस्वभावः -वा -वं, अनियतः -ता -तं.—(Fickle) चञ्चलः -ला -लं, चपलः -ला -लं, चलचित्तः -त्ता -त्तं, लोलः -ला -लं, चञ्चलवृत्तिः -त्तिः -त्ति, चपलवृत्तिः &c., क्षणिकबुद्धिः -द्धिः -द्धि.

MUTATION, *s.* विकारः, विकृतिः *f.*, विक्रिया, परिणामः, विपरिणामः, परिवर्त्तः -र्त्तनं, अन्यथाभावः, अवस्थान्तरं, अवस्थाभेदः, स्थितिभेदः.

MUTE, *a.* मूकः -का -कं, जडवाक् *m. f. n.* (च्), जडः -डा -डं, वाक्शून्यः -न्या -न्यं, वाग्रहितः -ता -तं, वाक्शक्तिहीनः -ना -नं, वाणीहीनः -ना -नं, वाणीरहितः -ता -तं, निःशब्दः -ब्दा -ब्दं, निश्शब्दः &c., नादशून्यः &c., मुद्रितमुखः -खा -खं, निर्वचनः -ना -नं, अवाक् (च्), अनुत्तरः -रा -रं, निरुत्तरः -रा -रं.

Digitized by Google

MUTE, *s.* (Person who cannot speak) मूकजनः.—(In grammar) स्वरसहितोच्चार्यव्यञ्जनं.—(Dung of birds) पक्षिपुरीषं, पक्षिभिर् उच्चरितं मलं, गूथः.

To MUTE, *v. n.* पक्षिवत् पुरीषम् उत्सृज् (c. 6. -सृजति -स्रष्टुं), पुरीषोत्सर्गं कृ.

MUTELY, *adv.* मूकवत्, जडवत्, मूकं, निःशब्दं, निरुत्तरं, तूष्णीं.

MUTENESS, *s.* मूकता, मौक्यं, वाक्शून्यता, वाग्राहित्यं, जडता, वाग्जाड्यं, वाक्स्तम्भः, वाग्रोधः, वागभावः, निःशब्दता, अवाक्त्वं, अभाषणं, मौनं, मौनभावः.

To MUTILATE, *v. a.* व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अङ्गच्छेदनं कृ, व्रश्च् (c. 6. वृश्चति, व्रश्चितुं), प्रव्रश्च्, बहुखण्डशः कृ or छिद्, बहुखण्डीकृ, खण्डं खण्डं कृ, खण्ड् (c. 10. खण्डयति -यितुं), विनिकृत् (c. 6. -कृन्तति -कर्त्तितुं), क्षतविक्षतीकृ, छिन्नभिन्नीकृ, विकलीकृ, विकलाङ्गीकृ, अङ्गीकृ, विशस् (c. 1. -शसति -सितुं), अङ्गवैकल्यं कृ.

MUTILATED, *p. p.* छिन्नभिन्नः -न्ना -न्नं, क्षतविक्षतः -ता -तं, व्यवच्छिन्नः &c., व्यवच्छिन्नाङ्गः -ङ्गा -ङ्गं, लूनाङ्गः &c., छिन्नाङ्गः &c., विकलाङ्गः &c., विकलीकृतः -ता -तं, खण्डितः -ता -तं, खण्डिताङ्गः &c., खण्डितविग्रहः -हा -हं, न्यूनाङ्गः &c., हीनाङ्गः &c., अङ्गहीनः -ना -नं, अपाङ्गः &c., विकलेन्द्रियः -या -यं, नष्टेन्द्रियः &c.

MUTILATION, *s.* (The act) व्यवच्छेदः -दनं, अङ्गच्छेदः -दनं, विकलीकरणं, व्यङ्गीकरणं, अङ्गकर्त्तनं, विनिकर्त्तनं, व्रश्चनं, खण्डनं, विशसनं.—(State) विकलता, वैकल्यं, अङ्गवैकल्यं, अङ्गहीनता, न्यूनाङ्गता, हीनाङ्गता, अपाङ्गता, लूनाङ्गता, खण्डितत्वं, खण्डिताङ्गता.

MUTINEER, *s.* आज्ञालङ्घी *m.* (न्), शासनलङ्घी *m.*, आज्ञाविरोधी *m.*, कलहकारी *m.*, सेनाक्षोभकारी *m.*, सेनायां प्रकोपकारी.

MUTINOUS, *a.* आज्ञालङ्घी -ङ्घिनी -ङ्घि (न्), शासनाविधायी &c., अवशवर्त्ती &c., कलहकारी &c., क्षोभकारी &c., प्रकोपकारी &c., प्रतीपः -पा -पं, विप्रतीपः -पा -पं, अवशः -शा -शं, दुःशासनः -ना -नं, दुःशास्यः -स्या -स्यं, अविधेयः -या -यं, अनायत्तः -त्ता -त्तं.

MUTINY, *s.* सेनाप्रकोपः, सैन्यप्रकोपः, सेनाकोपः, प्रकोपः, कोपः, सेनाक्षोभः, सैन्यक्षोभः, शासनलङ्घनं, आज्ञालङ्घनं, कलहः, सैन्यकलहः, सैन्यवैराग्यं, सैन्यविरक्तिः *f.*, शासनव्युत्थानं, आज्ञाव्युत्थानं.

To MUTINY, *v. n.* कलह (nom. कलहायते), कलहं कृ, सेनापतिशासनं लङ्घ् (c. 10. लङ्घयति -यितुं), प्रतीप (nom. प्रतीपायते), व्युत्था (c. 1. -तिष्ठति-तुं, rt. स्था), कोपं कृ, प्रकोपं कृ, क्षोभं कृ, अवशीभू, अनायत्तीभू.

To MUTTER, *v. a.* and *n.* (Utter words with a low indistinct voice) अस्पष्टं वद् (c. 1. वदति -दितुं), अस्पष्टवाचा वद्, अस्पष्टस्वरेण वद्, अस्पष्टोच्चारणेन वद्, अव्यक्तं वद्, or उच्चर् (c. 10. -चारयति -यितुं), नीचवाचा or नीचस्वरेण वद्, नीचैर् वद्, जप् (c. 1. जपति -पितुं), प्रजप्; this last verb is applied especially to the muttering of prayers, though it may be used in other senses; as, 'to mutter into the ear,' कर्णे जप्, कर्णम् उपजप्.—(Sound with a low rumbling voice) गर्ज् (c. 1. गर्जति -र्जितुं), स्तन् (c. 1. स्तनति -नितुं), गम्भीरशब्दं कृ.

MUTTER, MUTTERING, *s.* (Uttering with a low voice) अस्पष्टोच्चारणं, अव्यक्तोच्चारणं, नीचभाषणं, नीचवाक्यं, नीचस्वरेण भाषणं, उपांशु वादः.—(Low rumbling sound) गर्जनं, गर्जितं, आमन्द्रशब्दः, गम्भीरशब्दः; 'of clouds,' मेघनिर्घोषः.—(Inaudible repetition of prayers, &c.) जपः, जापः, जपनं, स्वाध्यायः, जाप्यं, जपजाप्यं, उपांशुः *m.*

MUTTERED, *p. p.* उपांशु or अस्पष्टं or नीचवाचा उच्चारितः -ता -तं, जपितः &c.; 'to be muttered,' जप्यः -प्या -प्यं, जाप्यः &c., जपनीयः -या -यं; 'having muttered,' जपित्वा.

MUTTERER, *s.* अस्पष्टवादी *m.* (न्), नीचवादी *m.*, नीचभाषी *m.*, उपांशुवादी, जापकः, जपनकृत् *m.*; 'a devotee who mutters,' जप्यपूकः.

MUTTERINGLY, *adv.* अस्पष्टवाचा, नीचवाचा, उपांशु, नीचैस्.

MUTTON, *s.* औरभ्रं, औरभ्रमांसं, मेषमांसं, उरभ्रमांसं, अविमांसं.

MUTTON-CHOP, *s.* औरभ्रमांसखण्डः, मेषमांसखण्डः -खण्डं.

MUTUAL, *a.* परस्परः -रा -रं, अन्योन्यः -न्या -न्यं, इतरेतरः -रा -रं, व्यतिकरः -रा -रं, मिथः in comp.; 'mutual quarrel,' अन्योन्यकलहः; 'assistance,' परस्परोपकारः; 'assent,' परस्परानुमतिः *f.*; 'connexion,' अन्योन्यसम्बन्धः, मिथःसम्बन्धः, व्यतिषङ्गः; 'aversion,' अन्योन्यभेदः; 'dependence,' अन्योन्याश्रयः; 'enjoyment,' व्यतिकरसुखं; 'attraction,' अन्योन्याकर्षकत्वं. The idea of 'mutual' is often expressed by some of the prepositions वि, आ, अव, अति, प्रति, प्र in combination, or by an adverbial compound formed by doubling a word; as, 'mutual reproach or abuse,' व्यवक्रोशः, व्यावक्रोशी, व्यावभाषी; 'laughter,' व्यवहासः, व्यावहासी; 'striking,' दण्डादण्डि, प्रतिघातः, प्रतिहननं, व्यतिहारः; 'injury,' विप्रतिकारः, विप्रकारः, प्रतिकारः, विप्रकृतिः *f.*, प्रत्यपकारः; 'assistance,' प्रत्युपकारः; 'connexion,' विप्रतिपत्तिः *f.*; 'salutation,' प्रतिपूजनं, प्रत्यभिवादः; 'accusation,' प्रत्यभियोगः; 'recognition,' प्रत्यभिज्ञानं.

MUTUALITY, *s.* परस्परयोगः, अन्योन्ययोगः, इतरेतरयोगः, परस्परता, अन्योन्यत्वं, परस्परभावः, अन्योन्यभावः, व्यतिकरः, व्यतिहारः, व्यतीहारः, अन्योन्यसम्बन्धः, अन्योन्याश्रयः, व्यतिषङ्गः.

MUTUALLY, *adv.* परस्परं -रां, अन्योन्यं, इतरेतरं, मिथस्, अन्योन्यस्य, परस्पर &c. in comp., उभय in comp., 'mutually assisting,' परस्परोपकारी &c.; 'mutually agreed,' परस्परानुमतः -ता -तं, उभयानुमतः &c.; 'connected,' मिथःसङ्गः -ङ्गा -ङ्गं, व्यतिषक्तः -क्ता -क्तं, व्यतिषङ्गवान् -वती &c.; 'taken,' अन्योन्यापहृतः -ता -तं.

MUZZLE, *s.* (Mouth, entrance) मुखं, छिद्रं, प्रवेशः, प्रवेशद्वारं, निःसरणं.—(Fastening for the mouth) मुखबन्धनं -नी, मुखरोधनी.

To MUZZLE, *v. a.* मुखं बन्ध् (c. 9. बध्नाति, बन्धुं) or रुध् (c. 7. रुणद्धि, रोद्धुं).

MUZZLED, *p. p.* बद्धमुखः -खा -खं, रुद्धमुखः -खा -खं, निरुद्धमुखः &c.

MY, *pron. a.* मम gen. c. (अस्मत्), मदीयः -या -यं, मामकीनः -ना -नं, अस्मदीयः -या -यं, मत् or अस्मत् in comp.; 'my master,' मम प्रभुः or मत्प्रभुः or अस्मत्प्रभुः; 'my daughter,' मम सुता or मत्सुता.

MYOGRAPHY, MYOLOGY, *s.* स्नायुवर्णना, स्नायुविवरणं, पेशीवर्णनं.

MYOPE, *s.* गजदृष्टिः *m. f.*, गजनेत्रः -त्रा, अल्पदृक् *m. f.*, अदीर्घदृष्टिः.

MYOPY, *s.* गजदृष्टित्वं, अदीर्घदृष्टित्वं, अदूरदर्शित्वं.

MYRIAD, *s.* दशसहस्रं, अयुतं; 'by myriads,' दशसहस्रशस्.

MYRMIDON, *s.* परिचरः, परिधिस्थः, भक्तसैनकारी सैनिकः or अनुचरः.

MYROBALAN, *s.* (Emblic myrobalan, plant or fruit) आमलकः -की -कं, तिष्यफला, अमृता, वयस्था, वयःस्था, कायस्था.—(Beleric) विभीतकः -की -कं, अक्षः -क्षकः, तुषः, तुसः, कर्षफलः, भूतवासः, कलिद्रुमः.—(Yellow) अभया, व्यथा, पथ्या, वयस्था, वयःस्था, कायस्था, पूतना, अमृता, हरीतकी, हैमवती, चेतकी, श्रेयसी, शिवा.—(The three myrobalans) त्रिफला.

MYRRH, *s.* गन्धरसः, रसगन्धः, सुरसं, महागन्धं, जातीरसं, गान्धारं, वोलः, प्राणः, पिण्डः, गोपः -पकः, गोसः, पिण्डगोसः, गोपरसः, गोलः -लकः, रसः, शशः, गोसशशः.

MYSELF, *pron.* सोऽहम्, आत्म *n.* (न्); 'I will kill myself,' आत्मानं हनिष्यामि.

Digitized by Google

MYSTERIOUS, *a.* गूढः -ढा -ढं, अतिगूढः &c., निगूढः &c., गूढार्थः -र्था -र्थं, निगूढार्थः &c., गुप्तः -प्ता -प्तं, अतिगुप्तः &c., गुप्तार्थः &c., गहनः -ना -नं, सुगहनः -ना -नं, गुह्यः -ह्या -ह्यं, गोप्यः -प्या -प्यं, गोपनीयः -या -यं, रहस्यः -स्या -स्यं, सुरहस्यः &c., दुर्ज्ञेयः -या -यं, दुर्बोधः -धा -धं, बोधागम्यः -म्या -म्यं, अव्यक्तः -क्ता -क्तं, अस्पष्टः -ष्टा -ष्टं; 'profoundly mysterious,' परमगहनः -ना -नं; 'mysterious in his ways,' अव्यक्तवर्त्मा -र्त्मा -र्त्म (न्).

MYSTERIOUSLY, *adv.* गूढं, अतिगूढं, परमगहनं, अव्यक्तं, सुरहस्यं.

MYSTERIOUSNESS, *s.* गूढता, अतिगूढता, निगूढता, गूढार्थता, निगूढार्थता, गुह्यता, गोप्यता, दुर्ज्ञेयता, रहस्यता, अव्यक्तता.

MYSTERY, *s.* गूढं, निगूढं, रहस्यं, गुह्यं, गूढतत्त्वं, निगूढतत्त्वं, गूढार्थः, निगूढार्थः, गहनवस्तु *n.*, मर्म्म *n.* (न्), गोप्यं, गोपनीयं, निगूढविषयः.

MYSTIC, MYSTICAL, *a.* गूढार्थः -र्था -र्थं, गुप्तार्थः &c., गुह्यः -ह्या -ह्यं. *See* MYSTERIOUSNESS. (Involving some secret meaning). गूढार्थगर्भः -र्भा -र्भं, गूढाभिप्रायः -या -यं, सङ्केतगर्भः &c., लाक्षणिकः -की -कं; 'mystic verse,' मन्त्रः; 'mystic letter,' बीजाक्षरं.

MYSTICALLY, *adv.* गूढार्थतस्, निगूढार्थतस्, सगूढार्थं, गुप्तार्थतस्.

MYSTICALNESS, MYSTICISM, *s.* गूढता, गूढार्थता, गुप्तार्थत्वं, गहनत्वं, रहस्यता.

MYSTIFIED, *p. p.* मोहितः -ता -तं, विमोहितः -ता -तं, सगूढार्थः -र्था -र्थं.

To MYSTIFY, *v. a.* गूढीकृ, गहनीकृ, सगूढार्थं -र्थां कृ, गूढतत्त्वानि कथयित्वा परबुद्धिं मुह् (c. 10. मोहयति -यितुं) or विमुह्.

MYTH, *s.* पुरावृत्तकथा, पुरावृत्तोपाख्यानं, पुराणकथा, पुराणोक्तोपाख्यानं, पुराणोक्तेतिहासः, पुरावृत्ताख्यानं, प्राचीनकथा, पुरावृत्तं, पुराणं, कूटार्थकथा.

MYTHIC, MYTHICAL, *a.* पुरावृत्तकथासम्बन्धी -न्धिनी &c., पौराणिकः -की -कं, पुराणकथितः -ता -तं, पुराणोक्तः -क्ता -क्तं, पुराकल्पितः -ता -तं, कूटार्थः -र्था -र्थं.

MYTHOLOGICAL, *a.* पुराणकथासम्बन्धी &c., पुरावृत्तसम्बन्धी &c., देवतादिकथाविषयः -या -यं, ऐतिहासिकः -की -कं, देवतोपाख्यानविषयः &c. *See* MYTHIC.

MYTHOLOGIST, *s.* पुरावृत्तकथकः, पुराणविद् *m.*, देवतोपाख्यानरचकः.

MYTHOLOGY, *s.* पुरावृत्तशास्त्रं, पुराणशास्त्रं, पुराणेतिहासः, इतिहासः, पुराणकथाविद्या, देवतादिकथाविषया विद्या, देवतोपाख्यानविषया विद्या, देवताख्यानं.

N.

To NAB, *v. a.* अकस्माद् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं).

NACRE, NACKER, NAKER, *s.* शुक्तिपुटं, मुक्तास्फोटः.

NADIR, *s.* अधःस्वस्तिकं, अधोबिन्दुः *m.*, अधरः, ब्रह्माण्डाधोभागः.

NAG, *s.* अश्वकः, अश्वः, घोटकः. *See* HORSE. (Paramour) जारः.

NÁGA, *s.* (A demigod, having a human face with a serpent's shape. These fabulous beings are said to have sprung from Kadrú, the wife of Kaśyapa, and to have been created in order to people Pátála, or the infernal regions.) नागः, कादृवेयः, कद्रुपुत्रः, कद्रूसुतः. The chief of these beings is called शेषः, अनन्तः, वासुकिः *m.*, सर्पराजः. The following are some of the other principal Nágas: तक्षकः, पद्मः, महापद्मः, शङ्खः.

NAIAD, *s.* जलदेवता, अप्सराः *f.* (स्), अप्सरा, नदीदेवता, उदकवती.

NAIL, *s.* (Of the finger) नखः, नखरः -रा -रं, करुहः, करजः, पाणिजः, पाणिरुहः, पाणिरुह् *m.* (ह्), करकण्टकः, अङ्गुलीसम्भूतः, पुनर्भवः, पुनर्नवः, भुजाकण्टः, कामाङ्कुशः; 'a pared nail,' खण्डकः. —(Of iron, &c.) लोहकीलः -लकः, लौहकीलः -लकः, लोहशङ्कुः *m.*, कीलः -लकः, शङ्कुः *m.*

To NAIL, *v. a.* (Fasten with nails) कील् (c. 10. कीलयति -यितुं), कीलैर् बन्ध् (c. 9. बध्नाति, बन्द्धुं) or व्यध् (c. 4. विध्यति, व्यद्धुं), कीलबद्धं -द्धां कृ, कीलविद्धं -द्धां कृ, शङ्कुबद्धं -द्धां कृ.

NAILED, *p. p.* कीलितः -ता -तं, कीलबद्धः -द्धा -द्धं, शङ्कुप्रतिबद्धः &c.

NAIVE, *a.* सरलमतिः -तिः -ति, विमलार्थकः -का -कं, निर्व्याजः -जा -जं, दक्षिणः -णा -णं, मायाहीनः -ना -नं, वैलक्ष्यहीनः &c., निर्व्यलीकः -का -कं.

NAIVELY, *adv.* सारल्येन, निर्व्याजं, अमायया, दाक्षिण्येन, अविलक्षितं.

NAIVETE, *s.* सारल्यं, सरलता, मायाहीनता, अमाया, अव्याजः, अवैलक्ष्यं, दाक्षिण्यं, निर्व्यलीकता, शुद्धमतित्वं, भावशुद्धता.

NAKED, *a.* (Having no clothes) नग्नः -ग्ना -ग्नं, नग्नकः -का -कं, विवस्त्रः -स्त्रा -स्त्रं, निर्वस्त्रः &c., अवस्त्रः &c., वस्त्रहीनः -ना -नं, वस्त्ररहितः -ता -तं, वस्त्रशून्यः -न्या -न्यं, अवासाः -सा -सः (स्), विवासाः &c., विवासः -सा -सं, दिग्वासाः &c., दिगम्बरः -रा -रं, व्यंशुकः -का -कं, विकोशः -शा -शं, विवसनः -ना -नं, वसनहीनः -ना -नं, आच्छादनहीनः -ना -नं, अपरिच्छन्नः -न्ना -न्नं, अपरिच्छदः -दा -दं, परिच्छदहीनः -ना -नं, वेशहीनः -ना -नं, अवधूतवेशः -शा -शं, गगणपरिधानः -ना -नं, अपरिधानः &c., कोशः -शा -शं, काकरुकः -का -कं.—(Open, uncovered, exposed) विवृतः -ता -तं, अनावृतः -ता -तं, अपवृतः -ता -तं, अनाच्छादितः -ता -तं.—(Unarmed) असज्जः -ज्जा -ज्जं, असन्नद्धः -द्धा -द्धं.—(Unadorned) अभूषितः -ता -तं. —(Bare, mere) केवलः -ला -लं, मात्रकः -का -कं, मात्रं, शून्यः -न्या -न्यं, शुद्धः -द्धा -द्धं; 'it is not seen by the naked eye,' नेत्रमात्रेण or केवलनेत्रेण न दृश्यते; 'a naked woman,' नग्ना, नग्निका, कोटरी, कोटवी.

NAKEDLY, *adv.* (Without covering) वस्त्रेण विना, आच्छादनं विना, अपरिच्छन्नं, नग्नवत्.—(Barely) केवलं, मात्रेण, शून्यं.

NAKEDNESS, *s.* नग्नता -त्वं, विवस्त्रत्वं, वस्त्रहीनता, वस्त्रशून्यता, वस्त्ररहितं, वसनहीनता, वेशहीनता, आच्छादनहीनता, अपरिच्छदं, नग्नभावः, नग्नावस्था.—(Bareness, openness) शून्यता, शुद्धता, विवृतत्वं, अनावृतत्वं.

NAME, *s.* नाम *n.* (न्), नामधेयं -यः, संज्ञा, अभिधानं, अभिधा, अभिधेयं, आख्या, अभिख्या, आह्वा, आह्वयः, आह्वानं, आह्वायः, उपाधिः *m.*, अधिवचनं, लक्षणं, व्यपदेशः; 'bad name,' दुर्नाम *n.* (न्); 'family name,' कुलनाम *n.*, उपनाम, पद्धतिः -ती *f.*; 'name given at birth,' जन्मनाम *n.*; 'from the constellation,' नक्षत्रनाम *n.*; 'addressing by name,' नामग्रहः -हणं, सम्बोधनं; 'to address by name,' नाम ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), नाम्ना अभिवद् (c. 1. -वदति -दितुं) or अभिवच् (c. 2. -वक्ति -क्तुं), सम्बोधनं कृ; 'giving a name,' नामकरणं; 'bearing the name of,' नामधारी -रिणी &c.; 'calling to mind the name of,' नामस्मरणं; 'forgetting the name,' नामविस्मृतिः *f.*; 'uttering the name of,' नामोच्चारणं; 'abusing by name,' नामापराधः; 'list of names,' नामावलिः *f.*; 'by name,' नाम्ना, नामतस्, नाम, नामधेयतस्; 'in my name,' मद्वचनात्, मम नाम्ना; 'what is his name?' किन्नामधेयः सः; 'affix to the name of Brahmans,' शर्म्मा *m.* (न्), as विष्णुशर्म्मा.—(Reputation) प्रतिष्ठा, मर्य्यादा, कीर्त्तिः *f.*, ख्यातिः *f.*; 'one who has established a name,' लब्धप्रतिष्ठः -ष्ठा -ष्ठं; 'good name,' सुकीर्त्तिः *f.*, सत्कीर्त्तिः *f.*, सुख्यातिः *f.*; 'bad name,' कुकीर्त्तिः *f.*, दुष्कीर्त्तिः *f.*, अपकीर्त्तिः *f.*, अकीर्त्तिः, कुख्यातिः *f.*, अख्यातिः *f.*

Digitized by Google

अमर्य्यादा, कुप्रतिष्ठा.—(Celebrity, renown) यशस् *n.*, विश्रुतिः *f.*, ख्यातिः *f.*, विख्यातिः *f.*, प्रख्यातिः *f.*, परिख्यातिः, कीर्त्तिः *f.*, प्रसिद्धिः *f.*

To NAME, *v. a.* अभिधा (c. 3. -दधाति -धातुं), आख्या (c. 2. -ख्याति -तुं), कृत् (c. 10. कीर्त्तयति -यितुं), प्रकृत्, संकृत्, परिकृत्, अनुकृत्, उदाहृ (c. 1. -हरति -हर्त्तुं), प्रचक्ष् (c. 2. -चष्टे), नाम कृ or दा, संज्ञां कृ; 'they named him Ráma,' तस्य नाम राम इति चक्रुः.—(Mention by name) नाम ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), नामग्रहणं कृ, नाम्ना अभिवद् (c. 1. -वदति -दितुं), नामोदाहरणं कृ, सम्बुध् (c. 10. -बोधयति -यितुं), सम्बोधनं कृ, नामनिर्देशं कृ, नामोच्चारणं कृ, नामस्मरणं कृ.

NAMED, *p. p.* अभिहितः -ता -तं, आख्यातः -ता -तं, प्रोक्तः -क्ता -क्तं, संज्ञितः -ता -तं, उदाहृतः -ता -तं, प्रत्युदाहृतः -ता -तं, कीर्त्तितः -ता -तं, परिकीर्त्तितः -ता -तं, व्यपदिष्टः -ष्टा -ष्टं, स्मृतः -ता -तं, नामाभिहितः -ता -तं; the following may be used in composition: नामकः -का -कं, नामा -म्नी -म, अभिधानः -ना -नं, अभिधः -धा -धं, आख्यः -ख्या -ख्यं, आह्वः -ह्वा -ह्वं, आह्वयः -या -यं, नामधेयः -या -यं, संज्ञः -ज्ञा -ज्ञं; as, 'a king named Suvarna,' सुवर्णाख्यो राजा; 'in a city named Kánchanapur,' काञ्चनपुरनाम्नि नगरे; 'a prince named Súdraka,' शूद्रकनामा नृपतिः; 'named Vibhíshana,' विभीषणाभिधः or विभीषणाभिधानः; 'a woman named Chandrá,' चन्द्रानाम्नी स्त्री. Sometimes the adverb नाम is used as सुवर्णो नाम राजा, चन्द्रा नाम स्त्री.—(Having a name) संज्ञावान् -वती -वत् (त्), प्राप्तनामा -मा -म (न्), लब्धनामा &c., प्राप्ताभिधानः -ना -नं, नामधारी -रिणी -रि (न्), नामधारकः -का -कं; 'is named,' अभिधीयते, ख्यायते, आख्यायते.

NAMELESS, *a.* अनामकः -का -कं, नामहीनः -ना -नं, नामरहितः -ता -तं, अनभिधानः -ना -नं, अनामा -मा -म्नी -म (न्), अप्रसिद्धः -द्धा -द्धं.

NAMELY, *adv.* नाम, नामतस्, यथा, अथैतस्, अथात्, यथाक्रमं.

NAMESAKE, *s.* समनामकः, समनामधारी *m.* (न्), एकनामकः.

NAMING, *s.* (Giving a name) नामकरणं, नामस्थापनं.—(Mentioning by name) नामग्रहः -हणं, नामनिर्देशः, नामोच्चारणं.

NAP, *s.* (Short sleep) अल्पनिद्रा, अदीर्घनिद्रा, अदीर्घस्वप्नः, वामकुक्षिः *f.*—(Down) लोम *n.* (न्), रोम *n.* (न्).

To NAP, *v. n.* अल्पनिद्रां कृ, अदीर्घनिद्रां कृ, अल्पकालमात्रं स्वप् (c. 2. स्वपिति -तुं), अदीर्घकालं स्वप्.

NAPE, *s.* (Of the neck) मन्या, मन्याका, कन्धरः -रा, ग्रीवा, घाटः -टी -टिका, कृकाटिका, कलम्बिका, सीमा *m.* (न्), पश्चाद्ग्रीवा शिरा.

NAPKIN, *s.* मुखमार्जनी, वदनमार्जनी, वरकं, नक्तकः.

NAPLESS, *a.* लोमहीनः -ना -नं, निर्लोमा -मा -म (न्), अविद्यमानलोमा &c.

NAPPY, *a.* लोमशः -शा -शं, बहुलोमा -मा -म (न्), लोममयः -यी -यं.—(Frothy) फेनलः -ला -लं, फेनिलः -ला -लं.

NARBADÁ, *s.* (River, which rises in the Vindhyá mountain called Amrakúta, and runs westward about 750 miles into the gulf of Cambay below Baroche) नर्म्मदा, रेवा, सोमसुता, सोमोद्भवा, मेखलकन्यका, मेकलकन्यका, मेकलाद्रिजा, मेखला, पूर्व्वगङ्गा.

NARCOTIC, *a.* स्वप्नकारी -रिणी -रि (न्), स्वप्नकृत् *m. f. n.*, निद्राकारी &c., निद्राकृत् *m. f. n.*, निद्राजनकः -का -कं, उपशायी -यिनी &c., उपशमनकारी &c.

NARCOTIC, *s.* निद्राजनकम् औषधं, उपशमनं, ग्राही *m.* (न्), उपविषं.

NARD, *s.* जटिला, जटावती, जटामांसी, जटाला. *See* SPIKENARD.

To NARRATE, *v. a.* कथ् (c. 10. कथयति -यितुं), सङ्कथ्, आख्या (c. 2. -ख्याति -तुं), समाख्या, ख्या in caus. (ख्यापयति -यितुं), निवेद् (c. 10. -वेदयति -यितुं), आवेद्, वर्ण् (c. 10. वर्णयति -यितुं), उपवर्ण्, अनुवर्ण्, संवर्ण्, शंस् (c. 1. शंसति -सितुं), श्रु (c. 10. श्रावयति -यितुं), आश्रु, संश्रु, निगद् (c. 1. -गदति -दितुं), अभिधा (c. 3. -दधाति -धातुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), कृत् (c. 10. कीर्त्तयति -यितुं), अनुकृत्, व्याहृ (c. 1. -हरति -हर्त्तुं), उदाहृ, आचक्ष् (c. 2. -चष्टे), समाचक्ष्, विचक्ष्, परिचक्ष्, प्रचक्ष्, निरूप् (c. 10. -रूपयति -यितुं), वद् (c. 1. वदति -दितुं), विवरणं कृ, कथां कृ.

NARRATED, *p. p.* कथितः -ता -तं, आख्यातः -ता -तं, समाख्यातः -ता -तं.

NARRATION, *s.* (Act of telling) कथनं, आख्यानं, उपकथनं, उपाख्यानं, ख्यापनं, वर्णनं -ना, शंसनं, प्रशंसनं, विवरणं, अनुकीर्त्तनं, व्याहरणं, निरूपणं; 'of a story,' कथोपकथनं, कथोपाख्यानं.—(A story) कथा. *See* the next.

NARRATIVE, *s.* कथा, उपाख्यानं, उपकथा, परिकथा, आख्यानं, आख्यायिका, कथानुबन्धः, कथाप्रबन्धः, प्रबन्धः, वृत्तान्तः, वार्त्ता, चरितं, गोष्ठी, इतिहासः.

NARRATIVE, *a.* काथिकः -की -कं, विवरणकारी -रिणी &c., कथनः -ना -नं.

NARRATOR, *s.* कथकः, काथिकः, उपकथकः, आख्यायकः, कथनकृत् *m.*

NARROW, *a.* (Not broad, contracted, confined) अविस्तीर्णः -र्णा -र्णं, अविस्तृतः -ता -तं, सङ्कटः -टा -टं, सबाध in comp., निरन्तरालः -ला -लं, सङ्कुचितः -ता -तं, सङ्कोचितः -ता -तं, संवृतः -ता -तं, निरुद्धः -द्धा -द्धं, संरुद्धः &c., संहतः -ता -तं, संवृतः -ता -तं, अविपुलः -ला -लं, तनुः -नुः -न्वी -नु, अपृथुः &c.—(Confined in space) अल्पावकाशः -शा -शं, अल्पपरिमाणः -णा -णं, अवितनः -ता -तं, अनायतः &c., निरायतः &c.—(Limited) मितः -ता -तं, परिमितः -ता -तं, नियतः -ता -तं, संयतः -ता -तं.—(Of narrow views) अल्पदृष्टिः -ष्टिः -ष्टि, कृपणबुद्धिः &c. *See* NARROW-MINDED. (Stingy) कृपणः -णा -णं, अव्ययशीलः -ला -लं, अनुदारः -रा -रं, स्वल्पव्ययी -यिनी &c.—(Close, accurate) सूक्ष्मः -क्ष्मा -क्ष्मं, अतिसूक्ष्मः &c.—(Small) अल्पः -ल्पा -ल्पं, स्वल्पः &c.

To NARROW, *v. a.* सङ्कुच् (c. 1. -कोचति -चितुं), सबाध् (c. 1. -बाधते -धितुं), संवृ (c. 5. -वृणोति -वरितुं -रीतुं), कुच् (c. 1. कुचति -चितुं, c. 10. कुच्चयति -यितुं), संहृ (c. 1. -हरति -हर्त्तुं), सङ्कटीकृ.—(Limit) परिमा (c. 2. -माति -तुं), संयम् (c. 1. -यच्छति -यन्तुं).

To NARROW, *v. n.* सङ्कुच् in pass. (-कुच्यते), सङ्कुचितः -ता -तं भू, सङ्कोचम् इ (c. 2. एति -तुं), सङ्कटीभू, सबाधीभू.

NARROWED, *p. p.* सङ्कुचितः -ता -तं, सङ्कोचितः -ता -तं, संवृतः -ता -तं, आकुञ्चितः -ता -तं, संहतः -ता -तं, संहृतः &c., संरुद्धः -द्धा -द्धं.

NARROWLY, *adv.* (With little breadth) अविस्तीर्णं, अविस्तृतं, सङ्कटं, सबाधं.—(Closely) सूक्ष्मं, अतिसूक्ष्मं, अभिनिवेशेन, सावहितं.—(Nearly, all but) ईषदूनं, अल्पोनं, कृच्छ्रेण, कष्टेन.

NARROW-MINDED, *a.* कृपणबुद्धिः -द्धिः -द्धि, कृपणधीः -धीः -धि, कृपणचेताः -ताः -तः (स्), मितमतिः -तिः -ति, मितबुद्धिः &c., अनुदारशीलः -ला -लं.

NARROWNESS, *s.* सबाधता, सङ्कटत्वं, अविस्तीर्णता, अविपुलता, अविस्तृतिः *f.*, साङ्कट्यं, अल्पविस्तारः, अल्पविस्तृतिः *f.*, सङ्कुचितत्वं, सङ्कोचः, अपृथुता, तनुता -त्वं, तानवं.—(Of extent) अल्पपरिमाणं, मितता, परिमितता, अल्पावकाशः, अवितनिः *f.*—(Poverty) कार्पण्यं, दीनता.—(Illiberality) कृपणता, दैन्यं, अनुदारता.—(Of mind) बुद्धिकार्पण्यं, कृपणबुद्धित्वं, बुद्धिदीनता.—(Closeness) सूक्ष्मता, अतिसूक्ष्मता.

NASAL, *a.* नस्यः -स्या -स्यं, नास्यः -स्या -स्यं, नासिकासम्बन्धी -न्धिनी &c., नासिक्यः -क्या -क्यं.—(In grammar) अनुनासिकः -का -कं,

Digitized by Google

सानुनासिकः -का -कं, सानुस्वारः -रा -रं; 'the nasal dot,' अनुस्वारः, अनुनासिकचिह्नं.

NASAL, *a.* (Letter) अनुनासिकं, सानुनासिकं, अनुनासिकवर्णः.

NASTILY, *adv.* कुत्सितं, अशुद्धं, मलिनं, समलं, समालिन्यं, गर्हितं.

NASTINESS, *s.* मालिन्यं, मलिनता, समलता, मलं, अमेध्यता, कुत्सितत्वं, कौत्सित्यं, अशुद्धता, अपवित्रता, गर्ह्यता, गर्हितत्वं, बीभत्सजनकता.

NASTY, *a.* मलिनः -ना -नं, समलः -ला -लं, मलवान् -वती -वत् (त्), अशुद्धः -द्धा -द्धं, अमेध्यः -ध्या -ध्यं, कुत्सितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, बीभत्सजनकः -का -कं, अपवित्रः -त्रा -त्रं; 'nasty conversation,' कुत्सितवाक्यं.

NATAL, *a.* जन्मसम्बन्धी -न्धिनी &c., जन्मविषयः -या -यं, जन्म in comp.; as, 'natal day,' जन्मदिवसः; 'natal country,' जन्मभूमिः *f.*

NATATION, *s.* (Swimming) तरणं, सन्तरणं, प्लवः -वनं.

NATION, *s.* जातिः *f.*, लोकः, जनपदः, प्रजा, वर्णः, जनता, देशः, विषयः, राष्ट्रं, देशजनः, देशलोकः, देशवासिनः *m. pl.*, राष्ट्रनिवासिनः, विशेषदेशजनता.

NATIONAL, *a.* (Pertaining to a nation) दैशिकः -की -कं, देशीयः -या -यं, देश्यः -श्या -श्यं, देशी -शिनी -शि (न्), जातीयः &c., राष्ट्रीयः &c., राष्ट्रिकः -की -कं, राष्ट्रियः -या -यं, देश in comp.; 'national custom,' देशव्यवहारः, देशाचारः; 'national law,' देशधर्म्मः, जनपदधर्म्मः; 'national calamity,' राष्ट्रं, उत्पातः.—(Proud of one's own country) स्वदेशाभिमानी -निनी -नि (न्), स्वलोकाभिमानी &c., स्वराष्ट्राभिमानी &c.; 'national pride,' देशाभिमानं.—(General) सामान्यः -न्या -न्यं, सर्व्वसामान्यः &c., साधारणः -णी -णं, सर्व्वजनीयः -या -यं.

NATIONALITY, *s.* स्वदेशाभिमानिता, स्वलोकाभिमानं, स्वराष्ट्राभिमानं.

NATIONALLY, *adv.* जातितस्, लोकतस्, देशधर्म्मानुसारेण, सामान्यतस्.

NATIVE, *a.* (Produced by nature, not artificial) सहजः -जा -जं, स्वाभाविकः -की -कं, स्वभावसिद्धः -द्धा -द्धं, स्वभावजः -जा -जं, प्रकृतिस्थः -स्था -स्थं, प्राकृतः -ती -तं, स्वयङ्कृतः -ता -तं, अकृत्रिमः -मा -मं, सांसिद्धिकः -की -कं; 'native salt,' स्वयङ्कृतम् ऊषरलवणं. *See* NATURAL. (Indigenous, not foreign) देशजः -जा -जं, देशोद्भवः -वा -वं, देशोत्पन्नः -न्ना -न्नं, स्वदेशजः &c., देशीयः -या -यं, दैशिकः -की -कं.—(Conferred by birth) जन्मप्राप्तः -प्ता -प्तं, जन्मसिद्धः -द्धा -द्धं, जन्मार्जितः -ता -तं.—(Natal) जन्म in comp., स्व in comp.; 'native country,' जन्मभूमिः *f.*, जन्मदेशः, जन्मवसुधा, स्वभूमिः *f.*, स्वराष्ट्रं, स्वविषयः, स्वदेशः, मूलायातनं, अभिजनः; 'native place,' जन्मस्थानं.

NATIVE, *s.* देशजः, देशोद्भवः, देशजातः, देशीयलोकः, देशीयजनः, देशलोकः, देशजनः, देशवासी *m.* (न्), राष्ट्रीयलोकः.

NATIVITY, *s.* जन्म *n.* (न्), जातिः *f.*, उत्पत्तिः *f.*, उद्भवः, सम्भवः, जनिमा *m.* (न्); 'astrological calculation of nativity,' जातकं; 'astrological record of it,' जन्मपत्रं -त्रिका; 'month of one's nativity,' जन्ममासः; 'name given at it,' जन्मनाम *n.* (न्), नक्षत्रनाम; 'star of one's nativity,' जन्मनक्षत्रं; 'sign,' जन्मराशिः *m.*, जन्मलग्नं.

NATRON, *s.* सज्जिः *f.*, सज्जिका, सज्जिकाक्षारः, सृजिकाक्षारः, क्षारः, कापोतः, सौवर्च्चलः, श्रुग्निका, सुखवर्चकः.

NATTY, *a.* विनीतः -ता -तं, परिमृष्टपरिच्छदः -दा -दं.

NATURAL, *a.* (Pertaining to nature, effected by nature, innate, not acquired) स्वाभाविकः -की -कं, प्राकृतिकः -की -कं, नैसर्गिकः -की -कं, सांसिद्धिकः -की -कं, स्वभावसिद्धः -द्धा -द्धं, प्रकृतिसिद्धः &c., सहजः -जा -जं, साहजिकः -की -कं, सहजातः -ता -तं, अन्तर्जातः -ता -तं, निजः -जा -जं, स्वजः &c., अन्तर्जः &c., स्वभावजः &c., निसर्गजः &c., अन्तर्भवः -वा -वं, स्वयङ्कृतः -ता -तं, स्वः -स्वा -स्वं, प्रकृतिस्थः -स्था -स्थं, सांसिद्धिकः -की -कं, भाविकः -की -कं, प्राकृतः -ती -तं, औत्सर्गिकः -की -कं, अनुत्पन्नः -न्ना -न्नं, औत्पत्तिकः -की -कं; 'natural friend,' सहजमित्रं, प्राकृतमित्रं; 'natural enemy,' सहजारिः *m.*—(According to nature) भावानुगः -गा -गं, स्वभावानुगः &c., भावानुलोमः -मा -मं, स्वभावयोग्यः -ग्या -ग्यं, स्वभावानुसारी -रिणी &c., अनुलोमः -मा -मं, प्रकृत्यनुलोमः &c.—(According to the natural course, regular, proper) यथायोग्यः -ग्या -ग्यं, योग्यः &c., यथाक्रमः -मा -मं, यथामार्गः -र्गा -र्गं, यथायुक्तः -क्ता -क्तं, यथान्यायः -या -यं.—(Not artificial) अकृत्रिमः -मा -मं, अकृतकः -का -कं, अयत्नकृतः -ता -तं, अप्रतिविधानः -ना -नं, देवनिर्म्मितः -ता -तं; 'natural cave,' देवखातं.—(Not forced, easy, unaffected) अक्लिष्टः -ष्टा -ष्टं, अप्रतियत्नकृतः -ता -तं, सुलभः -भा -भं, अविलक्षितः -ता -तं, वैलक्ष्यहीनः -ना -नं.—(According to reality, true) यथार्थः -र्था -र्थं, सत्यः -त्या -त्यं, अकृत्रिमः -मा -मं, सरलः -ला -लं, प्रकृतः -ता -तं.—(Illegitimate) अनौरसः -सी, उपस्त्रीजातः -ता, जारजः -जा, अविधिजातः -ता, विजातः -ता.—(Coming at the right time) यथाकालः -ला -लं, कालिकः -की -कं, कालोपयुक्तः -क्ता -क्तं, कालभूतः -ता -तं, अनुपघाती -तिनी &c.; 'natural death,' सुमरणं.—(In Astronomy) सावनः -नी -नं; 'natural day,' सावनदिनं, अहोरात्रं; 'natural form,' स्वरूपं; 'natural temperament,' जन्मस्वभावः, जन्मप्रकृतिः *f.*, स्वभावः; 'natural history,' स्थावरजङ्गमविद्या स्थावरजङ्गमशास्त्रं, जडाजडविद्या; 'natural philosophy,' पदार्थविज्ञानं, पदार्थमात्रशास्त्रं.

NATURAL, *s.* (Idiot) यथाजातः, जडः, मूढः, न्यूनबुद्धिः *m.*

NATURALIST, *s.* स्थावरजङ्गमविद्याज्ञः, स्थावरजङ्गमविज्ञानी *m.* (न्), पदार्थविज्ञानी *m.*, पदार्थमात्रशास्त्रज्ञः.

NATURALIZATION, *s.* देशजाधिकारदानं, दैशिकाधिकारप्रतिपादनं.

To NATURALIZE, *v. a.* देशजाधिकारं दा, देशीयं -यां कृ, दैशिकं -कां कृ.—(Render familiar) अभ्यस् (c. 4. -अस्यति -असितुं), अभ्यासेन सुगमं -मां कृ.

NATURALLY, *adv.* (According to nature) स्वभावतस्, स्वभावेन -वात्, प्रकृतितस्, प्रकृत्या, भावतस्, स्वभावानुसारेण, जातितस्, जन्मतस्, गुणतस्.—(Regularly, according to the proper course) यथाक्रमं, यथायोग्यं, यथामार्गं.—(Not affectedly) यथार्थं, अवैलक्ष्येण.—(Not forcedly) अक्लिष्टं, अयत्नपूर्व्वं, सहजगत्या, सहजशक्त्या.—(Spontaneously) स्वतस्, स्वयं; 'done naturally,' स्वयङ्कृतः -ता -तं; 'very naturally,' स्वभावेनैव.

NATURALNESS, *s.* स्वाभाविकत्वं, प्राकृतत्वं, सहजत्वं, अकृत्रिमता.—(Conformity to reality) यथार्थता, याथात्थ्यं, सत्यता, अवैलक्ष्यं, सरलता, सारल्यं.

NATURE, *s.* (The goddess who is the material cause of the world and all created things. According to the Hindú mythology this goddess is unreal, and identified with Máyá or Illusion, and sometimes with the Śakti or personified energy, or wife of a deity. She is in an especial manner the prototype of the female sex. Hence the following names for her) प्रकृतिः *f.*, माया, महामाया, आदिमाया, मायादेवी, प्रधानं, शक्तिः *f.*, आदिशक्तिः *f.*, लिङ्गं, अविद्या, दुर्गा, लक्ष्मीः *f.*; 'the illusion practised by nature,' मायाजालं; 'sleight of nature,' मायालाघवं.—(Essence, essential properties which constitute a thing) भावः, स्वभावः, प्रकृतिः *f.*,

Digitized by Google

प्रकृतिभावः, निसर्गः, सर्गः, सृष्टिः *f.*, संसिद्धिः *f.*, रूपं, स्वरूपं, धर्म्मः, स्वधर्म्मः, सत्त्वं, वस्तु *n.*, वस्तुस्वभावः, निसर्गभावः, आत्मा, जातिस्वभावः, समीक्षा, तत्त्वं, गुणः; the three 'gunas' or properties of nature are, 1. 'existence or truth,' सत्त्वं; 2. 'foulness or passion,' रजस् *n.*; 3. 'darkness,' तमस् *n.*—(Natural disposition or temper of mind) स्वभावः, प्रकृतिः *f.*, शीलः -लता, सहजः -जं, सहजभावः, सहजशीलः; 'good-nature,' सद्भावः, सुशीलः, साधुशीलत्वं.—(Natural form) स्वरूपं, सहजरूपं, प्रकृतिः *f.*, निसर्गः.—(Established, regular course of things) मार्गः, रीतिः *f.*, क्रमः, प्रकृतिमार्गः, सृष्टेरीतिः *f.*, सृष्टिक्रमः.—(System of created things) सृष्टिः *f.*, सर्गः, जगत् *n.*, विश्वजगत् *n.*, भूमण्डलं, ब्रह्मसृष्टिः, विश्वं.—(Natural feelings, affections or qualities) स्वभावगुणाः *m. pl.*, प्रकृतिगुणाः *m. pl.*, स्वभावधर्म्माः, प्रकृतिधर्म्माः, प्रकृतिभावः.—(Constitution, vital power of a body) जीवनशक्तिः *f.*, शक्तिः *f.*, जीवित्वशक्तिः *f.*, ओजस् *n.*, प्राणाः *m. pl.*, प्राणबलं, देहस्वभावः, शरीरस्थितिः *f.*—(Sort, kind) प्रकारः, जातिः *f.*, रूपं, रीतिः *f.*—(Law of action) विधिः *m.*, विधानं, नियमः, स्थितिः *f.*, धर्म्मः; 'by nature,' स्वभावेन, जात्या, जन्मतस्. *See* NATURALLY. 'Blind by nature,' जन्मान्धः -न्धा -न्धं, जात्यन्धः &c., गर्भान्धः &c.; 'offices of nature,' देहधर्म्माः, शरीरधर्म्माः; 'relieving nature,' मलविसर्गः, मलोत्सर्गः, मलमूत्रविसर्जनं.

NATURED, *a.* (Used in composition) expressed by स्वभावः -वा -वं, शीलः -ला -लं, प्रकृतिः -तिः -ति; as, 'good-natured,' सुशीलः -ला -लं; 'ill-natured,' दुष्प्रकृतिः -तिः -ति.

NAUFRAGE, *s.* (Shipwreck) नौभङ्गः, नौभेदः, नौकाभङ्गः.

NAUGHT, *s.* न किञ्चित्, न किञ्चन, न किमपि, अवस्तु.—(In arithmetic) शून्यं, चः; 'to set at naught,' अवज्ञा (c. 9. -जानाति -ज्ञातुं), लघूकृ. *See To* CONTEMN.

NAUGHT, *adv.* न किञ्चित्, न किञ्चिदपि, न किमपि.

NAUGHT, *a.* निर्गुणः -णा -णं, असारः -रा -रं, विगुणः -णा -णं.

NAUGHTILY, *adv.* प्रतीपं, प्रतीपवत्, दुष्टं, दुष्टभावेन, प्रतीपशीलत्वात्.

NAUGHTINESS, *s.* प्रतीपता, विप्रतीपता, अवश्यता, दुष्टता, दुर्वृत्तता.

NAUGHTY, *a.* प्रतीपः -पा -पं, विप्रतीपः -पा -पं, अवश्यः -श्या -श्यं, अविनेयः -या -यं, मन्दचरित्रः -त्रा -त्रं, दुष्टचरित्रः &c., दुष्टः -ष्टा -ष्टं, दुर्वृत्तः -त्ता -त्तं.

NAULAGE, *s.* तरमूल्यं, तरपण्यं, तारिकं, तार्य्यं, आतरः, आतारः.

NAUMACHY, *s.* नौयुद्धं, नौकायुद्धं, नाविकयुद्धं, नौयुद्धकौतुकं.

NAUSEA, *s.* (Sickness) वमनेच्छा, विवमिषा, उत्क्लेशः, उत्क्लेदः.—(Loathing, disgust) बीभत्सः -त्सं, विकृतं, वैकृतं, वैकृत्यं, विकारः, कुत्सा, विरक्तिः *f.*, निर्वेदः.

To NAUSEATE, *v. n.* (Be inclined to vomit) वम् in des. (विवमिषति -षितुं), वमनेच्छुः -च्छुः -च्छु भू, विवमिषुः -षुः -षु भू.

To NAUSEATE, *v. a.* घाण् in des. (बीभत्सते -त्सितुं), घृण् (c. 1. घृणते -णितुं).

NAUSEATED, *p. p.* बीभत्सेन परित्यक्तः -क्ता -क्तं.

NAUSEOUS, *a.* (Causing sickness) वमनोत्पादकः -का -कं, वमनेच्छाजनकः -का -कं.—(Disgusting) बीभत्सजनकः -का -कं, घृणाजनकः &c., कुत्साजनकः &c., कुत्सितः -ता -तं, विरसः -सा -सं, गर्हितः -ता -तं.

NAUSEOUSNESS, *s.* बीभत्सजनकता, कुत्सितत्वं, विरसता, वैरस्यं.

NAUTIC, NAUTICAL, *a.* नौचालनविद्यासम्बन्धी -न्धिनी -न्धि (न्), नौकाचालनविषयः -या -यं, नाविकः -की -कं; 'nautical person,' नाविकः, नौकाजीवी *m.* (न्).

NAVAL, *a.* (Pertaining to ships) नाविकः -की -कं, नाव्यः -व्या -व्यं, नौकासम्बन्धी -न्धिनी &c., नौकाविषयः -या -यं.—(Consisting of ships) नौकामयः -यी -यं, नौकात्मकः -का -कं, नौकारूपः -पा -पं.

NAVE, *s.* (Of a wheel) नाभिः -भी *f.*, चक्रनाभिः *f.*, पिण्डिः -ण्डी *f.*, पिण्डिका.—(Of a church) पूजाशालाया मध्यभागः.

NAVEL, *s.* नाभिः -भी *f. m.*, तुण्डिः -ण्डी *f. m.*, तुण्डिका, तुन्दिः -न्दी *f.*, तुन्दिका, नालः, उदरावर्त्तः, मध्यवृत्तं, मणिपूरः, अमरा, अमला, भर्म्मं, नाभिकमलं; 'hollow or pit of the navel,' नाभ्यावर्त्तः, तुन्दकूपी -पिका; 'region of the navel,' नाभिचक्रं; 'having a prominent navel,' तुन्दी -न्दिनी &c., तुन्दिकः -का -कं, तुन्दितः -ता -तं, तुन्दिलः -ला -लं, तुन्दिभः -भा -भं, तुन्दिकरः -रा -रं, तुन्दवान् -वती &c., तुण्डिलः &c., तुण्डिभः &c., गोण्डः -ण्डा -ण्डं.

NAVEL-STRING, *s.* नाभिनालः, नालः; 'cutting of it,' नाभिच्छेदनं, नालच्छेदः.

NAVIGABLE, *a.* नौतार्य्यः -र्य्या -र्य्यं, नाव्यः -व्या -व्यं, नौकागम्यः -म्या -म्यं, नौगम्यः &c., नौगमनार्हः -र्हा -र्हं.

NAVIGABLENESS, NAVIGABILITY, *s.* नौतार्य्यता, नौगम्यता, नाव्यता -त्वं.

To NAVIGATE, *v. a.* and *n.* नौकया or नावा तॄ (c. 1. तरति -रितुं -रीतुं) or प्लवितॄ or सन्तॄ or प्लु (c. 1. प्लवते, प्लोतुं) or गम् (c. 1. गच्छति, गन्तुं) or गमनागमनं कृ, समुद्रतरणं कृ, नौकापर्य्यटनं कृ, नौभ्रमणं कृ, नौकायात्रां कृ.—(Direct a ship) नौकां वह् (c. 10. वाहयति -यितुं) or चल् (c. 10. चालयति -यितुं) or नी (c. 1. -नयति -नेतुं).

NAVIGATION, *s.* (Act of passing on the water in ships) नौकया or नावा तरणं or सन्तरणं or गमनं or गमनागमनं or पर्य्यटनं or भ्रमणं or यात्रा, समुद्रतरणं, समुद्रगमनं, नौगमनं, नौकायात्रा, नौगमनागमनं, नौभ्रमणं, नौपर्य्यटनं.—(Directing ships) नौकाचालनं, नौचालनं, नौकानयनं, नौकावाहनं.—(The art or science) नाविकविद्या, नौचालनविद्या, नौकानयनविद्या, नौवाहनविद्या.

NAVIGATOR, *s.* (One who sails) नाविकः, महानाविकः, समुद्रगामी *m.* (न्), समुद्रयायी *m.*, समुद्रतरः.—(One who directs a ship) नौचालकः, नौकावाहकः, पोतवाहकः, नौकानेता *m.* (तृ), नौकानयनकृत् *m.*

NAVY, *s.* युद्धनौसमूहः, युद्धनौकासङ्घः, वृहन्नौकासमूहः, नौसमूहः.

NAY, *adv.* न, नो, नहि.—(Nay more) पुनर्, किम्पुनर्, अधिकन्तु, एवं, किम् बहुना.—(Not only) न केवलं.

NEAP, *a.* (Low) नीचः -चा -चं, निम्नः -म्ना -म्नं; 'neap tide,' निम्नवेला, नीचवेला.

NEAR, *a.* (Not far distant) समीपः -पा -पं, निकटः -टा -टं, समीपस्थः -स्था -स्थं, निकटस्थः -स्था -स्थं, समीपवर्त्ती -र्त्तिनी -र्त्ति (न्), निकटवर्त्ती &c., समीपस्थायी &c., आसन्नः -न्ना -न्नं, सन्निकृष्टः -ष्टा -ष्टं, सन्निहितः -ता -तं, प्रत्यासन्नः -न्ना -न्नं, उपान्तः -न्ता -न्तं, अन्तिकः -का -कं, उपस्थः -स्था -स्थं, उपस्थायी &c., अभ्यासः -सा -सं, अभ्याशः -शा -शं, अभ्यर्णः -र्णा -र्णं, उपनतः -ता -तं, आरातीयः -या -यं, अभ्यग्रः -ग्रा -ग्रं, उपकण्ठः -ण्ठा -ण्ठं, सङ्काशः -शा -शं, सकाशः &c., सनीडः -डा -डं, सविधः -धा -धं, सवेशः -शा -शं, सवेषः -षा -षं, समर्य्यादः -दा -दं, अदूरः -रा -रं, अदूरस्थः &c., अविदूरः -रा -रं, संसक्तः -क्ता -क्तं, अव्यवहितः -ता -तं, अपदान्तरः -रा -रं, अपठान्तरः -रा -रं; 'nearer,' आसन्नतरः -रा -रं, नेदीयान् -यसी -यः (स्); 'nearest or very near,' आसन्नतमः -मा -मं, नेदिष्टः -ष्टा -ष्टं, अन्तिकतमः -मा -मं, अन्तिमः -मा -मं.—(Closely connected) दृढसम्बद्धः -द्धा -द्धं, दृढसंसक्तः -क्ता -क्तं.—(Closely concerning or affecting one's interest) स्वार्थसम्बन्धी -न्धिनी &c., निकटसम्बन्धी &c., अन्तरङ्गः -ङ्गा -ङ्गं.—(Intimate) परिचितः -ता -तं, दृढसौहृदः -दा -दं.—(Stingy) कृपणः -णा -णं,

Digitized by Google

स्वल्पव्ययी-यिनी &c.—(Not rambling) अविस्तीर्णः -र्णा -र्णं; 'near at one's side,' पार्श्वस्थः &c.

NEAR, *adv.* समीपं -पतस्, निकटे, अन्तिकं, उपान्ते, अभितस्, आरात्, आसन्ने, सन्निकृष्टं, निकषा, अदूरे -रात् -रतस्, अविदूरं -रे -रात् -रतस्, सन्निधौ, सकाशं, also expressed by the prep. उप, *see* the next; 'near at one's side,' पार्श्वे -र्श्वतस्; 'situated near,' समीपस्थः -स्था -स्थं; 'going near,' समीपगः -गा -गं.—(Almost, within a little) प्रायस् -यशस्, भूयिष्ठं; 'a woman who is near her delivery,' आसन्नप्रसवा; 'one who is near his death,' आसन्नमृत्युः &c. *See* NEARLY.

NEAR, *prep.* उप, आ, अभि, प्रति; as, 'to go near,' उपगम् (c. 1. -गच्छति -गन्तुं) or उपागम् or अभिगम् or प्रतिगम्; 'brought near,' उपनीतः -ता -तं; 'near a mountain,' उपगिरि, उपगिरं; 'near the ear,' उपकर्णं; 'near the fire,' उपाग्नि; 'near the throat,' उपकण्ठं; 'near evening,' उपसन्ध्यं.

To NEAR, *v. a.* नेद् (nom. नेदयति -यितुं); 'come nearer to,' उपगम् (c. 1. -गच्छति -गन्तुं), उपागम्, अभिगम्. *See To* APPROACH.

NEARLY, *adv.* (At no distance) समीपं -पतस्, अदूरे -रं -रात् -रतस्. *See* NEAR, *adv.* (Closely) दृढं, गाढं; 'nearly connected,' दृढसम्बद्धः -द्धा -द्धं, गाढसम्बद्धः &c.—(Almost, within a little) प्रायस्, प्रायशस्, भूयिष्ठं, मनाक्, कल्पं, ईषदूनं, अल्पोनं; 'nearly finished,' समाप्तभूयिष्ठः -ष्ठा -ष्ठं; 'nearly dead,' मृतप्रायः -या -यं, मृतकल्पः -ल्पा -ल्पं, आसन्नमृत्युः -त्युः -त्यु, मुमूर्षुः -र्षुः -र्षु; 'the earth is nearly a sphere,' पृथिवी गोलप्राया; 'nearly cooked,' पचतिकल्पः &c.; 'nearly four,' उपचतुराः *m. pl.*

NEARNESS, *s.* (Closeness) समीपता, सामीप्यं, नैकट्यं, निकटता, समीपवर्त्तित्वं, निकटवर्त्तित्वं, आसन्नता, सन्निकृष्टता, सान्निध्यं, सन्निधिः *m.*, सन्निधानं, सन्निकर्षः -र्षणं, सन्निधं, प्रत्यासत्तिः *f.*, प्रत्यासन्नता, आनन्तर्य्यं, अनन्तरं, उपस्थानं, अभ्यासत्वं.—(Closeness of connexion) दृढसम्बन्धः, दृढसंसक्तिः *f.*, दृढसंसर्गः, सुसंसर्गः.—(Intimacy) परिचयः, सुपरिचयः.—(Stinginess) कृपणता, कार्पण्यं, स्वल्पव्ययः.

NEAT, *a.* (Trim) विनीतः -ता -तं, परिमृष्टपरिच्छदः -दा -दं, सुरेखः -खा -खं, आकारशुद्धः -द्धा -द्धं.—(Clean) शुद्धः -द्धा -द्धं, श्लक्ष्णः -क्ष्णा -क्ष्णं, परिष्कृतः -ता -तं.

NEAT, *s.* (Cattle of the bovine genus) गवादिजन्तुः *m.*, गवादिपशुः *m.*

NEAT-HERD, *s.* गोपः, गोपालः, गोरक्षकः, गोचारकः, आभीरः.

NEATLY, *adv.* विनीतं, विनीतवत्, सपरिष्कारं, शुद्धं, श्लक्ष्णं, परिपाट्या, सुपरिपाट्या, परिष्कारपूर्व्वं.

NEATNESS, *s.* विनीतता -त्वं, शुद्धता, परिष्कारः, आकारशुद्धता, आकारशुद्धिः *f.*, परिमृष्टता, परिष्कृतता, शुद्धता, श्लक्ष्णता, परिपाटिः -टी, पारिपाट्यं.

NEBULA, *s.* (Opacity or film in the eye) शुक्लं, शुक्लपटलं.

NEBULOUS, *a.* मेघाच्छन्नः -न्ना -न्नं, मेघव्याप्तः -प्ता -प्तं, मेघाकीर्णः -र्णा -र्णं, बहुमेघः -घा -घं, साभ्रः -भ्रा -भ्रं, अभ्रियः -या -यं.

NECESSARIAN, *s.* दैववादी *m.* (न्), दैष्टिकः, दैवचिन्तकः, दैवैकवादी *m.*, अदृष्टवादी *m.*, दैवपरः.

NECESSARIES, *s. pl.* प्रतिदिनप्रयोजनीयद्रव्याणि *n. pl.*, प्रतिदिनप्रयोज्यद्रव्यसम्भारः, द्रव्यसम्भारः, उपकरणसम्भारः, उपकरणसामग्री; 'necessaries of life,' अन्नपानीयं, अन्नोदकं, अन्नवस्त्रं, अन्नाच्छादनं, कशिपू *m. du.*

NECESSARILY, *adv.* अवश्यं, अवशं, विवशं, अवश्यकं, अवश्यमेव, दैववशात्, दैववशतस्, कर्म्मवशतस्, कार्य्यवशात्, कार्य्यतस्, अनन्यगत्या, नूनं.

POVERTY-STRICKEN, *a.* दारिद्र्यग्रस्तः -स्ता -स्तं, दारिद्र्योपहतः -ता -तं.

POWDER, *s.* चूर्णं, पिष्टं, क्षोदः, क्षोदितं, पिष्टातः, पटवासः -सकः, रेणुः *m.*, पांशुः *m.*, वासयोगः, गुण्डकः -ण्डिकः -का.—(Gunpowder) आग्नेयचूर्णं, शीघ्रदाह्यचूर्णं; 'to reduce to powder,' चूर्णीकृ, क्षोदीकृ, रेणुशः कृ.

To POWDER, *v. a.* (Pulverize) चूर्ण् (c. 10. चूर्णयति -यितुं), चूर्णीकृ, क्षोदीकृ, पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), गुण्ड्, कुट्, रेणुशः कृ.—(Cover with powder) चूर्णावृतं -तां कृ, चूर्णीकरणं -णीं कृ, सचूर्णीकृ.

POWDER-BOX, *s.* चूर्णाधारः, चूर्णपात्रं, केशचूर्णाधारः.

POWDERED, *p. p.* चूर्णितः -ता -तं, चूर्णीकृतः &c., सचूर्णितः &c., पिष्टः -ष्टा -ष्टं, क्षोदितः -ता -तं, क्षोदीकृतः &c., गुण्डितः &c.; 'finely powdered,' क्षोदिष्ठः -ष्ठा -ष्ठं; 'coarsely,' अवचूर्णितः &c.

POWDER-MAGAZINE, *s.* आग्नेयचूर्णागारं, दाह्यचूर्णागारं.

POWDERY, *a.* (Friable) सुचूर्णनीयः -या -यं, चूर्णयोग्यः -ग्या -ग्यं.—(Made of powder, resembling it) चूर्णी -र्णिनी -र्णि (न्), चूर्णमयः -यी -यं, चूर्णवान् -वती -वत् (त्), क्षोदवान् &c., सचूर्णः -र्णा -र्णं, सक्षोदः -दा -दं, पांशुलः -ला -लं.

POWER, *s.* (Force, strength) शक्तिः *f.*, बलं, सामर्थ्यं, समर्थता, वीर्य्यं, ऊर्जः, प्रभावः, पराक्रमः, प्राणः, सहः -हं, सहस् *n.*, द्रविणं.—(Ability, faculty) शक्तिः *f.*, आशक्तिः *f.*, शक्नुता, बलं, सामर्थ्यं, क्षमता, कर्तृत्वं, विभवः; 'according to one's power, to the utmost of one's power,' यथाशक्ति, यथाबलं, यथासामर्थ्यं, यावच्छक्यं, शक्नितस्; 'power of utterance,' वाक्शक्तिः *f.*, वाग्विभवः.—(Power of the mind) मनःशक्तिः *f.*, धीशक्तिः *f.*—(Energy, might) वीर्य्यं, तेजस्, प्रतापः, पराक्रमः, विक्रमः, ऊर्जः, शौर्य्यं, सारता, स्थाम *n.* (न्), शुष्म *n.* (न्), शुष्मं.—(Momentum) वेगः, आपातः, तरस् *n.*—(Efficacy, influence) प्रभावः, प्रभवः, प्राबल्यं, प्रभुता; प्रभविष्णुता, प्राभवन्यं, अधिकारः, शक्तिः *f.*, बलं, गौरवं, भारः, प्रतापः, वशं.—(Command, subjection, authority) वशं, अधिकारः -रित्वं, आधिपत्यं, ऐश्वर्य्यं, प्रभुत्वं -ता, ईशत्वं, अधीनत्वं; 'to bring under one's power,' वशीकृ, आत्मवशीकृ, आत्मवशं नी, आत्माधीनं -नां कृ, स्वाधीनं -नां कृ, स्ववशीकृ, आत्मायत्तं -त्तां कृ; 'in the power or under the power of,' वशः -शा -शं, अधीनः -ना -नं, आयत्तः -त्ता -त्तं in comp.; as, 'in the power of the king,' राजवशः -शा -शं, राजाधीनः -ना -नं.—(Possession, occupancy) अधिकारः, आधिकारिक्यं, हस्तः; 'fallen into one's power,' हस्तगतः -ता -तं.—(Legal authority) अधिकारः.—(Superhuman power) विभूतिः, भूतिः *f.*, प्रभावः.—(Sovereign, one invested with power) अधिपतिः *m.*, अधिकारी *m.* (न्), प्रभुः *m.*, अधीशः.—(Force, army) बलं, सैन्यं, सेना, सैन्यभारः.—(In algebra and arithmetic) कुट्टकः, घातः; 'to have power over,' प्रभू (c. 1. -भवति -वितुं), ईश् (c. 2. ईष्टे, ईशितुं).

POWERFUL, *a.* (Having great strength or force) बलवान् -वती -वत् (त्), बली -लिनी -लि (न्), प्रबलः -ला -लं, सबलः -ला -लं, महाबलः &c., शक्तिमान् &c., महाशक्तिः -क्तिः -क्ति, शक्तः -क्ता -क्तं, बलिष्ठः -ष्ठा -ष्ठं, बलाढ्यः -ढ्या -ढ्यं, समर्थः -र्था -र्थं, क्षमः -मा -मं, ऊर्ज्जस्वलः -ला -लं, ऊर्ज्जस्वी &c., ऊर्ज्जस्वान् -स्वती &c., ऊर्ज्जितः -ता -तं, बलोर्ज्जितः &c., प्रभावी &c., सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, अलनमः -मा -मं, कुण्डीरः -रा -रं.—(Mighty, puissant, potent) महाविक्रमः -मा -मं, उरुविक्रमः &c., पराक्रान्तः -न्ता -न्तं, पराक्रमी &c., विक्रमी &c., ऐश्वर्य्यवान् &c., प्रतापवान् &c., प्रतापी &c., वीर्य्यवान् &c., महान् -हती -हत् (त्), महातेजाः -जाः -जः (स्), महौजाः &c., विभूतिमान् &c., महोदारः -रा -रं.—(Efficacious) सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, सतेजाः &c., तेजस्वी &c., अमोघः -घा -घं, क्षमः -मा -मं.—(Forcible to persuade) सुनिश्चायकः -का -कं, सुनिश्चयजनकः -का -कं, प्रबलः &c., सबलः &c., सुदृढः -ढा -ढं.

POWERFULLY, *adv.* बलवत्, सबलं, प्रबलं, प्राबल्येन, महाबलेन, सप्रभावं, प्रभावेण, महाशक्त्या, महाशक्तिपूर्व्वं.

POWERFULNESS, *s.* सबलता, महाबलता, प्रबलता, प्राबल्यं, बलवत्त्वं, शक्तता, शक्तिमत्त्वं, सप्रभावत्वं, वीर्य्यवत्त्वं.

POWERLESS, *a.* निर्बलः -ला -लं, अबलः &c., बलहीनः -ना -नं, शक्तिहीनः &c., अशक्तः -क्ता -क्तं, असमर्थः -र्था -र्थं, निश्शक्तिः &c., शक्तिशून्यः -न्या -न्यं, निष्पराक्रमः -मा -मं, निष्प्रभावः -वा -वं, सामर्थ्यहीनः &c., वीर्य्यहीनः &c., विवशः -शा -शं, अवशः &c.

POWERLESSNESS, *s.* अशक्तिः *f.*, निर्बलता, बलहीनता, असामर्थ्यं, शक्तिहीनता, शक्तिशून्यता, बलाभावः, प्रभावाभावः, निष्प्रभावत्वं.

POX, *s.* (Small pox) रक्तवटी, रक्तवरटी, विस्फोटः, रक्तस्फोटः, शीतला. *See* the word.—(Cow pox) गोस्तनशीतला.—(Venereal disease) उपदंशः, वृषणकच्छूः *f.*; 'afflicted with it,' उपदंशी -शिनी &c.

PRACTICABILITY, PRACTICABLENESS, *s.* साध्यता -त्वं, करणीयता, सुसाध्यता, शक्यता -त्वं, करणशक्यता, सम्भाव्यता -त्वं, सुगमत्वं.

PRACTICABLE, *a.* साध्यः -ध्या -ध्यं, करणीयः -या -यं, करणशक्यः -क्या -क्यं, शक्यः &c., कर्तुं शक्यः &c., कृत्यः -त्या -त्यं, सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, उपपाद्यः -द्या -द्यं, सुकरः -रा -रं, सुगमः -मा -मं, सुसाध्यः &c., सुखसाध्यः &c., अदुष्करः -रा -रं.

PRACTICAL, *a.* (Pertaining to practice or action) आभ्यासिकः -की -कं, अभ्याससम्बन्धी -न्धिनी -न्धि (न्), क्रियासम्बन्धी &c., कार्म्मिकः -की -कं, कार्य्यिकः &c.—(Capable of practice) अभ्यासी &c., व्यवसायी &c., अभ्यासात्मकः -का -कं, क्रियावान् -वती -वत् (त्), अभ्यासक्षमः -मा -मं.—(That may be used in practice) व्यवहार्य्यः

Digitized by Google

-र्य्यौ -र्य्यैं, व्यवहारयोग्यः -ग्या -ग्यं, अभ्यासयोग्यः &c., व्यवहारोचितः -ता -तं, व्यवहारोपयोगी &c.—(Derived from practice) अभ्याससिद्धः -द्धा -द्धं, क्रियासिद्धः &c., अभ्यासजनितः -ता -तं, अभ्यासप्राप्तः -प्ता -प्तं.—(Having practical knowledge) कर्म्मदृष्टः -ष्टा -ष्टं, कर्म्मज्ञः -ज्ञा -ज्ञं, दृष्टकर्म्मा -र्म्मा -र्म्म (न्), कर्म्मज्ञानी &c., बहुदृष्टः -ष्टा -ष्टं, व्यवहारज्ञः -ज्ञा -ज्ञं, व्यवहारवृद्धः -द्धा -द्धं.

Practically, *adv.* अभ्यासतस्, अभ्यासेन, कर्म्मतस्, कार्य्यतस्, व्यवहारतस्, व्यवसायतस्, अभ्यासपूर्व्वं, व्यवहारमपेक्ष्य.

Practice, *s.* (Frequent or habitual doing) अभ्यासः, अभ्यसनं, निरन्तराभ्यासः, नित्याभ्यासः, नित्यकृत्यं, नित्यकर्म्म *n.* (न्), निरन्तरकर्म्म *n.*, नित्यक्रिया, निरन्तरप्रवृत्तिः *f.*, नित्यवृत्तिः *f.*, नित्यप्रवृत्तिः *f.*, नित्यचर्य्या, आवर्त्तनं, आवृत्तिः *f.*, वृत्तिः.—(Actual doing or performance) करणं, आचरणं, विधानं, अनुष्ठानं, अनुष्ठा, क्रिया, कृतिः *f.*, प्रवृत्तिः *f.*, निर्वर्त्तनं, प्रवर्त्तनं, चर्य्या, चरितं, वृत्तं, व्यापारः, व्यवसायः.—(Course of procedure, custom) आचारः, व्यवहारः, व्यवहृतिः *f.*, समाचारः, प्रचारः, रीतिः *f.*, सम्प्रदायः, मार्गः, क्रियामार्गः, कर्म्मविधिः *m.*, क्रमः, पद्धतिः *f.*, नियमः, अनुसारः; 'according to usual practice,' यथाव्यवहारं, यथारीति; 'ancient practice,' वृद्धाचारः, वृद्धपरम्परा; 'noble practice,' शिष्टाचारः; 'family practice,' कुलाचारः, कुलधर्म्मः; 'local,' देशाचारः, देशरीतिः *f.*; 'popular or general practice,' लोकाचारः, लोकरीतिः *f.*, जनव्यवहारः; 'good practice,' सदाचारः; 'following good practices,' सदाचारी -रिणी -रि (न्), सद्वृत्तिः -त्तिः -त्ति, सद्वृत्तः -त्ता -त्तं; 'bad practice,' दुराचारः, असद्व्यापारः, दुर्वृत्तिः *f.*; 'following bad practices,' दुराचारः -रा -रं, दुराचारी &c., कदाचारः &c., असदाचारी &c., दुर्वृत्तः -त्ता -त्तं, दुर्वृत्तिः -त्तिः -त्ति, जघन्यवृत्तिः &c.—(Exercise of a profession) सेवनं, निषेवनं, अनुसेवनं, आचरणं, करणं, अनुष्ठानं.—(Of medicine) उपचारः, वैद्योपचारः, उपचर्य्या, उपचार्य्यः, उपक्रमः, वैद्योपक्रमः, औषधप्रयोगः, वैद्यक्रिया, चिकित्सा, रुक्प्रतिक्रिया.—(Of arms) शस्त्राभ्यासः, शस्त्रभृत्त्वं.—(Of the law courts) व्यवहारः, व्यवहारविधिः *m.*

To practise, *v. a.* (Do habitually) अभ्यस् (c. 4. -अस्यति -असितुं), नित्यम् अभ्यस् or कृ, निरन्तरम् अभ्यस् or कृ, नित्याभ्यासं कृ, निरन्तराभ्यासं कृ.—(Do, perform) आचर् (c. 1. -चरति -रितुं), समाचर्, चर्, अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, समास्था, विधा (c. 3. -दधाति -धत्ते -धातुं), कृ, सङ्कृ, अभिकृ, प्रवृत् in caus., वृत्.—(Use, employ) प्रयुज्, उपयुज्, व्यवहृ, सेव्, निषेव्, अनुसेव्, आश्रि.—(Exercise a profession or business) आचर्, कृ, सेव्, निषेव्, अनुसेव्, आसेव्, समासेव्, उपसेव्, अभ्युपसेव्, उपास्; 'he practises the law,' व्यवहारं सेवते or निषेवते, व्यवहारसेवनं करोति, व्यवहारं करोति; 'he practises gambling,' द्यूतं सेवते.—(Practise medicine) वैद्योपचारं कृ, उपचारं कृ, औषधप्रयोगं कृ, चिकित्सां कृ, कित् in desid.—(Practise arms) शस्त्राभ्यासं कृ.

To practise, *v. n.* अभ्यासं कृ, नित्याभ्यासं कृ, अभ्यस्. *See* the last.—(Use artifices) छलं कृ, व्यपदेशं कृ, छद्म कृ, कपटं कृ, कपटप्रयोगं कृ, छलप्रयोगं कृ, कैतवप्रयोगं कृ.

Practised, *p. p.* (Habitually done or performed) अभ्यस्तः -स्ता -स्तं, आचरितः -ता -तं, चरितः -ता -तं, अनुष्ठितः &c., सेवितः -ता -तं, निषेवितः &c., व्यवहृतः -ता -तं, व्यवहारितः &c., कृतः -ता -तं.—(Having had much practice) बहुदृष्टः -ष्टा -ष्टं, दृष्टकर्म्मा -र्म्मा -र्म्म (न्), कर्म्मज्ञः -ज्ञा -ज्ञं, कृतकर्म्मा -र्म्मा -र्म्म (न्), व्यवहारज्ञः -ज्ञा -ज्ञं, ज्ञानवृद्धः -द्धा -द्धं, पक्वबुद्धिः -द्धिः -द्धि, पक्वः -क्वा -क्वं, कोविदः -दा -दं, परिज्ञाता -त्री -तृ (तृ), व्युत्पन्नः -न्ना -न्नं.

Practising, *part.* अभ्यासी -सिनी -सि (न्), कृताभ्यासः -सा -सं, आचरन् -रन्ती -रत् (न्), आस्थितः -ता -तं, आश्रितः &c., प्रवर्त्तमानः -ना -नं, सेवी &c., सेवमानः- ना -नं, निषेवमाणः -णा -णं, व्यवसायी &c., शाली &c., आस्थाय indec.

Practitioner, *s.* (One who exercises any profession or businsss) व्यवसायी *m.* (न्), व्यापारी *m.*, सेवी *m.*, वृत्ति or प्रवृत्ति or वृत्तिक in comp.—(Medical) वैद्यः, वैद्यवृत्तिः *m.*, वैद्यवृत्तिकः, चिकित्सकः, उपचारकः, उपचारकृत् *m.*, औषधप्रयोगी *m.*—(Lawyer) व्यवहारज्ञः, व्यवहारविद् *m.*, दृष्टव्यवहारः, आचारज्ञः, व्यवहारदर्शी *m.*

Pragmatic, pragmatical, *a.* परकार्य्यचर्चकः -का -कं, अनधिकारचर्चकः &c., पराधिकारचर्चकः &c., पराधिकारव्यापारी -रिणी -रि (न्), परव्यापारचर्चकः &c.

Pragmatically, *adv.* अनधिकारचर्चया, पराधिकारचर्चया, परव्यापारचर्चया.

Pragmaticalness, *s.* परकार्य्यचर्चा, परव्यापारचर्चा, अनधिकारचर्चा.

Prairie, *s.* दीर्घतृणावृतः सुविस्तीर्णः समभूभागः.

Praise, *s.* प्रशंसा, स्तुतिः *f.*, स्तवः, श्लाघा, शंसा, प्रशंसनं, संस्तवः, स्तवनं, कीर्त्तनं, अनुकीर्त्तनं, स्तोत्रं, स्तोतृत्वं, ईडा, नुतिः *f.*, नवः, नव्यः, वर्णनं -ना, वन्दना, व्यावृत्तिः *f.*, सामीची, व्यावृत्तिः *f.*; 'ground of praise,' स्तुतिहेतुः *m.*, स्तुतिकारणं.

To praise, *v. a.* प्रशंस् (c. 1. -शंसति -सितुं), अभिप्रशंस्, स्तु (c. 2. स्तौति, स्तोतुं), संस्तु, अभिष्टु, विष्टु, परिसंस्तु, श्लाघ् (c. 1. श्लाघते -घितुं, c. 10. श्लाघयति -यितुं), कृत् (c. 10. कीर्त्तयति -यितुं), अनुकृत् ईड् (c. 2. ईट्टे -डितुं), प्रसमीड्, वर्ण् (c. 10. वर्णयति -यितुं), वन्द् (c. 1. वन्दते -न्दितुं), विख्या (c. 2. -ख्याति -ते -तुं), प्रख्या, प्रथ् (c. 10. प्रथयति -यितुं), नु or नू (c. 2. नौति, c. 6. नुवति, नवितुं, नुवितुं), अभिनु, अभिप्रणु, प्रणु, पण् (c. 1. पणायति -यितुं, पणितुं) or पन्, ऋच् (c. 6. ऋचति, अर्चितुं), ईल् (c. 1. ईलते -लितुं).

Praised, *p. p.* प्रशंसितः -ता -तं, स्तुतः -ता -तं, संस्तुतः &c., अभिष्टुतः &c., प्रस्तुतः &c., प्रशस्तः -स्ता -स्तं, शस्तः &c., शंसितः &c., श्लाघितः -ता -तं, कीर्त्तितः &c., अनुकीर्त्तितः &c., ईडितः -ता -तं, प्रसमीडितः &c., वर्णितः &c., विख्यातः &c., नुतः -ता -तं, नूतः &c., प्रणुतः &c., पणायितः -ता -तं, पनायितः &c., पणितः &c., पनितः &c., ईलितः &c., गीर्णः -र्णा -र्णं, अपिगीर्णः &c.

Praiser, *s.* प्रशंसकः, स्तोता *m.* (तृ), प्रशंसिता *m.* (तृ), शंसिता *m.*, शंस्ता *m.* (स्तृ), स्तावकः, प्रशंसाकृत् *m.*, वर्णकः, स्तुतिपाठकः, वन्दी *m.* (न्), स्तुतिकारकः, स्तवनकृत् *m.*

Praiseworthiness, *s.* श्लाघ्यता, श्लाघनीयता, प्रशंसनीयता, स्तुतियोग्यता.

Praiseworthy, *a.* श्लाघ्यः -घ्या -घ्यं, श्लाघनीयः -या -यं, प्रशंसनीयः -या -यं, प्रशंसितव्यः -व्या -व्यं, प्रशंस्यः -स्या -स्यं, शंस्यः &c., प्रशस्यः &c., शस्यः &c., स्तुत्यः -त्या -त्यं, स्तोतव्यः -व्या -व्यं, स्तुतियोग्यः -ग्या -ग्यं, ईड्यः -ड्या -ड्यं, पाश्यः -श्या -श्यं. *See* Laudable.—(Praiseworthy person) स्तुतिपात्रं, प्रशंसापात्रं, श्लाघापात्रं, श्लाघाभाजनं.

To prance, *v. n.* अश्ववत् प्लु (c. 1. प्लवते, प्लोतुं) or नृत् (c. 4. नृत्यति, नर्त्तितुं) or वल्ग् (c. 1. वल्गति -लितुं) or प्लुतगत्या चल् (c. 1. चलति -लितुं).

Prancing, *s.* अश्वप्लुतं, प्लुतगतिः *f.*, प्लुतं, प्लवः, वल्गितगतिः *f.*, वल्गितं.

Prancing, *part.* or *a.* प्लुतगतिः -तिः -ति, प्लवगतिः &c., वल्गितगतिः &c.

Prank, *s.* कुचेष्टा, चेष्टा, मर्कटचेष्टा, वानरचेष्टा, मर्कटक्रीडा, वानरक्रीडा, क्रीडा, चापलं, खेला, लीला, छन्दस् *n.*, छन्दः, कुछन्दस्, लहरी.

To prank, *v. a.* दम्भार्थं or लोकदर्शनार्थं भूष् or अलङ्कृ.

Prankish, *a.* कुचेष्टः -ष्टा -ष्टं, वानरचेष्टः -ष्टा -ष्टं, मर्कटचेष्टः &c., वान-

Digitized by Google

रचेष्टाकारी -रिणी -रि (न्), वानरशीलः -ला -लं, क्रीडाशीलः &c., छन्दी &c., चपलः -ला -लं.

To PRATE, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), उपजल्प्, प्रलप् (c. 1. -लपति -पितुं), अनर्थकं or वृथा भाष् (c. 1. भाषते -षितुं) or वद् (c. 1. वदति -दितुं), बहु भाष् or वद्, अतिशयेन or अत्यन्तं भाष्, अनर्थकवचनं कृ, आलस्यवचनं कृ, वृथाकथां कृ.

PRATER, *s.* जल्पकः, जल्पाकः, जल्पी *m.* (न्), उपजल्पी *m.*, वाचालः, वाचाटः, वावदूकः, बहुभाषी *m.* (न्), बहुवादी *m.*

PRATING, *s.* जल्पः -ल्पनं, प्रजल्पः, जल्पितं, प्रलापः, प्रलपितं, निरर्थकभाषणं, वृथाभाषणं, अनर्थकवचनं, बहुभाषणं.

PRATIQUE, *s.* संसर्गानुज्ञा, गमनागमनानुज्ञा, सम्यक्तानुज्ञा.

To PRATTLE, *v. n.* बालवद् जल्प् or भाष्, चटचट (nom. चटचटायते). *See To* PRATE.

PRATTLE, PRATTLING, *s.* जल्पितं, जल्पः, प्रलापः, प्रलपितं, बालप्रलापः, बालालापः, बालभाषणं, बालवचनं, बालशब्दः, कलभाषणं. *See* PRATING.

PRATTLER, *s.* बालवद् जल्पी or जल्पकः, बालालापी *m.* (न्), बालभाषी *m.*

PRAVITY, *s.* भ्रष्टता, भ्रंशः, दुष्टता, विप्रदुष्टता, भ्रेषः, विक्रिया.

PRAWN, *s.* वृहच्छल्कः, इक्षाकः, गङ्गाटेयः, अग्निमत्स्यः.

To PRAY, *v. n.* प्रार्थ् (c. 10. -अर्थयते -यितुं), प्रार्थनां कृ, प्रार्थनं कृ, कृताञ्जलिः or अञ्जलिं कृत्वा प्रार्थ्.—(To God) ईश्वरप्रार्थनां कृ, देवप्रार्थनां कृ, भगवत्प्रार्थनां कृ, ईश्वरपूजां कृ.—(Invoke by prayer) आशास् (c. 2. -शास्ते, c. 1. -शासते -सितुं).—(Pray in a low voice) जप् (c. 1. जपति -पितुं), प्रजप्, जपनं कृ.

To PRAY, *v. a.* (Entreat, implore) प्रार्थ्, अभ्यर्थ्, सम्प्रार्थ्, अर्थ्, कृताञ्जलिः प्रार्थ् or याच् or अभियाच् or संयाच् or सम्प्रयाच्, विनयेन स्वार्थं निविद्, विनी, याञ्चां कृ.

PRAYED, *p. p.* प्रार्थितः -ता -तं, अभ्यर्थितः &c., याचितः &c., अभियाचितः &c.

PRAYER, *s.* प्रार्थना, प्रार्थनं, अभ्यर्थना, अर्थः, याचना, याञ्चा, विनयेन स्वार्थनिवेदनं; 'to God,' ईश्वरप्रार्थना, देवप्रार्थना, भगवत्प्रार्थना, ईश्वरपूजा; 'inaudible repetition of prayers,' जपः, जपनं, जपयज्ञः; 'engaged in repeating prayers,' जपपरायणः -णा -णं; 'granting prayers,' वरदः -दा -दं.

PRAYER-BOOK, *s.* प्रार्थनापद्धतिः -ती *f.*, प्रार्थनासंहिता, प्रार्थनाग्रन्थः.

PRAYERFUL, *a.* प्रार्थनापरः -रा -रं, प्रार्थनाशीलः -ला -लं, जपपरायणः -णा -णं, जपनशीलः &c., भजनशीलः &c., ईश्वरपूजाशीलः &c., ईश्वरभावनः -ना -नं, प्रार्थनानिष्ठः -ष्ठा -ष्ठं, भजनपरायणः -णा -णं.

To PREACH, *v. n.* धर्म्मं प्रवच् (c. 2. -वक्ति -क्तुं) or प्रचर् (c. 10. -चारयति -यितुं) or उपदिश् (c. 6. -दिशति -देष्टुं), धर्म्मोपदेशं कृ, धर्म्मप्रवचनं कृ, धर्म्मप्रचारणं कृ, धर्म्मकथनं कृ, धर्म्मोपदेशभाषणं कृ, धर्म्मोपदेशविषयवाक्यं कृ.

To PREACH, *v. a.* (Proclaim, publish) प्रचर् (c. 10. -चारयति -यितुं), उच्चर्, विघुष् (c. 10. घोषयति -यितुं), घुष्, उद्घुष्, प्रख्या (c. 2. -ख्याति -तुं or caus. -ख्यापयति -यितुं), आख्या, ख्या, कथ्, प्रवच्, प्रवद्, कृत्, प्रकृत्, प्रकटीकृ.—(Deliver, pronounce) वद्, प्रवद्, वच्, उच्चर्, उदाहृ, उदीर्.

PREACHER, *s.* (Of religion) प्रवक्ता *m.* (क्तृ), धर्म्मप्रवक्ता *m.*, प्रचारकः, धर्म्मप्रचारकः, उपदेशकः, धर्म्मोपदेशकः, उपदेशी *m.* (न्), धर्म्मोपदेशी *m.*, कथकः, धर्म्मकथकः.—(Proclaimer) घोषकः, विघोषकः, ख्यापकः, घोषणाकृत्.

PREACHING, *s.* धर्म्मोपदेशः, उपदेशः, धर्म्मप्रचारणं, प्रचारणं, धर्म्मप्रवचनं, प्रवचनं, उच्चारणं, घोषणं -णा, विघोषणा, ख्यापनं.

PREAMBLE, *s.* प्रस्तावना, उपोद्घातः, आभाषः, आरम्भः, उपन्यासः, प्रकरणं.

PREBEND, PREBENDARY, *s.* *See* CANON, CANONRY, *s.*

PRECARIOUS, *a.* (Uncertain, doubtful) अनिश्चितः -ता -तं, सन्दिग्धः -ग्धा -ग्धं, सन्देहस्थः -स्था -स्थं, संशयस्थः &c., सांशयिकः -की -कं, शङ्कान्वितः -ता -तं, शङ्कनीयः -या -यं, सशङ्कः -ङ्का -ङ्कं, शङ्कास्पदः -दी -दं, वैकल्पिकः -की -कं, अस्थिरः -रा -रं, अध्रुवः -वा -वं, अनैष्ठिकः -की -कं, स्थितिसंशयी &c., स्थितिशङ्की &c.—(Depending on the will of another) अन्याधीनः -ना -नं, पराधीनः &c., परायत्तः -त्ता -त्तं, अस्वाधीनः &c., अस्वायत्तः &c.

PRECARIOUSLY, *adv.* अनिश्चितं, सन्दिग्धं, सशङ्कं, ससंशयं, अस्थिरं.

PRECARIOUSNESS, *s.* अनिश्चितत्वं, अनैश्चित्यं, सन्दिग्धता, सशङ्कता -त्वं, शङ्कनीयता -त्वं, अस्थैर्य्यं, अस्थिरता -त्वं, अन्याधीनता, पराधीनता, अस्वाधीनता, स्थितिसंशयः, स्थितिशङ्का.

PRECATIVE, PRECATORY, *a.* प्रार्थकः -का -कं, प्रार्थनात्मकः &c., प्रार्थनारूपः -पा -पं, प्रार्थनाकारी -रिणी -रि (न्), याचकः -का -कं.—(Precative tense) प्रवर्त्तना.

PRECAUTION, *s.* पूर्व्वोपायः, अग्रोपायः, निवारणोपायः, अनिष्टनिवारणोपायः, अनिष्टवारणोपायः, निषेधनोपायः, प्रतिषेधोपायः, आपद्वारणोपायः, अपायनिवारणोपायः, पूर्व्वावधानं -नता, अग्रावधानं, पूर्व्वसमीक्षा, पूर्व्वचिन्ता; 'to take precautions,' पूर्व्वावधानं कृ.

PRECAUTIONARY, *a.* पूर्व्वोपायसाधकः -का -कं, पूर्व्वोपायरूपः -पा -पं, पूर्व्वोपायैर् अनिष्टनिवारकः -का -कं or अनिष्टप्रतिषेधकः &c., पूर्व्वोपायेन अनिष्टवारकः &c.

To PRECEDE, *v. a.* अग्रे or अग्रतो गम् (c. 1. गच्छति, गन्तुं) or सृ (c. 1. सरति, सर्त्तुं), पुरस् or पुरतो गम् or सृ or चर् (c. 1. चरति -रितुं) or या (c. 2. याति -तुं), अग्रे वृत् (c. 1. वर्त्तते -र्त्तितुं), पुरतो वृत्, मुख्यः -ख्या -ख्यं भू, मुख्यतो वृत्.—(In rank) अग्रपदस्थः -स्था -स्थं भू, अग्रमानार्हः -र्हा -र्हं भू, अग्रमानम् अर्ह् (c. 1. अर्हति -र्हितुं), अग्रपदे वृत् or स्था.

PRECEDED, *p. p.* पुरोगतः -ता -तं, अग्रगतः -ता -तं, पुरःसरः -रा -रं in comp., पुरोगमः -मा -मं in comp., पूर्व्वकः -का -कं in comp.

PRECEDENCE, PRECEDENCY, *s.* (Going before) पुरोगतिः *f.*, पुरोगमनं, अग्रगतिः *f.*, अग्रगमनं, अग्रसरणं, अग्रतःसरणं, अग्रेसरणं, अग्रवर्त्तनं, अग्रवर्त्तित्वं.—(In rank) अग्रपदं, अग्रपदवर्त्तनं, श्रेष्ठपदं, श्रेष्ठपदवर्त्तनं, अग्रमानं, अग्रमान्यता, अग्रगण्यता, अग्रपूजा, अग्रपूज्यता, अग्रमानार्हता -त्वं, अधिकपदं, अधिकमानार्हता, श्रेष्ठता, प्राग्भावः, श्रैष्ठ्यं, मुख्यता, प्रधानता, प्राधान्यं, प्रथमता, प्राथम्यं, आदित्वं, उत्कर्षः.

PRECEDENT, *s.* (Previous example) पूर्व्वप्रतिमा, पूर्व्वदृष्टान्तः, पूर्व्वनिदर्शनं, पूर्व्वोदाहरणं, प्रतिमा, प्रमाणं; 'an unheard of precedent,' अपूर्व्वप्रतिमा.

PRECEDENT, PRECEDING, *a.* or *part.* अग्रगः -गा -गं, अग्रगामी -मिनी -मि (न्), अग्रसरः -रा -रं, अग्रेसरः &c., अग्रतःसरः &c., पुरोगः -गा -गं, पुरोगमः -मा -मं, पुरोगामी &c., पुरःसरः -रा -रं, प्राग्गामी &c., पुरःसरः &c., पुरस्सरः &c., पूर्व्वसरः &c., पुरोगतः -ता -तं, पुरोगतिः -तिः -ति, पूर्व्वः -र्व्वा -र्व्वं, पूर्व्वकः -का -कं, प्राक्तनः -नी -नं.

PRECEDENTED, *a.* दृष्टपूर्व्वः -र्व्वा -र्व्वं, भूतपूर्व्वः &c., दृष्टप्रतिमः -मा -मं, सपूर्व्वप्रतिमः &c., दृष्टोदाहरणः -णा -णं, दृष्टसादृश्यः -श्या -श्यं.

PRECEDENTLY, *adv.* पूर्व्वं, पूर्व्वतस्, अग्रे, अग्रतस्, पूर्व्वे, पुरस्, पुरतस्.

PRECENTOR, *s.* अग्रगायकः, अग्रगाता *m.* (तृ), पूर्व्वगाता, पूर्व्वगायकः.

PRECEPT, *s.* विधिः *m.*, विधानं, नियमः, कल्पः, निदेशः, निर्देशः, सूत्रं, शासनं, अनुशासनं, आदेशः, चोदना, प्रचोदनं, आज्ञा, नियोगः, निगमः, क्रमः,

Digitized by Google

स्थितिः *f.*, व्यवस्था, स्मरणं, उपदेशः; 'secondary precept,' अनुकल्पः.

PRECEPTIVE, *a.* वैधिकः -की -कं, वैधः -धी -धं, विधिरूपः -पा -पं, विधिमयः -यी -यं, विधायकः -का -कं, विधिप्रदर्शकः -का -कं, विधिप्रकाशकः &c., नैयमिकः -की -कं, अनुशासकः -का -कं, आदेशकः &c., उपदेशकः &c., काल्यः -ल्पी -ल्पं, सौत्रः -त्री -त्रं.

PRECEPTOR, *s.* उपदेशकः, उपदेशी *m.* (न्), उपदेष्टा *m.* (ष्टृ), शिक्षकः, शिक्षाकरः, अध्यापकः, बालाध्यापकः, शासिता *m.* (तृ), अनुशासिता *m.*, शिक्षादाता *m.*; 'spiritual preceptor,' आचार्यः, उपाध्यायः, गुरुः *m.*, पाठकः; 'family preceptor,' कुलगुरुः *m.*, कुलाचार्यः.

PRECEPTRESS, *s.* उपदेशिका, उपदेशिनी, शिक्षिका, अध्यापिका, उपदेष्ट्री.

PRECESSION, *s.* (Going before) पुरोगतिः *f.*, अग्रगतिः *f.*—(Of the equinoctial points) अयनचलनं, विषुवायनं, अयनांशः.

PRECINCT, *s.* (Limit) सीमा, परिसीमा, अवधिः *m.*, मर्य्यादा, समन्तः, पर्य्यन्तः, परिसरः, परिच्छेदः, अवच्छेदः.—(Vicinity) उपान्तं, उपान्तर्यं, अन्तिकं, परिसरः, सामन्तं, सामन्तदेशः.

PRECIOUS, *a.* महार्घः -र्घा -र्घं, महामूल्यः -ल्या -ल्यं, बहुमूल्यः &c., बहुमूल्यकः -का -कं, महार्हः -र्हा -र्हं, उत्कृष्टः -ष्टा -ष्टं, अत्युत्कृष्टः &c., अनर्घ्यः -र्घ्या -र्घ्यं, अनर्घः -र्घा -र्घं, अर्घ्यः &c., अमूल्यः &c., गुरुः -र्वी -रु, गुर्वर्घः &c., बहुमतः -ता -तं, महाधनः -ना -नं, प्रयाः -याः -यः (स्); 'precious stone,' रत्नं, मणिः *m.*; 'precious metals,' सुवर्णादि *n.*, हेमादि; 'more precious,' गरीयान् -यसी -यः (स्); 'most precious,' गरिष्ठः -ष्ठा -ष्ठं.

PRECIOUSNESS, *s.* महार्घता -त्वं, महामूल्यता -त्वं, बहुमूल्यता -त्वं, बहुमूल्यं, उत्कृष्टता, अत्युत्कृष्टता, बहुमतिः *f.*, अनर्घ्यता -त्वं, गुरुता.

PRECIPICE, *s.* प्रपातः, अतटः -टं, पातुकः, पातुकभूमिः *f.*, प्रवणभूमिः *f.*, भृगुः *m.*, तटः, दरट् *f.*, विषमं, विषमभूमिः *f.*, कटकः -कं; 'casting one's self down a precipice,' अङ्कपातः -तनं.

PRECIPITANCE, PRECIPITANCY, *s.* साहसं, क्षिप्रकारित्वं, अविमृश्यकारित्वं, असमीक्ष्यकारित्वं, गमकारित्वं, विषमसाहसं.

PRECIPITATE, PRECIPITANT, *a.* (Rashly, impetuous) साहसी -सिनी -सि (न्), साहसिकः -की -कं, क्षिप्रकारी -रिणी &c., गमकारी &c., अविमृश्यकारी &c., असमीक्ष्यकारी &c., अतिक्षिप्रः -प्रा -प्रं, जाल्मः -ल्मा -ल्मं, जातविभ्रमः -मा -मं.—(Headlong) अधोमुखः -खी -खं, अवाङ्मुखः &c. *See* the word.

To PRECIPITATE, *v. a.* अधः or अवाक् क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अधः or अवाक् पत् (c. 10. पातयति -यितुं) or निपत् or प्रपत् or अवपत् or अवनी in caus. (-नाययति -यितुं).

PRECIPITATED, *p. p.* अधःक्षिप्तः -प्ता -प्तं, अधःपातितः -ता -तं, अवपातितः &c., अवाक्क्षिप्तः &c., अवाक्पातितः &c., अवाङ् निपात्यमानः -ना -नं, पात्यमानः -ना -नं.

PRECIPITATELY, *adv.* सहसा, अनवेक्षया, साहसेन, ससाहसं, साहसिकवत्, जाल्मवत्, असमीक्ष्य, अविमृश्य, क्षिप्रं, अतिक्षिप्रं, द्रुतपदं.—(Headlong) अवाक्, अधोमुखेन, अवाङ्मुखेन.

PRECIPITATION, *s.* (Rash impetuosity) अतिक्षिप्रता, अतिक्षिप्रकारित्वं, क्षिप्रकारिता, गमकारित्वं, अविमृश्यकारित्वं, असमीक्ष्यकारित्वं, साहसं, दुःसाहसं, साहसिकत्वं, जाल्मता.—(Act of throwing headlong) अधःपातनं, अधःक्षेपः -पणं, अवाक्क्षेपणं, अवाक्पातनं, अवपातनं, अवनायः -यनं.

PRECIPITOUS, *a.* (Steep) पातुकः -का -कं, प्रवणः -णा -णं, दुरवरोहः -हा -हं, दुरारोहः -हा -हं.—(Headlong, rash). *See* the word.

PRECIPITOUSNESS, *s.* पातुकत्वं -ता, प्रवणता -त्वं, दुरवरोहत्वं, दुरारोहत्वं.

PRECISE, *a.* (Exact, nice, definite) सूक्ष्मः -क्ष्मा -क्ष्मं, समञ्जसः -सा -सं, सम्यङ् -म्यीची -म्यक् (क्), नियतः -ता -तं, निश्चितः -ता -तं, सुनिश्चितः &c., निर्दिष्टः -ष्टा -ष्टं, सुनिर्दिष्टः &c., वस्तुनिर्देशकः -का -कं, नामनिर्देशकः &c., नामनिर्देशात्मकः &c., यथार्थः -र्था -र्थं, केवलः -ला -लं.—(Distinct) व्यक्तः -क्ता -क्तं, सुव्यक्तः &c., स्फुटः -टा -टं, भिन्नार्थः -र्था -र्थं; 'precise measurement,' सूक्ष्ममानं; 'precise area,' स्फुटफलं.—(Punctilious) सूक्ष्मनियमनिष्ठः -ष्ठा -ष्ठं, सूक्ष्मोपचारनिष्ठः &c., सूक्ष्मादरनिष्ठः &c., सूक्ष्मादरशीलः -ला -लं, अत्याचारी &c.—(Keeping to stipulated agreement) सामयिकः -की -कं, समयपालकः -का -कं, नैयमिकः -की -कं.

PRECISELY, *adv.* नियतं, सम्यक्, समञ्जसं, अञ्जसा, सुनिर्दिष्टं, सूक्ष्मं, सूक्ष्मत्वेन, सूक्ष्मतया, यथार्थं, यथार्थतस्, व्यक्तं, सुव्यक्तं, भिन्नार्थतस्; 'precisely so,' एवमेव, तथैव.

PRECISENESS, PRECISION, *s.* (Exactness) सूक्ष्मता -त्वं, सौक्ष्म्यं, सम्यक्त्वं, सामञ्जस्यं, नियतत्वं, निर्देशः, निर्दिष्टता -त्वं, सुनिश्चितत्वं, नामनिर्देशः, वस्तुनिर्देशः, यथार्थता, याथार्थ्यं.—(Distinctness) व्यक्तता, भिन्नता, स्फुटता.—(Punctiliousness) सूक्ष्मनियमपरता, सूक्ष्मनियमनिष्ठा, सूक्ष्मोपचारनिष्ठा, सूक्ष्मोपचारशीलता.

To PRECLUDE, *v. a.* प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, रुध्, निषिध् (c. 1. -षेधति -षेद्धुं), प्रतिषिध्, वृ (c. 10. वारयति -यितुं), निवृ, बाध् (c. 1. बाधते -धितुं), सागैलीकृ.

PRECLUDED, *p. p.* प्रतिबद्धः -द्धा -द्धं, रुद्धः -द्धा -द्धं, निरुद्धः &c., अवरुद्धः &c., निषिद्धः -द्धा -द्धं, वारितः -ता -तं, निवारितः -ता -तं, भोगवारितः &c., बाधितः &c., सागैलः -ला -लं.

PRECLUSION, *s.* प्रतिबन्धः -न्धनं, रोधः -धनं, निरोधः -धनं, निषेधः, प्रतिषेधः, वारणं, निवारणं, भोगप्रतिबन्धः, भोगवारणं.

PRECLUSIVE, *a.* प्रतिबन्धकः -का -कं, रोधकः -का -कं, निरोधकः -का -कं, निषेधकः &c., निवारकः &c., बाधकः -का -कं.

PRECOCIOUS, *a.* (Ripe before the proper time) अपूर्णकालपक्वः -क्वा -क्वं, कालपूर्वपक्वः &c., कालपूर्वफली -लिनी -लि (न्), कालपूर्वफलितः -ता -तं.—(Applied to persons) प्रौढबुद्धिः -द्धिः -द्धि, प्रौढः -ढा -ढं, बालप्रौढः &c., बालपक्वः -क्वा -क्वं.

PRECOCIOUSNESS, PRECOCITY, *s.* अपूर्णकालपक्वता, प्रौढिः *f.*, बुद्धिप्रौढता, प्रौढबुद्धित्वं, बालप्रौढिः *f.*, बालपक्वता.

To PRECOGITATE, *v. a.* अग्रे or पूर्वं चिन् or विचर् or विमृश् or विवेचनां कृ.

PRECOGITATION, *s.* अग्रचिन्ता, पूर्वचिन्ता, अग्रविचारणं, अग्रविवेचना.

PRECOGNITION, *s.* अग्रज्ञानं, पूर्वज्ञानं, अग्रविज्ञानं, अग्रबोधः -धनं.

To PRECONCEIVE, *v. a.* अग्रे or पूर्वं मन् or बुध् or मनसा कॢप् in caus.

PRECONCEIVED, *p. p.* अग्रकल्पितः -ता -तं, पूर्वकल्पितः &c., अग्रोपलब्धः -ब्धा -ब्धं.

PRECONCEPTION, *s.* अग्रकल्पना, पूर्वकल्पना, अग्रबुद्धिः *f.*, अग्रमतिः *f.*, पूर्वबोधः, पूर्वज्ञानं, अग्रवासना, अग्रोपलब्धिः *f.*, पूर्वतर्कः.

To PRECONCERT, *v. a.* पूर्वसङ्केतेन यत् or सञ्चिन् or साध् or परिकॢप्.

PRECONCERTED, *p. p.* पूर्वसङ्केतघटितः -ता -तं, पूर्वसङ्केतपरिकल्पितः &c., पूर्वसङ्केतसिद्धः -द्धा -द्धं, पूर्वघटितः &c., अग्रघटितः &c., साङ्केतिकः -की -कं.

PRECONCERTION, *s.* अग्रघटनं, पूर्वघटनं, पूर्वसङ्केतघटनं, पूर्वसङ्केतपरिकल्पना.

PRECURSOR, *s.* प्राग्गामी *m.* (न्), अग्रगामी *m.*, पूर्वगः, अग्रगः, अग्रसरः, पुरोगामी *m.*, प्राग्भावी *m.*, प्राग्वर्त्ती *m.*, अग्रवर्त्ती.—(Sign which precedes) पूर्वचिह्नं, पूर्वलक्षणं, अग्रलक्षणं, पूर्वलिङ्गं.

PRECURSORY, *a.* पूर्वसूचकः -का -कं, अग्रसूचकः &c., पूर्वगः -गा -गं, अग्रगः &c., अग्रसरः -रा -रं, पुरःसरः &c., अग्रवर्त्ती -र्त्तिनी -र्त्ति (न्), प्राग्भावी &c.

Digitized by Google

PREDATORY, *a.* लुण्ठनकारी -रिणी -रि (न्), अपहारकः -का -कं, अपहारार्थकः -का -कं, लुण्टाकः -का -कं, उपद्रवी &c., उपद्रवार्थकः &c.

PREDECESSOR, *s.* पूर्वाधिकारी *m.* (न्), पूर्वगः, अग्रगः, पूर्वभोगी *m.* (न्).

PREDESTINARIAN, *s.* दैष्टिकः, दैववादी *m.* (न्), अदृष्टवादी *m.* (न्), अदृष्टमतावलम्बी *m.*, दैवचिन्तकः, दैवपरः, दैवाधीनः, दैवायत्तः, दैवपरायणः, प्रारब्धवादी *m.*

To PREDESTINATE, PREDESTINE, *v. a.* अग्रे or पूर्वं निरूप् (c. 10. -रूपयति -यितुं) or प्रकॢप् or निर्दिश् or नियुज् or प्रयुज् or विधा.

PREDESTINATED, PREDESTINED, *p. p.* अग्रनिरूपितः -ता -तं, पूर्वनिरूपितः &c., अग्रप्रकल्पितः &c., पूर्वनिर्दिष्टः -ष्टा -ष्टं, दैष्टिकः -की -कं, अवश्यम्भावी -विनी -वि (न्), भावी &c., अवश्यम्भवितव्यः -व्या -व्यं, दैवाधीनः -ना -नं, दैवपरः -रा -रं, अदृष्टाधीनः &c.

PREDESTINATION *s.* अग्रनिरूपणं, पूर्वनिरूपणं, पूर्वयोजनं -ना, पूर्वनियोजनं, पूर्वनिर्देशः, अग्रप्रकल्पनं -ना.—(The doctrine) दैष्टिकता -त्वं, दैववादः, अदृष्टवादः, दैवमतं, अदृष्टमतं, प्रारब्धवादः, दैवचिन्ता.—(State of being predestined) दैवाधीनता, दैवायत्तता -त्वं, अदृष्टाधीनता, दैवपरता, अवश्यम्भवितव्यता.

PREDETERMINATION, *s.* अग्रनिश्चयः, पूर्वनिश्चयः, पूर्वसङ्कल्पः, पूर्वनिर्णयः.

To PREDETERMINE, *v. a.* अग्रे or पूर्वं निश्चि or निर्णी, पूर्वनिश्चयं कृ, पूर्वसङ्कल्पं कृ.

PREDETERMINED, PREDETERMINATE, *v. a.* पूर्वनिश्चितः -ता -तं, अग्रनिश्चितः &c., अग्रनिर्णीतः &c., पूर्वनिर्णीतः &c., पूर्वसङ्कल्पितः -ता -तं, पूर्वनिर्दिष्टः -ष्टा -ष्टं.

PREDIAL, *a.* क्षेत्रिकः -की -कं, क्षेत्र in comp.; 'predial slave,' क्षेत्रदासः.

PREDICABILITY, *s.* वाच्यता, कथनीयता, कथ्यता, वक्तुं शक्यता, वाद्यता.

PREDICABLE, *a.* वाच्यः -च्या -च्यं, कथनीयः -या -यं, वक्तुं शक्यः -क्या -क्यं, वाद्यः -द्या -द्यं.

PREDICAMENT, *s.* (In logic) पदार्थः, समानाधिकरणं, समानपदं, समानवर्गः, प्रकृतिः *f.*—(Condition, plight) दशा, अवस्था, स्थितिः *f.*, गतिः *f.*, दुर्दशा.

To PREDICATE, *v. a.* वद् (c. 1. वदति -दितुं), कथ् (c. 10. कथयति -यितुं), वच् (c. 2. वक्ति -क्तुं), उपदिश् (c. 6. -दिशति -देष्टुं), अभिधा (c. 3. -दधाति -धातुं), अवच्छेदं कृ, विशेषणं कृ, विशिष् (c. 10. -शेषयति -यितुं).

PREDICATE, *s.* वाच्यं, पदवाच्यं, विशेषणं, विशेषकं, लक्षणं, वाद्यं, पदाभिधेयं, पदशक्यं, अवच्छेदः -दकः; 'relation between the predicate and the subject,' वाच्यवाचकभावः, विशेषणविशेष्यभावः; 'subject of a predicate,' विशेष्यं, अनुवाद्यं.

PREDICATED, *p. p.* कथितः -ता -तं, विशेषितः -ता -तं, अवच्छिन्नः -न्ना -न्नं, विहितः -ता -तं; 'is predicated,' उच्यते, कथ्यते, उपदिश्यते.

PREDICATION, *s.* कथनं, विशेषणं, अवच्छेदनं, पदाभिधानं, विधानं.

To PREDICT, *v. a.* (Foretell) अग्रे or अग्रतः or पूर्वं कथ् (c. 10. कथयति -यितुं) or वद् (c. 1. वदति -दितुं) or प्रवद् or वच्, प्राक्सम्भवात् कथ्, भविष्यद् वद् or कथ्, भावि कथ्, भाविकथनं कृ, भविष्यत्कथनं कृ, भविष्यत् or अनागतं प्रदृश् in caus. or अग्रे दृश्, प्रत्याह (c. 1. -हरति -ते -हर्तुं).

PREDICTED, *p. p.* अग्रकथितः -ता -तं, पूर्वकथितः &c., प्राक् सम्भवात् कथितः &c. or उक्तः -क्ता -क्तं or प्रदर्शितः &c.

PREDICTION, *s.* भाविकथनं, भविष्यत्कथनं, अनागतकथनं, अग्रकथनं, पूर्वकथनं, प्राक्सम्भवात् कथनं, प्रदर्शनं, अनागतप्रदर्शनं, भविष्यद्बोधनं, भविष्यद्वाक्यं, उद्बोधनं.

PREDICTIVE, *a.* पूर्वकथकः -का -कं, अग्रकथकः &c., प्रदर्शकः &c., उद्बोधकः &c.

PREDICTOR, *s.* भाविकथकः, भविष्यत्कथकः, भविष्यद्वक्ता *m.* (क्तृ), अग्रवादी *m.* (न्), पूर्ववादी *m.*, प्रदर्शकः, अनागतदर्शकः, भाविवक्ता *m.*, भाविदर्शकः, दैवज्ञः, नैमित्तिकः.

PREDILECTION, *s.* पूर्वानुरागः, पूर्वानुरक्तिः *f.*, पूर्वप्रीतिः *f.*, पूर्वस्नेहः, पूर्वरुचिः *f.*, पूर्वछन्दस् *n.*, प्रावण्यं.

To PREDISPOSE, *v. a.* अग्रे or पूर्वं प्रवृत् in caus. or प्रयुज् or नियुज् or प्रोत्सह् in caus., प्रवणीकृ, प्रवणं -णां कृ, उन्मुखीकृ, उन्मुखं -खां कृ; 'to predispose to disease,' रोगसुग्राह्यं कृ, रोगयोग्यं -ग्यां कृ, रोगपात्रं कृ, रोगास्पदं कृ; 'to anger,' क्रोधप्रवणं -णां कृ.

PREDISPOSED, *p. p.* प्रवणः -णा -णं, अग्रप्रवर्त्तितः -ता -तं, उन्मुख in comp.

PREDISPOSITION, *s.* प्रावण्यं, प्रवणता, मनःप्रावण्यं, प्रवाहः, प्रवृत्तिः *f.*, उन्मुखता; 'to disease,' रोगसुग्राह्यता, रोगयोग्यता, रोगसुभेद्यता, रोगसुग्राह्यदशा.

PREDOMINANCE, PREDOMINANCY, *s.* प्राबल्यं, प्रबलता, प्राधान्यं, प्रधानता, प्रभावः, प्रभुता, प्रभूतता -त्वं, प्राभवं, आधिक्यं, अधिकत्वं, अतिरेकः, अतिरिक्तता.

PREDOMINANT, *a.* प्रबलः -ला -लं, प्रभविष्णुः -ष्णुः -ष्णु, प्रभूतः -ता -तं, प्रभवः -वा -वं, प्रधानः -ना -नं, अधिकः -का -कं, अतिरिक्तः -क्ता -क्तं, अतिरेकी -किणी -कि (न्), अतिशयी &c., सातिशयः -या -यं.

PREDOMINANTLY, *adv.* प्रबलं, प्राबल्येन, प्रधानतस्, प्रभावतस्, अतिरिक्तं.

To PREDOMINATE, *v. n.* प्रभू, अतिरिच् in pass. (-रिच्यते), उद्रिच्, व्यतिरिच्, प्रबलः -ला -लं भू, प्रबलीभू, अधिकः -का -कं भू, अधिकीभू.

PRE-EMINENCE, *s.* श्रेष्ठत्वं -ता, श्रैष्ठ्यं, सर्वश्रेष्ठता, उत्कर्षः, उत्कृष्टता, सर्वोत्कृष्टता, औत्कर्षं, प्रकर्षः, प्रकृष्टता -त्वं, प्रमुखता -त्वं, मुख्यता, प्रधानता, सर्वप्रधानता, प्राधान्यं, विशिष्टता, वैशिष्ट्यं, ज्येष्ठता, प्रभुता -त्वं, उन्नतिः *f.*, समुन्नतिः *f.*, आधिक्यं, अधिकत्वं, शिष्टता, वैशेष्यं, गुणवैशेष्यं, पुरोगतिः *f.*, अग्रगण्यता, उत्तमता, सर्वोत्तमता.

PRE-EMINENT, *a.* श्रेष्ठः -ष्ठा -ष्ठं, सर्वश्रेष्ठः &c., सर्वोत्तमः -मा -मं, उत्कृष्टः -ष्टा -ष्टं, उत्तमः -मा -मं, सर्वोत्कृष्टः &c., प्रधानः -ना -नं, सर्वप्रधानः &c., प्रधानोत्तमः -मा -मं, प्रमुखः -खा -खं, विशिष्टः &c., शिष्टः &c., मुख्यः -ख्या -ख्यं, अग्र्यः -र्या -र्यं, अग्रः -ग्रा -ग्रं, अग्रगण्यः -ण्या -ण्यं, अग्रणीः -णीः -णि, परमः -मा -मं, परः -रा -रं, ज्येष्ठः -ष्ठा -ष्ठं, सर्वज्येष्ठः &c., वृन्दारकः -का -कं, सातिशयः -या -यं or expressed by इन्द्रः, व्याघ्रः, सिंहः, शार्दूलः, ऋषभः, पुङ्गवः, नागः, चन्द्रः, कुञ्जरः, मुखः, प्रकाण्डः in comp. *See* EXCELLENT.

PRE-EMINENTLY, *adv.* परमं, प्रधानतस्, प्राधान्यतस्, सर्वप्रधानतस्, मुख्यशस्, सर्वश्रेष्ठं, सातिशयं, अतिशयेन, अधिकं, अत्यन्तं.

PRE-EMPTION, *s.* पूर्वक्रयः -यणं, अग्रक्रयः, पूर्वक्रयाधिकारः, अग्रक्रयाधिकारः; 'claimed by right of pre-emption,' प्रख्यातः -ता -तं.

To PRE-ENGAGE, *v. a.* पूर्वनियमेन or पूर्वसङ्केतेन बन्ध् or बद्धं -द्धां कृ, पूर्वं प्रतिज्ञा, पूर्वनियमं कृ, पूर्वसङ्केतं कृ, पूर्वप्रतिज्ञां कृ.

PRE-ENGAGED, *p. p.* पूर्वनियमबद्धः -द्धा -द्धं, पूर्वसङ्केतबद्धः &c., पूर्वनियमितः -ता -तं, पूर्वप्रतिज्ञातः &c., पूर्वसङ्केतितः &c.

PRE-ENGAGEMENT, *s.* पूर्वनियमः, पूर्वसङ्केतः, पूर्वप्रतिज्ञा, पूर्वसमयः.

PRE-EXAMINATION, *s.* पूर्वनिरूपणं, अग्रनिरूपणं, पूर्वविचारणं, पूर्वपरीक्षा.

To PRE-EXIST, *v. n.* अग्रे or अग्रतः or पूर्वं भू or वृत् or विद् or जीव्.

PRE-EXISTENCE, *s.* प्राग्भावः, पूर्वभावः, पूर्वभवः, पूर्वभूतिः *f.*, पूर्वजन्म *n.* (न्), पूर्वसत्त्वं, पूर्ववृत्तिः *f.*, प्राग्वृत्तिः *f.*, पूर्वदेहः, पूर्वजीवनं, पूर्वसत्ता, पूर्ववर्त्तनं.

PRE-EXISTENT, *a.* पूर्वभवः -वा -वं, पूर्वभूतः -ता -तं, पूर्वजीवी -विनी -वि (न्), पूर्ववर्त्ती &c., पूर्वदेहवान् -वती -वत् (त्).

Digitized by Google

PREFACE, *s.* प्रस्तावना -नं, प्रस्तावः, आभाषः, परिभाषा, उपोद्घातः, उपन्यासः, वाङ्मुखं, प्रकरणं, प्रारम्भः, प्रारम्भोक्तिः *f.*, आरम्भोक्तिः *f.*, उपक्रमोक्तिः *f.*, सूची.

To PREFACE, *v. a.* प्रस्तावनां कृ or लिख् (c. 6. लिखति, लेखितुं), प्रस्तु (c. 2. -स्तौति -स्तुते, c. 10. -स्तावयति -यितुं), प्रब्रू (c. 2. -ब्रवीति -वक्तुं), अग्रतः or पूर्वतो ब्रू or वद् or वच् or भाष्, वाक्यारम्भं कृ, परिभाषां कृ, सप्रस्तावनं -नां कृ.

PREFATORY, *a.* पारिभाषिकः -की -कं, प्रस्तावनारूपः -पा -पं, आभाषिकः &c., उपोद्घातरूपः -पा -पं, आरम्भकः &c.

PREFECT, *s.* पुराध्यक्षः, पुराधिपतिः *m.*, नगराध्यक्षः, नगराधिष्ठाता *m.* (तृ), अधिष्ठाता *m.*, अधिपतिः *m.*, नगराधिकारी *m.*

PREFECTURE, *s.* पुराध्यक्षता, नगराध्यक्षता, अध्यक्षता, अधिष्ठातृत्वं.

To PREFER, *v. a.* (Esteem more, value more, have greater liking for) अधिकं मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं) or प्रशंस् (c. 1. -शंसति -सितुं), अधिकं रुच् (c. 10. रोचयति -यितुं, c. 1. रोचते -चितुं) or अनुरुच् or अभिरुच् or इष् with abl., अधिकानुरागं कृ, अधिकानुरक्तः -क्ता -क्तं भू, अधिकाभिमतः -ता -तं भू. The construction of the sentence will vary as the Sanskrit verb may have an active or neuter sense; thus, 'I prefer this to that,' एतत् तस्मान् मह्यम् अधिकं रोचते, एतत् तस्माद् अधिकं रोचयामि or इच्छामि or प्रशंसामि, or मया अधिकं प्रशस्यते or मया अधिकम् अनुमतं or मम अधिकम् अभिमतं. The adverb वरं or the root शिष् with वि may be used to express the sense of 'prefer'; thus, 'I prefer death to poverty,' वरं मृत्युर् न च दारिद्र्यं (*i. e.* 'better death and not poverty'); 'I prefer death to dishonour,' अपमानात् प्राणत्यागो विशिष्यते. —(Choose before) पूर्वं वृ (c. 5. वृणोति -णुते, c. 9. वृणाति -णीते, c. 1. वरति -रितुं, c. 10. वरयति -यितुं), पूर्वं or अग्रे ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or वावृत्, पुरोधा (c. 3. -दधाति -धातुं); 'I prefer retirement to all pleasures,' अपक्रमणं सर्वकामैः or सर्वकामेभ्यो वृणे.—(Exalt, promote to an office, &c.) पदं वृध् (c. 10. वर्धयति -यितुं) or संवृध्, श्रेष्ठपदे or उत्कृष्टपदे नियुज् or प्रतिपद्, पदवृद्धिं कृ, प्रतिपत्तिं दा, पुरस्कृ.—(Present, offer) सम् in caus., निविद् in caus., उपह्, निवेदनं कृ, समर्पणं कृ.

PREFERABLE, *a.* (Worthy to be chsoen before, more desirable or excellent) वरं indec., वरीयान् -यसी -यः (स्), वरिष्ठः -ष्ठा -ष्ठं, वरणीयः -या -यं, पूर्ववरणीयः &c., अधिकवरणीयः &c., पूर्वग्राह्यः -ह्या -ह्यं, प्रथमग्राह्यः &c., अग्रग्राह्यः &c., श्रेयान् &c., श्रेष्ठः &c., गरीयान् &c., अधिकं प्रार्थनीयः -या -यं. The adverb वरं is usually followed by न च or न पुनर्; as, 'death is preferable to poverty,' वरं मृत्युर् न च दारिद्र्यं; 'death is preferable to intercourse with the base,' वरं प्राणत्यागो न पुनर् अधमानाम् उपगमः. *See* examples under *To* PREFER.

PREFERABLENESS, *s.* वरता -त्वं, पूर्वग्राह्यता, प्रथमग्राह्यता, श्रेष्ठता, श्रैष्ठ्यं, श्रेयस्त्वं, वरीयस्त्वं, गरीयस्त्वं.

PREFERABLY, *adv.* वरं, वरीयस्, श्रेयस्, गरीयस्, वरिष्ठं, श्रेष्ठं.

PREFERENCE, *s.* अधिकरुचिः *f.*, अधिकाभिरुचिः *f.*, पूर्वरुचिः *f.*, अग्ररुचिः *f.*, अधिकानुरागः, पूर्वानुरागः, अधिकमानं, अभिप्रेतं, वरता -त्वं, वरणं, वृतिः *f.*

PREFERMENT, *s.* (Advancement to a higher office) पदवृद्धिः *f.*, पदवर्धनं, स्थानवृद्धिः *f.*, प्रतिपत्तिः *f.*, वर्धनं, संवर्धनं -ना, प्रवर्धनं.—(Act of presenting) निवेदनं, समर्पणं.

PREFERRED, *p. p.* (Chosen before others) पूर्वगृहीतः -ता -तं, वृतः -ता -तं, पूर्ववृतः &c., मनोनीतः -ता -तं, पुरोहितः -ता -तं—(Advanced in rank) संवर्धितः -ता -तं, श्रेष्ठपदनियुक्तः -क्ता -क्तं, पुरस्कृतः &c.

PREFIGURATION, *s.* प्रतिरूपद्वारेण पूर्वप्रदर्शनं or पूर्वसूचनं, दृष्टान्तद्वारा प्राक्प्रदर्शनं, प्रतिरूपकद्वारेण अग्रप्रदर्शनं, सादृश्येन पूर्वदर्शनं, पूर्वलक्षणदर्शनं, पूर्वलक्षणकरणं.

PREFIGURATIVE, *a.* उद्बोधकः -का -कं, पूर्वप्रदर्शकः &c., पूर्वलाक्षणिकः -की -कं, लाक्षणिकः &c., बोधकः -का -कं, पूर्वसूचकः &c.

To PREFIGURE, *v. a.* प्रतिरूपद्वारेण पूर्वं प्रदृश् (c. 10. -दर्शयति -यितुं) or पूर्वतो दृश् or अग्रे प्रदृश्, दृष्टान्तद्वारा पूर्वं प्रदृश् or सूच् (c. 10. सूचयति -यितुं), प्रतिरूपकं दा or कृ, प्रतिबिम्बं दा, पूर्वलक्षणं दा or दृश्.

PREFIGURED, *p. p.* प्रतिरूपकद्वारा पूर्वप्रदर्शितः -ता -तं or पूर्वसूचितः &c.

To PREFIX, *v. a.* (Put or place before) पुरस्कृ, पुरतस्कृ, अग्रतस्कृ, पुरोधा (c. 3. -दधाति -धातुं), अग्रे or पुरतः स्था in caus.—(In writing) अग्रे or अग्रतः or पुरतः or मुखे लिख्.—(Settle beforehand) अग्रे or पूर्वं निश्चि or निर्णी or निरूप् or प्रकूप् or नियुज्.

PREFIX, *s.* (In grammar, particle prefixed) उपसर्गः.

PREFIXED, *p. p.* (Put before) पुरस्कृतः -ता -तं, पुरतस्कृतः &c., पुरःकृतः &c., पुरोहितः &c., अग्रे स्थापितः &c.—(Settled before) पूर्वनिश्चितः -ता -तं, पूर्वनिरूपितः -ता -तं.

PREGNANCY, *s.* गर्भधारणं, गर्भिणीत्वं, गर्भिणीभावः, गर्भग्रहणं, सगर्भता, धृतगर्भता, पूर्णगर्भता, सञ्जातगर्भता, गर्भपोषणं, ससत्त्वता, आपन्नसत्त्वता, सगर्भावस्था, अन्तरापत्यता, गर्भः.

PREGNANT, *a.* (Being with young) गर्भिणी, गर्भवती, सगर्भा, धृतगर्भा, गर्भधारिणी, गृहीतगर्भा, पूर्णगर्भा, आसन्नगर्भा, सञ्जातगर्भा, प्ररूढगर्भा, ससत्त्वा, आपन्नसत्त्वा, अन्तर्वत्नी, उदरिणी, गुर्विणी, अन्तरापत्या, द्विहृदया; 'a pregnant woman longing for any thing,' दोहदवती, अङ्गालुः *f.*; 'number of pregnant women,' गार्भिणं -ण्यं.—(Full of, abounding with) पूर्णः -र्णा -र्णं, सम्पूर्णः &c., गर्भः -र्भा -र्भं in comp., सङ्कुलः -ला -लं, आढ्यः -ढ्या -ढ्यं.—(Fruitful) सफलः -ला -लं, अवन्ध्यः -न्ध्या -न्ध्यं.

PREGUSTATION, *s.* पूर्वास्वादनं, पूर्वास्वादनं, अग्रास्वादनं, पूर्वप्राशनं.

To PREJUDGE, PREJUDICATE, *v. a.* अग्रे or पूर्वं विचर् (c. 10. -चारयति -यितुं) or निर्णी (c. 1. -णयति -णेतुं) or निश्चि, पूर्वविचारं कृ, पूर्वविचारणं कृ, पूर्वनिर्णयं कृ, पूर्वनिश्चयं कृ, वृत्तान्तम् अनिरूप्य or अविचार्ये निर्णयं कृ, अविचारपूर्वं निर्णयं कृ or निष्पत्तिं कृ, वृत्तान्तनिर्णयम् अकृत्वा निष्पत्तिं कृ, वृत्तान्तनिरूपणम् अकृत्वा निर्णयं कृ.

PREJUDGED, *p. p.* पूर्वविचारितः -ता -तं, पूर्वनिर्णीतः &c., पूर्वनिष्पन्नः -न्ना -न्नं.

PREJUDGMENT, *s.* पूर्वनिर्णयः, पूर्वविचारः -रणं, पूर्वनिष्पत्तिः *f.*, पूर्वनिश्चयः.

PREJUDICE, *s.* (Decision or opinion formed without due examination) अविचारपूर्वो निर्णयः, अनिरूपणपूर्वो निश्चयः, अपरीक्षापूर्वो बुद्धिः *f.*, अविचारपूर्विका मतिः *f.*, अविचारबुद्धिः *f.*, अविचारमतिः *f.*, अविचारितनिश्चयः, अविचारितनिर्णयः.—(Bias) दुराग्रहः, सङ्गः, मनोवक्रता, बुद्धिवक्रता, वक्रमतं, साचीकृतं, वक्रीकृतं, वक्रीभावः, आग्रहः, ग्रहः; 'free from prejudice,' मुक्तसङ्गः -ङ्गा -ङ्गं.—(Partiality for) पक्षपातः.—(Damage, detriment) क्षतिः *f.*, हानिः *f.*, अपचयः, अपायः, अपकारः, नाशः, हिंसा, क्षयः, बाधः, दूषणं, ध्वंसः.

To PREJUDICE, *v. a.* (Bias) साचीकृ, वक्रीकृ, बुद्धिवक्रतां कृ or जन्, दुराग्रहं कृ, दुराकर्षणं कृ, आकृष्, आवृज् (c. 10. -वर्जयति -यितुं), दुरावर्जनं कृ, चित्ताकर्षणं कृ, चित्तावर्जनं कृ.—(Injure, damage)

Digitized by Google

क्षतिं कृ, अपकृ, हिंस्, क्षण्, दुष्, क्षि, नश्, बाध्.

PREJUDICED, *p. p.* (Biased) साचीकृतः -ता -तं, वक्रीकृतः &c., सङ्की -ङ्किनी -ङ्कि (न्), सङ्कयुक्तः -क्ता -क्तं, साचीकृतबुद्धिः -द्धिः -द्धि, वक्रीकृतबुद्धिः &c., साचीकृतमतिः -तिः -ति.—(Damaged) अपकृतः -ता -तं, प्राप्तहानिः -निः -नि.

PREJUDICIAL, *a.* अहितः -ता -तं, अपकारकः -का -कं, क्षतिजनकः &c., अहितकरः -रा -रं, हानिजनकः &c., हिंसकः &c., घातुकः &c. *See* INJURIOUS.

PREJUDICIALLY, *adv.* अहितं, सापकारं, सापायं, हिंसया, सक्षतं.

PREKNOWLEDGE, *s.* पूर्वज्ञानं, अग्रज्ञानं, पूर्वबोधः, अग्रबोधः.

PRELACY, PRELATE. *See* EPISCOPACY, BISHOP, &c.

PRELECTION, *s.* पाठः -ठनं, पठनं, अध्यायः. *See* LECTURE.

PRELECTOR, *s.* पाठकः, पाठकारी *m.* (न्). *See* LECTURER.

PRELIBATION, *s.* पूर्वभोगः, पूर्वभुक्तिः *f.*, पूर्वानुभवः, आदिभोगः. *See* FORETASTE.

PRELIMINARY, *a.* प्राथमिकः -की -कं, आरम्भकः -का -कं, प्रारम्भकः &c., पूर्वः -र्वी -र्वं, पौर्विकः -की -कं, प्रथमः -मा -मं, पूर्वकर्त्तव्यः -व्या -व्यं, पूर्वकरणीयः -या -यं, अग्रकर्त्तव्यः &c., अग्रकरणीयः -या -यं, आद्यः -द्या -द्यं, आदि in comp., आदिकः -का -कं, आदिस्थः -स्था -स्थं, आरम्भस्थः &c., उपक्रमस्थः &c.—(Prefatory) पारिभाषिकः -की -कं, प्रस्तावनारूपः -पा -पं.

PRELIMINARY, *s.* पूर्वविषयः, पूर्वाङ्गं, पूर्वकर्म्म *n.* (न्), आद्याङ्गं, पूर्वोपायः, आरम्भकर्म्म *n.*, प्रारम्भककर्म्म *n.*, उपकरणं.—(Preliminary remarks) परिभाषा, आभाषः. *See* PREFACE.

PRELUDE, *s.* (In music) पूर्वरङ्गः, पूर्ववादनं, आरम्भवाद्यं.—(Dramatic) प्रस्तावना -नं, प्रस्तावः, आमुखं.—(Something introductory) आरम्भः, प्रारम्भः, उपक्रमः, प्रकरणं.—(Forerunner, something indicatory) पूर्वलक्षणं, पूर्वसूचकं, पूर्वचिह्नं, पूर्वरूपं.

To PRELUDE, *v. a.* प्रस्तु (c. 2. -स्तौति -स्तुते, c. 10. स्तावयति -यितुं), प्रस्तावनां कृ, पूर्वरङ्गं कृ, आरभ् (c. 1. -रभते -रब्धुं), समारभ्, उपक्रम् (c. 1. -क्रमते -मितुं), प्रक्रम्, प्रकृ, सम्प्रकृ.

PRELUDER, *s.* प्रस्तावनाकृत्, पूर्वरङ्गकारी *m.* (न्), पूर्ववादकः, आरम्भकः.

PRELUSIVE, PRELUSORY, *a.* आरम्भकः -का -कं, पूर्वसूचकः -का -कं.

PREMATURE, *a.* कालपूर्वपक्वः -क्वा -क्वं, प्राक्पूर्णकालात्पक्वः &c., अपूर्णकालः -ला -लं, अपूर्णकालिकः -का -कं, असम्पूर्णकालः &c., पूर्णकालपूर्वजः -जा -जं, अपूर्णकालजः -जा -जं, अकालपक्वः -क्वा -क्वं, अपक्वः &c., अपूर्णकालोत्पन्नः -न्ना -न्नं, अकालजः &c., अकालोत्पन्नः &c., अकालभवः -वा -वं, अकालिकः -की -कं, अप्राप्तकालः -ला -लं, असामयिकः -की -कं.—(Not waiting for the proper time) अकालसहः -हा -हं. *See* PRECIPITATE.

PREMATURELY, *adv.* प्राक्पूर्णकालात्, पूर्णकालात्पूर्वं, अपूर्णकाले, असम्पूर्णकाले, अकाले, असमये; 'prematurely born,' अपूर्णकालजः -जा -जं, अपूर्णकालोत्पन्नः -न्ना -न्नं, पूर्णकालपूर्वजातः -ता -तं; 'prematurely grey-haired,' युवपलितः -ता -तं; 'prematurely old,' युवजरन् -रती -रत् (न्), युवाजरन् &c.; 'prematurely bald,' युवखलतिः -तिः -ती -ति.

PREMATURENESS, PREMATURITY, *s.* कालपूर्वपक्वता, अपूर्णकालत्वं, अपूर्णकालिकत्वं -ता, अकालपक्वता, अकालोत्पत्तिः *f.*, अपूर्णकालोत्पत्तिः *f.*, अकालजत्वं, अकालिकत्वं.

To PREMEDITATE, *v. a.* पूर्वं or अग्रे चिन् or मनसा कॢप्, पूर्वकल्पनां कृ.

To PREMEDITATE, *v. n.* पूर्वं or अग्रे चिन् or ध्यै or विचर् or विमृश् or विगण्, पूर्वचिन्तां कृ, पूर्वविवेचनां कृ, पूर्वोपायं चिन्, पूर्वविचारणं कृ.

PREMEDITATED, *p. p.* or *a.* पूर्वकल्पितः -ता -तं, पूर्वचिन्तितः &c., पूर्वघटितः &c., बुद्धिपूर्वः -र्वा -र्वं, मतिपूर्वः &c., बुद्धिकृतः -ता -तं, पूर्वसङ्कल्पितः -ता -तं, साङ्कल्पिकः -की -कं, सङ्कल्पकृतः &c., पूर्वरचितः &c., पूर्वयोजितः &c.

PREMEDITATION, *s.* पूर्वकल्पना, पूर्वसङ्कल्पः, पूर्वपरिकल्पना, पूर्वघटना, पूर्वरचना, पूर्वयोजना, पूर्वानुसन्धानं, पूर्वचिन्ता -न्तनं, पूर्वविचारणा, पूर्वविवेचना.

PREMICES, *s. pl.* (First-fruits) नवान्नं, प्रथमफलं. *See* the word.

PREMIER, *a.* मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, प्रधानः -ना -नं.

PREMIER, *s.* (Prime-minister) मुख्यमन्त्री *m.* (न्), प्रधानमन्त्री *m.*, प्रधानामात्यः, महामन्त्री *m.*, प्रधानसचिवः, मुख्यप्रधानः.

PREMIERSHIP, *s.* मुख्यमन्त्रिता -त्वं, प्रधानमन्त्रिता -त्वं.

To PREMISE, *v. a.* उपन्यस् (c. 4. -अस्यति -असितुं), पूर्वं or अग्रे or वाङ्मुखे कथ् (c. 10. कथयति -यितुं) or ब्रू (c. 2. ब्रवीति, वक्तुं) or वद् (c. 1. वदति -दितुं) प्रस्तावपूर्वं कथ् or व्याख्या (c. 2. -ख्याति -तुं), पूर्वव्याख्यां कृ, पूर्वकथनं कृ, प्राक्कथनं कृ, प्रस्तावपूर्वकथनं कृ, उपक्रम् (c. 1. -क्रमते -मितुं), प्रक्रम्, प्रस्तु (c. 2. -स्तौति -स्तुते, c. 10. -स्तावयति -यितुं).

PREMISE, *s.* (In logic) पक्षः, अवयवः, प्रतिज्ञा, उपन्यासः, साधनं; 'major premise,' गुर्ववयवः, गुरुपक्षः, पूर्वपक्षः, आद्यपक्षः, हेत्वादिपक्षः; 'minor premise,' लघ्ववयवः, उत्तरपक्षः.

PREMISED, *p. p.* उपन्यस्तः -स्ता -स्तं, पूर्वकथितः -ता -तं, प्रस्तावपूर्वकथितः &c., प्रस्तावपूर्वसूचितः &c., प्रस्तुतः -ता -तं, प्रक्रान्तः -न्ता -न्तं; 'having premised,' उपन्यस्य, प्रतिपाद्य.

PREMISES, *s. pl.* (In logic). *See* PREMISE.—(In law, house with its adjuncts) गृहवाटिकादि *n.*, गृहक्षेत्रादि *n.*, गृहादि *n.*

PREMIUM, *s.* पारितोषिकं, मूल्यं, फलं, लभ्यं, लाभः, अधिकमूल्यं, अतिरिक्तमूल्यं, मूल्यातिरिक्तपारितोषिकं.

To PREMONISH, *v. a.* (Forewarn) अग्रे or पूर्वं बुध् in caus. or प्रबुध् or प्रत्यादिश् or उपदिश् or ज्ञा in caus., पूर्वं सूच् (c. 10. सूचयति -यितुं), पूर्वसूचनं कृ, पूर्वलक्षणं दा, पूर्वरूपं दा.

PREMONISHED, *p. p.* पूर्वबोधितः -ता -तं, पूर्वोपदिष्टः -ष्टा -ष्टं, पूर्वसूचितः &c.

PREMONITION, PREMONISHMENT, *s.* पूर्वबोधः -धनं, पूर्वप्रबोधः, पूर्वसूचना -नं, पूर्वलक्षणं, पूर्वरूपं.

PREMONITORY, *a.* पूर्वसूचकः -का -कं, पूर्वबोधकः -का -कं, उद्बोधकः &c., पूर्वसूचनकारी -रिणी -रि (न्), पूर्वलक्षणदः -दा -दं, पूर्वलाक्षणिकः -की -कं, पूर्वज्ञापकः &c.

PRENOMEN, *s.* व्यक्तिनाम *n.* (न्), उपाधिः *m.*

PRENTICE, *s.* अन्तेवासी *m.* (न्), छात्रः, सङ्केतपत्रबद्धशिष्यः, शिष्यः.

PRENTICESHIP, *s.* अन्तेवासित्वं, अन्तवासित्वं, अन्तेवासिभावः, अन्तेवासित्वकालः.

PRE-OCCUPATION, PRE-OCCUPANCY, *s.* पूर्वभोगः, पूर्वभुक्तिः *f.*, पूर्वधारणं, पूर्वग्रहणं.

PRE-OCCUPIED, *p. p.* पूर्वगृहीतः -ता -तं, पूर्वावृष्टः -ष्टा -ष्टं, पूर्वभुक्तः -क्ता -क्तं.

To PRE-OCCUPY, *v. a.* पूर्वं or अग्रे धृ or ग्रह् or भुज्, पूर्वधारणं कृ.

To PRE-ORDAIN, *v. a.* अग्रे or पूर्वं विधा or कॢप् or प्रकॢप् or निर्दिश् or स्था in caus., पूर्वविधानं कृ, पूर्वविधिं कृ, पूर्वस्थापनां कृ.

PREPARATION, *s.* (Act of getting ready, providing or fitting for any purpose) सज्जनं -ना, सज्जीकरणं, सज्जकर्म्म *n.* (न्), साधनं, सिद्धीकरणं, आयोजनं, उपकल्पनं -ना, परिकल्पनं -ना, कल्पनं -ना,

Digitized by Google

पुरस्करणं, पुरस्कारः, संस्कारः, संस्करणं, रचनं -ना, विरचनं -ना, उपाकर्म्म *n.* (न्), सम्भारः, सम्भृतिः *f.*, सन्धानं, समवधानं, प्रतिविधानं, उद्योगः, प्रस्तुतीकरणं.—(State of preparation) सिद्धिः *f.*, सिद्धता -त्वं.—(Previous or preparative measure) उपायः, साधनोपायः, अभ्युपायः, साधनं.—(That which is prepared or compounded, a compound) योगः, रसायनं; 'a preparation of mercury,' रसगर्भं, रसपुष्पं.—(Of medicine or food) संस्कारः, पाकः, पचनं.—(Prepared food) पक्वान्नं, सिद्धान्नं.

PREPARATIVE, PREPARATORY, *a.* सिद्धिजनकः -का -कं, सिद्धिकारकः -का -कं, सिद्धताजनकः -का -कं, साधकः -का -कं, उपक्रमसाधकः &c., आरम्भसाधकः &c., सिद्धिसाधकः &c., उपक्रमसहायः -या -यं, आरम्भोपकारी -रिणी -रि (न्), उपक्रमोपकारी &c., उपकल्पकः &c., परिकल्पकः &c., आयोजनकारी &c., उपक्रमप्रवर्त्तकः &c., प्रस्तुतकारी &c., योग्यताजनकः &c., आरम्भकारी &c.

PREPARATIVE, *s.* उपक्रमसाधनं, आरम्भसाधनं, सिद्धिसाधनं, सिद्धिजनकविषयः, सिद्धिजनककर्म्म *n.* (न्), परिकर्म्म *n.*, सिद्धताजनकविषयः.

PREPARATIVELY, *adv.* आयोजनपूर्व्वं, उपक्रमसाधनार्थं, आरम्भसाधनार्थं.

To PREPARE, *v. a.* (Make ready, fit for any purpose) सज्जीकृ, उपकॢप् (c. 10. -कल्पयति -यितुं, c. 1. -कल्पते -ल्पितुं), परिकॢप्, प्रकॢप्, कॢप्, युज् (c. 10. योजयति -यितुं), आयुज्, समायुज्, सिद्धीकृ, प्रस्तुतीकृ, उपस्कृ, संस्कृ, पुरस्कृ, रच् (c. 10. रचयति -यितुं), विरच्, सम्भृ (c. 1. -भरति -भर्त्तुं), सज्ज् (c. 1. सज्जति -ज्जितुं), साध् (c. 10. साधयति -यितुं), प्रतिविधा (c. 3. -दधाति -धातुं), विधा, विनिमो (c. 2. -माति -तुं), योग्यं -ग्यां कृ, उपयुक्तं -क्तां कृ, कार्य्येक्षमं -मां कृ, कार्य्योपयुक्तं -क्तां कृ.—(Provide with all necessary articles) सोपकारद्रव्यैः समायुज्, उपयुक्तद्रव्याणि परिकॢप् or उपकॢप् or सम्प्रकॢप् or उपस्था in caus. (-स्थापयति -यितुं) or उपपद् (c. 10. -पादयति -यितुं) or विधा, सोपकारद्रव्ययुक्तं -क्तां कृ, उपयुक्तद्रव्यसाधनं कृ.—(Dress) रच्, विरच्, प्रसाध्, विन्यस्.—(Prepare food) अन्नं संस्कृ or सिद्धीकृ or पच् or सन्धा.

To PREPARE, *v. n.* (Make all things ready) उपयुक्तद्रव्याणि परिकॢप् or उपकॢप्, सोपकारद्रव्यसम्भारं कृ, द्रव्यसम्भारं कृ, उपकरणसम्भारं कृ, सज्जनं कृ, संस्कारं कृ.—(Make one's self ready, be ready) उद्यतः -ता -तं भू, समुद्यतः -ता -तं भू, अभ्युद्यतः -ता -तं भू, उद्युक्तः -क्ता -क्तं भू, प्रस्तुतः -ता -तं भू; 'he prepared to kill the child,' स बालं हन्तुम् उद्यतः.

PREPARED, *p. p.* or *a.* सज्जीकृतः -ता -तं, सज्जितः -ता -तं, सज्जः -ज्जा -ज्जं, प्रस्तुतः -ता -तं, उपकल्पितः &c., परिकल्पितः &c., कल्पितः &c., उपकॢप्तः -प्ता -प्तं, प्रकॢप्तः &c., सम्भृतः -ता -तं, सिद्धः -द्धा -द्धं, सम्प्रस्तुतः -ता -तं, पुरस्कृतः -ता -तं, उद्यतः -ता -तं, समुद्यतः &c., अभ्युद्यतः &c., उद्युक्तः -क्ता -क्तं, आयुक्तः &c., संस्कृतः &c., संस्कारितः &c., संहितः &c., सोपकारद्रव्ययुक्तः &c., उपपादितः -ता -तं, परिनिर्म्मितः &c.; 'to be prepared,' उद्यतः -ता -तं भू or अस्, उद्युक्तः &c. भू, सज्जीभू.

PREPAREDNESS, *s.* सिद्धता -त्वं, सिद्धिः *f.*, प्रस्तुतत्वं, उद्यतत्वं, उद्युक्तत्वं.

PREPARER, *s.* उपकल्पकः, परिकल्पकः, आयोजनकर्त्ता *m.* (र्त्तृ), सिद्धिकर्त्ता *m.*, साधकः, रचकः, विरचकः, संस्कर्त्ता *m.* (र्त्तृ).

PRE-PAYMENT, *s.* पूर्व्वशोधनं, पूर्व्वशुद्धिः *f.*, पूर्व्वसिद्धिः *f.*, पूर्व्वदानं.

PREPENSE, PREPENSED, *a.* *See* PREMEDITATED.—(Malice prepense) द्रोहचिन्ता -न्तनं, व्यापादः -दनं; 'with malice prepense,' द्रोहचिन्तापूर्व्वं, बुद्धिपूर्व्वं, मतिपूर्व्वं, कामतस्; 'without malice prepense,' अबुद्धिपूर्व्वकं, अमतिपूर्व्वकं, अकामात् -मतस्.

PREPONDERANCE, *s.* (Superiority of weight) भाराधिक्यं, भारातिरिक्तता, भारातिरेकः, अधिकभारः, अतिरिक्तभारः, गुरुतरभारः.—(Superiority of power or force) अधिकप्रभावः, प्रभावाधिक्यं, प्रधानता, प्राधान्यं, प्रभविष्णुता, प्रभावः, प्राबल्यं, प्रबलता, गौरवं, अधिकशक्तिः *f.*, बलाधिक्यं.

PREPONDERANT, *a.* अधिकभारी -रिणी -रि (न्), अतिरिक्तभारी &c., अतिभारी &c.

To PREPONDERATE, *v. n.* अधिकभारी -रिणी -रि भू or अस्, अतिरिक्तभारी &c. भू, अतिभारी &c. भू, गुरुतरभारी &c. भू, गुरुतरः -रा -रं भू, भारेण अतिरिच् in pass. (-रिच्यते) or वृध् (c. 1. वर्धते -र्धितुं), गौरवेण अतिरिच् or वृध्, प्रभावेण अतिरिच्, अधिकः -का -कं भू, अधिकप्रभावः &c. भू or अस्, अधिकशक्तिः -क्तिः -क्ति भू.

PREPOSITION, *s.* (In grammar) उपसर्गः, शब्दयोगी अव्ययशब्दः.

PREPOSITIONAL, PREPOSITIVE, *a.* औपसर्गिकः -की -कं, उपसर्गसम्बन्धी -न्धिनी &c.

To PREPOSSESS, *v. a.* (Pre-occupy). *See* the word.—(Bias in favor of) चित्ताकर्षणं, चित्तावर्জनं कृ, चित्तम् आकृष् or आवृज्.—(Bias against). *See To* PREJUDICE.

PREPOSSESSED, *p. p.* आकृष्टचित्तः -त्ता -त्तं, आकर्षितचित्तः &c., पूर्व्वाकर्षितः -ता -तं, प्रथमदर्शनादपि or दर्शनमात्राद् आकृष्टचित्तः &c., दृष्टमात्राद् एव आकृष्टचित्तः &c., सङ्गी -ङ्गिनी -ङ्गि (न्), ससङ्गः -ङ्गा -ङ्गं.

PREPOSSESSING, *a.* दर्शनमात्रात् or अवलोकनक्षणात् or प्रथमदर्शनात् चित्ताकर्षकः -का -कं, दृष्टमात्रचित्ताकर्षकः &c., चित्तापहारी -रिणी -रि (न्).

PREPOSSESSION, *s.* (Pre-occupation). *See* the word.—(Previous impression). *See* PRECONCEPTION.—(Inclination in favor of) चित्ताकर्षणं, सङ्गः, ग्रहः, आग्रहः, पक्षपातः.

PREPOSTEROUS, *a.* (Inverted in order) विपरीतः -ता -तं, विपरीतक्रमः -मा -मं, विपर्य्यस्तः &c. *See* INVERTED.—(Absurd) असङ्गतः -ता -तं, अयुक्तः -क्ता -क्तं, अनर्थकः -का -कं, युक्तिविरुद्धः -द्धा -द्धं, असम्बद्धः -द्धा -द्धं, अयुक्तिकः -का -कं, न्यायविरुद्धः &c., असमञ्जसः -सा -सं, अयथोचितः -ता -तं.

PREPOSTEROUSLY, *adv.* असङ्गतं, अयुक्तं, अयुक्तिपूर्व्वं, युक्तिविरुद्धं, विपरीतक्रमेण.

PREPOSTEROUSNESS, *s.* असङ्गतत्वं, अयुक्तता -त्वं, युक्तिविरुद्धता, अयुक्तिः *f.*, अनर्थकता, असम्बद्धता -त्वं, न्यायविरुद्धता, असामञ्जस्यं, वैपरीत्यं, क्रमविपर्य्यासः, विपरीतता.

PREPOTENCY, *s.* प्रभावाधिक्यं, बलाधिक्यं, प्रबलता. *See* PREDOMINANCE.

PREPUCE, *s.* लिङ्गाग्रत्वक् *f.* (च्), शिश्नाग्रत्वक् *f.*, लिङ्गाग्रचर्म्म *n.* (न्), अग्रत्वक् *f.*; 'frenum of the prepuce,' सेवनं, सीवनी.

PREREQUISITE, *a.* पूर्व्वाकांक्षितः -ता -तं, पूर्व्वापेक्षितः &c., पूर्व्वावश्यकः -का -कं.

PREREQUISITE, *s.* पूर्व्वावश्यकविषयः, पूर्व्वाकांक्षितविषयः, पूर्व्वावश्यकवस्तु *n.*

PREROGATIVE, *s.* विशेषाधिकारः, असाधारणाधिकारः, अद्वितीयाधिकारः, असामान्याधिकारः, विशेषशक्तिः *f.*, असाधारणशक्तिः *f.*, अद्वितीयक्षमता, विशेषसत्ता.

PRESAGE, *s.* पूर्व्वलक्षणं, पूर्व्वलिङ्गं, पूर्व्वचिह्नं, पूर्व्वसूचना, भविष्यत्सूचना.

To PRESAGE, *v. a.* पूर्व्वं or अग्रे सूच् (c. 10. सूचयति -यितुं), पूर्व्वलक्षणं दा or कृ, पूर्व्वचिह्नं दा, पूर्व्वसूचनं कृ, अग्रसूचनं कृ.

PRESCIENCE, *s.* पूर्व्वज्ञानं, अग्रज्ञानं, अग्रनिरूपणं, भविष्यज्ञानं, भाविज्ञानं, भविष्यद्ज्ञानं, भविष्यदर्शनं, प्रवेक्षणं. *See* FOREKNOWLEDGE.

PRESCIENT, *a.* भविष्यज्ञानी -निनी -नि (न्), भाविज्ञानी &c., भविष्यदर्शी &c., भविष्यज्ज्ञानी &c., भविष्यद्दर्शी &c., प्रवेक्ष्यन् -क्ष्यन्ती -क्ष्यत् (त्), प्रपश्यन् &c., अनागतदर्शी &c.

To PRESCRIBE, *v. a.* (Direct) निर्दिश् (c. 6. -दिशति -देष्टुं), आदिश्,

Digitized by Google

प्रदिश्, विनिर्दिश्, कूप्, प्रकूप्, विधा, संविधा, आज्ञा in caus., चुद्, प्रचुद्, शास्, प्रशास्, अनुशास्, सूच्, आज्ञां कृ, नियमं कृ, विधिं कृ.—(Direct medically) उपचारं कृ, औषधं विधा or निर्दिश्.

To PRESCRIBE, *v. n.* (Direct remedies) उपचारं कृ, औषधोपचारं कृ, औषधविधानं कृ, औषधविधिं कृ, औषधप्रयोगं कृ, भेषजप्रयोगं कृ, औषधनिर्देशं कृ.

PRESCRIBED, *p. p.* निर्दिष्टः -ष्टा -ष्टं, निर्दिष्टः -ष्टा -ष्टं, विहितः -ता -तं, नियमितः &c., चोदितः &c., प्रचोदितः &c., विधियुक्तः -क्ता -क्तं, विधिप्रोक्तः &c., उदितः -ता -तं, वैधिकः -की -कं, वैधः -धी -धं, वाचनिकः -की -कं, उद्दिष्टः -ष्टा -ष्टं, विधीयमानः -ना -नं.

PRESCRIBER, *s.* निर्देष्टा *m.* (ष्टृ), निर्देशकः, आदेष्टा *m.*, विधायी *m.* (न्), अनुशासकः.

PRESCRIPT, *s.* निर्देशः, आदेशः, विधिः *m.*, विधानं, आज्ञा. *See* COMMAND.

PRESCRIPTION, *s.* (Direction) निर्देशः, आदेशः, निदेशः, विधानं, विधिः *m.*, चोदनं -ना, प्रचोदनं, नियमः, शासनं, शास्तिः *f.*, अनुशासनं, प्रेरणा, वचनं.—(Recipe, prescribed medicine) उपचारलेखः, उपचारपत्रं, चिकित्सालेखः, चिकित्सापत्रं, औषधविधिः *m.*, औषधविधानं, उपचारविधिः *m.*—(Immemorial use) अनादिपरम्परा, चिरकालभोगः, चिरकालव्यवहारः, चिरकालीनव्यवहारः, चिरकालपरम्परा, प्राचीनव्यवहारः, प्राचीनभोगः, आचारः.

PRESCRIPTIVE, *a.* (Consisting in or acquired by immemorial use) अनादिपरम्पराप्राप्तः -प्ता -प्तं, अनादिपरम्परायातः -ता -तं, चिरकालभुक्तः -क्ता -क्तं, चिरकालव्यवहृतः -ता -तं, चिरकालव्यवहारितः &c., चिरकालभोगाश्रयी -यिणी -यि (न्), चिरव्यवहारसिद्धः -द्धा -द्धं, आचारिकः -की -कं, व्यवहारिकः &c.

PRESENCE, *s.* (As opposed to absence) प्रत्यक्षता, समक्षता, अभिमुख्यं, अभिमुखता -त्वं, सन्निधानं, सान्निध्यं, सन्निधिः *m.*, पारिमुख्यं, सम्मुखता -त्वं, विद्यमानता -त्वं, वर्त्तमानता, अन्तिकं -कता -त्वं, अपरोक्षता, उपस्थानं, उपस्थितिः *f.*; 'in my presence,' मत्सन्निधाने; 'in presence of,' प्रत्यक्षे -क्षतस्, समक्षं -क्षे, साक्षात्, अग्रे, सम्मुखं -खे, प्रतिमुखं, अभितस्; 'into the presence of,' सकाशं, समीपं, अन्तिकं, साक्षात्; 'they took him into the presence of the magistrate,' धर्म्माधिकारिसमीपं तम् आनीतवन्तः; 'into the presence of her husband,' भर्त्तुः सकाशं or समीपं; 'into my presence,' मत्सकाशं, ममान्तिकं.—(Mien, personal appearance) आकारः, आकृतिः *f.*, रूपं, शरीररूपं, शरीराकारः, शरीरसंस्थानं.—(Presence of mind) चित्तास्थानिः *f.*, अव्यग्रचित्तत्वं, अव्यग्रता, अभ्रान्तचित्तत्वं, स्वस्थचित्तत्वं, स्थिरचित्तता -त्वं, असम्भ्रमः, अव्यस्तता, अव्याकुलता, सावधानता, चित्तसत्त्वं, सत्त्वं, अस्तब्धता; 'having presence of mind,' अव्यग्रचित्तः -त्ता -त्तं, तत्कालधीः -धीः -धि. *See* PRESENT.

PRESENCE-CHAMBER, *s.* दर्शनशाला, दर्शनगृहं, राजदर्शनशाला.

PRESENT, *a.* (Not absent) प्रत्यक्षः -क्षा -क्षं, विद्यमानः -ना -नं, वर्त्तमानः -ना -नं, अभिमुखः -खा -खी -खं, पारिमुखिकः -की -कं, उपस्थायी -यिनी -यि (न्), उपस्थितः -ता -तं, सन्निहितः -ता -तं, अपरोक्षः -क्षा -क्षं, सम्मुखः -खा -खं, सम्मुखीनः -ना -नं, सन्निधिस्थः -स्था -स्थं, अभिमुखस्थः &c., अन्तिकः -का -कं, समीपः -पा -पं; 'to be present,' उपस्था, वृत्, समास्.—(Now in view or under consideration) प्रस्तुतः -ता -तं, विद्यमानः -ना -नं, उपस्थितः -ता -तं, प्रकृतः -ता -तं; 'present matter,' प्रस्तुतविषयः.—(Now existing, not past or future) वर्त्तमानः -ना -नं, तात्कालिकः -की -कं, तत्क्षणिकः -का -की -कं, सद्यस्कालीनः -ना -नं, सद्यस्कः -स्का -स्कं, वर्त्तमानकालीनः -ना -नं, अधुनातनः -नी -नं, इदानीन्तनः -नी -नं, आधुनिकः -की -कं, साम्प्रतिकः -की -कं, प्रस्तुतकालीनः -ना -नं, अद्यतनः -नी -नं, ऐहिकः -की -कं, ऐहकालिकः &c., अनपेतः -ता -तं; 'present time,' वर्त्तमानकालः, तत्कालः, तत्क्षणः -णं, सद्यस्कालः, तदात्वं, इहकालः, साम्प्रतकालः, इहसमयः, अस्ति indec. भवन्ति: *m.*; 'at the present time,' वर्त्तमानकाले, तत्काले, तत्क्षणे, सद्यस्काले, इहकाले, इहसमये, इदानीं, अधुना, इह, अधुनातनकाले, सम्प्रति, साम्प्रतं, साम्प्रतकाले, एतर्हि, अद्य, प्रस्तुतकाले; 'for the present,' प्रस्तुतकालं, साम्प्रतकालं, इहकालं, साम्प्रतं.—(Present tense) वर्त्तमानं, विद्यमानं; 'the grammatical symbol is की.—(Having presence of mind) सावधानः -ना -नं, अभ्रान्तचित्तः -त्ता -त्तं, स्थिरचित्तः &c., अव्यग्रचित्तः &c., स्वस्थचित्तः &c., समाहितचित्तः &c., समाहितमनाः -नाः -नः (स्), सुसमाहितः -ता -तं, अव्याकुलचित्तः &c., तत्कालधीः -धीः -धि, अवहितः -ता -तं.

PRESENT, *s.* (Gift) दानं, प्रदानं, सम्प्रदानं, दत्तं, उपदा, उपदानकं, उपायनं, दक्षिणा, उपहारः -रकं, उपग्राह्यं, उपढौकनं, प्रीतिदानं, प्रदेशनं, प्रादेशनं, पारितोषिकं, प्राभृतं, वितरणं &c. *See* GIFT.—(The time being, the present) वर्त्तमानकालः, तत्कालः, तत्क्षणः, सद्यस्कालः, तदात्वं, साम्प्रतकालः, अधुनातनकालः, इदानीन्तनकालः, प्रस्तुतकालः, आपातः, भवन्ति: *m.*, अस्ति indec., प्रमुखं; 'present and future,' दृष्टादृष्टं.

To PRESENT, *v. a.* (Introduce to the presence of another) प्रविश् (c. 10. -वेशयति -यितुं), दर्शनं कृ in caus., दृश् in caus., पुरस्कृ, प्रवेशनं कृ, परसमीपं or परसकाशम् आनी.—(Present one's self or itself) आत्मानं दृश् in caus. (दर्शयति -यितुं), उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रविश् (c. 6. -विशति -वेष्टुं), दर्शनं दा, प्रवेशं कृ, उपस्थितः -ता -तं भू, आविर्भू, प्रादुर्भू, दृश् in pass., लक्ष् in pass.—(Exhibit) दृश् in caus., प्रदृश्, प्रत्यक्षीकृ, प्रकटीकृ, प्रादुष्कृ, आविष्कृ, व्यक्तीकृ, सूच्, प्रकाश्, प्रसू in caus.—(Offer, present for acceptance) आहृ, उपाहृ, अभ्याहृ, उपहृ, समुपहृ, उपहारीकृ, प्रदा, अभिदा, सम्प्रदा, उपदा, दा, प्रयम्, ग्रह् in caus., प्रतिग्रह्, प्रतिपद् in caus., उपपद्, भू in caus., समृ, निविद् in caus., निक्षिप्, उपढौक्, ढौक्, उपस्था in caus., उपनिधा, उपहरणं कृ.—(Present an oblation) उपहृ, उपहारीकृ, निविद्, निवेदनं कृ, निर्वप्, निर्वपणं कृ, उत्सृज्, उत्सर्गं कृ, बलिदानं कृ, उपायनं कृ.—(Give) दा, प्रदा, उपदा, उपायनं कृ.—(Lay before) उपन्यस्, निविद्, भू in caus., समृ.

PRESENTABLE, *a.* (That may be introduced) प्रवेशनीयः -या -यं.—(That may be exhibited) दर्शनीयः -या -यं.—(That may be offered) देयः -या -यं, प्रदेयः -या -यं, उपहार्य्यः -र्य्या -र्य्यं, निवेदनीयः -या -यं.—(Admissible into society) सभ्यः -भ्या -भ्यं, सभायोग्यः -ग्या -ग्यं, पांक्तेयः -या -यं, पांक्तः -क्ता -क्तं; 'not presentable,' असभ्यः &c., अपांक्तेयः &c., अपांक्तः &c., अपांक्तः &c.

PRESENTATION, *s.* उपहरणं, प्रतिपादनं, प्रतिपत्तिः *f.*, अर्पणं, समर्पणं, निवेदनं, प्रदानं, अभिवाह्यं.—(Of an oblation) बलिदानं, निर्वपणं, निर्वापणं, निर्वापः, उत्सर्गकरणं.—(To a benefice) धर्म्माध्यापकवृत्तिप्रतिपादनं, धर्म्मवृत्तिनियोजनाधिकारः.—(Bad presentation of the child at birth) मूढगर्भः.

PRESENTED, *p. p.* (Introduced to the presence of another) प्रवेशितः -ता -तं, पुरस्कृतः &c., परसमीपं or परसकाशं or परसाक्षाद् आनीतः -ता -तं.—(Exhibited) दर्शितः -ता -तं, प्रदर्शितः &c., प्रत्यक्षीकृतः &c., प्रसारितः &c.—(Presented for acceptance) उपहृतः

Digitized by Google

-ता -तं, समुपहृतः &c., प्रदत्तः -त्ता -त्तं, प्रत्तः &c., अर्पितः -ता -तं, समर्पितः &c., प्रतिपादितः &c., उपपादितः &c., उपनीतः &c., उपनिहितः &c., उपस्थापितः &c., ढौकितः &c., उपढौकितः &c.—(As an oblation, &c.) उपहृतः &c., उपहारीकृतः &c., निवेदितः &c., उत्सृष्टः -ष्टा -ष्टं, अर्पितः &c.—(Given) दत्तः -त्ता -त्तं, प्रदत्तः &c., नीतः &c., निहितः &c., निक्षिप्तः -प्ता -प्तं, विश्राणितः -ता -तं, वितीर्णः -र्णा -र्णं.—(Laid before) उपन्यस्तः -स्ता -स्तं, समर्पितः -ता -तं.

PRESENTIMENT, *s.* पूर्ब्बबोधः, अग्रबोधः, पूर्ब्बवासना, पूर्ब्बवेदनं, अग्रवेदनं, पूर्ब्बभावना, पूर्ब्बकल्पना.

PRESENTLY, *adv.* (At present) तत्काले, तत्क्षणे, सद्यस्काले. *See* under PRESENT, *a.*—(Soon, in a short time) अनन्तरं, अचिरेण, अचिरात्, क्षणान्तरे, नचिरेण, नचिरात्, शीघ्रं, सद्यस्, आशु, झटिति, सपदि, द्राक्,—(Immediately) अनन्तरं.

PRESERVABLE, *a.* रक्षणीयः -या -यं, संरक्षणीयः &c., रक्ष्यः -क्ष्या -क्ष्यं, संरक्ष्यः &c., रक्षितव्यः -व्या -व्यं, गोपनीयः -या -यं, गोप्यः -प्या -प्यं, पालनीयः -या -यं, अवनीयः -या -यं.

PRESERVATION, *s.* रक्षणं, रक्षा, परिरक्षणं, अभिरक्षा -क्षणं, संरक्षा -क्षणं, संरक्षः, गुप्तिः *f.*, त्राणं, परित्राणं, पालनं, प्रतिपालनं, परिपालनं, गोपनं, संगोपनं, अवनं, तारणं, पोषणं, स्थितिः *f.*

PRESERVATIVE, *a.* रक्षकः -का -कं, संरक्षकः &c., रक्षी -क्षिणी -क्षि (न्), रक्षणकारी -रिणी -रि (न्), पालकः -का -कं, गोपकः -का -कं, गोपिलः -ला -लं, पौष्टिकः -की -कं, रक्षिता -त्री -तृ (तृ), तारकः -का -कं, रक्षणसाधकः -का -कं.

PRESERVATIVE, *s.* रक्षणं, रक्षणसाधनं, रक्षणोपायः, त्राणं in comp., त्राणसाधनं, त्रं in comp., गुप्तिसाधनं, पात्रं.

To PRESERVE, *v. a.* (Save from injury) रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, त्रै (c. 1. त्रायते, त्रातुं), परित्रै, संत्रै, पाल् (c. 10. पालयति -यितुं), परिपाल्, अभिपाल्, प्रतिपाल्, अनुपाल्, सम्पाल्, उपपाल्, पा (c. 2. पाति -तुं), परिपा, गुप् (c. 1. गोपायति, गोतुं, c. 10. गोपयति -यितुं), अभिगुप्, अनुगुप्, प्रगुप्, तॄ in caus. (तारयति -यितुं), अव् (c. 1. अवति -वितुं), धृ (c. 10. धारयति -यितुं), पर्योप् in des. (परीप्सति -ते -प्सितुं), परिप्राप् in des., रक्षणं कृ, रक्षां कृ, पालनं कृ, गुप्तिं कृ, गोपनं कृ, अवनं कृ.—(Maintain) धृ, सन्धृ, भृ, सम्भृ, भरणं कृ, पुष् (c. 10. पोषयति -यितुं), पोषणं कृ.—(Conserve, pickle) सन्धा, उपस्कृ, मिष्टीकृ.

PRESERVE, *s.* (Fruit preserved in sugar) मिष्टफलं, सन्धितफलं, सन्धितं.—(Place for the shelter of game) वीतंसः, वितंसः, जन्तुलप्स्यादिरक्षणस्थानं.

PRESERVED, *p. p.* रक्षितः -ता -तं, संरक्षितः &c., अभिरक्षितः &c., त्राणः -णा -णं, त्रातः -ता -तं, गुप्तः -प्ता -प्तं, गोपितः -ता -तं, संगोपितः &c., पालितः -ता -तं, प्रतिपालितः &c., परिपालितः &c., गोपायितः -ता -तं, तारितः &c., अवितः -ता -तं, धारितः &c., भृतः &c., पोषितः -ता -तं.—(Pickled) सन्धितः -ता -तं, उपस्कृतः &c.

PRESERVER, *s.* रक्षकः, रक्षी *m.* (न्), त्राता *m.* (तृ), पालकः, पालः, पालयिता *m.* (तृ), रक्षिता *m.* (तृ), संरक्षकः, गोप्ता *m.* (प्तृ), गोपकः, संगोपकः, गोपः, गोपी *m.* (न्), गुप्तकः, गोपिलः, गोपायकः, तारकः, रक्षणकारी *m.*, रक्षणकर्त्ता *m.* (र्त्तृ), पालनकारी *m.*, पालनकृत् *m.*, पः in comp., गुप्तिकर्त्ता *m.* (र्त्तृ), स्थितिकर्त्ता *m.*

To PRESIDE, *v. a.* अधिष्ठा (c. 1. -तिष्ठति -ते -ष्ठातुं), समधिष्ठा, अध्यास् (c. 2. -आस्ते -आसितुं), अधीश् (c. 2. -ईष्टे -ईशितुं), अध्यक्षः -क्षा -क्षं भू or अस्, अधिकृतः -ता -तं भू, अधिकारी -रिणी -रि भू, अधिभू, प्रभू, अधिपतिर् भू or अस्.—(Exercise superintendence, watch over) अवेक्ष् (c. 1. -ईक्षते -क्षितुं), कार्य्यावेक्षणं कृ, कार्य्येक्षणं कृ, कार्य्यदर्शनं कृ, कार्य्याधीशो भू; 'the deity who presides over learning,' विद्याधिष्ठात्री देवता.

PRESIDED OVER, *p. p.* अधिष्ठितः -ता -तं, समधिष्ठितः &c., अध्यासितः &c., प्रभूतः &c.

PRESIDENCY, *s.* (Superintendence) अध्यक्षता -त्वं, अधिकारः, अधीकारः, अधिष्ठितिः *f.*, अधिष्ठानं, अध्यासः. *See* the word.—(Office of a president) अधिष्ठातृत्वं -ता, अध्यक्षता, अध्यक्षपदं, अधिकारित्वं, अधीशता, आधिपत्यं, प्रभुता, उपद्रष्टृत्वं.—(Country under the jurisdiction of a president) अध्यक्षाधीनः प्रदेशः or देशः or विषयः, मण्डलं.

PRESIDENT, *s.* अध्यक्षः, अधिष्ठाता *m.* (तृ), अध्यासीनः, अधिकारी *m.* (न्), अधिकृतः, अधीशः, अधिपतिः *m.*, अधिपः, पतिः *m.*, प्रभुः *m.*, अधीश्वरः, कर्म्माध्यक्षः, श्रेष्ठी *m.* (न्), नायकः, प्रामाणिकः, उपद्रष्टा *m.*, मुख्यः, उदास्थितः; 'of an assembly,' सभापतिः *m.*, सभाध्यक्षः, सभानायकः, गोष्ठीपतिः *m.*

PRESIDENTSHIP, *s.* अध्यक्षता -त्वं, अधिष्ठातृत्वं, आधिपत्यं. *See* PRESIDENCY.

PRESIDING, *part.* or *a.* अध्यासीनः -ना -नं, अध्यक्षः -क्षा -क्षं, अधिष्ठाता -त्री -तृ (तृ); 'presiding deity,' अधिष्ठात्री देवता; 'the deity presiding over learning,' विद्याधिष्ठात्री देवता.

To PRESS, *v. a.* (Squeeze, compress) पीड् (c. 10. पीडयति -यितुं), सम्पीड्, निपीड्, अभिनिपीड्, आपीड्, संकुच्, संदृ, प्रतिसंदृ, घट्ट्, संघट्ट्, संवृ, संहन्.—(Urge, drive) प्रेर्, कृष्, आकृष्, समाकृष्, प्रणुद्.—(Urge, importune) अतिनिर्बन्धेन प्रार्थ् or अभ्यर्थ् or याच्, आग्रहेण प्रार्थ्, वारं वारं प्रार्थ्, पुनः पुनः प्रार्थ्, अतिप्रार्थनेन परम् उद्विज् or आयस् or आक्रम् or उपस्था.—(Inculcate urgently) अतिनिर्बन्धेन or मुहुर्मुहुर् उपदिश् or शिक्ष्.—(Force, constrain) बलेन or बलात्कारेण or बलात् कृ in caus. or प्रवृत् in caus., or expressed generally by the causal form.—(Distress, straiten) बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्, अधिबाध्, पीड्, उपपीड्, अभिपीड्, क्लिश्, व्यथ्, तप्, सन्तप्, उद्विज् in caus., क्लेशं कृ or दा.—(Impress seamen) बलात्कारेण पुरुषान् धृत्वा नाविकादिकर्म्मणि व्यापृ in caus.

To PRESS, *v. n.* (Go forward with force or effort) यत्नतस् or महायत्नेन or सोद्योगं or सोत्साहं प्रया or प्रगम् or अग्रे गम् or अग्रे सृ.—(Bear on, encroach upon) आक्रम्, अभिक्रम्, अध्याक्रम्, उपस्था (c. 1. -तिष्ठति -स्थातुं), समुपस्था, प्रत्युपस्था.—(Crowd, press upon) बाध् (c. 1. बाधते -धितुं), प्रबाध्.

PRESS, *s.* (Instrument for pressing) चक्रयन्त्रं, चक्रं, पीडनयन्त्रं, पेषणयन्त्रं; 'oil-press,' परञ्चः, तैलिकयन्त्रं, तैलिकचक्रं.—(For printing) मुद्राङ्कनयन्त्रं, मुद्राङ्कनचक्रं.—(Printed publications in general) मुद्रितपुस्तकगणः, मुद्राङ्कितपुस्तकसमूहः.—(Crowd, throng) जनसम्मर्दः, जनसङ्कुलं, लोकसंघः, लोकसम्मर्दः.—(Urgency, urgent pressure) बाधा -धः -धनं, निर्बन्धः, पीडा, भारः.

PRESSED, *p. p.* (Squeezed) पीडितः -ता -तं, निपीडितः &c., सम्पीडितः &c., घट्टितः &c., संघट्टितः &c.—(Urged) प्रेरितः -ता -तं.—(Importuned) अतिनिर्बन्धेन प्रार्थितः -ता -तं.—(Distressed, straitened) बाधितः -ता -तं, पीडितः &c., क्लेशितः &c.

PRESSER, *s.* पीडकः, पीडयिता *m.* (तृ), बाधकः, प्रबाधकः.

Digitized by Google

PRESSING, *a.* अतिप्रार्थकः -का -कं, निर्बन्धेन प्रार्थकः &c., अतियाचकः &c., निर्बन्धशीलः -ला -लं, बाधकः &c.

PRESSINGLY, *adv.* निर्बन्धेन, सनिर्बन्धं, साग्रहेण, साग्रहं, सबाधं.

PRESSURE, *s.* पीडा, पीडनं, निपीडनं.—(Force) शक्तिः *f.*, बलं, वेगः, भारः, प्रभावः.—(Impulse) प्रेरणा, प्रवर्त्तनं, प्रणोदः, प्ररोचनं, प्रोत्साहः.—(Distress) बाधः -धा -धनं, क्लेशः, पीडा, आकुलता.

PRESTIGE, *s.* मायाशक्तिः *f.*, माया, मोहनशक्तिः *f.*, आकर्षणशक्तिः, इन्द्रियजालं, इन्द्रजालं, वञ्चनशक्तिः *f.*, प्रतारणशक्तिः *f.*

PRESTIGIOUS, *a.* मायाकरः -रा -रं, मायावी -विनी -वि (न्), मायामयः -यी -यं, मायी &c., ऐन्द्रजालिकः -की -कं, मोही &c.

PRESTO, *adv.* द्रुतं, ओघः, शीघ्रं, क्षिप्रं, त्वरितं, सत्वरं, अविलम्बितं.

To PRESUME, *v. a.* अविचार्य्य or अविचारपूर्व्वं or अनिर्णीयपूर्व्वं or अनिश्चित्य or अनिश्चयपूर्व्वम् अनुमा (c. 2. -माति -तुं, c. 3. -मिमीते) or तर्क् (c. 10. तर्कयति -यितुं) or अनुतर्क् or अवगम् or ऊह् or अनुमानं कृ.

To PRESUME, *v. n.* (Venture without leave, be bold or arrogant) धृष् (c. 5. धृष्णोति, धर्षितुं), प्रधृष्, धृष्टत्वात् or प्रगल्भत्वात् किञ्चिद् अननुज्ञातः कृ, धृष्टत्वात् or प्रगल्भशीलत्वाद् अननुज्ञापूर्व्वं or अनधिकारपूर्व्वं किञ्चित् कृ, धर्षेण आक्रम् (c. 1. -क्रामति -क्रमितुं) or अतिक्रम्, मर्य्यादातिक्रमं कृ, प्रगल्भवद् आचर् (c. 1. -चरति -रितुं), धृष्टवत् or धार्ष्ट्यपूर्व्वं किञ्चित् कृ, प्रगल्भ् (c. 1. -गल्भते -ल्भितुं), दृप् (c. 4. दृप्यति -ते).

PRESUMPTION, *s.* (Supposition without direct proof) अनुमानं, अनुमितिः *f.*, अनुमा, अनुमेयत्वं, अनिर्णीयपूर्व्वम् or अनिश्चयपूर्व्वम् or असिद्धान्तपूर्व्वम् अनुमानं, अनिर्णीयपूर्व्वा कल्पना, तर्कः, अनुमानग्रहणं.—(Strong probability) सम्भावना, सम्भावनीयता -त्वं, सम्भवः, सत्यसङ्काशता -त्वं.—(Arrogance) धृष्टता, धार्ष्ट्यं, धर्षः, प्रगल्भता, प्रागल्भ्यं, दर्पः, अभिमानं, अत्यभिमानं, निर्लज्जात्वं, अहङ्कारः, अवलेपः, स्मयः, प्रगल्भत्वाद् मर्य्यादातिक्रमः or अत्याचारः -रित्वं.

PRESUMPTIVE, *a.* आनुमानिकः-की -कं, अनुमानसिद्धः -द्धा -द्धं, सम्भावितः -ता -तं, सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, अनुमानावलम्बी -म्बिनी -म्बि (न्); 'presumptive proof or evidence,' अनुमानं, आनुमानिकप्रमाणं, अनुमाननिर्णयः, अधीपत्तिः *f.*; 'heir-presumptive,' सम्भावितस्थानाधिकारी *m.* (न्), सप्रतिबन्धस्थानाधिकारी *m.*, सलोपस्थानाधिकारी *m.*, उत्तराधिकारी *m.*

PRESUMPTUOUS, *a.* (Arrogant) धृष्टः -ष्टा -ष्टं, धृष्णुः -ष्णुः -ष्णु, प्रगल्भः -ल्भा -ल्भं, प्रधृष्टः &c., प्रधर्षितः -ता -तं, दृप्तः -प्ता -प्तं, अवलिप्तः -प्ता -प्तं, अभिमानी -निनी -नि (न्), अत्यभिमानी &c., साहसिकः -की -कं, धृष्णक् *m. f. n.* (ज्), निर्लज्जः -ज्जा -ज्जं.—(Founded on presumption) अभिमानमूलः -ला -लं.

PRESUMPTUOUSLY, *adv.* सधर्षं, सधार्ष्ट्यं, धृष्टं, प्रधर्षितं, धृष्टवत्, सप्रागल्भ्यं, प्रागल्भ्येन, प्रगल्भं, प्रगल्भवत्, साभिमानं, अभिमानपुरःसरं.

PRESUMPTUOUSNESS, *s.* धार्ष्ट्यं, धृष्णुत्वं, धृष्टता, प्रगल्भता, प्रागल्भ्यं, प्रधृष्टता, दृप्तता, अवलिप्तता, अभिमानं, अत्यभिमानं, अभिमानिता, साहसिकत्वं.

To PRESUPPOSE, *v. a.* पूर्व्वं or अग्रे कॢप् or भू in caus., or सूच् (c. 10. सूचयति -यितुं), पूर्व्वसूचनं कृ, पूर्व्वकल्पनां कृ, पूर्व्वग्रहणं कृ, पूर्व्वभावनां कृ.

PRESUPPOSED, *p. p.* पूर्व्वकल्पितः -ता -तं, पूर्व्वभावितः &c., पूर्व्वगृहीतः &c.

PRESUPPOSITION, *s.* पूर्व्वकल्पना, पूर्व्वभावना, पूर्व्वग्रहणं, पूर्व्वमतं.

PRETENCE, *s.* (Pretext, feint) छद्म *n.* (न्), अपदेशः, व्यपदेशः, छलं, व्याजः, उपधा, कूटः -टं, कपटः, कैतवं, ध्वजीकरणं, मिषं.—(False plea) मिथ्याहेतुः *m.*, मिथ्यानिमित्तं, हेतुः *m.*, निमित्तं; 'under pretence of studying the Shastras,' शास्त्राध्ययनहेतुना.—

(Claim) अधिकारः, अभिमानं, अभियोगः; 'false claim' मिथ्याभिमानं, मिथ्याभियोगः.

To PRETEND, *v. a.* or *n.* (Sham, feign) छद्म कृ, कूटं कृ, व्याजं कृ, छलं कृ, कपटं कृ, ध्वजीकृ, छल् (c. 10. छलयति -यितुं), वेशं धृ (c. 10. धारयति -यितुं) or भृ, छद्मवेशं धृ. Often expressed by the root दृश् in caus., or by मिथ्या in comp.; as, 'he pretends to be asleep,' आत्मानं प्रसुप्तम् इव or प्रसुप्तवद् दर्शयति, मिथ्याप्रसुप्तो or मिथ्याप्रसुप्तो भवति; 'he pretends to be dead,' आत्मानं मृतवत् सन्दर्शयति; 'to pretend to be just,' साधुवेशं धृ, आर्य्यवेशं धृ, धर्म्मध्वजी -जिनी -जि भू, आर्य्यरूपः -पा -पं भू.—(Allege a false plea) मिथ्याहेतुं वद्, मिथ्यानिमित्तं वद्, मिथ्या वद्.—(Lay claim, pretend to) अभिमन् (c. 4. -मन्यते -मन्तुं), मिथ्या अभिमन्, मिथ्याभिमानं कृ, मिथ्या ग्रह्, अनधिकारपूर्व्वं ग्रह्, अभिप्रेतः -ता -तं भू; 'to pretend to learning,' विद्याभिमानं कृ, विद्याभिप्रेतः -ता -तं भू, विद्याभिमानी -निनी -नि भू. *See* PRETENDER, *s.*

PRETENDED, *p. p.* छाद्मिकः -की -कं, कौटिकः -की -कं, कौटः -टी -टं, सव्याजः -जा -जं, सछलः -ला -लं, ध्वजीकृतः -ता -तं, ध्वजी &c. in comp., छद्म or कपट or कूट or मिथ्या in comp.; as, 'a pretended ascetic,' तापसध्वजी *m.* (न्), छद्मतापसः, कूटतापसः; 'pretended services,' मिथ्योपचारः; 'pretended reason,' मिथ्याहेतुः *m.*, मिथ्यानिमित्तं.

PRETENDEDLY, *adv.* मिथ्या, सकपटं, सव्याजं, सकूटं, छलेन, छद्म or कपट in comp.; as, 'pretendedly asleep,' मिथ्याप्रसुप्तः -प्ता -प्तं; 'pretendedly religious,' कपटधर्म्मी &c.

PRETENDER, *s.* छाद्मिकः, सव्याजः, वेशधारी *m.* (न्), अभिमानी *m.* (न्), अभियोक्ता *m.* (क्तृ), अभियोगी *m.* (न्), ध्वजी *m.*, मन्य or मिथ्या in comp.; as, 'a pretender to learning,' विद्याभिमानी *m.*, विद्याभिप्रेतः, मिथ्यापण्डितः, पण्डितम्मन्यः, विद्याध्वजी *m.* (न्); 'pretender to virtue or religion,' कपटधर्म्मी *m.*, धर्म्मध्वजी *m.*, सव्याजधर्म्मी *m.*, धर्म्माभिमानी *m.*, साधुम्मन्यः आर्य्यवेशधारी *m.*, धार्म्मिकवेशधारी *m.*; 'to the sovereignty,' राज्याभियोगी *m.* (न्), राज्यस्वत्ववादी *m.*, राज्यलिप्सुः *m.*

PRETENSION, *s.* अभिमानं, अधिकारः, स्वत्ववादः, स्वाधिकारवादः, स्वामित्ववादः, स्वार्थवादः, अभियोगः; 'pretension to learning,' विद्याभिमानं; 'false pretension,' मिथ्याभिमानं, मिथ्याभियोगः.—(Desire of obtaining honor, power, fame, &c.) यशोलिप्सा, यशोलोभः, प्रभावाकांक्षा, प्रभवलिप्सा, प्रभुत्वलिप्सा, महत्त्वलिप्सा, महत्त्वाकांक्षा, प्रतिष्ठालिप्सा, जिगीषा; 'pretension to the sovereignty,' राज्यलिप्सा, राज्यस्वत्ववादः, राज्याभियोगः.

PRETER-IMPERFECT, *a.* (In grammar) अपूर्णभूतः -ता -तं.

PRETERIT, *a.* (In grammar) भूतः -ता -तं, परोक्षः -क्षा -क्षं; 'tense,' भूतं, परोक्षं, परोक्षभूतं.

PRETERITION, *s.* अतिक्रमः -मणं, अत्ययः, व्यतिक्रमः, अतिचारः, अतिचरणं.

PRETERMISSION, *s.* त्यागः, परित्यागः, अपासनं, उपात्ययः, लंघनं.

To PRETERMIT, *v. a.* (Omit) परित्यज्, त्यज्, अपास्, अतिक्रम्, व्युत्क्रम्.

PRETERMITTED, *p. p.* परित्यक्तः -क्ता -क्तं, अपासितः -ता -तं, अन्तरितः &c.

PRETERNATURAL, *a.* प्रकृतिक्रमवाह्यः -ह्या -ह्यं, प्रकृतिक्रमवहिर्भूतः -ता -तं, निसर्गक्रमवाह्यः &c., प्रकृतिनियमवाह्यः &c., निसर्गनियमवाह्यः &c., प्रकृतिक्रमातीतः -ता -तं, प्रकृतिमार्गातीतः &c., प्रकृतिमार्गवाह्यः &c., अतिप्रकृतिः -तिः -ति, अप्रकृतः -ता -तं, विलक्षणः -णा -णं, अद्भुतः -ता -तं, आश्चर्य्यः -र्य्या -र्य्यं.

Digitized by Google

PRETERNATURALLY, *adv.* प्रकृतिमार्गेवहिस्, प्रकृतिक्रमवहिस्, अद्भुतं, वैलक्षण्येण.

PRETERPERFECT, *a.* (In grammar) पूर्णभूतः -ता -तं, परोक्षभूतः &c.

PRETERPLUPERFECT, *a.* (In grammar) प्राक्पूर्णभूतः -ता -तं.

PRETEXT, *s.* छद्म *n.* (न्), अपदेशः, व्यपदेशः, उपधा, व्याजः, छलं, उपदेशः, निमित्तं, ध्वजीकरणं, मिथ्याहेतुः *m.*, मिथ्यानिमित्तं, संवरणं.

PRETTILY, *adv.* चारु, सुन्दरं, सौन्दर्य्येण, मञ्जु, चारु or मञ्जु in comp.; 'singing prettily,' मञ्जुस्वनः -ना -नं; 'smiling prettily,' चारुहासी -सिनी -सि (न्).

PRETTINESS, *s.* चारुता -त्वं, सौन्दर्य्यं, सुरूपता, चारुरूपता, सुदृश्यता, दर्शनीयता, वामता -त्वं, विनीतता -त्वं, मञ्जुता -त्वं, रूपलावण्यं.

PRETTY, *a.* चारुः -रुी -रु, चारुदर्शनः -ना -नं, सुन्दरः -रा -री -रं, चारुमान् -मती -मत् (त्), सुदृश्यः -श्या -श्यं, सुरूपः -पी -पं, रूपवान् -वती -वत् (त्), चारुरूपः &c., सुरूपी -पिणी -पि (न्), सुरेखः -खा -खं, दर्शनीयः -या -यं, विनीतः -ता -तं, आकारशुद्धः -द्धा -द्धं, वामः -मा -मं, मञ्जुः -ञ्जुः -ञ्जु, मञ्जुलः -ला -लं; 'having a pretty face,' चारुवदनः -ना -नी -नं, सुमुखः -खा -खी -खं; 'having pretty eyes,' चारुलोचनः -ना -नी -नं, सुनयनः -ना -नी -नं; 'having pretty teeth,' सुदन्तः -न्ता -न्तं, चारुदन्तः &c.

PRETTY, *adv.* (Moderately, in some degree) ईषत्, कियत्, अल्पं, अल्पमात्रं, स्तोकं, अभृशं, परिमितं, आ prefixed, कल्प or देश्य or देशीय affixed; 'pretty warm,' ईषदुष्णः -ष्णा -ष्णं, मन्दोष्णः &c., 'pretty ripe,' आपक्वः -क्वा -क्वं; 'pretty clever,' पटुकल्पः -ल्पा -ल्पं, पटुदेश्यः -श्या -श्यं, पटुदेशीयः -या -यं.—(Pretty nearly) प्रायस्, प्रायशस्, भूयिष्ठं, ईषदूनं, अल्पोनं; 'pretty nearly finished,' समाप्तभूयिष्ठः -ष्ठा -ष्ठं; 'pretty nearly dead,' मृतप्रायः -या -यं.

To PREVAIL, *v. n.* (Overcome) प्रभू, अभिभू, पराभू, जि, पराजि, विजि, निर्जि, अतिक्रम्, अधिक्रम्, अतिशी.—(Be predominant, efficacious) अतिरिच् in pass. (-रिच्यते), व्यतिरिच्, उद्रिच्, प्रभू, प्रबलीभू, प्रबलः -ला -लं भू, प्रोष् (c. 1. प्रोषति -षितुं), सबलः -ला -लं भू, क्षमः -मा -मं भू, अलन्तमः -मा -मं भू.—(Be in force) प्रभू, प्रबलीभू, प्रचलः -ला -लं भू, प्रचरितः -ता -तं भू, प्रचलीभू, सिद्धः -द्धा -द्धं भू, प्रसिद्धः -द्धा -द्धं भू, सिद्धीभू, प्रसिद्धीभू, निष्पन्नः -न्ना -न्नं भू.—(Succeed) सिध् (c. 4. सिध्यति -ते), सिद्धीभू.—(Persuade, induce) अनुनी, आकृष्, प्रोत्सह्, उत्सह्, प्रवृत् in caus., नियुज् in caus., प्रयुज् or expressed by the causal form. *See To* PERSUADE, &c.

PREVAILING, *part.* or *a.* (Predominant) प्रबलः -ला -लं, प्रभूतः -ता -तं, प्रसिद्धः -द्धा -द्धं, अतिरिक्तः -क्ता -क्तं, अतिरेकी -किणी &c., अधिकः -का -कं, प्रधानः -ना -नं भू, प्रचलः -ला -लं.—(Efficacious) प्रभावी &c., सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, साधकः -का -धिका -कं, सफलः -ला -लं.—(General) साधारणः -णा -णी -णं, प्रसिद्धः -द्धा -द्धं, सर्व्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं. *See* PREVALENT.

PREVALENCE, PREVALENCY, *s.* प्रचारः, प्रचलत्वं, प्रसिद्धिः *f.*, प्रसिद्धता, प्रभावः, प्राबल्यं, प्रचरणं, प्रचलनं, प्रचलितत्वं, सर्व्वत्र व्याप्तिः *f.* or अभिव्याप्तिः *f.* or विस्तारः, व्यापकता -त्वं, प्रभूतता -त्वं, प्रबलता, प्रभविष्णुता, प्रवृत्तिः *f.*, प्रधानता, प्राधान्यं, प्राभवं, अतिरेकः, अतिरिक्तता, आधिक्यं, साधारणता, साधारण्यं, सर्व्वसाधारणव्यवहारः.

PREVALENT, *a.* प्रचलः -ला -लं, प्रचलितः -ता -तं, प्रचरितः -ता -तं, प्रसिद्धः -द्धा -द्धं, प्रभूतः -ता -तं, प्रबलः -ला -लं, प्रभविष्णुः -ष्णुः -ष्णु, प्रवृत्तः -त्ता -त्तं, व्यापकः -का -कं, साधारणः -णा -णी -णं; 'universally prevalent,' सर्व्वत्र प्रचलः &c. or प्रसिद्धः &c.

PREVALENTLY, *adv.* प्रसिद्धं, प्रचलं, प्राबल्येन, अतिरिक्तं, सप्रभावं.

To PREVARICATE, *v. n.* अर्थवैकल्यं कृ, वक्रोक्त्या सत्यवैकल्यं कृ or यथार्थवैकल्यं कृ, वक्रोक्तिं कृ, वक्रं वद् (c. 1. वदति -दितुं), वाक्छलं कृ, निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपदिश् (c. 6. -दिशति -देष्टुं), व्यपदिश्, अपदेशं कृ, व्यपदेशं कृ, निह्नवेन वद्, अपदेशेन वद्, निह्नवोत्तरं कृ, हीनवादं कृ, अन्यवादं कृ, अपलापं कृ.

PREVARICATING, *a.* हीनवादी -दिनी -दि (न्), अन्यवादी &c., निह्नववादी &c., वक्रवादी &c., वक्रोक्तिवादी &c., व्यपदेशवादी &c.

PREVARICATION, *s.* वक्रोक्तिः *f.*, हीनवादः, वाक्छलं, अर्थवैकल्यं, यथार्थवैकल्यं, सत्यवैकल्यं, अन्यवादः, अन्यवचनं, हीनवचनं, निह्नुतिः *f.*, निह्नवोत्तरं, अपलापः, अपदेशः, व्यपदेशः, व्यपदेशवादः, छद्मवादः, उत्तराभासः.

PREVARICATOR, *s.* हीनवादी &c., निह्नववादी &c., अन्यवादी. *See* PREVARICATING.

PREVENIENT, *a.* अग्रगः -गा -गं, अग्रवर्त्ती -र्त्तिनी -र्त्ति (न्), अग्रगामी &c., पूर्व्वसरः -रा -रं, अग्रसरः &c. *See* PRECEDENT, *a.*

To PREVENT, *v. a.* (Hinder) निवृ (c. 10. -वारयति -यितुं), विनिवृ, प्रतिवृ, आवृ, वृ, रुध्, प्रतिरुध्, निरुध्, संरुध्, अवरुध्, उपरुध्, प्रतिषिध्, निषिध्, बाध्, प्रतिबन्ध्, विहन्, व्याहन्, प्रतिहन्, स्तम्भ्, विष्टम्भ्, निवृत् (c. 10. -वर्त्तयति -यितुं), प्रत्याख्या (c. 2. -ख्याति -तुं), विघ्न, रोधं कृ, अवरोधं कृ, प्रतिबन्धं कृ, प्रतिकृ.—(Go before) अग्रे गम् or सृ, अग्रे या or वृत्. *See To* PRECEDE.

PREVENTABLE, *a.* निवारणीयः -या -यं, निवार्य्यः -र्य्या -र्य्यं, वारणीयः &c.

PREVENTED, *p. p.* निवारितः -ता -तं, वारितः &c., रुद्धः -द्धा -द्धं, निरुद्धः &c., विरुद्धः &c., अवरुद्धः &c., उपरुद्धः &c., प्रतिषिद्धः -द्धा -द्धं, निषिद्धः &c., बाधितः -ता -तं, प्रतिबद्धः -द्धा -द्धं, विहतः -ता -तं, व्याहतः &c., प्रतिहतः &c., विघ्नितः &c., स्तम्भितः &c., निवर्त्तितः &c., आप्रतिनिवृत्तः -त्ता -त्तं; 'prevented from seeing by the smoke,' धूमोपरुद्धदृष्टिः -ष्टिः -ष्टि.

PREVENTION, *s.* निवारणं, वारणं, निवारः, रोधः -धनं, अवरोधनं, निरोधः, प्रतिरोधः, उपरोधः, संरोधः, प्रतिबन्धः -न्धनं, प्रतिषेधः -धनं, निषेधः, विघातः, व्याघातः, प्रतीकारः. *See* HINDERANCE.—(Going before) अग्रगमनं, पुरोगमनं.

PREVENTIVE, *a.* वारकः -का -कं, निवारकः &c., बाधकः &c., प्रतिषेधकः &c., प्रतिबाधकः &c., रोधकः &c., प्रतिरोधकः &c., व्याघातकः &c.

PREVENTIVE, *s.* वारणं, निवारणं, बाधकः, प्रतिबन्धकं, निवारकं.

PREVIOUS, *a.* पूर्व्वः -र्व्वा -र्व्वी -र्व्वं, पौर्व्विकः -की -कं, पूर्व्वकः &c., पूर्व्वगतः -ता -तं, पूर्व्वभूतः -ता -तं, पूर्व्ववृत्तः -त्ता -त्तं, पूर्व्वसिद्धः -द्धा -द्धं, पूर्व्वजातः &c., भूतपूर्व्वः -र्व्वा -र्व्वं, पूर्व्वतनः -नी -नं, वृत्तपूर्व्वः &c., जातपूर्व्वः &c., प्रागागतः -ता -तं, प्राग्भूतः &c., प्राग्भवः -वा -वं, अग्रः -ग्रा -ग्रं, अग्रभूतः -ता -तं, प्रथमः -मा -मं, प्राक् in comp.; 'previous possession,' पूर्व्वभुक्तिः *f.*; 'previous existence,' प्राग्भावः.

PREVIOUSLY, *adv.* पूर्व्वं, पूर्व्वकं, पूर्व्वतस्, अग्रे, अग्रतस्, पुरस्, पुरस्तात्, प्राक्, प्रथमतस्; 'done previously,' पूर्व्वकृतः -ता -तं.

PREVIOUSNESS, *s.* पूर्व्वत्वं -ता, अग्रत्वं -ता, प्रथमता -त्वं, प्राथम्यं, आदित्वं.

PREVISION, *s.* पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, प्रदर्शनं, अग्रनिरूपणं.

PREY, *s.* (That which is seized to be devoured) आमिषं, मांसं, भक्ष्यं, भक्षणीयं, खाद्यं, भोज्यं.—(Booty) लोभ्रं, लोत्रं, लोतं, लुभं, लुण्टा. *See* PLUNDER.—(Beast of prey) हिंस्रपशुः *m.*, पशुभक्षकः, पशूपजीवी *m.* (न्), आमिषाशी *m.*, आमिषभुक् *m.* (ज्), आमिषप्रियः, मांसाशी *m.*, मांसखादकपशुः *m.*, दंशेरः, प्रसहः -हनः.—(Bird of prey) प्रतुदः, विष्किरः, नखविष्किरः, बलिभुक् *m.* (ज्), बलिप्रियः.

Digitized by Google

To PREY, *v. a.* (Seize and devour) आमिषं धृत्वा or हत्वा भक्ष् or खाद् or ग्रस्.—(Corrode) क्लमशः क्षि in caus. or नश् in caus. —(Prey upon) लुण्ट् or लुण्ठ्. *See To* PLUNDER.

PRIAPISM, *s.* ध्वजोच्छ्रायः, ध्वजोच्छ्रयः, शिश्नोच्छ्रयः, लिङ्गोच्छ्रायः.

PRICE, *s.* (Value set or paid) मूल्यं, अर्घः, अवक्रयः, वस्नः, भाटकः, पण्यं, पणता; 'high price,' बहुमूल्यं, महामूल्यं, दुर्मूल्यं, महार्घः, माहार्घ्यं; 'low price,' अल्पमूल्यं, सुमूल्यं; 'what is the price?' कियता मूल्येन विक्रीयते; 'I will not give such a price,' एतावन् मूल्यं न दित्सामि.—(Reward, recompense) फलं, वेतनं.

PRICED, *a.* (High-priced) महामूल्यः -ल्या -ल्यं, दुर्मूल्यः &c., बहुमूल्यः &c., महार्घः -र्घा -र्घं, महार्घ्यः -र्घ्या -र्घ्यं.—(Low-priced) अल्पमूल्यः &c., अल्पार्घः -र्घा -र्घं, सुमूल्यः &c.

PRICELESS, *a.* अनर्घ्यः -र्घ्या -र्घ्यं, अनर्घः -र्घा -र्घं, अमूल्यः -ल्या -ल्यं.

To PRICK, *v. a.* (Puncture) व्यध् (c. 4. विध्यति, व्यद्धुं), तुद् (c. 6. तुदति, तोत्तुं), वितुद्, छिद्र् (c. 10. छिद्रयति -यितुं), भिद् (c. 7. भिनत्ति, भेत्तुं), निर्भिद्; 'with a thorn or sharp-pointed substance,' कण्टकेन or शल्येन व्यध् or वितुद्; 'with a needle,' सूच्या व्यध् or भिद्.—(Pain by puncture, sting) व्यध् (c. 10. व्यधयति -यितुं), पीड्, तप्, सन्तप्, मर्म्म व्यध्.—(Goad) प्रतोदेन तुद् or वितुद्.—(Incite) प्रेर्, प्रचुद्, प्रणुद्, उत्तिज्, प्रोत्सह्.—(Erect the ears) कर्णौ स्तब्धीकृ or उन्नम् or उच्छ्रि or उन्नी or उच्चीकृ; 'an animal that pricks its ears,' स्तब्धकर्णः -र्णी -र्णं, स्तब्धश्रोत्रः -त्रा -त्रं.—(Designate by a puncture) सूच्या अङ्क or चिह्न्.

PRICK, *s.* (Puncture) वेधः -धनं, तोदः, सूचिः -ची *f.*, सूचनं -ना, व्यधः -धनं, उत्तुण्डितं.—(Instrument for pricking) तोदनं, प्रतोदः, तोत्रं, सूचिः -ची -चिनी -चिका, शल्यं, कण्टकः.—(Sharp pain) तोदः, शूलः -लं, व्यथा, यातना, तीक्ष्णव्यथा.

PRICKED, *p. p.* विद्धः -द्धा -द्धं, वेधितः -ता -तं, तोदितः -ता -तं, तुन्नः -न्ना -न्नं, छिद्रितः -ता -तं, भिन्नः -न्ना -न्नं, सशल्यः -ल्या -ल्यं, शल्यविद्धः &c., कण्टकविद्धः &c., सूचिभिन्नः &c.; 'at heart,' विद्धमर्म्मा -र्म्मा -र्म्म (न्), भिन्नमर्म्मा &c., विद्धहृदयः -या -यं.—(Pained) व्यथितः -ता -तं, अनुभूततीक्ष्णव्यथः -था -थं.

PRICKER, *s.* (Instrument for pricking) तोदनं, तोत्रं, प्रतोदः, सूचिः -ची *f.*, सूचिका, शल्यं.—(One who pricks) वेधकः.

PRICKING, *s.* (Act of piercing with a sharp point) वेधः -धनं, व्यधः -धनं, शल्यवेधनं, कण्टकवेधनं, तोदः -दनं, प्रतोदः -दनं, सूचिः -ची *f.*, सूचनं -ना.—(Sensation of sharp pain) तोदः, शूलः -लं, तीक्ष्णव्यथा.

PRICKLE, *s.* कण्टकः -कं, शूकः -कं, सूचिः -ची *f.*, त्वक्कण्टकः.

PRICKLINESS, *s.* कण्टकितत्वं, सकण्टकत्वं, सशूकत्वं, बहुकण्टकत्वं.

PRICKLY, *a.* कण्टकितः -ता -तं, कण्टकी -किनी -कि (न्), सकण्टकः -का -कं, बहुकण्टकः -का -कं, प्रचुरकण्टकः &c., शूकी &c., शूकवान् -वती -वत् (न्), सशूकः -का -कं, बहुशूकः &c.

PRICKLY-PEAR, *s.* विदरं, विश्वसारकं.

PRIDE, *s.* गर्व्वः, दर्पः, अहङ्कारः, अहङ्कृतिः *f.*, अभिमानं -नता, अभिमानिता, मानं, मानिता, उद्धतिः *f.*, औद्धत्यं, चित्तसमुन्नतिः *f.*, चित्तोन्नतिः *f.*, मदः, मादः, दृप्तता, अवलेपः, अवहेला -लनं, अहम्मानं, अहम्मतिः *f.*, ममता, दम्भः, मन्युः *m.*, आत्माभिमानं, उन्मादः, आटोपः, साटोपत्वं, प्रतिभानं, प्रौढता, धर्षः, प्रगल्भता, उन्माथः, शौटीर्य्यं, शौण्डीरता, आवेशः, उत्सेकः, उत्सिक्तता; 'pride of caste,' जात्यभिमानं; 'of riches,' धनदर्पः; 'of strength,' बलदर्पः, बलावलेपः.—(Generous or proper pride) अभिमानं, गुणाभिमानं, स्वगुणाभिमानं.

To PRIDE, *v. a.* (One's self) आत्मानं श्लाघ् (c. 1. श्लाघते -घितुं), कत्थ् (c. 1. कत्थते -त्थितुं), विकत्थ्, both with instr. c. of the thing on which one prides one's self; आत्मानं मन् (c. 4. मन्यते, मन्तुं), अभिमन् with two acc., अभिमानं कृ; 'he prides himself on his learning,' आत्मानं विद्यया श्लाघते, आत्मानं पण्डितं मन्यते, विद्याभिमानं करोति; 'one who prides himself on his learning,' पण्डितम्मन्यः; 'she prides herself on her beauty,' आत्मानं सौन्दर्य्येण श्लाघते, आत्मानं सुन्दरीं मन्यते; 'one who does so,' सुन्दरीम्मन्या, रूपगर्विता.

PRIER, *s.* परकार्य्यनिरूपकः, परचेष्टानिरूपकः, परकार्य्यचर्चकः.

PRIEST, *s.* (Member of the Brahminical caste) ब्राह्मणः, विप्रः, द्विजः, द्विजातिः *m.*, द्विजन्मा *m.* (न्), देवलः, भूदेवः; 'who is learned in the Vedas,' श्रोत्रियः, वेदविद् *m.*, वेदविद्वान् *m.* (स्), मन्त्रविद् *m.*, मन्त्रज्ञः.—(Sacrificing or officiating priest) याजकः, याज्ञिकः, याजी *m.* (न्), यज्ञकृत् *m.*, होता *m.* (तृ), हविर्याजी *m.*, प्रवर्ग्यः.—(Family or domestic priest) पुरोहितः, पुरोधाः *m.* (स्), ऋत्विक् *m.* (ज्), कुलविप्रः, कुलाचार्य्यः.—(Spiritual preceptor, officiator in sacred offices) आचार्य्यः, उपाध्यायः, गुरुः *m.*, पुरोहितः, धर्म्माध्यापकः, धर्म्मशिक्षकः, धर्म्मोपदेशकः. *See* CLERGYMAN.

PRIESTCRAFT, *s.* पुरोहितछलं, उपाध्यायछलं, उपाध्यायकैतवं, उपाध्यायकपटः -टं, आचार्य्यकापट्यं, धर्म्माध्यापककैतवं.

PRIESTESS, *s.* याजिनी, याजिका, होत्री, उपाध्याया, धर्म्मोपदेशिनी.

PRIESTHOOD, *s.* (Office or character of a priest) पौरोहित्यं, पुरोहितत्वं, आत्विज्यं, उपाध्यायपदं, धर्म्माध्यापकपदं, ब्राह्मण्यं, ब्राह्मणता -त्वं.—(The order of priests) पुरोहितवर्गः, पुरोहितगणः, उपाध्यायवर्गः, याज्ञिकवर्गः, धर्म्माध्यापकवर्गः, धर्म्माध्यापकगणः, याजकसमूहः, उपाध्यायसमूहः, पौरोहित्यं.

PRIESTLY, *a.* पौरोहितः -ती -तं, पौरोहितिकः -की -कं, पुरोहितयोग्यः -ग्या -ग्यं, पुरोहितसम्बन्धी &c., याजकीयः -या -यं, याज्ञिकसम्बन्धी &c., उपाध्यायसम्बन्धी &c., पौरोहित्यसम्बन्धी &c., धर्म्माध्यापकसम्बन्धी &c.

PRIEST-RIDDEN, *a.* पुरोहिताधीनः -ना -नं, उपाध्यायाधीनः &c., पुरोहितवशः &c.

PRIG, *s.* दाम्भिकः, दम्भी *m.* (न्), रूपगर्वितः, दर्शनीयमानी *m.* (न्).

PRIGGISH, *a.* दाम्भिकः -की -कं, आत्माभिमानी -निनी -नि (न्).

PRIM, *s.* अतिविनीतः -ता -तं, एकान्तविनीतः &c., अतिसूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मनियमनिष्ठः -ष्ठा -ष्ठं, सूक्ष्मादरशीलः -ला -लं, अत्यादरशीलः &c., अत्याचारी &c.

PRIMACY, *s.* प्रधानधर्म्माध्यक्षपदं, मुख्यधर्म्माध्यक्षपदवी.

PRIMARILY, *adv.* प्रथमतस्, प्राथम्येन, पूर्व्वं, पूर्व्वतस्, मुख्यशस्, मुख्यतस्, आदितस्, प्रधानतस्, प्राधान्येन.

PRIMARINESS, *s.* प्रथमता, प्राथम्यं, मुख्यता, प्रधानता, प्राधान्यं.

PRIMARY, *a.* (First) प्रथमः -मा -मं, प्राथमिकः -की -कं, आद्यः -द्या -द्यं, आदिमः -मा -मं, आदि in comp., पूर्व्वः -र्व्वी -र्व्वं, पौर्व्विकः -की -कं.—(Original) मौलः -ली -लं, मौलिकः -की -कं, मूलिकः -का -कं, आद्यः -द्या -द्यं; 'primary cause,' निदानं, आदिकारणं, आदिबीजं, आद्यबीजं. *See* PRIMITIVE.—(First in dignity, chief) प्रधानः -ना -नं, मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्रयः -ग्रा -ग्र्यं, अग्रियः -या -यं, अग्र्यः -ग्र्या -ग्र्यं.—(Elementary) आरम्भकः -का -कं, प्रारम्भकः.

PRIMATE, *s.* प्रधानधर्म्माध्यक्षः, मुख्यधर्म्माध्यक्षः, प्रधानोपाध्यायः, मुख्योपाध्यायः, प्रधानधर्म्माधिपतिः *m.*, मुख्यधर्म्माधिपतिः *m.*

Digitized by Google

PRIME, *a.* (First) प्रथमः -मा -मं, प्राथमिकः &c. *See* PRIMARY.—(First in rank, chief) मुख्यः -ख्या -ख्यं, प्रधानः -ना -नं, प्रमुखः -खा -खं, अग्रयः -ग्रा -ग्रं, उत्तमः -मा -मं; 'prime minister,' मुख्यमन्त्री *m.* (न्), प्रधानमन्त्री *m.*, महामन्त्री *m.*, प्रधानामात्यः, मुख्यामात्यः; 'office of prime minister,' मुख्यमन्त्रिता.—(First in excellence) उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, शिष्टः -ष्टा -ष्टं, उत्तमः -मा -मं, वरः -रा -रं, सत्त्वोत्कृष्टः &c., सत्त्वश्रेष्ठः &c.—(Full, blooming) प्रौढः -ढा -ढं.

PRIME, *s.* (Dawn) उदयः, दिनारम्भः, दिवसमुखं, दिनादिः *m.*—(Beginning) आरम्भः, आदिः *m.*—(Best state, heyday, height) प्रौढिः *f.*, प्रौढता, अक्षतता -त्वं, उत्तमता -त्वं, उत्तमावस्था, उत्तमदशा, सिद्धिः *f.*; 'the prime of youth,' यौवनप्रौढिः *f.*, प्रौढयौवनं, अक्षतयौवनं, नवयौवनं, यौवनश्रीः *f.*, 'in the prime of youth,' प्रौढयौवनः-ना-नं, अक्षतयौवनः &c.—(Best part) उत्तमभागः, उत्तमांशः.

To PRIME, *v. a.* आग्नेययन्त्रोपरि ज्वलनचूर्णं धा (c. 3. दधाति, धातुं).

PRIMELY, *adv.* प्रथमतस्, प्रधानतस्.—(Excellently) उत्तमं, श्रेष्ठं, सुष्ठु.

PRIMENESS, *s.* श्रेष्ठता, उत्कृष्टता, उत्तमता, उत्कर्षः, सारत्वं.

PRIMER, *s.* बालकशिक्षार्थं प्रथमपुस्तकं or आरम्भपुस्तकं, व्याकरणारम्भः.

PRIMEVAL, PRIMEVOUS, *a.* प्राक्तनः -नी -नं, सनातनः -नी -नं, आद्यः -द्या -द्यं, आद्यकालीनः -ना -नं, मौलः -ली -लं, मौलिकः -की -कं, प्राक्तनकालीनः -ना -नं, प्राक्कालीनः &c.

PRIMITIVE, *a.* (Pertaining to the beginning, original) प्रथमकालिकः -की -कं, आद्यकालिकः &c., प्राथमिकः -की -कं, प्रथमः -मा -मं. *See* the last.—(Not derived, primary) मूलिकः -का -कं, मौलिकः -की -कं, मौलः -ली -लं, अव्युत्पन्नः -न्ना -न्नं.—(Following ancient forms) प्राक्कालीनरीतिनिष्ठः -ष्ठा -ष्ठं, वृद्धाचारसेवी &c., प्राक्तनव्यवहारसेवी -विनी -वि (न्), प्राक्तनरीतिसेवी &c., प्राक्तनमार्गानुयायी &c., प्राक्तनमार्गानुसारी &c., आद्यकालानुसारी &c.

PRIMITIVELY, *adv.* (Originally) आदौ, आदितस्, मूलतस्, प्रथमतस्, आरम्भतस्, आरम्भे.—(According to primitive custom) प्राक्तनव्यवहारानुसारेण, प्राक्तनरीत्यनुसारेण, आद्यकालानुसारतस्, आद्यकालानुरूपेण, वृद्धाचारतस्.

PRIMITIVENESS, *s.* (State of being original) मौलत्वं -ता, मौलिकत्वं, प्राथमिकत्वं, प्राथम्यं, प्रथमता, आद्यत्वं, आदित्वं.—(Conformity) प्राक्तनव्यवहारसेवनं, प्राक्कालीनरीत्यनुसारः, प्राक्तनमार्गानुयायिता, वृद्धाचारसेवनं.

PRIMNESS, *s.* अतिविनीतता -त्वं, सूक्ष्मनियमनिष्ठा, सूक्ष्मादरशीलता, अतिसूक्ष्मता, अतिसौक्ष्म्यं, अत्यादरसेवनं, अत्याचारसेवनं.

PRIMOGENIAL, *a.* प्रथमजातः -ता -तं, प्रथमजः -जा -जं, आदिजातः &c.

PRIMOGENITURE, *s.* ज्येष्ठता -त्वं, ज्यैष्ठ्यं, पूर्वजत्वं, पूर्वजातत्वं, अग्रजत्वं, अग्रजातत्वं, वयोज्येष्ठता, ज्येष्ठवयस्कता, आदिजत्वं, आदिजातत्वं.

PRIMORDIAL, *a.* प्राक्कालीनः -ना -नं, प्राक्कालिकः -की -कं, प्राक्तनकालिकः &c., प्राक्तनः -नी -नं, आद्यः -द्या -द्यं, आदिकालिकः &c., मौलिकः -की -कं, मौलः -ली -लं.

PRIMROSE, *s.* वसन्तकुसुमः or वसन्तपुष्प ओषधिभेदः.

PRINCE, *s.* (Sovereign) राजा *m.* (न्), नृपतिः *m.*, भूपतिः *m.*, पार्थिवः, महीपतिः *m.*, क्षत्रपः, क्षत्रपतिः *m.*, पः in comp. *See* KING.—(Sovereign of a certain territory or province) देशपतिः *m.*, राष्ट्रपतिः *m.*, मण्डलपतिः.—(Son of a king) राजपुत्रः, राजसुतः, राजतनयः, राजकुमारः, नृपात्मजः, नृपसुतः, नृपपुत्रः, नृपनन्दनः, युवराजः, कुमारः.—(In theatrical language) भर्तृदारकः.

PRINCEDOM, *s.* (Kingdom) राज्यं, राजत्वं. *See* the word.—(Rank or condition of a king's son) यौवराज्यं, युवराजत्वं.

PRINCELINESS, *s.* राजतेजस् *n.*, राजश्रीः *f.*, राजैश्वर्यं. *See* MAJESTY.

PRINCELY, PRINCELIKE, *a.* (Resembling a prince, royal) राजसदृशः -शी -शं, नृपसदृशः &c., राजसन्निभः -भा -भं, नृपोपमः -मा -मं, राजजातीयः -या -यं, नृपजातीयः &c., राजकीयः -या -यं, प्रतापवान् -वती -वत् (त्), प्रतापशाली -लिनी -लि (न्), वैभवशाली &c., ऐश्वर्यवान् &c. *See* MAJESTIC.—(Having the rank of a prince) राजजातीयः -या -यं, नृपजातीयः &c., राजकुलजः -जा -जं, राजकुलप्रसूतः -ता -तं, राजवंश्यः -श्या -श्यं.—(Becoming a prince) राजयोग्यः -ग्या -ग्यं, राजार्हः -र्हा -र्हं, नृपोचितः -ता -तं, राजोचितः &c., राजोपयुक्तः -क्ता -क्तं, राजकीयः &c.

PRINCE'S-METAL, *s.* (Compound of copper and zinc) कांस्यं -स्यकं, कंसः -सं.

PRINCESS, *s.* (Female sovereign) राज्ञी, महिषी. *See* QUEEN.—(Daughter of a king) राजपुत्री -त्रिका, राजकुमारी, राजकन्या, राजसुता, नृपसुता, नृपात्मजा, राजतनया, नृपनन्दिनी, कुमारी, युवराजपत्नी.—(In theatrical language) भर्तृदारिका.

PRINCIPAL, *a.* मुख्यः -ख्या -ख्यं, परमः -मा -मं, प्रधानः -ना -नं, प्रमुखः -खा -खं, अग्रयः -ग्रा -ग्रं, अग्र्यः -ग्र्या -ग्र्यं, प्राग्र्यः &c., वरः -रा -रं, प्रवरः &c., वरेण्यः -ण्या -ण्यं, वर्य्यः -र्य्या -र्य्यं, उत्तमः -मा -मं, पुरोगमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, विशिष्टः -ष्टा -ष्टं, उत्कृष्टः &c., शिष्टः &c., प्रथमः -मा -मं, अग्रगण्यः -ण्या -ण्यं, विशेष्यः -ष्या -ष्यं, मूलिकः -की -कं, मौलिकः &c., सिंह in comp. *See* CHIEF, EMINENT, EXCELLENT; 'principal door,' सिंहद्वारं; 'principal queen,' पट्टमहिषी, पट्टदेवी; 'principal minister.' *See* PRIME, *a.*

PRINCIPAL, *s.* (Chief, head) मुख्यः, मुखरः, पतिः *m.*, अधिपतिः *m.*, अध्यक्षः, नायकः. *See* LEADER, PRESIDENT; 'principal of a convent,' आश्रमगुरुः *m.*; 'of a college,' विद्यालयपतिः *m.*, विद्यालयाधिपतिः *m.*, विद्यालयाध्यक्षः.—(Capital) मूलधनं, मूलं, धनमूलं, मूलद्रव्यं, नीविः -वी *f.*, परिणं, परिणतं, कायः, प्रयोज्यं; 'of a debt,' सामकं.—(Principal perpetrator) प्रवर्त्तकः.

PRINCIPALITY, *s.* (Territory of a prince) राष्ट्रं, देशः, मण्डलं, राज्यं, माण्डलिकराष्ट्रं, माण्डलिकराज्यं, माण्डलिकदेशः, माण्डलिकविषयः.

PRINCIPALLY, *adv.* प्रधानतस्, प्राधान्यतस्, मुख्यशस्, मुख्यतस्, विशेषतस्, विशेषेण, अधिकन्तु.

PRINCIPALNESS, *s.* प्राधान्यं, प्रधानत्वं, मुख्यता -त्वं, श्रेष्ठता, उत्कृष्टता.

PRINCIPLE, *s.* (Cause, source, origin) कारणं, हेतुः *m.*, आदिकारणं, आदिः *m.*, बीजं, मूलं, प्रयोजनं, आदिकारणं, आदिहेतुः *m.*—(Element, constituent part) मूलवस्तु *n.*, तत्त्वं, मूलं, मूलतत्त्वं, अङ्गं, अवयवः, मूलद्रव्यं, मूलावयवः, मूलाङ्गं, वस्तु *n.*, धातुः *m.*, सारः, साधनं, बीजं, मात्रं, तन्मात्रं.—(Fundamental or elementary truth) तत्त्वं, मूलतत्त्वं, सूत्रं, मूलसूत्रं, प्रथमसूत्रं, बीजं, परिभाषा, आरम्भः.—(Rule, general truth) नियमः, सूत्रं, विधिः *m.*, स्थितिः *f.*, न्यायः, उक्तवाक्यं, वचनं, उत्सर्गः.—(Settled law or property) धर्म्मः, गुणः, भावः, क्रमः, स्वभावः, व्यवस्था.—(Settled process) रीतिः *f.*, क्रमः, मार्गः, विधानं, मर्य्यादा, धारा.—(Ground, foundation) हेतुः *m.*, प्रमाणं, प्रामाण्यं, उपपत्तिः *f.*, उपपादनं, मूलं, आधारः, आश्रयः, उपष्टम्भः.

PRINCIPLED, *a.* (High-principled, well-principled) धर्म्मनिष्ठः -ष्ठा -ष्ठं, धर्म्मतत्त्वनिष्ठः &c., पुण्यनियमनिष्ठः &c., सुनियमनिष्ठः &c., सुनियमनिष्ठितः -ता -तं, उदारः -रा -रं, उदारशीलः -ला -लं.

Digitized by Google

To PRINT, *v. a.* मुद्र (nom. मुद्रयति -यितुं), मुद्रीकृ, मुद्रितं -तां कृ, मुद्राङ्कितं -तां कृ, मुद्राक्षरीकृ, अङ्क् (c. 10. अङ्कयति -यितुं), मुद्राक्षरैर् अङ्क्, समुद्रीकृ. *See To* IMPRINT, IMPRESS.

PRINT, *s.* (Mark made by impression) मुद्रा, मुद्रिका, अङ्कः, चिह्नं. —(Instrument for impressing) मुद्रा, मुद्राङ्कनयन्त्रं.—(Impression of types or the type itself) मुद्राक्षरचिह्नं, मुद्राक्षरं.—(State of being printed) मुद्रितत्वं, मुद्राङ्कितत्वं; 'in print,' मुद्रितः -ता -तं; 'out of print,' अमुद्रितः &c.—(Print of a foot) पादचिह्नं, पदाङ्कः, पादमुद्रा, पदं, पदवी.

PRINTED, *p. p.* मुद्रितः -ता -तं, मुद्राङ्कितः &c., मुद्रीकृतः &c., मुद्राक्षरैरङ्कितः -ता -तं, मुद्राक्षराङ्कितः &c., अङ्कितः &c., कृतमुद्रः -द्रा -द्रं, कृताङ्कः -ङ्का -ङ्कं, समुद्रः &c.; 'printed book,' मुद्रितपुस्तकं.

PRINTER, *s.* मुद्राकरः, मुद्राकारी *m.* (न्), मुद्राकृत्, मुद्रकः, मुद्राङ्कनकृत्.

PRINTING, *s.* मुद्राङ्कनं, मुद्राकरणं, मुद्रीकरणं, अङ्कनं, मुद्राक्षरप्रयोगः.

PRINTING-HOUSE, *s.* मुद्राङ्कनशाला, मुद्रायन्त्रालयः -यं, यन्त्रालयः.

PRINTING-INK, *s.* मुद्राङ्कनमसिः -सी, मुद्राङ्कनमसिका, अङ्कनमसी.

PRINTING-PRESS, *s.* मुद्राङ्कनयन्त्रं, मुद्रायन्त्रं, मुद्राङ्कनचक्रं.

PRIOR, *a.* पूर्वः -र्वी -र्वं, पूर्विकः -का -कं, पौर्विकः -की -कं, पौरस्त्यः -स्त्या -स्त्यं, अग्रः -ग्रा -ग्रं, प्राक् in comp., प्राक्तनः -नी -नं, आद्यः -द्या -द्यं, आदिमः -मा -मं, आदि in comp., प्रथमः -मा -मं; 'prior possession,' पूर्वभुक्तिः *f.*; 'prior existence,' प्राग्भावः; 'prior and subsequent,' पूर्वापरः -रा -रं, परापरः -रा -रं, परावरः -रा -रं, परावरीणः -णा -णं.

PRIOR, *s.* (Superior of a convent) आश्रमगुरुः *m.*, मठाधिपतिः *m.*, मठाध्यक्षः, आश्रमाध्यक्षः, मठाधिकारी *m.* (न्).

PRIORITY, *s.* पूर्वता -त्वं, अग्रता -त्वं, प्रथमता -त्वं, प्राथम्यं, आद्यता, आदित्वं.—(In rank) अग्रपदं, श्रेष्ठपदं, प्राधान्यं, प्रधानता, अग्रमान्यता, अग्रगण्यता, अग्रपूज्यता, अग्रमानं, अग्रपूजा.

PRIORY, *s.* मठः, आश्रमः, अवसथः, वीहारः, धर्मशाला.

PRISM, *s.* त्रिपार्श्वकाचः, चतुर्भुजाकृतिः पार्श्वत्रयविशिष्टः काचखण्डः.

PRISMATIC, *a.* (Pertaining to a prism) त्रिपार्श्वकाचसम्बन्धी &c.—(Resembling one) त्रिपार्श्वकाचाकारः -रा -रं.—(Distributed or formed by one) त्रिपार्श्वकाचविकीर्णः -र्णा -र्णं, त्रिपार्श्वकाचकल्पितः -ता -तं.

PRISON, *s.* कारागारं, कारागृहं, कारा, कारावेश्म *n.* (न्), बन्धनागारं, बन्धनालयः, बन्धनगृहं, बन्धनस्थानं, निरोधस्थानं, निरोधगृहं, निरोधशाला, बन्दिशाला, बन्दिवेश्म *n.*, गुप्तिः *f.*, चारः.

To PRISON, *v. a.* *See To* IMPRISON.

PRISONER, *s.* बन्दिः *f.*, बन्दी *f.*, कारास्थः, कारागारस्थः, कारागुप्तः, ग्रग्रहः, उपग्रहः, ग्रहणः, कवरकी *f.*, करमरी *m.* (न्), वारिः *f.*, गोरङ्गुः *m.* —(One taken in war) युद्धधृतः, युद्धगृहीतः, शत्रुधृतः, शत्रुगृहीतः, युद्धदासः.

PRISTINE, *a.* प्राक्तनः -नी -नं, पुरातनः &c., प्राक्कालीनः -ना -नं, प्राक्कालिकः -की -कं, आद्यकालिकः &c., पूर्वकालीनः &c., पूर्वकालिकः &c., पुराणः -णा -णी -णं, प्राचीनः -ना -नं.

PRIVACY, *s.* (State of retirement or secrecy) विविक्तता -त्वं, विविक्तभावः, विविक्तवासः, एकान्तता, एकान्तभावः, एकान्तवासः, रहस् *n.*, रहः, रहोभावः, रहीभावः, रहोवासः, रहस्यत्वं, निभृतत्वं, गुप्तता, छन्नता, प्रच्छन्नता, निर्जनता, विजनता.—(Place of seclusion, retreat) विविक्तस्थानं, रहःस्थानं, रहःस्थलं, एकान्तस्थानं, निर्जनस्थानं, विजनस्थानं, निर्जनदेशः.

PRIVATE, *a.* (Separate, unconnected with others) विविक्तः -क्ता -क्तं, विभिन्नः -न्ना -न्नं, पृथक्स्थितः -ता -तं, पृथगात्मकः -का -कं, असाधारणः -णा -णी -णं, असामान्यः -न्या -न्यं.—(Peculiar to one's self) स्व in comp., आत्म in comp., स्वकीयः -या -यं, स्वीयः &c. *See* PECULIAR; 'private conclusion,' स्वानुमितिः *f.*; 'private advantage,' आत्महितं; 'private property,' स्वत्वं, स्वधनं, आत्मधनं, निजत्वं, असाधारणधनं, अनन्यस्वामिकधनं.—(Sequestered, secluded, retired) विविक्तः -क्ता -क्तं, विजनः -ना -नं, निर्जनः &c., एकान्तः -न्ता -न्तं, निभृतः -ता -तं, निःशलाकः -का -कं.—(Secret, not open) रहस्यः -स्या -स्यं, गूढः -ढा -ढं, गुप्तः -प्ता -प्तं, गुह्यः -ह्या -ह्यं, छन्नः -न्ना -न्नं, प्रच्छन्नः &c., अव्यक्तः -क्ता -क्तं, अप्रकाशः -शा -शं, अप्रकटः -टा -टं, अस्पष्टः -ष्टा -ष्टं, अन्तर् in comp.; 'very private,' सुगुप्तः &c., सुगूढः &c.; 'private intelligence,' गूढभाषितं, गूढवार्त्ता; 'private road,' गूढमार्गः; 'private door,' अन्तर्द्वारं, गूढद्वारं, प्रच्छन्नं, पक्षद्वारं; 'private apartments,' अन्तर्गृहं, अन्तःपुरं, अवरोधनं, उपरोधकं, अन्तर्भवनं, कक्षान्तरं, निष्कुटः, दर्भटः; 'private room,' अन्तःशाला -लिका, अन्तःकोष्ठकं, उपरोधकं; 'private part,' गुह्यं, रहस् *n.*, उपस्थः, अधोङ्गं.—(Not in public office or employment) अनधिकारी -रिणी -रि (न्), अनधिकारस्थः -स्था -स्थं, अनधिकारस्थितः -ता -तं; 'a private person,' पृथग्जनः, पृथग्लोकः, पृथग्जानपदः, अनधिकारस्थव्यक्तिः *f.*—(Not official) अनाधिकारिकः -की -कं.—(In private). *See* PRIVATELY.

PRIVATE, *s.* (Common soldier) सैनिकः, सैन्यः, पृथक्सैन्यः.

PRIVATEER, *s.* गृहीतानुज्ञापत्रेण पृथग्जनेन सज्जीकृता साहसिकनौः.

PRIVATELY, *adv.* रहसि, रहस्, रहस्यं, निभृतं -ते, विविक्तं -क्ततस्, एकान्ततस्, एकान्तं, विजने, गूढं, गूढतस्, गुप्तं, उपांशु, प्रच्छन्नं -न्ने, अप्रकाशं, अप्रकटं, मिथस्; 'going privately,' गूढचारी -रिणी &c., गुप्तगतिः -तिः -ति.

PRIVATENESS, *s.* विविक्तता -त्वं. *See* PRIVACY.

PRIVATION, *s.* (Deprivation, absence of) अभावः, विरहः, रहितत्वं, राहित्यं, हानिः *f.*, असम्भवः, अविषयः, अप्राप्तिः *f.*, वियोगः, अपचयः, नाशः, क्षतिः *f.*, क्षयः, हरणं, लोपः.—(Absence of food or things necessary to comfort) अन्नवस्त्राभावः, आहारविरहः, आहाराभावः, अन्नवस्त्रहानिः *f.*, ग्रासाच्छादनराहित्यं, अन्नोदकाभावः, अन्नोदकलोपः, सुखसाधनाभावः, सुखसाधनलोपः.

PRIVATIVE, *a.* (Causing privation) हानिकरः -रा -रं, हानिकारकः -का -कं, लोपकरः &c., क्षयकरः &c., नाशकरः &c.—(Consisting in the absence of something) अभावसूचकः -का -कं, अभावरूपः -पा -पं, अभावात्मकः -का -कं, अभावदर्शकः &c.

PRIVATIVE, *s.* (Word) अभावशब्दः, अभावसूचकशब्दः.—(Prefix, in grammar) नपदं, नञ्पदं. Privative prefixes are such as अ, अन्, निर्, वि.

PRIVATIVELY, *adv.* अभावरूपेण, सनिषेधं, निषेधरूपेण, अभावतस्.

PRIVILEGE, *s.* अधिकारः, विशेषाधिकारः, असाधारणाधिकारः, असामान्याधिकारः, स्वाधिकारः, स्वत्वं.

To PRIVILEGE, *v. a.* अधिकारं दा, विशेषाधिकारं दा, अधिकारवन्तं -वतीं -वत् कृ, साधिकारं -रां कृ, विशेषाधिकारयुक्तं -क्तां कृ.

PRIVILEGED, *p. p.* or *a.* अधिकारवान् -वती -वत् (त्), साधिकारः -रा -रं, विशेषाधिकारवान् &c., विशेषाधिकारयुक्तः -क्ता -क्तं, अधिकारविशिष्टः -ष्टा -ष्टं.—(Exempt from tax) अकरः -रा -रं.

PRIVILY, *adv.* रहसि, गुप्तं, निभृतं, सुनिभृतं, *See* PRIVATELY.

Digitized by Google

PRIVITY, *s.* (Joint knowledge with another) सहज्ञानं, सहबोधः, सहवेदनं, समवेदनं, समज्ञानं, समवेत्तृत्वं.—(Private part) गुह्यं, गुह्याङ्गं, गूढाङ्गं, गुप्ताङ्गं, गोप्याङ्गं, गुह्येन्द्रियं, गुप्तेन्द्रियं, गुह्यस्थानं, गुप्तस्थानं, गुह्यस्थलं, रहस् *n.*, कौलीनं, उपस्थः -स्थं, अधोऽङ्गं; 'of a man,' शिश्नः, ध्वजः, *see* MEMBRUM VIRILE; 'of a woman,' *see* PUDENDUM.

PRIVY, *a.* (Private). *See* the word. (Admitted to the participation of knowledge) सहज्ञानी -निनी -नि (न्), समज्ञानी &c., सहज्ञाता *m.* (तृ), सहवेत्ता *m.* (तृ), सहवेदी *m.*, समवेत्ता *m.*—(Privy council) गूढसभा, प्रधानमन्त्रिणां गूढसभा, धीसचिवानां सभा, शिष्टसभा.

PRIVY, *s.* शौचकूपः, पायुक्षालनवेश्म *n.* (न्), कर्दमाटकः, अवस्करः.

PRIVY-COUNSELLOR, *s.* गूढसभाभ्यन्तरः, गूढसभासद्, गूढसभास्थः.

PRIZE, *s.* (That which is taken in war) युद्धजितद्रव्यं, युद्धसम्पादितद्रव्यं, युद्धोपार्जितद्रव्यं, युद्धजितधनं.—(That which is gained as the reward of success or victory) जयफलं, सिद्धिफलं, जयलभ्यफलं, जयलाभः, जयलभ्यवस्तु *n.*, पणजितद्रव्यं, जयपारितोषिकं, स्पर्द्धाफलं.—(That which is offered as the reward of contest) स्पर्द्धाजेयं, पणजेयं, पणः.—(Reward) फलं, प्रतिफलं, पारितोषिकं.—(Valuable acquisition) रत्नं, निधिः *m.*

To PRIZE, *v. a.* (Estimate) मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्, मूल्यं or अर्घं निरूप् or निर्णी or संख्या.—(Value highly) बहु मन्, बहु सम्मन्, अतिशयेन सम्मन्, बहुमतिं कृ.

PRIZED, *p. p.* बहुमतः -ता -तं, बहुसम्मानितः &c., इष्टः -ष्टा -ष्टं, प्रतिष्ठितः -ता -तं; 'by mankind,' जनेष्टः -ष्टा -ष्टं.

PRIZE-FIGHTER, *s.* मल्लयोद्धा *m.* (द्धृ), मल्लयोधी *m.* (न्), मल्लः, ऋक्षः.

PRIZE-FIGHTING, *s.* मल्लयुद्धं, ऋक्षयुद्धं, मुष्टियुद्धं, बाहुयुद्धं.

PRO, (Forward, forth) प्र, अग्रे.—(For). In the phrase 'pro and con,' pro may be expressed by विधिपक्षः, कर्त्तव्यपक्षः, and con by निषेधपक्षः, अकर्त्तव्यपक्षः, अभावपक्षः.

PROBABILITY, *s.* सम्भावना, सम्भवः, सम्भाव्यता -त्वं, सम्भावनीयता -त्वं, अनुमेयता -त्वं, प्रमेयता, अभ्युपगमः, अभ्युपगम्यता, सम्भावनायोग्यता, भवनयोग्यता, योग्यता -त्वं, सत्यसङ्काशता.

PROBABLE, *a.* सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, सम्भावितः -ता -तं, सम्भावनार्हः -र्हा -र्हं, सत्यसङ्काशः -शा -शं, अनुमेयः -या -यं, अभ्युपगम्यः -म्या -म्यं, अभ्युपगतः -ता -तं, प्रमेयः -या -यं, सम्भावनायोग्यः -ग्या -ग्यं, भवनयोग्यः &c.; 'this is probable,' इदम् उपपद्यते or सम्भवति or युज्यते.

PROBABLY, *adv.* सम्भावनीयं, यथासम्भवं, यथायोग्यं, प्रायस्, प्रायशस्, स्यात्, किल, नाम.

PROBATE, *s.* (Of a will) मृतपत्रप्रमाणं, मृतलेखप्रमाणं.

PROBATION, *s.* (Trial) परीक्षा -क्षणं, उपधा, कृष्टिः *f.*—(Proof) प्रमाणं, प्रामाण्यं, निर्णयः. *See* PROOF.

PROBATIONARY, PROBATIONAL, *a.* परीक्षकः -का -कं, परीक्षाकारी -रिणी -रि (न्), परीक्ष्यमाणः -णा -णं, परीक्षा in comp., उपधा in comp.

PROBATIONER, *s.* परीक्ष्यमाणः, परीक्षारूढः, परीक्षाविषयः, परीक्षापात्रं, प्राथमकल्पिकः, नूतनशिष्यः, नवीनशिष्यः.

PROBATOR, *s.* परीक्षकः, विचारकः, अनुसन्धाता *m.* (तृ), परीक्षाकृत्.

PROBATORY, *a.* परीक्षकः -का -कं. *See* PROBATIONARY, *a.*

To PROPITIATE, *v. a.* आराध् (c. 10. -राधयति -यितुं), अभिराध्, प्रसद् (c. 10. -सादयति -यितुं), सम्प्रसद्, अभिप्रसद्, अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), सान्त्व् (c. 10. सान्त्वयति -यितुं), शम् (c. 10. शमयति -यितुं), प्रसाध् (c. 10. -साधयति -यितुं), तुष् (c. 10. तोषयति -यितुं), सन्तुष्, परितुष्, सम्परितुष्, अनुनी (c. 1. -नयति -नेतुं), अभिप्रणी, प्रसन्नीकृ.

PROPITIATED, *p. p.* आराधितः -ता -तं, प्रसादितः &c., प्रसन्नः -न्ना -न्नं, अनुरञ्जितः &c., अभिराद्धः -द्धा -द्धं, शमितः -ता -तं, शान्तः -न्ता -न्तं, प्रशमितः &c., अनुनीतः &c., अभिप्रणीतः &c.

PROPITIATION, *s.* आराधनं -ना, प्रसादनं, सान्त्वनं -ना, सान्त्वः -न्वं, शान्त्वः -न्वं, शान्त्वनं, अनुरञ्जनं, शमनं, शान्तिः *f.*, प्रशान्तिः *f.*, उपशान्तिः *f.*, शान्तिकर्म्म *n.* (न्), प्रशमनं, उपशमनं, अनुनयः, अभिप्रणयः, सन्तोषणं, साम *n.* (न्); 'for sin,' प्रायश्चित्तं.

PROPITIATOR, *s.* आराधकः, शान्तिकर्त्ता *m.* (र्त्तृ), सान्त्वनकृत्, अनुरञ्जकः.

PROPITIATORY, *a.* शान्तिकः -की -कं, शमकः -का -कं, शान्तिकरः -रा -रं, सान्त्वकरः &c., शमकारकः -का -कं, उपशमकः &c., आराधकः &c., प्रसन्नकारकः &c.; 'propitiatory ceremonies,' शान्तिकं, शान्तिकपौष्टिकं; 'course of such ceremonies,' अनुष्ठानं; 'water used at them,' शान्त्युदं -दकं.

PROPITIOUS, *a.* (Favorable) प्रसन्नः -न्ना -न्नं, सुप्रसन्नः &c., अनुकूलः -ला -लं, सुमनस्कः -स्का -स्कं, अनुग्राही -हिणी -हि (न्), आनुग्राहकः -की -कं, हितकामः -मा -मं, हितबुद्धिः -द्धिः -द्धि, सुहितः -ता -तं, उपकारशीलः -ला -लं, अभिमुखः -खा -खं.—(As a god granting boons) वरदः -दा -दं, वरप्रदः -दा -दं.—(Auspicious) शुभः -भा -भं, कल्याणः -णी -णं, शुभङ्करः -रा -रं, शुभदः -दा -दं, माङ्गलिकः -की -कं, मङ्गल्यः -ल्या -ल्यं, मङ्गलकरः &c., क्षेमकरः &c., क्षेमङ्करः &c., भद्रङ्करः &c., क्षितिङ्करः &c., क्षेमकारः -री -रं, शर्म्मदः -दा -दं, शङ्करः &c., शर्म्मवान् -वती -वत् (त्), इष्टः -ष्टा -ष्टं, अभीष्टः &c.

PROPITIOUSLY, *adv.* प्रसन्नं, प्रसादेन, सप्रसादं, अनुकूलं, सानुकूल्यं, सानुग्रहं, कल्याणं, समाङ्गल्यं, क्षेमेण. *See* AUSPICIOUSLY.

PROPITIOUSNESS, *s.* प्रसन्नता, प्रसादः, अनुकूलता, आनुकूल्यं, सुप्रसन्नता, अभिमुखता, आभिमुख्यं, माङ्गल्यं, मङ्गलता, कल्याणं -णता, शुभता.

PROPONENT, *s.* पूर्ब्बवादी *m.* (न्), अग्रवादी *m.*, पूर्ब्बपक्षी *m.*, प्रतिज्ञावादी *m.*

PROPORTION, *s.* (Comparative relation or adaptation of one thing to another) प्रमाणं, परिमाणं, सम्मितिः *f.*, प्रमितिः *f.*, परस्परप्रमाणं, परस्परानुगुण्यं, अनुगुणता, आनुगुण्यं, परस्परानुरूप्यं, परस्परानुरूपता, परस्परसादृश्यं, अन्योन्यसादृश्यं, अन्योन्यसमता, परस्परानुषङ्गः, मिथःसादृश्यं, परस्परसम्बन्धः, अन्योन्यसम्बन्धः, मिथःसम्बन्धः, परस्परान्वयः, व्यतिषङ्गः. *See* PROPORTIONATENESS; 'in proportion to,' अनुगुणः -णा -णं, अनुरूपः -पा -पं, अनुसारी -रिणी &c., सदृशः -शी -शं, समः -मा -मं, सादृश्येन, यथाप्रमाणं, प्रमाणतस्, अनुरूपेण, अनुसारेण, सदृशं, or expressed by अनु or यथा prefixed or तस् affixed; as, 'in proportion to one's strength,' यथाशक्ति, शक्तितस्, आत्मशक्तिसादृश्येन, स्वशक्तितस्, आत्मशक्तिसमं.—(Relation in general) अन्वयः, समन्वयः, अनुषङ्गः, सम्बन्धः, सम्पर्कः.—(In arithmetic) अनुपातः; 'the four numbers are in proportion,' चतस्रः संख्या अनुपातस्थाः सन्ति; 'dependence of larger numbers on smaller in a progressive series,' तारतम्यं.—(Symmetry, adaptation) सम्मितिः *f.*, सम्मितता, सन्धानं, अनुसन्धानं, संयोगः, अन्वयः; 'of parts or form,' अङ्गसंयोगः, अङ्गसन्धानं, अवयवसंयोगः, आकारशुद्धता, आकारशुद्धिः *f.*; 'of just proportions,' आकारशुद्धः -द्धा -द्धं.—(Just share) अंशः, भागः, विभागः, उद्धारः.

To PROPORTION, PROPORTIONATE, *v. a.* परस्परं or अन्योन्यं सदृशीकृ or अनुरूपीकृ or अनुगुणीकृ or समीकृ, परस्परानुगुण्यं कृ, परस्परानुरूप्यं कृ, परस्परसादृश्यं कृ, मिथःसादृश्यं कृ, सम्मितं -तां कृ, प्रमाणं कृ, समप्रमाणीकृ. *See To* ADJUST.

PROPORTIONATE, PROPORTIONABLE, PROPORTIONAL, *a.* समप्रमाणः -णा -णं, समपरिमाणः -णा -णं, समप्रमाणकः -का -कं, सम्मितः -ता -तं, प्रमितः -ता -तं, परिमितः -ता -तं, अनुगुणः -णा -णं, सदृशः -शी -शं, समः -मा -मं, तुल्यः -ल्या -ल्यं, अनुरूपः -पा -पं, अनुसारी &c., आनुषङ्गिकः -की -कं, अनुषङ्गिकः &c., अनुषङ्गी &c., परस्परानुगुणः &c., परस्परानुरूपः -पा -पं, परस्परसदृशः &c., परस्परानुषङ्गिकः -की -कं, समतोलः -ला -लं; 'proportionate to one's strength,' आत्मशक्तिसदृशः &c., आत्मशक्तिसमः &c.

PROPORTIONATENESS, PROPORTIONABLENESS, *s.* प्रमाणसमता, परिमाणसमता, समप्रमाणकता, सम्मितिः *f.*, अनुगुणता, आनुगुण्यं, सदृशता, सादृश्यं, समता, तुल्यता, अनुरूपता, आनुरूप्यं, परस्परानुगुण्यं. *See* PROPORTION.

PROPORTIONABLY, *adv.* अनुरूपतस्, अनुरूपं, अनुसारेण -रतस्, सादृश्येन, सदृशं, प्रमाणतस्, यथाप्रमाणं, यथापरिमाणं, प्रमाणानुसारात् -रेण, यथांशतस्, विभागशस्; 'to one's strength,' *see* under PROPORTION.

PROPORTIONED, *p. p.* यथाप्रमाणं परिकल्पितः -ता -तं, प्रमाणानुसारात् कल्पितः &c. or विहितः &c. *See* PROPORTIONATE.

PROPOSAL, *s.* उपन्यासः, कर्त्तव्योपन्यासः, प्रतिज्ञा, प्रतिज्ञातं, कर्त्तव्यसूचना -नं, कर्त्तव्यप्रतिज्ञा, कर्त्तव्यनिर्देशः, अभिधानं, अभिहितं, उक्तं, वाक्यं.—(Of marriage), *see* the next.

To PROPOSE, *v. a.* उपन्यस् (c. 4. -अस्यति -असितुं), उपन्यासं कृ, उपन्यासीकृ, कर्त्तव्योपन्यासं कृ, कर्त्तव्यसूचनं कृ, प्रतिज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), प्रतिज्ञां कृ, कर्त्तव्यप्रतिज्ञां कृ, निविद् (c. 10. -वेदयति -यितुं), निवेदनं कृ, अभिधा (c. 3. -दधाति -धातुं), कर्त्तव्यं or यथाकर्त्तव्यं निर्दिश् (c. 6. -दिशति -देष्टुं) or सूच् (c. 10. सूचयति -यितुं), कर्त्तव्यनिर्देशं कृ.—(Intend), *see* the word.—(Make an offer of marriage) विवाहप्रतिज्ञां कृ, प्रेमनिवेदनं कृ.

PROPOSED, *p. p.* उपन्यस्तः -स्ता -स्तं, उपन्यासीकृतः -ता -तं, प्रतिज्ञातः &c., निवेदितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, अभिहितः &c.

PROPOSITION, *s.* उपन्यासः, प्रतिज्ञा, प्रतिज्ञातं, वाक्यं, उक्तं, वचनं.—(In logic, geometry, &c.) प्रतिज्ञा, प्रतिज्ञेयं, फक्किका, प्रमेयं, पूर्ब्बपक्षः, प्रतिज्ञातार्थः; 'abandonment of the original proposition,' प्रतिज्ञासंन्यासः, प्रतिज्ञाहानिः *f.*; 'denial of a proposition,' प्रतिज्ञाविरोधः; 'completing it,' आकांक्षापूरणं; 'subsequent proposition,' प्रतिज्ञान्तरं.

To PROPOUND, *v. a.* (Propose) उपन्यस्, प्रतिज्ञा, निर्दिश्, अभिधा, सूच् (c. 10. सूचयति -यितुं), निविद्, प्रतिपद् (c. 10. -पादयति -यितुं).

PROPOUNDED, *p. p.* उपन्यस्तः -स्ता -स्तं, प्रतिज्ञातः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

PROPRIETARY, *a.* स्वामिसम्बन्धी -न्धिनी -न्धि (न्), स्वाम्यधीनः -ना -नं; 'proprietary right,' स्वत्वं, अधिकारः -रिता, स्वामित्वं, स्वाम्यं, प्रभुत्वं -ता.

PROPRIETOR, *s.* स्वामी *m.* (न्), अधिकारी *m.* (न्), प्रभुः *m.*, पतिः *m.*, ईश्वरः, स्वत्ववान् *m.* (त्), अधिकारवान् *m.*, स्वत्वाधिकारी *m.*; 'without title,' अनपसरः.

PROPRIETORSHIP, *s.* स्वामित्वं, स्वाम्यं, स्वत्वं, अधिकारिता -त्वं, प्रभुत्वं.

Digitized by Google

PROPRIETRESS, *s.* स्वामिनी *f.*, अधिकारिणी *f.*, स्वत्वाधिकारिणी *f.*

PROPRIETY, *s.* यथायोग्यता, युक्तता, योग्यता, यथायुक्तता, युक्तिः *f.*, उपयुक्तता, उपयोगिता -त्वं, उचितत्वं, औचित्यं, यथोचितत्वं, उपपत्तिः *f.*, सामञ्जस्यं, समञ्जसं, सम्भावना, न्यायः -यता, सङ्गतत्वं, साङ्गत्यं, याथार्थ्यं, यथार्हता, याथातथ्यं, अभेषः, पर्य्याप्तिः, पात्रं -त्रता; 'of conduct,' मर्य्यादा, मर्य्यादानतिक्रमः, विनयः, विनीतता, सुचर्य्या, सुचरितं, स्थितिः *f.*, संस्था, अनतिक्रमः, अव्यभिचारः, कर्त्तव्यता, इतिकर्त्तव्यता; 'pattern of propriety,' न्यायाधारः.

PROROGATION, *s.* चिरकालपर्य्यन्तं महासभाविसर्जनं or कार्य्यनिवृत्तिः *f.* or कार्य्यत्यागः.—(Prolongation) दीर्घीकरणं.

To PROROGUE, *v. a.* (Adjourn to a distant period) चिरकालपर्य्यन्तं महासभां विसृज् (c. 6. -सृजति -सष्टुं, c. 10. -सर्जयति -यितुं) or कार्य्यनिवृत्तिं कृ or कार्य्यत्यागं कृ.—(Prolong) द्राघ (nom. द्राघयति -यितुं), दीर्घीकृ, दीर्घकालस्थं -स्थां कृ, चिरकालस्थं -स्थां कृ.

PROROGUED, *p. p.* चिरकालपर्य्यन्तं विसर्जितः -ता -तं or विसृष्टः -ष्टा -ष्टं.

PROSAIC, *a.* गद्यरूपः -पा -पं, गद्यमयः -यी -यं, गद्यात्मकः -का -कं, छन्दोहीनः -ना -नं, छन्दोरहितः -ता -तं.—(Dull) विरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु, रसहीनः -ना -नं, तेजोहीनः &c., लवणहीनः &c.

To PROSCRIBE, *v. a.* (Doom to destruction) घोषणापूर्व्वं वधदण्डार्हं ख्या in caus. (ख्यापयति -यितुं), प्रकाशलेखेन वधार्हं ज्ञा in caus., or वधदण्डार्हं निर्दिश् or वध्यं निर्दिश् or घातव्यं निर्दिश्, अमुकजनो वध्यो ऽस्ति इति सूचनार्थं प्रकटनपत्रे नाम लिख् (c. 6. लिखति, लेखितुं) or अभिलिख्, मृत्युपात्रं निर्दिश्.—(Denounce and expel) प्रकटनपत्रेण बहिष्कृ or निरस् or प्रत्यादिश्.—(Interdict) प्रकाशनपत्रेण निषिध् or प्रतिषिध्, प्रकटनलेखेन निवृ or बाध्.

PROSCRIBED, *p. p.* वध्यनामावलिपत्राभिलिखितः -ता -तं, वधदण्डार्हः -र्हा -र्हं, प्रकाशपत्रेण निषिद्धः -द्धा -द्धं or प्रतिषिद्धः &c. or निवारितः -ता -तं.

PROSCRIPTION, *s.* प्रकाशनपत्रेण वध्यजननिर्देशः or वध्यनामावलिनिर्देशः, घोषणापूर्व्वं वधदण्डार्हख्यापनं, प्रकटनपत्रेण वधार्हज्ञापनं.

PROSE, *s.* गद्यं, हारकः, छन्दोरहितवाक्यं; 'prose and verse,' गद्यपद्यं; 'alternate prose and verse,' चम्पूः *m.*

To PROSE, *v. n.* दीर्घीचारणेन विरसवाक्यानि or विरसकथाः वद् (c. 1. वदति -दितुं), दीर्घसूत्रतया or दीर्घसूत्रवद् विरसकथोपाख्यानं कृ.

To PROSECUTE, *v. a.* (Pursue, follow up, carry on continuously) अनवरतम् अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अविरतम् अनुसेव् (c. 1. -सेवते -वितुं) or उपसेव् or सेव्, नित्यं प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), अविरतप्रवृत्तिं कृ, निर्वह् (c. 10. -वाहयति -यितुं); 'to prosecute one's efforts,' अविरतयत्नं कृ, अनवरतप्रयत्नं कृ, नित्योत्साहं कृ; 'one's undertakings,' प्रारब्धानि सम्पद् (c. 10. -पादयति -यितुं); 'one's studies,' नित्याध्ययनं कृ, अविरताध्ययनं कृ, विद्यानुसेवनं कृ.—(In law) अभियुज् (c. 7. -युनक्ति -योक्तुं), अभियोगं कृ, अभिशंस् (c. 1. -शंसति -सितुं), अभिशंसनं कृ, व्यवहाराभियोगं कृ, व्यवहाराभिशंसनं कृ.

PROSECUTED, *p. p.* (Carried on continuously) अविरतम् अनुष्ठितः -ता -तं or अनुसेवितः &c. or सेवितः &c., निर्वाहितः &c.—(In law) अभियुक्तः -क्ता -क्तं, अभिशस्तः -स्ता -स्तं, व्यवहाराभियुक्तः -क्ता -क्तं, व्यवहाराभिशस्तः -स्ता -स्तं.

PROSECUTION, *s.* (Carrying on continuously) अविरतानुष्ठानं, नित्यानुष्ठानं, नित्यानुसेवनं, नित्यसेवनं, नित्यप्रवृत्तिः *f.*, अविरतप्रवृत्तिः *f.*, नित्यप्रवर्त्तनं, निर्वाहनं; 'of efforts,' अविरतयत्नकरणं, नित्योद्योगः; 'of study,' नित्याध्ययनं, अविरताध्ययनं, विद्यानुसेवनं, विद्यानुपालनं, प्रवृत्तिः *f.*—(In law) अभियोगः, अभिशंसनं, व्यवहाराभियोगः, व्यवहाराभिशंसनं, अभियुक्तता.

PROSECUTOR, *s.* (One who carries on continuously) अविरतानुष्ठायी *m.* (न्), अविरतानुसेवी *m.*, निर्वाहकः.—(In law) अभियोगी *m.* (न्), अभियोक्ता *m.* (क्तृ), अभिशंसकः, व्यवहाराभियोगकृत्, व्यवहाराभिशंसनकृत् *m.*, अभियोगकारी *m.* (न्), विवादार्थी *m.*, अर्थी *m.*

PROSELYTE, *s.* धर्म्मपरिवर्त्तकः, धर्म्मान्तरग्राही *m.* (न्), मतान्तरग्राही *m.*, धर्म्मान्तरावलम्बी *m.*, स्वधर्म्मग्राही *m.*, स्वधर्म्मावलम्बी *m.*, अन्यधर्म्मग्राही *m.*, अन्यधर्म्मावलम्बी *m.*, स्वधर्म्मी *m.*, धर्म्मान्तरप्राप्तः, परधर्म्माश्रितः, स्वधर्म्मत्यागी *m.*, स्वधर्म्मत्यागपूर्व्वं धर्म्मान्तरग्राही *m.*; 'to Judaism,' यिहुदीयधर्म्मग्राही *m.*; 'to Christianity,' ख्रीष्टीयधर्म्मग्राही *m.*, ख्रीष्टीयमतग्राही *m.*

To PROSELYTE, PROSELYTIZE, *v. a.* धर्म्मान्तरं or स्वधर्म्मं ग्रह् in caus., मतान्तरं or स्वमतं ग्रह्, धर्म्मपरिवर्त्तकं कृ; 'to Judaism,' यिहुदीयमतं ग्रह् in caus.

PROSELYTISM, *s.* धर्म्मपरिवर्त्तनं, धर्म्मान्तरग्रहणं, धर्म्मान्तरप्रापणं.

PROSER, *s.* दीर्घीचारणेन विरसकथाख्यायकः, दीर्घसूत्री *m.* (न्).

PROSING, *s.* दीर्घीचारणेन विरसकथोपाख्यानं, दीर्घसूत्रता -त्वं.

PROSODIAL, PROSODICAL, *a.* छान्दसः -सी -सं, छन्दःशास्त्रसम्बन्धी &c., छन्दःशास्त्रविषयकः -का -कं, छन्दोविषयकः &c., छन्दःसम्बन्धी &c.

PROSODIAN, *s.* छन्दःशास्त्रज्ञः, छन्दःशास्त्रविद् *m.*, छन्दःशास्त्रव्युत्पन्नः.

PROSODY, *s.* छन्दस् *n.*, छन्दःशास्त्रं, छन्दोविद्या, छन्दोज्ञानं.

PROSOPOPŒIA, *s.* *See* PERSONIFICATION.

PROSPECT, *s.* (View) दृष्टिः *f.*, दर्शनं, दृष्टिपातः, दृक्पातः.—(View of future events, expectation) भाविदर्शनं, भविष्यद्दर्शनं, भाविघटनादर्शनं, अनागतदर्शनं, मानसिकदृष्टिः *f.*, अपेक्षा, उदीक्षणं, आशा, प्रत्याशा.—(That which is presented to the view) दृक्पातविषयः, दृष्टिपातविषयः, दृष्टिगतदेशः, दृक्पातानार्गतदेशः, दृष्टिपातगतप्रदेशः, दृष्टिगोचरदेशः, दृग्गोचरप्रदेशः.

PROSPECTIVE, *a.* भाविकालापेक्षकः -का -कं, उत्तरकालापेक्षकः &c., भाविकालसापेक्षः -क्षा -क्षं, भविष्यदपेक्षकः &c., आगामिकालसापेक्षः &c., भाविस्मृक् *m. f. n.* (ग्).

PROSPECTIVELY, *adv.* भाविकालापेक्षया, उत्तरकालापेक्षया, भविष्यदपेक्षया, भाविकालसापेक्षं, आगामिकालसापेक्षं, भाविकालमपेक्ष्य, उत्तरकालमपेक्ष्य.

PROSPECTIVENESS, *s.* भाविकालापेक्षा, उत्तरकालापेक्षा -क्षकता -त्वं.

PROSPECTUS, *s.* कर्त्तव्यसूचनपत्रं, कर्त्तव्यार्थसूचनपत्रं, कर्त्तव्यार्थबोधनपत्रं.

To PROSPER, *v. a.* (Render successful, favor) सफलीकृ, सिद्धिं or सिद्धतां कृ or नी (c. 1. नयति, नेतुं) or साध् (c. 10. साधयति -यितुं), सिद्धीकृ, सिद्धिमन्तं -मतीं -मत् कृ, वृध् (c. 10. वर्धयति -यितुं), संवृध्, एध् (c. 10. एधयति -यितुं), समृद्धीकृ, उपकृ, अनुग्रह्, उपग्रह्, प्रतिपाल्, अनुपाल्.

To PROSPER, *v. n.* (Thrive) ऋध् (c. 4. ऋध्यति, c. 5. ऋध्नोति, अर्धितुं), समृध्, समृद्धीभू, समृद्धः -द्धा -द्धं भू, वृध् (c. 1. वर्धते -र्धितुं), संवृध्, विवृध्, एध् (c. 1. एधते -धितुं), समेध्, सम्पत्तिं गम्, समृद्धिम् इ or गम्, सश्रीकः -का -कं भू, श्रीमान् -मती &c. भू or अस्.—(Be successful) सिध् (c. 4. सिध्यति, सेद्धुं), सिद्धिं गम् or इ, कृतार्थीभू, प्राप्तार्थीभू, सिद्धार्थीभू, सम्पद् (c. 4. -पद्यते -पत्तुं), सम्पदं or सम्पत्तिं गम्, सफलीभू, सफलः -ला -लं भू.

PROSPERITY, *s.* समृद्धिः *f.*, सामृद्धं, ऋद्धिः *f.*, सम्पत्तिः *f.*, सम्पद् *f.*, सुसम्पद् *f.*, वृद्धिः *f.*, संवृद्धिः *f.*, उदयः, पुण्योदयः, अभ्युदयः, श्रीः *f.*, लक्ष्मीः *f.*, सौभाग्यं, भाग्यं, भूतिः *f.*, क्षेमः -मं, एधा, कुशलं -लता, कौशल्यं, शर्म्म *n.*

Digitized by Google

(न्), कल्याणं, मङ्गलं, माङ्गल्यं, भद्रं, शुभं, शिवं, ऋतिः *f.*, रिष्टं, उपचयः; 'season of prosperity,' समृद्धिसमयः, समृद्धिकालः, उदयकालः.—(Success) सिद्धिः *f.*, साध्यसिद्धिः *f.*, अर्थसिद्धिः *f.*, कृतार्थता, सफलता, साफल्यं; 'national,' योगक्षेमः.

PROSPEROUS, *a.* (Thriving) समृद्धः -द्धा -द्धं, वर्धमानः -ना -नं, वर्धिष्णुः -ष्णुः -ष्णु, श्रीमान् -मती -मत् (त्), लक्ष्मीवान् &c., क्षेमवान् &c., वृद्धिमान् &c., समृद्धिमान् &c., उदयी -यिनी -यि (न्), शर्म्मवान् &c., विपद्रहितः -ता -तं, निरापद् *m. f. n.*, सुस्थः -स्था -स्थं, एधमानः -ना -नं, समेधमानः &c., श्रीलः -ला -लं, सश्रीकः -का -कं, लक्ष्मणः -णा -णं, श्रीयुक्तः -क्ता -क्तं, अधिकर्द्धिः -र्द्धिः -र्द्धि.—(Successful) सफलः -ला -लं, सिद्धिमान् &c., सिद्धः -द्धा -द्धं, सिद्धार्थः -र्था -र्थं, कृतार्थः &c.—(Fortunate, favorable, auspicious) कल्याणः -णा -णं, कल्याणी &c., मङ्गलः -ला -लं, माङ्गलिकः -की -कं, शुभः -भा -भं, शिवः -वा -वं, शुभान्वितः -ता -तं, सौभाग्यवान् &c., भाग्यवान् &c., धन्यः -न्या -न्यं, कुशलः -ला -लं, क्षेमः -मा -मं, क्षेम्यः -म्या -म्यं, भद्रः -द्रा -द्रं, प्रसन्नः -न्ना -न्नं, शङ्करः -रा -रं, शिवङ्करः &c., श्रीकरः &c.

PROSPEROUSLY, *adv.* समृद्धा, सम्पदा, सुसम्पदा, श्रिया, सक्षेमं, सौभाग्येन, कौशल्येन, सकल्याणं, कल्याणं, कुशलं, शुभं, अभ्युदयेन, सफलं, अवृथा.

PROSPICIENCE, *s.* प्रदर्शनं. *See* FORESIGHT.

PROSTITUTE, *s.* वेश्या, गणिका, पण्यस्त्री, वारस्त्री, साधारणस्त्री, वाराङ्गना, भोग्या, पण्याङ्गना, सामान्या स्त्री, बन्धुरा. *See* HARLOT.

To PROSTITUTE, *v. a.* गर्ह्यकर्म्मार्थं or कुत्सितकर्म्मार्थं प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं) or उपयुज् or विनियुज्, गर्ह्यकर्म्मणि or कुत्सितकर्म्मणि नियुज्, पण्यं -ण्यां कृ, साधारणीकृ, सर्व्वोपभोग्यं -ग्यां कृ.

PROSTITUTION, *s.* वेश्यात्वं, वेश्यावृत्तिः *f.*, पौंश्चल्यं, वारसेवा, भगवृत्तिः *f.*, भगव्यापारः, भगजीविका, वेश्याजीविका. *See* HARLOTRY.—(Devoting to infamous purposes) गर्ह्यकर्म्मार्थं प्रयोगः, कुत्सितकर्म्मार्थं विनियोगः, गर्ह्यकर्म्मणि or कुत्सितकर्म्मणि नियोजनं, पण्यकरणं, सर्व्वोपभोग्यकरणं; 'wages of prostitution,' पण्यस्त्रिया भृतिः *f.* or भाटकं, वेशः.

PROSTRATE, *a.* (Lying at length) अवमूर्द्धशयः -या -यं, क्षिप्तदेहः -हा -हं, भूमिशायी -यिनी -यि (न्), भूमिङ्गतः -ता -तं, अवनिङ्गतः &c.—(In supplication, adoration, &c.) साष्टाङ्गपतितः -ता -तं, साष्टाङ्गप्रणतः &c., साष्टाङ्गनमस्कारं प्रणिपतितः &c., चरणगतः -ता -तं, चरणपतितः -ता -तं, पादपतितः &c., दण्डवत् पतितः &c., पादप्रणतः &c., प्रणिपतितः &c., प्रपतितः &c., उपनतः &c., प्रणतः &c., नतः &c.

To PROSTRATE, *v. a.* (Throw down) पत् (c. 10. पातयति -यितुं), निपत्, अधःपत्, ध्वंस् (c. 10. ध्वंसयति -यितुं), प्रध्वंस्, नश् (c. 10. नाशयति -यितुं), विनश्, प्रणश्, अधरोत्तरीकृ, भूमिं गम् in caus.—(One's self in reverence, &c.) प्रणिपत् (c. 1. -पतति -तितुं), साष्टाङ्गं or साष्टाङ्गपातं प्रणिपत् or पत्, प्रणिपतनं कृ, प्रणम् (c. 1. -णमति -णन्तुं), कायं प्रणम्, साष्टाङ्गप्रणामं कृ, साष्टाङ्गनमस्कारं कृ, अष्टाङ्गपातं कृ, अष्टाङ्गप्रणामं कृ, प्रणिपातं कृ, पादप्रणामं कृ, चरणप्रणामं कृ, दण्डवत् पत् or भू or पतनं कृ, चरणपतनं कृ, पादपतनं कृ, दण्डवत् प्रणामं कृ.—(The strength) सर्व्वशक्तिं हृ (c. 1. हरति, हर्त्तुं), शक्तिपातं कृ, शक्तिनाशं कृ, क्षीणशक्तिं कृ.

PROSTRATED, *p. p.* पातितः -ता -तं, निपातितः &c., अधःपातितः &c., दण्डवत् पातितः &c., प्रणिपातितः &c., प्रणिपतितः &c., भूमिं गमितः &c.—(As strength) हृतशक्तिः -क्तिः -क्ति, नष्टशक्तिः &c., क्षीणशक्तिः &c., गतशक्तिः &c., हृतौजाः -जाः -जः (स्), गतौजाः &c., नष्टौजाः &c.

PROSTRATION, *s.* (Of the body in reverence, &c.) प्रणिपातः, प्रणिपतनं, अष्टाङ्गपातः, अष्टाङ्गप्रणिपातः, साष्टाङ्गप्रणामः, साष्टाङ्गपातः, साष्टाङ्गनमस्कारः, दण्डवत् पतनं or पातः, दण्डवत् प्रणामः, चरणपतनं, पादपतनं, पादप्रणामः, देहपातनं, शरीरपातनं, प्रपतनं.—(Of strength) शक्तिपातः, शक्तिहानिः *f.*, सत्त्वहानिः *f.*, शक्तिक्षयः, विसंसः -सा, ग्लानिः *f.*—(Of spirits) अवसादः, अवसन्नता, विषादः, विषण्णता, ग्लानिः *f.*

PROSY, *s.* विरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु. *See* PROSER.

To PROTECT, *v. a.* (Guard) रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, गुप् (c. 1. गोपायति, c. 10. गोपयति -यितुं), अनुगुप्, निर्गुप्, अभिगुप्, प्रगुप्, संगुप्, अभिसंगुप्, पाल्, परिपाल्, अनुपाल्, प्रतिपाल्, अभिपाल्, सम्पाल्, उपपाल्, पा, परिपा, त्रै, परित्रै, संत्रै, तॄ in caus., अव्, पुष्, गुप्तिं कृ, गोपनं कृ, संगोपनं कृ, रक्षणं कृ, संरक्षणं कृ, पालनं कृ, परिपालनं कृ, पोषणं कृ.

PROTECTED, *p. p.* रक्षितः -ता -तं, संरक्षितः &c., अभिरक्षितः &c., परिरक्षितः &c., सुरक्षितः &c., गुप्तः -प्ता -प्तं, गोपितः -ता -तं, गोपायितः &c., सङ्गोपितः &c., पालितः &c., उपपालितः &c., अनुपालितः &c., प्रतिपालितः &c., त्रातः &c., त्राणः -णा -णं, अवितः -ता -तं, तारितः &c., अभ्युपपन्नः -न्ना -न्नं, आश्रितः &c., समाश्रितः &c.

PROTECTION, *s.* (The act) रक्षा, रक्षणं, संरक्षणं, अभिरक्षा -क्षणं, परिरक्षणं, प्रतिरक्षणं, गुप्तिः *f.*, गोपनं, सङ्गोपनं, पालनं, परिपालनं, प्रतिपालनं, अनुपालनं, अभिपालनं, त्राणं, परित्राणं, अवनं, क्षेमकरणः, क्षेमः, अभ्युपपत्तिः *f.*—(That which protects or shelters) आश्रयः, संश्रयः, समाश्रयः, अयणं, आश्रयणं, शरणं, शरण्यता, शरण्यं; 'to seek the protection of, go for protection,' आश्रि (c. 1. -श्रयति -यितुं), संश्रि, समाश्रि, शरणार्थं गम्.—(Favor, countenance) प्रसादः, अनुग्रहः, सङ्ग्रहः, अनुपालनं, आश्रयः.—(Writing that protects) अभयपत्रं.

PROTECTIVE, *a.* रक्षकः -का -कं, संरक्षकः &c., पालकः -का -कं, प्रतिपालकः &c., गोपकः &c., रक्षाकारी -रिणी -रि (न्), पौष्टिकः -की -कं.

PROTECTOR, *s.* रक्षकः, रक्षी *m.* (न्), रक्षिता *m.* (तृ), गोप्ता *m.* (प्तृ), गोपकः, गोपायकः, गोपी *m.* (न्), गोपः, संरक्षकः, पालकः, प्रतिपालकः, पालयिता *m.* (तृ), पालः, पः in comp., त्राता *m.* (तृ), भयत्राता *m.*, शरणं, शरण्यं, आश्रयः, आश्रयभूतः, शरणभूतः, आश्रयदाता *m.* (तृ).

PROTECTRESS, *s.* रक्षका, रक्षिणी, रक्षित्री, पालका, पालयित्री, रक्षाकारिणी, गोपिनी, गोपिका, गोपी, त्रायन्ती, आश्रयदात्री.

PROTEGÉ, *s.* आश्रितः, संश्रितः, रक्षणीयः, पालनीयः, पोष्यः, शरणागतः.

To PROTEND, *v. a.* प्रसृ (c. 10. -सारयति -यितुं), प्रसारणं कृ. *See To* EXTEND.

To PROTEST, *v. n.* (Declare solemnly) दृढनिश्चयपूर्व्वं or दृढप्रतिज्ञापूर्व्वं वद्, दृढोक्त्या वद्, दार्ढ्येन वद्, दृढं वद्, दृढोक्तिपूर्व्वं ख्या or आख्या or प्रख्या, दृढोक्तिं कृ.—(Make a solemn declaration expressive of dissent or opposition) अस्वीकारसूचकं दृढवाक्यं वद् or दृढवादं कृ or दृढनिषेधं कृ, असम्मतिसूचकां दृढोक्तिं कृ, विरोधसूचकां दृढप्रतिज्ञां कृ, दृढोक्तिपूर्व्वम् अस्वीकारं ख्या in caus. or ज्ञा in caus., दृढनिश्चयपूर्व्वं or दृढप्रतिज्ञापूर्व्वम् असम्मतिं ज्ञा in caus. or प्रकाश् (c. 10. -काशयति -यितुं), दृढोक्तिपूर्व्वं निषेधं कृ, दृढवाक्यपूर्व्वं न सम्मन्ये or न स्वीकरोमि इति वद्, दृढोक्तिपूर्व्वं मतान्तरं ख्या or प्रकाश्, दृढप्रतिज्ञापूर्व्वं न सम्मन् or विपरीतं मन् or अन्यथा मन्.—(In writing) असम्मतिलेखं प्रकाश्, अस्वीकारपत्रं प्रकाश्.

PROTEST, *s.* अस्वीकारसूचकं दृढनिषेधवाक्यं, असम्मतिसूचकं दृढविरोधवाक्यं, अस्वीकारवादः, दृढोक्तिपूर्व्वो निषेधः, दृढप्रतिज्ञापूर्व्वो निषेधः, दृढनि-

Digitized by Google

श्चयपूर्व्वम् अस्वीकारप्रकाशनं, दृढप्रतिज्ञापूर्व्वम् असम्मतिप्रकाशनं, दृढोक्तिपूर्व्वं मतान्तरख्यापनं or असम्मतिख्यापनं or विपरीतमतख्यापनं, दृढनिश्चयपूर्व्वम् अस्वीकारवाक्यं or असम्मतिवाक्यं or अनङ्गीकारवाक्यं. —(In writing) दृढनिषेधसूचकं or दृढविरोधार्थकम्, अस्वीकारपत्रं or असम्मतिपत्रं or अनङ्गीकारपत्रं.

PROTESTANT, *s.* असम्मतः, अस्वीकारवादी *m.* (न्), अस्वीकर्त्ता *m.* (र्त्तृ), रोमीयमतविरोधी *m.* (न्), रोमीयमतविरुद्धः, रोमीयधर्म्मासम्मतः.

PROTESTATION, *s.* (Solemn declaration) दृढोक्तिः *f.*, दृढवाक्यं, दृढवादः, दृढप्रतिज्ञापूर्व्वो वादः, दृढभाषणं, दृढप्रतिज्ञापूर्व्वं भाषणं. *See* PROTEST.

PROTEUS, *s.* (Taking any shape at will) कामरूपी *m.* (न्), कामरूपः, छद्मरूपी *m.*, छद्मरूपः, टुः *m.*

PROTOTYPE, *s.* मूलरूपं, मूलप्रतिमा, मूलमूर्त्तिः *f.*, आदर्शः, मूलादर्शः, मूलं, प्रतिरूपं, प्रतिकृतिः *f.*, प्रत्युपमा -मानं, प्रतिमूर्त्तिः *f.*

To PROTRACT, *v. a.* (Lengthen) दीर्घीकृ, द्राघ (nom. द्राघयति -यितुं). *See To* PROLONG, LENGTHEN.—(Delay) विलम्ब्. *See* the word.

PROTRACTED, *p. p.* दीर्घः -र्घा -र्घं, द्राघिमवान् -वती -वत् (त्), विलम्बितः -ता -तं, चिरायितः &c., चिरस्थः -स्था -स्थं, चिरस्थितः -ता -तं; 'sound,' प्लुतः -तं.

PROTRACTION, *s.* दीर्घीकरणं, द्राघिमा *m.* (न्), दीर्घता, विलम्बः -म्बनं.

To PROTRUDE, *v. a.* (Thrust forward) प्रसृ (c. 10. -सारयति -यितुं), वहिःसृ, वहिर् निःसृ, वहिर् गम् (c. 10. गमयति -यितुं), प्रसारणंकृ.

To PROTRUDE, *v. n.* वहिः सृ (c. 1. सरति, सर्त्तुं), प्रसृ, वहिर् निःसृ, वहिर् गम् (c. 1. गच्छति, गन्तुं), वहिर् भू, वहिःस्था, वहिर् वृत्, अतिवृत्, अतिक्रम्, उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, उद्भेदं कृ, प्रलम्ब्, वहिर् लम्ब्. *See To* PROJECT, *v. n.*

PROTRUDED, *p. p.* वहिर्गतः -ता -तं वहिःसृतः &c., वहिर्भूतः -ता -तं, वहिःस्थितः &c., वहिर्वेष्टितः &c., निःसारितः &c., वहिःसारितः &c., वहिर् निःसारितः &c., प्रसृतः &c., प्रसारितः &c., उद्भिन्नः -न्ना -न्नं, प्रोद्भिन्नः &c.

PROTRUDING, *part.* वहिःस्थः -स्था -स्थं, वहिर्वेष्टी -ष्टिनी -ष्टि (न्), वहिर्गतः -ता -तं, वहिर्लम्बः &c. *See* PROJECTING.

PROTRUSION, *s.* वहिर्वेष्टनं, वहिःसरणं, उद्भेदः, प्रोद्भेदः. *See* PROJECTION.

PROTUBERANCE, *s.* (Tumour, prominence) स्फोटः, विस्फोटः, गुल्मः, गण्डः -ण्डिका, शोथः, आभोगः, उन्नतिः *f.*, प्रलम्बता. *See* PROJECTION.

PROTUBERANT, *a.* उन्नतः -ता -तं, प्रलम्बः -म्बा -म्बं, वहिर्लम्बः &c., गुल्मी -ल्मिनी -ल्मि (न्), आभोगी &c., वृहत्तिवेशः -शा -शं. *See* PROJECTING.

To PROTUBERATE, *v. n.* उन्नतः -ता -तं भू, प्रलम्ब्, वहिर्लम्ब्. *See To* PROJECT, *v. n.*

PROUD, *a.* गर्व्वितः -ता -तं, गर्व्वी -र्व्विणी -र्व्वि (न्), सगर्व्वः -र्व्वा -र्व्वं, गर्व्वरः -रा -रं, गर्व्ववान् -वती -वत् (त्), गर्व्वितचित्तः -त्ता -त्तं, दृप्तः -प्ता -प्तं, सदर्पः -र्पा -र्पं, दर्पवान् &c., दृप्तः -प्ता -प्तं, दर्पी &c., मानी &c., मानवान् &c., अभिमानी &c., अभिमानवान् &c., साभिमानः -ना -नं, अहङ्कारी &c., अहङ्कारवान् &c., अहंयुः -युः -यु, साहङ्कारः -रा -रं, अहम्मानी &c., प्रगल्भः -ल्भा -ल्भं, उद्धतः -ता -तं, उद्धतचित्तः -त्ता -त्तं, उद्धतमनाः -नाः -नः (स्), समुद्धतः &c., प्रौढः -ढा -ढं, उत्तब्धः -ब्धा -ब्धं, उत्तब्धचेताः &c., समुत्तब्धः &c., साटोपः -पा -पं, आटोपी &c., उत्सिक्तः -क्ता -क्तं, उन्नतशिरस्कः -स्का -स्कं, उन्नतमनस्कः &c., समुन्नतचित्तः &c., ऊर्द्धदृष्टिः -ष्टिः -ष्टि, सवलिप्तः -प्ता -प्तं, दर्पेष्मातः &c., सावहेलः -ला -लं, प्रभृष्टः -ष्टा -ष्टं; 'proud of one's beauty,' रूपगर्व्वितः -ता -तं, रूपाभिमानी &c.; 'of one's birth,' कुलाभिमानी &c.; 'of one's learning,' पाण्डित्याभिमानी &c., पण्डितम्मन्यः -न्या -न्यं; 'of the body,' देहमानी &c.; 'to be proud,' गर्व् (c. 1. गर्व्वति -र्व्वितुं, c. 10. गर्व्वयते -यितुं), गर्व्वितः &c. भू, सगर्व्वीभू, दृप् (c. 4. दृप्यति, दर्म्मुं, द्रप्तुं), मन् (c. 4. मानयते -यितुं), प्रगल्भ् (c. 1. -गल्भते -ल्भितुं); 'to render proud,' दृप् (c. 10. दर्पयति -यितुं), गर्व्वितं -तां कृ.

PROUDLY, *adv.* सगर्व्वं, सदर्पं, समानं, साभिमानं, साहङ्कारं, साटोपं, सोन्माथं, गर्व्वितं, उन्नतचेतसा, सावहेलं, सावलेपं, गर्व्वितवत्, दृप्तवत्, प्रगल्भवत्.

PROVABLE, *a.* प्रमेयः -या -यं, साधनीयः &c., साध्यः -ध्या -ध्यं, उपपादनीयः &c., उपपाद्यः -द्या -द्यं, प्रतिपाद्यः &c., प्रतिपादनीयः &c., समर्थनीयः &c., सूच्यः -च्या -च्यं.

To PROVE, *v. a.* (Establish as truth) साध् (c. 10. साधयति -यितुं), सिद्धीकृ, प्रमाण (nom. प्रमाणयति -यितुं), प्रमाणीकृ, सप्रमाणं -णां कृ, उपपद् (c. 10. -पादयति -यितुं), प्रतिपद्, विभू (c. 10. -भावयति -यितुं), भू, निर्णी (c. 1. -णयति -णेतुं), सत्याकृ, सत्यीकृ; 'by testimony or other evidence,' साक्षिणा or साक्ष्येण or प्रमाणेन साध् or भू or उपपद्.—(Evince, demonstrate) सूच् (c. 10. सूचयति -यितुं), दृश् (c. 10. दर्शयति -यितुं), अभिदृश्, अनुदृश्, निर्दिश् (c. 6. -दिशति -देष्टुं), विनिर्दिश्, प्रदिश्, निर्णी, समर्थ् (c. 10. -अर्थयति -यितुं), प्रकाश्. —(Try, ascertain, bring to the test) परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ, निरूप्, ज्ञा in des., निर्णी, निश्चि, अनुभू, प्रतीतिं कृ.—(Experience) अनुभू, अनुभवं कृ, अनुभूतिं कृ.

To PROVE, *v. n.* (Be found, turn out) सम्भू (c. 1. -भवति -वितुं), सम्पद् (c. 4. -पद्यते -पत्तुं), उत्पद्, उपपद्, विद् in pass. (विद्यते), सिध् (c. 4. सिध्यति -ते), आपत् (c. 1. -पतति -तितुं), संवृत्, वृत्.—(Be ascertained or shown to be true) निर्णी in pass. (-णीयते), निश्चि in pass. (-चीयते), सूच् in pass. (सूच्यते), अनुभू in pass. (-भूयते), विभू, प्रमाणीभू, प्रती in pass. (-ईयते).

PROVED, *p. p.* (Established as true) सिद्धः -द्धा -द्धं, साधितः -ता -तं, उपपादितः &c., उपपन्नः -न्ना -न्नं, प्रमाणितः -ता -तं, प्रमाणीकृतः &c., भावितः &c., विभावितः &c., प्रतिपादितः &c., प्रमितः -ता -तं.—(Evinced, demonstrated) सूचितः -ता -तं, दर्शितः &c., निर्दिष्टः -ष्टा -ष्टं, निर्णीतः -ता -तं, समर्थितः &c.—(Tested, ascertained) परीक्षितः -ता -तं, निरूपितः -ता -तं, निश्चितः &c., निर्णीतः &c., अनुभूतः &c., प्रतीतः -ता -तं; 'thing to be proved,' साध्यं, प्रमेयं; 'proved by evidence,' साक्षिभावितः &c., साक्ष्यसिद्धः &c.

PROVENDER, *s.* पाथेयं, यात्रिकं, शस्यलं, सस्यलः -लं, खाद्यद्रव्यं, भक्ष्यद्रव्यं, पश्वादिखाद्यद्रव्यं, शुष्कतृणादि *n.*, शुष्कयासादि, मासादि, शस्यादि.

PROVER, *s.* उपपादकः, सिद्धिकर्त्ता *m.* (र्त्तृ), साधकः, प्रमाता *m.* (तृ), प्रतिपादकः, उपपत्तिकारी *m.* (न्), प्रतिपत्तिकारकः, निर्णेता *m.*, विभावकः.

PROVERB, *s.* लोकवाक्यं, लोकोक्तिः *f.*, प्राचीनवाक्यं, पुराणवाक्यं, लोकप्रचलितवाक्यं, वाक्यं, वचनं, वाक् *f.* (च्), सूत्रं, प्राचीनसूत्रं, पुराणसूत्रं, उपमानं, उपदेशवाक्यं, उपदेशसूत्रं, न्यायः, न्यायवाक्यं.

PROVERBIAL, *a.* (Mentioned in a proverb) प्राचीनसूत्रप्रोक्तः -क्ता -क्तं, पुराणसूत्रप्रोक्तः &c., लोकप्रोक्तः &c., लोकोक्तः &c.—(Comprised in a proverb, current as one) प्राचीनसूत्ररूपः -पा -पं, पुराणसूत्ररूपः &c., लोकप्रसिद्धः -द्धा -द्धं, लोकप्रचलितः -ता -तं, लोकप्रचलः -ला -लं, न्यायरूपः &c., न्यायप्रसिद्धः &c.

PROVERBIALLY, *adv.* लोकप्रसिद्धं, जनप्रसिद्धं, प्राचीनसूत्रानुसारेण.

To PROVIDE, *v. a.* (Procure or prepare beforehand) अग्रे or पूर्व्वं कृप् (c. 10. कल्पयति -यितुं) or उपकृप् or परिकृप् or सम्प्रकृप् or

Digitized by Google

सोपकारद्रव्याणि कॢप् or विधा or उपस्था in caus. or उपपद् in caus. or सम्भृ or पुरस्कृ or प्रस्तुतीकृ or निर्मा, अग्रे द्रव्यपरिकल्पनं कृ or द्रव्यसम्भारं कृ or उपकरणसम्भारं कृ or द्रव्यसामग्र्यं परिकॢप्. *See To* PREPARE.—(Make a previous stipulation) पूर्वनियमं कृ, पूर्वपणं कृ, पूर्वसन्धिं कृ, पूर्वसङ्केतं कृ, पूर्वप्रतिज्ञां कृ.—(Provide against or for) expressed by some of the above roots in conjunction with अर्थं or अर्थे in comp.; 'to provide necessaries against a time of want,' आपदर्थं द्रव्याणि सम्भृ or आपदर्थे द्रव्यसम्भारं कृ; 'to provide thick clothing against the cold,' शीतनिवारणार्थं स्थूलवस्त्राणि कॢप्; 'to provide for another,' परार्थं प्रयोजनीयद्रव्याणि परिकॢप् or परं प्रयोजनीयद्रव्ययुक्तं कृ; 'to provide for another comfortably,' परस्वास्थ्यं कृ or जन्, परसुस्थतां कृ, परं सुस्थं कृ; 'to provide for, take measures against,' पूर्वोपायं कृ, अग्रे उपायं कृ, पूर्वोपायं प्रयुज्, उपायप्रयोगं कृ.

PROVIDED, *p. p.* (Furnished or prepared beforehand) अग्रे परिकल्पितः -ता -तं or परिकॢप्तः -प्ता -प्तं or उपकॢप्तः -प्ता -प्तं or सम्प्रकॢप्तः &c. or कल्पितः -ता -तं, पूर्वं सम्भृतः -ता -तं or युक्तः -क्ता -क्तं or समायुक्तः &c. or संयुक्तः &c. or अन्वितः -ता -तं or समन्वितः &c. or उपेतः &c. or संहितः &c. or निर्मितः -ता -तं; 'provided for,' प्रयोजनीयद्रव्ययुक्तः -क्ता -क्तं, सर्वसोपकारद्रव्ययुक्तः &c., जातस्वास्थ्यः -स्थ्या -स्थ्यं, अन्नवस्त्रयुक्तः &c.—(Stipulated previously) पूर्वनियमितः -ता -तं, पूर्वपणितः &c., पूर्वसङ्केतितः &c.; 'provided that, with this condition,' पूर्वनियमे कृते, पूर्वसङ्केते कृते, एतेन सन्धिना.

PROVIDENCE, *s.* (Fore-sight, fore-thought) पूर्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, दूरदृष्टिः *f.*, दूरदर्शनं, दीर्घदृष्टिः *f.*, दीर्घदर्शनं, पूर्वचिन्ता, अग्रचिन्ता, पूर्वविवेचनं, पूर्वविचारः -रणं -णा, अग्रविचारः, भविष्यद्दर्शनं, भविष्यच्चिन्ता, भाविचिन्ता, भाविकालावलोकनं, पूर्वविमर्शः, प्रसमीक्षा.—(The providence of God) ईश्वरानुसन्धानं, ईश्वरविधिः *m.*, ईश्वरविधानं.—(Divine Providence himself) विधाता *m.* (तृ), धाता *m.*, अनागतविधाता *m.*, भविष्यद्विधाता *m.*, विधिः *m.*, ईश्वरः, परमेश्वरः.

PROVIDENT, *a.* दीर्घदर्शी -र्शिनी -र्शि (न्), दूरदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, दूरदृष्टिः &c., परिणामदर्शी &c., अग्रदर्शी &c., भविष्यद्दर्शी &c., अनागतदर्शी &c., भविष्यच्चिन्तकः -का -कं, भाविचिन्तकः &c., पूर्वविचारी &c., पूर्वविवेकी &c., अनारब्धः -ब्धा -ब्धं.

PROVIDENTIAL, *a.* ईश्वरकृतः -ता -तं, ईश्वरविहितः &c., ईश्वरानुसन्धानप्रयुक्तः -क्ता -क्तं, ईश्वरविधानप्रयुक्तः &c., विधातृकृतः -ता -तं, विधातृसिद्धः -द्धा -द्धं, ईश्वरसिद्धः &c.

PROVIDENTIALLY, *adv.* ईश्वरविधानेन, ईश्वरविधिना, ईश्वरानुसन्धानात्, दिष्ट्या.

PROVIDENTLY, *adv.* दीर्घदृष्ट्या, अग्रदर्शनात्, परिणामदर्शनात्, भविष्यद्दर्शनात्, चिन्तापूर्वं, विवेचनापूर्वं, पूर्वविचारेण, पूर्वविचारं कृत्वा, पूर्वविवेचनं कृत्वा, प्रसमीक्ष्य, प्रविमृश्य.

PROVIDER, *s.* परिकल्पकः, उपकल्पकः. *See* PROCURER, &c.

PROVINCE, *s.* (Division of a kingdom) मण्डलं, चक्रं, देशः, प्रदेशः, विषयः, राष्ट्रं, निगमः, ग्रामशतं; 'governor of a province,' मण्डलेश्वरः, मण्डलपतिः *m.*, मण्डलाध्यक्षः, मण्डलाधिपतिः *m.*, माण्डलिकः.—(Peculiar office or business) स्वधर्मः, स्वकर्म *n.* (न्), कर्म *n.*, कार्यं, अधिकारः, प्रकरणं, क्रिया, नियोगः, निबन्धनं; 'woman's province,' स्त्रीधर्मः, स्त्रीनिबन्धनं.—(Department of science, &c.) प्रकरणं, देशः, अङ्गं, विषयः.

PROVINCIAL, *a.* दैशिकः -की -कं, देशीयः -या -यं, प्रदेशीयः &c., देश्यः -श्या -श्यं, देशी -शिनी -शि (न्), माण्डलिकः -की -कं, मण्डलसम्बन्धी &c., राष्ट्रिकः -की -कं, राष्ट्रीयः -या -यं, देश in comp., ग्रामीयः -या -यं, ग्राम्यः -म्या -म्यं, जानपदः -दी -दं.

PROVINCIAL, *s.* देशस्थः, देशजः, देशवासी *m.* (न्), ग्रामस्थः, ग्राम्यजनः.

PROVINCIALISM, *s.* देशभाषा, प्रदेशिकभाषा, ग्रामीयभाषा, ग्रामिकभाषा.

PROVISION, *s.* (Act of providing) उपकल्पनं, परिकल्पनं, कल्पनं, सम्भारः, विधानं, उपस्थापनं, उपपादनं, प्रस्तुतीकरणं.—(Measures taken beforehand) पूर्वोपायः, अग्रोपायः, उपायः, पूर्वकल्पना, पूर्वविधानं; *see* PREPARATION.—(Store or stock collected) सम्भारः, संग्रहः, सञ्चयः, सञ्चितं, सामग्री -ग्र्यं, साहित्यं; 'provision of victuals,' अन्नसम्भारः, अन्नसंग्रहः, खाद्यद्रव्यसामग्री; 'of materials,' द्रव्यसामग्री, उपकरणसामग्री, उपकरणसम्भारः.—(Victuals, provisions) अन्नं, भोजनं, भोज्यं, भक्ष्यं, आहारः, खाद्यद्रव्यं, भक्ष्यद्रव्यं, पाथेयं, याचिकं, निर्वाहः, शष्कलं, सष्कलः -लं; 'furnished with provisions,' खाद्यद्रव्ययुक्तः -क्ता -क्तं, पाथेयवान् -वती -वत् (त्).—(Previous stipulation) पूर्वनियमः, पूर्वसन्धिः *m.*, पूर्वसङ्केतः, पूर्वप्रतिज्ञा, पूर्वपणः, पूर्वसमयः, *See* PROVISO.

To PROVISION, *v. a.* (Furnish with provisions) खाद्यद्रव्ययुक्तं -क्तां कृ, खाद्यद्रव्याणि सम्भृ or उपकॢप्, खाद्यद्रव्यसम्भारं कृ, अन्नसम्भारं कृ, खाद्यद्रव्यसम्भृतं -तां कृ.

PROVISIONAL, *a.* आपाततः स्थापितः -ता -तं, आपाततो नियोजितः -ता -तं, सामयिकः -की -कं, प्रासङ्गिकः &c., समयोपयोगी -गिनी -गि (न्), समयानुरूपः -पा -पं, अल्पकालीनः -ना -नं.

PROVISIONALLY, *adv.* आपाततस्, यथासमयं, यथाप्रयोजनं, अल्पकालमात्रं.

PROVISIONARY, PROVISORY, *a.* *See* PROVISIONAL.

PROVISO, *s.* उपनियमः, प्रकरणं, नियमप्रकरणं, सङ्केतः, उपसङ्केतः, प्रतिबन्धः, अनुबन्धः, नियमानुबन्धः, नियमपत्रानुबन्धः, नियमपत्राङ्गं, नियमपत्रखण्डः, नियमपत्रावयवः, नियमैकदेशः; 'to annex one,' अर्थान्तरोपन्यासं कृ.

PROVISORY, *a.* (Conditional) साङ्केतिकः -की -कं, सप्रतिबन्धः -न्धा -न्धं.

PROVOCATION, *s.* (Act of exciting anger) प्रकोपः -पणं, क्रोधकरणं, कोपकरणं, क्रोधोत्पादनं, कोपोत्पादनं, क्रोधोद्दीपनं, क्रोधोत्तेजनं.—(Cause of anger) कोपकारणं, क्रोधकारणं, कोपहेतुः *m.*—(Act of exciting) उत्तेजनं, उद्दीपनं, उद्बोधनं, प्रवर्तनं.

PROVOCATIVE, *a.* उद्दीपकः -का -कं, अग्निवर्धकः &c., क्षुधाजनकः &c.

PROVOCATIVE, *s.* अग्निवर्धनं, रोचकः -कं, रूचकं, प्ररोचनं, खजिका.

To PROVOKE, *v. a.* (Excite to anger) प्रकुप् (c. 10. -कोपयति -यितुं), कुप्, क्रुध् (c. 10. क्रोधयति -यितुं), कोपं or क्रोधं जन् or उत्पद् or उद्दीप् or उत्पद् (c. 10. -पादयति -यितुं), कोपोत्पादनं कृ, क्रोधोत्तेजनं कृ, क्रोधोद्दीपनं कृ.—(Excite) उद्दीप् (c. 10. -दीपयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं), उत्तप् in caus., प्रवृत् in caus., प्ररुच् in caus.—(Challenge) आह्वे, समाह्वे, उपाह्वे.

PROVOKED, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः &c., कुपितः &c., कोपितः &c., उपजातकोपः -पा -पं, जातकोपः &c., इद्धमन्युः -न्युः -न्यु, इद्धक्रोधः -धा -धं, उद्दीप्तमन्युः &c., कोपदीप्तः -प्ता -प्तं, उत्पन्नमन्युः &c., उत्तेजितः -ता -तं, उद्दीपितः &c., उत्तापितः &c., उत्तप्तः -प्ता -प्तं, सन्तप्तः &c., सन्तापितः &c.

PROVOKING, *part.* or *a.* प्रकोपजनकः -का -कं, कोपजनकः &c., क्रोधजनकः &c., प्रकोपकः -का -कं, क्रोधोत्पादकः &c., क्रोधोद्दीपकः &c., कोपोद्दीपकः &c., क्रोधोत्तेजकः &c., उत्तेजकः &c., उद्दीपकः &c., उद्बोधकः &c.

Digitized by Google

PROVOKINGLY, *adv.* यथा कोपो जायते तथा, यथा क्रोध उद्दीप्यते तथा.

PROVOST, *s.* अध्यक्षः, अधीशः, अधिकारी *m.* (न्), अधिपतिः, श्रेष्ठी *m.*

PROW, *s.* नौकाग्रं, नौकाग्रभागः, नौपूर्व्वभागः, नौकोदग्रभागः.

PROWESS, *s.* पराक्रमः, विक्रमः, सुविक्रमः, शौर्य्यं, वीर्य्यं, सुवीर्य्यं, रणशौर्य्यं, रणोत्साहः, पौरुषं, कृतपौरुषं, अतिशक्तिता, जनौजस् *n.*, प्रौढिः *f.*, कर्म्मोदारं; 'personal prowess,' बाहुवीर्य्यं; 'gained by one's own prowess,' स्वहस्तार्जितः -ता -तं, स्वभुजोपार्जितः &c.; 'man of great prowess,' सुपराक्रमी *m.* (न्), सुविक्रमी *m.*, पराक्रान्तः, अतिशक्तिमान् *m.* (त्); 'to show prowess,' पराक्रम् (c. 1. -क्रामति -क्रमति -मितुं), विक्रम्.

To PROWL, *v. n.* मांसार्थं or आमिषार्थं भ्रम् (c. 4. भाम्यति, भ्रमितुं) or परिभ्रम्, मांसान्वेषणार्थं भ्रम् or पर्य्यट् (c. 1. -अटति -टितुं).

PROWLER, *s.* मांसार्थं भ्रमणकारी *m.* (न्) or परिभ्रमणकारी *m.*, परिभ्रमी *m.*

PROWLING, *s.* मांसार्थं or मांसान्वेषणार्थं भ्रमणं or परिभ्रमणं or पर्य्यटनं.

PROXIMATE, *a.* समीपः -पा -पं, निकटः -टा -टं, समीपस्थः -स्था -स्थं, निरन्तरः -रा -रं, सन्निहितः -ता -तं, निरन्तरालः -ला -लं, उपस्थः -स्था -स्थं, उपस्थायी -यिनी -यि (न्), आसन्नः -न्ना -न्नं, अन्तिकः -का -कं, उपश्लिष्टः -ष्टा -ष्टं, संसक्तः -क्ता -क्तं, सन्निकृष्टः -ष्टा -ष्टं, समीपगः &c. *See* NEAR, NEXT; 'proximate cause,' उपादानकारणं, उपादानं.

PROXIMATELY, *adv.* समीपतस्, सन्निहितं, सन्निकृष्टं, निरन्तरालं, अनन्तरालं.

PROXIMITY, *s.* समीपता, सामीप्यं, सन्निकर्षः, सन्निकृष्टता, सन्निधिः *m.*, सान्निध्यं, सन्निधानं, सन्निधं, अन्तिकं -कता, उपस्थानं, उपस्थितिः *f.*, नैकट्यं, प्रत्यासत्तिः *f.*, प्रत्यासन्नता, संसक्तिः *f.*, संसर्गः, उपश्लेषः, आनन्तर्य्यं, तादृस्थ्यं. *See* NEARNESS.

PROXY, *s.* (Agency of another who acts as substitute) प्रतिनिधित्वं -ता.—(Person who acts) प्रतिनिधिः *m.*, प्रतिपुरुषः, प्रतिहस्तः -स्तकः; 'by proxy,' प्रतिनिधिद्वारा, प्रतिनिधिद्वारेण; 'one who signs a paper by proxy,' लेखनिकः.

PRUDE, *s.* मिथ्याविनीता, अत्यन्तविनयनिष्ठा, विनयाभिमानिनी, अतिविनीताम्मन्या, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, अत्याचारिणी, अत्याचारसेविनी, सुव्रीडिताम्मन्या, अतिविनयसेविनी, अत्यन्तविनीता.

PRUDENCE, *s.* पूर्व्वविचारः -रणा, परिणामदृष्टिः *f.*, पूर्व्वसमीक्षा, प्रसमीक्षा, समीक्षा -क्षणं, समीक्ष्यकारिता -त्वं, विमृश्यकारिता, परिणामदर्शनं, दीर्घदृष्टिः, सदसद्दर्शनं, सदसद्विवेकः, विनयः, विनीतता, नीतिः *f.*, नीतिज्ञता, प्राज्ञता, प्रज्ञता, विज्ञता, विवेकः, मनस्विता, विचारशीलता, पूर्व्वापरविचारः, मतिमत्त्वं, बुद्धिः *f.*, मनीषा, हिताहितविवेकः, पूर्व्वचिन्ता, चिन्ता, कार्य्यचिन्ता, परिवेदना, सावधानता, पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, विमर्शः, विवेचना, पूर्व्वविवेचना.

PRUDENT, *a.* परिणामदर्शी -र्शिनी -र्शि (न्), पूर्व्वविचारशीलः -ला -लं, दीर्घदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, समीक्ष्यकारी -रिणी &c., विमृश्यकारी &c., समीक्षाकारी &c., प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः &c., विज्ञः &c., मनस्वी -स्विनी &c., मतिमान् -मती -मत् (त्), बुद्धिमान् &c., प्रज्ञावान् &c., मनीषी -षिणी &c., परिवेदी -दिनी &c., परिवेदकः -का -कं, बुधः -धा -धं, सुबोधः -धा -धं, विनीतः &c., विनयवान् &c., नीतिमान् &c., नीतिज्ञः -ज्ञा -ज्ञं, पूर्व्वापरविचारी &c., विचारशीलः -ला -लं, सदसद्दर्शी &c., सदसद्विवेकी &c., दूरदर्शी &c., हिताहितविवेकी &c., पूर्व्वचिन्तकः -का -कं, पूर्व्वचिन्ताशीलः &c., कार्य्यचिन्तकः &c., धीरः -रा -रं, सावधानः -ना -नं, कृतावधानः -ना -नं, कृतधीः -धीः -धि, प्रयतः -ता -तं.

PRUDENTIAL, *a.* पूर्व्वविचारप्रयुक्तः -क्ता -क्तं, पूर्व्वसमीक्षाप्रयुक्तः &c., प्रसमीक्षाप्रयुक्तः &c., सविचारः -रा -रं, सविवेकः -का -कं.

PRUDENTLY, *adv.* सविचारं, समीक्षापूर्व्वं, प्रसमीक्ष्य, सुसमीक्ष्य, सुविमृश्य, परिणामदर्शनात्, परिणामदृष्ट्या, पूर्व्वविचारेण, सावधानं, सपरिवेदनं, प्राज्ञवत्, विज्ञवत्.

PRUDERY, *s.* मिथ्याविनयः, मिथ्यालज्जा, एकान्तविनयः, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, अत्याचारनिष्ठा, विनयाभिमानं, अतिसूक्ष्मशीलता, अतिसूक्ष्मता, अतिविनीतता.

PRUDISH, *a.* मिथ्याविनीतः -ता -तं, एकान्तविनीतः &c., अत्यन्तविनीतः &c., अतिसूक्ष्मः -क्ष्मा -क्ष्मं, विनयाभिमानी -निनी &c. *See* PRUDE, *s.* PRECISE, *a.*

To PRUNE, *v. a.* क्षुद्रपल्लवान् or निरर्थकविटपान् अवच्छिद् (c. 7. -च्छिनत्ति -च्छेत्तुं) or अवकृत् (c. 6. -कृन्तति -कर्त्तितुं) or लू (c. 9. लुनाति लवितुं) or लुप् (c. 6. लुम्पति, लोप्तुं).

PRUNED, *p. p.* छिन्नपल्लवः -वा -वं, छिन्नविटपः -पा -पं, लूनविटपः &c.

PRUNER, *s.* विटपच्छिद् *m.*, पल्लवच्छिद् *m.*, निरर्थकविटपच्छेत्ता *m.* (तृ).

PRUNING, *s.* पल्लवावच्छेदः, विटपावच्छेदः, निरर्थकविटपावकर्त्तनं.

PRUNING-HOOK, PRUNING-KNIFE, *s.* पल्लवच्छेदनी, विटपच्छेदनी, पल्लवकर्त्तनी.

PRURIENCE, PRURIENCY, *s.* कण्डूतिः *f.*, कण्डूः *f.*, कण्डुः *f.*, कण्डूया, कण्डूयनं.—(Longing desire for any thing) अतिस्पृहा, अत्यन्तस्पृहा, अतिशयेच्छा, अत्यभिलाषः.

PRURIENT, *a.* कण्डूलः -ला -लं, कण्डूतिमान् -मती -मत् (त), सकण्डूतिः -तिः -ति.

PRURIGO, *s.* कण्डूः *f.*, कण्डुः *f.*, खर्ज्जूः *f.*, कच्छूः *f.*, कच्छुः *f.*, सुकण्डुः *f.*

To PRY, *v. a.* सूक्ष्मं निरूप् (c. 10. -रूपयति -यितुं), सूक्ष्मं निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or दृश् (c. 1. पश्यति, द्रष्टुं), सूक्ष्मदर्शनं कृ, सूक्ष्मम् अन्विष् (c. 4. -इष्यति -एषितुं) or अनुसन्धा (c. 3. -दधाति -धातुं), सूक्ष्मान्वेषणं कृ, सूक्ष्मानुसन्धानं कृ, सूक्ष्मं चर्च् (c. 1. चर्चति -चितुं), सूक्ष्मचर्चां कृ, चर्चां कृ, अनधिकारचर्चां कृ, मर्म्मान्वेषणं कृ, सूक्ष्मगवेषणं कृ, मर्म्मगवेषणं कृ.

PRYING, *s.* सूक्ष्मनिरूपणं, सूक्ष्मनिरीक्षणं, सूक्ष्मदर्शनं, सूक्ष्मदृष्टिः *f.*, सूक्ष्मान्वेषणं, सूक्ष्मानुसन्धानं, सूक्ष्मचर्चा, अनधिकारचर्चा, चर्चा, मर्म्मान्वेषणं,

PSALM, *s.* गीतं, स्तुतिगीतं, गानं, स्तुतिगानं, स्तोत्रं, सङ्गीतं, सद्गीतं, ईश्वरस्तुतिगीतं, भक्तिगीतं, भक्तिगानं, धर्म्मगीतं.

PSALMIST, *s.* गीतरचकः, स्तुतिगीतरचकः, स्तोत्ररचकः, गीतकारः, गीतकविः *m.*

PSALMODY, *s.* स्तुतिगानं, स्तोत्रगानं, स्तोत्रगीतिः *f.*, ईश्वरस्तुतिगानं.

PSALMOGRAPHY, *s.* गीतरचनं, स्तुतिगीतरचनं, स्तोत्ररचनं, गीतकरणं.

PSALTER, *s.* गीतपुस्तकं, गीतसंहिता, गीतसंहारः, स्तोत्रपुस्तकं, खिलं.

PSEUDO. A prefix expressed in Sanskrit by मिथ्या, मृषा, कृत्रिम, कु &c. prefixed, or कल्प, देशीय &c. affixed; as, 'a pseudo-poet,' मिथ्याकविः *m.*, कुकविः, कविकल्पः, कविदेशीयः; pseudology,' मिथ्यावादः, मृषावादः; 'pseudo-morphous,' कृत्रिमरूपः -पा -पं; 'pseudonymous,' कृत्रिमनामा &c.

PSHAW, *exclam.* धिक्, थै, अवे, अरे, रै, कित्, हुम्, अपैहि.

PSYCHOLOGICAL, *a.* आत्मतत्त्वविषयः -या -यं, अध्यात्मविषयकः -का -कं.

PSYCHOLOGY, *s.* आत्मतत्त्वविद्या, अध्यात्मविद्या, अध्यात्मशास्त्रं.

PUBERTY, PUBESCENCE, *s.* यौवनं, यौवनावस्था, तारुण्यं, तारुण्यावस्था, तरुणत्वं, युवत्वं, यौवनकालः, प्रौढता, प्रौढिः *f.*, प्रौढदशा; 'attained to puberty,' प्राप्तयौवनः -ना -नं, प्राप्तयौवनकालः -ला -लं; 'not attained to it,' अप्राप्तयौवनः &c.

PUBESCENT, *a.* प्राप्तयौवनः -ना -नं, अङ्कुरितयौवनः &c., प्राप्ततारुण्यः -ण्या -ण्यं.

Digitized by Google

PUBLIC, *a.* (Pertaining to the community) सर्व्वसम्बन्धी -न्धिनी -न्धि (न्), सर्व्वलोकसम्बन्धी &c., प्रजासम्बन्धी &c., लोक in comp., प्रजा in comp. (General, common to many,) साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, सर्व्वसाधारणः &c., सर्व्वसामान्यः &c., सार्व्वलौकिकः -की -कं, लौकिकः &c., सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, सर्व्वजनीयः -या -यं, विश्वजनीनः &c., विश्वजनीयः -या -यं, सर्व्वः -र्व्वा -र्व्वं, सार्व्वः -र्व्वी -र्व्वं, सर्व्वीयः -या -यं, लोक or जन in comp., (Commonly known or current) प्रसिद्धः -द्धा, लोकप्रसिद्धः &c., सर्व्वप्रसिद्धः &c., जनप्रसिद्धः &c., सर्व्वजनप्रसिद्धः &c., सर्व्वलोकप्रसिद्धः &c., जगत्प्रसिद्धः &c., देशप्रसिद्धः &c., लोकविश्रुतः -ता -तं, सर्व्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं, लोक or जन in comp., *see* POPULAR.—(Open to all) प्रकाशः -शा -शं, सर्व्वप्रकाशः &c., सर्व्वलोकप्रकाशः &c., प्रकटः -टा -टं, सर्व्वप्रकटः &c., लोकप्रकाशः &c., अविविक्तः -क्ता -क्तं; 'public sale,' प्रकाशविक्रयः प्रकाशक्रयः; 'public benefit,' लोकोपकारः; 'public business,' लोकव्यवहारः व्यवहारः; 'public odium,' जनविद्वेषः; 'public property,' गणद्रव्यं; 'public feeling,' लोकचित्तं, प्रकृतिचित्तं.

PUBLIC, *s.* लोकः, सर्व्वलोकः, सर्व्वजनाः *m. pl.*, प्रजा, प्रजालोकः; 'for the benefit of the public,' प्रजार्थं, लोकार्थं, लोकोपकारार्थं; 'in public,' प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, सर्व्वप्रकाशं, लोकसाक्षात्, लोकसम्मुखं; 'in public and in private,' प्रकाशं विविक्तं च, प्रकाशम् एकान्ततश्च; 'regard for the public or public opinion,' लोकलज्जा, जनलज्जा.

PUBLICAN, *s.* (Collector of tribute or toll) करग्रहः, करग्राही *m.* (न्), करसंग्राही *m.*, शुल्कग्राही *m.*—(Retailer of beer and spirits) शौण्डिकः, शुण्डी *m.* (न्), यवसुरादिविक्रयी *m.* (न्) शुण्डादिविक्रेता *m.* (तृ) सुराविक्रयी *m.*

PUBLICATION, *s.* (The act) प्रकाशनं, प्रकटनं, प्रकटीकरणं, प्रसिद्धीकरणं, प्रकाशीकरणं.—(A published book) प्रकाशितपुस्तकं, प्रसिद्धपुस्तकं.

PUBLIC-HOUSE, *s.* शुण्डास्थानं, मद्यस्थानं, पानगोष्ठिका, शुण्डापानं, शुण्डा, मदिरागृहं, मदिराशाला, आपानं, यवसुरादिविक्रयस्थानं, शुण्डादिविक्रयस्थानं, सुराविक्रयस्थानं.

PUBLICITY, *s.* प्रकाशता, लोकप्रकाशता, लोकप्रकाशः, जनप्रकाशः, प्रकाशः, प्राकट्यं, लोकप्राकट्यं, प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, प्रसिद्धता, लोकप्रसिद्धता -त्वं, लोकविश्रुतिः *f.*, विश्रुतिः, जनप्रसिद्धिः *f.*, प्रख्यातिः *f.*, विख्यातिः *f.*, ख्यातिः *f.*, लौकिकता -त्वं, स्फुटता, व्यक्तता, स्पष्टता.

PUBLICLY, *adv.* (Openly, before the world) प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, लोकप्रकाशं, सर्व्वप्रकाशं, प्रसिद्धं, अविविक्तं; 'publicly and privately,' *see* PUBLIC, *s.*—(Without concealment) व्यक्तं, सुव्यक्तं, स्पष्टं, स्फुटं, साक्षात्, प्रादुस्, आविस्, साविष्कारं, अगूढं.

PUBLIC-SPIRITED, PUBLIC-MINDED, *a.* लोकोपकारशीलः -ला -लं, लोकोपकारबुद्धिः -द्धिः -द्धि, लोकार्थबुद्धिः &c., जनार्थबुद्धिः &c., लोकार्थी -र्थिनी -र्थि (न्), जनार्थी &c., लोकहितेच्छुः -च्छुः -च्छु, लोकहितः -ता -तं, सर्व्वजनहितैषी &c., साधारणमङ्गलेच्छुः &c.

PUBLIC-SPIRITEDNESS, *s.* लोकोपकारशीलता, लोकोपकारबुद्धिः *f.*, लोकहितेच्छा.

To PUBLISH, *v. a.* (Make generally known) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), प्रसिद्धीकृ, ख्या in caus. (ख्यापयति -यितुं), प्रख्या, विख्या, आख्या, घुष् (c. 10. घोषयति -यितुं), विघुष्, आघुष्, प्रचर् (c. 10. -चारयति -यितुं), विज्ञा in caus. (-ज्ञापयति -ज्ञपयति -यितुं), बुध् (c. 10. बोधयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), निवेद् (c. 10. -वेदयति -यितुं), विद्, आविष्कृ, प्रादुष्कृ.—(Publish a book) पुस्तकं प्रकाश् or प्रसिद्धीकृ.—(Put into circulation) प्रचलीकृ, प्रचल् (c. 10. -चलयति -यितुं), प्रचर्.

PUBLISHED, *p.p.* प्रकाशितः -ता -तं, प्रकटीकृतः -ता -तं, प्रकटितः -ता -तं, प्रसिद्धीकृतः &c., ख्यापितः -ता -तं, घोषितः &c., विघोषितः &c., आघोषितः &c., विज्ञापितः &c., प्रख्यातः -ता -तं, प्रचलीकृतः &c., प्रचारितः &c., आविष्कृतः &c., प्रादुष्कृतः &c., प्रथितः &c.

PUBLISHER, *s.* प्रकाशकः, प्रकाशयिता *m.* (तृ), ख्यापकः, विज्ञापकः, प्रसिद्धकर्त्ता *m.* (र्त्तृ), आविष्कर्त्ता *m.*, प्रादुष्कर्त्ता *m.*

To PUCKER, *v. a.* संकुच् (c. 1. -कोचति -चितुं), कुच् (c. 1. कुचति -चितुं), आकुच्, संहृ (c. 1. -हरति -हर्त्तुं), पुटीकृ, सम्पुटीकृ, सङ्कोचं कृ.

PUCKER, PUCKERING, *s.* पुटः, पुटीकरणं, सङ्कोचः -चनं, कुचनं, आकुचनं,

PUDDER, *s.* तुमुलं, कोलाहलः, सम्भ्रमः, विप्लवः, व्यग्रता, व्यस्तता.

PUDDING, *s.* वोल्लिका, पोलिका; 'plum-pudding,' *see* the word.

PUDDLE, *s.* वर्ष्मरूकः, पङ्कजलौघः, कर्दमजलौघः, सपङ्कजलौघः, पङ्कजलगुल्मः, मलिनजलौघः, समलजलौघः, पङ्कगुल्मः.

To PUDDLE, *v. a.* समलीकृ, पङ्किलीकृ, कलुषीकृ, आविलीकृ. *See* MUDDLE.

PUDENCY, PUDICITY, *s.*, *see* MODESTY.

PUDENDUM, PUDENDA, *s.* (Of a woman) भगं, योनिः *f.*, अधोऽङ्गं, अधोपरं, अधोवशः, अधस्, अधस्तात्, उपस्थः, गुह्याङ्गं, रतिकुहरं, रतिमन्दिरं, रतिगृहं. *See* PRIVITY.

PUERILE, *a.* बालिशः -शा -शं, बालेयः -या -यं, बालकीयः -या -यं, बालयोग्यः -ग्या -ग्यं, शिशुयोग्यः &c., बालधर्म्मकः -का -कं, बालबुद्धिः -द्धिः -द्धि.

PUERILITY, *s.* बालिश्यं, बालेयत्वं -ता, बालकीयता, बालयोग्यता.

PUERPERAL, *a.* प्रासूतिकः -की -कं, प्रसवसम्बन्धी -न्धिनी -न्धि (न्).

PUERPEROUS, *a.* बालप्रसविनी, बालप्रसवन्ती, प्रसूतिका, सूतिका.

PUFF, *s.* (Breath from the mouth) श्वासः, श्वसितं, मुखमरुतः, वदनमरुतः.—(A puff or sudden whiff) फुल्कृतं, फुल्कारः, फूल्कृतं, फूल्कारः फूत् indec.—(Blast, gust) ध्मानं, आध्मानं, ध्मातं, वातः, वातरूषः, वात्या, निर्घातः, प्रभञ्जनः.—(Kind of cake) पिष्टकं, आपूपिकं.—(Tumid commendation) अतिशयप्रशंसा, अत्युक्तिरूपा प्रशंसा, अधिकप्रशंसा, अतिशयोक्तिः *f.*

To PUFF, *v. n.* (Breathe) श्वस् (c. 2. श्वसिति -तुं), श्वासं कृ, प्रश्वासं कृ.—(Pant) कृच्छ्रेण श्वस्, कृच्छ्रेण श्वासप्रश्वासं कृ, उद्ध्मा (c. 1. -धमति -ध्मातुं), उद्धमं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.—(Blow) वा, प्रवा.—(Eject air from the mouth suddenly) अकस्माद् वदनमरुतं or मुखमरुतं निरस् (c. 4. -अस्यति -असितुं) or निःसृ in caus.—(Blow upon with a puffing noise) फुल्कृ, फूल्कृ, फुल्कारं कृ, फूल्कारं कृ, फुल्कारेण or फुत्शब्देन प्रश्वस्.—(Swell or be inflated with air) ध्मा in pass. (ध्मायते), आध्मा, वातेन पॄ in pass. (पूर्य्यते).

To PUFF, *v. a.* (Inflate, dilate with air) ध्मा (c. 1. धमति, ध्मा ु), आध्मा, समाध्मा, प्रध्मा, उपध्मा, वातेन पॄ (c. 10. पूरयति -यितुं), श्वासेन पॄ, वायुपूरितं -तां कृ.—(Blow away) अपध्मा, विध्मा.—(Puff up with pride, &c.) दर्पाध्मातं -तां कृ, गर्वाध्मातं -तां कृ, उद्धतीकृ, उन्नद्धीकृ.—(Praise with exaggeration) अत्युक्त्या or अतिशयोक्त्या प्रशंस्, अतिशयप्रशंसां कृ.

PUFFED, *p.p.* (Inflated) ध्मातः -ता -तं, आध्मातः &c., समाध्मातः &c., प्रध्मातः &c., वातपूरितः -ता -तं, वायुपूर्णः -र्णा -र्णं, श्वासपूरितः &c.—(Puffed up with pride, &c.) दर्पाध्मातः -ता -तं, गर्वाध्मातः &c., उद्धतः &c., दर्पोद्धतः &c., मदोद्धतः &c.

Digitized by Google

PUFFY, *a.* श्वाभ्रातः -ता -तं, वातमयः -यी -यं, शब्दमात्रः -त्रा -त्रं.

PUG-DOG, *s.* मर्कटमुखः क्षुद्रकुक्कुरभेदः.

PUG-FACED, *a.* वानरमुखः -खी -खं, मर्कटवदनः -ना -नं, कपिमुखः &c.

PUG-NOSE, *s.* चिपिटः, चिपिटकः, चिपुटः, चिक्किनः, अवभटः.

PUGILISM, *s.* मुष्टियुद्धं, मुष्टियोधनं, मुष्टिपातः, मल्लयुद्धं, मुष्टीमुष्टि, बाहुयुद्धं.

PUGILIST, *s.* मुष्टियोद्धा *m.* (ङ्), मुष्टियोधः, मुष्टियोधी *m.* (न्), बाहुयोधी *m.*

PUGILISTIC, *a.* मुष्टियुद्धसम्बन्धी -न्धिनी -न्धि (न्), बाहुयुद्धसम्बन्धी &c.

PUGNACIOUS, *a.* युयुत्सुः -त्सुः -त्सु, कलहप्रियः -या -यं, युद्धप्रियः &c., रणप्रियः &c., युद्धेच्छुः -च्छुः -च्छु, युद्धकारी -रिणी -रि (न्), कलहकारी &c., रणकामी -मिनी &c., युद्धकामी &c.

PUGNACITY, *s.* युयुत्सा, युद्धेच्छा, युद्धप्रियता, कलहप्रियता, कलहेच्छा.

PUISNE, *a.* अवरः -रा -रं, अवरपदस्थः -स्था -स्थं, अवरजः -जा -जं.

PUISSANCE, *s.* पराक्रमः, विक्रमः, प्रभावः, ऐश्वर्यं, तेजस् *n.*, प्राबल्यं.

PUISSANT, *a.* पराक्रमी -मिणी -मि (न्), विक्रमी &c., पराक्रान्तः -न्ता -न्तं, विक्रान्तः &c., महाबलः -ला -लं, बलवान् -वती -वत् (त्), महाशक्तिः -क्तिः -क्ति, महाविक्रमः -मा -मं.

To PUKE, *v. n.* वम् (c. 1. वमति -मितुं), वमनं कृ, छर्द् (c. 10. छर्दयति -यितुं).

PUKE, *s.* वान्तिकारकम् औषधं, वान्तिकृत्, छर्दनकृत्.

PUKING, *s.* वान्तिः *f.*, वमनं, छर्दनं; *part.*, वमी -मिनी -मि (न्).

PULCHRITUDE, *s.* *See* BEAUTY.

To PULE, *v. n.* (Like a child) बालकवद् रु (c. 2. रौति, रवितुं), शिशुवद् रुद् (c. 2. रोदिति -तुं); 'like a chicken,' पक्षिशावकवत् कूज् (c. 1. कूजति -जितुं).

To PULL, *v. a.* or *n.* (Draw, drag) कृष् (c. 1. कर्षति, c. 6. कृषति -ते, क्रष्टुं, कर्ष्टुं), आकृष्, समाकृष्, परिकृष्, प्रतिकृष्, संकृष्, कर्षणं कृ.—(Pull forcibly) हृ (c. 1. हरति, हर्तुं), हरणं कृ.—(Pluck, gather by plucking) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), आदा (c. 3. -ददाति -दत्ते -दातुं), अङ्गुलिभिर् ग्रह् or आदा or चि or अवचि; 'to pull the hair,' केशग्रहं कृ, केशग्रहणं कृ, केशान् ग्रह्.—(Pull down) अपकृष्, अवकृष्, व्यपकृष्, पत् in caus., अधःपत्.—(Pull off) अपकृष्, अवकृष्, व्यपकृष्, उत्कृष्, अपहृ, व्यपहृ, अपनी, अवतॄ in caus. (-तारयति -यितुं); 'he pulls off his clothes,' वस्त्रम् अवतारयति.—(Pull out) उत्कृष्, निष्कृष्, उद्धृ, निर्हृ, उत्पट् (c. 10. -पाटयति -यितुं), उत्खन् (c. 1. -खनति -नितुं), नियो in caus., उत्पाटनं कृ; 'the hair,' लुच् (c. 1. लुचति -चितुं), उल्लुच्, अवलुच्, विलुच्, उत्पट्, केशोल्लुञ्चनं कृ, केशोत्पाटनं कृ.—(Pull towards) आकृष्, समाकृष्, प्रतिकृष्.—(Pull in pieces, pull in two) विदॄ (c. 10. -दारयति -यितुं), अवदॄ, विभिद्, विदलीकृ, खण्डशः कृ, खण्डं खण्डं कृ.—(Pull up) उत्पट्, उद्धृ, समुद्धृ, उच्छिद्, उत्खन्; 'by the roots,' उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, समूलं or आमूलम् उद्धृ.

PULL, *s.* कर्षणं, कृष्टिः *f.*, कर्षः, आकर्षः -र्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षणं.

PULLED, *p. p.* कर्षितः -ता -तं, कृष्टः -ष्टा -ष्टं, आकर्षितः &c., आकृष्टः &c., अवकृष्टः &c., विकर्षितः &c., विकृष्टः &c., हृतः -ता -तं, गृहीतः -ता -तं; 'pulled by the hair,' केशगृहीतः &c., केशेषु गृहीतः; &c.; 'pulled off, as clothes, &c.,' अवतारितः -ता -तं; pulled out,' उत्कृष्टः -ष्टा -ष्टं, निष्कर्षितः &c., उद्धृतः &c., उत्पाटितः &c.; 'as the hair,' उल्लुञ्चितः &c.; 'pulled up,' उन्मूलितः -ता -तं, उत्पाटितः &c., उत्खातः &c., व्यपरोपितः &c.

PULLET, *s.* कुक्कुटीशावकः, कुक्कुटशावकः, पक्षिशावकः, पक्षिणीशावकः.

PULLEY, *s.* काष्ठान्तर्गतं क्षुद्रचक्रं, काष्ठान्तःस्थं सूक्ष्मचक्रं तच्च रज्जुसङ्गं भूत्वा कीलकोपरि परिवर्त्तते, कीलकोपरि परिवर्त्तमानं क्षुद्रचक्रं.

PULLING, *s.* कर्षणं, कृष्टिः *f.*, आकर्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षः -र्षणं, उत्कर्षः, हरणं, ग्रहणं, अङ्गुलिग्रहणं; 'pulling the hair,' केशग्रहः -हणं; 'mutual pulling of the hair,' केशाकेशि indec.; 'pulling up the hair,' केशलुञ्चनं, केशोल्लुञ्चनं.

To QUICKEN, *v. a.* (Make alive) सजीवं -वां कृ, सजीवीकृ, जीव् (c. 10. जीवयति -यितुं), संजीव्, जीवं दा, जीवनं दा.—(Accelerate) त्वर् (c. 10. त्वरयति -यितुं), संत्वर्, गतिं वृध् in caus., गतिवर्धनं कृ, शीघ्रीकृ, क्षेप (nom. क्षेपयति -यितुं), द्रुततरं -रां कृ.—(Stimulate, incite) उद्दीप् (c. 10. -दीपयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं), वीर्य्यं दा or वृध्, तेजो वृध्.

To QUICKEN, *v. n.* (Become living) सजीवः -वा -वं भू, सजीवीभू, जीवित्वं प्राप्, चैतन्यं प्राप्.—(As a woman with child) स्पन्द् (c. 1. स्पन्दते -न्दितुं), चल् (c. 1. चलति -लितुं), चलितगर्भा भू, स्पन्दितगर्भा भू.—(Have increased motion) शीघ्रतरं or द्रुततरं गम् or चल्, शीघ्र (nom. शीघ्रायते), त्वर् (c. 1. त्वरते -रितुं).

QUICKENED, *p. p.* (Made alive) सजीवः -वा -वं, सजीवीकृतः -ता -तं, जीवभूतः &c., जीवितः &c.—(Accelerated) त्वरितः -ता -तं, वर्धितगतिः -तिः -ति, वेगितः &c.

QUICKENING, *part.* or *a.* जीवदः -दा -दं, उद्दीपकः -का -कं. *See* LIFE-GIVING.

QUICKENING, *s.* (Of the child in the womb) स्पन्दनं, गर्भचलनं, गर्भस्पन्दनं.

QUICK-LIME, *s.* तप्तचूर्णं, तप्तकर्करः -रं, तप्तलेपः, उष्णलेपः.

QUICKLY, *adv.* शीघ्रं, त्वरितं, सत्वरं, क्षिप्रं, द्रुतं, आशु, सहसा, तूर्णं, लघु, अविलम्बितं, अविलम्बं, चपलं, द्रुतपदं, अविलम्बितपदं, अरं, शीघ्र or त्वरित or क्षिप्र in comp.; as, 'going quickly,' शीघ्रगः -गा -गं, शीघ्रगामी &c., त्वरितगतिः; 'spoken quickly,' त्वरितोदितः -ता -तं; 'acting quickly,' शीघ्रकारी &c., क्षिप्रकारी &c., आशुकारी &c.—(Soon, without delay) अचिरेण, अचिरात्, सद्यस्, आशु, सपदि, झटिति, अविलम्बेन.

QUICKNESS, *s.* शीघ्रता -त्वं, सत्वरता -त्वं, द्रुतता -त्वं, क्षिप्रता, शैघ्र्यं, त्वरा, त्वरणं, अविलम्बः, लघुता, वेगिता.

QUICK-SAND, *s.* आर्द्रसिकताः *pl.*, जलार्द्रसिकताः, अनूपसिकताः, द्रवसिकताः.

QUICK-SCENTED, *a.* शीघ्रघ्राणः -णा -णं, तीक्ष्णघ्राणः &c., सूक्ष्मघ्राणः &c.

QUICK-SIGHTED, QUICK-EYED, *a.* शीघ्रदृष्टिः -ष्टिः -ष्टि, तीक्ष्णदृष्टिः &c., सूक्ष्मदृष्टिः &c., सूक्ष्मदर्शी -र्शिनी -र्शि (न्), प्रखरदृष्टिः &c.

QUICK-SIGHTEDNESS, *s.* सूक्ष्मदर्शिता, दृष्टिसूक्ष्मता, दृष्टितीक्ष्णता, सूक्ष्मदृष्टिः *f.*

QUICKSILVER, *s.* पारदः, पारः, पारतः, रसः, रसधातुः *m.*, दिव्यरसः, सिद्धधातुः *m.*, रसराजः, रसनाथः, चपलः, सूतः -तं, रेतस् *n.*, दारदः, खलमूर्त्तिः *f.*, देहदः, पतङ्गं, खेचरः, मृत्युनाशकः, रुद्रजं, शिववीजं, हरवीजं, अशोकं, अमरः, मुकुन्दः, अवित्यजः -जा -जं, योगवाही.

QUICK-WITTED, *a.* शीघ्रबुद्धिः -द्धिः -द्धि, सूक्ष्मबुद्धिः &c., तीक्ष्णबुद्धिः &c.

QUIESCENCE, *s.* शान्तता, शान्तिः *f.*, निश्चलता, अचलता, नैश्चल्यं, चलनाभावः, निश्चलभावः, चेष्टानिवृत्तिः *f.*, चेष्टाभावः, निवृत्तिः *f.*, निर्वृतिः *f.*, विश्रामः, विश्रान्तिः *f.*, स्थिरता, समाधानं; 'of mind,' मनःशान्तिः *f.*, सौमनस्यं.

QUIESCENT, *a.* निश्चलः -ला -लं, अचलः &c., अचरः -रा -रं, निश्चेष्टः -ष्टा -ष्टं, निवृत्तचेष्टः &c., शान्तः -न्ता -न्तं, स्थिरः -रा -रं, समाहितः -ता -तं, सुसमाहितः &c., निर्वृतः -ता -तं, निवृत्तः -त्ता -त्तं, विरतः -ता -तं.—(In grammar) अनुच्चारितः -ता -तं, लुप्तोच्चारः -रा -रं; 'quiescent mark,' विरामः.

QUIET, *a.* (Not moving) निश्चलः -ला -लं, अचलः -ला -लं, अचरः -रा -रं, स्थिरः -रा -रं, सुस्थिरः &c.—(Calm, not agitated, at rest) शान्तः -न्ता -न्तं, प्रशान्तः &c., उपशान्तः &c., निशान्तः &c., शमितः -ता -तं, शमी -मिनी -मि (न्), सुस्थिरः -रा -रं, स्थिरः -रा -रं, स्वस्थः -स्था -स्थं, अक्षुभ्रः -भ्रा -भ्रं, अव्याकुलः -ला -लं, निराकुलः &c., समाहितः -ता -तं, विश्रान्तः -न्ता -न्तं, निर्वृतः -ता -तं, निवृत्तः -त्ता -त्तं.—(Free from wind) निर्वातः -ता -तं, निवृत्तवातः &c., निवृत्तवायुः -युः -यु.—(Mild, gentle) सौम्यः -म्या -म्यं, सौम्यवृत्तिः -त्तिः -त्ति, मृदुः -दुः -दु, मन्दः -न्दा -न्दं, अनुग्रः -ग्रा -ग्रं, असाहसिकः -की -कं, अचण्डः -ण्डा -ण्डं.—(Unmolested) निर्विघ्नः -घ्ना -घ्नं, अविघ्नितः -ता -तं, निरुपद्रवः -वा -वं, निरुपप्लवः &c., निष्कण्टकः -का -कं, अबाधः -धा -धं, अप्रतिबन्धः -न्धा -न्धं, प्रतिबन्धहीनः -ना -नं, स्वस्थः -स्था -स्थं.—(Silent) तूष्णीकः -का -कं, निःशब्दः -ब्दा -ब्दं, निश्शब्दः &c.; 'be quiet!' तूष्णीम्भव, तूष्णीमास्यतां, विरम.

QUIET, *s.* शान्तिः, शमः, शान्तता, प्रशान्तिः *f.*, उपशमः, निर्वृतिः *f.*, निवृत्तिः *f.*, विश्रामः, विश्रान्तिः *f.*, स्वस्थता, स्वास्थ्यं, समाधानं, निरुपद्रवता, उपद्रवाभावः, निर्विघ्नता, निरुपप्लवता, प्रतिबन्धहीनता, प्रतिबन्धाभावः, निष्कण्टकत्वं, कण्टकाभावः, निश्चलता, स्थिरता.

To QUIET, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, शान्त्व् or सान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, उपसान्त्व्, निवृत् (c. 10. -वर्त्तयति -यितुं), विरम् (c. 10. -रमयति -यितुं), निर्विघ्नीकृ, निरुपद्रवीकृ, निश्चलीकृ, स्थिरीकृ.

QUIETISM, *s.* शमः, शान्तिः *f.*, निवृत्तिमार्गः, वैराग्यं. According to the Vedánta system there are six stages of this state, or six duties to be performed by him who practices it, viz. श्रद्धा, समाधानं, तितिक्षा, उपरतिः *f.*, दमः, शमः.

QUIETIST, *s.* वेदान्ती *m.* (न्), वेदान्तज्ञः, वेदान्तगः, वेदान्तसेवी *m.* (न्), वेदान्तमार्गी *m.* (न्), वेदान्ताधिकारी *m.*, निवृत्तमार्गी *m.*

QUIETLY, *adv.* शान्तं, शान्त्या, स्थैर्य्येण, निर्वृतिपूर्वं, शान्तवत्, अव्याकुलं,

Digitized by Google

निराकुलं, अक्षुभ्रं, अक्षोभेण, अनुग्रं, अचण्डं, मन्दं, स्वस्थं, स्वास्थ्येन, सशमं, निःशब्दं, तूष्णीं, निश्चलं.

Quietness, *s.* शान्तता, प्रशान्तता, शान्तिः *f.*, स्थिरता, निश्चलता, नैश्चल्यं, अक्षुभ्रता, अक्षोभः, अव्याकुलत्वं. *See* Quiet, *s.*

Quietude, *s.* शान्तिः *f.*, शमः. *See* Quietness, quiet, *s.*

Quill, *s.* (Feather) पक्षः, पर्णः; 'for writing,' कलमः, लेखनी, आलेखनी.—(Of a porcupine) शललो -लं, शलः -लं.—(Of a lute, &c.) रणः, परिवादः, शारिका, कोणः.

Quilt, *s.* तूलिका, तूला -ली, उत्तरप्रच्छदः, उत्तरच्छदः, शयनीयप्रच्छदः, शय्याप्रच्छदपटः, शय्याच्छादनं, तूलादिनिर्म्मितः प्रच्छदः, आस्तरणं, आस्तरः, संस्तरः, स्तरिमा *m.* (न्).

To quilt, *v. a.* तूलादि निवेशयित्वा निषिव् (c. 4. -षीव्यति -षेवितुं) or परिषिव् or विषिव् or संसिव् or सिव्.

Quinary, *a.* पञ्चकः -का -कं, पञ्चरूपः -पा -पं, पञ्चाङ्गः -ङ्गी -ङ्गं.

Quince, *s.* (The tree) श्रीफलः may be used.—(The fruit) श्रीफलं.

Quindecagon, *s.* पञ्चदशकोणः -णं, पञ्चदशभुजः, पञ्चदशाश्रं -श्री.

Quinquagesima, *a.* ख्रीष्टपुनरुत्थानोत्सवात् पूर्व्वं पञ्चाशत्तमदिवसः.

Quinquennial, *a.* पाञ्चवर्षिकः -की -कं, पञ्चवर्षिकः &c., पञ्चवर्षीयः -या -यं, पाञ्चाब्दिकः -की -कं.

Quinsy, *s.* अधिमांसकः, घटसर्पः, गण्डमाला, कण्ठरोगः.

Quintessence, *s.* सारः, सारांशः, पञ्चमसारः, उत्तमसारः, परमसारः.

Quintuple, *a.* पञ्चगुणः -णा -णं, पञ्चविधः -धा -धं, पञ्चाङ्गः -ङ्गी -ङ्गं.

Quip, *s.* (Taunt, sarcasm) क्षेपः, अवक्षेपः, व्यञ्जना -नं.

Quire, *s.* (Band of singers) गायकगणः, गायकचक्रं.—(Of paper) पत्रचतुर्विंशकं.

Quirister, *s.* सहगायकः, सहगाथकः, गायकगणाभ्यन्तरः.

Quirk, *s.* (Fancy) मनोलौल्यं, बुद्धिचापल्यं, लहरी, छन्दस्, अखट्टिः *m.*, दुर्वासना, मृषार्थकं.—(Taunt) क्षेपः, अवक्षेपः.—(Quibble) वाक्छलं, वक्रोक्तिः *f.*

Quirkish, *a.* चपलः -ला -लं, लोलः -ला -लं, वाक्छलमयः -यी -यं.

To quit, *v. a.* (Give up, abandon) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, संत्यज्, हा (c. 3. जहाति, हातुं), विहा, अपहा, अपाहा, प्रहा, विसृज्, उत्सृज्, अतिसृज्, व्यपसृज्, अपास्, च्युदस्, उज्झ्, प्रोज्झ्, मुच्, विमुच्, रह्, विरह्, परिह्, वृज्, परिवृज्, विवृज्.—(Depart from) अपगम् (c. 1. -गच्छति -गन्तुं), विगम्, व्यपगम्, अपया, अपे, व्यपे, अपसृ, प्रस्था, विप्रस्था.—(Clear) शुध्, परिशुध्, मुच्, विमुच्, निस्तृ in caus.—(Perform one's duty) स्वकर्त्तव्यं or स्वकर्म्म सम्पद् (c. 10. -पादयति -यितुं) or विधा.

Quit, *a.* मुक्तः -क्ता -क्तं, विमुक्तः &c., विमोचितः -ता -तं, ऋणमुक्तः &c., उत्तीर्णः -र्णा -र्णं, अवतीर्णः -र्णा -र्णं, उपकारमुक्तः &c., शोधितः -ता -तं.

Quite, *adv.* सर्व्वथा, सर्व्वतस्, सर्व्वशस्, साकल्येन, सकलं, सम्यक्, अशेषतस्, अशेषेण, पर्याप्तं, विश्वतस्, अखिलेन, निखिलेन, अन्यूनं, सर्व्वभावेन.—(To a great degree, very) अति or सु prefixed, अत्यन्तं, अतिशयं -येन; 'quite fresh,' अतिनवः -वा -वं, अतिसद्यस्कः -स्का -स्कं, सद्यस्कालीनः -ना -नं.—(Not quite) ईषदूनः -ना -नं, अल्पोनः &c.

Quits, अन्योन्यं or परस्परम् ऋणमुक्तौ *m. du.*, or उपकारमुक्तौ.

Quittance, *s.* निस्तारः, मुक्तिः *f.*, मोक्षः, निष्कृतिः *f.*, उत्तरणं, शुद्धिः *f.*, शोधनं, अपनयनं; 'from debt or obligation,' ऋणमुक्तिः *f.*, ऋणमोक्षः, ऋणशुद्धिः *f.*, ऋणशोधनं, ऋणापनयनं, ऋणापाकरणं, ऋणापनोदनं, विगणनं; 'of a grudge,' वैरशुद्धिः *f.*

Quitted, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः &c., रहितः -ता -तं, विरहितः &c., उत्सृष्टः -ष्टा -ष्टं, विसर्जितः &c., उज्झितः &c., प्रोज्झितः &c.

Quiver, *s.* तूणः -णा -णी, तूणीरः, शरधिः *m.*, इषुधिः *m.*, शराश्रयः, बाणाश्रयः, निषङ्गः, अपासङ्गः, उपासङ्गः, तुलसारिणी, खोलिः *f.*; 'having a quiver,' तूणी -णिनी &c.; 'carrying one,' धृतेषुधिः -धिः -धि, तूणधरः -रा -रं.

To quiver, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), प्रस्फुर्, विस्फुर्, कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, प्रकम्प्, अभिकम्प्, स्पन्द् (c. 1. स्पन्दते -न्दितुं), परिस्पन्द्, वेप् (c. 1. वेपते -पितुं), प्रवेप्, त्रस् (c. 4. त्रस्यति -सितुं), वित्रस्, ह्वल् (c. 1. ह्वलति -लितुं), विह्वल्, प्रह्वल्; 'his lips quiver,' ओष्ठाधरौ स्फुरतः; 'his lip quivers,' अधरः स्फुरति; 'his arm quivered,' बाहुः पुस्फोर.

Quivered, *a.* तूणी -णिनी -णि (न्), धृतेषुधिः -धिः -धि, सतूणः -णा -णं.

Quivering, *part.* or *a.* स्फुरन् -रन्ती -रत् (त्), स्फुरितः -ता -तं, प्रस्फुरितः &c., स्पन्दमानः -ना -नं, स्पन्दितः &c., कम्पमानः -ना -नं, प्रकम्पमानः &c., कम्पितः &c., वेपमानः -ना -नं, सकम्पः -म्पा -म्पं, चञ्चलः -ला -लं; 'having a quivering lip,' स्फुरिताधरः -रा -रं, प्रस्फुरिताधरः &c., स्फुरदोष्ठी -ष्ठिनी &c.

Quivering, *s.* स्फुरणं, स्फुरितं, विस्फुरणं, प्रस्फुरणं, स्फूर्त्तिः *f.*, स्पन्दनं, कम्पनं, वेपनं; 'of the lip,' अधरस्फुरणं.

Quiz, *s.* (Odd fellow) अपरूपजनः, विलक्षणजनः.—(One who ridicules others) उपहासकः, अवक्षेपकः, परिहासकृत् *m.*, अवज्ञाकारी *m.*

To quiz, *v. a.* अवहस् (c. 1. -हसति -सितुं), अपहस्, अवहासभूमिं कृ, अपहासास्पदं कृ, अवज्ञास्पदं कृ, अवज्ञाभूमिं कृ, अवक्षिप्.

Quoif, quoiffure, quoin, *see* Coif, coiffure, &c.

Quoit, *s.* (Circular ring of iron) चक्रं, लोहचक्रं, लौहचक्रं, अट्टनं; 'game of quoits,' चक्रक्रीडा.

To quoit, *v. a.* लोहचक्राणि क्षिप् (c. 6. क्षिपति, क्षेप्तुं), चक्रक्रीडां कृ.

Quondam, *a.* पूर्व्वः -र्व्वा -र्व्वं, प्राक्तनः -नी -नं. *See* Former.

Quorum, *s.* कार्य्यनिर्व्वाहक्षमसंख्या, कार्य्यनिर्व्वाहोपयुक्तसंख्या, कार्य्यनिर्व्वाहोचितसंख्या, कार्य्यनिर्व्वाहावरसंख्या, कार्य्यसाधकावरसंख्या.

Quota, *s.* उपयुक्तांशः, उपयुक्तभागः, यथायोग्यांशः, यथोचितांशः.

Quotation, *s.* (The act) अवतरणं, अवतारणं, उद्धारः, उद्धरणं, उपन्यासः, उपन्यसनं, of the Vedas श्रुतादानं.—(Passage quoted) उपन्यस्तवाक्यं, उद्धृतवाक्यं, उपन्यस्तवचनं, उद्धृतलेखः, अवतारितवाक्यं, उपनीतवाक्यं, प्रमाणार्थम् अमुकग्रन्थोद्धृतम् अनुवादकवाक्यं.

To quote, *v. a.* अवन् (c. 10. -तारयति -यितुं), अवतरणं कृ, उपन्यस् (c. 4. -अस्यति -असितुं), उपन्यासं कृ, उद्धृ (c. 1. -हरति -हर्त्तुं), उद्धारं कृ, प्रमाणार्थम् अमुकग्रन्थाद् अनुवादकवाक्यम् उद्धृ or उपनी (c. 1. -नयति -नेतुं).

Quoted, *p. p.* अवतीर्णः -र्णा -र्णं, अवतारितः -ता -तं, उद्धृतः -ता -तं, उपन्यस्तः -स्ता -स्तं, प्रमाणार्थम् उपनीतः -ता -तं.

Quoth, *v. defect.* Expressed by आह, उवाच &c.

Quotidian *a.* प्रात्यहिकः -की -कं, प्रात्याहिकः &c., ऐकाहिकः &c., अन्वाहिकः &c., प्रतिदैनिकः &c., आह्निकः &c., अन्येद्युष्कः -ष्का -ष्कं; 'fever,' प्रात्याहिकज्वरः, अन्येद्युष्कः.

Quotient, *s.* लब्धिः *f.*, आप्तं, फलं, क्षेत्रफलं, भागः.

R.

Rabbit, *s.* शशः, शशकः, लम्बकर्णः, लोमकर्णः -र्णकः, मृदुलोमकः; 'its skin,' शशोर्णः, शशलोम *n.* (न्), शशचर्म्म *n.*, शशकाजिनं.

Rabble, *s.* अन्यजातीयाः *m. pl.*, प्राकृतजनाः *m. pl.*, अन्याः *m. pl.*,

Digitized by Google

खलाः *m. pl.*, हीनवर्णाः *m. pl.*, पृथग्जनाः *m. pl.*, अधमजातीयाः *m. pl.*, अधमजनसमूहः, नीचजनसमूहः, प्राकृतजनसम्मर्दः.

RABID, *a.* उन्मत्तः -त्ता -त्तं, उन्मादः -दा -दं, उन्मादवान् -वती -वत् (त्), मत्तः -त्ता -त्तं, प्रमदः -दा -दं, वातुलः -ला -लं; 'a rabid dog,' अलर्कः, अलकः.

RABIDLY, *adv.* उन्मत्तवत्, मत्तवत्, सोन्मादं, उन्मादेन, प्रमदवत्.

RABIDNESS, *s.* उन्मत्तता, उन्मादः, सोन्मादता, प्रमदता. *See* MADNESS.

RACE, *s.* (Lineage) वंशः, सन्ततिः *f.*, सन्तानः, अन्वयः, कुलं, जातिः *f.*, अन्ववायः, गोत्रं, वंशपरम्परा, वंशावलिः *f.*, वंशविततिः *f.*, पुत्रपौत्रादिवंशपरम्परा, तनुः *m.*, अभिजनः, प्रवरं, वर्णः, जननं, अनूकं, सगोत्रं; 'human race,' मनुष्यजातिः *f.*, नृजातिः *f.*—(A running or course) चर्य्या, धावनं, मार्गः; 'horse-race,' अश्वचर्य्या, अश्वधावनं, अश्वमार्गः.—(Ginger) गुल्ममूलं.

To RACE, *v. n.* अग्रोपस्थानेच्छया धाव् (c. 1. धावति -वितुं), अग्राभिगमनेच्छया धाव्, परस्परजिगीषया धाव्, जवेन धाव्.

RACE-COURSE, *s.* चर्य्याभूमिः *f.*, चर्य्यास्थानं, धावनभूमिः *f.*, धावनस्थानं.

RACE-HORSE, *s.* जवाश्वः, जवनः, जवी *m.* (न्), जवाधिकः, धावकः.

RACER, *s.* धावकः, धावनकृत्. *See* RACE-HORSE.

RACK, *s.* (For hay) गवादनी, द्रोणी -णिः *f.*—(Instrument of torture) यातनायन्त्रं, यातनयन्त्रं, प्रमाथयन्त्रं.—(Extreme pain) यातना, अतिव्यथा, तीव्रवेदना, तीक्ष्णवेदना.

To RACK, *v. a.* यत् (c. 10. यातयति -यितुं), यातनयन्त्रेण व्यध् (c. 10. व्यथयति -यितुं) or प्रमथ् (c. 10. -माथयति -यितुं), अत्यन्तं व्यथ् or पीड् (c. 10. पीडयति -यितुं), यातनां कृ.

RACKED, *p. p.* अतिव्यथितः -ता -तं, अतिपीडितः &c., प्रमाथितः &c., प्रमथितः &c.

RACKET, *s.* (Confused noise) कोलाहलः, कलकलः, कलरवः, हलहलाशब्दः, कालकीलः, रासः, तुमुलं.—(In tennis) गुलिकाताडनी, गुलिकाप्रक्षेपणी, गुलिकाप्रणोदनी, गुलिकाक्षेपणयष्टिः *m.*, गुलिकाप्रणोदनयन्त्रं.

RACKETY, *a.* कोलाहलकारी -रिणी -रि (न्), तुमुलकारी &c., तुमुली &c.

RACY, *a.* रसिकः -का -कं, रसी -सिनी -सि (न्), रसवान् -वती -वत् (त्), सरसः -सा -सं, सुरसः &c., तीक्ष्णरसः &c., उग्ररसः &c.

RADIANCE, RADIANCY, *s.* प्रभा, दीप्तिः *f.*, तेजस् *n.*, उज्ज्वलता, प्रकाशता, रुचिः *f.*, उद्भासः, भाजिष्णुता, घर्म्मरश्मिः *m.* *See* BRIGHTNESS, BRILLIANCY, LUSTRE.

RADIANT, *a.* देदीप्यमानः -ना -नं, प्रकाशमानः &c., द्योतमानः &c., दीप्तिमान् -मती -मत् (त्), प्रदीप्तिमान् &c., प्रभावान् &c., सुप्रभः -भा -भं, तेजोमयः -यी -यं, कान्तिमान् &c., किरणमयः -यी -यं, मरीचिमाली -लिनी -लि (न्), विशदः -दा -दं. *See* BRIGHT, BRILLIANT, LUSTROUS.

RADIANTLY, *adv.* अतितेजसा, सुप्रभं, उज्ज्वलं, सुप्रकाशं.

To RADIATE, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), किरण (nom. किरणायते), दीप् in freq. (देदीप्यते), वर्च्चस् (nom. वर्च्चायते), अंशु (nom. अंशूयति), किरणरूपेण स्फुर्, किरणान् पत् (c. 10. पातयति -यितुं).

RADIATION, *s.* किरणस्फुरणं, रश्मिस्फुरणं, अंशुपातनं, किरणपातनं, रश्मिविकिरणं, अंशुविकिरणं, दीप्तिविकिरणं.

RADICAL, *a.* (Original, fundamental) मौलिकः -की -कं, मौलः -ली -लं, मूलिकः -की -कं, मूली -लिनी -लि (न्), वास्तवः -वी -वं.—(Natural) स्वाभाविकः -की -कं, प्राकृतिकः &c., स्वभावजः -जा -जं, साह्विकः -की -कं.—(Primitive) मूलिकः &c., *see* the word.

RADICALLY, *adv.* मूलतस्, आमूलं, समूलं, स्वभावतस्, जातितस्.

To RADICATE, *v. a.* मूलतो रुह् in caus. (रोपयति -यितुं) बद्धमूलं -लां कृ.

RADISH, *s.* मूलकः -कं, कन्दमूलं, सेकिमं, पाटीरः, पटीरं, हरिपर्णं, हरित्पर्णः.

RADIUS, *s.* (Of a circle) त्रिज्या, व्यासार्द्धं, व्यासार्द्धरेखा, ककैटः.—(Of the equator) भूकर्णः.—(Of a wheel) अरं.

RAFF, *s.* अधमजातीयाः *m. pl.*, हीनवर्णाः, अन्त्यजातीयाः &c. *See* RABBLE.

RAFFLE, *s.* गुटिकापातः, महामूल्यद्रव्यप्रापणार्थं गुटिकापातनं.

To RAFFLE, *v. n.* महामूल्यद्रव्यप्रापणार्थं गुटिकाः पत् (c. 10. पातयति -यितुं).

RAFT, *s.* उडुपः -पं, तरणः -णी, तरणिः *m.*, प्लवः, प्लवाका, तरण्डः, तरत् *n.*, तर्णिः *m.*, तारणः, वह्नित्रं, वारित्रयः, कोलः, भेलः -लकः, होडः.

RAFTER, *s.* गृहस्थूणा, वेश्मस्थूणा, पटलस्थूणा, स्थूणा, पटलकाष्ठं, पटलदारुः *m.*, गृहदारुः *m.*, गृहकाष्ठं, दीर्घस्थूणा, दीर्घकाष्ठं, दीर्घदारः *m.*

RAG, *s.* (Piece of tattered cloth) वस्त्रखण्डः, जीर्णवस्त्रखण्डः, जर्जरवस्त्रखण्डः, पटखण्डः, चीरं, चीवरं, कर्पटः, कन्था, लङ्कं, करः.—(Ragged garment) जीर्णवस्त्रं, जर्जरवस्त्रं; 'dressed in rags,' *see* RAGGED; 'a bundle of rags,' चीरसमूहः, करोत्करः.

RAGAMUFFIN, *s.* चीरवासाः *m.* (स्), कर्पटी *m.* (न्), खलः, धूर्त्तः, अधमजातीयः.

RAGE, *s.* (Great anger, fury) क्रोधः, कोपः, प्रकोपः, अतिक्रोधः, अतिकोपः, क्रोधावेशः, कोपावेशः, संरम्भः, प्रतिरम्भः, संरम्भता, अमर्षः, क्रुध् *f.*, उग्रता -त्वं, रौद्रं -द्रता, चण्डता, उच्चण्डता, रागः, अतिरागः, उत्तापः, सन्तापः, कोपाकुलता, प्रतिघः; 'in a rage,' संरब्धः -ब्धा -ब्धं, संरम्भी -म्भिणी &c., क्रुद्धः -द्धा -द्धं, क्रोधी -धिनी &c., जातक्रोधः -धा -धं, कोपाकुलः -ला -लं, जातामर्षः -र्षा -र्षं, क्रोधाविष्टः -ष्टा -ष्टं.—(Violence, vehemence) संरम्भः, उग्रता, तीक्ष्णता, अतितीक्ष्णता, तैक्ष्ण्यं, रौद्रता, तीव्रता, तिग्मता.—(Agitation) क्षोभः, व्याक्षोभः, वेगः, अतिक्षोभः.

To RAGE, *v. n.* (Be angry) क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं), संक्रुध्, रुष् (c. 4. रुष्यति, रोषितुं), कुप् (c. 4. कुप्यति, कोपितुं), प्रकुप्, क्रोधाकुलः -ला -लं भू, कोपाकुलः -ला -लं भू, संरम्भः -म्भा -म्भं भू, संरम्भीभू.—(Become violent or intense) उग्रतरः -रा -रं भू, तीक्ष्णतरः -रा -रं भू, रौद्रतरः -रा -रं भू, रौद्रीभू, तिग्मतरः -रा -रं भू, भृश (nom. भृशायते), उच्चण्डः -ण्डा -ण्डं भू, क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं).

RAGEFUL, *a.* क्रोधी -धिनी -धि (न्), क्रोधान्वितः -ता -तं, कोपान्वितः &c., कोपाकुलः -ला -लं, कोपी &c., संरम्भी &c., सकोपः -पा -पं.

RAGGED, *a.* जर्जरः -रा -रं, जर्जरीकः -का -कं, जीर्णः -र्णा -र्णं, छिन्नः -न्ना -न्नं, विच्छिन्नः &c., विषमधारः -रा -रं; 'ragged garment,' जीर्णवस्त्रं, जर्जरवस्त्रं, छिन्नवस्त्रं, भिक्षुसंघाटी *m.* (न्), कर्पटः, चीरं, चीवरं, कन्था; 'dressed in ragged garments,' चीरवासाः -सा -सः (स्), कर्पटधारी -रिणी -रि (न्), कर्पटिकः, चीवरी &c.

RAGGEDNESS, *s.* जर्जरता, जर्जरीकता, जीर्णता, छिन्नवस्त्रता, छिन्नता.

RAGING, *part.* or *a.* उग्रः -ग्रा -ग्रं, रोषणः -णा -णं, वेगी -गिनी -गि (न्), महावेगः -गा -गं, उद्दीर्णवेगः &c., संरम्भी &c., संरम्भः -म्भा -म्भं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, चण्डः -ण्डा -ण्डं, उच्चण्डः &c.

RAGMAN, *s.* चीरव्यापारी *m.* (न्), चीरविक्रेता *m.* (तृ), छिन्नवस्त्रव्यापारी.

RAGOUT, *s.* मिष्टान्नं, सव्यञ्जनाहारः, व्यञ्जनं, उपस्करः.

RÁHU, *s.* (The ascending node, fabled as a demon, the son of Singhiká, with the tail of a dragon. His head was cut off by Vishnu, at the churning of the ocean; but being immortal, by having tasted the amrit, the head and tail retained their separate existence, and were transferred to the stellar sphere. The head, or Ráhu, became the cause of eclipses, by endeavouring at various

Digitized by Google

times to swallow the sun and moon. The tail was called Ketu, or the descending node, *see* PLANET) राहुः, सिंहिकासूनुः *m.*, सैंहिकः, सैंहिकेयः, ग्रहः, ग्रहकल्लोलः, खेटः, विधुन्तुदः, सूर्य्यग्रहः. An eclipse is called राहुग्राहः, राहुग्रासः, राहुसंस्पर्शः.

RAIL, *s.* लोहस्तम्भः, लोहशङ्कुः *m.*, लोहावरणं. *See* RAILING.

To RAIL, *v. a.* (Inclose with rails) लोहस्तम्भेन परिवेष्ट् or परिवृ or आवृ or अवरुध् or संरुध्, लोहस्तम्भावृतं -तां कृ.

To RAIL, *v. n.* (Reproach, revile, abuse) निन्द्, अपवद्, तिरस्कृ, आक्रुश्, अवगुर्, अवक्षिप्, अधिक्षिप्, परिक्षिप्, क्षिप्, शप्, अभिशप्, परिशप्, आक्षर्, गर्ह्, भर्त्स्, कुत्स्, मुखरीकृ, गुप् in des., उपालभ्.

RAILED AT, *p. p.* आक्रुष्टः -ष्टा -ष्टं, उपालब्धः -ब्धा -ब्धं, अधिक्षिप्तः -प्ता -प्तं.

RAILER, *s.* निन्दकः, आक्रोशकः, उपक्रोष्टा *m.* (ष्टृ), कुत्सावादी *m.* (न्), अपवादकः, निर्भर्त्सकः, उपालम्भकारी *m.*, अवक्षेपकः.

RAILING, *s.* (Reviling) निन्दा -न्दनं, अपवादः, परिवादः, परीवादः, तिरस्कारः, उपालम्भः, जुगुप्सा, वाक्पारुष्यं, आक्रोशः -शनं, उपक्रोशः, दुर्वाक्यं, धिक्क्रिया.—(Fence) आवरणं, लोहावरणं, आवारः, कटञ्चनं, *see* FENCE.

RAILLERY, *s.* अपहासः, परिहासः, परीहासः, प्रहसनं, हासिका.

RAIL-ROAD, RAIL-WAY, *s.* लोहवर्त्म *n.* (न्), लोहमार्गः अयोवर्त्म *n.* (न्).

RAIMENT, *s.* वस्त्रं, वासस् *n.*, वसनं, वेशः, अम्बरं, आच्छादनं, परिधानं, प्रसाधनं, संव्यानं, सिचयः, प्रच्छादनं, परिच्छदः; 'clothed in white raiment,' शुक्लाम्बरधारी -रिणी -रि (न्), शुक्लवासाः -सा: -सः (स्).

To RAIN, *v. n.* वृष् (c. 1. वर्षति -ते -र्षितुं), अभिवृष्, प्रवृष्, अभिप्रवृष्, वर्षणं कृ, वृष्टिं कृ, मेघेभ्यः पत् (c. 1. पतति -तितुं), वृष्टिं सु (c. 1. सवति, सोतुं), जलं or तोयं सु; 'to rain slightly or softly,' शीक् (c. 1. शीकते -कितुं); 'to rain heavily,' अतिवृष्टिं कृ; 'to cease to rain,' निर्वृष्; 'it rains,' वर्षन्ति मेघाः, वृष्टिर् मेघेभ्यः पतति.

To RAIN, *v. a.* वृष् (c. 1. वर्षति -ते -र्षितुं), अभिवृष्, प्रवृष्, अभिप्रवृष्, सु (c. 1. सवति, सोतुं or c. 10. सावयति -यितुं), पत् (c. 10. पातयति -यितुं), शीक् (c. 1. शीकते -कितुं); 'the clouds rain water,' जलं सवन्ति मेघाः; 'the clouds rained blood,' मेघाः शोणितं ववृषुः; 'the sky rained blood,' सावयामास शोणितं व्योम, शिशीके शोणितं व्योम.

RAIN, *s.* वृष्टिः *f.*, वर्षः -र्षं, आवृष्टिः *f.*, खजलं, घनाम्बु *n.*, मेघाम्बु *n.*, खवारि *n.*, मेघजलं, गोघृतं, पर्जन्यः, परामृतं; 'soft rain,' शीकरः; 'heavy rain,' अतिवृष्टिः *f.*; 'untimely rain,' अकालवृष्टिः *f.*; 'shower of rain,' धारासम्पातः, धारासारः; 'broken or partial rain,' खण्डवृष्टिः *f.*—(Rains, season of the rains) वर्षाः *m. pl.*, वर्षकालः, वृष्टिकालः, मेघकालः, मेघागमः, प्रावृट् *f.* (ष्), प्रावृट्कालः, प्रावृषा. *See* RAINY.

RAIN-BOW, *s.* इन्द्रधनुस् *n.*, इन्द्रचापः, शक्रधनुस् *n.*, इन्द्रायुधं, देवायुधं, शक्रशरासनं, मेघधनुः *m.*, सुरधनुः *m.*, मणिधनुः *m.*, वायुफलं, धनुष्यं, कौशिकायुधं, परामृतं.

RAINED, *p. p.* वर्षितः -ता -तं, अभिवर्षितः -ता -तं, प्रवर्षितः &c.

RAINNESS, *s.* वर्षुकत्वं, वार्षिकत्वं, बहुवृष्टित्वं, वृष्टिबाहुल्यं.

RAINWATER, *s.* वर्षाम्बु *n.*, वृष्टिजलं, वर्षजलं, वृष्टिवारि *n.*

RAINY, *a.* वर्षुकः -का -कं, वार्षिकः -की -कं, वर्षिकः &c., वृष्टिमान् -मती -मत् (त्), बहुवृष्टिः -ष्टिः -ष्टि, वर्षी -र्षिणी -र्षि (न्), प्रावृषिकः -की -कं. *See* PLUVIAL; 'rainy cloud,' वर्षुकमेघः, वर्षुकाब्दः; 'a rainy day,' दुर्दिनं, वादलं; 'rainy night,' वर्षारात्रः; 'rainy season,' वृष्टिकालः, वर्षकालः, वर्षाकालं, मेघागमः, मेघकालः, प्रावृट् *f.* (ष्), प्रावृट्कालः, प्रावृषा, घनकालः, जलदकालः, घनसमयः, जलदागमः, तपात्ययः, चातकानन्दनः.

To RAISE, *v. a.* (Lift, raise up) उत्था in caus. (-थापयति -यितुं, rt. स्था), उत्तुल् (c. 10. -तोलयति -यितुं), उन्नम् (c. 10. -नमयति -नामयति -यितुं), उन्नी (c. 1. -नयति -नेतुं), उद्धृ (c. 1. -हरति -हर्तुं), उच्छ्रि (c. 1. उच्छ्रयति -यितुं, rt. श्रि), समुच्छ्रि, प्रोच्छ्रि, उत्कृष्.—(Erect, elevate, set up) उत्था in caus., स्था in caus., उन्नम्, उच्छ्रि, उत्क्षिप्, समुत्क्षिप्, उद्गृह् (c. 6. -गृह्णति -गर्हितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), समुद्यम्, अभ्युद्यम्, अधिरुह् in caus. (-रोपयति -यितुं), आरुह्, रुह्, ऊर्ध्वीकृ, उच्चीकृ, उच्चैः कृ.—(Erect, build) निमी, विनिमी.—(Elevate, exalt) उन्नम्, उच्छ्रि, उद्यम्, उद्वन् (c. 2. -हन्ति -न्तुं), उन्नतिं कृ; 'in rank,' पदवृद्धिं कृ, उत्कृष्टपदे or श्रेष्ठपदे नियुज् or प्रतिपद् (c. 10. -पादयति -यितुं), प्रतिपत्तिं कृ or दा.—(Increase, enhance) वृध् in caus., संवृध्, अधिकीकृ, अधिकं -कां कृ.—(Produce, make) उत्पद् in caus., जन् (c. 10. जनयति -यितुं), संजन्.—(Excite, incite) उत्पद्, जन्, उत्तप्, उत्था, उद्युज्, नियुज्, प्रवृत्.—(Levy), *see To* LEVY.—(Raise one's voice) उच्चैःस्वरेण भाष् or वद्, उच्चैर् वद्, उच्चवाक्यम् उदीर्.—(Raise a clamor) उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), उच्चैःस्वरेण घुष्, उद्घुष्, उच्चशब्दं कृ, महाशब्दं कृ, उच्चैर्घुष्टं कृ.—(Crops, cattle, &c.) उत्पद् in caus.—(Dust) रजः or रेणुम् उद्धू (c. 5. -धूनोति -धोतुं) or समुद्धू.—(Raise a siege) अवरोधत्यागं कृ.

RAISED, *p. p.* (Lifted, raised up) उत्थापितः -ता -तं, उन्नोलितः &c., उन्नमितः &c., उन्नतः -ता -तं, उच्छ्रितः &c., समुच्छ्रितः &c., उद्यतः -ता -तं, उद्धृतः &c., समुद्धृतः &c., उत्कर्षितः &c., उद्गृहितः &c., उत्क्षिप्तः &c., उद्गाहितः &c., उत्क्षिप्तः -प्ता -प्तं, उद्गुर्णः -र्णा -र्णं; 'is raised,' उत्थाप्यते.—(Erected, set up) उत्थापितः &c., स्थापितः &c., रोपितः &c., अधिरोपितः &c., ऊर्ध्वीकृतः &c., उद्वृत्तः -त्ता -त्तं.—(Produced) उत्पादितः -ता -तं, उत्पन्नः -न्ना -न्नं, जनितः &c., जातः &c.—(Raised on high) ऊर्ध्वीकृतः &c., उच्चीकृतः &c., कृतोच्चैस्, उच्चैःकृतः &c.; 'having the hands raised,' उच्छ्रितपाणिः -णिः -णि, उत्थितहस्तः -स्ता -स्तं; 'having the arms raised,' उद्गाहुः -हुः -हु, उद्यतबाहुः &c.; 'having the spear raised,' उद्यतशूलः -ला -लं; 'having the weapon raised,' उद्यतायुधः -धा -धं; 'sitting with the feet raised,' प्रौढपादः -दा -दं; 'dust raised by the hoofs,' रजः खुरोद्भूतं; 'the dust is raised by the wind,' वातेन रजः उद्धूयते.

RAISER, *s.* उत्थापकः, उन्नोलकः, उन्नायकः, उन्नेता *m.* (तृ), उद्धारकः.

RAISIN, *s.* (Dried grape) यक्षाग्नी, शुष्कद्राक्षा, शुष्कमृद्वीका.

RAISING, *s.* उत्थापनं, उत्थानं, अभ्युत्थानं, उत्थितिः *f.*, उन्नोलनं, उच्छ्रयः, समुच्छ्रयः, उच्छ्रायः, समुच्छ्रायः, उच्छ्रितिः *f.*, उत्कर्षः, उन्नतिः, समुन्नतिः *f.*, उन्नयनं; 'of a weapon to strike,' शस्त्रोत्थापनं, शस्त्रोद्यमः.

RAISING, *part.* उत्थापकः -का -कं, उत्थापयन् -यन्ती -यत् (त्), उत्थाप्य indec.; 'raising a dreadful dust,' रजो घोरम् उद्धून्वन् -न्वती &c. or उद्धून्वानः -ना -नं or उद्धूय or समुद्धूय indec.

RÁJAH, RÁJA, *s.* (King) राजा *m.* (न्) *see* KING.

RÁJPOOT, *s.* (Man of the military tribe) राजपुत्रः, *see* MILITARY, *a.*

RAKE, *s.* (Libertine) व्यसनी *m.* (न्), स्त्रीव्यसनी *m.*, लम्पटः, नागरः, धूर्तः, विटः, *see* LIBERTINE.—(The tool) तृणसंग्रहणी, घाससंग्रहणी, दन्तयुक्तः शुष्कतृणादिसंग्रहणयोग्यो दण्डः or यष्टिः.

To RAKE, *v. a.* (Gather or clear with a rake) पूर्वोक्तयन्त्रेण संग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or शुध्.—(Collect) संग्रह्, संचि, समानी.

To RAKE, *v. n.* (Lead a dissolute life) लम्पटवद् आचर् (c. 1. -चरति

Digitized by Google

-रितुं), लाम्पट्यं कृ, व्यभिचर्, भोगासक्तः -क्ता -क्तं भू, विषयासक्तः &c. भू.

RAKISH, *a.* व्यसनी -निनी -नि (न्), व्यसनीयः -या -यं, लाम्पटिकः -की -कं, लम्पटस्वभावः -वा -वं, व्यभिचारी &c., छेकः -का -कं. *See* DISSOLUTE, LIBERTINE.

RAKISHNESS, *s.* व्यसनिता, व्यभिचारः, लम्पटता. *See* LIBERTINISM.

To RALLY, *v.a.* (Restore to order troops thrown into confusion) पिञ्जलसैन्यान् or विद्रुतसैन्यान् or भग्नव्यूहसैन्यान् पुनर् व्यूहीकृ or व्यूह् (c. 1. -ऊहते -हितुं) or पुनः समूहीकृ or पुनर् व्यूहक्रमेण रच्, पुनः संग्रह्.—(Jest, banter) अवहस्, अपहस्, अवहासभूमिं कृ, अवक्षिप्, मुखरीकृ.

To RALLY, *v.n.* (Recover order) पुनर् व्यूहीभू or समूहीभू.—(Recover strength) पुनर् बलं लभ् (c. 1. लभते, लब्धुं), समुत्था (c. 1. -तिष्ठति -थातुं, rt. स्था), प्रत्याश्वस् (c. 2. -श्वसिति -तुं), पुनः स्वस्थः -स्था -स्थं भू.

RAM, *s.* (Male sheep) मेषः, उरभः, मेद्रः, मेराडः, मेराढः -राढकः, मेठः, अविः *m.*, एडकः, ऊर्णायुः *m.*, उरणः -राकः, रोमशः, लोमशः, वृष्णिः *m.*, भेडः, हुडुः *m.*, सम्फालः, संस्फालः.—(Battering ram), *see* the word.—(The sign aries) मेषः.

To RAM, *v. a.* बलात् or बलेन निविश् (c. 10. -वेशयति -यितुं) or प्रविश्, अतिबलेन निविश्, अतिबलेन प्रणुद् (c. 6. -णुदति -णोत्तुं), अतिबलेन ताडयित्वा निविश् or अन्तः प्रविश् or सन्नाध् (c. 1. -नाधते -धितुं) or सम्पीड् (c. 10. -पीडयति -यितुं).

RÁMA, *s.* The name common to three incarnations of Vishnu, viz. 1. Paraśu Ráma, or Ráma with the axe, the sixth avatár or incarnation of Vishnu. He was a Brahman, the son of the holy sage Jamadagni, and born at the beginning of the second or Treta age, for the purpose of repressing the tyranny, and punishing the violence of the Kshatriya or military tribe. He appears to typefy the class of Brahmans, and their contest with the Kshatriyas. Some of his names are परशुरामः -मकः, परशुधरः, पर्शुरामः, जमदग्निसुतः, जामदग्न्यः. 2. Rámachandra or the moon-like Ráma, the seventh incarnation of Vishnu. He was born into the world as the son of Daśaratha, king of Oude, and great grandson of Raghu, at the close of the second or Treta age, for the purpose of destroying the demons who infested the earth, and especially Rávana, the Daitya sovereign of Ceylon. His names are रामचन्द्रः, रघुनन्दनः, रघूद्वहः, रघुवरः, रघुनाथः, राघवः, रावणारिः *m.*, रावणजित् *m.*, दशास्यजित् *m.*, मखत्राता *m.* (तृ), रामभद्रः. 3. Balaráma, or the strong Ráma, according to some the eighth incarnation of Vishnu. He was born at the end of the Dwápara, or third age, as the seventh son of Vasudeva and Devakí, and therefore elder brother of Krishna, but was transferred from the womb of Devakí to that of Rohiní the other wife of Vasudeva. Hence one of his names सङ्कर्षणः. He is sometimes regarded as an incarnation of the serpent Ananta or Śesha, and hence called, अनन्तः, शेषः. His other names are बलरामः, बलदेवः, बलभद्रः, बलः, बलल्लः, हलायुधः, हलभृत् *m.*, हली *m.* (न्), सीरपाणिः *m.*, कृष्णाग्रजः, अच्युताग्रजः, प्रियमधुः *m.*, मधुप्रियः, मुष्टिकान्तकः, गुप्तचरः, रेवतीरमणः, रेवतीशः. *See* BALARÁMA.

To RAMBLE, *v. n.* इतस्ततो भ्रम् (c. 4. भाम्यति, भमितुं) or परिभ्रम् or विह् (c. 1. -हरति -हर्तुं) or पर्यट् (c. 1. -अटति -टितुं), इतस्ततो भ्रमणं कृ or परिभ्रमणं कृ, विहारं कृ.

RAMBLE, *s.* भ्रमणं, परिभ्रमणं, विहारः, विहरणं, पर्यटनं, इतस्ततो विहारः, इतस्ततोगमनं.

RAMBLER, *s.* विहारी *m.* (न्), परिभ्रमकः, भ्रमणकारी *m.* (न्), भ्रमणकृत् *m.*

RAMBLING, *s.* इतस्ततो विहारः or विहरणं or भ्रमणं. *See* RAMBLE.

RAMIFICATION, *s.* (Small branch) उपशाखा, क्षुद्रशाखा, सूक्ष्मशाखा, मूलखण्डः.—(State of having many branches) बहुशाखत्वं, सूक्ष्मशाखाबाहुल्यं.

RAMIFIED, *p. p.* बहुशाखी -खिनी -खि (न्), शाखी &c., सशाखः -खा -खं, सूक्ष्मशाखामयः -यी -यं, उपशाखामयः &c., बहुशाखाविशिष्टः -ष्टा -ष्टं.

To RAMIFY, *v. a.* बहुशाखीकृ, उपशाखारूपेण पृथक्कृ or विभिद्.

To RAMIFY, *v. n.* शाखा (nom. शाखायते), सूक्ष्मशाखारूपेण विस्तृ in pass. (-स्तीर्यते), उपशाखारूपेण भिन्नीभू or विभिद् in pass. or विच्छिद् in pass.

RAMIFYING, *part.* शाखी -खिनी -खि (न्), शाख्यः -ख्या -ख्यं. *See* RAMIFIED.

RAMMER, *s.* मुद्गरः, दीर्घमुद्गरः, घनः, दीर्घघनः, ताडनी.

RAMMISH, *a.* उग्रगन्धः -न्धा -न्धं, तीक्ष्णगन्धः &c., उग्रगन्धिः -न्धिः -न्धि.

RAMMISHNESS, *s.* उग्रगन्धत्वं, तीक्ष्णगन्धत्वं, उग्रत्वं, दौर्गन्ध्यं *m.*

RAMOUS, *a.* शाखी -खिनी -खि (न्), शाख्यः -ख्या -ख्यं, काण्डीरः -रा -रं.

To RAMP, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग्, नृत्, क्रीड्, विस्फुल्.

RAMP, *s.* प्लवः -वनं, प्लुतं, वल्गितं, क्ष्म्यः -म्या, उत्प्लुतं, उत्फालः.

RAMPANCY, *a.* अतिवृद्धिः *f.*, उत्सेकः, उद्रेकः, मर्य्यादातिक्रमः, अपरिमितता, अतिरिक्तता, अतिक्रमः, उत्क्रमः, आधिक्यं.

RAMPANT, *a.* अतिरिक्तः -क्ता -क्तं, उद्रिक्तः &c., उत्सिक्तः &c., मर्य्यादातीतः -ता -तं, अतिक्रान्तमर्य्यादः -दा -दं, उत्क्रान्तमर्य्यादः &c., अतिमर्य्यादः &c., अपरिमितः &c.

RAMPART, *s.* प्राकारः, वप्रः, चयः, धूलिकेदारः, धूलिकुट्टिमं, प्रगराडी.

RAMROD, *s.* चूर्णसंहननी, चूर्णसम्पीडनी, चूर्णप्रणोदनी, चूर्णप्रणोदकदण्डः, आग्नेयनाडीसङ्गतो लोहदण्डः स च नाडीमुखनिविष्टो भूत्वा आग्नेयचूर्णगुलिकादि संहतीकरोति.

RANCID, *a.* उग्रगन्धः -न्धा -न्धं, उग्रगन्धिकः -का -कं, उग्ररसः -सा -सं, तीक्ष्णरसः &c., विरसः &c., कुरसः &c., पर्युषितः -ता -तं.

RANCIDNESS, RANCIDITY, *s.* उग्ररसत्वं, तीक्ष्णरसत्वं, विरसता, वैरस्यं, कुरसता.

RANCOR, *s.* अतिद्वेषः, द्रोहबुद्धित्वं, अतिद्रोहः, दीर्घद्वेषः, अतिमात्सर्यं, अतिमत्सरता, विषपूर्णता, दंशः, दंशशीलता, अतिदंशः. जिघांसा. *See* MALIGNITY, MALICE.

RANCOROUS, *a* अतिद्वेषी -षिणी -षि (न्), दीर्घद्वेषी &c., दंशी &c., अतिदंशी, दंशशीलः -ला -लं, द्रोहबुद्धिः -द्धिः -द्धि, अतिद्रोही -हिणी &c., अतिमत्सरी &c., जिघांसुः -सुः -सु, विषहृदयः -या -यं, विषपूर्णः -र्णा -र्णं. *See* MALIGNANT.

RANCOROUSLY, *adv.* अतिद्वेषेण, सद्रोहं, अतिद्रोहेण, सदंशं, सविषं.

RANDOM, *a.* सन्धानहीनः -ना -नं, सन्धानरहितः -ता -तं, अभिसन्धिहीनः &c., अभिसन्धानहीनः &c., आकस्मिकः -की -कं, आगन्तुकः -का -कं, अनियमितः -ता -तं, अनियतः -ता -तं, अनिरूपितः &c., अयन्त्रितः &c., निर्यन्त्रणः -णा -णं, यादृच्छिकः -की -कं, आपतिकः &c., दैवागतः -ता -तं, दैवोपस्थितः &c., अकस्मादुपस्थितः &c., अकस्मादागतः &c., अकस्मादुत्पन्नः -न्ना -न्नं, अकस्मात्कृतः &c., अशृङ्खलः -ला -लं; 'at random,'

Digitized by Google

अकस्मात्, सन्धानं विना, अभिसन्धानं विना, अनियतं, अयन्त्रितं, नियन्त्रणं, यदृच्छया, अशृङ्खलं; to talk at random,' प्रलप् (c. 1. -लपति -पितुं).

RANDY, *a.* उन्मत्तः -त्ता -त्तं, मत्तः &c., उच्छृङ्खलः -ला -लं.

To RANGE, *v. a.* (Arrange, dispose) विन्यस्, विरच्, विधा, संविधा, प्रतिविधा, व्यूह्, व्यूहीकृ, क्रमेण स्था, पंक्तिक्रमेण विन्यस्.

To RANGE, *v. n.* (Wander) भ्रम् (c. 4. भाम्यति, भ्रमितुं), परिभ्रम्, भ्रमणं कृ, अट्, पर्यट्, विचर् (c. 1. -चरति -रितुं), विहृ (c. 1. -हरति -हर्तुं), गाह् (c. 1. गाहते -हितुं), व्रज्, प्रव्रज्, पर्यटनं कृ.—(Lie in a particular direction, be situated) वृत् (c. 1. वर्त्तते -र्त्तितुं), स्था (c. 1. तिष्ठति, स्थातुं).

RANGE, *s.* (A row, rank) पंक्तिः *f.*, श्रेणिः -णी *f.*, राजिः -जी *f.*, राजिका, आवलिः -ली, पङ्क्तिः *f.*, वीथिः -थी, ततिः *f.*, आलिः -ली *f.*, पालिः -ली *f.*, माला, विस्रोली.—(Class, grade) वर्गः, गणः. वर्णः.—(Reach, compass, extent, room) विषयः, गोचरः -रं, परिमाणं, प्रसरः; 'the range of sight,' चक्षुर्विषयः, नयनविषयः; 'of an arrow,' बाणगोचरः -रं, शरायणं, वातरायणं; 'within range of the ear,' कर्णगोचरः -रा -रं; 'the utmost range,' पारः; 'beyond the range,' अविषयः -या -यं, विषयातिक्रान्तः -न्ता -न्तं, विषयातीतः &c., अगम्यः -म्या -म्यं, अपारणीयः -या -यं.—(Kitchen range) पाकोपकरणपंक्तिः *f.*—(Range of mountains) कुलपर्व्वतः, कुलगिरिः *m.*, कुलशैलः; 'range of mountains supposed to encircle the earth,' चक्रवालः, लोकालोकः. *See* the names of the seven ranges under MOUNTAIN.

RANGED, *p. p.* विन्यस्तः -स्ता -स्तं, व्यवस्थापितः &c., व्यूढः -ढा -ढं.

RANGER, *s.* परिभ्रमकः.—(Keeper of a forest) अरण्यरक्षकः -क्षी *m.* (न्), अरण्यपालः -लकः, अरण्याध्यक्षः.

RANK, (Line, row) पंक्तिः *f.*, श्रेणिः -णी *f.*, राजिः -जी *f.*, राजिका, आवलिः -ली, पङ्क्तिः *f.*, ततिः *f.*, आलिः -ली *f.*, पालिः -ली *f.*—(Station in life) पदं, पदविः -वी *f.*, आस्पदं, स्थानं, वृत्तिः *f.*—(High station, high rank or dignity) उच्चपदं, परमपदं, उच्चपदता, उच्चपदविः *f.*, प्रतिपत्तिः *f.*, उत्कृष्टपदं, उत्कर्षः, कुलोत्कर्षः, औत्कर्षं, उत्कृष्टता, अभिजातता, आभिजात्यं, आभिजनं, उन्नतिः *f.*, समुन्नतिः *f.*, कुलीनता, कौलीनं, प्रधानता, मान्यता, सेव्यता, मर्य्यादा, मानं; 'man of high rank,' उच्चपदस्थः, उच्चपदभाक् *m.* (ज्), पदभाक् *m.*, प्रतिपत्तिमान् *m.* (त्), अभिजातः, अभिजनवान् *m.* (त्), कुलीनः. *See* HIGH-BORN.—(Class, order) वर्गः, गणः, वर्णः.—(Ranks of the army, line of soldiers) व्यूहः, सैन्यपंक्तिः *f.*, दण्डः; 'breaking the ranks,' व्यूहभङ्गः, व्यूहभेदः.

RANK, *a.* (Luxuriant in growth) अतिवर्धिष्णुः -ष्णुः -ष्णु, अतिवर्धी -र्धिनी -र्धि (न्), अतिवर्धनः -ना -नं, अतिस्फीतः -ता -तं, अतिपीनः -ना -नं.—(Strong to the smell or taste) उग्रगन्धः -न्धा -न्धं, उग्रगन्धिकः -का -कं, उग्ररसः -सा -सं, उग्रः -ग्रा -ग्रं, तीक्ष्णगन्धः &c., तीक्ष्णरसः &c.

To RANK, *v. a.* (Place in a line) पंक्तिक्रमेण स्था in caus. (स्थापयति -यितुं) or विन्यस् or विरच्.—(Place in a particular class or station) वर्णक्रमेण or वर्गक्रमेण विरच् (c. 10. -रचयति -यितुं) or विन्यस्, यथावर्णं or यथावर्गं स्था in caus., विशेषपदस्थं -स्थां कृ, विशेषगणाभ्यन्तरं -रां कृ, विशेषवर्गाभ्यन्तरं -रां कृ.

To RANK, *v. n.* (Be placed or stand in a line) पंक्तिक्रमेण स्था.—(Be placed in a particular class or station) विशेषपदस्थः -स्था -स्थं भू, विशेषगणाभ्यन्तरः -रा -रं भू, विशेषवर्गाभ्यन्तरः -रा -रं भू, विशेषपदयुक्तः -क्ता -क्तं भू, यथावर्गं स्था.

To RANKLE, *v. n.* (Be inflamed, fester) अन्तस् तप् in pass. (तप्यते), अन्तर् दह् (c. 4. दह्यति -ते, दग्धुं), व्रणवत् पक्वः -क्वा -क्वं भू or पूय् (c. 1. पूयते -यितुं) or सपूयः -या -यं भू.—(Become more violent or virulent) उग्रतरः -रा -रं भू, तीक्ष्णतरः -रा -रं भू, रौद्रतरः -रा -रं भू, तिग्मतरः -रा -रं भू, चण्डतरः -रा -रं भू, भृश (nom. भृशायते).

RANKNESS *s.* (Too great luxuriance) अतिवृद्धिः *f.*, अधिकवृद्धिः *f.*, अतिवर्धनं, अत्यन्तवर्धनं, अतिस्फीतिः *f.*, अतिस्फातिः *f.*, अतिपीनता, उत्सेकः, उद्रेकः.—(Of smell or taste) उग्रता, तीक्ष्णता, उग्रगन्धता, तीक्ष्णगन्धता, उग्ररसत्वं, उग्रस्वादः, उग्रवासः.

To RANSACK, *v. a.* (Plunder, pillage), *see* the words.—(Search by turning things over) अस्तव्यस्तीकृत्य अन्विष् (c. 4. -इष्यति -ष्टुं) or अनुसन्धा (c. 3. -दधाति -धातुं), अनुसन्धानार्थं or अन्वेषणार्थम् अस्तव्यस्तीकृ.

RANSACKED, *p. p.* लुण्ठितः -ता -तं, अन्वेषणार्थम् अस्तव्यस्तीकृतः -ता -तं.

RANSOM, *s.* परिक्रयणमूल्यं, परिक्रयमूल्यं, त्राणमूल्यं, तारणमूल्यं, निस्तारमूल्यं, उद्धारमूल्यं, निष्कृतिमूल्यं, त्राणं, उद्धारः, मुक्तिः, मोक्षः; 'he gave his life a ransom for many,' बहूनां त्राणाय or बहूनां मोक्षाय स्वप्राणान् ददौ.

To RANSOM, *v. a.* मूल्यं दत्त्वा परिक्री (c. 9. -क्रीणीते -क्रेतुं), सममूल्यकद्रव्यं दत्त्वा परिक्री or त्रै (c. 1. त्रायते -त्रातुं) or परित्रै, मूल्यं दत्त्वा निस्तृ (c. 10. -तारयति -यितुं) or तॄ or उद्धृ (c. 1. -हरति -हर्तुं) or मुच् (c. 6. मुञ्चति, मोक्तुं) or मोक्ष् (c. 10. मोक्षयति -यितुं).

RANSOMED, *p. p.* परिक्रीतः -ता -तं, त्रातः -ता -तं, निस्तारितः -ता -तं.

RANSOMER, *s.* परिक्रेता *m.* (तृ), त्राता *m.* (तृ), निस्तारकः, परिक्रयकृत्.

To RANT, *v. n.* उच्चैःस्वरेण शब्दालङ्कारमयं फल्गुवाक्यं वद् (c. 1. वदति -दितुं), उच्चैःस्वरेण शब्दमात्रमयं वाक्यं वद्, अतिशब्दनवाक्यं वद्, उच्चैःस्वरेण प्रलप्.

RANT, *s.* शब्दमात्रमयं फल्गुवाक्यं or निरर्थकवाक्यं, शब्दमात्रवाक्यं, अलङ्कारमात्रमयम् अतिशब्दनवाक्यं, प्रलापः.

RANTER, *s.* शब्दमात्रवादी *m.* (न्), शब्दमात्रवक्ता *m.* (क्तृ), महाशब्दकवाक्यवादी *m.*, प्रलापी *m.*

To RAP, *v. a.* (Strike with a quick, sharp blow) लघु or लघुप्रहारेण तड् (c. 10. ताडयति -यितुं), लघु प्रहृ (c. 1. -हरति -हर्तुं) or आहन् (c. 2. -हन्ति -न्तुं) or अभिहन्.—(Snatch or hurry away) हृ, अपहृ, अभिहृ, ग्रह्, कृष्, समाकृष्.—(Seize the mind, affect with rapture) मनो or चित्तं हृ or अपहृ, हृदयं हृ or ग्रह्, परमहर्षेण मुह् (c. 10. मोहयति -यितुं).

RAP, *s.* लघुप्रहारः, लघ्वाघातः, आघातः, आहतिः *f.*, ताडनं.

RAPACIOUS, *a.* हरणशीलः -ला -लं, अपहरणशीलः &c., अपहारबुद्धिः -द्धिः -द्धि, अपहारप्रवणः -णा -णं, अपहारकः -का -कं, अपहारी -रिणी -रि (न्), ग्रसनशीलः &c., ग्रसनबुद्धिः &c., ग्रहणशीलः -ला -लं, सर्व्वग्राही &c., सर्व्वहारी &c., सर्व्वग्रासी &c., लुभः -भा -भं, अतिलुभः &c., अतिलोभी &c., लोभी &c., विप्रलुम्पकः -का -कं, हिंसकः &c., साहसिकः -की -कं.

RAPACIOUSLY, *adv.* हरणशीलत्वात्, अपहारबुद्धा, अतिलोभेन.

RAPACIOUSNESS, RAPACITY, *s.* हरणशीलता, अपहारशीलत्वं, अपहारबुद्धिः *f.*, अपहारकत्वं, अपहारिता, ग्रहणशीलता, लुभता, अतिलोभः, साहसिकत्वं.

RAPE, *s.* बलात्कारेणाभिगमः, बलात्कारसम्भोगः, स्त्रीहरणं, कन्याहरणं, धर्षणं, स्त्रीधर्षणं, बलात्कारधर्षणं, हठधर्षणं, कन्यादूषणं, हठसम्भोगः, साहसं, राक्षसं.

Digitized by Google

RAPID, *a.* शीघ्रः -घ्रा -घ्रं, त्वरितः -ता -तं, सत्वरः -रा -रं, त्वरान्वितः -ता -तं, द्रुतः &c., क्षिप्रः -प्रा -प्रं, तूर्णः -र्णा -र्णं, वेगवान् -वती -वत् (त्), महावेगः -गा -गं, शीघ्रगः -गा -गं. *See* QUICK, SWIFT.

RAPIDITY, RAPIDNESS, *s.* शीघ्रता, त्वरा, सत्वरता, द्रुतता, शैघ्र्यं, वेगः, महावेगः, क्षिप्रता, तरस् *n.*, तूर्णता. *See* QUICKNESS, VELOCITY.

RAPIDLY, *adv.* शीघ्रं, त्वरितं, सत्वरं, क्षिप्रं, द्रुतं, अशनैस्, महावेगेन, शीघ्र in comp.; 'going rapidly,' शीघ्रगामी -मिनी &c.

RAPIER, *s.* क्षुद्रखड्गः, क्षुद्रकृपाणः, कृपाणः, निस्त्रिंशः.

RAPINE, *s.* लुण्ठनं, लुण्ठा, लुण्टनं, अपहारः -रणं, युद्धेनापहारः -रणं, हरणं, उपद्रवः, विप्लवः, हठः. *See* PILLAGE, PLUNDER.

To RAPINE, *v. a.* लुण्ठ्, अपहृ, उपद्रु. *See To* PILLAGE, PLUNDER.

RAPPER, *s.* ताडयिता *m.* (तृ), ताडकः, प्रहर्त्ता *m.* (र्त्तृ).

RAPT, *a.* हर्षमोहितः -ता -तं, सम्मोहितः &c., परमहृष्टः -ष्टा -ष्टं, परमानन्दितः -ता -तं, हर्षोन्मत्तः -त्ता -त्तं, आनन्दमत्तः &c., मत्तः &c.

RAPTURE, *s.* परमहर्षः, परमानन्दः, अत्यानन्दः, अत्यन्तहर्षः, हर्षसम्मोहः, आनन्दमोहः, मोहावस्था, आनन्दावेशः, आह्लादावेशः, हर्षावेशः, परमसुखं, ब्रह्मसुखं, ब्रह्मानन्दः, प्रहर्षः, प्रमदः, उन्मदः, मादः, हर्षोन्मत्तता, हर्षोन्मादः, रोमहर्षः, पुलकितत्वं; 'to feel rapture,' अत्यन्तं हृष् or प्रहृष्.

RAPTURED, *a.* हर्षमोहितः -ता -तं. *See* ENRAPTURED, ECSTASIED.

RAPTUROUS, *a.* मादनः -ना -नं, उन्मादनः &c., मोहनः &c., परमानन्ददः -दा -दं, परमानन्दकरः -रा -रं, परमहर्षदः &c., सपुलकः -का -कं. *See* ECSTATIC.

RAPTUROUSLY, *adv.* सपरमानन्दं, परमहर्षेण, परमाह्लादेन, समादं.

RARE, *a* (Not frequent, scarce) विरलः -ला -लं, विरलागतः -ता -तं, दुर्लभः -भा -भं, दुर्लभ्यः -भ्या -भ्यं, दुष्प्रापः -पा -पं, दुष्प्राप्यः -प्या -प्यं, अलभ्यः -भ्या -भ्यं, अप्राप्यः &c., असाधारणः -णा -णं, असामान्यः -न्या -न्यं, अप्रसिद्धः -द्धा -द्धं, क्वाचित्कः -की -त्कं, कादाचित्कः &c., कार्हिचित्कः &c., चिरचेष्टितः -ता -तं.—(Unusually excellent) परमोत्कृष्टः -ष्टा -ष्टं, अत्युत्कृष्टः &c., सद्वीत्कृष्टः &c., परमः -मा -मं, उत्तमः &c., अत्युत्तमः &c., अद्भुतः -ता -तं, अतुल्यः -ल्या -ल्यं, अपूर्वः -र्वा -र्वं, सौन्दर्य्यविरलः -ला -लं.—(Thin, not dense) सूक्ष्मः -क्ष्मा -क्ष्मं, अघनः -ना -नं.

RAREFACTION, *s.* तापप्रयुक्तसूक्ष्मता -त्वं, तापजनितसूक्ष्मता, सूक्ष्मता, सौक्ष्म्यं.—(The act) सूक्ष्मीकरणं.

RAREFIED, *p. p.* सूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मीभूतः -ता -तं, सूक्ष्मीकृतः &c.

To RAREFY, *v. a.* सूक्ष्मीकृ, सूक्ष्मं -क्ष्मां कृ, सूक्ष्मतां कृ or जन्.

To RAREFY, *v. n.* सूक्ष्मीभू, सूक्ष्मः -क्ष्मा -क्ष्मं भू, सूक्ष्मतरः -रा -रं भू.

RARELY, *adv.* विरलं, वैरल्येन, क्वचित्, कदाचित्, कर्हिचित्, यथाकथाच, कथमपि, दुर् in comp.; as, 'rarely to be met with,' दुर्लभः -भा -भं, दुष्प्रापः -पा -पं.

RARENESS, *s.* (Infrequency, scarceness) विरलता -त्वं, वैरल्यं, दौर्लभ्यं, दुर्लभता, दुर्लभ्यता, अप्रसिद्धता -त्वं, दुष्प्रापत्वं, असामान्यता, असाधारणता, क्वाचित्कता -त्वं.—(Unusual excellence) अत्युत्कृष्टता, परमोत्कृष्टता, सद्वीत्कृष्टता, उत्तमता, अतुल्यता, अपूर्वता.—(Thinness) सूक्ष्मता, सौक्ष्म्यं.

RARITY, *s.* (Scarceness), *see* the last.—(Rare thing) दुर्लभवस्तु *n.*, दुर्लभद्रव्यं, उत्कृष्टद्रव्यं, कौतुकं, कौतूहलं.

RASCAL, *s.* धूर्तः, दुर्जनः, दुरात्मा *m.* (न्), दुर्वृत्तः, कृष्णाकर्म्मा *m.* (न्), खलः, अधमवृत्तिः *m.*, दुष्टजनः, पापात्मा *m.*, जघन्यवृत्तिः *m.*, नीचवृत्तिः *m.*, अपकृष्टवृत्तिः, पापिष्टः, शठः, दुष्कर्म्मा *m.*

RASCALITY, *s.* धूर्तता, दुर्जनता -त्वं, दौर्जन्यं, दौरात्म्यं, दुरात्मत्वं, दुर्वृत्तत्वं, खलता, दुष्टता, पापिष्टता -त्वं, शठता, जघन्यता, अपकृष्टता, अधमवृत्तित्वं, कैतवं, वञ्चनं.

RASCALLY, *a.* दुर्वृत्तः -त्ता -त्तं, पापिष्टः -ष्टा -ष्टं, अधमवृत्तिः -त्तिः -त्ति, जघन्यवृत्तिः &c., शठः -ठा -ठं, कापटिकः -की -कं, दुष्टः -ष्टा -ष्टं.

To RASE, *v. a.* (Graze) घृष् (c. 1. घर्षति -र्षितुं). *See To* RAZE.

RASH, *a.* अविमृश्यकारी -रिणी -रि (न्), असमीक्ष्यकारी &c., अविचार्य्यकारी &c., साहसी &c., साहसिकः -की -कं, जाल्मः -ल्मा -ल्मं, गमकारी &c., प्रमत्तः -त्ता -त्तं, अपरिणामदर्शी &c., अदूरदर्शी &c., असावधानः -ना -नं, अविचारी &c.—(Of measures) अविचार्य्यं कृतः -ता -तं, अविमृश्य कृतः &c., अविचारपूर्व्वः -र्व्वा -र्व्वं, असमीक्षापूर्व्वः &c., अनवेक्षापूर्व्वः &c.

RASH, *s.* (Eruption) दद्रुः *m.*, खर्ज्जूः *f.*, उद्दः, स्फोटोत्पत्तिः *f.*, विस्फोटः, वरटी, रक्तवरटी, रक्तस्फोटोत्पत्तिः *f.*, रक्तस्फोटः.

RASHER, *s.* (Of bacon) वल्लूरखण्डः, वल्लूरछेदः, शूकरमांसखण्डः.

RASHLY, *adv.* अविचार्य्य, असमीक्ष्य, अविमृश्य, सहसा, अनवेक्षया, अविचारेण, अविचारपूर्व्वं, असमीक्षापूर्व्वं, अनवेक्षापूर्व्वं, दर्पात्, दर्पेण.

RASHNESS, *s.* अविमृश्यकारिता -त्वं, असमीक्ष्यकारिता -त्वं, अविचार्य्यकारिता, गमकारित्वं, साहसं, साहसिकत्वं, विषमसाहसं, दुःसाहसं, अविचारः, अविचारिता, अनवेक्षा, असमीक्षा, अविवेकः, असावधानता, अपरिणामदर्शनं, मदः, दर्पः; 'of youth,' यौवनदर्पः.

RASP, *s.* घर्षणी, घर्षणयन्त्रं, निर्घर्षणकः, घर्षकः, आघट्टकः.

To RASP, *v. a.* पूर्व्वोक्तयन्त्रेण घृष् (c. 1. घर्षति -र्षितुं).

RASPBERRY, *s.* कण्टकगुल्मफलं, कण्टकस्तम्बफलं.

RASPED, *p. p.* पूर्व्वोक्तयन्त्रेण घर्षितः -ता -तं, आघर्षितः &c.

RASURE, *s.* (Scraping) घर्षणं, उल्लेखनं, तक्षणं. *See* ERASURE.

RAT, *s.* उन्दुरुः *m.*, उन्दरुः *m.*, उन्दरः, इन्दुरः, इन्दुरुः *m.*, मूषिकः -का, मुषकः -का, मूषी *m.*, (न्), मूषीकः -का, आखुः *m.*, बिलेशयः, वज्रदन्तः, तुदुमः, धान्यारिः *m.*, महिन्धकः, आखनिकः; 'swarm of rats,' आखूत्थः; 'rat-hole.' मूषिकबिवरं, आखुबिलं, मूषिकोत्करः.

To RAT, *v. n.* (Desert one's party and go over to the opposite) स्वपक्षं त्यक्त्वा अन्यपक्षम् or विपरीतपक्षम् आश्रि (c. 1. -श्रयति -यितुं).

RATABLE, *a.* शुल्कयोग्यः -ग्या -ग्यं, करयोग्यः &c., शुल्कस्यानं.

RATAN, *s.* वेतसः, कीचकः, वेणुः *m.*, वेत्रः -त्रं, वंशः, वानीरः, वञ्जुलः, भेदी *m.* (न्) छैदिकः.

RAT-CATCHER, *s.* मूषिकघाती *m.* (न्), मूषिकग्राही *m.*, आखुघातः -तकः.

RATE, *s.* (Price) मूल्यं, अर्घः.—(Degree of price or value) अर्घबलाबलं, मूल्यबलाबलं, मूल्यप्रमाणं, अर्घपरिमाणं, अर्घप्रमाणं; 'market rate,' आपणिकः.—(Proportion, degree) प्रमाणं, परिमाणं, मानं, मितिः *f.*, परिमितिः *f.*; 'at the rate of,' प्रमाणेन -णतस्.—(Degree of velocity) वेगः, गतिः *f.*, गतिप्रमाणं, गतिमानं, गतिमितिः *f.*; 'rate of the velocity of light,' प्रकाशकिरणगतिमितिः *f.*; 'at a quick rate,' द्रुतगत्या, लघुगत्या, द्रुतपदं.—(Settled allowance) निरूपितमूल्यं, नियतमूल्यं, परिमितमूल्यं.—(Tax, assessed sum) शुल्कः -ल्कं, करः, देयं, ग्राह्यं.—(At any rate) तावत्.

To RATE, *v. a.* (Set a value on, fix the value) मूल्यं निरूप् (c. 10. -रूपयति -यितुं), अर्घं निरूप्, अर्घबलाबलं निरूप् or निर्णी, अर्घपरिमाणं निरूप्, मूल्यप्रमाणं निरूप्, द्रव्यादिमूल्यं निरूप् or स्था in caus., अर्घं संख्या in caus. (-ख्यापयति -यितुं), अर्घसंख्यापनं कृ, मूल्यनिर्णयं कृ, मूल्यनिरूपणं कृ.—(Fix the magnitude or proportion) प्रमाणं or परिमाणं निरूप् or निर्णी, प्रमाणनिरूपणं कृ, प्रमाणनिर्णयं कृ.—(Chide, scold) निन्द् (c. 1. निन्दति -न्दितुं), उपालभ् (c. 1. -लभते -लब्धुं) भर्त्स्.

RATED, *p. p.* निरूपितमूल्यः -ल्या -ल्यं, निर्णीतमूल्यः &c., संख्यातः -ता -तं,

Digitized by Google

संख्यापितः &c., परिसंख्यातः &c.—(Chid) निन्दितः -ता -तं, उपालब्धः -ब्धा -ब्धं.

RATHER, *adv.* (Preferably) वरं usually followed by न च or न पुनर् as 'rather death than poverty,' वरं मृत्युर् न च दारिद्र्यं. The root शिष् with वि may be used to express the sense of 'rather,' as 'rather death than dishonour,' अपमानात् प्राणत्यागो विशिष्यते or the sense may be expressed by some other construction, as 'I would rather that the sons of Dhritaráshtra should kill me in the battle,' यदि मां धार्त्तराष्ट्रा रणे हन्युस् तन् मे क्षेमतरं भवेत्. *See* PREFERABLE, PREFERABLY.—(Somewhat, a little) ईषत्, किञ्चित्, किमपि; 'rather less,' ईषदूनः -ना -नं, किञ्चिदूनः -ना -नं.

RATI, *s.* (The wife of Kámadeva the god of love) रतिः*f.*, कामपत्नी, कामप्रिया, कामकला, स्मरप्रिया, कामिः *f.*, रागलता, प्रीतिः*f.*, रेवा, मायावती, केलिकिला.

RATIFICATION, *s.* सत्याकृतिः*f.*, सत्याकरणं, सत्यापनं, सत्यङ्कारः, सत्यकरणं, दृढीकरणं, स्थिरीकरणं, संस्तम्भः, निश्चयकरणं, निश्चितकरणं.

RATIFIED, *p. p.* सत्याकृतः -ता -तं, दृढीकृतः -ता -तं, स्थिरीकृतः &c.

RATIFIER, *s.* सत्यापकः, सत्यकारी *m.* (न्), सत्यङ्कारी *m.*, दृढकारी *m.*, स्थिरकारी *m.*, निश्चयकारी *m.*, संस्तम्भकारी *m.*

To RATIFY, *v. a.* सत्याकृ, सत्यं -त्यां कृ, सत्य (nom. in caus. सत्यापयति -यितुं), दृढीकृ, स्थिरीकृ, द्रढ (nom. द्रढयति -यितुं), निश्चयं कृ, संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं).

RATING, *s.* (Chiding) निन्दा, भर्त्सनं, निर्भर्त्सनं, उपालम्भः.

RATIO, *s.* प्रमाणं, मानं, परिमाणं, क्रमः. *See* PROPORTION.

To RATIOCINATE, *v. n.* विचारं कृ, विचर् (c. 10. -चारयति -यितुं), वितर्कं कृ.

RATIOCINATION. *s.* विचारः -रणं, वितर्कः -र्कणं, तर्कविद्या, तर्कज्ञानं.

RATION, *s.* आहारभागः, आहारांशः, निरूपिताहारांशः.

RATIONAL, *a.* (Having the faculty of reasoning) ज्ञानशक्तिकः -का -कं, ज्ञानशक्तिसम्पन्नः -न्ना -न्नं, चिच्छक्तिकः &c., सचेतनः -ना -नं, सचेताः -ताः -तः (स्), बुद्धिजीवी -विनी -वि (न्), तर्कशक्तिकः &c., तर्कशक्तिसम्पन्नः -न्ना -न्नं, सज्ञानः -ना -नं, बुद्धिमान् -मती -मत् (त्), तर्कज्ञः -ज्ञा -ज्ञं.—(Agreeable to reason) युक्तः -क्ता -क्तं, उपयुक्तः &c., यथायुक्तः &c., यथायोग्यः -ग्या -ग्यं, यथोचितः -ता -तं, न्याय्यः -य्या -य्यं, युक्तिसिद्धः -द्धा -द्धं, न्यायसिद्धः &c., न्यायानुसारी -रिणी &c., यथार्थः -र्था -र्थं, युक्तिमान् &c., सयुक्तिकः -का -कं, उपपत्तिमान् &c., उपपन्नः -न्ना -न्नं, तर्कविद्यानुसारी &c.

RATIONALE, *s.* (Detailed account of principles) उपपत्तिः *f.*

RATIONALISM. *s.* हेतुवादः, कारणवादः, हेतुदर्शनं, हैतुकत्वं.

RATIONALIST, *s.* हेतुवादी *m.* (न्), कारणवादी *m.*, हेतुदर्शी, हैतुकः.

RATIONALITY, RATIONALNESS, *s.* (Power of reasoning) ज्ञानशक्तिः*f.*, चिच्छक्तिः *f.*, तर्कशक्तिः *f.*—(Reasonableness) युक्तता, युक्तिः *f.*, उपयुक्तता, युक्तिसिद्धता, न्यायसिद्धता.

RATIONALLY, *adv.* युक्तं, यथायुक्तं, न्यायतस्, न्यायानुसारेण, तर्कानुसारेण -रतस्, उपपन्नं, यथोचितं, युक्तितस्, यथार्थं, तर्कविद्यानुसारेण.

To RATTLE, *v. n.* क्वण् (c. 1. क्वणति -णितुं), शिञ्ज् (c. 2. शिङ्क्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, ध्वन् (c. 1. ध्वनति -नितुं), स्तन् (c. 1. स्तनति -नितुं), स्वन् (c. 1. स्वनति -नितुं), विरु (c. 2. -रौति -रवितुं), क्वणक्वण (nom. क्वणक्वणायते), क्वण्क्वन (nom. क्वण्क्वनायते), क्वण्क्वनं कृ, क्वण्क्वा (nom. क्वण्क्वायते), क्वणितं कृ, शिञ्जितं कृ, क्वणक्वणशब्दं कृ.—(Utter words in a clattering manner) जल्प्, चटचटशब्दं कृ, चटचट (nom. चटचटायते), कटकट.

To RATTLE, *v. a.* ध्वन् in caus. (ध्वनयति, ध्वानयति -यितुं), क्वण् in caus., स्वन् in caus., स्तन् in caus., शिञ्ज् in caus.

RATTLE, *s.* (Rattling nosse) क्वणितं, क्वणनं, स्तनितं, स्तननं, ध्वनिः *m.*, ध्वनितं, शिञ्जितं, क्वण्क्वनं, क्वण्क्वा, क्वणत्कारः, क्वणक्वणशब्दः.—(Clattering talk) जल्पनं, जल्पितं, चटचटशब्दः.—(Instrument for making a rattling sound) शिञ्जिनी, क्वणनी, क्वण्क्वनी.

RATTLING, *s.* क्वणितं, क्वणनं, क्वण्क्वनं; 'of thunder,' रसितं, स्तनितं, गर्जितं, मेघनिर्घोषः. *See* RATTLE.

RATTLING, *part.* क्वणन् -णन्ती -णत् (त्), क्वणितः -ता -तं, क्वण्क्वनकारी -रिणी -रि (न्), शिञ्जी -ञ्जिनी -ञ्जि (न्), ध्वनन् &c., स्वनन् &c.

To RAVAGE, *v. a.* उपप्लु (c. 1. -प्लवते -प्लोतुं), उपद्रु (c. 1. -द्रवति -द्रोतुं), बाध् (c. 1. बाधते- धितुं), प्रबाध्, परिबाध्, अवमृद् (c. 1. -मर्दति -र्दितुं), विप्लवं कृ, उपप्लवं कृ, उपद्रवं कृ, अवमर्दं कृ.

RAVAGE, *s.* उपप्लवः, विप्लवः, उपद्रवः, अवमर्दः -र्दनं, उपमर्दः, बाधा -धनं, प्रबाधा, उत्पातः, उच्छेदः, विनाशः.

RAVAGED, *p. p.* उपद्रुतः -ता -तं, विप्लुतः &c., उपप्लुतः &c., अवमर्दितः &c., प्रबाधितः &c., विनाशितः &c., उच्छिन्नः -न्ना -न्नं.

RAVAGER, *s.* उपद्रवी *m.* (न्), विप्लवकारी *m.* (न्), प्रबाधकः, अवमर्दकः.

RÁVANA, *s.* (The Daitya sovereign of Ceylon, fabled as having ten faces. He was killed by Rámachandra) रावणः, लङ्कापतिः *m.*, लङ्केशः, दशाननः, दशास्यः, दशमुखः, दशग्रीवः, दशकण्ठः.

To RAVE, *v. n.* (Be delirious, talk incoherently) चित्तविभ्रमात् or भ्रान्तचित्तत्वात् प्रलापं कृ, चित्तविप्लवात् प्रलप् (c. 1. -लपति -पितुं), चैतन्यनाशाद् जल्प् (c. 1. जल्पति -ल्पितुं) or जल्पनं कृ.—(Wander in mind) भ्रान्तचित्तः -न्ता -न्तं भू, चैतन्यरहितः -ता -तं भू, नष्टचेतनः -ना -नं भू, बुद्धिभ्रष्टः -ष्टा -ष्टं भू, उन्मद् (c. 4. -माद्यति -मदितुं), प्रमद्.

To RAVEL, *v. a.* (Untwist) उद्ग्रन्थ् (c. 9. -ग्रथ्नाति, c. 1. -ग्रन्थति -न्थितुं), समुद्ग्रन्थ्, तन्तूद्ग्रन्थनं कृ, तन्तूद्ग्रन्थनं कृ, विश्लिष् in caus.—(Entangle, entwist) ग्रन्थ्, ग्रन्थिलीकृ, आकुच्, संश्लिष्टीकृ, व्यावृत् in caus.

RAVELED, *p.p.* (Untwisted) उद्ग्रथितः -ता -तं, समुद्ग्रथितः &c., उद्ग्रन्थितः &c., विश्लिष्टः -ष्टा -ष्टं.—(Twisted) ग्रथितः &c., आकुचितः &c., संश्लिष्टः -ष्टा -ष्टं.

RAVELIN, *s.* दुर्गबहिःस्थितः सेतुद्वययुक्तः परिकूटविशेषः.

RAVELINGS, *s. pl.* उद्ग्रथिततन्तवः *m. pl.*, विश्लिष्टतन्तवः, उद्ग्रथिततन्ताणि *n. pl.*

RAVEN, *s.* द्रोणकाकः, काकोलः, काकालः, दग्धकाकः, पर्वतकाकः, अरण्यवायसः, वनाश्रयः, क्रूरारावी *m.* (न्), पललप्रियः, महाप्राणः, दरा -री, काकपक्षी *m.* (न्).

To RAVEN, *v. a.* and *n.* अतिगृध्नुत्वेन भक्ष् (c. 10. भक्षयति -यितुं), अतिलोभेन आमिषं ग्रस् (c. 1. ग्रसते -सितुं), गृध् (c. 4. गृध्यति, गर्धितुं), धस्मरः -रा -रं भू, हिंसनशीलः -ला -लं भू.

RAVENOUS, *a.* अतिधस्मरः -रा -रं, अतिबुभुक्षुः -क्षुः -क्षु, अतिक्षुधितः -ता -तं, क्षुधापीडितः &c., क्षुधातुरः -रा -रं, आमिषलोभी -भिनी -भि (न्), अतिभक्षकः -का -कं, ग्रसनशीलः -ला -लं, हरणशीलः &c., हिंसनशीलः -ला -लं. *See* HUNGRY.

RAVENOUSLY, *adv.* अतिक्षुधितवत्, अतिधस्मरवत्, अतिबुभुक्षया.

RAVENOUSNESS, *s.* अतिबुभुक्षा, अतिधस्मरत्वं, अतिभक्षकत्वं, अतिक्षुधा.

RE-UNITED, *p. p.* पुनःसंयुक्तः -क्ता -क्तं, पुनःसंसृष्टः -ष्टा -ष्टं, पुनर्मिलितः -ता -तं.

To REVEAL, *v. a.* प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, विवृ (c. 5. -वृणोति -णुते -वरितुं -रीतुं), अपवृ, अपावृ, व्यक्तीकृ, व्यञ्ज् (c. 7. -अनक्ति -अंक्तुं, c. 10. -अञ्जयति -यितुं) प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), आविष्कृ, प्रादुष्कृ.—(Tell) सूच्, ज्ञा in caus., ख्या in caus., निविद्.—(A secret) रहस्यभेदं कृ.

REVEALED, *p. p.* प्रकाशितः -ता -तं, विवृतः &c., आविष्कृतः &c., प्रादुष्कृतः &c., व्यक्तीकृतः &c., सूचितः &c., ज्ञापितः &c., प्रकटितः -ता -तं.

REVEALER, *s.* प्रकाशकः, विवरणकृत्, सूचकः, ज्ञापकः, ख्यापकः; 'of a secret,' रहस्यभेदकः, रहस्यप्रकाशकः.

REVEALING, REVEALMENT, *s.* प्रकाशनं, विवरणं, विवृतिः *f.*, व्यक्तीकरणं, प्रकटीकरणं, आविष्करणं, स्पष्टीकरणं; 'of a secret,' रहस्यभेदः,

To REVEL, *v. n.* अतिशयहास्यशब्देन उत्सवं कृ, रात्रिकाले हासिकादिशब्देन उत्सवं कृ or अतिशयतुमुलेन सम्मीतिं कृ or केलिं कृ; 'one who revels in his lusts,' कामकामी *m.* (न्).

REVEL, *s.* अतिशयहास्यशब्देन उत्सवः, हासिकादिशब्देन सम्मीतिः *f.* or केलिः *m. f.*; 'master of the revels,' केलिसचिवः.

REVELATION, *s.* प्रकाशनं, विवरणं, प्रादुष्करणं, आविष्करणं, स्पष्टीकरणं, प्रकाशितवाक्यं, ईश्वरप्रत्यादेशः. *See* REVEALING.

REVELER, *s.* अतिशयहास्यशब्देन or अतिशयहासिकादिशब्देन उत्सवकारी *m.* (न्), सम्मीतिरतः, सम्मीतिप्रसक्तः, सम्मीतिप्रियः, पानोत्सुकः, पानासक्तः.

REVELRY, *s.* अतिशयहासिकादिशब्देन उत्सवकरणं. *See* REVEL.

To REVENGE, *v. a.* प्रतिकृ, वैरशुद्धिं कृ, वैरप्रतिक्रियां कृ, वैरप्रतिकारं कृ, अपकारशुद्धिं कृ, अपकारं प्राप्य प्रत्यपकृ, हिंसां प्राप्य प्रतिहिंस् (c. 7. -हिनस्ति, c. 1. -हिंसति -सितुं), परेणापकारे कृते प्रत्यपकारं कृ, अपकारात् प्रति अपकारं कृ, परेण द्रोहे कृते प्रतिद्रोहं कृ, वैरोद्धारं कृ, वैरनिर्यातनं कृ, निर्यत् (c. 10. -यातयति -यितुं), अपकारमोक्षं कृ; 'to revenge an insult,' अवलेपप्रतिकारं कृ, अवलेपशुद्धिं कृ.

REVENGE, *s.* वैरशुद्धिः *f.*, वैरप्रतिक्रिया, वैरप्रतिकारः, वैरप्रतिकृतिः *f.*, वैरनिर्यातनं, वैरोद्धारः, अपकारशुद्धिः *f.*, प्रतिकारः, प्रतीकारः, प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकर्म्म *n.* (न्), विप्रतिकारः, प्रतिहिंसा, प्रत्यपकारः, प्रतिद्रोहः, निर्यातनं, प्रतिफलं, प्रतिविधिः *m.*—(Feeling or desire of revenge) प्रतिहिंसाबुद्धिः *f.*, प्रतिद्रोहबुद्धिः *f.*, प्रत्यपकारबुद्धिः *f.*, प्रतिद्वेषः, प्रत्यपकारेच्छा, प्रतिद्रोहेच्छा, वैरिता, जिघांसा.

REVENGED, *p. p.* प्रतिकृतः -ता -तं, निर्यातितः &c., वैरशुद्धः -द्धा -द्धं.

REVENGEFUL, *a.* प्रतिहिंसाबुद्धिः -द्धिः -द्धि, प्रतिद्रोहबुद्धिः &c., प्रत्यपकारबुद्धिः &c., प्रतिहिंसाशीलः -ला -लं, प्रतिहिंसेच्छुः -च्छुः -च्छु, प्रतिद्रोहेच्छुः &c., प्रत्यपकारेच्छुः &c., प्रतिकारेच्छुः &c., निर्यातनशीलः &c., दंशी -शिनी -शि (न्), द्विषन्नपः -पा -पं.

REVENGEFULLY, *adv.* प्रतिहिंसाबुद्धा, प्रत्यपकारबुद्धा, प्रतिद्रोहशीलत्वात्.

REVENGEFULNESS, *s.* प्रतिहिंसाशीलत्वं, प्रतिहिंसाबुद्धिः *f.*, प्रत्यपकारशीलता.

REVENGER, *s.* प्रतिकारकः, प्रतिहिंसकः, वैरशोधकः, प्रत्यपकारकः.

REVENUE, *s.* बलिः *m.*, करः, आयः, राजस्वं, राजधनं, राजकरः -रं, उत्पत्तं, नृपांशः, राजांशः, उपस्वत्वं, भागधेयः, कारः, लाभः, प्राप्तिः *f.*

To REVERBERATE, *v. a.* (Send or beat back) प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रतिप्रक्षिप्, प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिहननं कृ, प्रतिघातं कृ.

To REVERBERATE, *v. n.* प्रतिध्वन् (c. 1. -ध्वनति -नितुं), प्रतिध्वनिं कृ, प्रतिध्वननं कृ, प्रतिनद् (c. 1. -नदति -दितुं), अनुनद्, व्यनुनद्, प्रतिनादं कृ, प्रतिगर्ज् (c. 1. -गर्जति -र्जितुं), प्रतिगर्जनं कृ; 'cause to reverberate,' अनुनद् in caus., व्यनुनद्, प्रतिनद्. *See To* RESOUND.

REVERBERATING, *part.* प्रतिध्वनन् -नन्ती -नत् (त्), प्रतिगर्जन् &c., प्रतिनादयन् &c.

REVERBERATION, *s.* (Sending or beating back) प्रतिक्षेपः -पणं, प्रतिप्रक्षेपः -पणं, प्रतिघातः, प्रतिहननं.—(Of sound) प्रतिध्वनिः *m.*, प्रतिध्वननं, प्रतिनादः, अनुनादः, व्यनुनादः, प्रतिगर्जनं -ना, प्रतिशब्दः, प्रतिनिनदः.

To REVERE, *v. a.* पूज् (c. 10. पूजयति -यितुं), अभिपूज्, सम्पूज्, मन् (c. 10. मानयति -यितुं), सम्मन्, अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), समर्च्, अभ्यर्च्, उपास् (c. 2. -आस्ते -आसितुं), सेव् (c. 1. सेवते -वितुं, c. 10. सेवयति -यितुं), आदृ (c. 6. -द्रियते -दर्तुं), भज् (c. 1. भजते, भक्तुं), नमस्कृ, पुरस्कृ, सत्कृ, पूजां कृ, आदरं कृ. *See* OBEISANCE.

REVERED, *p. p.* पूजितः &c., सेवितः &c., अर्चितः &c. *See* HONOURED.

REVERENCE, *s.* पूजा -जनं, मानं, सम्मानं, अर्चनं -ना, अर्ची, अभ्यर्चा -र्चनं, आदरः, सेवा -वनं, अर्हा -र्हणं -र्हा, भक्तिः *f.*, श्रद्धा, नमस् ind., सत्कारः, सपर्य्या, आराधनं, पुरस्कारः, मान्यत्वं, बहुमानं, सम्भ्रमः, उपासना; 'act of reverence,' नमस्कारः, नमस्या, प्रणामः, प्रणतिः *f.*, नमस्, अभिवादनं, अभिवन्दनं; 'your reverence,' भगवान् *m.* (त्), भवान् *m.*

To REVERENCE, *v. a* पूज्, सम्पूज्, नमस् (nom. नमस्यति). *See To* REVERE.

REVERENCED, *p. p.* पूजितः -ता -तं, आदृतः &c., सम्मानितः &c., उपासितः &c.

REVEREND, *a.* पूज्यः -ज्या -ज्यं, पूजनीयः -या -यं, पूजार्हः -र्हा -र्हं, अर्च्यः -र्च्या -र्च्यं, अर्चनीयः -या -यं, आर्य्यः -र्य्या -र्य्यं, मान्यः -न्या -न्यं, सम्मान्यः &c., माननीयः -या -यं, अर्चार्हः &c., अर्ह्यः -र्ह्या -र्ह्यं, अर्हणीयः &c., आदरणीयः &c., नमस्कार्य्यः -र्य्या -र्य्यं, नमस्यः -स्या -स्यं, उपास्यः &c., उपासनीयः &c.. श्रद्धेयः &c., पूजिलः -ला -लं, भट्टारः -रा -रं.

REVERENTIAL, REVERENT, *a.* सादरः -रा -रं, आदरयुक्तः -क्ता -क्तं, पूजकः -का -कं, सम्पूजकः &c., पूजाकारी -रिणी &c., आदरबुद्धिः -द्धिः -द्धि, आदरकारी &c., भक्तिमान् -मती -मत् (त्), भक्तिसूचकः -का -कं, आदरसूचकः &c.

REVERENTIALLY, *adv.* सादरं, समानं, सनमस्कारं, आदरपूर्व्वं, शिरसा.

REVERIE, *s.* ध्यानं, चिन्ता, भावना, अनर्थकध्यानं, विशृङ्खलध्यानं, अप्रकृतध्यानं, अनर्थकचिन्ता, अनर्थकवासना, अनर्थकभावना, बुद्धिविलासः.

REVERSAL, *s.* परावर्त्तः -र्त्तनं, परावृत्तिः *f.*, प्रत्यावर्त्तनं, परिवर्त्तनं.

To REVERSE, *v. a.* (Turn upside down) परावृत् (c. 10. -वर्त्तयति -यितुं), परिवृत्, पर्यस्, विपर्यस्, अधोमुखीकृ, *see To* OVERTURN, INVERT.—(Change to the contrary) परिवृत्, विपरीतं -तां कृ, विपर्यस्तं -स्तां कृ, व्यत्यस्तं -स्तां कृ, विपर्यासं कृ, विपर्ययं कृ, वैपरीत्यं कृ, व्यतिक्रमं कृ.

Digitized by Google

(In law, overthrow a decision) परावृत्, परावर्त्तनं कृ, परावृत्तिं कृ.

Reverse, *s.* (Change, vicissitude) परिवर्त्तनं, परिवृत्तिः *f.*, आवृत्तिः *f.*, पर्य्ययः, अवस्थानारं, परिणामः, विकारः.—(The contrary) विपर्य्ययः, विपर्य्यासः, व्यत्ययः, व्यत्यासः, विपर्य्यायः, प्रत्यवायः, विपरीतं, वैपरीत्यं, व्यतिक्रमः, विपक्षः, प्रतिपक्षः.—(Reverse of) expressed by इतर, *see* Opposite, *a.*—(Misfortune) कार्य्यविपत्तिः *f.*, *see* Misfortune.

Reverse, *a.* विपरीतः -ता -तं, विपर्य्यस्तः -स्ता -स्तं, व्यत्यस्तः &c., व्यतिक्रान्तः -न्ता -न्तं, विरुद्धः -द्धा -द्धं, अपसव्यः -व्या -व्यं, प्रसव्यः &c., सव्यः &c., प्रतीपः -पा -पं, विप्रतीपः &c., प्रतीकः -का -कं, विपक्षः -क्षा -क्षं, प्रतिपक्षः &c., विलोमः -मा -मं, प्रतिलोमः &c., प्रातीपिकः -की -कं, अर्वाचीनः -ना -नं, प्रतिकूलः -ला -लं, वामः -मा -मं; 'reverse order,' व्यतिक्रमः.

Reversed, *p. p.* विपर्य्यस्तः -स्ता -स्तं, पर्य्यस्तः &c., व्यतिक्रान्तः -न्ता -न्तं, व्यत्यस्तः -स्ता -स्तं, अपवृत्तः -त्ता -त्तं.—(Turned upside down or with the end downwards) अधोमुखीकृतः -ता -तं, अधोमुखः -खा -खं, अधःकृतः -ता -तं, अधरोत्तरः -रा -रं, अधराग्रः -ग्रा -ग्रं.—(As a sentence) परावृत्तः -त्ता -त्तं, परावर्त्तितः -ता -तं.

Reversely, *adv.* विपर्य्ययेण, व्यतिक्रमेण, विपरीतं, वैपरीत्येन, आदिपश्चात्.

Reversible, *a.* परावर्त्यः -र्त्त्यी -र्त्त्यं, परावर्त्तनीयः -या -यं, परिवर्त्तनीयः &c.

Reversion, *s.* परावर्त्तः -र्त्तनं, परावृत्तिः *f.*, प्रत्यावर्त्तनं, प्रत्यावृत्तिः *f.*, पर्यावृत्तिः *f.*, पर्यावर्त्तनं, परिवर्त्तनं, आवृत्तिः *f.*—(Succession, right to future possession) उत्तराधिकारः, अन्यभोगोत्तराधिकारः, अन्यभोगोत्तरप्राप्तिः *f.* -प्रापणं.

Reversionary, *a.* अन्यभोगोत्तरप्राप्यः -प्या -प्यं, अन्यभोगोत्तरप्रापणीयः -या -यं, उत्तरप्रापणीयः &c., उत्तरभोग्यः -ग्या -ग्यं, क्रमेण भोग्यः &c.

To Revert, *v. n.* प्रत्यावृत् (c. 1. -वर्त्तते -र्त्तितुं), परावृत्, पर्यावृत्, प्रतिनिवृत्, परिवृत्, आवृत्, पुनर् आवृत्, प्रत्यागम्, पुनर् आगम्.

Revertible, *a.* परावर्त्यः -र्त्त्यी -र्त्त्यं, परिवर्त्तनीयः -या -यं, परिवर्त्यः &c.

To Review, *v. a.* (Look back on) पश्चाद् अवलोक् (c. 1. -लोकते -कितुं, c. 10. -लोकयति -यितुं), पश्चाद् दृश् (c. 1. पश्यति, द्रष्टुं), अनुदृश्, गतावलोकनं कृ, गतकालावलोकनं कृ, पश्चादवलोकनं कृ.—(Examine again, revise) पुनः परीक्ष् (c. 1. -ईक्षते -क्षितुं), पुनर् निरूप् (c. 10. -रूपयति -यितुं), पुनर् अनुसन्धा (c. 3. -दधाति -धातुं), पुनर् आलोक् or अवलोक् or समवलोक् or दृश्, पुनर् विचर्, पुनर्विचारं कृ.—(Inspect) निरूप्, परीक्ष्, अनुसन्धा, दृश्.—(A book, &c.) काव्यग्रन्थादेर् गुणदोषौ परीक्ष् or प्रकाश्, गुणदोषविवेचनं कृ, दोषादोषविचारं कृ, ग्रन्थदोषादोषविचारं कृ.

Review, *s.* (Looking back) पश्चाद्दर्शनं, पश्चाद्दृष्टिः *f.*, पश्चादवलोकनं, अनुदर्शनं, अनुदृष्टिः *f.*, गतावलोकनं.—(Examining again) पुनःपरीक्षा, पुनर्निरूपणं, पुनरनुसन्धानं, पुनर्दर्शनं, पुनर्दृष्टिः *f.*, पुनर्विचारः.—(Inspection) निरूपणं, दर्शनं, निरीक्षणं, परीक्षणं.—(Of a book) काव्यग्रन्थादेर् गुणदोषविवेचनं or गुणदोषविचारः, ग्रन्थगुणदोषविवेचनं or गुणदोषप्रकाशनं or दोषादोषप्रकाशनं.

Reviewer, *s.* ग्रन्थदोषादोषप्रकाशकः, ग्रन्थगुणदोषविवेचकः -विचारकः.

To Revile, *v. a.* तिरस्कृ, निन्द् (c. 1. निन्दति -न्दितुं), आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), समाक्रुश्, भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), सम्भर्त्स्, कुत्स्, अभिकुत्स्, तर्ज्, उपालभ्, अपवद्, शप्, अभिशप्, क्षिप्, परिक्षिप्, अधिक्षिप्, अतिब्रू, मुखरीकृ, भष्, गुप् in des., अभिशंस्, *see To* Reproach, Abuse; 'to revile in return,' प्रत्याक्रुश्.

Reviled, *p. p.* निन्दितः -ता -तं, तिरस्कृतः &c., आक्रुष्टः -ष्टा -ष्टं, उपालब्धः -ब्धा -ब्धं, निर्भर्त्सितः &c., जुगुप्सितः &c., अभिशस्तः -स्ता -स्तं.

Reviler, *s.* निन्दकः, आक्रोशकः, आक्रोष्टा *m.* (ष्टृ), उपक्रोष्टा *m.*, निर्भर्त्सकः.

Reviling, *s.* निन्दा -न्दनं, तिरस्कारः, आक्रोशः -शनं, उपक्रोशः, पारुष्यं, परुषोक्तिः *f.*, परुषवचनं, निर्भर्त्सनं, जुगुप्सा, मौखर्य्यं, अपवादः, अभिवादः, तर्जनं, उपालम्भः, कुत्सा -त्सनं, गालिप्रदानं, क्षेपः, अवक्षेपः, परिभाषणं.

Revisal, *s.* पुनर्दृष्टिः *f.*, अनुदृष्टिः *f.*, अनुदर्शनं, पुनःशोधः -धनं, पुनःपरीक्षा.

To Revise, *v. a.* (Review), *see* the word.—(Amend) शुध् (c. 10. शोधयति -यितुं), परिशुध्, संशुध्, विशुध्, पुनः शुध्, शोधनं कृ, पुनःशोधनं कृ.

Revised, *p. p.* शोधितः -ता -तं, पुनःशोधितः &c., पुनर्निरूपितः &c.

Revision, *s.* पुनर्दृष्टिः *f.*, अनुदृष्टिः *f.*, पुनःशोधः -धनं, शुद्धिः *f.*, पुनरावृत्तिः *f.*

Revival, *s.* (Return to life) पुनर्जीवनं, प्रतिजीवनं, सञ्जीवनं, उज्जीवनं, पुनःप्राणनं, पुनर्जीवनप्राप्तिः *f.*, पुनश्चैतन्यप्राप्तिः *f.*, *see* Recovery.—(Return to a vigorous or healthy state) पुनःस्वास्थ्यप्राप्तिः *f.*, पुनःस्वास्थ्यं, समुत्थानं, समुत्थितिः *f.*, पुनःसंस्थितिः *f.*, पुनरुपस्थितिः *f.*, पुनःप्रवृत्तिः *f.*—(Recovery from misfortune) विपदुद्धारः, आपदुद्धारः, पुनरुद्धारः.

To Revive, *v. n.* उज्जीव् (c. 1. -जीवति -वितुं), विजीव्, प्रतिजीव्, संजीव्, पुनर् जीव्, जीवनं or संज्ञां or चैतन्यं पुनः प्राप् or लभ् or आपद् or प्रतिपद्, समुत्था (c. 1. समुत्तिष्ठति -त्थातुं, rt. स्था), उत्था, प्रत्याश्वस् (c. 2. -श्वसिति -तुं), समाश्वस्, प्रत्यापन्नजीवनः -ना -नं भू, प्रत्यागतप्राणः -णा -णं भू, प्रत्यापन्नचेतनः -ना -नं भू. *See To* Recover.

To Revive, *v. a.* जीव् (c. 10. जीवयति -यितुं), प्रतिजीव्, संजीव्, उज्जीव्, पुनर् जीव्, पुनः सजीवं -वां कृ, पुनः सजीवीकृ, पुनर् उत्था in caus. (उत्थापयति -यितुं, rt. स्था) or समुत्था, पुनः संस्था, प्रत्याश्वस् (c. 10. -श्वासयति -यितुं), समाश्वस्, *see To* Recover, *v. a.*—(Renew) नवीकृ.

Revived, *p. p.* प्रतिजीवितः -ता -तं, सञ्जीवितः &c., पुनः सजीवीकृतः &c., प्रत्यापन्नजीवनः -ना -नं, प्रत्यागतप्राणः -णा -णं, प्रत्यापन्नसंज्ञः -ज्ञा -ज्ञं, प्रत्याश्वस्तः -स्ता -स्तं, समाश्वासितः -ता -तं.—(Renewed) नवीकृतः -ता -तं, नवीभूतः &c.

Revocable, *a.* परावर्त्यः -र्त्त्यी -र्त्त्यं, परावर्त्तनीयः -या -यं, लोप्यः -प्या -प्यं.

Revocation, *s.* परावर्त्तः -र्त्तनं, परावृत्तिः *f.*, लोपः, खण्डनं, प्रत्यादेशः, अनुशयः, विप्रतिपत्तिः *f.* *See* Recall, Repeal.

To Revoke, *v. a.* परावर्त्तं कृ, परावृत्, लुप्, खण्ड्, लोपं कृ, अनुशयं कृ, प्रत्यादिश् (c. 6. -दिशति -देष्टुं). *See To* Recall, Repeal.

To Revolt, *v. n.* शासनत्यागं कृ, अधिकारत्यागं कृ, राजद्रोहं कृ, राजाभिद्रोहं कृ, स्वस्वामित्यागं कृ, स्वपक्षत्यागं कृ, द्रोहं कृ. *See To* Rebel.

Revolt, *s.* राजद्रोहः, राजाभिद्रोहः, शासनत्यागः, अधिकारत्यागः, स्वस्वामित्यागः, स्वपक्षत्यागः, शासनपरित्यागः, क्षोपः, प्रक्षोपः. *See* Rebellion.

Revolter, *s.* शासनत्यागी *m.* (न्), राजद्रोही *m.*, स्वस्वामित्यागी *m.* (न्).

Revolting, *a.* बीभत्सजनकः -का -कं, घृणोत्पादकः &c., अतिद्वेषजनकः &c., परमद्वेषजनकः &c., अत्यन्तद्वेषजनकः &c., गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः &c., कुत्सितः -ता -तं; 'revolting appearance,' बीभत्सदर्शनं.

Revolution, *s.* (Revolving) परिवर्त्तनं, परिवर्त्तः, परिवृत्तिः *f.*, आवर्त्तनं, आवृत्तिः *f.*, आवर्त्तः, विवर्त्तः -र्त्तनं, परिवर्त्तिः *f.*, परावृत्तिः *f.*, भ्रमणं, परिभ्रमणं, भ्रान्तिः, *f.*, घूर्णिः *f.*, घूर्णनं; 'of a wheel,' चक्रावर्त्तः, चक्रगतिः *f.*—(Motion of a body round a fixed point) भ्रमणं, परिभ्रमणं.—(Motion of any thing which brings it back to the same point) परिवृत्तिः *f.*, परिवर्त्तनं, आवर्त्तः, पुनरावर्त्तः, पर्य्ययः, पर्य्यायः, विपर्य्ययः; 'of the seasons,' ऋतुपर्य्यायः; 'of all the seasons,' सर्व्वर्तुपरिवर्त्तः; 'of employment or duty,' कर्म्मविपर्य्ययः; 'of time,' कालचक्रं.—(Continued course) गतिः *f.*,

Digitized by Google

प्रवृत्तिः *f.*, चक्रगतिः *f.*; 'of a planet,' ग्रहगतिः.—(Change in the government) राज्यपरिवर्त्तनं, राज्यरीतिपरिवर्त्तनं, राज्यव्यवस्था--परिवर्त्तनं, राज्यस्थितिपरिवर्त्तनं.

REVOLUTIONARY, *a.* राज्यपरिवर्त्तनसम्बन्धी -न्धिनी &c., राज्यपरिवर्त्तकः -का -कं.

REVOLUTIONIST, *s.* राज्यपरिवर्त्तकः, राज्यरीतिपरिवर्त्तकः, राज्यस्थिति-परिवर्त्तकः.

To REVOLVE, *v. n.* परिवृत् (c. 1. -वर्त्तते -र्त्तितुं), विवृत्, सम्परिवृत्, विपरिवृत्, व्यावृत्, आवृत्, भ्रम् (c. 4. भ्राम्यति, c. 1. भ्रमति -मितुं), परिभ्रम्, घूर्ण् (c. 1. घूर्णति -र्त्ते -र्णितुं), विघूर्ण्, व्याघूर्ण्, परिघूर्ण्, लुठ् (c. 6. लुठति -ठितुं), लुड् (c. 1. लोटति -टितुं); 'the earth revolves on its own axis,' स्वाक्षोपरि भ्रमति पृथिवी; 'pains and pleasures revolve like a wheel,' चक्रवत् परिवर्त्तन्ते दुःखानि च सुखानि च.

To REVOLVE, *v. a.* (Cause to turn round) भ्रम् in caus. (भ्रमयति, भ्रामयति -यितुं), परिवृत् (c. 10. -वर्त्तयति -यितुं), विवृत् आवृत्, घूर्ण् in caus. (घूर्णयति -यितुं), परिघूर्ण्, विघूर्ण्, व्याघूर्ण्, संसृ (c. 10. -सारयति -यितुं), लुठ् (c. 10. लोठयति -यितुं) or लुड्.—(In the mind) मनसा विचर् (c. 10. -चारयति -यितुं) or विगण् or विमृश् or वितर्क् or विवेचनं कृ.

REVOLVED, *p. p.* परिवर्त्तितः -ता -तं, परिवृत्तः -त्ता -त्तं, परावृत्तः &c., विवृत्तः &c., विवर्त्तितः -ता -तं, भ्रान्तः -न्ता -न्तं, घूर्णितः &c.; 'in the mind,' मनसा विचारितः &c.

REVOLVING, *part.* परिवर्त्ती -र्त्तिनी -र्त्ति (न्), परिवर्त्तमानः -ना -नं, विवर्त्तमानः &c., आवर्त्तमानः &c., भ्रमन्, -मन्ती -मत् (त्), भ्रमी -मिणी &c., घूर्णायमानः &c.

REVULSION, *s.* विपरीतकर्षणं, पश्चात्कर्षणं, प्रतिकर्षणं, पराकर्षणं.

To REWARD, *v. a.* पारितोषिकं दा, वरं दा, प्रतिफलं दा, फलं दा, दानेन परितुष् (c. 10. -तोषयति -यितुं) or सन्तुष् or सम्भू (c. 10. -भावयति -यितुं), दक्षिणां दा, प्रतिफल (nom. प्रतिफलयति -यितुं). *See To* RECOMPENSE, REQUITE.

REWARD, *s.* पारितोषिकं, प्रतिफलं, फलं, दक्षिणा, वरः, वेतनं, प्रतिदानं, मानं, बहुमानं, *see* RECOMPENSE; 'worthy of a reward,' दक्षिणार्हः -र्हा -र्हं, दक्षिणीयः -या -यं, दक्षिण्यः -ण्या -ण्यं; 'the reward of learning,' विद्यावरः.

REWARDED, *p. p.* गृहीतपारितोषिकः -का -कं, गृहीतदक्षिणः -णा -णं, गृहीतवेतनः -ना -नं, प्रतिफलितः -ता -तं, परितोषितः &c., दानपरितोषितः &c.

REWARDER, *s.* फलदाता *m.* (तृ), प्रतिफलदः, वरदाता *m.*, वरदः.

RHAPSODIC, RHAPSODICAL, *a.* असम्बद्धः -द्धा -द्धं, अबद्धः &c., असङ्गतः -ता -तं, विसङ्गतः &c., अयुक्तिकः -का -कं, अनर्थकः &c., निरन्वयः -या -यं, अनन्वितः -ता -तं.

RHAPSODY, *s.* असम्बद्धकाव्यं, असम्बद्धवाक्यं, असङ्गतवाक्यं, असम्बद्धकविता.

RHETORIC, *s.* अलङ्कारविद्या, अलङ्कारशास्त्रं, शब्दालङ्कारविद्या, काव्यालङ्कारादिविषयका विद्या, शब्दालङ्कारः, वाङ्मयविद्या, साहित्यशास्त्रं, प्रवचनविद्या, प्रवचनशास्त्रं, परार्थानुमानं, वाङ्मयं.

RHETORICAL, *a.* आलङ्कारिकः -की -कं, अलङ्कारविद्यासम्बन्धी -न्धिनी -न्धि (न्), अलङ्कारशास्त्रसम्बन्धी &c., अलङ्कारी &c., अलङ्कारविषयकः -का -कं, अलङ्काररूपः -पा -पं, प्रवचनविद्यासम्बन्धी &c., वाङ्मयः -यी -यं; 'rhetorical expression,' अलङ्कारः.

RHETORICALLY, *adv.* अलङ्कारविद्यानुसारेण, अलङ्कारशास्त्रानुसारेण, अलङ्कारशास्त्रवत्.

RHETORICIAN, *s.* अलङ्कारविद्याज्ञः, अलङ्कारशास्त्रज्ञः, अलङ्कारशास्त्रपण्डितः, अलङ्कारशास्त्राध्यापकः, प्रवचनपटुः *m.* *See* ORATOR.

RHEUM, *s.* श्लेष्मा *m.* (न्), श्लेष्मकः, दूषिः -षी *f.*, दूषिका, दूषीका, क्लेदनः, क्लेदकः, वारुखं, पिञ्जेटः, कफः, नेत्रमलं.

RHEUMATIC, *a.* (Pertaining to rheumatism) वातरोगसम्बन्धी -न्धिनी &c., वातुलः -ला -लं, वातीयः -या -यं.—(Affected with it) वातरोगी -गिणी -गि (न्), वातग्रस्तः -स्ता -स्तं, वायुग्रस्तः &c., वातुलः -ला -लं, वातूलः &c., वातकी &c., वाताहतः -ता -तं, वातोपहतः &c., पवनाहतः &c.

RHEUMATISM, *s.* वातरोगः, वायुरोगः, वातामयः, वातव्याधिः *m.*, वातः, वायुः *m.*, रसवातः, अनिलामयः, अनिलरोगः, अनिलः, धनुर्वातः, पटीरं, गृध्रसी; 'acute rheumatism,' वातरक्तं, वातगुल्मः, वातशोणितं; 'chronic, from dyspepsia,' आमवायुः *m.*, आमवातः; 'rheumatism in the joints,' सन्धिवातः, सन्धिवायुः *m.*; 'shooting rheumatism in the bones,' अस्थिशूलः -लं, अस्थितोदः.

RHEUMY, *a.* श्लेष्मलः -ला -लं, श्लेष्मणः -णा -णं, श्लेष्मवान् -वती -वत् (त्), श्लेष्ममयः -यी -यं, श्लेष्मयुक्तः -क्ता -क्तं; 'rheumy eyed,' क्लिन्नाक्षः -क्षा -क्षं. *See* BLEAR-EYED.

RHINOCEROS, *s.* खड्गः, खड्गी *m.* (न्), एकशृङ्गः, गण्डः -ण्डकः, गण्डाङ्गः, एकचरः, वनोत्साहः, तैतिलः; 'its horn,' खड्गः; 'the female,' खड्गधेनुः *f.*

RHOMB, RHOMBUS, *s.* विषमचतुरस्रं, विषमचतुष्कोणः.

RHUBARB, *s.* रेवसं, रेवाचिनी. These are Mahrattí words.

RHYME, *s.* (Correspondence of sounds in poetry) यमकः -कं, अन्ययमकः -कं, अन्यशब्दयमकः -कं, अन्यशब्दसमता, अनुप्रासः, मित्राक्षरं.—(A word to correspond in sound to another) यमकशब्दः, यमकः -कं.—(Poetry) कविता, काव्यं.

To RHYME, *v. n.* (Correspond in sound) यमकः -का -कं भू, यमकशब्दो भू.—(Make rhyme) कवितां कृ, काव्यं कृ, अनुप्रासं कृ.

RHYMELESS, *a.* यमकहीनः -ना -नं, अयमकः -का -कं, अननुप्रासः -सा -सं.

RHYTHM, RHYTHMUS, *s.* तालः, लयः, गाथा, तालबन्धनं, तालबद्धता.

RHYTHMICAL, *a.* तालबद्धः -द्धा -द्धं, लयबद्धः &c., तालसम्बन्धी -न्धिनी &c.

RIB, *s.* (Bone of an animal) पर्शुका, पार्शुका, पर्शुः *m.*, पार्श्वास्थि *n.*, पार्श्वकः, वंक्रिः *m.*; 'the ribs collectively,' पञ्जरं -रः, पिञ्जरं -रः, पार्श्वं.—(Of a boat) पोलिन्दः.—(Of an umbrella, &c.) शलाका, —(A thin slip of wood) शलाका.—(A prominent line) रेखा.

RIBALD, *a.* दुर्मुखः -खा -खं, अशुद्धभाषी -षिणी -षि (न्), अवाच्यभाषी &c., अवाच्यः -च्या -च्यं, अवद्यः &c., गर्ह्यः -र्ह्या -र्ह्यं, दुरुक्तः -क्ता -क्तं, कुत्सितः -ता -तं.

RIBALDRY, *s.* दुरुक्तिः *f.*, दुर्वचनं, कुत्सितवाक्यं, अवद्यं, अवाच्यं, न्यक्कः.

RIBBED, *p. p.* or *a.* सशलाकः -का -कं, शलाकी -किनी &c., रेखाङ्कितः -ता -तं.

RIBBON, RIBAND, *s.* पट्टः, दुकूलपट्टः, दीर्घदुकूलखण्डः, दीर्घपट्टः, बन्धनी.

RICE, *s.* (The grain in the husk) शालिः *m.*, व्रीहिः *m.*, धान्यं, धान्योत्तमं, क्षत्रकरिः *m.*, जीवसाधनं.—(The grain without the husk, or after threshing) तण्डुलः, धान्यास्थि *n.*, धान्यसारः, शालिसारः; 'a grain of rice,' तण्डुलकणः.—(Wild rice) नीवारः; 'a grain of it,' नीवारकणः.—(A white rice growing in deep water) कलमः.—(Red sort, growing in moist soil) षष्टिकः -का; 'fit for growing it,' षष्टिक्यः -क्या -क्यं.—(Large or fragrant sort) महाव्रीहिः *m.*, महाशालिः *m.*—(New rice) नवधान्यं, नवान्नं. One hundred and eighty varietes of rice

Digitized by Google

are enumerated.—(Boiled rice) अन्नं, ओदनः -नं, भक्तं, अन्धस् *n.*, भिस्सा, दीदिविः *m.*; 'scum of it,' मासरः, आचामः, निस्रावः, विस्रावः.—(Scorched) भिस्सटा, भिस्सिठा, भिष्मिटा, भिष्मिष्टा, भिष्मिका, दग्धिका.—(Fried rice) धानाः *f. pl.*, धानाकाः *f. pl.*; 'the meal of it,' धानाचूर्णं.—(Rice flattened by threshing) धान्यचमसः, पृथुकः -कं.—(Oblation of rice) अर्घः, अर्घ्यं, चरुः *m.*—(Heap of rice for presentation) धान्यधेनुः *f.*, धान्याचलः, तण्डुलौघः.—(Rice-water) तण्डुलोदकं, तण्डुलाम्बु *n.*, तण्डुरीणः.—(Rice-gruel) यवागूः *f.*, उष्णिका, आणा, विलेपी, तरला, धान्याम्लं.—(Rice-field) शालिक्षेत्रं.—(Rice-milk) पायसः -सं.—(Rice-husk) तुषः.—(Ear of rice) कणिशः -शं, धान्यशीर्षकं.—(Granary for rice) कुशूलः, व्रीह्यगारं.—(Having rice, bearing it, made of it) व्रीहिमयः -यी -यं, व्रीहिकः -का -कं, व्रीही -हिणी -हि (न्), व्रैहः -ही -हं, व्रैहेयः -यी -यं, शालेयः -यी -यं, शालिमयः &c.

Rich, *a.* (Wealthy) धनी -निनी -नि (न्), धनवान् -वती -वत् (त्), सधनः -ना -नं, महाधनः -ना -नं, बहुधनः &c., वित्तवान् &c., वसुमान् &c., अर्थवान् &c., अर्थान्वितः -ता -तं, सार्थः -र्थी -र्थं, धनसम्पन्नः -न्ना -न्नं, धनिकः -का -कं, धनाढ्यः -ढ्या -ढ्यं, धनसमृद्धः -द्धा -द्धं, धनविपुलः -ला -लं, लक्ष्मीवान् &c., श्रीमान् &c., सश्रीकः -का -कं, कोषवान् &c., सम्पत्तिमान् &c., समृद्धः &c., धनेश्वरः &c., लक्ष्मीशः, इभ्यः -भ्या -भ्यं; 'extremely rich person,' अतिधनी &c., लक्षाधीशः, कोटीश्वरः, कोट्यधीशः, लक्षपतिः *m.*, कुबेरः.—(Abounding in) आढ्यः -ढ्या -ढ्यं, पूर्ण in comp., बहु in comp., बहुल in comp., प्रचुर in comp., सम्पन्न in comp., समृद्ध in comp., पुष्कल in comp., मय in comp., अधिक in comp.; 'rich in good qualities,' गुणाढ्यः &c., गुणसम्पन्नः -न्ना -न्नं.—(Fertile) स्फीतः -ता -तं, पीनः -ना -नं, बहुफलदः -दा -दं.—(Costly, splendid) महार्घः -र्घा -र्घं, महामूल्यः -ल्या -ल्यं, बहुमूल्यः &c., अतिशोभनः -ना -नं, अतिशोभान्वितः -ता -तं, तैजसः -सी -सं, अतितैजसः &c., प्रतापवान् &c.—(As a dish) घृतपूर्णः -र्णा -र्णं, घृतप्लुतः -ता -तं, घृतमयः -यी -यं.

Riches, *s.* धनं, वित्तं, वसु *n.*, अर्थः, सम्पत्तिः *f.*, द्रव्यं, विभवः, लक्ष्मीः *f.*, श्रीः *f.*, राः *m.* (रै), सम्पद् *f.*—(State of having great riches) धनाढ्यता, धनबाहुल्यं, धनप्राचुर्यं, धनसमृद्धिः *f.*, धनवैपुल्यं, धनैश्वर्यं, धनसम्पत्तिः *f.*, महाधनत्वं, सधनता; 'desirous of riches,' धनार्थी -र्थिनी -र्थि (न्); 'desire of riches,' धनाशा, धनतृष्णा; 'pride of riches,' धनदर्पः; 'puffed up by riches,' धनगर्वितः -ता -तं.

Richly, *adv.* (With riches) सधनं, धनबाहुल्येन, बहुधनेन, महाधनेन.—(Splendidly) महामूल्येन, अतिशोभया, अतिशोभापूर्वं.—(Abundantly) बाहुल्येन, अतिबहुलं, प्राचुर्येण, वैपुल्येन, विपुलं, अतिविपुलं, समृद्धा.

Richness, *s.* (Opulence) धनाढ्यता, सधनता, धनबाहुल्यं, धनसमृद्धिः *f.*, धनसम्पत्तिः *f.*, धनिकता, सश्रीकता, *see* Riches.—(Fertility) स्फीतता, पीनता, स्फीतिः *f.*, बहुफलता.—(Costliness, splendor) महार्घता, महामूल्यता, शोभा, अतिशोभा, तेजस् *n.*, प्रतापः.—(Abundance) बाहुल्यं, प्राचुर्यं, वैपुल्यं, समृद्धिः *f.*, समृद्धता.—(Of a dish) घृतपूर्णता, स्निग्धता.

Rick, *s.* (Stack) चितिः *f.*, चयः, उत्करः, राशिः *m.*, निचयः, निकरः, ओघः; 'of hay,' तृणोत्करः, तृणचितिः *f.*, *see* Hay-rick.

Rickets, *s. pl.* बालरोगः, बालव्याधिः *m.*, बालामयः.

Rickety, *a.* शिथिलसन्धिः -न्धिः -न्धि, अदृढसन्धिः &c., अस्थिरः -रा -रं, अनवस्थितः -ता -तं, विचलः -ला -लं, चलस्वभावः -वा -वं, स्खलितगतिः -तिः -ति.

To rid, *v. a.* (Free from encumbrance, &c.) विप्रात् or भाराद् मुच् (c. 6. मुञ्चति, मोक्तुं) or शुध् (c. 10. शोधयति -यितुं) or विशुध् or उद्धृ (c. 1. -हरति -हर्तुं) or मोक्ष् (c. 10. मोक्षयति -यितुं), विघ्नं or भारम् अपनी or विनी or हृ, निर्विघ्नीकृ; 'to rid of thieves,' कण्टकान् उद्धृ, कण्टकोद्धरणं कृ, कण्टकशोधनं कृ, निष्कण्टकीकृ; 'of thorns,' शल्योद्धारं कृ, शल्यानि उद्धृ.

Rid, *a.* मुक्तः -क्ता -क्तं, विमुक्तः &c., शोधितः -ता -तं, वर्जितः &c., रहितः &c., विगत in comp., वीत in comp., गत in comp., हीन in comp., हृत in comp., निर् or अ prefixed; 'rid of thieves or thorns,' कण्टकमुक्तः -क्ता -क्तं, मुक्तकण्टकः -का -कं, विगतकण्टकः &c., वीतकण्टकः &c., कण्टकहीनः -ना -नं, हृतकण्टकः &c., निष्कण्टकः &c.; 'to be rid of,' मुच् in pass. (मुच्यते), विमुच्; 'to get rid of.' अपास्, निरस्, निराकृ, त्यज्, परित्यज्, अपसृज्, अपहा, *see To* discard; 'to be got rid of,' त्याज्यः -ज्या -ज्यं, अपासनीयः -या -यं, निराकरणीयः &c.

Riddance, *s.* मुक्तिः *f.*, मोचनं, मुक्तता, मोक्षः -क्षणं, उद्धारः, उद्धरणं, शोधनं, शुद्धिः *f.*, निस्तारः, त्राणं, परित्राणं.

Riddle, *s.* प्रवह्लिः *f.* -ह्लिका, प्रहेलिका, प्रश्नदूती, कूटप्रश्नः, दृष्टकूटं गूढप्रश्नः, गूढं, गूढवाक्यं, श्लेषः, श्लेषोक्तिः *f.*; different kinds are सर्वतोभद्रः, वर्द्धमानः, अन्तर्लापिका, बहिर्लापिका.—(Large sieve) शोधनी, बृहच्चालनी, महाचालनी.

To riddle, *v. a.* (Clean grain) पूर्वोक्तयन्त्रेण शुध् (c. 10. शोधयति -यितुं), or शोधनं कृ or उत्पवनं कृ.—(Perforate) व्यध्, छिद्र्, छिद्रपूर्णं -र्णां कृ, सच्छिद्रीकृ.

To ride, *v. n.* (Be carried on horseback) अश्वेन वह् in pass. (उह्यते), अश्वेन सञ्चर् (c. 1. -चरति -रितुं) or चर्, अश्वेन गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं), अश्ववाहनेन गम् or या or चल्.—(On an elephant) गजेन वह् in pass. or सञ्चर् or गम् or या or चल्, गजवाहनेन चल् or व्रज्.—(Be borne on a fluid, &c.) वह् in pass., प्लु (c. 1. प्लवते, प्लोतुं).

To ride, *v. a.* (Sit on a horse) अश्वम् आरुह् (c. 1. -रोहति -रोढुं) or अधिरुह् or अध्यारुह् or समारुह् or अधिक्रम् (c. 1. -क्रामति -क्रमितुं), अश्वारूढः -ढा -ढं भू, अश्वारोही -हिणी -हि भू, अश्वारोहणं कृ.—(Sit on an elephant) गजारूढः -ढा -ढं भू, गजारोही &c. भू, गजम् आरुह्.—(On the back of a peacock) मयूरपृष्ठारूढः -ढा -ढं भू, मयूरपृष्ठम् आरुह् or आश्रि.—(A chariot) यानारूढः -ढा -ढं भू, यानम् आरुह्, यानारोहणं कृ.

Ride, *s.* अश्वेन गमनं or चलनं, अश्वेन विहरणं, अश्वारोहणं; 'to take a ride,' अश्वेन विहारं कृ or विहृ, अश्वेन भ्रमणं कृ or परिभ्रमणं कृ.

Rider, *s.* (On a horse) अश्वारोही *m.* (न्), अश्वारोढा *m.* (ढृ), अश्वारूढः, *see* Horse-man.—(In general) आरोढा *m.*, आरोही *m.*, रोहकः.

Ridge, *s.* (Of a mountain) कटकः -कं, कूटं, दनः, उच्छ्रायः.—(Of earth, a mound) सेतुः *m.*, पिण्डलः, पिण्डिलः, धरणः, आलिः -ली *f.*, संवरः, जङ्गालः.—(Back, top) पृष्ठं, अग्रं.

Ridgy, *a.* सकटकः -का -कं, कटकाकारः -रा -रं, कटकरूपः -पा -पं.

Ridicule, *s.* उपहासः, परिहासः, अपहासः, अवहासः, प्रहासः, प्रहसनं, उपहसनं, उपहसितं, उपहसनीयता, विहसितं, हसनं, हास्यं, हासिका, परिभाषणं, अवक्षेपः, अवहेला, अवज्ञा, उत्प्रासनं, उत्स्मयः -यनं.

To ridicule, *v. a.* उपहस् (c. 1. -हसति -सितुं), अवहस्, अपहस्, उपहासभूमिं कृ, अवहासभूमिं कृ, अवहासास्पदं कृ, अवहासास्पदीकृ, अपहासास्पदीकृ, हास्यास्पदीकृ, अवहासस्थानं कृ, उत्स्मि (c. 1. -स्मयते -स्मेतुं).

Digitized by Google

अभिरिम, अवक्षिप्, आक्षिप्. *See To* DERIDE.

RIDICULED, *p. p.* उपहसितः -ता -तं, अवहसितः &c., आक्षिप्तः -प्ता -प्तं.

RIDICULOUS, *a.* उपहास्यः -स्या -स्यं, अवहास्यः &c., परिहास्यः &c., हास्यः &c., हास्यजनकः -का -कं, हासजनकः, हासकरः -री -रं, हास्योत्पादकः &c., हासोत्पादकः &c., उपहासयोग्यः -ग्या -ग्यं, उपहासार्हः -र्हा -र्हं, उपहासविषयः -या -यं, हास्यास्पदः -दा -दं, तक्यः -क्या -क्यं.

RIDICULOUSLY, *adv.* हास्यप्रकारेण, उपहास्यप्रकारेण, उपहास्यं.

RIDICULOUSNESS, *s.* उपहास्यता, अपहास्यता, परिहास्यता, हास्यत्वं.

RIDING, *s.* अश्वारोहणं, हयारोहः, अश्वारोहणविद्या, अश्वविद्या.

RIDING, *part.* आरोही -हिणी -हि (न्), आरूढः -ढा -ढं, आरोह in comp., रोहक in comp., आश्रयी &c.; 'riding on a horse,' अश्वारोही &c.; 'on an elephant,' गजारूढः &c.; 'on the back of a peacock,' मयूरपृष्ठारूढः &c., मयूरपृष्ठाश्रयी &c.

RIDING-SCHOOL, *s.* अश्वारोहणशाला, अश्वशिक्षाशाला, हयशिक्षाशाला.

RIFE, *a.* प्रसिद्धः -द्धा -द्धं, प्रचलः -ला -लं. *See* PREVALENT.

RIFENESS, *s.* प्रसिद्धता, प्रसिद्धिः *f.*, बाहुल्यं. *See* PREVALENCE.

RIFF-RAFF, *s.* खलाः *m. pl.*, पृथग्जनाः, अधमवर्गाः &c. *See* RABBLE.

To RIFLE, *v. a.* हृ (c. 1. हरति, हर्तुं), अपहृ, अभिहृ. *See To* ROB.

RIFLE, *s.* (Kind of gun) सीतारूपेण सुषिरीकृता गुलिकाप्रक्षेपणी.

RIFT, *s.* छिद्रं, भित्तिः *f.*, भङ्गः. *See* CLEFT, FISSURE.

To RIFT, *v. a.* भिद्, विभिद्, छिद्. *See To* CLEAVE, SPLIT.

To RIG, *v. a.* सज्जीकृ, सज्ज् (c. 1. सज्जति -ज्जितुं), ससज्जं -ज्जां कृ.—(A ship) नावं समुद्रयानार्थं वातवसनादिना सज्जीकृ or समायुज्. *See To* EQUIP.

RIG, RIGGING, *s.* सज्जा, सज्जनं -ना, नौकासज्जा -ज्जनं, वातवसनादिसज्जा, रज्ज्वादिसज्जनं, वसनरज्ज्वादि, वसनं, परिच्छदः.

RIGGED, *p. p.* सज्जीकृतः -ता -तं, सज्जितः &c., वसनरज्ज्वादियुक्तः &c.

RIGHT, *a.* (Just, fit, proper) युक्तः -क्ता -क्तं, उपयुक्तः &c., यथायुक्तः &c., यथायोग्यः -ग्या -ग्यं, सम्यङ् समीची सम्यक्, समञ्जसः -सा -सं, योग्यः &c., न्याय्यः -य्या -य्यं, उचितः -ता -तं, यथोचितः &c., समीचीनः -ना -नं, यथार्थः -र्था -र्थं, याथार्थिकः -की -कं, समुचितः &c., साधुः -धुः -ध्वी -धु, लभ्यः -भ्या -भ्यं, *see* PROPER.—(True, correct) ऋतः -ता -तं, सत्यः -त्या -त्यं, तथ्यः -थ्या -थ्यं, अवितथः -था -थं, यथार्थः &c., शुद्धः -द्धा -द्धं.—(Straight) सरलः -ला -लं, ऋजुः -जुः -जु, अजिह्मः -ह्मा -ह्मं; 'a right line,' सरलरेखा.—(Not left) दक्षिणः -णा -णं, अपसव्यः -व्या -व्यं, अवसव्यः &c., वामेतरः -रा -रं; 'right and left,' सव्यापसव्यः -व्या -व्यं; 'to the right,' प्रदक्षिणः -णा -णं; 'winding to the right,' दक्षिणावर्त्ती -र्त्तिनी -र्त्ति (न्); 'the right side,' *see* RIGHT, *s.*; 'the right hand,' दक्षिणपाणिः *m.*, अग्रपाणिः *m.*, अग्रहस्तः, अग्रकरः; 'being on the right hand,' दक्षिणस्थः -स्था -स्थं; 'right ascension, in astronomy,' विषुवांशः.

RIGHT, *s.* (Justice, propriety) धर्म्मः, न्यायः, नीतिः *f.*, न्याय्यत्वं -ता, न्यायिता, न्यायता, युक्तिः *f.*, युक्तता, योग्यता, उपयुक्तता, उपयोगिता, यथायोग्यता, यथार्थता, याथार्थ्यं, सामञ्जस्यं, सम्यक्त्वं, औचित्यं, उचितत्वं, समञ्जसं; 'right and wrong,' धर्म्माधर्म्मं, युक्तायुक्तं, न्यायान्यायं, हिताहितं.—(Correctness) सत्यता, सत्यं, ऋतं, अवितथं, समञ्जसं, शुद्धता.—(Just claim, title) अधिकारः -रित्वं, स्वत्वं, स्वाम्यं, सत्ता; 'to have a right,' अर्ह् (c. 1. अर्हति -र्हितुं); 'a woman has no right to independence,' स्त्री न स्वातन्त्र्यम् अर्हति.—(The right side, not the left) दक्षिणं, अपसव्यं, अवसव्यं, वामेतरं, दक्षिणदिक् *f.* (श्), दक्षिणपार्श्वः, दक्षिणाङ्गं; 'right and left,' सव्यापसव्यं; 'upon the right side,' दक्षिणस्थः -स्था -स्थं; 'on the right,' दक्षिणपार्श्वे, दक्षिणतस्, दक्षिणेन.—(One's own right) स्वाधिकारः, स्वस्वत्वं, 'to set to rights,' *see To* RIGHT, *v. a.*

RIGHT, *adv.* (Justly) युक्तं, यथायुक्तं, यथायोग्यं, यथोचितं, यथान्यायं, धर्म्मतस्, न्यायतस्, समञ्जसं, सम्यक्, यथार्थं, स्थाने.—(Truly) सत्यं, ऋतं, अञ्जसा, अंथतस्, यथार्थतस्.—(In a straight line) सरलं, ऋजु, अजिह्मं, अवक्रं.—(To a great degree) सु or अति prefixed.

RIGHT, *interj.* साधु, भद्रं, युक्तं, स्वस्ति, वाढं.

To RIGHT, *v. a.* (Restore to a right position, set to rights) सुस्थ (nom. सुस्थयति -यितुं), सुस्थं -स्थां कृ, स्वस्थ (nom. स्वस्थयति -यितुं), स्वस्थं -स्थां कृ, *see To* RESTORE, *v. a.*—(Do justice to) न्यायं कृ.

To RIGHT, *v. n.* (Become right) सुस्थः -स्था -स्थं भू, स्वस्थः -स्था -स्थं भू.—(Become erect) ऋजुः -जुः -जु भू, ऋजूभू.

RIGHT-ANGLE, *s.* समकोणः, समलम्बः, समलम्बकोणः, समलम्बद्विभुजः.

RIGHTEOUS, *a.* धार्म्मिकः -की -कं, न्यायाचारः -रा -रं, न्यायाचारी -रिणी &c., न्यायपरः -रा -रं, पुण्यः -ण्या -ण्यं, साधुः -धुः -ध्वी -धु, धर्म्मवत्ती &c. *See* JUST.

RIGHTEOUSLY, *adv.* धर्म्मतस्, न्यायतस्, धर्म्मानुसारेण. *See* JUSTLY.

RIGHTEOUSNESS, *s.* धर्म्मः, धर्म्मता, धार्म्मिकता -त्वं, न्यायः, न्याय्यता, न्यायिता, साधुता -त्वं, पुण्यता, शुचिता. *See* JUSTICE.

RIGHTFUL, *a.* (Having a just title) अधिकारी -रिणी -रि (न्), अधिकारवान् -वती -वत् (त्), साधिकारः -रा -रं, स्वत्वाधिकारी &c.—(Agreeable to justice), *see* JUST.

RIGHTFULLY, *adv.* अधिकारेण, अधिकारतस्, साधिकारं. *See* JUSTLY.

RIGHTFULNESS, *s.* अधिकारिता, अधिकारवत्त्वं, साधिकारत्वं, *see* JUSTICE.

RIGHT-HAND, *s.* दक्षिणपाणिः *m.*, दक्षिणहस्तः, दक्षिणकरः, अग्रहस्तः, *see* RIGHT, *a.*

RIGHT-HANDED, *a.* दक्षिणहस्तसेवी -विनी -वि (न्), दक्षिणसाची &c.

RIGHTLY, *adv.* युक्तं, सम्यक्, धर्म्मतस्, धर्म्मेण, न्यायतस्, यथान्यायं, यथायोग्यं, यथाधर्म्मं, यथार्थं, यथोचितं, समञ्जसं, स्थाने, *see* JUSTLY, FITLY.—(Truly) सत्यं, ऋतं, अञ्जसा, यथार्थं -र्थतस्, *see* TRULY.

RIGHTNESS, *s.* यथार्थता, याथार्थ्यं, सत्यता, सामञ्जस्यं, सम्यक्त्वं, शुद्धता.

RIGID, *a.* (Stiff, not pliant) दृढः -ढा -ढं, स्तब्धः -ब्धा -ब्धं, स्तब्धीकृतः -ता -तं, घनः -ना -नं, कठिनः -ना -नं, स्तिमितः -ता -तं, अशिथिलः -ला -लं, अमृदुः -दुः -दुी -दु.—(Strict, severe) कठोरः -रा -रं, कर्कशः -शा -शं, उग्रः -ग्रा -ग्रं, नियतः -ता -तं, सूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मदर्शी &c.

RIGIDITY, RIGIDNESS, *s.* दृढता, स्तब्धता, घनता, कठिनता, काठिन्यं, दार्ढ्यं, कठोरता, कर्कशता, कार्कश्यं, उग्रता -त्वं, अशिथिलता, अशैथिल्यं; 'of the eye-lids,' वर्त्मावबन्धः.

RIGIDLY, *adv.* दृढं, सुदृढं, स्तब्धं, स्तब्धतया, स्तब्धत्वेन, सकाठिन्यं, सदार्ढ्यं, सकार्कश्यं, कठोरं, कठिनं, अशिथिलं.

RIGMAROLE, *s.* अनर्थककथा, निरर्थककथा, असम्बद्धार्थका दीर्घकथा.

RIGOR, *s.* (Stiffness) दृढता, कठिनता, कठोरता, काठिन्यं, *see* RIGIDITY.—(Severity) उग्रता, उग्रदण्डता -त्वं, कठोरता, कर्कशता, निष्ठुरता, नैष्ठुर्यं.—(Intensity) *see* the word.

RIGOROUS, *a.* (Severe) उग्रदण्डः -ण्डा -ण्डं, उग्रः -ग्रा -ग्रं, उग्रतदण्डः &c., कठोरः -रा -रं, निष्ठुरः -रा -रं, कठिनः -ना -नं, क्रूरः &c., कर्कशः -शा -शं.—(Exact) सूक्ष्मः -क्ष्मा -क्ष्मं. *See* STRICT.

RIGOROUSLY, *adv.* उग्रत्वेन, उग्रं, उग्रदण्डेन, कठोरं, निष्ठुरं, नैष्ठुर्येण.

RILL, *s.* अल्पनदी, क्षुद्रनदी, अल्पसरित् *f.*, सूक्ष्मसरित्, क्षुद्रसरित् *f.*

Digitized by Google

RIM, *s.* प्रान्तः, अन्तः, धारः -रा, प्रान्तभागः, अन्तभागः, उत्सङ्गः, पार्श्वः; 'of a cup,' पात्रप्रान्तः, पात्रकरङः, पात्रपार्श्वः.

RIME, *s.* तुषारः, नीहारः, कुज्झटिः *f.* -टिका. *See* HOAR-FROST.

RIMY, *a.* तुषारमयः -यी -यं, नीहारमयः &c., कुज्झटिकामयः &c.

RIND, *s.* त्वक् *f.* (च्), त्वचा, वल्कं -ल्कलं, शल्कं -ल्कलं, चर्म्म *n.* (न्), छल्लिः -ल्ली *f.*, शल्लकं, चोचं -चकं, चोलकं, चीरं, अण्डकोषः; 'having rind,' त्वचीयान् -यसी -यः (स्), त्वचिष्ठः -ष्ठा -ष्ठं.

RING, *s.* (Circle) मण्डलं, परिमण्डलं, चक्रं, चक्रवालं, वलयः -यं, वर्त्तुलः.—(Of metal) लोहचक्रं, लोहवलयः -यं; 'of a chain,' लोहलः.—(Ornament for the finger) अङ्गुलीयकं, अङ्गुरीयकं, अङ्गुरीयः -यं, अङ्गुलीकः -कं, ऊर्म्मिका, करारोटः, वालकः; 'seal-ring,' अङ्गुलिमुद्रा -द्रिका, मुद्रा, वेदिः -दी *f.*; 'ring for the toes or feet,' नूपुरः, पादाङ्गदं, पादकटकः, मञ्जीरं; 'marriage-ring,' कौतुकं, मङ्गलसूत्रं, *see* MARRIAGE; 'sacred ring of kuśa grass worn during religious ceremonies,' पवित्रं -त्रकं.—(Circle of persons) मण्डलं; 'dancing in a ring,' मण्डलनृत्यं, हल्लीषं -षकं.—(Arena) रङ्गः.—(Ringing sound) क्वणितं, शिञ्जितं, क्वणः, घण्टाशिञ्जितं, घण्टाशब्दः, झनत्कारः, झम्झा -म्झनं.

To RING, *v. a.* (Cause to ring or sound, as a bell) घण्टां वद् (c. 10. वादयति -यितुं) or क्वण् (c. 10. क्वणयति -यितुं) or नद् (c. 10. नादयति -यितुं), घण्टाम् आहन् (c. 2. -हन्ति -न्तुं), घण्टाक्वणनं कृ, घण्टावादनं कृ.

To RING, *v. n.* (Sound, as a bell) क्वण् (c. 1. क्वणति -णितुं), शिञ्ज् (c. 2. शिञ्क्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, किङ्किण् (nom. किङ्किणायते), ध्वन् (c. 1. ध्वनति -नितुं), प्रक्ष्वेड् (c. 1. क्ष्वेडति -डितुं), झम्झा (nom. झम्झायते), क्वणितं कृ, शिञ्जितं कृ, झनत्कारं कृ, घण्टावत् शब्दं कृ.

RINGED, *a.* (Fitted with rings) साङ्गुलीयः -या -यं, सवलयः -या -यं.

RINGER, *s.* घण्टावादकः, घण्टाघाती *m.* (न्), घण्टाताडकः.

RINGING, *s.* घण्टावादनं, क्वणनं, क्वणितं, शिञ्जितं, झम्झनं, झनत्कारः.

RING-LEADER, *s.* मुख्यः, मुखरः, प्रमुखः, प्रवर्त्तकः, प्रयोजकः, नायकः.

RINGLET, *s.* अलकः, अलकानः, ककैरालः, कुरलः. *See* CURL.

RING-WORM, *s.* कोठः, दद्रुः *m.*, दद्रूः *m.*, गजकर्णः, खर्ज्जूः *f.*

To RINSE, *v. a.* (Wash out the mouth) आचम् (c. 1. -चामति -चमितुं), आचमनं कृ, जलम् or उदकम् उपस्पृश् (c. 6. -स्पृशति -स्प्रष्टुं), उपस्पर्शं कृ, गण्डूषं कृ, शुचिप्रणीं कृ.—(Cleanse by the introduction of water) जलं निक्षिप्य शुध् (c. 10. शोधयति -यितुं) or प्रक्षल् or परिष्कृ; 'one who has rinsed his mouth,' आचान्तः.

RINSING, *s.* (The mouth) आचमनं, आचाम्यं, उपस्पर्शः, गण्डूषः, शुचिप्रणीः *f.*; 'water for rinsing the mouth,' आचमनीयं, आचाम्यं.

RIOT, *s.* (Tumult, uproar) तुमुलं, कोलाहलः, डिम्बः, डिम्बाहवः, डमरः, डामरः, विप्लवः, आहवः, कालकीलः, सम्भ्रमः, चमत्कारः.—(Popular disturbance) प्रकृतिक्षोभः, प्रजाक्षोभः, प्रकृतियुद्धं, ग्राम्ययुद्धं, ग्राममन्थरिका.—(Noisy festivity) अतिशयशब्देन or अतिशयतुमुलेन उत्सवकरणं, *see* REVEL.—(To run riot) मर्य्यादाम् अतिक्रम् or लंघ्.

To RIOT, *v. n.* (Raise an uproar) तुमुलं कृ, कोलाहलं कृ, डिम्बं कृ, विप्लवं कृ.—(Revel) अतिशयशब्देन or अतिशयतुमुलेन उत्सवं कृ.

RIOTER, *s.* तुमुलकारी *m.* (न्), डिम्बकारी *m.*, क्षोभकारी *m.*, क्षोभकृत् *m.*

RIOTOUS, *a.* तुमुलकारी -रिणी -रि (न्), कोलाहलकारी &c., डिम्बकारी &c., महाशब्दकारी &c., क्षोभकारी &c., महाशब्देन or अतिशयतुमुलेन उत्सवकारी &c.

RIOTOUSLY, *adv.* अतिशयतुमुलेन, अतितुमुलेन, कोलाहलेन, महाशब्देन.

To RIP, *v. a.* (Tear) दृ (c. 10. दारयति -यितुं), विदृ, पद् (c. 10. पाटयति -यितुं), विपद्, विभिद्, निकृत्, विनिकृत्, विदारणं कृ; 'ripping open,' विदार्य्य.

RIP, *s.* विदारः -रणं -णा, विदरः, पाटनं, विपाटनं, विभेदः.

RIPE, *a.* (As fruit, &c.) पक्वः -क्वा -क्वं, परिपक्वः &c., पक्विमः -मा -मं, विपक्विमः &c., सुपक्वः -क्वा -क्वं, पाकिमः -मा -मं, पक्वतापन्नः -न्ना -न्नं, पक्वदशापन्नः &c., पक्वदशाप्राप्तः -प्ता -प्तं, परिणतः -ता -तं, पाकोन्मुखः -खा -खं, फलोन्मुखः &c., विनाशोन्मुखः &c., शृतः -ता -तं.—(Brought to perfection, complete) सिद्धः -द्धा -द्धं, सम्पन्नः -न्ना -न्नं, व्युत्पन्नः &c., प्रौढः -ढा -ढं.—(In years, &c.) प्रवृद्धः -द्धा -द्धं, वृद्धः &c., प्रौढः &c.—(Ready) उद्यतः -ता -तं, उन्मुख in comp., *see* READY.

To RIPEN, *v. n.* पक्वः -क्वा -क्वं भू, परिपक्वः -क्वा -क्वं भू, पच् in pass. (पच्यते), परिपच्, पक्वीभू, पक्वतां गम्. *See To* MATURE, *v. n.*

To RIPEN, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पक्वं -क्वां कृ, परिपक्वं -क्वां कृ, पक्वीकृ, पाकं कृ or जन्. *See To* MATURE, *v. a.*

RIPENED, *p. p.* पक्वः -क्वा -क्वं, परिपक्वः &c., परिणतः &c., *see* MATURED.

RIPENING, *part.* (Making ripe) पाचकः -का -कं, पाचनः -ना -नं, परिपाकी -किणी &c.—(Becoming ripe) पच्यमानः -ना -नं, परिपच्यमानः &c.

RIPENESS, *s.* पाकः, परिपाकः, पक्वता -त्वं, परिपक्वता, पक्तिः *f.*, विपाकः, पक्वभावः, पक्वदशा, पक्वावस्था, परिणामः, परिणतिः *f.*, परिणतता. *See* MATURITY.

RIPPED, *p. p.* विदारितः -ता -तं, विदीर्णः -र्णा -र्णं, विपाटितः &c.

RIPPLE, *s.* वीचिः -ची *f.*, वीचिका, ऊर्म्मिः -र्म्मी *f.*, ऊर्म्मिका, सूक्ष्मोर्म्मिः, भङ्गिः *f.*

To RIPPLE, *v. n.* चलोर्म्मिः -र्म्मिः -र्म्मि भू, चलवीचिः -चिः -चि भू, ऊर्म्मिमान् -मती -मद् भू, सवीचिः -चिः -चि भू, वीचिभङ्गुरः -रा -रं भू.

To RIPPLE, *v. a.* वीचियुक्तं -क्तां कृ, वीचिमन्तं -मतीं -मत् कृ, चलवीचिं कृ.

RIPPLING, *part.* चलोर्म्मिः -र्म्मिः -र्म्मि, चलवीचिः &c., वीचिमाली -लिनी &c.

To RISE, *v. n.* (Get up) उत्था (c. 1. उत्तिष्ठति -थातुं, rt. स्था), समुत्था; 'he rose from his seat,' आसनाद् उदस्थात् or उदतिष्ठत्; 'from bed,' शयनाद् उत्था, शयनं or शय्यां त्यज्, सुप्तोत्थितः -ता -तं भू.—(Move upward, ascend) ऊर्द्धं गम् (c, 1. गच्छति, गन्तुं), उद्गम्, समुद्गम्, उच्चैर् गम्, उच्चैर् व्रज् (c. 1. व्रजति -जितुं), उदि (c. 1. उदयति c. 2. उदेति -तुं, rt. इ), समुदि, अभ्युदि, उत्पत् (c. 1. -पतति -तितुं), ऊर्द्धम् आक्रम् (c. 1. -क्रमते -मितुं), आक्रम्, उद्वृत् (c. 1. -वर्त्तते -र्त्तितुं), आरुह् (c. 1. -रोहति -रोढुं), उच्चर् (c. 1. -चरति -रितुं), ऊर्द्धगतः -ता -तं भू, उन्नतः -ता -तं भू, आरोहणं कृ; 'the sun rises,' उदयति सूर्य्यः. The mountain behind which the heavenly bodies are supposed by the Hindus to rise is called उदयः, उदयपर्व्वतः &c., *see* MOUNTAIN.—(Become erect) उन्नम् (c. 1. -नमति -नन्तुं), उन्नतः -ता -तं भू, समुन्नम्, उत्था.—(Appear) दृश् in pass. (-दृश्यते), लक्ष् in pass., उत्पद् in pass., प्रतिभा (c. 2. -भाति -तुं), उद्भा, निर्भा, प्रभू, आविर्भू, प्रादुर्भू, आत्मानं दृश् in caus.—(Originate, issue, take rise) उत्पद् (c. 4. -पद्यते -पत्तुं), समुत्पद्, जन् (c. 4. जायते, जनितुं), प्रजन्, उपजन्, प्रभू, उद्भू, सम्भू, प्रसू (c. 1. -सरति -सर्त्तुं), निःसृ, विनिःसृ, उद्गम्, निर्गम्, प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), उदि, उत्पन्नः -न्ना -न्नं भू.—(Increase) वृध् (c. 1. वर्धते -र्धितुं), प्रवृध्, अधिकीभू, अधिकतरीभू, अधिकतरः -रा -रं भू, उत्तरोत्तरं वृध्.—(Be excited) उद्दीप्तः -प्ता -प्तं भू, उद्दीप् (c. 4. -दीप्यते -दीपितुं), उत्पद् in pass.—(From death) श्मशानाद् उत्था or समुत्था; 'all the dead

Digitized by Google

rose,' सर्व्वे मृता उदतिष्ठन्त.—(To heaven) स्वर्गारोहणं कृ.—(Be promoted) प्रतिपत्तिं or पदवृद्धिं प्राप्, श्रेष्ठपदे or उत्कृष्टपदे नियुक्तः -क्ता -क्तं भू.—(As the sea) क्षुभ्यः -भ्या -भ्यं भू.

Rise, *s.* (Getting up) उत्थानं, समुत्थानं, उत्थितिः *f.*—(Moving upwards, ascent) ऊर्द्ध्वगमनं, उर्द्ध्वगतिः *f.*, उद्गमः -मनं, समुद्गमः -मनं, उन्नतिः *f.*, उदयः -यनं, समुदयः, उद्वर्त्तनं, समुत्क्रमः, उत्पातः, उत्पतनं; 'falls and rises,' पातोत्पाताः *m. pl.*; 'rise of the sun,' सूर्य्योदयः.—(Origin, production) उत्पत्तिः *f.*, उद्भवः, उद्गमः, सम्भवः, प्रभवः, प्रवृत्तिः *f.*, मूलं, आरम्भः, आगमः, उपक्रमः, उपस्थितिः *f.*, उपस्थानं.—(Promotion) पदवृद्धिः *f.*, प्रतिपत्तिः *f.*—(Increase) वृद्धिः *f.*, प्रवृद्धिः *f.*, वर्धनं.—(To give rise to) उत्पद् (c. 10. -पादयति -यितुं), समुत्पद्, जन् (c. 10. जनयति -यितुं).

Risen, *p. p.* उत्थितः -ता -तं, अभ्युत्थितः &c., समुत्थितः &c., उद्गतः -ता -तं, समुद्गतः &c., प्रत्युद्गतः &c., उदितः &c., समुदितः &c., अभ्युदितः &c., उत्पतितः -ता -तं, समुत्पतितः &c., ऊर्द्ध्वगतः &c., उद्वर्त्तितः &c., उद्वृत्तः -त्ता -त्तं; 'from bed or sleep,' शयनोत्थितः -ता -तं, सुप्तोत्थितः &c., त्यक्तशय्यः -य्या -य्यं, त्यक्तल्पः -ल्पा -ल्पं.

Risibility, *s.* हसनशीलता, हसनशक्तिः *f.*, हसनेच्छा, हसनसामर्थ्यं.

Risible, *a.* हसनशीलः -ला -लं, हसनशक्तिकः -का -कं, हसनसमर्थः &c.

Rising, *s.* (Getting up) उत्थानं, समुत्थानं, उत्थितिः *f.*, समुत्थितिः *f.*, अभ्युत्थानं; 'from a seat,' आसनादुत्थानं; 'from bed,' शयनादुत्थानं; 'rising to receive a visitor,' प्रत्युत्थानं, प्रत्युद्गमः -मनं, अभ्युत्थानं.—(Ascent, going upwards) उदयः -यनं, उद्गमः, उद्गतिः *f.*, ऊर्द्ध्वगमनं, ऊर्द्ध्वगतिः *f.*, समुदयः, अभ्युदयः, समुद्गमः, उत्पतनं, समुत्पतनं, उत्पातः, उद्वर्त्तनं, आरोहः -हणं; 'of the sun,' सूर्य्योदयः; 'of a planet,' उच्चयः; 'of a sign,' लग्नं, होरा.—(Insurrection) प्रजाक्षोभः, प्रकृतिक्षोभः.—(Tumor), *see* the word.

Rising, *part.* उदयी -यिनी -यि (न्), उदयमानः -ना -नं, उत्पतन् -तन्ती -तत् (त्), उत्पतिता -त्री -तृ (तृ), उत्पतिष्णुः -ष्णुः -ष्णु, उदितः -ता -तं; 'rising sun,' प्रथमोदितसूर्य्यः; 'warmth of it,' प्रथमोदितादित्यतापः.

Rising-ground, *s.* उन्नतभूभागः, उन्नतभूमिभागः, उच्चभूभागः, उच्चस्थानं.

Risk, *s.* संशयः, शङ्का, सन्देहः, विकल्पः, भयं, भयहेतुः *m.*, सङ्कटं; 'of life,' जीवितसंशयः, *see* Jeopardy, Peril, Danger.

To risk, *v. a.* संशयस्थं -स्थां कृ, सन्देहस्थं -स्थां कृ, शङ्कास्थं -स्थां कृ, शङ्कास्पदीकृ, शङ्कास्पदं कृ. *See To* jeopard, hazard.

Risked, *p. p.* संशयितः -ता -तं, शङ्कास्पदीकृतः &c., सन्देहास्पदीकृतः &c.

Rite, *s.* (Religious observance) क्रिया, विधिः *m.*, विधानं, कर्म्म *n.* (न्), देवकर्म्म *n.*, दैवकर्म्म *n.*, देवक्रिया, दैवक्रिया, देवकार्य्यं, दैवकार्य्यं, संस्कारः, नियमः, रीतिः *f.*, कल्पः, संविधानं, आचारः, आचरणं, शास्त्रविधानं, शास्त्रविधिः *m.*, शास्त्रकर्म्म *n.*, शास्त्रोक्तकर्म्म *n.*, शास्त्रविधानं, शास्त्रविधिः *m.*, अनुष्ठानं, व्रतं, यमः, नियामः; 'marriage rite,' विवाहविधिः *m.*, *see* Marriage; 'funeral rite,' उत्तरक्रिया, अन्यक्रिया, और्द्धदैहिकक्रिया, मृतशरीरसत्कर्म्म *n.* (न्), *see* Obsequies, Funeral; 'rite of investiture with the sacrificial thread,' उपनयनं, *see* Investiture; 'rite of oblation to the manes,' पितृकर्म्म *n.*, पितृक्रिया, *see* Manes. The following are the sanskáras, or rites purificatory of the bodies of the three classes in this life, and qualifying them for the next, explained in Manu Bk. 2. 27 *et seq.*: 1. Sacrifice on conception, गर्भाधानं. 2. On the quickening of the fœtus, पुंसवनं. 3. A rite consisting of partition and arrangement of the hair of the mother in the fourth, sixth, or eighth month of gestation, सीमन्तोन्नयनं. 4. Giving the new-born infant honey and clarified butter out of a golden spoon, before separating the navel-string, जातकर्म्म *n.* 5. Naming the child on the tenth or twelfth day after birth, नामकर्म्म *n.* or नामकरणं. 6. Carrying the child out to see the sun in the fourth month after birth, निष्क्रमणं. 7. Feeding the child with boiled rice in the sixth month after birth, or on the cutting of the first tooth, अन्नप्राशनं. 8. Tonsure, or shaving the head all but one lock, in the first or third year after birth, चूडाकर्म्म *n.* or चूडाकरणं or चूडाकार्य्यं. 9. Investiture with a peculiar thread or cord, called the sacrificial thread, worn over the left shoulder and under the right, performed on youths of the three classes at ages varying from eight to sixteen, from eleven to twenty-two, and from twelve to twenty-four, respectively, उपनयनं. 10. Cutting off the hair entirely, performed on Brahmans at sixteen on Kshatriyas at twenty-two, and on Vaiśyas at twenty-four years of age, केशान्तः. 11. Ceremony performed by youths of the first class on returning from the house of their preceptor to that of their natural parents, समावर्त्तनं. 12. Marriage, in the thirty-sixth or eighteenth year, विवाहः.—(Inauspicious rite) अशुभकर्म्म *n.* (न्), अशुभकार्य्यं; 'rites and ceremonies,' आचारविचाराः *m. pl.*; 'performing a rite,' क्रियानुष्ठानं; 'mode of performing a rite,' क्रियाविधिः *m.*, प्रयोगः.

Ritual, *a.* (Pertaining to rites, consisting of them) वैधिकः -की -कं, वैधः -धी -धं, विधि in comp., विधिरूपः -पा -पं, विधिमयः -यी -यं, विधियुक्तः -क्ता -क्तं, विधिसम्बन्धी -न्धिनी &c., विधिविषयकः -का -कं, क्रियासम्बन्धी &c., क्रियाविषयकः &c., क्रिया in comp., शास्त्रोक्तः -क्ता -क्तं, आचारिकः -की -कं, काल्पः -ल्पी -ल्पं.

Ritual, *s.* क्रियापद्धतिः -तीं, संस्कारपद्धतिः *f.*, कर्म्मपद्धतिः *f.*, विधिपद्धतिः *f.*, विधानपद्धतिः *f.*, पद्धतिः -तीं, संस्कारशास्त्रं, विधिशास्त्रं, क्रियाविधिः *m.*, विधिः *m.*

Ritualist, *s.* क्रियाविधिज्ञः, संस्कारशास्त्रज्ञः, क्रियावान् *m.* (त्).

Rival, *s.* स्पर्धी *m.* (न्), प्रतिस्पर्धी *m.*, प्रतियोगी *m.* (न्), प्रतिपक्षः, सपत्नः, विजिगीषुः *m.*, जिगीषुः *m.*, *see* Rival, *a.*; 'a kingdom without a rival,' असपत्नं राज्यं; 'a rival wife,' सपत्नी.

Rival, *a.* स्पर्धी -र्धिनी -र्धि (न्), विस्पर्धी &c., प्रतिस्पर्धी &c., परिस्पर्धी &c., प्रतियोगी &c., विजिगीषुः -षुः -षु, जिगीषुः &c., परस्परविजिगीषुः &c., परस्पराभिभवेच्छुः -च्छुः -च्छु, एकार्थेच्छुः &c., एकार्थाभिलाषी &c., एकार्थी &c., एकार्थदृष्टिः -ष्टिः -ष्टि, एकार्थप्रवृत्तः -त्ता -त्तं, एकार्थोद्युक्तः -क्ता -क्तं, संघर्षी &c., परस्परसंघर्षी &c., जयेच्छुः &c., अभिभवेच्छुः &c.

To rival, *v. a.* स्पर्ध् (c. 1. स्पर्धते -र्धितुं), विस्पर्ध्, प्रतिस्पर्ध्, आस्पर्ध् with instr. c., जि in des. (जिगीषति -षितुं), विजि in des., पराभिभवनाय or परस्पराभिभवनाय यत् (c. 1. यतते -तितुं) or उद्योगं कृ, परजयार्थं यत्, परस्परं संघृष् (c. 1. -घर्षति -र्षितुं), एकार्थम् अभिलष् or आकांक्ष्, एकार्थप्राप्तये यत्; 'he rivals Indra,' शक्रेण or शक्रेण सह स्पर्धते; 'one who rivals the beauty of the moon,' चन्द्रच्छायापरिस्पर्धी.

Rivaling, rivalling, *part.* स्पर्धी -र्धिनी &c. *See* Rival, *a.*

Digitized by Google

RIVALRY, *s.* स्पर्धा or स्पर्द्धा, प्रतिस्पर्धा, आस्पर्धा, जिगीषा, विजिगीषा, प्रतियोगिता -त्वं, प्रतिपक्षता -त्वं, सापत्न्यं, सपत्नत्वं, संघर्षः, परस्परसंघर्षः, पराभिभवेच्छा, परस्पराभिभवेच्छा, परस्पराभिभवनाय उद्योगः, परजयेच्छा, परस्परजयेच्छा, एकार्थाभिलाषः, एकार्थाकांक्षा, एकार्थप्रापणाय परस्परोद्योगः, एकार्थदृष्टिः *f.*, एकार्थप्रवृत्तिः *f.*, अहम्पूर्विका.

RIVEN, *p. p.* विदीर्णः -र्णा -र्णं, विदारितः -ता -तं, छिन्नः -न्ना -न्नं, विभिन्नः &c.

RIVER, *s.* नदी, सरित् *f.*, सिन्धुः *f.*, अपगा, निम्नगा, स्रोतस् *n.*, कुल्या, स्रोतोवहा, स्रोतोवहा, स्रोतस्वती, स्रोतस्विनी, पयस्विनी, सवन्ती, द्रवन्ती, समुद्रगा, जलधिगा, सागरगामिनी, तरङ्गिणी, तटिनी, शैवलिनी, ह्रादिनी, ह्लादिनी, पर्वतजा, रोधोवक्रा, रोधवक्रा, समुद्रदयिता, समुद्रकान्ता, कूलवती, कूलङ्कषा, धुनी, धेना, जलालिनी, द्वीपवती, निर्घूरिणी, उद्वः, नदः. This last is applied only to a river of which the personification is male, as the Indus सिन्धुः, Brahmaputra ब्रह्मपुत्रः, Sona शोणः, हिरण्यबाहुः; 'bed of a river,' नदीपात्रं, नदीभाण्डं; 'bank of a river,' नदीतीरं, नदीकूलं; 'current,' नदीवेगः, नदीरयः, नदीवेला; 'water of a river,' सरिज्जलं; 'source,' सरिन्मुखं; 'mouth,' सिन्धुसङ्गमः, सम्भेदः; 'watered by rivers,' नदीमातृकः -का -कं, जलमातृकः &c.; 'one who knows the course of rivers,' नदीज्ञः; 'bathing in a river,' नदीस्नः -स्नी -स्नं; 'the bend of a river,' नदीवङ्कः; 'relating to a river,' नादेयः -यी -यं.—(River of heaven), स्वर्णदी, सुरनदी, *see* GANGES, MILKY-WAY.

RIVET, *s.* कीलः -लकः, लोहकीलकः, सूक्ष्मकीलकः, शलाका.

To RIVET, *v. a.* (Fasten with a rivet) कील् (c. 10. कीलयति -यितुं), कीलकेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), कीलकबद्धं -द्धां कृ.—(Fix or fasten firmly) दृढं बन्ध्, दृढीकृ; 'to rivet the attention,' चित्ताभिनिवेशं कृ or जन्, अभिनिविष्टचित्तं -त्तां कृ.

RIVETED, *p. p.* कीलकबद्धः -द्धा -द्धं, कीलितः -ता -तं, दृढीकृतः -ता -तं; 'having the attention riveted,' अभिनिविष्टचित्तः -त्ता -त्तं; 'by sound,' नादलुब्धः &c.

RIVULET, *s.* अल्पनदी, क्षुद्रनदी, अल्पसरित् *f.*, क्षुद्रसरित् *f.*, अल्पाम्भस् *n.*, अल्पस्रोतस् *n.*, क्षुद्रस्रोतस् *n.*, कुसरित् *f.*

ROAD, *s.* मार्गः, पथः, पन्थाः *m.* (पथिन्), अध्वा *m.* (न्), वर्त्म *n.* (न्), वर्त्मनिः -नी *f.*, अयनं, वर्त्तनं -नी, वर्त्तनिः *f.*, सरणिः -णी *f.*, मृतिः *f.*, पदविः -वी, पद्धतिः -ती *f.*, पद्या, पद्वा *m.* (न्), पद्धः, उपनिष्क्रमणं, सञ्चरः, एकपदी, एकपाद्, तरः, वीथिः *f.*, शरणिः *f.*, माचः, माठः, माठ्यः, प्रपाथः, पित्सलं, खुल्लमः; 'public road, high road,' राजमार्गः, राजपथः, महापथः, महावर्त्म *n.*; 'a good road,' सुपथः, सुपन्थाः *m.*, अतिपन्थाः *m.*, सत्पथः, सन्मार्गः; 'a bad road,' कुपथः, कुमार्गः, कापथं, विपथः, कदध्वा *m.* (न्), दुरध्वः, व्यध्वः; 'a wrong road,' विमार्गः, उन्मार्गः, विपथः, उत्पथः; 'unbeaten road,' अक्षुण्णमार्गः; 'a common road,' प्रचारः; 'difficult road,' दुर्गः, दुर्गमार्गः, दुर्गसञ्चरः, दुर्गमवर्त्म *n.*, कान्तारः -रं; 'long and lonesome road,' प्रान्तरं, शून्यमार्गः; 'place where four roads meet,' चतुष्पथं, शृङ्गाटं -टकं; 'where three roads meet,' त्रिकं; 'the want of a road,' अपथं, अपन्थाः *m.*; 'road-side,' मार्गपार्श्वः; 'on the road-side,' मार्गपार्श्वे; 'on the road,' पथि, मार्गमध्ये, सध्वनि, अध्वमध्ये.

To ROAM, *v. n.*, भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), परिभ्रम्, अट् (c. 1. अटति -टितुं), पर्यट्, विचर् (c. 1. -चरति -रितुं), संचर्, इतस्ततो भ्रम् or चर् or विह् (c. 1. -हरति -हर्तुं), गाह् (c. 1. गाहते -हितुं), भ्रमणं कृ, परिभ्रमणं कृ, विहारं कृ; 'as a mendicant,' परिव्रज्, व्रज्.

ROAMING, *s.* भ्रमणं, परिभ्रमणं, इतस्ततो भ्रमणं, नानादिग्भ्रमणं, विहारः, विहरणं, अटनं, पर्यटनं, अटाट्या; 'as of a religious mendicant,' व्रज्या, परिव्रज्या, व्रजनं, व्रजितं.

ROAMING, *part.* भ्राम्यन् -म्यन्ती -म्यत् (त्), भ्रमन् &c., परिभ्रमन्, भ्रमणकारी -रिणी -रि (न्), अटमानः -ना -नं, विहारी &c., परिव्रजन् &c., व्रज्यावान् -वती, वत् (त्).

ROAN, *a.* (Horse) शुक्लबिन्दुचित्रितो नीलवर्णोऽश्वः or श्यामवर्णोऽश्वः.

To ROAR, *v. n.* (Make a loud continued sound) गर्ज् (c. 1. गर्जति -र्जितुं), परिगर्ज्, नर्द् (c. 1. नर्दति -र्दितुं), विनर्द्, रु (c. 2. रौति, रवितुं), विरु, संरु, रस्, वाश्, रद्, गज्, हम्भ (nom. हम्भायते -यितुं), हुङ्कृ, हूङ्कृ, हुङ्कारं कृ, अनुहुङ्कृ, गर्जनं कृ.—(Cry out, bawl) नद् (c. 1. नदति -दितुं), विनद्, प्रणद्, उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), विक्रुश् प्रक्रुश्, चित्कारं कृ, चीत्कारं कृ, चीत् शब्दं कृ, घुष्, प्रक्ष्विड् (c. 1. क्ष्वेडति -डितुं), नादं कृ; 'from pain,' आर्त्तनादं कृ.

To SEND, *v. a.* प्रेर् (c. 10. प्रेरयति -यितुं, rt. ईर्), प्रेष् (c. 10. प्रेषयति -यितुं, rt. इष्), सम्प्रेष्, अनुप्रेष्, परिप्रेष्, प्रहि (c. 5. -हिणोति -हेतुं), प्राप् in caus. (प्रापयति -यितुं, rt. आप्) संचर् (c. 10. -चारयति -यितुं), नुद् (c. 6. नुदति, नोत्तुं), प्रतिपद् (c. 10. -पादयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं) all with 2. acc.; as, 'he sent them to the city,' तान् नगरीं प्रेरयामास; 'I will send a letter to the king,' लेखं राज्ञो हस्तं प्रापयिष्यामि; or with acc. and dat., as, 'he sent a weapon to the king,' अस्त्रं राज्ञे प्राहिणोत्.—(Send away, despatch) प्रस्था in caus. (-स्थापयति -यितुं), अपसृ in caus. (-सारयति -यितुं), प्रया in caus. (-यापयति -यितुं), विसृज्, प्रणुद्, अपास् सम्प्रेष्, *see* DISMISS.—(Send before or in advance) अग्रे प्रस्था in caus. or प्रया in caus., पुरस्कृ.—(Send for, summon, request or cause to be brought) आह्वे (c. 1. -ह्वयति -ह्वातुं), आनी in caus. (-नाययति -यितुं), उपानी in caus., आगम् in caus., आह्व in caus.; 'he sent for them from the village,' तान् ग्रामाद् आनाययामास or आहूतवान्.—(Send forth, emit, produce) विसृज्, निःसृ in caus., उदीर्, समुदीर्, निरस्, उत्क्षिप्, उत्पद् in caus.—(Cause to fall, as a missile, &c.) पत् in caus., क्षिप्, प्रक्षिप्.

SENDER, *s.* प्रेरकः, प्रेरयिता *m.* (तृ), प्रेषकः, सम्प्रेषकः, प्रेषयिता *m.*, प्रेरणकृत्, प्रेरणकर्त्ता *m.*, प्रयोजकः.

SENDING, *s.* प्रेरणं -णा, प्रेषणं, प्रेषः, प्रस्थापनं, प्रयापणं, क्षेपणं.

SENILE, *a.* वृद्धतासम्बन्धी -न्धिनी -न्धि (न्), वार्धकसम्बन्धी &c.

SENILITY, *s.* वृद्धता -त्वं, वार्धक्यं, वृद्धावस्था, वृद्धभावः. *See* OLD AGE.

SENIOR, *a.* ज्येष्ठः -ष्ठा -ष्ठं, वयोज्येष्ठः &c., कालज्येष्ठः &c., ज्यायान् -यसी -यः (स्), अग्रजः -ग्रजा -ग्रजं, वरीयान् &c., वरिष्ठः &c., श्रेष्ठः &c., *see* ELDER; 'senior in office,' अधिकारज्येष्ठः -ष्ठा -ष्ठं.

SENIOR, *s.* (One who is older) ज्येष्ठः, वयोज्येष्ठः, *see* the last.—(Elderly person) गुरुजनः, वृद्धजनः, आर्य्यजनः.

SENIORITY, *s.* ज्येष्ठता -त्वं, ज्यैष्ठ्यं, वयोज्येष्ठता, वयोज्यैष्ठ्यं, कालज्येष्ठता, कालज्यैष्ठ्यं, अधिकवयस्कता; 'in office,' अधिकारज्येष्ठता, अधिकारज्यैष्ठ्यं; 'according to seniority,' अनुज्येष्ठं.

SENNIGHT, *s.* (Week) सप्ताहं, सप्तरात्रं, *see* WEEK.

SENSATION, *s.* (Feeling) वेदनं -ना, संवेदः, चेतना, चैतन्यं, चित् *f.*, इन्द्रियज्ञानं, इन्द्रियबोधः, इन्द्रियग्रहः -हणं.—(State of excited interest) लोकानुरागः, जनानुरागः.

SENSE, *s.* (Organ of perception or sense) इन्द्रियं, ज्ञानेन्द्रियं, ज्ञानसाधनं, इन्द्रियबुद्धिः *f.*, इन्द्रियज्ञानं, करणं, हृषीकं, अक्षं, अध्यात्म *n.* (न्), विषयि *n.* (न्); 'the five senses or organs collectively,' पञ्चेन्द्रियं, इन्द्रियग्रामः, इन्द्रियवर्गः, इन्द्रियगणः, श्रोत्रादि *n.* These are the eye चक्षुस्, the ear श्रोत्रं, the nose घ्राणं, the tongue जिह्वा, the skin त्वक्, and are called ज्ञानेन्द्रियाणि to distinguish them from the five कर्म्मेन्द्रियाणि or organs of action; *see* ORGAN. To these ten an eleventh, the mind मनस्, is sometimes added. 'Subjugation or restraint of the senses,' इन्द्रियजयः, इन्द्रियदमनं, इन्द्रियनिग्रहः, इन्द्रिययमनं, इन्द्रियनियमनं; 'one who has subdued his senses,' जितेन्द्रियः -या -यं, यतेन्द्रियः &c., यती *m.* (न्); 'perceptible by the senses,' इन्द्रियग्राह्यः -ह्या -ह्यं, इन्द्रियगोचरः -रा -रं; 'by two senses,' द्वीन्द्रियग्राह्यः &c.; 'evident to the senses,' प्रत्यक्षः -क्षा -क्षं, प्रत्यक्षसिद्धः -द्धा -द्धं; 'deadness of the senses,' इन्द्रियस्वापः; 'pleasure of sense,' इन्द्रियसुखं, विषयसुखं; 'perversion of the senses,' इन्द्रियविप्रतिपत्तिः *f.*; 'disorder of them,' इन्द्रियवैकल्यं; 'acuteness of them,' इन्द्रियपाटवं; 'wanting a sense,' विकलेन्द्रियः -या -यं, निरिन्द्रियः &c.—(Object of sense) विषयः, इन्द्रियविषयः, इन्द्रियार्थः, अर्थः, गोचरः. These are five, corresponding to the five senses or organs of perception, viz. 'form' रूपं, 'sound' शब्दः, 'odour' गन्धः, 'flavour' रसः, 'touch' स्पर्शः.—(Perception by the senses, sensation) वेदनं -ना, संवेदः -दनं, बोधः -धनं, इन्द्रियज्ञानं, इन्द्रियबोधः -धनं, इन्द्रियग्रहः -हणं, ग्रहणं, चेतना.—(Perception by the mind, &c.) बोधः, वेदनं, ज्ञानं, अनुबोधः, उपलब्धिः *f.*, ग्रहः -हणं, *see* PERCEPTION.—(Understanding) बुद्धिः *f.*, मतिः *f.*, धीः *f.*, मेधा, चित्.—(Consciousness) चैतन्यं, चेतना, वेदनं, ज्ञानं, संज्ञा; 'internal sense,' अन्तश्चैतन्यं, अन्तःसंज्ञा; 'sense of pleasure,' सुखवेदनं, सुखानुभवः, सुखबोधः; 'to recover one's senses,' संज्ञां or चैतन्यं लभ्; 'one who has done so,' लब्धसंज्ञः -ज्ञा -ज्ञं, लब्धचैतन्यः -न्या -न्यं, लब्धचेताः -ताः -तः (स्); 'to lose one's senses, be out of one's senses,' बुद्धिभ्रष्टः -ष्टा -ष्टं भू, नष्टबुद्धिः -द्धिः -द्धि भू, हतबुद्धिः -द्धिः -द्धि भू, नष्टज्ञानः -ना -नं भू, हतज्ञानः -ना -नं भू, नष्टेन्द्रियः -या

Digitized by Google

-यं भू.—(Opinion) मतं, मतिः *f.*, बुद्धिः *f.*—(Meaning) अर्थः, अभिप्रायः, आकांक्षा, आशयः, उद्देशः, विवक्षितं, विवक्षा, विषयः, छन्दस्; 'sense of words,' शब्दानुशासनं, पदार्थः, भावार्थः, शक्तिः *f.*, विग्रहः; 'second sense,' अर्थान्तरं; 'tenor of the sense,' अर्थानुसन्धानं; 'according to the sense,' अर्थतस्; 'apprehension of the literal sense,' शाब्दबोधः.—(Common sense) सामान्यबुद्धिः *f.*, साधारणबुद्धिः *f.*, साधारणधीः *f.*—(Good sense) सद्बुद्धिः *f.*, सुसद्वृत्तं, सुसद्वृत्तवाक्यं, सुबुद्धिः *f.*, सुधीः *f.*, *see* INTELLIGENCE.

SENSELESS, *a.* (Wanting the faculty of perception) अचेतनः -ना -नं, चैतन्यहीनः -ना -नं, विषयग्रहणाशक्तः -क्ता -क्तं, विषयग्रहणाक्षमः -मा -मं, इन्द्रियविषयाग्राही -हिणी -हि (न्), इन्द्रियार्थाग्राही &c.—(Without feeling or consciousness) अचेतनः -ना -नं, विचेतनः &c., चैतन्यहीनः -ना -नं, विसंज्ञः -ज्ञा -ज्ञं, निःसंज्ञः &c., संज्ञाहीनः -ना -नं, नष्टचेतनः -ना -नं, गतचेतनः &c., गतचेताः -ताः -तः (स्), नष्टचेताः &c., नष्टचेष्टः -ष्टा -ष्टं, सुप्तः -प्ता -प्तं, सुप्तबुद्धिः -द्धिः -द्धि.—(Foolish, said of persons) निर्बुद्धिः -द्धिः -द्धि, निर्बोधः -धा -धं, अबुद्धिमान् -मती -मत् (न्), मतिहीनः -ना -नं, अबुधः -धा -धं, अविज्ञः -ज्ञा -ज्ञं, मूढः -ढा -ढं, मुग्धः -ग्धा -ग्धं, प्रमुग्धः &c.—(Unreasonable, said of things) अयुक्तः -क्ता -क्तं, अयुक्तिकः -का -कं, असमञ्जसः -सा -सं, अनुपपन्नः -न्ना -न्नं.—(Unmeaning) अनर्थकः -का -कं, निरर्थकः &c., असद्वद्यः -द्या -द्यं, अवद्यः &c.

SENSELESSLY, *adv.* अज्ञवत्, अविज्ञवत्, मूर्खवत्, अल्पबुद्ध्या, असद्वद्यं.

SENSELESSNESS, *s.* निर्बुद्धित्वं, अज्ञता, अविज्ञता, बुद्धिहीनता, अयुक्तता.

SENSIBILITY, *s.* (Capability of receiving impressions) विषयग्रहणशक्तिः *f.*, विषयग्रहणक्षमता, इन्द्रियविषयग्रहणं, इन्द्रियार्थैग्रहणं.—(Acuteness of sensation) शीघ्रग्राहकत्वं, सूक्ष्मग्राहकता, शीघ्रचैतन्यं, शीघ्रचेतनत्वं, सूक्ष्मचैतन्यं, चैतन्यसूक्ष्मता, चलेन्द्रियत्वं, सूक्ष्मेन्द्रियत्वं, *see* SENSITIVENESS.—(Sensation, feeling) चेतना, चैतन्यं, वेदनं -ना, संवेदः, बोधः, ज्ञानं, चित् *f.*, चिच्छक्तिः *f.*—(Consciousness) चैतन्यं, संज्ञा, ससंज्ञता.

SENSIBLE, *a.* (Capable of receiving impressions) विषयग्रहणशक्तः -क्ता -क्तं, विषयग्रहणक्षमः -मा -मं, विषयग्राही -हिणी -हि (न्), इन्द्रियार्थैग्राही &c.—(Perceptible by the senses) इन्द्रियज्ञेयः -या -यं, इन्द्रियगोचरः -रा -रं, इन्द्रियवेद्यः -द्या -द्यं, इन्द्रियगम्यः -म्या -म्यं, ऐन्द्रियकः -की -कं, प्रत्यक्षः -क्षा -क्षं, *see* PERCEPTIBLE.—(Having perception of, conscious of) ग्राहकः -का -कं, ग्राही -हिणी &c., वेदनक्षमः -मा -मं, ग्रहणक्षमः -मा -मं, ग्रहणशक्तः -क्ता -क्तं, चेतनः -ना -नं, सचेतनः &c., चेतनावान् -वती -वत् (त्), प्रजानन् -नती -नत् (त्), चेतयमानः -ना -नं.—(Possessing consciousness) सचेतनः -ना -नं, सचैतन्यः -न्या -न्यं, चैतन्यवान् &c., संज्ञावान् &c., ससंज्ञः -ज्ञा -ज्ञं, लब्धसंज्ञः &c., प्राप्तसंज्ञः &c., प्राप्तचैतन्यः &c., लब्धचैतन्यः &c., आपन्नचेतनः -ना -नं, प्रतिपन्नचेतनः &c., प्राप्तबोधः -धा -धं, लब्धबोधः &c., सज्ञानः -ना -नं, लब्धज्ञानः &c.—(Having acute feeling) शीघ्रग्राहकः -का -कं, शीघ्रचेतनः -ना -नं, सहृदयः -या -यं, अभिज्ञ or ज्ञ in comp.; as, 'sensible of kindness,' उपकाराभिज्ञः -ज्ञा -ज्ञं, उपकारज्ञः &c., *see* SENSITIVE.—(Intelligent, having good sense, said of persons) बुद्धिमान् -मती -मत्, मतिमान् &c., धीमान् &c., मनस्वी -स्विनी &c., विचक्षणः -णा -णं, प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः &c., ज्ञानी &c., ज्ञानशाली &c., सुधीः -धीः -धि, सुमेधाः -धाः -धः (स्), प्रजानन् &c.; 'a sensible man,' सुधीः *m.*, बुद्धिमान्, बुधजनः; 'a sensible woman,' मनस्विनी,

प्रज्ञानती.—(Reasonable, said of things) युक्तः -क्ता -क्तं, सयुक्तिकः -का -कं, उपपन्नः -न्ना -न्नं, सङ्गतः -ता -तं, समञ्जसः -सा -सं.

SENSIBLY, *adv.* (Perceptibly) प्रत्यक्षतस्.—(With good sense) सुबुद्ध्या, विचक्षणवत्, प्राज्ञवत्, सुबुद्धिपूर्वं, विज्ञवत्.

SENSITIVE, *a.* (Capable of perceiving, having sense) चेतनः -ना -नं, चेतकः -का -की -कं, सचेतनः -ना -नं, चेतनावान् -वती -वत् (त्), इन्द्रियविशिष्टः -ष्टा -ष्टं, ज्ञानेन्द्रियविशिष्टः &c., इन्द्रिययुक्तः -क्ता -क्तं, विषयग्रहणशक्तः -क्ता -क्तं, विषयग्रहणक्षमः -मा -मं, विषयग्राही -हिणी &c.—(Having quick or acute sensibility) शीघ्रग्राहकः -का -कं, शीघ्रचेतनः -ना -नं, शीघ्रचैतन्यवान् &c., सूक्ष्मचेतनः &c., सूक्ष्मग्राहकः -का -कं, सूक्ष्मचैतन्यवान् &c., चलेन्द्रियः -या -यं, सूक्ष्मेन्द्रियः &c., सेन्द्रियः &c., सहृदयः -या -यं, हृदयवान् -वती -वत् (त्), कोमलहृदयः &c., करुणार्द्रः -र्द्रा -र्द्रं, स्वच्छः -च्छा -च्छी -च्छं.—(Of shame) लज्जावान् &c., लज्जालुः -लुः -लु, *see* MODEST.—(Having taste) रसास्वादी &c.—(Pertaining to the senses) इन्द्रियसम्बन्धी &c., इन्द्रियविषयकः -का -कं.

SENSITIVELY, *adv.* शीघ्रचेतनवत्, सूक्ष्मचैतन्येन, सूक्ष्मेन्द्रियत्वात्, चलेन्द्रियत्वात्.

SENSITIVENESS, *s.* इन्द्रियसूक्ष्मता, सूक्ष्मेन्द्रियत्वं, चैतन्यसूक्ष्मता, सूक्ष्मचैतन्यं, शीघ्रचेतनत्वं, शीघ्रचैतन्यं, शीघ्रग्राहकता, करुणार्द्रता. *See* SENSIBILITY.

SENSITIVE-PLANT, *s.* स्पर्शलज्जा, लज्जालुः *m.*, लज्जाकारिका, लजकारिका, महाभीता, गण्डकारी, गण्डकाली, नमस्कारी, समङ्गा, खदिरी, श्लाघणी, सुवहा, युक्तरसा, राज्ञा.

SENSORIUM, *s.* चेतनाशयः, चेतनास्पदं, चैतन्यास्पदं, ज्ञानाशयः.

SENSUAL, *a.* (Devoted to the gratification of the senses) विषयासक्तः -क्ता -क्तं, विषयपरः -रा -रं, विषयपरायणः -णा -णं, विषयप्रवणः -णा -णं, विषयी -यिणी -यि (न्), वैषयिकः -की -कं, विषयसेवी -विनी &c., विषयोपसेवी &c., विषयरतः -ता -तं, विषयाधीनः -ना -नं, विषयवशः -शा -शं, विषयाभिमुखः -खा -खं, विषयतत्परः -रा -रं, विषयलुब्धः -ब्धा -ब्धं, विषयसुखसेवी &c., विषयसुखासक्तः &c., विषयोपभोगव्यग्रः -ग्रा -ग्रं, शिश्नोदरपरायणः -णा -णं, वनितोपभोगतत्परः &c., सम्भोगी &c., भोगासक्तः &c., कामासक्तः &c., इन्द्रियसुखासक्तः &c., इन्द्रियसुखसेवी &c., इन्द्रियाधीनः -ना -नं, इन्द्रियवशः -शा -शं, देहम्भरः -री -रं, दुष्टभावः -वा -वं, विप्रदुष्टभावः &c.—(Pertaining to the senses) वैषयिकः -की -कं, विषयसम्बन्धी &c., ऐन्द्रियकः -की -कं.

SENSUALIST, *s.* विषयी *m.* (न्), विषयासक्तः, विषयसेवी *m.*, विषयायी *m.* (न्), भोगासक्तः, इन्द्रियाधीनः, केलिनागरः. *See* the last.

SENSUALITY, SENSUALNESS, *s.* विषयासक्तिः *f.*, विषयासक्तता, विषयसेवा, विषयोपसेवा, विषयसुखासक्तिः *f.*, इन्द्रियसुखासक्तिः *f.*, इन्द्रियाधीनता, विषयाधीनता, विषयवशता, विषयसङ्गः, विषयव्यासङ्गः, विषयपरता, शारीरिकसुखासक्तिः *f.*, शारीरिकसुखसेवा, शारीरिकविषयानुरागः, भोगासक्तिः *f.*, कामासक्तिः *f.*, वनितोपभोगः.

SENT, *p. p.* प्रेरितः -ता -तं, प्रेषितः -ता -तं, सम्प्रेषितः &c., अनुप्रेषितः &c., प्रहितः -ता -तं, ईरितः &c., गमितः &c., नुन्नः -न्ना -न्नं, नुत्तः -त्ता -त्तं.—(Sent away, despatched) प्रस्थापितः -ता -तं, प्रयापितः &c., सम्प्रेषितः &c., दूतः -ता -तं, प्रणुन्नः -न्ना -न्नं.—(Sent for) आहूतः -ता -तं; 'having sent for,' आनाय्य.

SENTENCE, *s.* (Judgment pronounced, judicial decision) निर्णयपादः, निर्णयः, दण्डनिर्णयः, दण्डकथनं, दण्डाज्ञा, दण्डाभिधानं, दण्डनियोगः, दण्डकल्पनं, दण्डनिवेदनं, दण्डस्थापनं, आधर्षणं, विचारः, तीरणं; 'of death,' प्राणदण्डाज्ञा, प्राणदण्डनिर्णयः, वधदण्डाज्ञा.—(Determination, decision) निश्चयः, निश्चितं, निर्णयः, विचारः, संकल्पः, नि-

Digitized by Google

व्यक्ति: *f.*, निर्धारणं.—(Opinion) मतं, मति: *f.*, बुद्धि: *f.*, बोध:, संकल्प:, निवेदनं.—(Paragraph, period) वाक्यं, वचनं, उक्तं, झङ्किका, पदं, वाक्यखण्ड:, वाक्यपरिच्छेद:, वक्तव्यं; 'a complete sentence,' निरूह:; 'construction of sentences,' वाक्यरचना, वाक्ययोजना; 'rule of constructing sentences,' वाक्यपद्धति: *f.*—(Maxim) सूत्रं.

To SENTENCE, *v. a.* निर्णेयं कृ, दण्डनिर्णेयं कृ, दण्डाज्ञां कृ, दण्डकथनं कृ, दण्डनिवेदनं कृ, दण्डाभिधानं कृ, अपराधकथनपूर्व्वं दण्डाभिधानं कृ, दण्डं निर्णी (c. 1. -णयति -णेतुं) or प्रणी; 'to death,' वधदण्डाज्ञां कृ.

SENTENCED, *p. p.* निर्णीत: -ता -तं, निर्णीतदण्ड: -ण्डा -ण्डं, प्रणीत: -ता -तं, प्रणीतदण्ड: &c., निश्चित: -ता -तं, तीरित: &c., आधर्षित: &c.

SENTENTIOUS, *a.* (Abounding with sentences or maxims) सूत्रमय: -यी -यं, सूत्रप्राय: -या -यं, वाक्यमय: -यी -यं.—(Using short sentences) सूत्रभाषी -षिणी -षि (न्), सूत्रप्रायभाषी &c.

SENTENTIOUSLY, *adv.* सूत्रसादृश्येन, सूत्रतस्, सूत्रवत्.

SENTENTIOUSNESS, *s.* सूत्रभाषणं, सूत्रप्रायभाषणं, सूत्रसादृश्यं.

SENTIENT, *a.* चेतन: -ना -नं, सचेतन: -ना -नं, चेतनावान् -वती -वत् (न्), चैतन्यवान् &c., चैतन्ययुक्त: -क्ता -क्तं, चैतन्यविशिष्ट: -ष्टा -ष्टं, चेतक: -का -कं, चेतयमान: -ना -नं, चेतय: -या -यं, विषयग्रहणशक्तिक: -का -कं, विषयग्रहणक्षम: -मा -मं, इन्द्रिययुक्त: -क्ता -क्तं, इन्द्रियवान् &c., इन्द्रियविशिष्ट: -ष्टा -ष्टं, इन्द्रियज्ञानविशिष्ट: &c., सचेष्ट: -ष्टा -ष्टं; 'a sentient being,' प्राणी *m.* (न्), चेतन:, प्राणभृत् *m.*, शरीरी *m.*, देही *m.*, *see* LIVING, *part.*

SENTIMENT, *s.* (Thought, opinion, notion) मतं, मति: *f.*, बुद्धि: *f.*, कल्पना, मन:कल्पना, बोध:, सङ्कल्प:.—(Sense contained in words) अर्थ:, अभिप्राय:, *see* SENSE.—(Feeling, passion) भाव:, रस:, राग:, षाडव:, रुचि: *f.*, *see* PASSION. Eight sentiments or rasas are usually emumerated: 1. Love, शृङ्गार:. 2. Mirth, हास्य: -स्यं. 3. Tenderness, करुणा or कारुण्यं. 4. Anger or rage, रौद्र: -द्रं or क्रोध:. 5. Heroism, वीर: -रं. 6. Terror, भयानक: -कं or भयं. 7. Disgust, बीभत्स: -त्सं. 8. Surprise, अद्भुत: -तं or विस्मय:. Sometimes a ninth is added, 'tranquillity,' शान्त:; or even a tenth, 'paternal tenderness,' वात्सल्यं.

SENTIMENTAL, *a.* (Abounding with sentiment or feeling) रसिक: -का -की -कं, रसमय: -यी -यं, सरस: -सा -सं, रसी -सिनी &c., रसवान् -वती &c., रसरूप: -पा -पं, रसात्मक: -का -कं, भाविक: -का -कं, सराग: -गा -गं, रागवान् &c., रागान्वित: -ता -तं, शृङ्गारी -रिणी &c., सरस्वान् &c.—(Affected) रसानुकारी &c., भावानुकारी &c., विलक्ष: -क्षा -क्षं, सवैलक्ष्य: -क्ष्या -क्ष्यं.

SENTIMENTALITY, *s.* रसानुकारिता, भावानुकारिता, वैलक्ष्यं, रसिकत्वं.

SENTINEL, SENTRY, *s.* सेनारक्ष: -क्षक:, सैनिक:, रक्षक:, रक्षी *m.* (न्), उपरक्षक:, रक्षिता *m.* (तृ), सैन्य:, उपरक्षणं, परिधिस्थ:, अनीकस्थ:, सज्जनं.

SENTRY-BOX, *s.* रक्षकगृहं, सैनिकगृहं, सैनिकाधार:.

SEPARABLE, *a.* भेद्य: -द्या -द्यं, विभेद्य: -द्या -द्यं, वियोजनीय: -या -यं.

To SEPARATE, *v. a.* वियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं), विसंयुज्, विप्रयुज्, विभिद् (c. 7. -भिनत्ति -भेत्तुं), भिद्, विश्लिष् (c. 10. -श्लेषयति -यितुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विगम् in caus. (-गमयति -यितुं), पृथक्कृ, विभज्, विविच्.

To SEPARATE, *v. n.* वियुज् in pass. (-युज्यते), वियुक्त: -क्ता -क्तं भू, विभिद् in pass. (-भिद्यते), भिद्, विभिन्न: -न्ना -न्नं भू, विश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं), विच्छिद् in pass., विगम् (c. 1. -गच्छति -गन्तुं), विभक्त: -क्ता -क्तं भू.

SEPARATE, *a.* (Distinct, disconnected) विभिन्न: -न्ना -न्नं, भिन्न: &c., व्यतिरिक्त: -क्ता -क्तं, पृथक्स्थित: -ता -तं, पृथक् indec., विविक्त: -क्ता -क्तं, विसंयुक्त: &c., असक्त: -क्ता -क्तं, असंसृष्ट: -ष्टा -ष्टं, असंलग्न: -ग्ना -ग्नं, व्यस्त: -स्ता -स्तं, अव्यतिकीर्ण: -र्णा -र्णं, विगत: -ता -तं, विरल: -ला -लं, प्रविरल: &c., असाधारण: -णा -णी -णं, प्रगत: &c.

SEPARATED, *p. p.* वियुक्त: -क्ता -क्तं, वियोजित: -ता -तं, विसंयुक्त: -क्ता -क्तं, विप्रयुक्त: &c., पृथक्कृत: -ता -तं, विश्लिष्ट: -ष्टा -ष्टं, विश्लेषित: -ता -तं, परिच्छिन्न: -न्ना -न्नं, विच्छिन्न: &c., विभिन्न: &c., भिन्न: &c., विगत: -ता -तं, विभक्त: -क्ता -क्तं, विविक्त: &c., द्वैधीकृत: &c., व्यासक्त: &c., असंसक्त: &c., असंलग्न: -ग्ना -ग्नं, विसंलग्न: &c., विसक्त: -क्ता -क्तं, सान्तराल: -ला -लं, व्यावृत्त: &c.; 'from a lover,' विधुर: -रा -रं, विरही -हिणी &c.

SEPARATELY, *adv.* पृथक्, विरलं, विभिन्नं, विभेदेन, विभागशस्.

SEPARATENESS, *s.* पृथक्त्वं, पार्थक्यं, भिन्नता, विभिन्नता, पृथग्भाव:.

SEPARATER, *s.* विभेदक:, विच्छेदक:, विभेदकारी *m.* (न्), पृथक्कारी *m.*

SEPARATION, *s.* (The act) वियोग:, विप्रयोग:, वियोजनं, विभेद: -दनं, विश्लेष: -षणं, प्रविश्लेष:, विच्छेद: -दनं, पृथक्करणं, द्वैधीकरणं, परिच्छेद:, भेद: -दनं, अवच्छेद:, विभाग:, प्रविभाग:, विगम:, विसंयोग:, व्यासङ्ग:, असन्धानं, असंयोग:, सङ्गविच्युति: *f.*—(The state) भिन्नता, विभिन्नता, विभेद:, भेद:, वियोग:, विप्रयोग:, पृथक्त्वं, पार्थक्यं, पृथग्भाव:, विश्लेष:, विश्लिष्टता, विभक्तता, विभक्तभाव:, विरह:, व्यतिरेक:, व्यावृत्ति: *f.*—(Of the sexes) द्वन्द्वभेद:, द्वन्द्वभिन्नं, स्त्रीपुरुषभेद:.—(Especially of lovers) विरह:, विश्लेष:, प्रविश्लेष:, विप्रयोग:, वियोग:, विप्रलम्भ:, विधुरं, विधुरता, विगम:; 'anguish of separation,' विरहज्वर:, विरहानल:; 'a woman who suffers separation from her lover,' विरहिणी, विरहोत्कण्ठिता, उत्कण्ठिता.

SEPOY, *s.* सैन्य:, सैनिक:. *See* SOLDIER.

SEPTANGULAR, *a.* सप्तकोण: -णा -णं, सप्तास: -सा -सी -सं.

SEPTEMBER, *s.* भाद्रोत्तराढ्यं, आश्विनपूर्व्वार्द्धं, भाद्र:, भाद्रपद:, प्रोष्ठपद:, नभस्य:, आश्विन:, आश्वयुज:, इष:.

SEPTENARY, *a.* सप्तसंख्यक: -का -कं, सप्तरूप: -पा -पं.

SEPTENARY, *s.* (Aggregate of seven) सप्तकं.

SEPTENNIAL, *a.* सप्तवर्षिक: -की -कं, साप्तवर्षिक: &c., साप्ताब्दिक: &c.

SEPTIC, SEPTICAL, *a.* गलनकारी -रिणी -रि (न्), विगलनकारी &c., विलयनकारी &c., विगलनकृत् *m. f. n.*, विलयनकृत् *m. f. n.*

SEPTILATERAL, *a.* सप्तपार्श्वक: -का -कं, सप्तभुज: -जा -जं, सप्तबाहु: -हु: -हु.

SEPTUAGENARIAN, *s.* सप्ततिक: -का, सप्ततिवयस्क: -स्का -स्कं.

SEPTUM, *s.* (Of the scrotum) महावीज्यं, विटप:, *see* SCROTUM.

SEPTUPLE, *a.* सप्तगुण: -णा -णं, सप्तविध: -धा -धं, सप्तक: -का -कं.

SEPULCHRE, SEPULCHER, *s.* समाधि: *m.*, श्मशानं, सन्धि: *m.*, शवस्थानं, शवमन्दिरं, प्रेतमन्दिरं, प्रेतस्थानं, प्रेतवास:, शववास:, मृतशरीरस्थानं, शवगर्त्त:, अवट:, एडुकं.

SEPULCHRAL, *a.* श्मशानसम्बन्धी -न्धिनी -न्धि (न्), श्माशानिक: -की -कं, श्मशान in comp., श्मशानविषयक: -का -कं; 'sepulchral blossom,' पितृवनसुमनस् *n.*

SEPULTURE, *s.* भूमिखननं, निखननं, खननं, भूमौ निखननं, श्मशाने स्थापनं, *see* BURIAL.—(Rites of sepulture) प्रेतकर्म्म *n.* (न्), अन्त्येष्टि: *f.*, मृतसत्कर्म्म *n.*, अन्यकर्म्म *n.* *See* FUNERAL.

SEQUEL, *s.* (That which follows, succeeding part) उत्तरभाग:, उत्तरं, शेषभाग:, उत्तरार्द्धं, शेष:.—(Consequence) परिणाम:, अन्त:, शेष:, अन्वय:, *see* RESULT; 'in the sequel,' शेषे, अन्ते, अग्रे.

SEQUENCE, *s.* अन्वय:, समन्वय:, अनुक्रम:, आनुपूर्व्यं. *See* SUCCESSION.

Digitized by Google

To SEQUESTER, SEQUESTRATE, *v. a.* (A benefice, &c.) ऋणशोधनं यावद् धर्म्माध्यापकवृत्तिं परहस्ते समृ in caus. (-सर्पयति -यितुं) or निक्षिप् or परप्रयोजनीयां दा, ऋणापाकरणं यावद् धर्म्माध्यापकवृत्तिं पृथक्कृ or वियुज् (c. 10. -योजयति -यितुं).

SEQUESTERED, *p. p.* (As a benefice, &c.) ऋणशोधनं यावत् परहस्तसमर्पितः -ता -तं or पृथक्कृतः &c. or वियोजितः &c.—(Retired) विविक्तः -क्ता -क्तं, *see* SECLUDED.

SEQUESTRATION, *s.* ऋणशोधनं यावत् परहस्तसमर्पणं or पृथक्करणं.

SERAGLIO, *s.* (Women's apartments) अन्तःपुरं, अवरोधः -धनं, अवरोधगृहं, अवरोधायनं, स्त्रीगृहं, शुद्धान्तः, विलासभवनं, सुविदल्लं, *see* HAREM.—(Palace) राजधानी, राजभवनं, उपकारी -रिका.

SERE, *a.* शुष्कः -ष्का -ष्कं, सुशुष्कः &c., शीर्णः -र्णा -र्णं. *See* SEAR.

SERENADE, *s.* ज्योत्स्नीकाले or सुरात्रिकाले कामिजनकृतं प्रेमसूचकं गीतवादनं or सङ्गीतकं.

To SERENADE, *v. a.* or *n.* ज्योत्स्नीकाले प्रेमसूचनार्थं गीतवादनं कृ.

SERENE, *a.* (Clear, as sky, &c.) प्रसन्नः -न्ना -न्नं, वितिमिरः -रा -रं, अनभ्रः -भ्रा -भ्रं, निरभ्रः &c., व्यभ्रः &c., गततोयदः -दा -दं.—(Bright) प्रसन्नः -न्ना -न्नं, स्वच्छः -च्छा -च्छं, विमलः -ला -लं, निर्मलः &c., अमलः &c., विशदः -दा -दं, शुद्धः -द्धा -द्धं.—(Calm, unruffled) शान्तः -न्ता -न्तं, प्रशान्तः &c., प्रसन्नः -न्ना -न्नं, स्थिरः -रा -रं, अक्षुभ्रः -भ्रा -भ्रं, निर्वेगः -गा -गं, वेगहीनः -ना -नं, अनुद्विग्नः -ग्ना -ग्नं, निरुद्वेगः -गा -गं, अव्याकुलः -ला -लं, निराकुलः &c.; 'in mind,' प्रसन्नचेताः -ताः -तः (स्), शान्तचेताः &c., शान्तमनस्कः -स्का -स्कं, शान्तचित्तः -त्ता -त्तं, प्रसन्नचित्तः &c., शान्तात्मा -त्मा -त्म (न्), सुमनस्कः &c.

SERENELY, *adv.* प्रसन्नं, प्रसादेन, सप्रसादं, शान्तं, शान्त्या, प्रसन्नचेतसा.

SERENITY, SERENENESS, *s.* (Clearness) प्रसन्नता, प्रसादः, प्रसत्तिः *f.*, स्वच्छता, निर्मलता, विमलता, निरभ्रता.—(Calmness) शान्तिः *f.*, शान्तता, प्रसादः, प्रसन्नता, स्थिरता, स्थैर्यं, अक्षोभः, अक्षुभ्रता, वेगहीनता, निराकुलता.—(Of mind) चित्तशान्तिः *f.*, मनःशान्तिः *f.*, चित्तप्रसादः, चित्तप्रसन्नता.

SERF, *s.* कृषिकर्म्मणि नियोजितो दासः, भूमिकर्षकदासः.

SERGEANT, *s.* (Non-commissioned officer) अनधिकारवान् सैनिकाध्यक्षः.

SERIATIM, *s.* क्रमशस्, अनुपूर्व्वशस्, आनुपूर्व्येण, यथाक्रमं, अनुक्रमशस्.

SERIES, *s.* (Continued succession or line) श्रेणी *f.*, श्रेणिः *m. f.*, श्रेधी, पंक्तिः *f.*, आवलिः -ली *f.*, माला, शृङ्खला, परम्परा; 'of causes,' कारणश्रेणी, कारणमाला; 'of inflections,' रूपावलिः -ली.—(Arithmetical) श्रेधी, अनुपातः, चयः; 'last term in the series,' अन्यपदं, अन्त्यधनं; 'sum of the series,' सर्व्वधनं.—(Regular succession) क्रमः, अनुक्रमः, पर्य्यायः, आनुपूर्व्यं, आनुपूर्व्वी, पारम्पर्य्यं, पाटः, परिपाटिः -टी *f.*

SERIOUS, *a.* (Grave in manner) गम्भीरवृत्तिः -त्तिः -त्ति, गभीरवृत्तिः &c., गम्भीरस्वभावः -वा -वं, गम्भीरशीलः -ला -लं, गम्भीरमनस्कः -स्का -स्कं, गम्भीरः -रा -रं, गुरुवृत्तिः &c., गुरुस्वभावः &c., मन्दवृत्तिः &c., मन्दस्वभावः &c., धीरः -रा -रं, धीरवृत्तिः &c.—(In earnest, not jesting) अपरिहासी -सिनी -सि (न्), अविनोदी &c., विनोदरहितः -ता -तं, परिहासहीनः -ना -नं, वास्तविकः -की -कं, सद्रूपः -पा -पं.—(Important) गुरुः -वी -रु, गुर्व्वीयः -यी -यं, अलघुः -घुः -घ्वी -घु.

SERIOUSLY, *adv.* (Gravely) सगौरवं, गौरवेण, सगाम्भीर्य्यं, गम्भीरं, सधैर्य्यं, धीरं, धीरवत्, अलघु, अलाघवेन, मन्दं.—(In earnest) अपरिहासेन, अविनोदेन, अलाघवेन.

SERIOUSNESS, *s.* (Gravity of manner, &c.) गम्भीरता, गाम्भीर्य्यं, गौरवं, गुरुता, धीरता, स्वभावगाम्भीर्य्यं, स्वभावगुरुता, स्वभावमन्दता, स्वभावमान्द्यं.—(Earnestness) अपरिहासः, अविनोदः, विनोदाभावः, परिहासाभावः, वास्तविकत्वं.—(Importance) गुरुता, गौरवं, अलघुता, अलाघवं, गुर्व्वीयत्वं.

SERMON, *s.* धर्म्मविषयवाक्यं, धर्म्मविषयभाषणं, धर्म्मोपदेशविषयवाक्यं, धर्म्मोपदेशकवाक्यं, धर्म्मोपदेशः, धर्म्मकथनं, वाक्यं.

SEROUS, *a.* सेदुरः -रा -रं, सेदस्वी -स्विनी -स्वि (न्), रक्तद्रवसम्बन्धी &c., चर्म्मोदकसम्बन्धी &c., चर्म्मसारसम्बन्धी &c., चर्म्माम्भोमयः -यी -यं.

SERPENT, *s.* सर्पः, भुजङ्गः, भुजङ्गमः, भुजगः, उरगः, उरःसरः, उरङ्गः, उरङ्गमः, सरीसृपः, पन्नगः, व्यालः, अहिः *m.*, नागः, अशुजः, आशीविषः, तक्षकः, तृफूः *m.*; 'female serpent,' सर्पी, भुजगी, *see* SNAKE.

SERPENTINE, *a.* (Pertaining to a serpent) सर्पसम्बन्धी -न्धिनी -न्धि (न्), सार्पः -र्पी -र्पं, सार्पः -र्पी -र्पं, आहेयः -यी -यं, औरगः -गी -गं.—(Winding like a serpent) सर्पगतिः -तिः -ति, सर्पी -र्पिणी &c., विसर्पी &c., वक्रः -क्रा -क्रं, वक्रगतिः &c., वक्रगामी &c., सर्पगतिवत्; 'serpentine motion,' सर्पगतिः *f.*, विसर्पणं.

SERPIGO, *s.* *See* RING-WORM.

SERRATE, SERRATED, *a.* अनुक्रकचः -चा -चं, क्रकचधारः -रा -रं, दन्तुरः -रा -रं, छिन्नधारः &c., सच्छेदः -दा -दं, सावच्छेदः -दा -दं, छेदयुक्तः -क्ता -क्तं.

SERRIED, *a.* संहतः -ता -तं, सुसंहतः &c., संश्लिष्टः &c., सघनः &c.

SERUM, *s.* मेदस् *n.*, वसा, वपा, चर्म्माम्भस् *n.*, त्वगम्भस् *n.*, चर्म्मोदकं, त्वगुदकं, चर्म्मसारः, त्वक्सारः, सौम्यः, रक्तद्रवः, रक्ताम्भस् *n.*, असृक्करः, उदकधातुः *m.*

SERVANT, *s.* सेवकः, प्रेष्यः, चेटकः, चेटः, किङ्करः, दासः, दाशः, भृत्यः, भृतकः, कर्म्मकरः, कर्म्मकारः, कर्म्मकारी *m.* (न्), अनुचरः, परिचरः, परिचारकः, परिजनः, वेतनोपजीवी *m.* (न्), वेतनजीवी *m.*, सेवोपजीवी *m.*, सेवाजीवी *m.*, भृतिभुक् *m.* (ज्), भृतिजीवी *m.*, अनुजीवी *m.*, नियोज्यः, प्रैष्यः, भरणीयः, वैतनिकः, शुश्रूषकः, चेडः, चेडकः, पार्श्विकः, पार्श्वानुचरः, सैरिन्ध्रः, अर्धी *m.*, भुजिष्यः, दासेरः, दासेयः, गोप्यः -प्यकः; 'old servant,' मूलभृत्यः; 'servant who waits at table,' परिवेष्टा *m.* (ष्टृ), परिवेषकः; 'attentive servant who watches a master's countenance,' लालाटिकः; 'servants, a set of servants,' दासवर्गः, भृत्यवर्गः, सेवकवर्गः; 'relation between master and servant,' सेव्यसेवकभावः.

SERVANT-MAID, *s.* प्रेष्या, चेटी, चेटिका, चेडी -डिका, सेवकी, दासी, कर्म्मकरी, किङ्करी, चोटा, परिचारिका, सैरन्ध्री, सैरिन्ध्री, प्रतीहारी.

To SERVE, *v. a.* (Attend upon, act as servant to) सेव् (c. 1. सेवते -वितुं, c. 10. सेवयति -यितुं), उपसेव्, उपास् (c. 2. -आस्ते -सितुं), पर्युपास्, समुपास्, शु in des. (शुश्रूषते -षितुं), आशु, प्रतिशु, उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), उपचर् (c. 1. -चरति -रितुं), पर्युपस्था, उपाचर्, परिचर्, सभाज् (c. 10. सभाजयति -यितुं), उपचारं कृ, उपासनां कृ.—(At table) परिविष् (c. 10. -वेषयति -यितुं), परिवेषणं कृ.—(Obey, be subject to, worship) सेव्, शु in des., अनुवृत्, अनुविधा in pass., उपजीव् (c. 1. -जीवति -वितुं), आराध्, उपाराध्.—(Help, assist) उपकृ, उपकारं कृ, साहाय्यं कृ, उपचर्, उपग्रह्, अनुग्रह्.—(Promote one's purpose) अर्थं प्रवृत् (c. 10. -वर्त्तयति -यितुं) or प्रयुज् (c. 10. -योजयति -यितुं) or सम्पद् (c. 10. -पादयति -यितुं) or साध् (c. 10. साधयति -यितुं), इष्टं सम्पद् or साध्.—(Be sufficient for) पर्य्याप्तः -प्ता -प्तं भू, उपयुक्तः -क्ता -क्तं भू, उचितः -ता

Digitized by Google

-तं भू, पर्य्याप्तिं कृ, निर्वाहं कृ, कॢप्, उपकॢप्.—(Supply) उपस्था in caus. (-स्थापयति -यितुं), उपकॢप् (c. 10. -कल्पयति -यितुं), परिकॢप्. —(Be in the place of) स्थाने or स्थले or भूमौ वृत् or भू or उपयुक्तः -क्ता -क्तं भू or प्रयुक्तः -क्ता -क्तं भू.—(Use, manage) प्रयुज्, उपयुज्, विधा.—(Treat) आचर्, विधा.—(Serve out, distribute) पृथक् पृथग् विभज् or दा or परिकॢप्.—(Serve up, place on the table) परिविश् (c. 10. -वेशयति -यितुं), परिविष् (c. 10. -वेषयति -यितुं), परिवेषणं कृ, परिवेशनं कृ, अन्नानि परिविश् or परिकॢप् or कॢप् or उपस्था in caus. or उपहृ; 'one who serves up,' परिवेषकः, उपहर्त्तृ m. (र्त्तृ).

To SERVE, *v. n.* (Be in servitude) सेवां कृ, दास्यं कृ, दास (nom. दासायति), सेवको भू, दासो भू.—(Perform duties) कर्म्म कृ or विधा, कार्य्यं कृ or अनुष्ठा, नियोगिकर्म्म कृ.—(Be of use, be sufficient for) उपयुक्तः -क्ता -क्तं भू, उचितः -ता -तं or पर्य्याप्तः -प्ता -प्तं भू.—(Accomplish the end) अर्थं सम्पद् in caus. or साध् in caus.

SERVED, *p. p.* (Attended upon, obeyed, worshipped) सेवितः -ता -तं, उपासितः -ता -तं, शुश्रूषितः &c., उपचरितः &c., वरिवस्यितः &c., वरिवसितः &c., आराधितः &c.—(Assisted) उपकृतः -ता -तं. —(Supplied) उपकॢप्तः -प्ता -प्तं.—(Served up, prepared, presented, as food, &c.) परिवेशितः -ता -तं, परिवेषितः &c., कल्पितः &c., परिकल्पितः &c., उपहृतः &c.

SERVICE, *s.* (Attendance upon, waiting upon) सेवा -वनं, उपसेवा, निषेवणं, शुश्रूषा, उपासनं -ना, उपचारः, उपचारकरणं, उपचारकर्म्म n. (न्), उपचर्य्या, परिचरणं, परिचर्य्या, वरिवस्या, अनुगमनं, उपस्थानं. —(State of service) दास्यं, दासत्वं, सेवा, सेवकदशा, प्रेष्यत्वं, भृत्यत्वं, कैङ्कर्य्यं; 'he lives in our service,' अस्मत्सेवया जीवति.—(Waiting at table) परिवेषणं, परिवेशनं.—(Obedience or subjection to) आज्ञासेवनं, आज्ञानुवृत्तिः f., आज्ञाकरत्वं, अनुवृत्तिः f., अनुवर्त्तनं, वशता, शुश्रूषा -षणं, अनुरोधः, भक्तिः f., भजनं, उपासनं -ना, उपासा, आराधनं -ना; 'the service of princes,' नृपसंश्रयः; 'diligent in service,' शुश्रूषापरः -रा -रं.—(Benefit, advantage) उपकारः, उपकृतं, उपक्रिया, उपकृतिः f., सुकृतं, हितं, अर्थः, उपयोगः.—(Use) उपयोगः -गित्वं, प्रयोगः, प्रयोजनं, व्यवहारः.—(Employment, business) व्यापारः, कार्य्यं, कर्म्म n. (न्), व्यवसायः, वृत्तिः f., प्रवृत्तिः f., व्यवहारः, नियोगः; 'out of service,' निर्व्यापारः -रा -रं, निर्वृत्तिः -त्तिः -त्ति; 'military service,' सैन्यकर्म्म n. (न्), सैनिकवृत्तिः f. —(Worship) पूजा, पूजोपचारः, उपचारः, उपचर्य्या, भक्तिः f.; 'public worship,' साधारणपूजा; 'course of rites,' अनुष्ठानं, *see* RITE; 'conductor of a service,' अनुष्ठाता m.—(Set of dishes served up at once) यावन्ति भोजनपात्राणि युगपत् परिवेष्यन्ते, भोजनपात्रसमूहः, भोजनपात्रगणः, भोजनपात्रजातं.

SERVICEABLE, *a.* (Useful) उपयोगी -गिनी -गि (न्), उपयुक्तः -क्ता -क्तं, उपकारकः -का -कं, उपकारी &c., उपकारकारी -रिणी &c., सोपकारः -रा -रं, प्रयोगी &c., प्रयोज्यः -ज्या -ज्यं, प्रायोज्यः &c., व्यवहार्य्यः -र्य्या -र्य्यं.—(Fit for duty) कार्य्यक्षमः -मा -मं, कर्म्मक्षमः &c., कर्म्मोपयुक्तः -क्ता -क्तं, अलङ्कर्म्मीणः -णा -णं.

SERVICEABLENESS, *s.* उपयोगिता, उपयुक्तता, उपयोगः, सोपकारता -त्वं.

SERVICEABLY, *adv.* उपयुक्तं, उपयोगेन, सोपयोगं, सोपकारं.

SERVILE, *a.* (Pertaining to servants or slaves) दाससम्बन्धी -न्धिनी -न्धि (न्), दास्यसम्बन्धी &c., दासेयः -यी -यं, दासेरः -री -रं, सेवकः -का -कं, सेवासम्बन्धी &c., शौद्रः -द्री -द्रं, अधमभृतकः -का -कं, नैर्देशिकः -की -कं, दास्य in comp.; 'servile-work,' दास्यकर्म्म n.—(Cringing) अतिसान्त्वकारी &c., अतिचाटुकारी &c., अतिलाली &c., अतिलालनकारी &c., अत्यनुकूलः -ला -लं, अत्यनुरोधी &c.

SERVILELY, *adv.* अतिलालनपूर्व्वं, अत्यनुकूलं, अत्यनुरोधेन.

SERVILITY, SERVILENESS, *s.* (Mean obsequiousness) अतिलालनं, अत्यनुकूलता, अत्यानुकूल्यं, अतिसान्त्वकारः, अतिसान्त्वनं, अतिचाटुकारः, अत्यनुरोधः, छन्दोनुरोधः, छन्दोनुवृत्तिः f.—(Slavery), *see* SERVITUDE.

SERVITOR, *s.* सेवकः, *see* SERVANT.

SERVITUDE, *s.* दास्यं, दासत्वं, सेवा, सेवकदशा, सेवकभावः, दासभावः, दास्ययोगः, भृत्यत्वं, प्रेष्यत्वं, परप्रेष्यत्वं, कैङ्कर्य्यं, पराधीनता, अन्याधीनता, परवशता, परवत्ता, श्ववृत्तिः f.

SESAME, SESAMUM, *s.* (The plant or seed) तिलः, सारालः, सुवन्धः, दलाढकः, पूतधान्यं, हौम्यधान्यं; 'its blossom,' वज्रपुष्पं; 'barren sesamum, bearing no blossom, &c.,' तिलपिञ्जः, तिलपेजः; 'sown with sesamum, as a field, &c.,' तिल्यः -ल्या -ल्यं, तैलीनः -नी -नं; 'oil of sesamum,' तिलतैलं, तिलरसः, तिलस्नेहः, तैलं; 'ground sesamum,' तिलचूर्णं, तिलकल्कं, तिलकटः; 'sediment after the oil is expressed,' तिलकिट्टं; 'burnt offering of sesamum,' तिलहोमं; 'sesamum made up in the shape of a cow,' तिलधेनुः f.; 'sesamum seeds with water,' तिलोदकं; 'with milk and rice,' तिलौदनं; 'made of sesamum,' तिलमयः -यी -यं.

SÉSHA, *s.* (King of the serpents), *see* SNAKE.

SESSION, *s.* (Sitting) उपवेशः -शनं.—(Of a court or assembly) सभा.—(Time or term during which an assembly sits or transacts business) सभा, सभाकालः, सभाकार्य्यकालः, कार्य्यनिर्वाहकालः.

To SET, *v. a.* (Place, put, lay) धा (c. 3. दधाति, धातुं), निधा, आधा, स्था in caus. (स्थापयति -यितुं), न्यस् (c. 4. -अस्यति -सितुं), क्षु in caus. (क्षेपयति -यितुं), रुह् in caus. (रोपयति -यितुं), आरुह्, निविश् (c. 10. -वेशयति -यितुं), धृ (c. 1. धरति, धर्त्तुं), दा, कृ; 'one's foot,' पादं न्यस् or क्षु in caus., पादार्पणं कृ.—(Fix) स्था in caus., प्रतिष्ठा, अवस्था, रुह् in caus., बन्ध्.—(Establish, settle) स्था in caus., प्रतिष्ठा, व्यवस्था, प्रकॢप् (c. 10. -कल्पयति -यितुं), परिकॢप्.—(Fit, adjust, adapt) युज् (c. 10. योजयति -यितुं), आयुज्, समायुज्, समाधा, योग्यं -ग्यां कृ.—(Regulate) विधा, संविधा.—(Plant) रुह् in caus., निरुह्, रोपणं कृ, निखन्.—(Fix jewels, &c., in metal) प्रणिधा, निधा, खच्, युज्; 'is set,' प्रणिधीयते.—(Inlay), *see* the word.—(Sharpen, whet) तिज् (c. 10. तेजयति -यितुं), निशो, निशि, क्षणु, तीक्ष्णधारीकृ, तीक्ष्णाग्रीकृ.—(Set a limb) त्रुटितास्थि सन्धा or संयुज्.—(Set about), *see To* BEGIN.—(Set against), *see To* OPPOSE.—(Set apart) पृथक्कृ, उद्धृ, विनियुज्.—(Set aside) विनिधा, *see To* REJECT, ANNUL, OMIT.—(Set before) उपस्था in caus., उपहृ, आहृ; 'as food,' भुज् in caus., परिविष् in caus., परिविश् in caus.—(Set by), *see To* ESTEEM, REGARD, VALUE. —(Set down, lay down) न्यस्, उपन्यस्, निधा, भूमौ न्यस् or धा. —(Set down in writing), *see To* REGISTER, COMMIT TO WRITING.—(Set down), *see To* DEGRADE, REBUKE.—(Set fire) अग्निं दा, *see To* KINDLE.—(Set forth) अभिधा, *see To* PUBLISH, SHOW, DISPLAY, DESCRIBE.—(Set forward) पुरस्कृ, *see To*

Digitized by Google

ADVANCE, PROMOTE.—(Set free) मुक्तिं दा, मुच्, *see To* FREE.—(Set in order), *see To* DISPOSE, ARRANGE.—(Set at nought), *see To* DESPISE, CONTEMN.—(Set off, show to advantage) शोभां दा, अधिकशोभां दा, शुभ् in caus., प्रकाश् in caus., *see To* EMBELLISH, ADORN.—(Set off against) प्रतिगण्, प्रतिगणनां कृ, समानमूल्यकं -कां ज्ञा, तुल्यमूल्यं -ल्यां ज्ञा.—(Set off with fine words) उपक्षिप्, *see To* EULOGIZE, RECOMMEND.—(Set on), *see To* INCITE, INSTIGATE.—(Set the mind or heart on) मनो निविश् or धा or समाधा or प्रणिधा or युज्, मनो बन्ध्; 'he set his heart upon such an object as this,' एवंविधे अभिलाषे मनो बबन्ध.—(Set on foot) प्रवृत् in caus., आरभ्, समारभ्.—(Set over) अधिकृ, प्रकृ, नियुज्, विनियुज्, सन्नियुज्, अध्यक्षं कृ.—(Set to rights) सुस्थं -स्थां कृ, पुनः सुस्थं कृ, सुस्थ (nom. सुस्थयति -यितुं), प्रतिसमाधा, अनुसन्धा, प्रतिसमाधानं कृ, *see To* CORRECT, REPAIR.—(Set to music) स्वरबद्धं -द्धां कृ.—(Set in motion) संचर् in caus., संचल् in caus.—(Set the teeth on edge) दन्तहर्षं कृ or जन्.—(Set a trap) पाशं युज् (c. 10. योजयति -यितुं), जालं विस्तृ.—(Set sail) नावं or नौकां चल् (c. 10. चालयति -यितुं), समुद्र्यानार्थं तीराद् अपगम्, नौकायां तीराद् अपया or अपसृ.—(Set up) स्था in caus., प्रतिष्ठा, संस्था, अवस्था, उत्था, *see To* ERECT, ESTABLISH.

To SET, *v. n.* (Go down, as a heavenly body) अस्तम् इ (c. 2. एति -तुं), अस्तं गम् (c. 1. गच्छति, गन्तुं), अस्तम् or अस्ताचलम् अवलस् (c. 1. -लसते -सितुं), निर्वाणम् इ or गम्, अस्तमयनं कृ, अस्तावलसनं कृ, निम्लुच् (c. 1. -म्लोचति -चितुं), अभिनिम्लुच्; 'western mountain behind which the heavenly bodies set,' अस्तः, अस्ताचलः, अस्तगिरिः *m.*, *see* MOUNTAIN.—(Be fixed hard, congeal) घनीभू, दृढीभू, बन्ध् in pass. (बध्यते), संहन् in pass. (-हन्यते), संहतीभू.—(Flow in a fixed direction) एकदिशं or एकदिशि गम् or सु or द्रु.—(Set forward) अग्रे गम्, पुरो गम्, प्रगम्, प्रया.—(Set in) उपस्था (c. 1. -तिष्ठति -स्थातुं), पर्युपस्था, *see To* BEGIN, *v. n.*—(Set off) यात्रां कृ, प्रस्थानं कृ, प्रक्रम्, प्रचल्, चल्, यात्राम् आरभ्.—(Set out) प्रस्था (c. 1. -तिष्ठति -स्थातुं), विप्रस्था, सम्प्रस्था, प्रत्यभिप्रस्था, प्रया (c. 2. -याति -तुं), या, प्रगम् (c. 1. -गच्छति -गन्तुं), चल् (c. 1. चलति -लितुं), व्रज् (c. 1. व्रजति -जितुं), प्रस्थानं कृ, प्रयाणं कृ; 'he set out for Kashmír,' काश्मीरं or काश्मीरं प्रति चलितः or प्रस्थितः.—(Set to) यत्नेन कृ, यत्नतः कृ, मनो निविश् in caus. or युज्.—(Set up, begin business) वृद्धिम् आरभ्, वृत्त्यारम्भं कृ, पणायाम् आरभ्.—(Set up for), *see To* PRETEND.—(Set upon), *see To* ASSAULT, ATTACK.

SET, *s.* (Number of things of the same kind) गणः, समूहः, वर्गः, संघः, श्रेणी, पंक्तिः *f.*; 'a set of dishes,' भोजनपात्रसमूहः; 'a set of numbers,' संख्याश्रेणी.—(Number of persons) जनसमूहः, पंक्तिः *f.*, गणः, वर्गः.

SET, *p. p.* (Placed, put) स्थापितः -ता -तं, अर्पितः &c., न्यस्तः -स्ता -स्तं, विन्यस्तः &c., रोपितः -ता -तं, निवेशितः &c., आहितः &c., निहितः &c., *see* PLACED.—(Inlaid, studded) खचितः -ता -तं, अनुविद्धः -द्धा -द्धं, प्रणिहितः -ता -तं, प्रतिबद्धः &c., छुरितः -ता -तं, पिनद्धः -द्धा -द्धं, विन्यस्तः -स्ता -स्तं, जडितः &c., पर्युप्तः -प्ता -प्तं, प्रतुप्तः &c., करम्बितः &c.; 'with gems,' मणिखचितः -ता -तं, रत्नखचितः &c.; 'with pearls,' मौक्तिकखचितः &c.; 'is set,' प्रणिधीयते.—(Gone down, as the sun, a planet, &c.) अस्तः -स्ता -स्तं, अस्तमितः &c., अस्तगतः &c., अस्तङ्गतः &c., निर्वाणः -णा -णं.—(Set apart) पृथक्कृतः -ता -तं, उद्धृतः &c.—(Set aside) निराकृतः -ता -तं, निरस्तः -स्ता -स्तं, प्रत्याख्यातः -ता -तं.—(Intent on) आसक्तः -क्ता -क्तं, निष्ठः -ष्ठा -ष्ठं, निष्ठितः -ता -तं, निविष्टः -ष्टा -ष्टं, अभिनिविष्टः &c., आहितः -ता -तं, आयुक्तः -क्ता -क्तं.—(Set on foot) प्रवर्त्तितः -ता -तं, प्रवृत्तः -त्ता -त्तं, विसारितः -ता -तं, आरब्धः -ब्धा -ब्धं, समारब्धः &c.—(Set forth) अभिहितः -ता -तं, विहितः &c., पुरस्कृतः &c.—(Set in order) विन्यस्तः -स्ता -स्तं, विहितः &c., व्यवस्थापितः &c., विरचितः &c.—(Set off, adorned) शोभितः -ता -तं, प्रकाशितः &c.—(Set to rights) सुस्थीकृतः -ता -तं, प्रतिसमाहितः &c.—(Set to music) स्वरबद्धः -द्धा -द्धं.—(Set in motion) सञ्चारितः -ता -तं, सञ्चालितः &c.—(Set over) अधिकृतः -ता -तं, नियुक्तः -क्ता -क्तं, विनियुक्तः &c., व्यापृतः -ता -तं.—(Set up) स्थापितः -ता -तं, प्रतिष्ठापितः &c., *see* ESTABLISHED.—(Regular, prescribed, uniform) नियमितः -ता -तं, नियतः &c., एकरूपः -पा -पं, समरूपः &c., निश्चितः &c., नित्यः -त्या -त्यं.—(Fixed in opinion) दृढनिश्चयः -या -यं, स्थिरनिश्चयः &c.

SETACEOUS, *a.* शूकयुक्तः -क्ता -क्तं, बहुशूकः -का -कं. *See* BRISTLY.

SET-DOWN, *s.* अभिमानखण्डनं, दर्पखण्डनं, अपकर्षणं, वाग्दण्डः.

SET-OFF, *s.* सममूल्यकवस्तु *n.*, निस्तारः, परिवर्त्तः, तुल्यवस्तु *n.*

SETON, *s.* सूचिद्वारा त्वगन्तर्निवेशितं सूत्रं or चर्म्मान्तर्निवेशितं सूत्रं.

SETOSE, SETOUS, *a.* शूकविशिष्टः -ष्टा -ष्टं, शूकमयः -यी -यं. *See* BRISTLY.

SETTER, *s.* (Dog) वनपक्षिनिर्देशको मृगयाकुक्कुरः, वन्यपक्षिनिर्देशने शिक्षितो मृगयाश्वा *m.*—(Of precious stones, &c.) योजयिता *m.* (तृ).

SETTING, *s.* (Placing) स्थापनं -ना, अर्पणं, रोपणं, आरोपः -पणं, आधानं, निधानं.—(Of the heavenly bodies) अस्तं, अस्तमयनं, अस्तमयः, अस्तगमनं, अस्तङ्गमनं, अस्तावलसनं, अवरोपणं.

To SETTLE, *v. a.* (Fix, establish) स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, संस्था, अवस्था, विधा (c. 3. -दधाति -धातुं), प्रतिनिधा, रुह् in caus., आरुह्, निरुह्.—(Establish in life) प्रतिष्ठा in caus., प्रतिष्ठितं -तां कृ, प्रतिष्ठां कृ.—(Determine, decide) निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), साध् (c. 10. साधयति -यितुं), सिद्धीकृ, निष्पद् (c. 10. -पादयति -यितुं), निष्पत्तिं कृ, निर्णयं कृ, निश्चयं कृ, परिकॢप् (c. 10. -कल्पयति -यितुं), व्यवसो (c. 4. -स्यति -सातुं), व्यवस्था in caus., निर्धृ (c. 10. -धारयति -यितुं), अवधृ, सम्प्रधृ, तीर् (c. 10. तीरयति -यितुं), निर्धारणं कृ, अवधारणं कृ, सम्प्रधारणं कृ, तीरणं कृ.—(Settle an affair) कार्य्यनिर्णयं कृ, कार्य्यनिष्पत्तिं कृ.—(Compose, quiet) स्थिरीकृ, स्वस्थं -स्थां कृ, शम् in caus.—(Settle a difference or dispute) सन्धा, समाधा, सन्धानं कृ, सन्धिं कृ, शम् in caus., प्रशम्.—(Adjust, arrange) विधा, संविधा, सन्धा, समाधा, रच्, विरच्, विन्यस्.—(Settle a debt, &c.) ऋणं शुध् (c. 10. शोधयति -यितुं) or साध्, ऋणसिद्धिं कृ, ऋणशोधनं कृ, *see To* LIQUIDATE.—(Cause to sink to the bottom) अधो गम् in caus. (गमयति -यितुं), अधः पत् in caus. (पातयति -यितुं), अवसद् in caus.—(Colonize) वस् in caus., अधिवस्.

To SETTLE, *v. n.* (Fall to the bottom) अधो गम् (c. 1. गच्छति, गन्तुं), अधः पत् (c. 1. पतति -तितुं), तले or तलं पत्.—(Sink) सद् (c. 1. सीदति, सत्तुं), निषद्, अवसद्.—(Deposit a sediment) मलम् अधः-पत् in caus., मलाधःपातनं कृ.—(Become fixed) अवस्था (c. 1. -तिष्ठति -स्थातुं), प्रतिष्ठा in caus. pass. (-ष्ठाप्यते), प्रतिष्ठितः -ता -तं भू, स्थिरीभू.—(Settle in life, marry) प्रतिष्ठितः -ता -तं भू, प्रतिष्ठां

Digitized by Google

प्राप्, विवाहं कृ.—(Become calm, still) शम् (c. 4. शाम्यति, शमितुं), विश्रम्, प्रसद्.—(Become compact) संहतीभू, घनीभू.

SETTLED, *p. p.* (Fixed, established) स्थापितः -ता -तं, प्रतिष्ठापितः &c., प्रतिष्ठितः &c., संस्थापितः &c., रोपितः &c.—(Settled in life, married) प्रतिष्ठितः -ता -तं.—(Determined, decided) निर्णीतः -ता -तं, निश्चितः &c., सिद्धः -द्धा -द्धं, निष्पन्नः -न्ना -न्नं, नियतः -ता -तं, नियमितः &c., व्यवस्थापितः &c., परिकल्पितः &c., व्यवसितः &c., साधितः &c., तीरितः &c., निर्धारितः &c.—(As a debt) सिद्धः -द्धा -द्धं, शोधितः -ता -तं, *see* LIQUIDATED.—(Adjusted, arranged) विहितः -ता -तं, समाहितः &c.—(Composed) शमितः &c., स्थिरीकृतः &c.

SETTLEMENT, SETTLING, *s.* (Act of fixing) स्थापनं -ना, प्रतिष्ठापनं, अवस्थापनं, प्रतिष्ठा, रोपणं.—(Settlement in life) प्रतिष्ठा, प्रतिष्ठितिः *f.*, विवाहः.—(Marriage settlement) शुल्कः -ल्कं, स्त्रीधनं, स्त्रीवृत्तिः *f.*—(Determining, deciding) निर्णयः -यनं, निश्चयः, निष्पत्तिः *f.*, सिद्धिः *f.*, निर्धारणं -णा, अवधारणं, तीरणं; 'of affairs,' कार्य्यनिर्णयः.—(Of a debt) सिद्धिः *f.*, ऋणसिद्धिः *f.*, शुद्धिः *f.*, शोधनं, ऋणशुद्धिः *f.*, ऋणशोधनं, *see* LIQUIDATION.—(Adjustment, as of differences, &c.) समाधानं, सन्धानं, समाधिः *m.*, सन्धिः *m.*, सन्धिकरणं, सन्धानकरणं, वैरशमनं.—(Colonization) देशान्तराधिवासनं.—(Place colonized, colony) अधिवासितदेशः, प्रदेशः, देशशाखा, राज्यशाखा.

SETTLER, *s.* अधिवासी *m.* (न्), प्रदेशाधिवासी *m.*, देशशाखास्थः.

SEVEN, *a.* सप्त *m. f. n. pl.* (न्), सप्तसंख्यकः -का -कं, सप्तकः -का -की -कं; 'aggregate of seven,' सप्तकं.

SEVEN-FOLD, *a.* सप्तगुणः -णा -णं, सप्तविधः -धा -धं, सप्तगुणितः &c.

SEVEN-FOLD, *adv.* सप्तधा, सप्तविधेन, सप्तगुणितं.

SEVENTEEN, *a.* सप्तदश *m. f. n. pl.* (न्), सप्तदशसंख्यकः -का -कं.

SEVENTEENTH, *a.* सप्तदशः -शी -शं.

SEVENTH, *a.* सप्तमः -मी -मं, सप्तमिकः -की -कं.

SEVENTHLY, *adv.* सप्तमतस्, सप्ततस्, सप्तमस्थाने, सप्तमपदे.

SEVENTIETH, *a.* सप्ततः -ती -तं, सप्ततितमः -मी -मं.

SEVENTY, *s.* सप्ततिः *f. sing.*, सप्ततिसंख्यकः -का -कं; 'they reigned seventy years,' सप्ततिम् अब्दान् राज्यं चक्रुः; 'with seventy arrows,' सप्तत्या शरैः; 'seventy-one,' एकसप्ततिः *f. sing.*; 'seventy-two,' द्वासप्ततिः *f.*; 'seventy-three,' त्रयःसप्ततिः; 'seventy-four,' चतुःसप्ततिः *f.*; 'seventy-five,' पञ्चसप्ततिः *f.*; 'seventy-six,' षट्सप्ततिः *f.*; 'seventy-seven,' सप्तसप्ततिः *f.*; 'seventy-eight,' अष्टासप्ततिः *f.*; 'seventy-nine,' नवसप्ततिः *f.* or ऊनाशीतिः *f.* or एकोनाशीतिः *f.*

To SEVER, *v. a.* (Part, disjoin) वियुज्, विश्लिष् in caus., भिद्, विभिद्, छिद्, विच्छिद्, अवच्छिद्, पृथक्कृ, विभज्.

SEVERAL, *a.* (Consisting of a number, many) बहुः -हुः -ह्वी -हु, अनेकः -का -कं, कतिपय in comp., कतिचित् in comp., *see* MANY, NUMEROUS, FEW.—(Separate, distinct) भिन्नः -न्ना -न्नं, व्यक्तः -क्ता -क्तं, व्यस्तः -स्ता -स्तं, पृथगात्मकः -का -कं, पृथग्व्यक्तिकः &c., अव्यापकः &c., असाधारणः -णा -णी -णं, प्रत्येकः -का -कं.—(Peculiar) स्व in comp., आत्म in comp., प्रातिस्विकः -की -कं.—(Respective) स्व repeated, इतरेतरः -रा -रं, *see* RESPECTIVE.

SEVERALLY, *adv.* पृथक्, पृथक् पृथक्, प्रत्येकं, अनुपूर्वशस्, अनुक्रमशस्, यथाक्रमं, अवयवशस्, व्यक्तितस्, व्यक्तिशस्, प्रति or अनु prefixed.

SEVERALTY, *s.* पृथक्त्वं, पार्थक्यं, व्यक्तिता, व्यस्तता, व्यासः, भिन्नता.

SEVERANCE, *s.* वियोगः, विश्लेषः, विप्रयोगः, विभेदः, पृथक्करणं.

SEVERE, *a.* (Said of persons) निष्ठुरः -रा -रं, कठोरः -रा -रं, उग्रः -ग्रा -ग्रं, उग्रदण्डः -ण्डा -ण्डं, उग्रशासनः -ना -नं, तीक्ष्णदण्डः &c., तीव्रदण्डः &c., दण्डनशीलः -ला -लं, दण्डबुद्धिः -द्धिः -द्धि, भैरवशासनः &c., तीव्रशक्तिः -क्तिः -क्ति, प्रखरः -रा -रं, कठिनः -ना -नं, क्रूरः -रा -रं, परुषः -षा -षं, कटुः -टुः -टु, उद्यतदण्डः -ण्डा -ण्डं, उद्यतबाहुः -हुः -हु, *see* RIGOROUS.—(Said of things) तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, उग्रः -ग्रा -ग्रं, रौद्रः -द्री -द्रं, प्रखरः -रा -रं, दुःसहः -हा -हं, दुःसह्यः -ह्या -ह्यं, कष्टसहः &c.—(Intense, excessive) अत्यन्तः -न्ता -न्तं, अतिशय in comp., अतिशायनः -ना -नं, भृशः -शा -शं, अति prefixed; 'severe pain,' तीव्रवेदना; 'penance,' उग्रतपस् *n.*

SEVERED, *p. p.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः &c., विश्लिष्टः -ष्टा -ष्टं, विभिन्नः -न्ना -न्नं, विच्छिन्नः &c., अवच्छिन्नः &c., छिन्नः &c., प्रभिन्नः &c., विगतः -ता -तं.

SEVERELY, *adv.* निष्ठुरं, नैष्ठुर्येण, कठोरं, उग्रं, तीक्ष्णं, तीव्रं.

SEVERITY, *s.* (Said of persons) नैष्ठुर्यं, निष्ठुरता, कठोरता, उग्रता, उग्रदण्डता, तीक्ष्णदण्डता, कठिनता, काठिन्यं, क्रूरता, परुषता, पारुष्यं, कटुता, दौरात्म्यं, निकृतिः *f.*, तेजस् *n.*, *see* RIGOR.—(Said of things) उग्रता, तीक्ष्णता -त्वं, तीव्रता, रौद्रता, प्रखरता, दुःसहता, दुःसह्यता.—(Excessive punishment) अतिदण्डः-ण्डनं, दण्डनाधिक्यं.

To SEW, *v. a.* सिव् (c. 4. सीव्यति, सेवितुं), निसिव्, परिसिव्, विसिव्, सीवनं कृ, सेवनं कृ, सूतिं कृ, वे, प्रवे.

SEWED, SEWN, *p. p.* स्यूतः -ता -तं, निष्यूतः &c., च्युतः &c., च्यूतः -ता -तं, उतः &c., प्रोतः &c., पुटितः -ता -तं.

SEWER, *s.* कर्दमाटकः, सङ्करः, नाली, प्रणाली, प्रणालः, मलनिर्गमः, मलवाहिनी, मलमार्गः, मलपथः. *See* DRAIN; 'village sewer,' ग्रामसङ्करः.

SEWING, *s.* सीवनं, सेवनं, स्यूतिः *f.*, च्यूतिः *f.*, च्युतिः *f.*, निष्यूतिः.

SEX, *s.* (Distinction between male and female) स्त्रीपुरुषभेदः, स्त्रीपुरुषव्यक्तिभेदः, स्त्रीपुरुषलिङ्गं, लिङ्गभेदः.—(Gender) लिङ्गं, जातिः *f.*; 'male sex,' पुरुषजातिः *f.*, पुंजातिः *f.*, पुंलिङ्गं, नरजातिः *f.*; 'female sex,' स्त्रीजातिः *f.*, स्त्रीलिङ्गं; 'separation of the sexes,' स्त्रीपुरुषवियोगः, द्वन्द्वभिन्नं.

SEXAGENARIAN, SEXAGENARY, *a.* षष्टिकः -का -कं, षष्टिकवयस्कः -स्का -स्कं.

SEXANGULAR, *a.* षट्कोणः -णा -णं, षडस्रः -स्रा -स्रं, षड्भुजः &c.

SEXENNIAL, *a.* षडब्दिकः -का -कं, षड्वर्षिकः &c., षड्वर्षीणः -णा -णं.

SEXTANT, *s.* (Sixth part of a circle) वृत्तषडंशः, वृत्तषड्भागः.

SEXTON, *s.* शवगर्त्तखनकः, शवकुण्डकारकः, श्मशानाध्यक्षः, मृतपाः.

SEXUAL, *a.* स्त्रीपुरुषधर्म्मसम्बन्धी -न्धिनी -न्धि (न्), स्त्रीपुरुषभेदसम्बन्धी &c., स्त्रीपुरुषभेदविषयकः -का -कं, स्त्रीपुरुषविशेषणः -णा -णं, स्त्रीपुरुषत्वसम्बन्धी &c., मैथुनसम्बन्धी &c., लिङ्गसम्बन्धी &c.; 'sexual intercourse,' मैथुनं, मिथुनं, रतिः *f.*, सुरतं, अङ्गसङ्गः, व्यवायः, सम्भोगः, सङ्गः, रतिक्रिया, स्त्रीपुरुषसङ्गः, *see* COPULATION.

SHABBILY, *adv.* (Raggedly) लाटवस्त्रेण, कर्पटवस्त्रैः, जर्जरवस्त्रैः, कर्पटिकवत्.—(Meanly) कुत्सितं, कृपणं, सकार्पण्यं, तुच्छं.

SHABBINESS, *s.* (Raggedness) लाटता, जर्जरता, जीर्णता, सूत्रदारिद्र्यं.—(Meanness) कृपणता, कार्पण्यं, कुत्सितत्वं, तुच्छता, अनुदारता.

SHABBY, *a.* (As clothes, &c.) लाटः -टा -टं, जर्जरः -रा -रं, जर्जरीकः -का -कं, जीर्णः -र्णा -र्णं, सूत्रदरिद्रः -द्रा -द्रं, पाश in comp.; as, 'a shabby umbrella,' छत्रपाशः.—(Mean) कृपणः -णा -णं,

Digitized by Google

कुत्सितः -ता -तं, तुच्छः -च्छा -च्छं, जघन्यः -न्या -न्यं, कदर्य्यः -र्य्या -र्य्यं, अपकृष्टः &c., अनुदारः &c.

To SHACKLE, *v. a.* निगडेन बन्ध्. *See To* FETTER, HAMPER.

SHACKLE, *s.* निगडः, बन्धनं, शृङ्खला, पाशः, संरोधः. *See* FETTER.

SHACKLED, *p. p.* निगडितः -ता -तं, शृङ्खलितः &c., संरुद्धः -द्धा -द्धं.

SHAD, *s.* (Sort of fish) पाठीनः, मद्गुरः, शृङ्गी *f.*, सहस्रदंष्ट्रः.

SHADDOCK, *s.* (Citrus decumana, a fruit) गिरिजा.

SHADE, *s.* (Obscurity caused by interruption of light) छाया, अनातपः, आतपाभावः, अतेजस् *n.*, सूर्य्यप्रकाशाभावः, अप्रकाशः, श्यामा.—(Obscurity) अन्धकारः, तिमिरं, तमस् *n.*, अप्रकाशात्वं.—(Screen) व्यवधा, व्यवधानं, वितानं, तिरस्करिणी, *see* SCREEN; 'for a lamp,' अश्मन्तकं.—(Degree, gradation) अंशः, भागः, क्रमः.—(Minute difference) अत्यल्पान्तरं, स्वल्पान्तरं, अत्यल्पमात्रं, अत्यल्पं.—(Ghost) अपच्छाया, प्रेतः.

To SHADE, *v. a.* (Shelter from light and heat) आतपं निवृ (c. 10. -वारयति -यितुं) or वृ, सूर्य्यतेजो निवृ, उष्णं निवृ, आतपवारणं कृ, उष्णनिवारणं कृ, उष्णप्रतिबन्धं कृ, छायां कृ.—(Overspread, cover) छद् (c. 10. छादयति -यितुं), प्रच्छद्, आच्छद्, अवतन्, वितन्, वितानीकृ.

SHADED, *p. p.* छादितः -ता -तं, प्रच्छादितः &c., वितानीकृतः -ता -तं.

SHADINESS, *s.* छायायुक्तता, सच्छायत्वं, छायाबाहुल्यं, आतपराहित्यं.

SHADOW, *s.* (Shade representing the form of the body which intercepts the light) छाया, प्रतिछाया, प्रतिविम्बं; 'middle or mean shadow,' मध्यच्छाया.—(Reflection, image reflected) प्रतिविम्बं, प्रतिच्छाया, छायात्मा *m.* (न्), छाया, प्रतिभासः, प्रतिमूर्त्तिः *f.*, प्रतिरूपं, प्रतिमा; 'shadow of the moon,' प्रतिमेन्दुः *m.*; 'relation of a shadow with its substance,' विम्बप्रतिविम्बभावः; 'casting a shadow,' छायाकरः -रा -री -रं.—(Obscurity), *see* SHADE.—(Shelter) आश्रयः, शरणं, संश्रयः.—(Faint resemblance) आभासः, पाण्डुरूपं, ईषत्सदृशरूपं.

To SHADOW, *v. a.* (Overspread, &c.), *see To* SHADE.—(Represent faintly) आभासं दृश् in caus., छायाभासं प्रदृश्, ईषत्सदृशरूपं प्रदृश्, छायाप्रदर्शनं कृ, प्रतिच्छायां कृ, विम्ब (nom. विम्बयति -यितुं), प्रतिविम्ब.

SHADOWED, *p. p.* विम्बितः -ता -तं, प्रतिविम्बितः &c., विम्बागतः &c.

SHADOWLESS, *a.* छायाहीनः -ना -नं, अपच्छायः -या -यं, छायारहितः -ता -तं.

SHADOWY, *a.* (Not bright) मन्दच्छायः -या -यं, न्यूनकान्तिः -न्तिः -न्ति, न्यूनतेजस्कः -स्का -स्कं, मन्दतेजस्कः &c., न्यूनप्रभः -भा -भं, *see* DIM.—(Unsubstantial) छायारूपः -पा -पं, छायात्मकः -का -कं, छायाकारः -रा -रं, छायाकृतिः -तिः -ति, अवास्तविकः -की -कं.

SHADY, *a.* (Abounding with shade, having shade) सच्छायः -या -यं, छायामयः -यी -यं, छायाबहुलः -ला -लं, छायायुक्तः -क्ता -क्तं, छायावृतः -ता -तं, छायाच्छादितः &c., छायाच्छन्नः -न्ना -न्नं.—(Sheltered from the heat) आतपरहितः -ता -तं, आतपशून्यः -न्या -न्यं, आतपहीनः -ना -नं, निरातपः -पा -पं.

SHAFT, *s.* (Arrow) शरः, बाणः, काण्डः -ण्डं; 'shaft of an arrow,' शरकाण्डः.—(Pole of a carriage) धूः *f.* (धुर्), धुरा, कूबरः; 'of a plough,' ईषा, ईशा, हलदण्डः, *see* POLE.—(Handle) दण्डः.—(Of a mine) खनिगर्त्तः, खनिकूपः, खनिकुण्डं, कूपः, अवटः.—(Of a column) शङ्कुः *m.*

SHAG, *s.* (Rough hair) विषमलोम *n.* (न्), स्थूललोम *n.*, दृढलोम.—(Kind of bird) मत्स्यवेधनी, मद्गुः *m.*

SHAGGINESS, *s.* विषमलोमत्वं, लोमप्राचुर्य्यं, लोमशत्वं, प्रचुरलोमत्वं.

SHAGGY, *a.* विषमलोमा -मा -म (न्), दृढलोमा &c., स्थूललोमा &c., प्रचुरलोमा &c., अपरिष्कृतलोमा &c., लोमशः -शा -शं, रोमशः &c.

To SHAKE, *v. a.* क्षुभ् (c. 10. क्षोभयति -यितुं), विक्षुभ्, व्याक्षुभ्, संचल् (c. 10. -चालयति -यितुं), विचल्, चल्, कम्प् (c. 10. कम्पयति -यितुं), प्रकम्प्, प्रतिकम्प्, धू (c. 5. धूनोति, धुनोति, c. 9. धुनाति, धवितुं, धोतुं), आधू, ह्वल् (c. 10. ह्वलयति, ह्वालयति -यितुं), आस्फाल् (c. 10. -स्फालयति -यितुं), आन्दोलनं कृ; 'he shakes his head,' तिर्य्यङ् मूर्धानं चालयति.—(One's confidence) शङ्कान्वितं -तां कृ, विश्वासन्यूनतां कृ or जन्.—(Shake off) अवधू, निर्धू, विधू, उद्धू, अपास्, निरस्, निराकृ, मुच्.—(Shake hands) परस्परं पाणिं ग्रह्, अन्योन्यं हस्तं or हस्तौ स्पृश् (c. 6. स्पृशति, स्प्रष्टुं); 'they shake hands,' अन्योन्यं हस्तौ स्पृशतः.

To SHAKE, *v. n.* क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), प्रक्षुभ्, संक्षुभ्, कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, प्रकम्प्, अभिकम्प्, संकम्प्, वेप् (c. 1. वेपते -पितुं), प्रवेप्, ह्वल् (c. 1. ह्वलति -लितुं), विह्वल्, प्रह्वल्, स्फुर् (c. 6. स्फुरति -रितुं), चल् (c. 1. चलति -लितुं), विचल्, वेल्ल् (c. 1. वेल्लति -ल्लितुं), एज् (c. 1. एजते -जितुं), दोल् (nom. दोलायते), क्ष्माय् (c. 1. क्ष्मायते -यितुं), आन्दोलितः -ता -तं भू.

SHAKE, *s.* क्षोभः, विक्षोभः, संक्षोभः, कम्पः, विकम्पः. *See* SHAKING.

SHAKEN, *p. p.* क्षुभः -भा -भं, विक्षुभः &c., संक्षुभः &c., व्याक्षुभः &c., क्षोभितः -ता -तं, क्षुभितः &c., धूतः -ता -तं, आधूतः &c., धूनः -ना -नं, आधुतः &c., विधूनितः -ता -तं, चलितः &c., प्रचलितः &c., कम्पितः &c., आकम्पितः &c., वेल्लितः &c., प्रेरितः &c., आस्फालितः -ता -तं, आन्दोलितः -ता -तं, स्फुरितः &c., क्ष्मायितः &c., लाडितः &c.; 'by the wind,' अनिलधूतः -ता -तं, अनिलक्षुभः -भा -भं, अनिलोद्धतः -ता -तं, पवनाहतः &c., वायुना धूयमानः -ना -नं or विधूयमानः &c.—(Shaken off) निर्धूतः -ता -तं, उद्धूतः &c., विधूतः &c., विधुतः &c., निरस्तः -स्ता -स्तं; 'one who has shaken off his sins,' उद्धूतपापः -पा -पं, मुक्तपापः &c., पापमुक्तः -क्ता -क्तं; 'having shaken off,' अपास्य, विधूय.

SHAKING, *s.* क्षोभः -भणं, विक्षोभः, संक्षोभः, कम्पः -म्पनं, विकम्पः, वेपनं, चलनं, विचलनं, आस्फालनं, आन्दोलनं, वेल्लनं, वेल्लितं, धूननं, विधूननं, धूनिः *f.*, विधुननं, विधुतिः *f.*, विधूतिः, विधुवनं, एजनं, स्फुरणं.

SHAKING, *part.* (Moving about, trembling) चलनः -ना -नं, कम्पनः -ना -नं, सकम्पः -म्पा -म्पं, वेपमानः -ना -नं, चलः -ला -लं, चञ्चलः &c., लोलः &c., कम्प्रः -म्प्रा -म्प्रं, तरलः -ला -लं, दोलायमानः -ना -नं, चलाचलः &c., पारिप्लवः -वी -वं, परिप्लवः &c., क्ष्मायिता -त्री -तृ (तृ), एजिता &c.—(Causing to shake) क्षोभकः -का -कं, क्षोभकारी -रिणी &c., धुन्वन् -न्वती -न्वत् (त्), विधुन्वन् &c., धुन्वानः -ना -नं, एजयन् &c., एजकः -का -कं.

SHAKY, *a.* अस्थिरः -रा -रं, स्खलितः -ता -तं, स्खलन्नितिः -तिः -ति.

To SOFTEN, *v. a.* मृदूकृ, कोमलीकृ, स्रद (nom. स्रदयति -यितुं), श्रम् in caus., सान्त्व् or शान्त्वं, दम् in caus., स्निग्धीकृ, करुणार्द्रीकृ. *See To* MOLLIFY, MELT, *v. a.*

To SOFTEN, *v. n.* मृदूभू, कोमलीभू, स्निग्धीभू, श्रम् (c. 4. शाम्यति, शमितुं), प्रशम्, शान्तः -न्ता -न्तं भू, दयार्द्रीभू. *See To* MELT, *v. n.*

SOFTENED, *p. p.* मृदूकृतः -ता -तं, शमितः &c., स्निग्धीभूतः -ता -तं.

SOFTENING, *part.* or *a.* शान्तिदः -दा -दं, शान्तिकः -की -कं, शान्तिकरः -री -रं.

SOFTLY, *adv.* शनैस्, शनैः शनैस्, शनकैस्, मन्दं, मृदु, समादेवं.

SOFTNESS, *s.* मृदुता, मार्दवं, स्रदिमा *m.* (न्), कोमलता, स्निग्धता -त्वं, मृदुस्पर्शता -त्वं, सुखस्पर्शता -त्वं, सुकुमारता -त्वं, सौकुमार्यं, अखरता, अकर्कशता -त्वं, अकठिनता, अकाठिन्यं, शिथिलता, शैथिल्यं; 'of voice,' स्वरमधुरता -माधुर्यं.

To SOIL, *v. a.* मलिन (nom. मलिनयति -यितुं), मलिनीकृ, कलङ्क (nom. कलङ्कयति -यितुं), दुष् (c. 10 दूषयति -यितुं), लिप्. *See To* STAIN.

SOIL, *s.* (Dirt, stain) मलं, परिमलं, कलुषं, कलङ्कः, कल्कं, म्लानिः *f.*, परिम्लानं.—(Mould, earth) मृत्तिका, मृद् *f.*, मृदा, भूमिः *f.*, भूः *f.*, स्थलं -ली, पांशुः *m.*, खलं; 'good soil,' मृत्स्ना, मृत्सा, मृदिनी; 'fertile soil,' उर्व्वरा, ऊर्व्वरा; 'dry or barren soil,' मरुः *m.*, मरुस्थलं -ली, ईरिणं -णा, इरिणं; 'salt soil,' ऊषः, ऊषरः, उषः, क्षारमृत्तिका; 'having salt soil,' ऊषरः -रा -रं, ऊषवान् -वती -वत् (त्); 'untilled or waste soil,' खिलः, अप्रहतभूमिः *f.*; 'stony,' शर्करा; 'a black soil,' नीलमृत्तिका, कृष्णमृद् *f.*, कृष्णमृत्तिका, कृष्णभूमिः *f.*; 'pale soil,' पाण्डुमृत्तिका; 'native soil,' जन्मभूमिः *f.*, जन्मवसुधा; 'mountain-soil,' गिरिमृद्; 'soil fertile with every crop,' सर्व्वशस्याढ्यभूमिः *f.*

SOILED, *p. p.* मलिनितः -ता -तं, मलिनीकृतः &c., कलङ्कितः &c., परिमलितः &c., दूषितः -ता -तं, लिप्तः -प्ता -प्तं, अवलिप्तः &c., विलिप्तः &c., कलुषितः &c., मलिनः -ना -नं, कल्की -ल्किनी &c.; 'having soiled hands,' लिप्तहस्तः -स्ता -स्तं.

To SOJOURN, *v. n.* (Dwell for a time) कियत्कालं or अल्पकालपर्य्यन्तं वस् (c. 1. वसति, वस्तुं) or निवस्, प्रवस्, प्रवासं कृ, कियत्कालं स्था or वृत् or आस् or अध्यास्, देशान्तरे or परदेशे वस्, देशान्तरम् अधिवस् or आवस्, *see To* LODGE, *v. n.*

SOJOURN, SOJOURNING, *s.* प्रवासः -सनं, प्रवसनं, कियत्कालपर्य्यन्तवासः, अल्पकालनिवासः, अदीर्घवासः, देशान्तरवासः, देशान्तराधिवासः, परदेशवासः, देशान्तरसेवनं, परदेशसेवनं, देशान्तरावलम्बनं.

SOJOURNER, *s.* प्रवासी *m.* (न्), प्रवसन् *m.* (त्), प्रोषितः, देशान्तरवासी *m.* (न्), देशान्तराधिवासी *m.*, परदेशवासी, देशान्तरसेवी *m.*, परदेशसेवी.

To SOLACE, *v. a.* सान्त्व् or शान्त्व्, आश्वस् in caus., विनुद् (c. 10. -नोदयति -यितुं), *see To* COMFORT, CONSOLE; 'to solace one's self,' आत्मानं विनुद्.

SOLACE, *s.* सान्त्वनं -ना, परिसान्त्वनं, आश्वासनं, विनोदः -दनं, आपत्प्रतीकारः, क्लेशापहरणं, शोकापनोदः -दनं, क्लेशशान्तिः *f.*, शोकशान्तिः *f.*, दुःखशान्तिः *f.*, शोकापहरणं.

SOLAR, SOLARY, *a.* सौरः -री -रं, सवित्रियः -या -यं, सवितृलः -ला -लं, सावनः -नी -नं, सूर्य्यसम्बन्धी -न्धिनी -न्धि (न्), सूर्य्यविषयकः -का -कं, सूर्य्य in comp., अर्क in comp.; 'solary dynasty,' सूर्य्यवंशः; 'solar day,' सौरसावनदिनं, सावनदिनं, सौरदिनं; 'solar month,' सौरमासः, सावनमासः; 'solar year,' सौरवर्षः, अर्कवर्षः.

SOLD, *p. p.* विक्रीतः -ता -तं, पणितः &c.; 'having sold,' विक्रीय.

To SOLDER, *v. a.* द्रुतधातुमयलेपेन संलग्नीकृ, द्रुतसीसकादिना सन्धा.

SOLDER, *s.* द्रुतधातुमयलेपः, द्रुतसीसकादिमयलेपः, धातुमयलेपः.

SOLDIER, *s.* सैन्यः, सैनिकः, आयुधिकः, आयुधीयः, योद्धा *m.* (द्धृ), योधः, शस्त्रजीवी *m.* (न्), शस्त्राजीवः, शस्त्रधरः, शस्त्रभृत् *m.*, शस्त्रधारी *m.* (न्), शस्त्रोपजीवी *m.*, युद्धोपजीवी *m.*, युद्धजीवी *m.*, अस्त्रधरः, अस्त्रधारी *m.*, अस्त्रभृत् *m.*, अस्त्रजीवः, युधानः, चमूचरः, सेनाचरः, तन्त्री *m.*, काण्डस्पृष्टः, काण्डपृष्टः; 'man of the military class,' क्षत्रियः, क्षत्रः, क्षत्री *m.*, राजन्यः, राजपुत्रः, विराट् *m.* (ज्).

SOLDIER-LIKE, SOLDIERLY, *a.* सैन्ययोग्यः -ग्या -ग्यं, सैन्योपयुक्तः -क्ता -क्तं, सैनिकः -की -कं, आयुधीयः -या -यं, योधसम्बन्धी &c., सैन्यसम्बन्धी &c.

SOLDIERY, *s.* सैन्यसमूहः, सैनिकवर्गः, योधसमूहः, राजन्यकं, योद्धृत्वं.

SOLE, *s.* (Of the foot) तलं, पादतलं; 'from the sole of the foot to the head,' आपादतलमस्तकात्, आपादमस्तकात्.—(Of a shoe) तलः, पादुकातलः, पादुकाधोभागः.

SOLE, *a.* एकः -का -कं, एकाकी -किनी -कि (न्), केवलः -ला -लं, केवली &c., कैवल्यः -ल्यी -ल्यं, अद्वितीयः -या -यं. *See* SINGLE.

SOLECISM, *s.* अपशब्दः, अपभंशः, अशुद्धशब्दः, अशुद्धप्रयोगः, म्लेच्छितं, अपप्रयोगः, अप्रयोगः, अवचनीयता.

SOLELY, *adv.* केवलं, मात्रं -त्रेण -त्रात्, एकान्ततस्, एकतस्.

SOLEMN, *a.* (Attended with religious rites) विधिपूर्व्वः -र्व्वा -र्व्वं, देवकर्म्मसहितः -ता -तं, संस्कारसहितः &c., पुण्यविधिसहितः &c., पुण्यसंस्कारसहितः &c., धर्म्मसंस्कारपूर्व्वः -र्व्वा -र्व्वं, धर्म्मसंस्कारसहितः -ता -तं, धर्म्मक्रियासहितः &c.—(Serious, grave) गुरुः -र्वी -रु, गुर्व्वीः -र्वी -र्वीं, गम्भीरः -रा -रं, गभीरः &c., गम्भीरार्थः &c., धीरः -रा -रं, अलघुः -घुः -घ्वी -घु.—(Attended with a serious promise, consisting of a solemn asseveration) दृढप्रतिज्ञापूर्व्वः -र्व्वा -र्व्वं, दृढप्रतिज्ञारूपः -पा -पं, गुरुप्रतिज्ञापूर्व्वः &c., दृढनिश्चयपूर्व्वः &c., दृढनिश्चयरूपः &c., दृढनिश्चयात्मकः -का -कं; 'a solemn pledge,' दृढप्रतिज्ञा, अलघुप्रतिज्ञा.

SOLEMNITY, SOLEMNNESS, *s.* (Seriousness, gravity) गुरुता -त्वं, गौरवं, गम्भीरता, गाम्भीर्य्यं, अलघुता, धीरता.—(Religious ceremony) धर्म्मक्रिया, पुण्यक्रिया, देवक्रिया, संस्कारः, उत्सवः. *See* RITE.

To SOLEMNIZE, *v. a.* (Perform according to ritual forms) यथाविधि or यथाशास्त्रं कृ or अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), विधिवत् कृ or अनुष्ठा or निर्वह् (c. 10. -वाहयति -यितुं), विधिपूर्व्वं कृ or अनुष्ठा.—(Make grave or serious) गम्भीरीकृ, धीरत्वं कृ or जन्, गुरुत्वं or गौरवं कृ or जन्; 'the mind,' चित्तधीरत्वं जन्, चित्तगौरवं कृ.

SOLEMNLY, *adv.* (According to ritual form) यथाविधि, यथाशास्त्रं, विधिवत्, विधिपूर्व्वं, पुण्यविधिपूर्व्वं.—(Seriously) सगौरवं, गौरवेण, गम्भीरं, सगाम्भीर्य्यं, अलघु, अलाघवेन.—(With solemn asseveration) दृढप्रतिज्ञापूर्व्वं, दृढनिश्चयपूर्व्वं, गुरुप्रतिज्ञापूर्व्वं; 'solemnly pledged,' अलघुप्रतिज्ञः -ज्ञा -ज्ञं.

To SOLICIT, *v. a.* प्रार्थ् (c. 10. -अर्थयते -र्थि -यितुं), अभ्यर्थ्, अर्थ्, विनयेन प्रार्थ् or याच्. *See To* IMPLORE, ENTREAT, BEG.

SOLICITATION, *s.* प्रार्थनं -ना, अभ्यर्थना, अर्थः, याचना, सनिः -नी *m. f.*, अभ्येषणा; 'affectionate solicitation,' प्रणयः, प्रश्रयः, प्रसरः.

SOLICITED, *p. p.* प्रार्थितः -ता -तं, अभ्यर्थितः &c., विनयेन याचितः -ता -तं

Digitized by Google

or उपयाचितः -ता -तं or प्रयाचितः &c. *See* IMPLORED.

SOLICITOR, *s.* प्रार्थयिता *m.* (तृ), प्रार्थकः, याचकः, उपयाचकः.—(Attorney) प्रतिनिधिः *m.*, प्रतिपुरुषः.

SOLICITOUS, *a.* (Eagerly anxious about) उत्सुकः -का -कं, व्यग्रः -ग्रा -ग्रं, उत्कः -त्का -त्कं, उत्कण्ठितः -ता -तं, सोत्कण्ठः -ण्ठा -ण्ठं.—(Careful, anxious) उद्विग्नः -ग्ना -ग्नं, चिन्तायुक्तः -क्ता -क्तं, चिन्ताग्रस्तः -स्ता -स्तं, चिन्ताक्रान्तः -न्ता -न्तं, विधुरः -रा -रं, चिन्तितः -ता -तं, भावितः &c.

SOLICITUDE, *s.* औत्सुक्यं, उत्सुकता -त्वं, व्यग्रता -त्वं, उत्कण्ठा, उद्विग्नता, उद्वेगः, चिन्ता, चित्तवेदना, हृदयवेदना, अनुध्यानं.

SOLID, *a.* (Hard, firm, compact) घनः -ना -नं, दृढः -ढा -ढं, सुदृढः &c., संहतः -ता -तं, सुसंहतः &c., दृढसन्धिः -न्धिः -न्धि, जरठः -ठा -ठं, ग्रावा -वा -व (न्), कक्खटः -टा -टं, *see* HARD.—(Not hollow) सगर्भः -र्भा -र्भं, गर्भपूर्णः -र्णा -र्णं, अशून्यः -न्या -न्यं.—(Not liquid) अद्रवः -वा -वं, द्रवेतरः -रा -रं, अद्रुतः -ता -तं, घनः -ना -नं, अप्रवाही -हिणी -हि (न्); 'solids,' अद्रवद्रव्याणि *n. pl.*, अद्रवपदार्थाः *m. pl.*—(Substantial) वास्तवः -वी -वं, सारवान् -वती -वत् (त्), घनः -ना -नं; 'solid food,' चर्व्यं; 'solid hoofed,' एकशफः -फा -फं.

SOLID, *s.* (In geometry) घनः; 'its contents,' घनफलं.—(Something not liquid) अद्रवद्रव्यं, अद्रवपदार्थः, घनद्रव्यं, घनपदार्थः.

SOLIDITY, SOLIDNESS, *s.* घनता -त्वं, दृढता -त्वं, संहतत्वं, अद्रवता -त्वं, कठिनता, काठिन्यं, अद्रुतता, अप्रवाहिता.

SOLIDUNGULATE, SOLIDUNGULOUS, *a.* एकशफः -फा -फं, एकखुरः -रा -रं.

SOLILOQUY, *s.* आत्मगतभाषणं, आत्मभाषणं, स्वगतभाषणं, स्वगतवाक्यं.

SOLITARILY, *adv.* विविक्तं, एकान्ततस्, निभृते, रहस्, रहसि, उपांशु.

SOLITARINESS, *s.* विविक्तता, एकान्तत्वं, एकाकित्वं. *See* SOLITUDE.

SOLITARY, SOLITAIRE, *s.* विविक्तवासी *m.* (न्), वनवासी *m.* *See* RECLUSE.

SOLITARY, *a.* (Living alone, going alone) विविक्तवासी -सिनी -सि (न्), एकान्तवासी &c., विविक्तसेवी &c., एकान्तसेवी &c., विविक्तप्रियः -या -यं, विजनस्थः -स्था -स्थं, विजनसेवी &c., निर्जनस्थः &c., विविक्तचरः -रा -रं, एकचरः &c., एकान्तचरः &c., असंसर्गः -र्गा -र्गं, असङ्गः -ङ्गा -ङ्गं, जनसंसर्गरहितः -ता -तं, जनसंसर्गशून्यः -न्या -न्यं.—(Retired, said of places) निर्जनः -ना -नं, विजनः &c., निर्मनुजः -जा -जं, निर्मनुष्यः -ष्या -ष्यं, विविक्तः -क्ता -क्तं, निभृतः -ता -तं, एकान्तः -न्ता -न्तं, निःशलाकः -का -कं, छन्नः -न्ना -न्नं, छन्दः -न्दा -न्दं, *see* LONELY.—(Single) एकः -का -कं, एकाकी -किनी &c., असहायः -या -यं.

SOLITUDE, *s.* (Lonely state) विविक्तता, विविक्तदशा, विविक्तवृत्तिः *f.*, विविक्तवासित्वं, एकान्तता, एकान्तवृत्तिः *f.*, एकाकिता, जनसंसर्गहीनता, संसर्गाभावः, जनसंसर्गाभावः, असहायता.—(Loneliness, said of places) विविक्तता, निर्जनता, विजनता, निर्मनुष्यता, *see* LONELINESS.—(Lonely place, desert) विविक्तस्थानं, विविक्तस्थलं, अरण्यं, वनं, वल्लुरं, वल्लूरं.

SOLO, *s.* एकाकिगानं, एकाकिगीतं, एकवाद्यस्वरः, एकाकिस्वरः.

SOLSTICE, *s.* अयनं, अयनान्तः, अयनकालः, अयनसन्धिः *m.*, अयनसन्धिकालः, क्रान्तिः *f.*, क्रान्तिकालः; 'summer solstice,' उत्तरायणं, उत्तरक्रान्तिः; 'winter,' दक्षिणायनं, दक्षिणक्रान्तिः *f.*, याम्यायनं.

SOLSTITIAL, *a.* अयनान्तसम्बन्धी -न्धिनी -न्धि (न्), अयनसम्बन्धी &c., क्रान्तिसम्बन्धी &c., अयनान्तकालिकः -का -कं; 'solstitial point,' अयनं, अयनसन्धिः *m.*, अयनान्तः.

SOLUBILITY, SOLUBLENESS, *s.* द्राव्यता -त्वं, विद्राव्यता -त्वं, द्रावणीयता, गलनीयता, याव्यता -त्वं, विलयनीयता, द्रावणशक्यता.

SOLUBLE, *a.* द्राव्यः -व्या -व्यं, द्रावणीयः -या -यं, विद्राव्यः &c., याव्यः -व्या -व्यं, विलयनीयः -या -यं, द्रावणशक्यः -क्या -क्यं, गलनीयः -या -यं, द्रवार्हः -र्हा -र्हं. *See* DISSOLVABLE.

SOLUTION, *s.* (The act) द्रावणं, विद्रावणं, विलयनं, गलनं, विगलनं.—(The state) द्रवत्वं, द्रुतत्वं, विद्रुतता, विलीनता, समाधानं, संयोगः.—(Chemical union) द्रवमूलकसारूप्यसंयोगः, द्रवमूलकसंयोगः, संयोगः, योगः.—(Explanation) लापनं, लापनिका, व्याख्या -ख्यानं, विख्यापनं, शोधनं, परिशोधनं; 'of a difficult verse,' श्लोकलापनं; 'of a riddle,' छित्तिः *f.*—(Of doubt) संशयनिर्वृत्तिः *f.*

To SOLVE, *v. a.* (Dissolve) द्रवीकृ, विद्रु in caus., विली in caus.—(Explain, resolve) व्याख्या (c. 2. -ख्याति -तुं), ली in caus. (लापयति -यितुं), लापनं कृ, शुध् (c. 10. शोधयति -यितुं), परिशुध्; 'a problem,' साध् (c. 10. साधयति -यितुं), सिद्धीकृ; 'a doubt,' संशयं छिद् (c. 7. छिनत्ति, छेत्तुं) or उच्छिद्, संशयम् अपनी or अपहृ.

SOLVED, *p. p.* व्याख्यातः -ता -तं, लापितः &c., छिन्नः -न्ना -न्नं; 'as a problem,' सिद्धः -द्धा -द्धं; 'is solved,' सिध्यति.

SOLVENCY, *s.* ऋणशोधनक्षमता, ऋणशोधनशक्तिः *f.*, ऋणाधिकधनवत्त्वं, ऋणाधिकधनिता, ऋणाधिकधनसम्पत्तिः *f.*, ऋणापकरणक्षमता.

SOLVENT, *a.* (Having the power of dissolving) द्रावकः -का -कं, विद्रावकः &c., द्रावकरः -रा -रं, द्रवकरः &c., स्रावकः -का -कं.—(Able to pay) ऋणशोधनक्षमः -मा -मं, ऋणपरिशोधनक्षमः &c., ऋणापकरणक्षमः &c., ऋणाधिकधनः -ना -नं, ऋणाधिकधनसम्पन्नः -न्ना -न्नं.

SOLVENT, *s.* (Menstruum) द्रावकरसः, योगवाही *m.* (न्), द्रावणं.

SOLVER, *s.* व्याख्याता *m.* (तृ), विख्यापकः, छेत्ता *m.*, उच्छेदी *m.* (न्).

SOMBER, SOMBRE, *a.* न्यूनप्रभः -भा -भं, न्यूनतेजाः -जाः -जः (स्), अल्पतेजाः &c., मन्दप्रभः -भा -भं, मलिनप्रभः &c., धूसरः -री -रं, श्यामः -मा -मं.

SOME, *a.* (A certain quantity of a thing, a small quantity) किञ्चित्, कियत्, ईषत्, अल्पभागः, अल्पांशः, अंशः, अल्पिका, अल्पं; 'some water,' किञ्चिज्जलं, कियज्जलं, ईषज्जलं, जलांशः; 'some seed,' कियन्ति बीजानि; 'some bread,' अपूपांशः, कियान् अपूपः, अपूपाल्पभागः, अपूपस्य अल्पांशः; 'some meat,' किञ्चिन्मांसं, मांसाल्पभागः, मांसाल्पिका; 'for some distance,' कियद्दूरं, कियत्पर्यन्तं; 'for some time,' कियत्कालं, किञ्चित्कालं, कतिचित्कालं; 'some time afterwards,' कियत्कालात्परं; 'to some extent,' किञ्चित्, ईषत्.—(A certain number, a few, said of things) अल्पः -ल्पा -ल्पं, कतिपयः -या -यं, कतिचित्, अनेकः -का -कं; 'some days,' कतिपयदिनानि *n. pl.*; 'some paces,' कतिचित्पदानि *n. pl.*, कतिपयपदानि; 'some trees,' कतिपयवृक्षाः *m. pl.*, कतिचिद्वृक्षाः *m. pl.*, कतयश्चिद् वृक्षाः; 'in some trees,' कतिचिद्वृक्षेषु, कतिषुचिद् वृक्षेषु.—(A certain number, few, said of persons) कश्चित् *m. sing.*, काचित् *f.*, कश्चन *m. sing.*, काचन *f.*, को ऽपि *m. sing.*, कापि *f.*, कतिपय in comp., कतिचित्, कतयश्चित् *m. pl.*; 'some persons,' केचित्, केपि, कतिचिज्जनाः *m. pl.*, कतिपयजनाः *m. pl.*, केचिज्जनाः, कतिपयलोकाः *m. pl.*; 'of some persons,' केषाञ्चित्, केषामपि.—(Denoting a person or thing not definite) अमुकः -का -कं, or expressed by the affixes चित्, अपि or चन after the interrogative; as, 'some person,' अमुकजनः, कश्चित्, कश्चिज्जनः; 'having some name or other,' अमुकनामा *m.* (न्); 'some place or other,' अमुकस्थानं, किञ्चित्स्थानं; 'some day,' कदाचित्, कदापि; 'by some means or other,' *see* the next.

SOME-HOW, *adv.* कथञ्चित्, कथञ्चन, कथमपि, कथं कथमपि, यथाकथञ्चित्.

Digitized by Google

SOME-ONE, SOME-BODY, *s.* कश्चित् *m.*, काचित् *f.*, को ऽपि *m.*, कापि *f.*, कश्चन *m.*, काचन *f.*, कश्चिज्जनः, को ऽपि जनः, अमुकः *m.*, अमुका, अमुकजनः, यः कश्चित्, यः कश्चन; 'of some one,' कस्यचित्, कस्यापि; 'by some one,' केनचित्, केनापि; 'to some one,' कस्मैचित्.

SOMER-SAULT, SOMERSET, *s.* ऊर्द्ध्वपादवल्गितं, ऊर्द्ध्वचरणवल्गितं.

SOMETHING, *s.* किंचित्, किमपि, किंचन, यत्किंचित्, अल्पं, स्वल्पं.

SOMETIME, *adv.* (Formerly) पुरा, पूर्ब्बं, पूर्ब्बकाले, पुरस्तात्, प्राक्.—(At some future time) परकाले, अतःपरं, *see* HEREAFTER.

SOMETIMES, *adv.* कदाचित्, कदापि, कदाचन, कर्हिचित्, जातु.

SOMEWHAT, *s.* किंचित्, किमपि, किंचन, यत्किंचित्. *See* LITTLE, *s.*

SOMEWHAT, *adv.* किंचित्, ईषत्, कियत्, आ prefixed, कल्प or देश्य or देशीय affixed; 'somewhat less,' किंचिन्यूनः -ना -नं, ईषदूनः &c.; 'somewhat eloquent,' पटुकल्पः -ल्पा -ल्पं, पटुदेश्यः -श्या -श्यं, पटुदेशीयः -या -यं; 'somewhat blue,' आनीलः -ला -लं; 'somewhat ruddy,' आताम्रः -म्रा -म्रं.

SOMEWHERE, *adv.* क्वचित्, क्वापि, कुत्रचित्, कुत्रापि, कुत्रचन, यत्रकुत्रचित्, यत्रकुत्रापि; 'from somewhere,' कुतश्चित्, कुतश्चन.

SOMNAMBULISM, *s.* निद्राचारः, निद्रापरिक्रमः, निद्राभ्रमणं, स्वप्नचारः.

SOMNAMBULIST, *s.* निद्राचारी *m.* (न्), निद्रापरिक्रमी *m.*, स्वप्नचारी *m.*

SOMNIFEROUS, SOMNIFIC, *a.* निद्राकरः -री -रं, स्वप्नकारी -रिणी -रि (न्), स्वप्नकृत् *m. f. n.*, निद्राजनकः -का -कं, स्वप्नजनकः &c., सुप्तिजनकः &c., सुप्तिकारकः &c., सौप्तिकः -की -कं, नैद्रः -द्री -द्रं.

SOMNILOQUIST, *s.* निद्राभाषी *m.* (न्), निद्रालापी *m.*, स्वप्नभाषी *m.*

SOMNILOQUISM, *s.* निद्राभाषणं, निद्रालापः, स्वप्नभाषणं, स्वप्नप्रलापः.

SOMNOLENCY, SOMNOLENT, *see* SLEEPINESS, SLEEPY.

SON, *s.* पुत्रः, पुत्रकः, सुतः, सूनुः *m.*, तनयः, नन्दनः, आत्मजः, स्वजः, आत्मसम्भवः, अङ्गजः, शरीरजः, तनुजः, तनूजः, तनूजनिः *m.*, प्रसूतः, दारकः, कुमारः, उड्डहः; 'legitimate son,' औरसः, औरस्यः, उरस्यः; 'son of a rival wife,' सापत्नः; 'of an auspicious mother,' सुभगासुतः; 'of an unmarried woman,' कन्यकाजातः, कानीनः; 'by another's wife,' पारक्षेत्रेयः; 'dutiful and affectionate son,' सत्पुत्रः, सुपुत्रः; 'having a son,' पुत्री *m.* -त्रिणी *f.* (न्), पुत्रवान् *m.* -वती (त्), सपुत्रः -त्रा; 'rejoicing on the birth of a son,' पुत्रोत्सवः, पुत्रानन्दः; 'son and daughter,' पुत्रौ *m. du.*

SON-IN-LAW, *s.* जामाता *m.* (तृ), दुहितुःपतिः *m.*, दुहितुर्भर्त्ता *m.* (र्तृ), पुत्रिकाभर्त्ता *m.*, विट्पतिः *m.*, विवाह्यः.

SONG, *s.* गीतं, गानं, गीतिः *f.*, गायनं, गेयं, गाथा, गा, गं, खेलिः *f.*, काकली; 'song with music,' सङ्गीतं, सङ्गीतिः *f.*; 'holy song,' सद्गीतं; 'sweet song,' मधुरगीतं; 'song of victory,' जयशब्दः.

SONGSTER, *s.* गायकः, गायकः, गायिकः, गीतकुशलः, *see* SINGER.—(Bird) गायकपक्षी *m.* (न्).

SONLESS, *a.* निष्पुत्रः -त्रा -त्रं, अपुत्रः &c., पुत्रहीनः -ना -नं, अपुत्रकः -का -कं, अपुत्री -त्रिणी -त्रि (न्), अपुत्रीकः -का -कं, पुत्ररहितः -ता -तं.

SONNET, *s.* गीतकं, गीतिका, लघुगीतकं, लघुकविता, काव्यबन्धः.

SONOROUS, SONORIFIC, *a.* शब्दनः -ना -नं, शब्दकारः -री -रं, शब्दकरः -रा -रं, ध्वनिकरः &c., ध्वनिकारकः -का -कं, शब्दजनकः -का -कं, नादजनकः &c., शाब्दः -ब्दी -ब्दं, मुखरः -रा -रं, महाशब्दः -ब्दा -ब्दं, नादी -दिनी &c., रवणः -णा -णं.

SONOROUSLY, *adv.* महाशब्देन, महानादेन, महाशब्दपूर्ब्बं, महाध्वनिपूर्ब्बं.

SONOROUSNESS, *s.* शब्दनत्वं, महाशब्दत्वं, शब्दजनकत्वं, मुखरता.

SONSHIP, *s.* पुत्रत्वं, पुत्रभावः, पुत्रावस्था, पुत्रदशा, पुत्रधर्म्मः.

SOON, *adv.* (In a short time) अचिरेण, अचिरात्, आशु, सद्यस्, अनन्तरं, शीघ्रं, झटिति, सपदि, सङ्गसा, द्राक्, न चिरेण, न चिरात्, माचिरं, हठात्, अदूरात्.—(Without delay) अविलम्बेन, अविलम्बितं, अकालक्षेपेण; 'as soon as,' यावत्, followed by 'so soon,' तावत्, or expressed by च, repeated thus, 'as soon as water was asked, so soon a shower fell into his mouth,' यावद् अम्बु याचितं तावद् धारा मुखे तस्य निपतिता or अम्बु च याचितं धारा च मुखे तस्य निपतिता; or expressed by मात्रात्, *see* IMMEDIATELY.—(Readily, willingly) कामं, प्रकामं.

SOONER, *adv.* (Rather) वरं, *see* RATHER; 'sooner or later,' आदिपश्चात्.

SOOT, *s.* कज्जलं, कज्ज्वलं, दीपकज्जलं, दीपकिट्टं, दीपध्वजं, मषी.

SOOTH, *s.* (Truth) सत्यं, सत्यता; 'in sooth,' सत्यं, सत्यमेव.

To SOOTHE, *v. a.* शम् (c. 10. शमयति -यितुं), उपशम्, प्रशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्, अभिशान्त्व्, साम् (c. 10. सामयति -यितुं), लल् (c. 10. लालयति -यितुं), अनुनी (c. 1. -नयति -नेतुं), परिमृश्, परामृश्, प्रसद् (c. 10. -सादयति -यितुं), अभिप्रसद्, विनुद् in caus., आश्वस् in caus., चप् (c. 1. चपति -पितुं).

SOOTHED, *p. p.* शमितः -ता -तं, शान्तः -न्ता -न्तं, उपशान्तः &c., कृतशान्तिः -न्तिः -न्ति, कृतसान्त्वनः -ना -नं, लालितः -ता -तं, अनुनीतः &c., विनोदितः &c.

SOOTHER, *s.* शमकः, उपशमकः, सान्त्वनकृत्, सान्त्वयिता *m.* (तृ), लालकः.

SOOTHING, *s.* शमनं, शमः, प्रशमनं, उपशमः -मनं, सान्त्वनं -ना, शान्तिः *f.*, सान्त्वः, लालनं, विनोदः -दनं, तापहरणं, प्रसादनं, आश्वासनं.

SOOTHING, *part.* or *a.* शमकः -का -कं, उपशमकः &c., शान्तिकः -की -कं, शमी -मिनी -मि (न्), शमकारी -रिणी &c., शान्तिकरः -रा -रं, सान्त्वनकरः -रा -रं, लाली &c., आश्वासनशीलः -ला -लं, तापहरः -रा -रं, तापहारी &c.

SOOTHSAYER, *s.* दैवज्ञः, सांवत्सरिकः, सावित्तृकः. *See* DIVINER.

SOOTHSAYING, *s.* शकुनपरीक्षणं, गणना, दैवज्ञानं. *See* DIVINATION.

SOOTY, *a.* कज्जली -लिनी -लि (न्), कज्जलदूषितः -ता -तं, मषीमयः -यी -यं.

SOP, *s.* जूषादिसिक्तः पिष्टकखण्डः, यूषादिसिक्तः पूपखण्डः or अपूपखण्डः, जूषसिक्तपिष्टकः, जलादिसिक्तपूपखण्डः, सिक्तपिष्टकः, आर्द्रपिष्टकः.

To SOP, *v. a.* अपूपखण्डं or पिष्टकखण्डं यूषादिना सिच् or आर्द्रीकृ.

SOPHIST, SOPHISTER, *s.* आभासवादी *m.* (न्), सिद्धान्ताभासवादी *m.*, सत्याभासवादी *m.*, हेत्वाभासवादी *m.*, हैतुकः, तार्किकः, जल्पकः, चार्वाकः, मिथ्याहेतुवादी *m.*

SOPHISTIC, SOPHISTICAL, *a.* आभासात्मकः -का -कं, सत्याभासकः -का -कं, सिद्धान्ताभासकः &c., सत्याभासी -सिनी -सि (न्), सत्यप्रतिभासकः &c., हेत्वाभासरूपः -पा -पं, हैतुकः -की -कं.

SOPHISTRY, SOPHISM, *s.* आभासः, हेत्वाभासः, सिद्धान्ताभासः, सत्याभासः, पक्षाभासः, प्रतिभासः, सिद्धान्तप्रतिभासः, मिथ्याहेतुः *m.*, वाक्छलं, झक्किका.

To SOPHISTICATE, *v. a.* अशुद्धद्रव्यसंसर्गेण दुष् (c. 10. दूषयति -यितुं), हीनद्रव्यमिश्रणेन दुष्, दुष्टद्रव्यसम्पर्केण भ्रष्टीकृ.

SOPHISTICATED, *a.* हीनसंसर्गदूषितः -ता -तं, अशुद्धसम्पर्कदूषितः &c., दूषितः &c.

SOPORIFIC, SOPORIFEROUS, *a.* निद्राकारकः -का -कं, निद्राकारी -रिणी -रि (न्), निद्राजनकः -का -कं, उपशायी &c., स्वापनः -ना -नं. *See* SOMNIFEROUS.

SOPPED, *p. p.* यूषादिसिक्तः -क्ता -क्तं, जूषादिसिक्तः &c., जलादिसिक्तः &c.

Digitized by Google

SORCERER, *s.* अभिचारविद् *m.*, अभिचारी *m.* (न्), मायाकारः. *See* MAGICIAN.

SORCERESS, *s.* मायिनी, मायाकारिणी, माया, पूतना, अभिचारिणी.

SORCERY, *s.* अभिचारः, अभिचारविद्या, मायाविद्या, माया, मायाक्रिया, वशक्रिया, कुविद्या, कुसृतिः *f.*, संवदनं, योगः. *See* MAGIC.

SORDID, *a.* (Filthy) मलिनः -ना -नं, मलवान् -वती -वत् (त्), मलीमसः -सा -सं.—(Mean, vile) कुत्सितः -ता -तं, जघन्यः -न्या -न्यं, जघन्यवृत्तिः -त्तिः -त्ति, अधमः -मा -मं, *see* MEAN, *a.*

SORDIDNESS, *s.* मलिनत्वं, कुत्सितत्वं, जघन्यता, पामरता, अपकृष्टता.

SORE, *s.* क्षतं, व्रणः, त्वक्क्षतं, त्वग्व्रणः, अरुस् *n.*, ईर्म्मं, त्वक्कण्डुरः, विपादिका; 'pain of a sore,' व्रणवेदना; 'cleansing or cicatrising of one,' व्रणशोधनं; 'having one,' व्रणी -णिनी &c.; 'causing one,' व्रणकृत्.

SORE, *a.* (Tender to the touch) स्पर्शासहः -हा -हं, स्पर्शासहनः -ना -नं, स्पर्शाज्ञः -ज्ञा -ज्ञं, स्पर्शदुःखितः -ता -तं; 'a sore eye,' चुल्लः, चिल्लः, पिल्लः; 'having sore eyes,' चुल्लः -ल्ली -ल्लं, चिल्लः -ल्ली -ल्लं, पिल्लः -ल्ली -ल्लं, क्लिन्नाक्षः -क्षा -क्षं.—(Painful, easily pained) वेदनायुक्तः -क्ता -क्तं, सवेदनः -ना -नं, सुलभवेदनः -ना -नं, सुलभव्यथः -था -थं.—(In mind) मनोदुःखी -खिनी -खि (न्), सुलभदुःखः -खा -खं, सुलभतापः -पा -पं.—(Grievous) उग्रः -ग्रा -ग्रं, उग्रक्लेशदः -दा -दं, गुरुक्लेशदः &c., क्लेशदः &c., गुरुः -रवी -रु.

SORE, SORELY, *adv.* अत्यन्तं, अतिशयेन, अतिशय in comp., उग्रं, भृशं, *see* INTENSELY; 'sorely-grieved,' उग्रशोकः -का -कं.

SORENESS, *s.* स्पर्शासहत्वं, स्पर्शासहनत्वं, स्पर्शाज्ञत्वं, सव्रणत्वं, क्षतत्वं.

SORREL, *s.* अम्लवेतसः, चुक्रः, चुक्रिका, दलाम्लं, शुक्ता, शतवेधी *m.*, सहस्रवेधी *m.* (न्), लोलिका.

SORROW, *s.* शोकः, खेदः, दुःखं, मनोदुःखं, शुक् *f.* (च्), क्लेशः, मन्युः *m.*, शोचनं, मनस्तापः, आधिः *m.*, *see* GRIEF; 'freed from all sorrow,' शोकमुक्तः -क्ता -क्तं, आधिव्याधिनिर्मुक्तः &c.

To SORROW, *v. n.* शुच् (c. 1. शोचति -चितुं), शोचनं कृ, खिद् (c. 4. खिद्यते, खेत्तुं), *see To* GRIEVE, *v. n.*; 'to sorrow much,' शुच् in freq. (शोशुच्यते).

SORROWFUL, *a.* शोकार्त्तः -र्त्ता -र्त्तं, शोकान्वितः -ता -तं, शोकी -किनी -कि (न्), शोकोपेतः -ता -तं, सशोकः -का -कं, दुःखी &c., दुःखान्वितः -ता -तं, दुःखार्त्तः &c., दुःखोपेतः -ता -तं, शोचनः -ना -नं, शोचितः -ता -तं, शोकयुक्तः -क्ता -क्तं, उद्विग्नः -ग्ना -ग्नं, उद्विग्नमनाः -नाः -नः (स्), दुर्मनाः &c., विमनाः &c., उद्विग्नचित्तः -त्ता -त्तं, उदासीनः -ना -नं, उदासी &c., विषादी &c., विषण्णः -ण्णा -ण्णं, सम्मन्युः -न्युः -न्यु, प्रमन्युः &c., परिद्यूनः -ना -नं, *see* SAD.—(Causing sorrow) शोकजनकः -का -कं, शोकदः -दा -दं, दुःखावहः &c., *see* MOURNFUL.

SORROWFULLY, *adv.* सशोकं, सखेदं, सदुःखं, सोद्वेगं, शोकेन, शोकपूर्व्वं.

SORROW-STRICKEN, *a.* शोकार्त्तः-र्त्ता-र्त्तं, शोकातुरः-रा-रं, शोकोपहतः-ता-तं.

SORRY, *a.* (Grieved) दुःखी -खिनी -खि (न्), दुःखितः -ता -तं, *see* GRIEVED.—(Sorry for one's own conduct, pained) अनुतापी &c., पश्चात्तापी &c., अनुतप्तः -प्ता -प्तं, अनुशोचकः -का -कं, अनुशयी &c., सानुशयः -या -यं, जातानुशोकः -का -कं, जातानुतापः -पा -पं, जातानुशयः -या -यं, जातखेदः -दा -दं, खेदयुक्तः -क्ता -क्तं, अनुतापयुक्तः &c.; 'to be sorry,' *see To* REPENT.—(Poor, wretched) तुच्छः -च्छा -च्छं, कृपणः -णा -णं, कुत्सितः -ता -तं or expressed by the affixes तर, र, क, कल्प, पाश, देशीय, or by the prefixes दुर्, कु, कद् &c.; as, 'a sorry horse,' अश्वतरः, अश्वकः; 'a sorry ox,' ऋषभतरः; 'a sorry poet,' कविकल्पः, कुकविः; 'sorry fare,' कदन्नं; 'a sorry wench,' पापीयसी.

SORT, *s.* प्रकारः, जातिः *f.*, भेदः, विधः, व्यक्तिः *f.*, *see* KIND, MANNER.

To SORT, *v. a.* जातिक्रमेण or वर्गक्रमेण or यथावर्गं विरच् (c. 10. -रचयति -यितुं), यथावर्गं or वर्गक्रमेण विन्यस् (c. 4. -अस्यति -सितुं) or व्यस्.

To SORT, *v. n.* युज् in pass. (युज्यते), उपपद् in pass. (-पद्यते). *See To* SUIT.

SOT, SOTTISH, *s.* or *a.* पानासक्तः -क्ता -क्तं, मद्यासक्तः &c., पानरतः -ता -तं, सदापायी -यिनी -यि (न्), पानजडः -डा -डं, मद्यपानजडः &c., पानमूढः &c.

SOTTISHNESS, *s.* पानासक्तिः *f.*, मद्यासक्तिः *f.*, पानजडता, पानमूढता.

SOUGHT, *p. p.* अन्विष्टः -ष्टा -ष्टं, अन्वेषितः -ता -तं, मार्गितः -ता -तं, मृगितः &c., इष्टः -ष्टा -ष्टं, गवेषितः -ता -तं; 'long sought for,' चिरचेष्टितः -ता -तं; 'is sought,' अन्विष्यते, इष्यते.

SOUL, *s.* (The immortal essence viewed as an emanation from the Deity) आत्मा *m.* (न्), परमात्मा *m.*, अन्तरात्मा *m.*, चिदात्मा *m.*, अन्तर्यामी *m.* (न्), सच्चिदंशः, चित्कला, चिदाभासः; 'of the universe,' ब्रह्म *n.* (न्), परमात्मा *m.*—(The spirit, vital or intellectual principle) आत्मा *m.* (न्), जीवात्मा *m.*, मनस् *n.*, चेतस्, चित् *f.*, चैतन्यं, चेतनः -ना, प्राणः, जीवः, प्राणात्मा *m.*, शरीरी *m.* (न्), देहवान् *m.* (त्), देही *m.*, शारीरं, पुरुषः, क्षेत्रज्ञः, चैतन्यकारणं, जीवनकला, परसंज्ञकः, धियाम्पतिः *m.*, स्ववीजः, पुङ्गलः; 'union of soul and body,' चिच्छरीरसंयोगः; 'seated in the soul,' आत्मनिष्ठः -ष्ठा -ष्ठं; 'oneness of soul,' आत्मैक्यं, ऐक्यभावः, तादात्म्यं; 'knowledge of soul,' आत्मज्ञानं, आत्मविद्या; 'the whole soul,' सर्व्वात्मा *m.*, सर्व्वभावः; 'with one's whole soul,' सर्व्वभावेन.—(Self) आत्मा *m.* (न्) स्वः.—(Essence, chief part) सारः, सारांशः, सारता, सारभागः, तत्त्वांशः, सत्त्वांशः, सत्त्वं, तन्मात्रं.—(Fire, spirit, life) तेजस् *n.*, सत्त्वं, वीर्य्यं.—(Departed soul) प्रेतः, परेतः, प्रेतनरः, नारकः.—(Person), *see* the word.

SOUND, *a.* (Entire, undecayed) अविकलः -ला -लं, अक्षतः -ता -तं, अभिन्नः -न्ना -न्नं, अखण्डः -ण्डा -ण्डं, अन्यूनः -ना -नं.—(Not diseased, hale) निरामयः -या -यं, अनामयः &c., कल्पः -ल्पा -ल्पं, नीरोगः -गा -गं, नीरुजः -जा -जं, अरोगी -गिणी -गि (न्), अरुग्नः -ग्ना -ग्नं, सुस्थः -स्था -स्थं, चङ्गः -ङ्गा -ङ्गं.—(Not hurt) अक्षतः -ता -तं, अपरिक्षतः &c., अजातक्षतः &c., क्षतहीनः -ना -नं, निव्रणः -णा -णं, व्रणहीनः -ना -नं, अव्रणः &c., अक्षुण्णः -ण्णा -ण्णं.—(In good condition, safe and sound) सुस्थः -स्था -स्थं, सुस्थितः -ता -तं, अनामयः -या -यं, सुरक्षितः -ता -तं.—(Without flaw) निर्दोषः -षा -षं, दोषहीनः -ना -नं, अनघः -घा -घं, निश्छिद्रः -द्रा -द्रं, विशुद्धः -द्धा -द्धं.—(Correct in views) सत्पथवर्त्ती &c., सत्पथानुसारी &c., सत्यमतधारी &c., *see* ORTHODOX.—(Valid, not to be refuted) अखण्डनीयः -या -यं, अखण्ड्यः -ण्ड्या -ण्ड्यं, सुप्रमाणः -णा -णं, सुप्रमाणवान् -वती &c., सप्रमाणः &c., प्रमाणोपेतः -ता -तं, दृढप्रमाणः &c., धर्म्यः -र्म्या -र्म्यं, युक्तिसिद्धः -द्धा -द्धं.—(Fast, deep, heavy) गाढः -ढा -ढं, निर्भरः -रा -रं, अतिशय or सु or अति prefixed; 'a sound sleep,' सुनिद्रा &c., *see* under SLEEP; 'a sound beating,' अतिताडनं, अतिशयताडनं.

SOUND, *s.* (Noise) शब्दः, ध्वनिः *m.*, स्वनः, निस्वनः, निस्वानः, स्वानः, नादः, निनादः, निनदः, नादितं, अनुनादः, निह्रादः, संह्रादः, निर्घोषः,

Digitized by Google

घोषः, निघुष्टं, रवः, रावः, आरावः, विरावः, संरावः, आरवः, स्वरः, ध्वानः, ध्वनः, निध्वानः, स्वनिः *m.*, स्वनितं, क्वणः, रणः, कुणिन्दः, घुः *m.*, *see* NOISE; 'a mere sound,' शब्दमात्रं; 'musical sound,' क्वणः, क्वाणः, क्वणनं, निक्वणः, निक्वाणः, वादः -दनं; 'of a lute,' प्रक्वाणः, प्रक्वणः; 'tinkling sound,' शिञ्जितं; 'rustling sound,' मर्म्मरः; 'confused sound,' कोलाहलः, कलकलः; 'auspicious,' जयध्वनिः *m.*; 'deep or hollow,' गम्भीरशब्दः, गम्भीरनादः; 'prolonged,' दीर्घनादः, दीर्घरावः.

To SOUND, *v. a.* (Cause to make a noise) ध्वन् (c. 10. ध्वनयति -यितुं), स्वन् (c. 10. स्वनयति -यितुं), नद् (c. 10. नादयति -यितुं), विनद्, अनुनद्, स्तन् (c. 10. स्तनयति -यितुं), शब्दनं कृ, ध्वननं कृ; 'a musical instrument,' वद् (c. 10. वादयति -यितुं), संवद्, वादनं कृ; 'they sounded the conchs and drums,' शङ्खान् पटहांश्च समवादयन्.—(Spread by report), *see To* NOISE.—(Try, examine) परीक्ष् (c. 1. -ईक्षते -क्षितुं), ज्ञा in des. (जिज्ञासते -सितुं), निरूप्, *see To* TRY.—(The depth of water) लक्षसूत्रेण जलवेधं or जलं परिमा (c. 2. -माति -तुं, c. 10. -मापयति -यितुं), लक्षेन जलगाम्भीर्यं परिमा, सूत्रेण or रज्जुना जलपरिमापणं कृ or जलवेधपरीक्षां कृ.

To SOUND, *v. n.* ध्वन् (c. 1. ध्वनति -नितुं), स्वन् (c. 1. स्वनति -नितुं), क्वण् (c. 1. क्वणति -णितुं), स्तन् (c. 1. स्तनति -नितुं), नद् (c. 1. नदति -दितुं), प्रणद्, विनद्, शब्द् (c. 10. शब्दयति -यितुं), रस् (c. 1. रसति -सितुं), ह्राद् (c. 1. ह्रादते -दितुं), रु (c. 2. रौति, रवितुं), विरु, रेभ् (c. 1. रेभते -भितुं), शब्दं कृ, नादं कृ, ध्वनिं कृ.

SOUNDED, *p. p.* (Caused to sound) ध्वनितः -ता -तं, स्वनितः &c., शब्दितः &c., क्वणितः &c., नादितः &c., स्वानः -ना -नं, आस्वानः &c., स्वरितः -ता -तं, विरेभितः &c.; 'as a musical instrument,' वादितः -ता -तं.—(Tried) परीक्षितः -ता -तं, जिज्ञासितः &c., निरूपितः &c.—(As water) लक्षसूत्रपरिमापितः -ता -तं, लक्षपरिमापितः &c.

SOUNDING, *part.* or *a.* (Making a noise) शब्दनः -ना -नं, शब्दकरः -रा -रं, नादी -दिनी -दि (न्), निह्रादी &c., संह्रादी &c., स्वनवान् -वती -वत् (त्), सनादः -दा -दं, शब्दायमानः -ना -नं, *see* SONOROUS.—(Causing to sound) वादकः -का -कं, वादनकारी &c.

SOUNDING, *s.* (Causing to sound) शब्दनं, ध्वननं, वादनं, संवादनं.—(Of the depth of water) जलपरिमापणं, जलवेधपरिमापणं; 'soundings,' गाधः, गाधस्थलं; 'mean soundings,' समरज्जुः *f.*

SOUNDING-LEAD, *s.* लक्षः, लक्षकः, लक्षसीसकं. *See* PLUMMET.

SOUNDLY, *adv.* गाढं, अत्यनं, निर्भरं, दृढं, सुखेन, सु or अति or अतिशय prefixed; 'soundly asleep,' सुषुप्तः &c., *see* under SLEEP.

SOUNDNESS, *s.* (Entireness) अक्षतत्वं, अभिन्नता, अखण्डत्वं, अविकलता, अवैकल्यं.—(State of being healthy or without hurt) कल्यत्वं -ता, निरामयत्वं, अनामयत्वं, स्वास्थ्यं, सुस्थता, सुस्थितिः *f.*, अरोगिता, आरोग्यं, रोगाभावः, अक्षतत्वं, क्षताभावः, व्रणाभावः, क्षतहीनता, निर्व्रणत्वं.—(Validity) अखण्डनीयता, सप्रमाणत्वं.—(Correctness in views) सत्यपथानुसरणं, सत्पथः, सत्यधर्म्मः, *see* ORTHODOXY.—(State of being without flaw) निर्दोषत्वं, दोषहीनता, छिद्रहीनता.

SOUP, *s.* जूषं, यूषः -षं, सूपः, मांसजूषं, निष्क्वाथः, पिच्छिलः.

SOUR, *a.* (Acid) अम्लः -म्ला -म्लं, अम्लरसः -सा -सं, शुक्तः -क्ता -क्तं, शौक्तः -क्ती -क्तं, शौक्तिकः -की -कं, शठः -ठा -ठं, अरून्तुदः -दा -दं.—(In temper) कर्कशः -शा -शं, कर्कशस्वभावः -वा -वं, वक्रस्वभावः &c., सदावक्रः -क्रा -क्रं, अरून्तुदः &c.

To SOUR, *v. a.* (Make acid) अम्लीकृ, शुक्तीकृ, शठीकृ, अम्लरसीकृ.—(Make cross) कर्कशीकृ, वक्रीकृ.

To SOUR, *v. n.* अम्लीभू, शुक्तीभू, अम्लरसीभू, कर्कशीभू, अरून्तुदीभू.

SOURCE, *s.* (Origin, spring) मूलं, योनिः *m. f.*, उद्भवः, सम्भवः, प्रभवः, हेतुः *m.*, बीजं, गर्भः, आदिः *m.*, उद्गमः, उद्गमस्थानं, उत्पत्तिस्थानं; 'of a river,' सरिन्मुखं; 'the source of the Ganges is in the Himálayas,' गङ्गा हिमवत्प्रभवा or हिमवान् गङ्गायाः प्रभवः.

SOURED, *p. p.* अम्लीभूतः -ता -तं, शुक्तीभूतः &c., कर्कशीभूतः -ता -तं.

SOURISH, *a.* ईषदम्लः -म्ला -म्लं, ईषदम्लरसोपेतः -ता -तं, किञ्चिदम्लः &c.

SOURNESS, *s.* अम्लता -त्वं, अम्लभावः, अम्लः, शुक्लता -त्वं, शठता, चुक्रः.—(Of temper) कर्कशत्वं, कार्कश्यं, भाववक्रता, सदावक्रता.

To SOUSE, *v. a.* (Plunge suddenly) अकस्मान् मज्ज् (c. 10. मज्जयति -यितुं) or निमज्ज् or प्लु in caus. or जलेन सिच्, *see To* IMMERSE.

To SOUSE, *v. n.* (As a hawk) वेगेन पतित्वा नखैर् ग्रह्, *see To* POUNCE.

SOUTH, *s.* दक्षिणा, दक्षिणाशा, दक्षिणदिशा, दक्षिणदिक् *f.* (श्), दक्षिणायः, दक्षिणापथः, अवाची, अपाची, याम्या; 'lying or pointing towards the south,' दक्षिणस्थः -स्था -स्थं, दक्षिणाभिमुखः -खी -खं, दक्षिणामुखः &c., दक्षिणप्रवणः -णा -णं, दक्षिणाग्रः -ग्रा -ग्रं, दक्षिणदिश्यः -श्या -श्यं, दक्षिणदिक्स्थः &c.; 'lying to the north and south,' दक्षिणोत्तरस्थः &c., दक्षिणोत्तरः -रा -रं. According to the Hindús, Yama is the Regent of the south.

SOUTH, SOUTHERN, SOUTHERLY, *a.* (Lying towards the south), *see* the last.—(Belonging to the south) दक्षिणः -णी -णं, दाक्षिणः -णी -णं, अवाङ् -वाची -वाक् (च्), अवाचीनः -ना -नं, अवाच्यः -च्या -च्यं, दाक्षिणात्यः -त्या -त्यं, दाक्षिणिकः -की -कं, सव्यः -व्या -व्यं, अपाङ् -पाची -पाक् (च्), अपाचीनः &c., अपाच्यः &c., दक्षिणदेशीयः -या -यं; 'the southern mountain,' दक्षिणाचलः; 'in a southerly direction,' दक्षिणदिशि.

SOUTH-EAST, *s.* दक्षिणपूर्व्वा, प्रागवाची, दक्षिणप्राची, प्राग्दक्षिणा, आग्नेयी. Agni is the Regent of the S. E. quarter.

SOUTH-EAST, SOUTH-EASTERN, SOUTH-EASTERLY, *a.* दक्षिणपूर्व्वः -र्व्वा -र्व्वं, प्रागवाङ् -वाची -वाक् (च्), प्रागवाचीनः -ना -नं, दक्षिणपूर्व्वस्थः -स्था -स्थं, आग्नेयः -यी -यं.

SOUTH-WARD, *adv.* दक्षिणतस्, दक्षिणात्, दक्षिणेन, दक्षिणदिशि.

SOUTH-WEST, *s.* नैर्ऋतिः *f.*, निर्ऋतिः *f.*, दक्षिणपश्चिमा, दक्षिणप्रतीची, पश्चादवाची. The demon Nairṛita or Nirṛiti is the Regent of the S. W. quarter.

SOUTH-WEST, SOUTH-WESTERN, SOUTH-WESTERLY, *a.* दक्षिणपश्चिमः -मा -मं, दक्षिणप्रतीचीनः -ना -नं, दक्षिणपाश्चात्यः -त्या -त्यं, नैर्ऋतिस्थः -स्था -स्थं.

SOUTHERN-WOOD, *s.* (Artemisia) दमनः, दमनकः.

SOUVENIR, *s.* स्मरणार्थकदानं, स्मारकदानं. *See* MEMENTO, MEMORIAL.

SOVEREIGN, *s.* राजा *m.* (न्), महाराजः, अधिराजः, अधिपतिः *m.*, अधीश्वरः, परमराजः, सर्व्वाधिकारी *m.* (न्), सर्व्वेश्वरः, अधीशः. *See* KING.

SOVEREIGN, *a.* परमः -मा -मं, मुख्यः -ख्या -ख्यं, श्रेष्ठः -ष्ठा -ष्ठं, सर्व्वश्रेष्ठः &c., प्रमुखः -खा -खं, प्रधान in comp., *see* PARAMOUNT, SUPREME; 'a sovereign remedy,' महौषधं, परमौषधं, सर्व्वरोगौषधं.

SOVEREIGNTY, *s.* राज्यं, राजत्वं, आधिपत्यं, आधिराज्यं, मुख्याधिकारः, श्रेष्ठाधिकारः, प्रधानाधिकारः, सर्व्वाधिकारः, प्रभुत्वं, स्वाम्यं, ईशत्वं, साम्राज्यं, राजभूयं, भूमिपतित्वं, पार्थिवेन्द्रता; 'over the beasts,' मृगेन्द्रता.

SOW, *s.* शूकरी, सूकरी, वराही, कोली, पङ्क्तीडा.

Digitized by Google

To sow, *v. a.* or *n.* (As seed) वप् (c. 1. वपति, वप्तुं), आवप्, निवप्, प्रवप्, संवप्, बीजानि क्षेत्रे विकृ (c. 6. -किरति -किरितुं -रीतुं) or प्रकृ or कृ or रुह् in caus. (रोपयति -यितुं) or आरुह्, बीजारोपं कृ, बीजारोपणं कृ, बीजविकिरणं कृ, बीजप्रकिरणं कृ, वपनं कृ, वापं कृ; 'as you sow so shall you reap,' यथा वपनं तथा फलसिद्धिः, यथानुष्ठानं तथा सिद्धिः, श्रमानुसारी लाभः.—(To sow discord) भेदं कृ or जन्.

Sower, *s.* वप्ता *m.* (प्तृ), बीजवप्ता, वापी *m.* (न्), प्रवापी *m.*, वापकः, वपनकृत् *m.*, वपनकर्त्ता *m.* (र्त्तृ), उप्तिकर्त्ता *m.*, बीजारोपकः, बीजारोपणकृत्.

Sowing, *s.* वपनं, वापः, उप्तिः *f.*, बीजारोपः -पणं, बीजविकिरणं.

Sowing-time, *s.* वपनकालः, उप्तिकालः, वापकालः, बीजारोपकालः.

Sown, sowed, *p. p.* उप्तः -प्ता -प्तं, वापितः -ता -तं, पर्युप्तः &c., बीजविकीर्णः -र्णा -र्णं, बीजप्रकीर्णः &c., बीजाकीर्णः &c., बीजितः -ता -तं, उप्यमानः -ना -नं, उप्तिमः -मा -मं; 'is sown,' उप्यते, रोप्यते.

Space, *s.* (In the abstract, mere extension or vacuity) आकाशः -शं, शून्यं, शून्यत्वं -ता, रिक्तं, रिक्तता -त्वं, दिगन्तरं, दिगन्तरालं, व्योम *n.* (न्), गगणं, अन्तरीक्षं, वियत् *n.*; 'infinite space,' महाकाशः -शं, अनन्तं; 'finite,' घटाकाशं, मठाकाशं; 'empty space,' शून्यं, रिक्तं.—(Region, quarter, direction) दिक् *f.* (श्), देशः, प्रदेशः, काष्ठा, ककुभ् *f.*, आशा, हरित् *f.*; 'extending through all space,' दिग्व्यापी -पिनी -पि, अभिव्याप्तः -प्ता -प्तं, चतुर्दिग्व्यापी &c.; 'in the first second the stone falls through a space not exceeding 17 feet,' प्रथमे सुपादे नैकादशहस्तमितदेशम् अतिक्रामति प्रस्तरः; 'the space traversed,' अतिक्रान्तप्रदेशः, अन्तरं.—(Included or intervening space, space between) अभ्यन्तरं, अन्तरालं -लकं, अन्तरं, मध्यं, व्यवधानं, व्यवायः, मात्रं.—(Room) अवकाशः, प्रसरः, अवसरः, आकाशः, विषयः; 'want of space,' अनवकाशः.—(Place, spot) स्थानं, स्थलं -ली, भूमिः *f.*; 'open space near a village,' परीहारः, परिहारः, ग्रामान्तं, ग्रामान्तीयं.—(Space of time) अवधिः *m.*, कालान्तरं, कालावधिः *m.*, अन्तरं.

Spacious, *a.* विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, विपुलः -ला -लं, असम्बाधः -धा -धं, विशालः -ला -लं, सावकाशः -शा -शं, लक्षः -क्षा -क्षं.

Spaciousness, *s.* विस्तीर्णता, विस्तारः, विस्तृतिः *f.*, विशालता, विपुलता, असम्बाधता -त्वं, सावकाशता -त्वं, लक्षता.

Spade, *s.* खनित्रं, खात्रं, आखनिकः, आखनः, आखानं, आखः, अवदारणं, गोदारणं, स्तम्बघ्नः, टङ्कः, टङ्कः, विशिखा. *See* Hoe.

Span, *s.* (From tip of the thumb to that of the little finger) वितस्तिः *m. f.*, पाटकः, किष्कुः *m.*—(From tip of the thumb to that of the fore-finger) प्रादेशः, प्रदेशः.—(To tip of the middle finger) तालः, तलः.—(To tip of the ring-finger) गोकर्णः.

To span, *v. a.* हस्ततलेन or तालेन or प्रतलेन परिमा (c. 2. माति -तुं, c. 10. -मापयति -यितुं) or मा, अङ्गुष्ठकनिष्ठाभ्यां परिमा or प्रमा or मा.

Spangle, *s.* धातुतारा, धातुकणः, चपुकणिका, स्फुरद्धातुकणः, तेजःकणः.

To spangle, *v. a.* स्फुरद्धातुकणिकाभिर् or धातुतारिकाभिर् अलङ्कृ.

To spank, *v. a.* चपेटेन आहन्, चपेटाघातं कृ. *See To* slap.

To spank, *v. n.* (Move along impetuously) वेगेन चल्, महावेगेन चल्.

Spar, *s.* (Long piece of wood) दीर्घकाष्ठं, दीर्घदारुः *m.*, काष्ठखण्डः, दारुखण्डः.—(Mineral) धातुखण्डः, स्फुरद्धातुः *m.*, स्फुरद्धातुखण्डः.

To spar, *v. n.* क्रीडायुद्धं कृ, परिहासेन or क्रीडार्थम् अन्योन्यप्रहारं कृ or परस्पराघातं कृ, विनोदार्थं मुष्टियुद्धं कृ or मुष्टीमुष्टि युध्.

To spare, *v. a.* (Not to spend, apply frugally) न व्ययीकृ, न व्यय् (c. 10. व्ययति -यितुं, rt. इ), न विक्षिप्, न विनियुज्, परिमितव्ययं कृ, परिमितप्रयोगं कृ, अल्पप्रयोगं कृ, अल्पविनियोगं कृ, अबहुप्रयोगं कृ, परिमितं प्रयुज् or विनियुज्, अबाहुल्येन विनियुज्; 'to spare one's money,' न धनक्षेपं कृ; 'one's time,' न कालक्षेपं कृ.—(Part with without inconvenience) अकृच्छ्रेण or अकष्टेन त्यज् (c. 1. त्यजति, त्यक्तुं), अदुःखेन or अक्लेशेन विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. सर्ज्जयति -यितुं) or उत्सृज् or हा or विहा or प्रहा, सुखेन त्यज्.—(Omit, forbear) त्यज्, परित्यज्, हा, विहा, विसृज्, उत्सृज्, अवसृज्.—(Leave remaining) शिष् (c. 10. शेषयति -यितुं), अवशिष्, अवशिष्टीकृ.—(Not to destroy), *see To* save; 'ones life,' जीव् in caus.

Spare, *a.* (That can be dispensed with, superfluous) अधिकः -का -कं, अतिरिक्तः -क्ता -क्तं, अवशिष्टः -ष्टा -ष्टं, शिष्टः &c., उच्छिष्टः &c., उद्वृत्तः -त्ता -त्तं.—(Scanty) अल्पः -ल्पा -ल्पं, परिमितः -ता -तं, अबहुलः -ला -लं, अबहुः -हुः -हु, *see* Scanty.—(Lean) कृशः -शा -शं, *see* Lean, Meagre.

Spared, *p. p.* न व्ययितः -ता -तं, न व्ययीकृतः &c., विसर्जितः &c., विसृष्टः -ष्टा -ष्टं, त्यक्तः -क्ता -क्तं, अवशेषितः &c. *See* Saved.

Spareness, *s.* कृशता, कार्श्यं, कृशाङ्गता, क्षीणता. *See* Leanness.

Sparing, *a.* परिमितव्ययी -यिनी -यि (न्), अल्पव्ययी &c., परिमितः -ता -तं, अल्पः -ल्पा -ल्पं, अबहुलः -ला -लं. *See* Saving.

Sparingly, *adv.* परिमितं, अल्पशस्, स्तोकशस्; 'eating sparingly,' परिमिताहारः -रा -रं, मिताशनः -ना -नं, मितभुक् *m. f. n.* (ज्).

Spark, *s.* (Of fire) अग्निकणः, वह्निकणः, अग्निकणिका, ज्वलनकणः, कणः -णिका, स्फुलिङ्गः -ङ्गा -ङ्गं -ङ्गकः, विस्फुलिङ्गः, उल्का, अग्निलवः.—(Gay fellow) छेकः, *see* Fop.—(Small particle) कणः, कणिका, लेशः, लवः, अणुः *m.*

Sparkle, *s. see* Spark.—(Luminous particle) तेजःकणः, स्फुरत्कणः.

To sparkle, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), विस्फुर्, स्फुलिङ्गान् उत्क्षिप् (c. 6. -क्षिपति -क्षेपुं) or विक्षिप् or विकृ, तेजःकणान् विकृ or विक्षिप्, स्फुल् (c. 6. स्फुलति -लितुं), विस्फुल्. *See To* glitter.

Sparkling, *part.* or *a.* स्फुरन् -रन्ती -रत् (त्), स्फुरितप्रभः -भा -भं, स्फुलिङ्गविक्षेपी -पिणी -पि (न्), दीप्तिमान् &c. *See* Glittering.

Sparring, *s.* मौष्टा, क्रीडामौष्टा, मुष्टीमुष्टि, क्रीडायुद्धं. *See* Boxing.

Sparrow, *s.* चटकः, चटकपक्षी *m.* (न्), कलविङ्कः -ङ्कः, कलाविकलः, गृहनीडः, वृषायणः, गृहबलिभुक् *m.* (ज्).

Spasm, *s.* अङ्गग्रहः, ग्रहः, ग्रहामयः, आकर्षः, अङ्गाकर्षः, शूलं, अङ्गशूलं, अङ्गसङ्कोचः, सङ्कोचः, आक्षेपकः, अङ्गाक्षेपकः, अपतन्त्रकः, अपतानकः; 'in the side,' पार्श्वशूलं, पार्श्वग्रहः.

Spasmodic, *a.* अङ्गाकर्षकः -का -कं, अङ्गाकर्षी -र्षिणी -र्षि (न्), अङ्गाक्षेपकः &c., अङ्गसङ्कोचकः -का -कं, अङ्गसङ्कोचनः -ना -नं, अङ्गग्रही -हिणी &c.; 'spasmodic contraction,' आकर्षः, अपतानकः, अपतन्त्रकः.

To spatter, *v. a.* पङ्कादिना सिच्, पङ्कम् अवसिच् or अवकृ. *See To* bespatter.

Spatula, spattle, *s.* लेपनयन्त्रं, लेपनी, प्रलेपनी, प्रलेपकः.

Spavin, *s.* अश्वानां सन्धिशोथः or सन्धिगुल्मः or सन्धिवृद्धिः *f.*

Spavined, *a.* सन्धिशोथरोगी -गिणी -गि (न्), सन्धिगुल्मरोगी &c.

Spawl, *s.* निष्ठूतं, मुखनिःसारितं जलं, मुखनिःसारितलाला.

Spawn, *s.* (Of fish) मत्स्याण्डं, मीनाण्डं, जलाण्डकः, मत्स्यण्डिकः, मत्स्यण्डिकादि *n.*—(Of frogs) भेकाण्डं, मण्डूकाण्डं.

Digitized by Google

To SPAWN, *v. n.* मत्स्याण्डानि प्रसु, मीनाण्डानि प्रसु or उत्पद् (c. 10. -पादयति -यितुं), भेकाण्डानि प्रसु, अण्डोत्पत्तिं कृ, अण्डप्रसवं कृ.

To SPEAK, *v. n.* वद् (c. 1. वदति -दितुं), प्रवद्, समावद्, वच् (c. 2. वक्ति -क्तुं), प्रवच्, ब्रू (c. 2. ब्रवीति, ब्रूते, वक्तुं), भाष् (c. 1. भाषते -षितुं), प्रभाष्, सम्प्रभाष्, गद् (c. 1. गदति -दितुं), निगद्, भण् (c. 1. भणति -णितुं), आलप् (c. 1. -लपति -पितुं), जल्प् (c. 1. जल्पति -ल्पितुं), उपजल्प्, संजल्प्, वाक्यम् ईर् (c. 10. ईरयति -यितुं) or उदीर्, अह् (used only in the 2d pret. आह), शब्द् (c. 10. शब्दयति -यितुं), अभिशब्द्, संशब्द्.—(Speak of) कथ् (c. 10. कथयति -पितुं), संकथ्, अभिधा (c. 3. -दधाति -धातुं), *see To* MENTION.

To SPEAK, *v. a.* (Utter, pronounce) उच्चर् (c. 10. -चारयति -यितुं), उदाहृ (c. 1. -हरति -हर्तुं), व्याहृ, उदीर् (c. 10. -ईरयति -यितुं), समुदीर्, प्रवद् (c. 1. -वदति -दितुं), गद् (c. 1. गदति -दितुं).

SPEAKER, SPEAKING, *s.* or *part.* वक्ता *m.* (क्तृ), वक्त्री *f.*, वादी *m.* -दिनी (न्), भाषी *m.* -षिणी (न्), वाचकः, वदः, अभिधायी *m.*, वदावदः; 'speaking little,' अल्पभाषी -षिणी -षि (न्), मितभाषी &c.; 'speaking much,' बहुभाषी &c.; 'speaking the truth,' सत्यभाषी &c.; 'pleasant speaker,' प्रियवादी &c., प्रियंवदः -दा -दं.

SPEAKING, *s.* भाषणं, वादः, आलापः -पनं, गदः -दनं, निगदः, उक्तिः *f.*, भणितिः *f.*, उदीरणं, वाक्योदीरणं, उदाहरणं, अभिधानं, उच्चारणं, व्याहरणं, व्याहारः, कथनं.

SPEAR, *s.* शूलः -लं, शक्तिः *f.*, शल्यं, प्रासः, कुन्तः -न्ती, शलाका, कीलः, तोमरः; 'head of one,' शूलाग्रं, फलं.

To SPEAR, *v. a.* शूलेन व्यध् (c. 4. विध्यति, व्यद्धुं). *See To* LANCE.

SPEARMAN, *s.* शूली *m.* (न्), शूलधरः, शक्तिधरः, शक्तिग्रहः, शाक्तीकः, शक्तिहेतिकः, प्रासिकः, कौन्तिकः, शलाकी *m.*, शूलपाणिः *m.*

SPECIAL, *a.* (Designating or belonging to a species) जातिवाचकः -का -कं, जातिविषयकः -का -कं, जातिसम्बन्धी &c., जातीयः -या -यं, जाति in comp.; 'special property or characteristic,' जातित्वं, जातिधर्म्मः, जातिलक्षणं.—(Particular, peculiar) विशेष in comp., विशेषकः -का -कं, सविशेषः -षा -षं, असाधारणः -णा -णं, असामान्यः -न्या -न्यं, अव्यापी -पिनी &c., अव्यापकः -का -कं, अव्याप्यः -प्या -प्यं, अवच्छेदकः -का -कं, सोपाधिकः -की -कं, *see* PARTICULAR; 'special rule,' विशेषविधिः *m.*; 'special text,' विशेषवचनं; 'special duty,' विशेषधर्म्मः; 'special occasion,' समयविशेषः; 'provided for by special mention,' प्रतिपदोक्तः -क्ता -क्तं.—(Extraordinary, uncommon) अप्राकृतः -ती -तं, लोकोत्तरः -रा -रं, अप्रसिद्धः &c.—(Designed for this particular purpose) तदुद्देशकः -का -कं, तदुद्दिष्टः -ष्टा -ष्टं, तन्निमित्तकः -का -कं, तद्धेतुकः -का -कं.—(Special plea in law) प्राङ्न्यायः.

SPECIALLY, *adv.* विशेषतस्, विशेषेण, सविशेषं, असाधारणतस्, मुख्यशस्.

SPECIALTY, *s.* विशेषता, वैशेष्यं, विशेषः, असाधारणत्वं, असाधारण्यं, असामान्यं, अव्यापकत्वं, अव्यापित्वं.

SPECIE, *s.* मुद्राङ्कितसुवर्णरूप्यादि *n.*, मुद्रितसुवर्णादि, मुद्रा, *see* COIN.

SPECIES, *s.* जातिः *f.*, प्रकारः, विशेषः, भेदः, प्रभेदः, जातं, जातिमात्रं, लूनकः, परापरं; 'the human species,' मनुष्यजातिः *f.*; 'the dog species,' श्वजातिः *f.*

SPECIFIC, SPECIFICAL, *a.* विशेषजातीयः -या -यं, जातीयः &c., विशेषजातिविषयकः -का -कं, विशेषजातिसम्बन्धी -न्धिनी &c., व्यक्तः -क्ता -क्तं, विशेष in comp., विशेषकः -का -कं, विशेषणः -णा -णं, असाधारणः -णी -णं, असामान्यः -न्या -न्यं, जाति in comp.; 'specific gravity,' जातीयगुरुत्वं; 'specific character,' जातिस्वभावः, जातिधर्म्मः, जातिलक्षणं, जातित्वं, साधारणं, सामान्यलक्षणं, सामान्यं.

SPECIFIC, *s.* (Remedy) विशेषौषधं, सविशेषौषधं, असाधारणौषधं.

SPECIFICALLY, *adv.* जातितस्, जातित्वेन, स्वभावतस्, निसर्गतस्, विशेषतस्.

SPECIFICATION, *s.* विशेषनिर्देशः, विशेषाभिधानं, विशेषकथनं, विशेषोद्देशः -शनं, विशेषोपदेशः, विशेषपरिसंख्या, विशेषवर्णनं -ना, प्रत्यवयववर्णनं -ना, परिसंख्या -ख्यानं, व्यवच्छेदः -दनं, अवच्छेदः -दनं, निर्देशः, उपदेशः, अभिधानं, भेदनं.

SPECIFIED, *p. p.* निर्दिष्टः -ष्टा -ष्टं, उपदिष्टः &c., उद्दिष्टः &c., परिसंख्यातः -ता -तं, उक्तलक्षणः -णा -णं, निर्दिष्टलक्षणः &c., व्यवच्छिन्नः -न्ना -न्नं, अवच्छिन्नः &c., विशेषितः -ता -तं, भेदितः -ता -तं, वाचनिकः -की -कं; 'about to be specified,' वक्ष्यमाणः -णा -णं; 'it will be specified,' वक्ष्यते.

To SPECIFY, *v. a.* विशेषतस् or अवयवशस् or प्रत्यवयवं कथ् (c. 10. कथयति -यितुं) or अभिधा (c. 3. -दधाति -धातुं), एकैकशो निर्दिश् (c. 6. -दिशति -देष्टुं) or उद्दिश् or समुद्दिश्, एकैकशो दृश् (c. 10. दर्शयति -यितुं), विशेषनिर्देशं कृ, विशेषकथनं कृ, विशेषवर्णनं कृ, विशेष (nom. विशेषयति -यितुं), विशिष् (c. 7. -शिनष्टि -शेष्टुं).

SPECIMEN, *s.* आदर्शः, निदर्शनं, प्रतिरूपं, प्रतिमानं, प्रतिमा, उपमा.

SPECIOUS, *a.* सत्याभासी -सिनी -सि (न्), सत्याभासकः -का -कं, प्रमाणाभासी &c., सत्याभासात्मकः -का -कं, आभासी &c., सत्यसदृशः -शी -शं, सत्यसन्निभः -भा -भं, सत्यसङ्काशः -शा -शं, अविचाररमणीयः -या -यं, आपातरमणीयः &c., अविचारसुन्दरः -री -रं, अविचारदर्शनीयः -या -यं, बहिर्दर्शनीयः &c., बाह्यतो दर्शनीयः &c., सुदृश्यः -श्या -श्यं; 'using specious arguments,' आभासवादी *m.* (न्).

SPECIOUSLY, *adv.* सत्याभासेन, सत्याभासपूर्व्वं, सत्यसदृशं, सव्याजं.

SPECIOUSNESS, *s.* सत्याभासः -सत्वं, सत्यसादृश्यं. *See* PLAUSIBILITY.

SPECK, SPECKLE, *s.* (Spot, mark, stain) चिह्नं, विन्दुः *m.*, विप्रुट् *f.* (ष्), विप्रुष् *f.*, अङ्कः, कलङ्कः, तिलकः -कं; 'of mud,' पङ्कविन्दुः *m.*, पङ्कचिह्नं; 'speck or flaw in gold, &c.,' स्फारः; 'in the eye,' पुष्पं, तिलपुष्पं.—(Minute particle) कणः, कणिका, लवः, अणुः *m.*, सूक्ष्मविन्दुः *m.*

To SPECKLE, *v. a.* चित्र (c. 10. चित्रयति -यितुं), चित्रीकृ, विन्दुचित्रितं -तां कृ, विन्दुचिह्नितं -तां कृ, चित्रविचित्रीकृ, शवलीकृ, कर्बुरीकृ.

SPECKLED, *p. p.* or *a.* चित्रितः -ता -तं, विन्दुचित्रितः &c., विन्दुचित्रकः -का -कं, चित्रः -त्रा -त्रं, चित्री -त्रिणी -त्रि (न्), चित्राङ्गः -ङ्गी -ङ्गं, चित्रविचित्रः -त्रा -त्रं, विन्दुचिह्नितः &c., कर्बुरितः &c., शवलीकृतः &c., तिलकी -किनी &c.; 'a speckled snake,' चित्रसर्पः.

SPECTACLE, *s.* (Show, something wonderful exhibited) प्रेक्षा -क्षणं, कौतुकं, चमत्कारः.—(Anything seen) प्रेक्षा -क्षणं, दृष्टिविषयः.

SPECTACLES, *s. pl.* उपनेत्रं -त्रे *n. du.*, सुलोचनं -ने *n. du.*, दिव्यचक्षुषी *n. du.*, दृष्टिसहायौ *m. du.*, दृष्टिसाहाय्यककाचौ *m. du.*, दृगुपकारकौ *m. du.*, दृगुपकारककाचौ *m. du.*, काचद्वयनिर्म्मितम् अधिकिरणवक्त्रत्वकारकं यन्त्रं.

SPECTATOR, *s.* प्रेक्षकः, प्रेक्षणिकः, प्रेक्षणकः, प्रेक्षी *m.* (न्), प्रेक्षिलोकः, द्रष्टा *m.* (ष्टृ), दर्शी *m.* (न्), प्रेक्षमाणः, पारिषदः, पारिषद्यः, परिषद्यः, पार्षदः, सामाजिकः.

SPECTRE, *s.* छाया, माया, भूतं, प्रेतछाया, प्रेतः, वेतालः, *see* GHOST; 'to raise a spectre,' छायाम् उद्भू (c. 10. -भावयति -यितुं).

SPECULAR, *a.* दर्पणगुणकः -का -कं, आदर्शगुणकः &c., आदर्शधर्म्मकः &c.

To SPECULATE, *v. n.* (Meditate) मनसा विचर् (c. 10. -चारयति -यितुं),

Digitized by Google

वितर्क् (c. 10. -तर्कयति -यितुं), विमृश् (c. 6. -मृशति -मर्ष्टुं), मनसा परिकॢप् (c. 10. -कल्पयति -यितुं), कल्पनां कृ, परिकल्पनां कृ.—(In commerce) व्यापारं कृ, धनव्यापारं कृ.

SPECULATION, *s.* (Meditation) मानसविचारः, मनसा विचारः -रणं, वितर्कः, परिकल्पना, विमर्शः.—(Scheme) कल्पना, उपायः, युक्तिः *f.*; 'good speculation,' सुकल्पना; 'bad,' कुकल्पना.—(In commerce) व्यापारः, धनव्यापारः.

SPECULATIVE, *a.* (Contemplative) ध्यानशीलः -ला -लं, *see* MEDITATIVE.—(Theoretical, not practical) काल्पनिकः -की -कं, मनःकल्पितः -ता -तं, मानसिकः -की -कं, मनसिजः -जा -जं, मनोभवः -वा -वं, अव्यावहारिकः -की -कं, अव्यवहार्य्यः -र्य्या -र्य्यं, व्यवहारायोग्यः -ग्या -ग्यं.

SPECULATOR, *s.* परिकल्पकः, कल्पनाकृत्.—(In commerce) धनव्यापारी *m.* (न्).

SPECULUM, *s.* दर्पणः -णं, आदर्शः, धातुमयदर्पणं, धातुदर्पणं.

SPEECH, *s.* (Faculty of speech, speaking) वाक् *f.* (च्), वाणी, वाचा, गीः *f.* (गिर्), गिरा, उक्तिः *f.*, वाक्शक्तिः *f.*, वदन्तिः *f.*, निगदः, निगादः, व्याहारः, व्याहृतिः *f.*, भाषणं, भाषा, वचनं, प्रवचनं, वादः, लापः, अभिलापः, लपितं, लपनं, वाग्व्यापारः, शब्दव्यापारः, भणितिः *f.*, निदेशः, भारती, सरस्वती, राधना, कासूः *f.*, शब्दजालं.—(Words, that which is spoken) वाक्यं, वचनं, वचस् *n.*, उक्तिः *f.*, उक्तं, भाषणं, भाषा, भाषितं, लपितं.—(Harangue) वाक्यं, सालङ्कारवाक्यं, अलङ्कारवद्वाक्यं.—(Language) भाषा, उक्तिः *f.*; 'cleverness of speech,' वाक्चातुर्य्यं, वाक्कौशल्यं, वाक्पटुता; 'liberty of speech,' वाग्प्रतिबन्धः, वाङ्मुक्तिः *f.*; 'control of it,' वाङ्निरोधः, वाग्दण्डः, वाङ्नियमः -मनं; 'softness of speech,' वाङ्माधुर्य्यं; 'stopping one's speech,' वाग्बन्धनं; 'elegance of speech,' शब्दलालित्यं; 'covert speech,' व्याजोक्तिः *f.*; 'bad speech,' दुर्वचनं, दुरुक्तिः *f.*, दुर्भाषणं, दुर्वाच्यं; 'mere speech,' वाङ्मात्रं; 'opening of speech,' वाङ्मुखं; 'of measured speech,' मितवाक् *m. f. n.* (च्), मितभाषी -षिणी &c.; 'Part of speech in grammar,' शब्दः; 'goddess of speech,' सरस्वती, भारती, वाग्देवी, *see* SARASWATÍ.

To SPEECHIFY, *v. n.* वाक्यं वद्, सालङ्कारवाक्यं वद्. *See To* HARANGUE.

SPEECHLESS, *a.* वाग्रहितः -ता -तं, वाचाहीनः -ना -नं, स्तम्भितवाक्. *See* MUTE.

SPEED, *s.* वेगः, शीघ्रता, जवः, प्रजवः, जूतिः *f.*, जवनं, सत्वरता, त्वरा, जूर्णिः *f.*, तूर्णिः *m.*, रयः, रभसः, तरसी, तरस् *n.*, रंहतिः *f.*, रंहस् *n.*, आशुगमनं, त्वरितगतिः *f.*, स्यदः. *See* QUICKNESS.

SPEEDILY, *adv.* शीघ्रं, त्वरितं, सत्वरं, झटिति, सद्यस्, सपदि, आशु, क्षिप्रं, सरभसं, अचिरात्, न चिरेण. *See* QUICKLY.

SPEEDY, *a.* त्वरितः -ता -तं, शीघ्रः -घ्रा -घ्रं, द्रुतः -ता -तं, महावेगः -गा -गं, वेगवान् -वती -वत् (त्), त्वरितगतिः -तिः -ति, शीघ्रगतिः &c., प्रजवी -विणी -वि (न्), तूर्णः -र्णा -र्णं, क्षिप्रः -प्रा -प्रं. *See* QUICK, SWIFT.

SPELL, *s.* (Charm) मन्त्रः, अभिचारमन्त्रः, *see* CHARM; 'book of spells,' मन्त्रशास्त्रं; 'reciter of spells,' मन्त्रवादी *m.* (न्), मन्त्री *m.*—(Turn) वारः, पर्य्यायः, वासरः.

SPELL-BOUND, *a.* अभिमन्त्रितः -ता -तं, अनुमन्त्रितः &c., मन्त्रितः &c.

To SPELL, *v. a.* or *n.* अक्षराणि गण् (c. 10. गणयति -यितुं) or संख्या (c. 2. -ख्याति -तुं), अक्षराणि रच् (c. 10. रचयति -यितुं) or विरच् or विन्यस् (c. 4. -अस्यति -क्षितुं), यथाक्षरं or यथावर्णं शब्दान् संख्या, अक्षरविरचनं कृ, अक्षरविन्यासं कृ, वर्णविन्यासं कृ, अक्षररचनां कृ, वर्णरचनां कृ, वर्णयोजनां कृ, अक्षरयोजनां कृ.

SPELLED, SPELT, *p. p.* गणिताक्षरः -रा -रं; 'in two ways,' द्विरूपः -पा -पं.

SPELLING, *s.* अक्षरगणना, अक्षरविन्यासः, अक्षरविन्यसनं, अक्षररचना, अक्षरविरचनं, वर्णविन्यासः, वर्णरचना, वर्णयोजना, शुद्धाक्षररचना; 'variation in spelling,' पाठान्तरं, पाठः; 'spelling-book,' अक्षरविन्यासशिक्षापुस्तकं.

SPENCER, *s.* कञ्चुकः, कञ्चुलिका, अङ्गिका, हस्तकञ्चुकः, *see* JACKET.

To SPEND, *v. a.* (Expend) व्ययीकृ, व्यय् (c. 1. व्ययति, c. 10. व्यययति -यितुं, rt. इ), उपयुज्, विनियुज्, *see To* EXPEND.—(Consume, exhaust) क्षि, क्षीणीकृ, विक्षिप्, नश् in caus., सद् in caus., *see* EXHAUST.—(Time, &c.) कालं गम् (c. 10. गमयति -यितुं) or वृत् (c. 10. वर्त्तयति -यितुं) or नी (c. 1. नयति, नेतुं) or वह् or या in caus., *see To* PASS, *v. a.*

SPENDING, *s.* व्ययः, व्ययीकरणं, विनियोगः, *see* EXPENDITURE.

SPENDTHRIFT, *s.* व्ययशीलः, अर्थनाशी *m.*, अतिव्ययी *m.*, अर्थघ्नः, *see* PRODIGAL.

SPENT, *p. p.* व्ययीकृतः -ता -तं, व्ययीभूतः -ता -तं, व्ययितः &c., अपचितः &c., विनियुक्तः -क्ता -क्तं, *see* EXPENDED, EXHAUSTED; 'well-spent time,' सत्कालक्षेपः.

SPERM, *s.* शुक्रं, वीजं, धातुः *m.*, धातुराजः -जकं, वीर्य्यं. *See* SEMEN.

SPERMACETI, *s.* तिमिमेदस् *n.*, तिमिवसा, तिमिस्नेहः, तिमितैलं.

SPERMATIC, *a.* (Consisting of sperm), *see* SEMINAL.—(Conveying it) शुक्रवाही -हिनी -हि (न्), वीजवाही &c.—(Producing it) शुक्रकरः -री -रं.

To SPEW, *v. a.* वम् (c. 1. वमति -मितुं), उद्वम्, छर्द्. *See To* VOMIT.

